
N.A.
Shiva mahapurane: gyan sambita
शिवमहापुराणे: ज्ञान संहिता
Sanskrit
Paper - Printed
1866 Sakabda (134 years old)
215 Folio
14.7" x 8.4"
Complete

॥ अथ शिवमहापुराणे ज्ञानसंहिता प्रारभ्यते ॥

ज्ञान संहितायां



श्रीगणेशायनमः ॥ श्रीसांबसदाशिवायनमः ॥ ध्यायामिश्रुतिसंवेद्यंसच्चिदानंदलक्षणम् ॥ सांबमप्यगुणंब्रह्मशिवंद्वयविलक्षणम् ॥ १ ॥ स्वभूस्वयंभुवौ पूर्वंयन्मायावशगौरवम् ॥ कृत्वैवप्रापतुर्यस्मादमायावशगौरवम् ॥ २ ॥ तंभजेमाधवादित्यगणेशगिरिजायुतम् ॥ हरंतंनिजभक्तानामाविद्यांमुक्तिदंहरम् ॥ ३ ॥ श्रीगुरुंपितरौवाणींवेदव्यासमुखान्मुनीन् ॥ शंकरानंदतीर्थादीन्नत्वास्मृत्वागुरोर्गिरः ॥ ४ ॥ व्याख्यायतेशिवमहापुराणंसर्वसिद्धिदम् ॥ अलीकृत्य रसावास्त्यैमनःशिवपदांबुजे ॥ ५ ॥ अत्रादौ भगवान् श्रीबादरायणाचार्यौनास्तिकमतनिराकरणपूर्वकमास्तिकमतव्यवस्थापनपरश्चराचरनिखिलजगन्नियमनमूलभूतौ शिवौ प्रातिपिपादयिषंस्तादृशशिवतत्वप्रतिपादकंशैवमादिमहापुराणं चिकीर्षुः स्वतःसिद्धविघ्नविरहयुतोऽपि कलिकृतकल्मषोपमर्दितजनप्रारिप्सितकर्मणोनिर्विघ्नपरिसमाप्तिर्मंगलं विना न भवेदितितस्यावश्यकर्तव्यतामुपदेष्टुकामःसन्स्वयंतादृशशिवदेवतानमस्काररूपं मंगलं कुर्वं

जगतःपितरंशंभुंजगतोमातरंशिवाम् ॥ तत्पुत्रंचगणाधीशंनत्वैतद्वर्णयाम्यहम् ॥ १ ॥
वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि ॥ यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे ॥ २ ॥

न्निजजनशिक्षार्थंनिबध्नन् चिकीर्षितं प्रतिजानीते ॥ जगतइति ॥ गच्छंतीतिजगदितिव्युत्पत्त्याजंगमपरत्वेऽपि रूढिशक्त्या चराचरात्मकस्य जगतइत्यर्थः॥जगतःस्वस्यच कल्याणप्रार्थनाय शंभुमिति शिवामितिचोक्तम्॥ सकलविघ्ननियामकत्वात्तत्पुत्रमपि नमति ॥ गणाधीशेति ॥ एतत् शिवतत्त्वम् वर्णयामीति ॥ वर्णनंच लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलोव्यापारः शिवतत्वप्रतिपादकशैवमहापुराणकथनमितियावत् ॥ १ ॥ पुराणमूलभूतवागभिमानिदेवतायाभारत्याअप्याश्रयत्वात्सर्वमंगलप्रदायालक्ष्म्यानिवासभूतत्वाच्च सर्वज्ञं नृसिंहं प्रार्थयते ॥ वागीशेति ॥ संवित् सर्वजगद्विषयकंज्ञानमित्यर्थः ॥ यःसर्वज्ञः ससर्वविद्यस्यज्ञानमयंतपइत्यादिश्रुतेरितिभावः ॥ अयंश्लोकः श्रीमद्भागवतव्याख्याने श्रीधराचार्यैर्लिखितत्वान्नव्यासकृतइति वदन्ति ॥ उपलब्धसर्वपुस्तकेषु दृष्टत्वात्व्याख्यातइतिबोध्यम् ॥ २ ॥ ॥ ॥ ॥

एवं मंगलं विधाय परमकारुणिकोनानावेदव्यवस्थापनाय नानेतिहासपुराणशास्त्ररचनाप्रकटितपरमेश्वरलीलावतारोभगवान्सत्यवतीसुतः श्रीवेदव्या
सोऽनाद्यविद्यामूलकतापत्रयजालसंबद्धान्भवाब्धौ निमग्नाभिज्ञजनानुद्धर्तुकामस्तेषां परमंपुरुषार्थलाभाय श्रीशिवतत्वमेव प्रधानसाधनमिति तदेवोपास्य
त्वेनोपदिदिक्षुश्चिकीर्षितं श्रीशैवमादिमहापुराणं प्रणयतिस्म ॥ तच्च सकलपुराणपारावारपारीणसूतशौनकादिप्रश्नोत्तररूपसंवादमुखेनानुबंधचतुष्टयप्रदर्शन
पूर्वकंप्रस्तौति ॥ एकदेति ॥ मुनयोमंतारोवेदोदिततत्त्वार्थावगमनसमर्थाः शौनकादयः ॥ एतेनैतादृशानामेवश्रवणाद्यधिकारोदर्शितः ॥ सर्वइति ॥ एते
न सर्वेषां शिवतत्वशुश्रूषायामैकमत्यं दर्शितम् ॥ नैमिषेति ॥ नैमिषपदव्युत्पत्तिर्दर्शितावाराहपुराणे एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा ॥ उवाचनिमिषेणे
दंनिहतंदानवंबलम् ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् ॥ भविष्यतियथार्थंवैब्राह्मणानांविशेषकमिति ॥ नैमिशइतितालव्ययुक्तपाठोऽपिसाधुः
तथाच वायवीये एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते ॥ यत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः ॥ इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयम् ॥ प्रणिपत्यमहा

एकदामुनयःसर्वेनैमिषारण्यवासिनः ॥ पप्रच्छुःपरयाभक्त्याव्यासशिष्यंगुणान्वितम् ॥ ३ ॥
ऋषयऊचुः ॥ सूतसूतमहाभागचिरंजीवसुखीभव ॥ पिबंतस्त्वन्मुखांभोजाच्च्युतंज्ञानामृतंवयम् ॥ ४ ॥

देवंविससर्जपितामहः ॥ तेऽपिहृष्टतमाविप्राःप्रणम्यजगतांप्रभुम् ॥ प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत ॥ तद्वनंतेनविख्यातंनैमिशंमुनिपूजितमिति ॥ नै
मिषारण्यनिवसनशीलानैमिषारण्यवासिनः ॥ एतेनैतेषामत्युत्कटतपःशीलत्वंदर्शितम् ॥ पप्रच्छुरिति ॥ एतेन प्रच्छधात्वर्थज्ञीप्साघटकज्ञानगोचरत्वेनैतत्पु
राणप्रतिपाद्यंशिवतत्वंविषयस्तज्ज्ञानरूपंप्रयोजनंच दर्शितम् ॥ प्रतिपाद्यप्रतिपादकभावरूपस्तुसंबन्धः स्पष्टएवेतिबोध्यम् ॥ भक्त्येति श्रवणंकीर्तनंवि
ष्णोःस्मरणंपादसेवनम् ॥ अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनमित्याद्युक्तलक्षणयेत्यर्थः ॥ व्यासशिष्यमिति ॥ एतेन सूतस्य सर्वपुराणहृदयज्ञातृत्वंसू
चितम् ॥ ३ ॥ सूतेति ॥ वीप्सयाआदरातिशयोदर्शितः ॥ चिरमिति ॥ अनेन मुनीनांस्वाभीष्टफलप्रेप्सयौत्कंठ्यंदर्शितम् ॥ च्युतं निःसृतं ज्ञानं भगवत्तत्त्व
ज्ञानमेवामृतम् एतेनप्रसिद्धामृतप्राशनजन्यानंदाऽपेक्षया भगवत्तत्वज्ञानजन्यानंदउत्कर्षः सूचितः ॥ ४ ॥ ॥ ॥ ॥

तत्र हेतुमाह ॥ अवितृप्ताइति ॥ पुराणांतरश्रवणेन तृष्णाविच्छेदेऽपि विशिष्टतृप्त्यभावादित्यर्थः ॥ अतएवाह ॥ पुनरिति ॥ इच्छामहइति ॥ अत्रत ऋ षेः ननु सूतस्य विलोमजातीयत्वात्कथमुपदेशकर्तृत्वयोग्यत्वमतआह ॥ अनघेति ॥ भगवदपरोक्षज्ञानवत्त्वेन निर्धूतकल्मषेत्यर्थः ॥ दर्शितंचैतन्महा भारतव्याख्यायां चतुर्धरनीलकंठेन सूतजातेरुत्पत्तिरुक्तावायुपुराणे वैन्यस्यतुपृथोर्यज्ञेवर्तमानेमहात्मनः ॥सुत्यायामभवत्सूतःप्रथमंवर्णवैकृतमिति ॥ वर्णवै कृतमितिब्राह्मण्यांक्षत्रियात्सूतइति याज्ञवल्क्योक्तविलोमजत्त्वमित्यादिग्रंथेन ॥ शूद्रकमलाकरेतु ॥ सूतःप्रजापतिस्त्वन्योमायारूपीजनार्दनः ॥ वक्तावे दादिशास्त्राणांपुराणानांचसस्मृतः ॥ अन्यइतिनाम्नैवसूतोनतुजात्येत्युक्तम् ॥ अतःप्रष्टव्यलाभोऽन्यस्मान्नसंभवतीत्याह ॥ व्यासप्रसादादिति ॥ अ सीतिशेषः सर्वज्ञतायाःफलंदर्शयंतीत्याह यातइति ॥ कृतेति ॥ कृतानि कृत्यानि श्रवणमननादीनियेन सतस्यभावस्तत्तातान् ॥ ५ ॥ सर्वज्ञत्वं न सांप्रतिकवस्तुमात्रविषयकमपितुत्रैकालिकवस्तुविषयकमपीतिनञ्द्वयेन दृढीकुर्वन्नाह ॥ नाज्ञातमिति ॥ गुरुकृपयैवैतादृशयोग्यताप्राप्तिरित्याह ॥ गुरोरिति ॥ वेदव्यासस्येत्यर्थः ॥ सर्वमिति ॥ अधीतवेदस्मृतिपुराणादिकमित्यर्थः ॥ सार्थीकृतं तत्त्वज्ञानरूपफलसंपादनेन सफलीकृतम् ॥ ६ ॥

अवितृप्ताःपुनःकिंचित्प्रष्टुमिच्छामहेऽनघ ॥ व्यासप्रसादात्सर्वज्ञोयातोऽसिकृतकृत्यताम् ॥५॥ नाज्ञातंविद्यतेकिंचि त्भूतंभव्यंभवच्चयत् ॥ गुरोःकृपांसमासाद्यसर्वंसार्थीकृतंत्वया ॥ ६ ॥ कथयत्त्वंप्रसादेनशिवरूपमनुत्तमम् ॥ तत्पू जांपरमांदिव्यांचरित्राण्यप्यनेकशः ॥ ७ ॥ अगुणोगुणतांयातःकथंलोकेमहेश्वरः ॥ शिवतत्त्वंवयंसर्वेनजानीमो विचारतः ॥ ८ ॥ सृष्टेःपूर्वंकथंदेवस्तन्मध्येचकथंपुनः ॥ तदंतेचकथंतिष्ठेच्छंकरोलोकशंकरः ॥ ९ ॥

एवंचैतादृशैस्तत्त्वज्ञानिभिः सच्छिष्याः पुनःपुनरुपदेष्टव्याइत्याह ॥ कथयेति ॥ प्रसादेन नतुबलात्कारेण ॥ शिवरूपमिति ॥ निर्गुणं सगुणं च शिवतत्त्वमित्यर्थः ॥ अनुत्तममिति ॥ नविद्यते उत्तमंयस्मादितिपंचम्यर्थेबहुव्रीहिः ॥ सर्वोत्कृष्टमित्यर्थः ॥ तत्पूजामिति ॥ शिवस्यपूजामित्यर्थः ॥ परमां सर्वोत्तमां दिव्यां दिविभवांदेवादिभिरप्याद्रियमाणाम् ॥ चरित्राणि सृष्टिकर्तृत्वादिवैभवानि ॥ अर्थाच्छिवस्येति भावः ॥ ७ ॥ शिवस्य सगुणरूपस्वीकारं विना सृष्ट्यादिवैभवं नसंभवतीतिप्रश्नमुखेनाह ॥ गुणतामिति ॥ सगुणत्वमित्यर्थः ॥ अर्शआद्यजंताद्गुणशब्दाद्भावेतल्प्रत्ययः ॥ ननु ज्ञातेवस्तुनि जिज्ञासा नयुक्तेत्याशंक्याह ॥ शिवेति ॥ सामान्यतोज्ञातत्वेऽपि विशिष्य नजानीमइत्यर्थः ॥ ८ ॥ त्रिकालाबाध्यत्वेऽपि परमेश्वरस्य कस्मिन्काले कीदृशी स्थितिरिति पृष्टवन्तइत्याह ॥ सृष्टेरिति ॥ तन्मध्ये सृष्टिमध्ये ॥ तदंते प्रलयकाले ॥ ९ ॥

ईश्वरप्रसादनोपायप्रकारंतद्देयफलस्वरूपंच पृष्टवंतइत्याह ॥ कथमिति॥ यच्छतइति॥आत्मनेपदमार्षम्॥सुव्रतेति॥शोभनंव्रतं शमदमनियमनादिकं यस्य सतथोक्तस्तत्संबुद्धौ ॥१०॥ देवस्य सद्यःप्रसादस्तावत्केनोपायेनभवेदितिपृष्टवन्तइत्याह॥सद्यइति॥ अनुशुश्रुमेति इतिहासपुराणादावित्यादिः॥ अन्यदिति॥ पृष्टादंशादन्यदित्यर्थः॥तथाचनापृष्टःकस्यचिद्ब्रूयादिति न्यायावतारानवकाशात्प्रश्नानुरूपोत्तरपुरस्कारेणसकलशैववैभवज्ञानसंपत्तिसंभवइतिभावः॥११॥ ॥ प्रश्नमुपसंहरति ॥ इतीति ॥ तैःशौनकादिभिःइतिपूर्वोक्तप्रकारेण पृष्टः सर्वशास्त्रविशारदोरौमहर्षणिःसूतोहर्षसमन्वितःसन्नृषीणांशृण्वतांसताम्रृषिसमक्षम् ॥ वचनंप्रश्नोत्तरमुवाचोक्तवानितिसंबन्धः ॥ १२ ॥ इतिश्रीशिवमहापुराणटीकायांसारबोधिन्यां परिपाटिकानामप्रथमोऽध्यायः ॥ १ ॥ ॥ ओनमःशिवाय ॥ ब्रह्मस्वरूपमव्यायप्रकृतेःपुरुषस्यच ॥ प्रादुर्भावश्चतत्वानामुत्पत्यादिकमुच्यते ॥ एवमृषिभिःपृष्टोभगवान्रौमहर्षणिः शिवतत्त्वकथने

कथंप्रसन्नतांयातिप्रसन्नःकिंफलंपुनः ॥ यच्छतेसर्वलोकेभ्यःसर्वंकथयसुव्रत ॥ १० ॥ सद्यःप्रसन्नोभगवान्भवतीत्यनुशुश्रुम ॥ एतत्सर्वंतथाचान्यत्कथनीयंत्वयानघ ॥ ११ ॥ इतिपृष्टस्तथातैर्हिश्रुत्वाहर्षसमन्वितः ॥ उवाचवचनंतत्रऋषीणांशृण्वतांतदा ॥ १२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपरिपाटिकानामप्रथमोऽध्यायः ॥ १ ॥

सूतउवाच ॥ सम्यक्पृष्टंभवद्भिस्तुयथावत्कथयाम्यहम् ॥ कपोलकल्पितंनैवकथयिष्येमुनीश्वराः ॥ १ ॥ भवद्भिःपृच्छ्यतेयद्वत्तथानारदेनवै ॥ पृष्टंपित्रेस्वयंतत्रज्ञानायपरमात्मने ॥ २ ॥ कस्मिंश्चित्समयेविप्रानारदोमुनिसत्तमः ॥ पृथिव्यामटनंकृत्वाशिवरूपाण्यनेकशः ॥ ३ ॥ ॥ ॥

परमौत्सुक्यंदर्शयन्मुनिपृष्टमभिनंदति ॥ सम्यगिति ॥ कथयामीति ॥ वर्तमानसामीप्यइतिलड्थेंलट् ॥ कथयिष्यामीत्यर्थः ॥ स्वोक्तावप्रामाण्यशंकांनिरस्यति ॥ कपोलेति ॥ यथावत् यथार्थम् ॥ कथयिष्यइति ॥ णिचश्चेत्यात्मनेपदम् ॥ मुनीश्वराइत्यनेनैतादृशानामेव मननादिसामर्थ्यमितिसूचितम् ॥ १ ॥ ननु भवदुक्तावप्रामाण्यशंकानिरासे किंबीजमित्याशंक्याह ॥ भवद्भिरिति ॥ नारदेन परमात्मने पित्रे ब्रह्मणे स्वयंपृष्टमित्यन्वयः ज्ञानाय अर्थाच्छिवतत्त्वज्ञानप्राप्तये ॥ हिरण्यगर्भाख्यब्रह्मणःसर्वज्ञत्वादिना परमात्मत्वम् परमात्मनइतिषष्ठ्यंतपाठे शिवस्येत्यर्थः तस्य ज्ञानायेत्यत्रसंबन्धः॥ २ एवमुक्त्वाब्रह्मनारदसंवादमुखं भगवतः सृष्टिकर्तृत्वादिवैभवस्य निरूपकमितिहासंवक्तुमुपक्रमते ॥ कस्मिंश्चिदिति ॥ शिवरूपाणि शिवलिंगस्थानानि ॥ अनेकशइति ॥ अनेन नारदनिष्ठशिवतत्त्वजिज्ञासायांपरमोत्कटत्वंसूचितम् ॥ ३ ॥ ॥ ॥ ॥

दृष्ट्वेति क्त्वाप्रत्ययैर्दर्शनादेः शिवतत्त्वज्ञानप्रत्यसाधारणकारणत्वं दर्शितम् ॥ तथाचाग्रेवक्ष्यति ॥ मुक्तिकामोभवेद्योवैपंचकोट्याशिवंनरः ॥ ज्ञानार्थीचतदादे वंकोट्यावैपूजयेच्छिवमिति॥महात्मनः शिवस्य तत्त्वं वास्तवस्वरूपं ज्ञातुम् निश्चेतुम् विचिंतयन् ध्यायन्॥अनेनाशिवतत्त्वज्ञानस्योपदेशंविना दुष्प्रापत्वंसूचि तम्॥४॥ ब्रह्मन्निति ईदृशैःपदैर्ब्रह्मणः स्वाभिमुखीकरणान्नारदस्य शिवतत्त्वज्ञानसंपादने परमोत्कंठा दर्शिता ॥ विष्णोर्माहात्म्यमिति मत्स्याद्यवतारादिचरित्र मित्यर्थः ॥ एतदादेः श्रुतवानित्यत्र संबन्धः ॥ ५ ॥ भक्तिमार्गमिति भक्तेर्मार्गः साधनं भक्तिरेव भगवत्प्राप्तौ परमसाधनमित्यर्थप्रतिपादकंशास्त्रमितियावत् एवमग्रेपिबोध्यम् ॥ भक्तेःस्वरूपलक्षणंत्वथातोभक्तिजिज्ञासेतिभक्तिमीमांसामधिकृत्य सापरानुरक्तिरीश्वरइति शांडिल्याचार्येणाऽभिहितम् ॥ पुराणांतरे ष्वपि ॥ माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोऽधिकः ॥ स्नेहोभक्तिरितिप्रोक्तस्तयामुक्तिर्नचान्यथेति ॥ श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् ॥ अर्चनंवन्द नंदास्यंसख्यमात्मनिवेदनमिति ॥ तथा पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरम् ॥ श्रद्धाऽमृतकथायांमेशश्वन्मदनुकीर्तनम् ॥ परिनिष्ठाचपूजायांस्तुति भिःस्तवनंमम ॥ आदरःपरिचर्यायांसर्वांगैरभिवन्दनम् ॥ मद्भक्तपूजाप्यधिकासर्वभूतेषुमन्मतिः ॥ मदर्थेष्वंगचेष्टाचवचसामद्गुणेरणम् ॥ मय्यर्पणंचमन सःसर्वकामविवर्जनम् ॥ मदर्थेऽर्थपरित्यागोभोगस्यचसुखस्यच ॥ इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः ॥ एवंविधैर्मनुष्याणामुद्धवाऽत्मनिवेदनम् ॥ मयिसंजा

दृष्ट्वानत्वाचसंपूज्यतत्त्वंज्ञातुंमहात्मनः ॥ पप्रच्छब्रह्मणेतच्चशिवरूपंविचिंतयन् ॥ ४ ॥ श्रीनारदउवाच ॥ ब्रह्मन्ब्र ह्मविदांश्रेष्ठपितामहजगत्प्रभो ॥ त्वत्प्रसादान्मयासर्वंविष्णोर्माहात्म्यमुत्तमम् ॥ ५ ॥ भक्तिमार्गंज्ञानमार्गंतपोमा र्गंसुदुष्करम् ॥ दानमार्गंचतीर्थानांमार्गंचश्रुतवानहम् ॥ ६ ॥ ॥ ॥ ॥

यतेभक्तिःकोऽन्योऽर्थोस्यावशिष्यतइत्यादीनि श्रीमद्भागवताद्युक्तानि भक्तेः कारकहेतवोज्ञापकानि वा लिंगानि ॥ यथा धर्ममीमांसायामथातोधर्मजि ज्ञासेति धर्ममीमांसामधिकृत्य चोदनालक्षणोऽर्थोधर्मइति धर्मस्य स्वरूपलक्षणमुक्तं जैमिनिना ॥ श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः ॥ एतच्चतुर्वि धंप्राहुःसाक्षाद्धर्मस्यलक्षणमित्यादीनि मन्वादिवचनान्यप्येतत्समानार्थकानि ॥ धृतिःक्षमादमोस्तेयंशौचमिन्द्रियनिग्रहः॥ धीर्विद्यासत्यमक्रोधोदशकंधर्मल क्षणमित्यादीनि तु धर्मस्य कारकहेतवोज्ञापकलिंगानि वा ॥ तत्फलमपि दर्शितंभगवता संतुष्टःसततंयोगीयतात्मादृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्योमे भक्तःसमेप्रियइति गीतायाम् ॥ यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् ॥ योगेनदानधर्मेणश्रेयोभिरितरैरपि ॥ सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंऽजसे ति श्रीमद्भागवतेऽपि ॥ ज्ञानमार्गमिति ॥ समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयंयद्वेदान्तप्रतिपाद्यंब्रह्मतत्त्वंतदेकत्ववि ज्ञानमार्गमित्यर्थः तत्प्रसंसाच ॥ तमेवंविद्वानमृतइहभवति नान्यःपन्थाविद्यतेऽयनायेति ॥ आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः ॥ किमिच्छन्क

स्यकामायशरीरमनुसंज्वरेदित्यादिश्रुतिभिः श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यते ॥ तद्विद्धिप्रणिपातेनपरिप्रश्नेन सेवया ॥ उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनः ॥ यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपाण्डव ॥ येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि ॥ अपिचेदसिपापे भ्यःसर्वेभ्यःपापकृत्तमः ॥ सर्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि ॥ यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेति भगव द्गीतायांभगवता यथोक्तान्यपिकर्माणिपरिहायद्विजोत्तमः॥आत्मज्ञानेसमेतःस्यादिदाभ्यासेनयत्नवानितिमनुना अयंचपरमोधर्मोयद्योगेनात्मदर्शनमिति याज्ञ वल्क्येनचाविहिता ॥ तच्च ज्ञानम् वेदार्थविचारिभिरेव प्राप्यते ॥ नावेदविन्मनुतेतंबृहन्तमितिश्रुतेः ॥ विस्तरेणात्विदमुपरिष्टाद्यथावसरमुपपादयिष्यते ॥ तपो मार्गमिति तपःकृच्छ्रचान्द्रायणादिकर्म तन्मार्गमित्यर्थः तपोनाशनानशनात्परमिति श्रुतिमनुसंधाय तपश्चस्वाध्यायप्रवचनेचेति शीक्षोपनिषद्वाक्य व्याख्यानावसरेऽशनपरित्यागरूपंकृच्छ्रचान्द्रायणादिव्रतंतपइत्युच्यतइतिविद्यारण्यैर्व्याख्यातत्वात् तपइतितपोनित्यः पौरुशिष्टिरित्येतद्भाष्येपितथैवोक्तत्वा त् तपःकृच्छ्रादिकर्मचेतिकोशाच्च एवंच तपःशब्दस्यमुख्यार्थोऽयमेव ॥ स्वाध्यायप्रवचनेएवेतिनाकोमौद्गल्यः तद्धितपइत्यनेनान्यत्रापितस्यप्रवृत्तिर्दर्शितेत्यभि प्रेत्य तपसाब्रह्मविजिज्ञासस्वेतिवारुण्युपनिषद्वाक्यव्याख्यानावसरेतपःशब्देनाश्रमचतुष्टयधर्मोविवक्षितःतस्यब्रह्मज्ञानहेतुत्वात्॥अनाश्रमिधर्मस्यजपादेरपि तद्धेतुत्वंयद्यपि निर्णीतंतथाप्याश्रमिणांधर्मोऽतिप्रशस्तः॥तथा च बादरायणेन सूत्रितमतस्त्वितरज्ज्यायोलिंगाच्चेति ॥ आश्रमधर्मेऽपि तपःशब्दः श्रुतिस्मृत्योः प्रयुज्यते॥तपोहिस्वाध्यायइतिब्रह्मचारिधर्मः॥एतत्खलुवावतपइत्याहुर्यत्स्वंददातीतिगृहस्थधर्मः॥तपोनानशनात्परमितिवनस्थधर्मः॥मनसश्चेन्द्रियाणांचह्यैका ग्र्यंतुपरंतपः ॥ तज्ज्यायःसर्वधर्मेभ्यःसधर्मःपरउच्यतइति यतिधर्मः ॥ तत्र स्वाध्यायेन ब्रह्मावबोधे प्रमाणं संपादितं भवति ॥ दानेन विविदिषोत्पद्यते ॥ विविदिषंतियज्ञेनदानेनेतिश्रुतेः ॥ अनशनस्यैंद्रियदर्पनिवारकत्वं प्रसिद्धम् ॥ ऐकाग्र्यस्य साक्षादेव ज्ञानहेतुत्वम् ॥ दृश्यतेत्वग्र्यया बुध्येत्याम्नातमिति व्याख्यातम् ॥ एवंचपुरुषार्थसाधनभूतमार्गान्तराणामत्रस्पष्टतयाऽनुक्तत्वेपि तपोमार्गमित्यनेनैव संग्रहः कर्तुंशक्यइति नन्यूनताशंकनीया॥भक्तिमार्गादीनां पृथग्ग्रहणंतु ब्राह्मणवसिष्ठन्यायेन ॥ तीर्थशब्दस्य नानार्थत्वात् वक्ष्यमाणतीर्थमार्गेवा तत्संग्रहइतिबोध्यम् ॥ सुदुष्करमिति ॥ अनेनास्येतरमार्गापे क्षयाधिकशरीराद्यायाससाध्यत्वं बोधितम् ॥ दानमार्गमिति ॥ तत्रनारायणीयोपनिषदि दानंयज्ञानांवरूथंदक्षिणालोकेदातारंसर्वभूतान्युपजीवन्तिदानेनारा तीरपानुदन्तदानेनद्विषन्तोमित्राभवन्तिदानेसर्वंप्रतिष्ठितंतस्माद्दानम्परमंवदन्तीत्याम्नातम्॥ व्यासोऽपि दानप्रशंसामाह ॥ आयासशतलब्धस्यप्राणेभ्योऽपि गरीयसः ॥ गतिरेकैववित्तस्यदानमन्येविपत्तयः ॥ ग्रासादर्धमपिग्रासमर्थिभ्यःकिंनदीयते ॥ इच्छानुरूपोविभवःकदाकस्यभविष्यति ॥ मात्स्ये ॥ न्यायेनार्जन मर्थस्यवर्धनचाभिरक्षणम् ॥ सत्पात्रेप्रतिपत्तिश्चसर्वशास्त्रेषुगीयते ॥ अदातायत्रयत्रैतितत्रतत्रसुदुःखितः ॥ दानात्सुखमवाप्नोतिपरत्रापिचनिर्वृतइति ॥ विभवेस त्यदाने विस्पष्टंफलमाह याज्ञवल्क्यः अक्षरद्वयमभ्यस्तंनास्तिनास्तीतियत्पुरा ॥ तदिदंदेहिदेहीतिविपरीतमुपस्थितम् ॥ तथा द्वारंद्वारमटन्तीहभिक्षुकाःपात्रपा

णयः ॥ दर्शयन्त्येवलोकानामदातुःफलमीदृशम् ॥ वृहस्पतिः द्वावेवाप्सुप्रवेष्टव्यौगलेबध्वादृढांशिलाम् ॥ धनवंतमदातारंदरिद्रंचातपस्विनमिति ॥ दानमावश्यकंकेभ्यइत्यत्राह ॥ व्यासः ॥ मातापित्रोश्चयद्दत्तंभ्रातृस्वसृसुतासुच ॥ सोदर्येपिचयद्दत्तंसोऽतिथिःस्वर्गसंक्रमः ॥ पितुःशतगुणंदानंसहस्रं मातुरुच्यते ॥ अनन्तंदुहितुर्दानंसोदर्येदत्तमक्षयम् ॥ दातुर्लक्षणमुक्तंभविष्योत्तरे ॥ अपाप्मारोगधर्मात्मादित्सुरव्यसनःशुचिः ॥ अनिंद्योजीवकर्माचषड्भिर्दाताप्रशस्यते ॥ प्रतिग्रहीतृलक्षणमपि तत्रैव त्रिःशुक्लःक्षीणवृत्तिश्चघृणालुः सकलेन्द्रियः ॥ विमुक्तोयोनिदोषेभ्योब्राह्मणःपात्रमुच्यतइति ॥ देवलः यद्ददातियदश्नातितदेवधनिनांधनम् ॥ अन्येमृतवत्क्रीडन्तिदारैरपिधनैरपीति तीर्थानामिति गंगादितीर्थानांमार्गस्नानादिविधिरूपमित्यर्थः ॥ तत्र तीर्थानांतरन्त्येभिरितिव्युत्पत्या श्रेयःसाधनत्वंगम्यते ॥ तीर्थेस्नातितीर्थमेवसमानानांभवतीतिश्रुतेरपि ॥ तथा इमंमेगंगेयमुनइत्यादिमंत्रेषु गंगादीनामाराध्यत्वं श्रूयते ॥ महाभारते गंगास्नानंसर्वविधसर्वपापप्रणाशकम् ॥ चान्द्रायणसहस्रंतुयश्चरेत्कायशोधनम् ॥ पिबेद्यश्चापिगंगाम्भःसमौस्यातांनवासमौ ॥ भवन्तिनिर्विषाःसर्पायथाताक्ष्यर्स्यदर्शनात् ॥ गंगायादर्शनात्तद्वत्सर्वपापैःप्रमुच्यतइत्याद्युक्तं ॥ तथा पापानांपापहन्त्रीत्वंस्वर्गमोक्षैकहेतुता ॥ स्वभावएवगंगायाःशैत्यंशीतरुचेर्यथेति ॥ नचैषामर्थवादत्वं शंक्यम् ॥ स्नानमात्रेणगंगायांपापंब्रह्मवधोद्भवम् ॥ दुराधर्षंकथंयातिचिन्तयेद्योवदेदपि ॥ तस्याहंप्रददेपापंब्रह्मकोटिवधोद्भवम् ॥ स्तुतिवादमिमंमत्वाकुम्भीपाकेषुजायते ॥ आकल्पंनरकंभुक्त्वाततोजायेतगर्दभइति भविष्योत्तरकौर्मादिषु तदभाववोधनात् ॥ एवमन्येषामपितीर्थानां तत्तन्माहात्म्यप्रतिपादकपुराणादिषु प्रसिद्धंप्रशस्तत्वकीर्तनम् ॥ एषांमार्गाणां समुदायस्यैवोपधायकत्वमुतप्रत्येकमितिशंका युगभेदाधिकारिभेदादिकृतव्यवस्थया परिहर्तव्या ॥ यथाह मनुः ॥ अन्येकृतयुगेधर्मास्त्रेतायांद्वापरेपरे ॥ अन्येकलियुगेनृणांतत्तत्कर्मानुरूपतः ॥ तपःपरंकृतयुगेत्रेतायांज्ञानमुच्यते ॥ द्वापरेयज्ञमेवाहुर्दानमेवकलौयुगे ॥ एवमेव मोक्षधर्मेपिपठितम् ॥ युक्तिसिद्धेयंव्यवस्था ॥ आदियुगीयजीवानामिच्छातुरूपायुर्वलादिसिद्धिसत्वेन सुदुष्करतपोज्ञानसिद्धिविरोधिस्त्रीप्रभृतिविषयसंवन्धाभावेन तेषामेव तत्करणक्षमत्वात् ॥ स्पष्टंचैतन्मोक्षधर्मे ॥ यावद्यावदभूच्छ्रद्धादेहंधारयितुंनृणाम् ॥ तावत्तावदजीवंस्तेनासीद्यमकृतंभयम् ॥ नचैषांमैथुनोधर्मोवभूवभरतर्षभ ॥ संकल्पादेवचैतेषामपत्यमुपपद्यते ॥ ततस्त्रेतायुगेकालेसंस्पर्शाज्जायतेप्रजा ॥ नह्यभून्मैथुनोधर्मस्तेषामपिजनाधिप ॥ द्वापरेमैथुनोधर्मःप्रजानामभवन्नृप ॥ तथाकलियुगेराजन्द्वंद्वमापेदिरेजनाः ॥ यौनकाम्बोजगान्धाराःकिरातावर्बरैःसह ॥ एतेपापकृतस्तातचरन्तिपृथिवीमिमाम् ॥ श्वपाकबलगृध्राणांसधर्माणोनराधिप ॥ नैतेकृतयुगेतातचरन्तिपृथिवीमिमाम् ॥ त्रेताप्रभृतिवर्धन्तेतेजनाभरतर्षभेति ॥ दृश्यंतेच तथैवानुष्ठातारः सनकादयोजनकादयो युधिष्ठिरादयश्च परंतुप्रायिकीयंव्यवस्था ननियमः ॥ जन्मांतरादृष्टवशेन तादृशसामर्थ्ययुक्तानांयुगान्तरेष्वप्यन्ययुगीयधर्माभ्यनुज्ञानात् ॥ दृश्यते ह्युतथ्यवादीनांद्वापरे तपोर्थगमनं ॥ श्रीशुकादीनां ब्रह्मनिष्ठताच ॥ येतु कलौ विशिष्य निषिद्धाधर्माअनुबन्ध्यावधाद्यस्तेतु सर्वथा वर्ज्याएव ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥

एवमधिकारिभेदादपिव्यवस्थावेदितव्या ॥ तथाचश्रीमद्भागवते ॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ॥ ज्ञानंकर्मचभक्तिश्चनोपायोऽन्योऽस्तिकुत्रचित् ॥ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु ॥ तेष्वनिर्विण्णचित्तानांकर्मयोगस्तुकामिनाम् ॥ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ॥ न निर्विण्णोनातिसक्तोभक्तियोगोऽस्यसिद्धिदइति सत्यांशक्तावनेकमार्गादरे फलातिशयएव ॥ अधिकस्याधिकंफलमितिन्यायात् ॥ एवंचैतान्मार्गान् श्रुतवतोपि नारदस्य शिवतत्त्वजिज्ञासा न शान्तेत्याह ॥ न ज्ञातमिति ॥ तज्ज्ञानसाधनमपि न ज्ञातमित्याह ॥ पूजेति ॥ नज्ञातेतिविपरिणामेनसंवन्धः विधिवदिति यथाविधीत्यर्थः यद्वा विधिवाक्यानुसारेणेत्यर्थः क्रमादिति प्रश्नानुरूपक्रमेणेत्यर्थः ॥ विधेः प्राशस्त्यज्ञानमर्थवादश्रवणंविना न संभवतीत्याह ॥ चरित्रमिति ॥ ७ ॥ ननु सृष्ट्यादिविचारे व्यापृतचित्तस्य मे नास्त्यवसरइत्याशंक्याह ॥ सइति ॥ अहमितिशेषः ॥ संदिग्धंसंदेहः तत्सहितं तत्त्वमितिवा निर्गुणमेवनैर्गुण्यं स्वार्थेष्यञ् परमेश्वरमितिपरमेष्ठिविशेषणंतेनास्योत्तरकथने समर्थत्वंबोधितम् ॥ ८ ॥ नन्वेकाकिनोनिवृत्ततर्षस्य त

नज्ञातंशिवतत्त्वंचपूजाचविधिवत्क्रमात् ॥ चरित्रंविविधंतस्यनिवेदयममप्रभो ॥ ७ ॥ ससन्दिग्धंकथंचान्यंविहाय परमेष्ठिनम् ॥ पृच्छेयंपरमंतत्त्वंनैर्गुण्यंपरमेश्वरम् ॥ ८ ॥ तस्मात्त्वयाचवक्तव्यंमाहात्म्यंशंकरस्यच ॥ लोकानामुपकारार्थंव्रतानिचशिवस्यच ॥ ९ ॥ संतुष्टश्चैवभक्तेभ्यःकिंकिंयच्छतिवैफलम् ॥ तदुत्पत्तिंविवाहंचगिरिजायाःसविस्तरम् ॥ १० ॥ बहुभ्यश्चश्रुतंपूर्वंनतृप्तोऽस्मिजगत्प्रभो ॥ इतिश्रुत्वावचस्तस्यनारदस्यांगजस्यच ॥ ११ ॥ उवाच वचनंतत्रब्रह्मालोकपितामहः ॥१२॥ ब्रह्मोवाच ॥ भोब्रह्मन्त्साधुपृष्टोऽहंलोकानांहितकाम्यया ॥ यच्छ्रुत्वासर्वलोकानांसर्वपापक्षयोभवेत् ॥१३॥ तत्त्वंनैवमयासम्यग्विष्णुनाप्रभविष्णुना ॥ शिवस्यपरमंब्रह्मन्ननज्ञातंरूपमद्भुतम् ॥ १४ ॥

त्त्वज्ञानफलसंपन्नस्य ते किमेतज्जिज्ञासयेत्याशंक्याह ॥ लोकानामिति ॥ व्रतानि शिवसंबन्धीनि ॥ ९ ॥ प्रयोजनमनुद्दिश्यनमन्दोपिप्रवर्ततइतिन्यायेनाह ॥ संतुष्टइति ॥ तदुत्पत्तिमिति तत्तदवताररूपेणप्रादुर्भावमित्यर्थः ॥ विवाहमिति ॥ लोकदृष्ट्येदमुक्तम् ॥ नित्यतृप्तस्यप्रभोर्विवाहाद्यसंभवात् ॥ अतएवगिरिजायाइत्युक्तम् नतुतस्य गिरिजयासहेति ॥ १० ॥ अंगजस्येति ॥ अनेन तंप्रतिकथने प्रीतिपूर्विका प्रवृत्तिर्दर्शिता ॥ ११ ॥ १२ ॥ नारदस्यश्रवणादिकर्तृत्वयोग्यतांदर्शयति ॥ भोब्रह्मन्निति ॥ हितकाम्यया हितेच्छया ॥ १३ ॥ यथार्थतया शिवतत्त्वंवक्तुंनकोऽपिशक्तइत्याह ॥ तत्त्वमिति शिवस्येत्यस्यमध्यमणिन्यायेन तत्त्वमित्यत्ररूपमित्यत्रचान्वयः नैवेति ज्ञायतइतिशेषः ॥ प्रभविष्णुनेति ॥ अनेन विष्णोः सर्वापेक्षयात्र समर्थीभवनशीलता दर्शिता ॥ तदज्ञानेहेतुमाह ॥ नज्ञातमिति ॥ तत्त्वंचैवमया सम्यगितिपाठांतरम् ॥ १४ ॥ ॥ ॥

यथामति शिवतत्त्वकथनमंगीकृत्य तत्प्रभाववर्णनाय सृष्ट्यारंभं वक्तुमुपक्रमते ॥ इदमिति ॥ इदंपुरोवर्ति प्रत्यक्षमित्यर्थः ॥ इदंशब्दस्य सन्निकृष्टप्रत्यक्ष वस्तुवाचित्वात् ॥ दृश्यमिति ॥ व्याकृतनामरूपात्मकंजगदित्यर्थः ॥ नामरूपेव्याकरवाणीतिश्रुतेः ॥ नासीदिति ॥ सदेवसोम्येदमग्रआसीत् आत्मावाइद मेकएवाग्रआसीदित्यादिश्रुतेः ॥ सदसदात्मकमिति ॥ नन्वेकस्यैव वस्तुनः कथं सदसत्वे विरुद्धधर्मावितिचेत् ॥ उच्यते असद्रूपत्वमव्याकृतनामरूपत्वं तच्च सृष्टेःप्राक् ॥ सद्रूपत्वंच व्याकृतनामरूपत्वं तत्सृष्टिकालइतिकालभेदेन विरोधाभावात् ॥ तथाचश्रुतिः ॥ असद्वाइदमग्रआसीत्ततोवैसदजायतेति ॥ अने न ब्रह्मजगतोरभेदः प्रतिपाद्यते ॥ परिणामवादेहि ब्रह्मैव जगद्रूपेण परिणमते ॥ सरूपपरिणामेस्वर्णकुंडलादिवत्स्वरूपहानेरभावान्नानित्यत्वापत्तिर्ब्रह्मणः अथवा सच्छब्देनाऽस्तीतिप्रतीतियोग्यतामात्रमुच्यते असच्छब्देन बाधयोग्यत्वंतादृशयोश्च सदसत्वयोर्न विरोधः घटादिषूभयदर्शनात् इदमेव मायामय प्रपंचस्यानिर्वचनीयत्वरूपंमिथ्यात्वं यत्सत्वेन प्रतीयमानत्वे सति बाधयोग्यत्वंनतु शशशृंगादिवत्सर्वथाअसद्रूपत्वम् ॥ विवर्तवादेप्यस्मिन्ब्रह्मैव नामरू पात्मकजगद्रूपेण विवर्तते ॥ विवर्तोनामोपादानविषमसत्ताककार्यापत्तिः ॥ तत्र नामरूपांशयोर्मिथ्यात्वेऽपि शुक्ताविदंरजतमित्यादावभेदभ्रमस्य सर्वज नानुभवसिद्धतया तादृशयोरभेदस्याप्यंगीकारादिति ॥ सदेवसोम्येदमित्यादौ सत्पदेन त्रिकालाबाध्यंब्रह्मैव बोध्यतइत्याह ॥ तदेति ब्रह्ममयमिति ॥ स्वा र्थेमयट् तत्प्रकृतवचनइत्यत्रतदितिवाक्यभेदेनविधानात् तेन ब्रह्मरूपंतेजइत्यर्थः ॥ तच्चसर्वव्यापकमित्याह ॥ व्याप्तिरूपमिति ॥ अनित्याकाशादिवच्चा

इदंदृश्यंयदानासीत्सदसदात्मकंचयत् ॥ तदाब्रह्ममयंतेजोव्याप्तिरूपंचसंततम् ॥ १५॥ नस्थूलंनचसूक्ष्मंचशीतं नोष्णंतुपुत्रक ॥ आद्यंतरहितंदिव्यंसत्यंज्ञानमनंतकम् ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

स्यविभुत्वमित्याह ॥ संततमिति त्रिकालाबाध्यमित्यर्थः ॥ १५ ॥ अस्थूलमितिश्रुत्युक्तविशेषणान्याह ॥ नस्थूलमिति ॥ पुत्रकेत्यनेनतत्रानुकंपादर्शिता अ नुकंपायांकन्विधानात् ॥ अस्थूलमनणु नेतिनेतीत्यादिश्रुतिभिर्निषेधमुखेन ब्रह्मतत्वेऽवगमितेऽपि स्वरूपलक्षणज्ञानंविना न बुद्धौ तथा ब्रह्मतत्वोपारोहइति सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतिवाक्यबोधितंस्वरूपलक्षणमाह ॥ आद्यंतेति ॥ आदिरुत्पत्तिः अंतोनाशस्तदुभयशून्यमित्यर्थः ॥ दिव्यमिति ॥ अलौकिक मित्यर्थः नहिलोकेचर्मचक्षुषामकृतश्रवणादीनांब्रह्मतत्त्वमवगंतुंशक्यं तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेरितिभावः ॥ सत्यंत्रिकालाबाध्यम् ॥ नन्वयम र्थः पूर्वसंततमित्यनेन बोधितइतिचेन्न तत्राकाशादितुल्यत्ववारणाय तदुक्तम् अत्रतु लक्षणघटकतया प्रवेशार्थमित्यदोषात् ॥ ज्ञानमिति ॥ चिद्रूपमित्यर्थः ॥ अनेन ज्ञानस्वरूपमेव ब्रह्म नतु नित्यज्ञानयुक्तमिति दर्शितम् ॥ अनंतकमिति ॥ देशकालादिपरिच्छेदरहितमित्यर्थः ॥ अत्राद्यंतरहितमित्यनेन सत्यपदविव रणं पूर्वप्रदर्श्य सत्यपदमुपात्तमिति न पौनरुक्त्यम् अतएव श्रुतिवाक्ये तन्नोपात्तम् ॥ तत्र सत्यपदेन बाधयोग्यवस्तुमात्रव्यावृत्तिः ज्ञानपदेन जडजातव्या वृत्तिः अनंतकमित्यनेनपरिछिन्नवस्तुमात्रव्यावृत्तिः ॥ १६ ॥ ॥ ॥ ॥

नन्वीदृग्लक्षणंब्रह्म कैरनुभूतमित्याशंक्याह ॥ योगिनइति ॥ योगश्चित्तवृत्तिनिरोधस्तद्वंतः सनकादयः ॥ अंतरदृष्ट्या अध्यात्मदृष्ट्या ॥ तादृशयोगस्य स्वरूपमाह ॥ ध्यायंतीति ॥ ध्यानंच त्वदीश्वरालंबनप्रत्ययस्यैकतानता तत्रप्रत्ययैकतानताध्यानमितियोगसूत्रात् तस्याएवनिःश्रेयसहेतुत्वं तदा द्रष्टुः स्वरूपेऽवस्थानमितियोगसूत्रएवोक्तत्वात् ॥ निरंतरमविच्छेदेन ॥ तद्रूपमिति ॥ योगिकर्तृकध्यानकर्मीभूतपूर्वोक्तपरमात्मस्वरूपमित्यर्थः ॥ सकलमिति ॥ सर्वजगदात्मकं तदेवासीन्नततोऽन्यत्किमपीत्यर्थः ॥ अथवा इच्छामात्रेण सृष्ट्युत्पादनकलायुक्तमित्यर्थः ॥ ज्ञानविज्ञानदमिति ॥ ज्ञानविज्ञानप्रशंसोक्ताभगवद्गीतायां ॥ ज्ञानंतेऽहंसविज्ञानमित्यादिभिः ॥ तयोःस्वरूपंतु श्रीमद्भागवतैकादशस्कंधे नवैकादशपंचत्रीन्भावान्भूतेषुयेनवै ॥ ईक्षेताथैकमप्येषुतज्ज्ञानंममनिश्चितम् ॥ एतदेवहिविज्ञानंनतथैकेनयेनयत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानांत्रिगुणात्मनामित्युक्तम् ॥ प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि एकादशेंद्रियाणि पंचमहाभूतानि त्रयेगुणाः एतान्भावानष्टाविंशतितत्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येषु अनुगतानि येनज्ञानेनेक्षेत अथएष्वपि भावेषु एकंपरमात्मतत्वमनुगतंयेनेक्षेत कार्यकारणात्मकंजगत्परमकारणात्मकमेवैतत् नतु ततःपृथगितियेनपश्यतितज्ज्ञानमित्यर्थः ॥

योगिनोंतरदृष्ट्याहियंध्यायंतिनिरंतरम् ॥ तद्रूपंसकलंह्यासीज्ज्ञानविज्ञानदंमहत् ॥ १७ ॥ कियताचैवकालेनतस्येच्छासमपद्यत ॥ प्रकृतिर्नामसाप्रोक्तामूलकारणमित्युत ॥ १८ ॥ अष्टौभुजाश्चतस्यासन्विचित्रवसनाशुभा ॥ राकाचंद्रसहस्रस्यवदनंतस्यनित्यशः ॥ १९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

विज्ञानमाह एतदेवेतिश्लोकार्धेन यत् यदा येनैकेनानुगतानेकात्मकान्भावान्पूर्वमैक्षततांस्तथा पूर्ववन्नेक्षेत किंतुतदेकंपरमकारणंब्रह्मैवतदा एतदेवविज्ञानमुच्यतइतिव्याख्यातंश्रीधराचार्यैः ॥ एवंच सर्वंब्रह्मैवेतिपरोक्षधीर्ज्ञानमपरोक्षधीर्विज्ञानमितिफलितम् ज्ञानदंबुद्धिदमितिपाठेऽपीदृशएवबुद्धिज्ञानयोर्भेदोऽवगंतव्यः ॥ महदिति अनेनास्यैवोपास्यत्वंदर्शितम् ॥ १७ ॥ तदैक्षतबहुस्यांप्रजायेयेतिश्रुत्यर्थंदर्शयति ॥ कियतेति ॥ तस्यब्रह्मणः समपद्यतेति ॥ अनेननेयमपूर्वेच्छोत्पन्ना अपितु सृष्टेःपूर्वंसूक्ष्मरूपेण स्थितैव सृष्टिकाले प्रकटितेतिबोधितम् तस्यानामरूपाण्याह ॥ प्रकृतिरिति ॥ मूलकारणमिति ॥ इयमेव सर्वस्य निदानमित्यर्थः प्रकृतिर्मूलकारणमिति पर्यायौ दर्शितौ ॥ तेनप्रकृत्युपहितचैतन्यस्यैव जगत्कर्तृत्वं न शुद्धचैतन्यस्येति बोधितम् ॥ श्रीमद्भागवतेऽपि ॥ सर्गादौप्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्वादिभिर्गुणैर्धत्ते पुरुषोव्यक्तईक्षतइति प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनरितिगीतायामपि ॥ १८ ॥ किंतस्यारूपमित्याह ॥ अष्टाविति तस्येतिलिंगव्यत्ययआर्षः अथवा तस्य मूलकारणस्य अत्रश्लोके पूर्वोक्तनामद्वयानुरोधेन स्त्रीनपुंसकनिर्देशः ॥ राकेति ॥ राकापौर्णमासी तत्संबन्धिचंद्रसहस्रस्यतुल्यमितिशेषः अभूतोपमेयम् नित्यशइति ॥ अनेन तत्रवृद्धिह्रासाभावोदर्शितः ॥ १९ ॥

तस्याः सृष्टिसामर्थ्यानुमापकलिंगानि दर्शयतिद्वाभ्याम् ॥ नानेति ॥ प्रफुल्लेति ॥ अनेन तस्याउत्साहो दर्शितः बहुव्रीहौसक्थ्यक्ष्णोरितिषचिस्वार्थेकप्रत्ययेरूपम् ॥ २० ॥ ब्रह्मवत्सापिदुर्ज्ञानैवेत्याह ॥ अचिंत्येति ॥ सर्वयोनीति ॥ सर्वकारणयुक्तेत्यर्थः ॥ सर्वाण्यवांतरकारणान्यत्रैव समनुगतानीतिभावः सर्वयोनिः समुद्यतेतिपाठसर्वयोनिः सर्वकारणम् समुद्यता जगत्स्रष्टुंसम्यगुद्यमवतीत्यर्थः ॥ एकाकिनीति स्वसदृशाद्वितीयरहितेत्यर्थः ॥ तादृश्या एकस्याएव न सृष्टिहेतुत्वमित्याह ॥ संयोगादिति ॥ अनेकिका पुरुषसहिता ॥ २१ ॥ कुतः पुरुषस्यप्रादुर्भावइत्याह ॥ यतइति ब्रह्मणइत्यर्थः ॥ ततइति ब्रह्मणएवेत्यर्थः ॥ प्रादुर्बभूवेतिशेषः ॥ मिलिताविति ॥ विस्मिताविल्यपिपाठः तत्र सृष्टिविषये विचारे कथंक्रियतामेवंक्रियतामित्येवंरूपे तत्परौ आसक्तौ ॥ २२ ॥ तस्यैवविचारस्याकारंदर्शयति ॥ आवाभ्यामिति ॥ तत्र कोनिर्णयोवभूवेत्याह एतस्मिन्निति ॥ विचारसमकालइत्यर्थः वाणी

नानाभरणसंयुक्तानानागतिसमन्विता ॥ नानायुधधरादेवीप्रफुल्लपंकजाक्षिका ॥ २० ॥अचिंत्यतेजसायुक्तासर्वयोनिःसमन्विता ॥ एकाकिनीयदामायासंयोगाच्चाप्यनेकिका ॥ २१ ॥ यतोवैप्रकृतिर्देवीततोवैपुरुषस्तदा ॥ उभौचमिलितौतत्रविचारेतत्परौमुने ॥ २२ ॥ आवाभ्यांकिंप्रकर्तव्यंध्यायतःस्मपरस्परम् ॥ एतस्मिन्नंतरेवाणीसमुत्पन्नागुणाशुभा ॥ २३ ॥ तपश्चैवप्रकर्तव्यंसंशयस्यापनुत्तये ॥ ततस्ताभ्यांचतच्छ्रुत्वातपस्तप्तंसुदारुणम् ॥ २४ ॥ कियत्कालंतदाब्रह्मन्ध्यानमार्गपरायणौ ॥ प्रकृतिःपुरुषश्चैवप्रबुद्धौध्यानमार्गतः ॥ २५ ॥ प्रबुद्धविस्मयंप्राप्तौकियत्तप्तमहोइति ॥ तदंगाज्जलधाराहिसंजाताविविधामुने ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥

आकाशवाणी गुणा गुणवती अतएव शुभा संशयच्छेदनोपायबोधिका ॥ २३ ॥ कीदृशीसेत्याह ॥ तपइति ॥ तपसःफलमाह संशयस्येति ॥ सर्वंहितपसैवसाध्यमतएव तपसाब्रह्मविजिज्ञासस्वेत्याम्नातम् ॥ ततःवागुत्पत्यनन्तरं ताभ्यांप्रकृतिपुरुषाभ्यां तत् तपःप्रकर्तव्यमितिवचः श्रुत्वा श्रवणसमनंतरमेव तपः ईश्वरध्यानरूपं तप्तंकृतम् ॥ सुदारुणमिति ॥ अनेनतयोर्बहुक्लेशसहिष्णुत्वंदर्शितम् ॥ २४ ॥ ध्यानरूपतांतपसःस्पष्टयति ॥ ध्यानेति ॥ तपोऽवसानमाह ॥ प्रकृतिरिति ॥ प्रवुद्धौ ध्यानसमाधितोव्युत्थितौ ध्यानमार्गतइति पंचम्यर्थेतासिः ॥ २५ ॥ ततःकिमचिंतयतामित्याह प्रबुद्धेति तत्कृतंतपस्ताभ्यामप्यपरिच्छिन्नमतस्तौविस्मिताविल्याह ॥ विस्मयमिति ॥ विस्मयस्यकारणांतरमप्याह तदंगादिति तयोरंगादित्यर्थः अंगादित्येकवचनंजात्यभिप्रायम् ॥ जलधाराः जलप्रवाहाः ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ताभिःजलधाराभिः व्याप्तंपरिपूर्णम्॥ सकलंयावदुत्पन्नंजगत् ॥ ततःकिंजातमित्याह ॥ ब्रह्मरूपामिति ॥ तज्जलंब्रह्मरूपमासीदित्यर्थः कार्यकारणयोरभेदा दितिभावस्तत्र हेतुगर्भं विशेषणद्वयमाह॥ अनंतामिति ॥ अपरिच्छिन्नमित्यर्थः ॥ पापनाशनमिति ॥ कायिकादित्रिविधपापनाशसाधनमित्यर्थः ॥ २७ ॥ ईदृ शसामर्थ्यंच तज्जलस्य तदैव ताभ्यामनुभूतमित्याह ॥ तदेति ॥ तयासहश्रांतःपुरुषःस्वयंपरमप्रीतोवहुकालंतयासह जलेसुष्वापेत्यन्वयः॥ २८ ॥ तामेव स्थितिंनिमित्तीकृत्यप्रवृत्तंतत्पुरुषाभिधानमाह ॥ नारायणेति ॥ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः ॥ अयनंतस्यताःपूर्वमित्यादिस्मरणादितिभावः ॥ तुल्यन्यायात्तस्याअपि तादृशमेवनाम युक्तमित्याह ॥ नारायणीति ॥ तदाप्रकृतेरपिनारायणीतिनामसंमतमभूदित्यर्थः ॥ २९ ॥ सृष्टावादित्वंतयोरेवेति दर्शयति नान्यदिति ततःकिमभवदित्याह एतस्मिन्निति महात्मनः ब्रह्मणः संवधीनितत्वानिवभूवुरित्यर्थः ॥ ३० ॥ कानितानितत्वानीतितदाह ॥ प्रकृतेरिति महान् महत्तत्वम् एतदेव सांख्यादिभिर्बुद्धिरंतःकरणमितिचोच्यते गुणाःसत्वरजस्तमांसि यद्यप्यन्यत्रत्रिगुणात्मिका प्रकृतिरित्युक्तं तथा

ताभिर्व्याप्तंचसकलंब्रह्मरूपमभूज्जलम् ॥ अनंतंह्यभवत्तच्चस्पर्शनात्पापनाशनम् ॥ २७ ॥ तदाश्रांतश्चपुरुषस्तया सहजलेस्वयम् ॥ सुष्वापपरमप्रीतोबहुकालंतयासह ॥२८॥ नारायणेतिवैनामजातंतस्यमहात्मनः॥ नारायणी तिवैनामप्रकृतेःसम्मतंमुने ॥ २९ ॥ नान्यत्किंचित्तदाह्यासीत्प्रकृतिंपुरुषंविना ॥ एतस्मिन्नंतरेब्रह्मंस्तत्वान्यासन्म हात्मनः ॥ ३० ॥ प्रकृतेश्चमहानासीन्महतश्चगुणास्त्रयः ॥ अहंकारस्ततोजातस्ततस्तन्मात्रकाःपराः ॥ ३१ ॥ पंचभूतान्यतोप्यासन्ज्ञानविज्ञानकान्यतः ॥ तत्वानामितिसंख्यानमुच्यतेऋषिसत्तम ॥ ३२ ॥ ॥ ॥

प्यत्र ' प्रकृतिपदेनाव्यक्तस्वरूपभेदंगुणत्रयंग्राह्यंगुणाइत्यनेन व्यक्तस्वरूपभेदमिति नदोषः ॥ इदंगुणत्रयात्मकमेकंतत्वम् ॥ ततस्तेभ्यःअहंकारः अ हंदेवोऽहंमनुष्यइत्याद्यभिमानरूपः ततः तस्मादहंकारात् तन्मात्रकाःशब्दस्पर्शरूपरसगंधात्मकाः सूक्ष्मतत्वविशेषाः ॥ ३१ ॥ अतः शब्दादिपंचतन्मा त्राभ्यःक्रमेणपंचभूतानि वियत्पवनतेजोंऽवुभुवः अतः एभ्यः ज्ञानविज्ञानकानि ज्ञानविज्ञानकशब्दाभ्यामेकादशेंद्रियाण्युच्यंते वागादीनि पंच कर्मेंद्रिया णि चक्षुरादीनि पंच ज्ञानेंद्रियाणि मनश्चेत्यन्यत्रप्रतिपादितानि ॥ तत्वानामियत्तांदर्शयति इतिसंख्यानमिति ॥ महदादीनि चतुर्विंशतिस्तत्वान्युक्तानीत्य र्थः॥ ननु तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिवाक्येषु वियत्पवनतेजोंऽवुभुवांक्रमेणसर्गःश्रूयते श्रुत्यंतरेऽन्यथापि त्रिगुणात्मकप्रकृतेरेवमहदादि सृष्टिक्रमःकैश्चिदाचार्यैःस्मर्यते ॥ अव्यक्ताच्चमहानात्मासमुत्पद्यातिपार्थिव ॥ महतश्चाप्यहंकारउत्पन्नोहिनराधिप ॥ अहंकाराच्चसंभूतंमनोभूतगुणात्मक म् ॥ मनसस्तुसमुद्भूतामहाभूतानराधिपेति मोक्षधर्मेषुजनकंप्रतियाज्ञवल्क्यवाक्यानिसंति किंच कालांतरेमृतानांकालांतरीयैःसह संवादादिकं पुराणादिषु

दृश्यते एवंबहुषुस्थलेषु श्रुतिस्मृतीतिहासपुराणादिवाक्यानां सृष्टिक्रमेतत्वसंख्यायांच भूयान्मिथोविरोधोदृश्यते तत्कथमस्यपरिहारइतिचेत् ॥ उच्यते क ल्पभेदेनतत्त्वानांपरस्परानुप्रवेशेन भगवच्छक्तेरचिंत्यतयाच सर्वत्र विरोधःपरिहर्तव्यः स्पष्टंचैतद्धरिवंशे ॥ देवानांदानवानांचगंधर्वोरगरक्षसाम् ॥ संभवःक थितःपूर्वंदक्षस्यचमहात्मनः ॥ अंगुष्ठाद्ब्रह्मणोजातोदक्षःप्रोक्तस्त्वयाऽनघ ॥ वामांगुष्ठात्तथाचैवतस्यपत्नीव्यजायत ॥ कथंप्राचेतसत्वंसपुनर्लेभेमहातपाः ॥ एतन्मेसंशयंविप्रसम्यगाख्यातुमर्हसि ॥ दौहित्रश्चैवसोमस्यकथंश्वशुरतांगतः ॥ वैशंपायनउवाच ॥ उत्पत्तिश्चनिरोधश्चनित्योभूतेषुपार्थिव ॥ ऋषयोत्रन मुह्यंतिविद्वांसश्चैवयेजनाः ॥ युगेयुगेभवंत्येतेसर्वेदक्षादयःपुरा ॥ पुनश्चैवनिरुध्यंतेविद्वांस्तत्रनमुह्यतीति ॥ श्रीमद्भागवतेतु भगवतैवेयमुद्धवशंकापरिहृता ॥ यथा उद्धवउवाच ॥ कतितत्वानिविश्वेशसंख्यातान्यृषिभिःप्रभो ॥ नवैकादशपंचत्रीण्यात्थत्वमिहशुश्रुम ॥ केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिम् ॥ सप्तैके नवषट्केचिच्चत्वार्येकादशापरे ॥ केचित्सप्तदशप्राहुःषोडशैकेत्रयोदश ॥ एतावत्वंहिसंख्यानामृषयोयद्विवक्षया ॥ गायन्तिपृथगायुष्मन्निदंनोवक्तुमर्हसि ॥ श्रीभगवानुवाच ॥ युक्तयःसंतिसर्वत्रभाषंतेब्राह्मणायथा ॥ मायांमदीयामुद्गृह्यवदतांकिन्नुदुर्घटम् ॥ नैतदेवंयथात्थत्वंयदहंवच्मितत्तथा ॥ एवंविवदतांहेतु

जडात्मकंचतत्सर्वंप्रकृतिंपुरुषंविना ॥ ताभ्यामेकीकृतंतच्चचतुर्विंशतिसंज्ञितम् ॥ ३३ ॥ तद्गृहीत्वाचसुष्वापजलेब्रह्मस्व रूपिणि ॥ सुप्तेनारायणेदेवेनाभौपंकजमुत्तमम् ॥ ३४ ॥ अनंतपत्रिकायुक्तंकर्णिकारसमन्वितम् ॥ अनंतयोजनायाम मनंतोच्छ्रायसंयुतम् ॥ ३५ ॥ कोटिसूर्यप्रतीकाशंसुंदरंतत्वसंयुतम् ॥ तस्मात्पद्मात्ततोजज्ञेपुत्रोऽहंहेमगर्भकः ॥ ३६ ॥

शक्तयोमेदुरत्ययाः ॥ यासांव्यतिकरादासीद्विकल्पोवदतांपदम् ॥ प्राप्तेशमदमेप्येतिवादस्तमनुशाम्यति ॥ परस्परानुप्रवेशात्तत्त्वानांपुरुषर्षभ ॥ पौर्वापर्यप्रसं ख्यानंयथावक्तुर्विवक्षितम् ॥ एकस्मिन्नपिदृश्यन्तेप्रविष्टानीतराणिच ॥ पूर्वस्मिन्वापरस्मिन्वातत्वेतत्वानिसर्वशइत्यादिभिः ॥ भगवद्गीतायामपि बहूनिमे व्यतीतानिजन्मानितवचार्जुन ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ॥ अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् ॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया ॥ यदायदाहिधर्मस्यग्लानिर्भवतिभारत ॥ अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं ॥ परित्राणायसाधूनांविनाशायचदुष्कृतां ॥ धर्मसंस्थापनार्थायसंभवामियुगे युगइति ॥ ३२ ॥ ताभ्यामिति ॥ प्रकृतिपुरुषाभ्यामित्यर्थः ॥ चतुर्विंशतीति ॥ चतुर्विंशतितत्वात्मकमित्यर्थः ॥ चतुर्विंशतिसंयुतमितिपाठेचतुर्विंशतितत्वयुक्तमित्यर्थः ॥ ३३ ॥ गृहीत्वेति ॥ स्वायत्तीकृत्येत्यर्थः ॥ ३४ ॥ कर्णिकरेति ॥ कर्णिकांपंकजबीजकोशमृच्छंतिप्राप्नुवंतीति कर्णिकाराःकिंजल्काः ॥ ऋगतौ कर्मण्यण् कर्णिका करिहस्ताग्रे करमध्यांगुलावपि ॥ क्रमुकादिच्छटांशेब्जवराटेकर्णभूषणे ॥ बीजकोशेसरोजस्यकरमध्यांगुलावपीतिहैमः ॥ तैर्युक्तमित्यर्थः ॥ आयामोऽत्रवि स्तारःउच्छ्रायउच्चत्वम् ॥ ३५ ॥ तत्वसंयुतंपूर्वोक्ततत्वयुक्तम् तस्मात्स्वोत्पत्तिमाह ॥ तस्मादिति ॥ हेमगर्भकःहिरण्यगर्भः ॥ ३६ ॥ ॥

तन्मायामोहितइति ॥ परमात्ममायामोहितइत्यर्थः ॥ मोहस्यफलमाह ॥ नाविदमिति ॥ कमलातिरिक्तंकिमपि न ज्ञातवानित्यर्थः ॥ तदानींस्वस्वरूपादि विषयेऽपि संशयोभूदित्याह ॥ कोऽहमिति ॥ ३७ ॥ नधीरिति ॥ ममनिश्चयोनजातइत्यर्थः ॥ विधिर्मासमपद्यतेतिपाठे संशयनिवर्तनोपायं चिंतयितुंदेवमे वानुकूलंवभूवेत्याह ॥ विधिरिति ॥ ३८ ॥ परमेश्वरप्रसादात्संशयनिवर्तनोपायं चिंतयितुंबुद्धिस्फूर्तिरभवदित्याह ॥ किमर्थमिति ॥ आयातइति ॥ आया मीत्यपिपाठः ॥ तमेवोपायंदर्शयति ॥ यत्रेति ॥ कमलस्थलमिति ॥ कमलोत्पत्तिस्थानमित्यर्थः ॥ ३९ ॥ अवरोहयन्निति ॥ नीचैर्गच्छन्नित्य

तन्मायामोहितश्चाहंनाविदंकमलंविना ॥ कोहंवाकुतआयातःकिंकार्यंतुमदीयकम् ॥३७॥ कस्यपुत्रोऽहमुत्पन्नःकेनै वनिर्मितोह्यहम् ॥ इतिसंशयमापन्नंनधीर्मांसमपद्यत ॥ ३८ ॥ किमर्थंमोहमायातोयत्रवैकमलस्थलम् ॥ मत्कर्ताचभवेत्तत्रभविष्यतिनसंशयः ॥ ३९ ॥ इतिबुद्धिंसमास्थायकमलादवरोहयन् ॥ नालेनालेगतस्तत्रवर्षा णांशतकंमुने ॥ ४० ॥ नलब्धंतुमयातत्रकमलस्थानमुत्तमम् ॥ संशयंतुपुनःप्राप्तःकमलंगंतुमुत्सुकः ॥ ४१ ॥ आरुरोहाथकमलंनालमार्गेणवैमुने ॥ कुड्मलंकमलस्याथलब्धवान्नविमोहितः ॥ ४२ ॥ नालमार्गेतुभ्रमतोग तंवर्षशतंपुनः ॥ क्षणमात्रंतदातत्रश्रांतोऽतिष्ठंविमोहितः ॥ ४३ ॥ तदावाणीसमुत्पन्नातपेतिपरमाशुभा ॥ त च्छ्रुत्वातुतपस्तप्तंद्वादशाब्दंप्रयत्नतः ॥ ४४ ॥ तदावैभगवान्विष्णुश्चतुर्बाहुःसुलोचनः ॥ ममैवानुग्रहंकर्तुंपीतां बरधरःशुभः ॥ ४५ ॥ शंखचक्रायुधस्तत्रगदापद्मधरःपरः ॥ घनश्यामःसुसंतुष्टःप्रसन्नमुखपंकजः ॥ ४६ ॥

र्थः ॥ णिच्स्वार्थेवाहुलकात् अवरोहयदितिपाठेप्यार्षरूपमवारोहमित्यर्थः ॥ कमलाभ्यंतरेह्यहमित्यपिपाठांतरम् ॥ नालेनालइति ॥ संभ्रमादिनाद्विरुक्तिः ॥ वर्षाणामिति ॥ वर्षव्यवहारस्तदानींकल्पितएव अनंतकालोपलक्षणंवा ॥ ४० ॥ गंतुमिति ॥ पुनःस्वोत्पत्तिस्थानभूतंकमलंप्राप्तुमित्यर्थः ॥ ४१ ॥ ॥ तथापितन्नप्रापेत्याह ॥ कुड्मलमिति ॥ कुड्मलंमुकुलं तदलाभेहेतुमाह ॥ विमोहितइति ॥ भगवन्माययेतिशेषः ॥ ४२ ॥ भ्रमतइति ॥ ममे तिशेषः ॥ तत्रेति ॥ नालमार्गएवेत्यर्थः ॥ ४३ ॥ वाणीआकाशवाणी साकीदृशीत्याह ॥ तपेति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ ॥

मुकुटादीति ॥ विनयोजयःसत्यसंधइतिवत् पुराणेषुक्वचिच्छंदोभंगेऽपिनक्षतिः ॥ प्रकृत्या पूर्वोक्तया ॥ ४७ ॥ तमिति ॥ पुंस्त्वमार्षं ॥ तदि तिपाठःसुगमः ॥ कालात्मेति ॥ कालःकलयतामहमित्युक्तेः ॥ शुक्लकृष्णइति ॥ वर्णोवर्णेनेतिसमासः ॥ सात्विकत्वेपिदुरात्मनाशायस्वीकृततमोगुणइत्यर्थः ॥ एतत्सर्वमायिकमित्याह॥ निर्गुणइति ॥ शुद्धचैतन्यस्वरूपइत्यर्थः ॥ ४८ ॥ तदेतत्सर्वमभिप्रेत्याह ॥ सदसन्मयइति ॥ अनिर्वचनीयस्वरूपइत्यर्थः ॥ यआसीदितिशेषः ॥ तथाभूतमिति ॥ एवंगुणंमत्पुरःप्रादुर्भूतमित्यर्थः ॥ ४९ ॥ मोहितइति ॥ भगवत्साक्षात्कारेप्यजय्यैवमायेतिभावः ॥ तत्प्रयुक्तमेवस्व धार्ष्ट्यंदर्शयति ॥ कस्त्वमिति ॥ ५० ॥ इत्येतदिति ॥ ममेतिशेषः॥ नामतइति ॥ सात्विकत्वेननिरभिमानतयाऽहंतवकर्तेत्यनुक्त्वाविष्णुस्तवनिर्मातेतिनाममात्रेणा

मुकुटादिभूषणैर्युक्तःकोटिकंदर्पसम्मतः ॥ प्रकृत्याजनितःसोऽथमयादृष्टःपुरोमुने ॥ ४७ ॥ तंदृष्ट्वासुंदरंरूपंवि स्मयंपरमंगतः ॥ कालात्माकांचनाभश्चशुक्लकृष्णश्चनिर्गुणः ॥ ४८ ॥ नारायणोमहाबाहुःसर्वात्मासदसन्मयः ॥ तथाभूतमहंदृष्ट्वाहर्षितोह्यभवंतदा ॥ ४९ ॥ माययामोहितस्तस्यतमवोचममर्षितः ॥ कस्त्वंवदेतिहस्तेनस मुत्थाप्यसनातनम् ॥ ५० ॥ प्रबुद्धोभगवांस्तत्रकथंकथयसुव्रत ॥ इत्येतद्वचनंश्रुत्वानामतोभगवान्हरिः ॥ ५१ ॥ सत्वेनपरमोविष्णुर्निर्मातातवसुव्रत ॥ वत्सजानीहिभद्रंतेसत्यमेतद्वदाम्यहम् ॥ ५२ ॥ तस्यतद्वचनंश्रुत्वास्मि तपूर्वंमहामुने ॥ माययामोहितस्त्वंवैपरिभर्त्स्यपुनस्तदा ॥ ५३ ॥ भाषसेवत्सवत्सेतिसर्गसंसारपालकम् ॥ मा माहाल्पस्मितंकृत्वागुरुःशिष्यमिवानघ ॥ ५४ ॥ कर्तारंजगतांसाक्षात्प्रकृतेश्चप्रवर्तकम् ॥ सनातनमजंविष्णुंविरं चेविश्वसंभवम् ॥ ५५ ॥ विश्वात्मानंविधातारंधातारंपंकजेक्षणम् ॥ किमर्थंभाषसेमोहाद्वक्तुमर्हसिसत्वरम् ॥ ५६ ॥

हेत्यर्थः ॥ नमतइतिपाठेअनमतइतिच्छेदः ॥ ५१ ॥ तदेवविशदयति ॥ सत्वेनेति ॥ सत्वगुणेनोपलक्षितइत्यर्थः ॥ इत्थंभूतलक्षणेतृतीया ॥ सत्वगुणप्रधा नइतियावत् ॥एवंचमत्तएवत्वंसंजातइत्यभिप्रेत्याह॥वत्सेति ॥५२॥ माययेति ॥ माययामोहितोऽहंतंनिर्भर्त्स्य त्वंवत्सवत्सेतिमांकथंभाषसइत्यवोचमित्यर्थः ॥ ५३ ॥ ५४ ॥ तामेवविष्णूक्तिमनुवदति ॥ कर्तारमितिद्वाभ्याम् ॥ प्रकृतेर्मायायाः ॥ विरंचइति ॥ विरचयतीतिविरंचिस्तत्संबुद्धौ हेविरंचे विरंचिमितिपा ठेकेवलंयोगार्थमादायविष्णुरेवविशेषणीयः॥ पृषोदरादिः ॥ विश्वसंभवमिति ॥ विश्वस्यसंभवोयस्मात्तम् ॥ ५५॥कार्यकारणयोरभेदादाह ॥ विश्वात्मानमिति ॥ विधातारं कर्तारं ॥ धातारं धारयितारम् ॥ व्यस्कंभ्नाद्रोदसीविष्णुरेतेदाधारपृथिवीमितिश्रुतेः ॥ वक्तुमर्हसिकिमितिकाकुः ॥ ५६ ॥ ॥

कर्तेति ॥ कर्ताभर्ताहर्ताऽहमेवास्मीति त्वंविलोकयेत्यर्थः ॥ तत्रहेतुमाह ॥ भवानिति ॥ अव्ययादविनाशिनःअंगविशेषणमेतत् ॥ ५७ ॥ अनामयं अविद्याकृततापरहितम् ॥५८॥ अच्युतमिति ॥ नाच्योष्टस्वपदादित्यच्युतम् ॥ ईशानमीश्वरम् ॥ प्रभवेति ॥ प्रभवे उत्पत्त्यर्थं उद्भवःप्रादुर्भावोयस्यतम् ॥ इदंत्वदज्ञानविलसितम् ॥ ५९ ॥ मम संभवमिति ॥ मयिसमाविष्टमित्यर्थः ॥ संभवत्यवहरतिपचतीति पाणिनिसूत्रेसंपूर्वकस्यभवतेस्तथार्थदर्शनात् ॥ ममेतिसप्तम्यर्थेषष्ठी संभवमित्यत्रकर्तरिप्रत्ययः॥ ६०॥ अविद्यावृतोत्रब्रह्माऽहमिवत्वमपिकुतश्चिज्जन्यएवेत्युवाचेत्याह तवेति॥ इत्युक्तानारदमाहेतिशेषः ॥६१॥चक्रइत्युत्तमपुरुषैकवचनम्॥६२॥

सोपिमामाहजगतांकर्तात्वमितिलोकय ॥ भर्ताहर्ताभवानंगादवतीर्णोममाव्ययात् ॥ ५७ ॥ विस्मृतोऽसिजगन्नाथंनारायणमनामयम् ॥ पुरुषंपरमात्मानंकर्तारंजगतांप्रभुम् ॥ ५८ ॥ विष्णुमच्युतमीशानंविश्वस्यप्रभवोद्भवम् ॥ तवाऽपराधोनास्त्यत्रममममायाकृतंत्विदम् ॥ ५९ ॥ शृणुसत्यंपरंब्रह्मन्त्सर्वंतन्ममसंभवम् ॥ मयासृष्टंपुराव्यक्तंचतुर्विंशतितत्वकम् ॥ ६० ॥ इतिश्रुत्वावचस्तस्यब्रह्माक्रोधान्वितस्तदा ॥ कोवात्वमितिसंभर्त्स्यकश्चित्कर्ताभवेत्तव ॥ ६१ ॥ माययामोहितश्चाहंयुद्धंचक्रेसुदारुणम् ॥ विवादशमनार्थंचप्रबोधार्थंद्वयोरपि ॥ ६२ ॥ ज्योतिर्लिंगंतदोत्पन्नमावयोर्मध्यअद्भुतम् ॥ ज्वालामालासहस्राढ्यंकालानलचयोपमम् ॥ ६३ ॥ क्षयवृद्धिविनिर्मुक्तमादिमध्यांतवर्जितम् ॥ अनौपम्यमनिर्दिष्टमव्यक्तंविश्वसंभवम् ॥ ६४ ॥ तस्यज्वालासहस्रेणमोहितोभगवान्हरिः ॥ मोहितंप्राहमामत्रकिमर्थंस्पर्धसेऽधुना ॥ ६५ ॥ आगतोत्रतृतीयोऽपितिष्ठतांयुद्धमावयोः ॥ कुतएवात्रसंभूतंपरीक्षावोऽग्निसन्निभम् ॥ ६६ ॥ वायुवेगसमोभूत्वागच्छोर्ध्वंविश्वसंभव ॥ भवानूर्ध्वंप्रयत्नेनगंतुमर्हसिसत्वरम् ॥ हंसरूपंत्वयाधार्यंवाराहंचमयापुनः ॥ ६७ ॥ ॥ ॥ ॥

ज्योतिरिति ॥ ज्योतिःप्रचुरंलिंगमित्यर्थः ॥ उत्पन्नमाविर्भूतम् ॥ मध्यइतिसंधिरार्षः ॥ ज्योतिर्मयत्वमेवविशदयति ॥ ज्वालेति ॥ कालेति ॥ प्रलयकालेत्यर्थः ॥ ६३ ॥ तस्यदेशकालापरिच्छिन्नत्वंविशेषणद्वयेनाह ॥ क्षयेति ॥ अनिर्दिष्टंअनिरुक्तं ॥ अव्यक्तं व्यक्तात्परम् ॥ ६४ ॥ ६५ ॥ तिष्ठतामिति ॥ विरमत्वित्यर्थः ॥आत्मनेपदमार्षम् ॥ परीक्षावइति ॥ परितःपश्यावोविचारयावोवेत्यर्थः ॥ परस्मैपदमार्षम् ॥ अग्निसन्निभमिति ॥ तेजइतिशेषः ॥ ६६ ॥ गंतुमर्हसीति ॥ लघुत्वादितिभावः ॥ ऊर्ध्वाधोगमनसाधनत्वेनयोग्येस्वरूपेधारयितुंनिर्दिशति ॥ हंसेति ॥ ६७ ॥ ॥ ॥

व्यात्त्त्यउक्ता विश्वात्मा विष्णुः स्वरूपम् वाराहरूपम् ॥ एवंसामान्यतोऽभिहितेविशेषतोवर्णयति ॥ सुंदरइति ॥ सुंदरःपक्षसंपदेत्यपिपाठः ॥ ६९ ॥ हंसेति ॥ क्वचिद्धंसोहंसोविराडितीतिपाठः ॥ हंसहंसेतिजपतःफलप्राप्तिमाह ॥ हंसहंसेतीति ॥ सोहंसोहमिति ॥ पराग्रूपःसन्नपिप्रत्यगभिन्नोभविष्य तीत्यर्थः ॥ द्विरुक्त्याफलावश्यंभावःसूचितः ॥ एतच्च काशीवर्णनप्रस्तावेविस्तरेणनिरूपयिष्यामः॥सोहंसोथभविष्यतीत्यपिपाठः ॥ ७० ॥ अनिलप्रख्यः वायुतुल्यः ॥ प्रसिद्धहंसवैलक्षण्यमाह॥ विश्वतइति ॥ पुरा विष्णोर्गमनात्प्राक् ॥ ७१ ॥ नारायणधृतवाराहस्वरूपपरिमाणमाह ॥ दशेति ॥ दशयोजनव्या सयुक्तमित्यर्थः ॥ आयतंदीर्घम् ॥ ७२ ॥ मेरुपर्वतवर्ष्माणमिति ॥ अत्रपुंस्त्वमार्षपरत्रच दीर्घघोणं दीर्घनासिकम् ॥ ७३ ॥ जैत्रंजयनशीलंजैत्रस्तुजे

एवंव्यात्त्वत्यविश्वात्मास्वरूपमकरोत्तदा ॥ हंसश्चाहंतदाजातःसुंदरःपक्षसंयुतः ॥ ६९ ॥ तदाप्रभृतिमामाहुर्हंसहं सविराडिति ॥ हंसहसेतियोब्रूयात्सोहंसोऽहंभविष्यति ॥ ७० ॥ सुश्वेतोह्यनिलप्रख्योविश्वतःपक्षसंयुतः ॥ मनो ऽनिलजवोभूलाततश्चोर्ध्वंगतःपुरा ॥ ७१ ॥ नारायणोऽपिविश्वात्मासुश्वेतोह्यभवत्तदा ॥ दशयोजनविस्तीर्णं मायतंशतयोजनम् ॥ ७२ ॥ मेरुपर्वतवर्ष्माणंतीक्ष्णनखाग्रदंष्ट्रिणम् ॥ कालादित्यसमाख्यंचदीर्घघोणंमहास्व नम् ॥ ७३ ॥ ह्रस्वपादंविचित्रांगंजैत्रंदृढमनोजवम् ॥ वाराहंरूपमास्थायगतवांस्तदधोजवात् ॥ ७४ ॥ एवं वर्षसहस्त्रंतुचरन्विष्णुरधोगतः ॥ तदाप्रभृतिलोकेषुश्वेतवाराहकल्पकः ॥ ७५ ॥ इतिश्रीशिवमहापुराणेज्ञानसं हितायांज्योतिर्लिंगप्रादुर्भाववर्णनंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ सूतउवाच ॥ ततःपरंचयज्जातंश्रूयतामृषिसत्त माः ॥ भ्रांतंचबहुधाकालंविष्णुनाप्रभविष्णुना ॥ १ ॥ नापश्यदल्पमप्यस्यमूलंलिंगस्यसूकरः ॥ तावत्कालंगतो ह्यूर्ध्वमहमप्यरिसूदन ॥ २ ॥ ॥ ॥ ॥

तायोगच्छत्यलंविद्विषतःप्रतीत्यमरः ॥ ७४ ॥ तेनैवरूपेणैतत्कल्पनामप्रसिद्धिरित्याह ॥ तदेति॥आसीदितिशेषः ॥ ७५ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहि तायांसारबोधिन्यांद्वितीयोऽध्यायः ॥ २ ॥ ॥ ओंनमःशिवाय ॥ नारायणविधातृभ्यांदृष्टोवर्णात्मकःशिवः ॥ तस्माद्वराःपंचमंत्राःप्राप्ताइत्यत्रवर्ण्यते ॥ १ ॥ अनंतरंयज्जातंतच्छ्रूयतामितिप्रतिज्ञायब्रह्मोक्तिमनुवदति ॥ भ्रांतमिति ॥ भ्रमणंकृतमित्यर्थः ॥ बहुधेति ॥ बहुविधकालपर्यंतमित्यर्थः ॥ प्रभविष्णुना समर्थेनापि ॥ १ ॥ तथापि तन्नलब्धमित्याह ॥ नापश्यदिति ॥ अरिसूदन कामादिजयिन् २ ॥ ॥ ॥

कालादिति ॥ तावतोबहुकालादित्यर्थः ॥ ३ ॥ त्रस्तविलोचनइति ॥ अन्वेषणकार्येलोचनयोस्त्रासातिशयजननादितिभावः ॥ भवंशिवम् ॥ ४ ॥ सस्माराचिंतयामास ॥ ५ ॥ तत्रहेतुमाह ॥ अनिर्देश्यमिति ॥ अनिर्देश्यत्वेहेतुमाह ॥ अनामेति ॥ नामरहितमित्यर्थः ॥ यतोवाचोनिवर्ततइतिश्रुतेः ॥ कर्मेति ॥ क्रियाशून्यमित्यर्थः ॥ अलिंगमिति ॥ अलिंगरूपमपिभक्तानुग्रहायलिंगरूपतांप्राप्तमित्यर्थः ॥ ध्यानेति ॥ योगिभिरपिदुर्गममित्यर्थः ॥ ६ स्वस्थं स्थिरम् ॥ योऽसीति ॥ अनिर्वचनीयरूपोऽसीत्यर्थः ॥ ७ ॥ सानंदमिति ॥ आनंदमयमित्यर्थः ॥ अन्योंतरआत्मानंदमयइतिश्रुतेः ॥ शब्दलक्षणं

सत्वरंसर्वयत्नेनतस्यांतंज्ञातुमिच्छया ॥ श्रांतोनदृष्टवातस्यांतमहंकालादधोगतः ॥ ३ ॥ तथैवभगवान्विष्णुःश्रांतस्त्र स्तविलोचनः ॥ समागतोमयासार्धंप्रणिपत्यभवंमुहुः ॥ ४ ॥ माययामोहितःशंभोस्तस्थौसंविग्नमानसः ॥ प्रणि पत्यमयासार्द्धंसस्मारकिमिदंत्विति ॥ ५ ॥ अनिर्देश्यंचतद्रूपंमनामकर्मवर्जितम् ॥ अलिंगंलिंगतांयातंध्यानमार्गे प्यगोचरम् ॥ ६ ॥ स्वस्थंचित्तंतदाकृत्वानमस्कारपरायणौ ॥ जानीयावोनतेरूपंयोऽसिसोऽसिनमोस्तुते ॥ ७ ॥ एवमब्दशतंजातंनमस्कारंप्रकुर्वतोः ॥ तदासमभवत्तत्रसानंदंशब्दलक्षणम् ॥ ८ ॥ ओमितीदंमुनिश्रेष्ठसुव्यक्तंप्लु तलक्षणम् ॥ किमिदंत्वितिसंचिंत्यमयातिष्ठन्महास्वनम् ॥ ९ ॥ यस्माच्छब्दःसमुद्भूतस्तस्मैतुभ्यंनमोस्तुते ॥ लिं गस्यदक्षिणेभागेतदापश्यत्सनातनम् ॥ १० ॥ आद्यंवर्णमकारंतुउकारंचोत्तरेततः ॥ मकारंमध्यतश्चैवनादांतंत स्यचोमिति ॥ ११ ॥ सूर्यमंडलवत्दृष्ट्वावर्णमाद्यंतुदक्षिणे ॥ उत्तरेपावकप्रख्यमुकारमृषिसत्तम ॥१२॥ शीतांशुमं डलप्रख्यंमकारंतस्यमध्यतः ॥ तस्योपरितदापश्यत्स्फटिकप्रभवंपरम् ॥ १३ ॥ ॥ छ ॥ ॥ छ ॥

शब्दात्मकम् ॥ ८ ॥ तदाकारमाह ॥ ओमितीदमिति ॥ ओमितिब्रह्मेतिश्रुतेः ॥ प्लुतलक्षणं त्रिमात्रात्मकम् ॥ किमिति ॥ हरिर्महास्वनमिदंकिमितिमयासह संचिंत्य तिष्ठन्सन् नमोस्तुतइत्युक्तातत् श्रुतमोंकाररूपमापश्यदित्यध्याहारेणान्वयः ॥ यदृष्टवांस्तदाह ॥ सनातनमित्यादिना ॥ ९ ॥ १० ॥ नादांत मिति ॥ प्रांतभागेध्वनिविशेषयुक्तमित्यर्थः ॥ तस्येति ॥ पूर्वदृष्टवर्णत्रयस्यओमितिसंहितंरूपमपश्यदित्यर्थः ॥ ११ ॥ उक्तवर्णानांज्योतिर्मयतांदर्शयति ॥ सूर्येति ॥ १२ ॥ स्फटिकप्रभवमिति ॥ स्फटिकवत्प्रभवःप्रकाशोयस्य तत्तुल्यकांतियुक्तमित्यर्थः ॥ १३ ॥ ॥ ॥

तुरीयेति ॥ जाग्रदाद्यवस्थात्रयविलक्षणंतुरीयमितिमांडूक्यउक्तं ततोप्यतीतमित्यर्थः ॥ अतएवाम्रृतं अम्रृतंमोक्षस्तदात्मकमित्यर्थः ॥ एतत्स्वरूपस्यैवप्र
तिपादकानिविशेषणान्याह ॥ निष्कलमिति ॥ निर्गुणमित्यर्थः ॥ अतएवनिरुपप्लवंमायाकृतोपद्रवरहितम् ॥ निर्द्वंद्वंसजातीयद्वितीयरहितम् ॥ केवलं ॥ वि
जातीयद्वितीयरहितम् ॥ १४ ॥ कारणमिति परमानंदःसर्वस्यकारणम्आनंदाद्ध्येवखल्विमानिभूतानिजायंतइतिश्रुतेस्तस्यापिकारणभावापन्नमित्यर्थः ॥ स्पष्टं
शिष्टम् ॥ तस्यस्वरूपलक्षणमुक्तमेवार्किंचिदाह ॥ सत्यमिति ॥ अम्रृतंमरणरहितमनन्तमितियावत् ॥ १५ ॥ एकाक्षरमिति ॥ ओंकारइत्यर्थः ॥ ओ
मित्येकाक्षरंब्रह्मेतिश्रुतेः ॥ १६ ॥ अहमेवेति ॥ एवकारःप्रसिद्ध्यर्थः ॥ विस्मयहेतुंरूपांतराविष्कारमाह ॥ एतस्मिन्निति ॥ १७ ॥ १८ ॥ रूपस्यपरम

तुरीयातीतमम्रृतंनिष्कलंनिरुपप्लवम् ॥ निर्द्वंद्वंकेवलंतत्वंबाह्याभ्यंतरवर्जितम् ॥ १४ ॥ आदिमध्यांतरहितमानंद
स्यापिकारणम् ॥ सत्यमानंदमम्रृतंपरंब्रह्मपरायणम् ॥ १५ ॥ एकाक्षरंतुयत्प्रोक्तंभगवान्नीललोहितः ॥ सर्गक
र्ताह्यकाराख्यउकाराख्यस्तुपालकः ॥ १६ ॥ मकाराख्यस्तुयोनित्यमनुग्रहकरोभवः ॥ अहमेवहरिर्ब्रह्मन्विस्म
याविष्टमानसौ ॥ एतस्मिन्नंतरेऽन्यच्चरूपमद्भुतसुंदरम् ॥ १७ ॥ पंचवक्त्रंदशभुजंकर्पूरगौरकंमुने ॥ नानाकांतिस
मायुक्तंनानाभरणसंयुतम् ॥ १८ ॥ महोदारंमहावीर्यंमहापुरुषलक्षणम् ॥ तद्दृष्ट्वापरमंरूपंनिर्मातास्वयमेवहि ॥
॥ १९ ॥ ततोविज्ञायदेवेशंयथावच्छ्रुतिसंमतैः ॥ मंत्रैर्महेश्वरंदेवंतुष्टावसुमहोदयम् ॥ २० ॥ आवयोस्तुतिभिस्तु
ष्टोलिंगेतस्मिन्निरंजनः ॥ दिव्यंशब्दमयंरूपमास्थायप्रहसन्स्थितः ॥ २१ ॥ अकारस्तस्यमूर्धाचललाटंदीर्घउच्य
ते ॥ इकारंदक्षिणंनेत्रमीकारंवामलोचनम् ॥ २२ ॥ उकारंदक्षिणंश्रोत्रमूकारंवाममुच्यते ॥ ऋकारंदक्षिणंतस्यक
पोलंपरमेष्ठिनः ॥ २३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

त्वेहेतुमाह ॥ निर्मातेति ॥ निर्मातृ इत्यर्थः ॥ पुंस्त्वमार्षम् ॥ स्वयमिति ॥ शिवतत्त्वमेवेत्यर्थः ॥ स्वरूपस्येतिशेषः ॥ १९ ॥ श्रुतिसंमतैरिति ॥ सद्योजा
तमित्यादिभिरित्यर्थः ॥ तुष्टावेति ॥ हरिरितिशेषः ॥ २० ॥ निरंजनः मायासंसर्गशून्यः ॥ शब्दमयमिति ॥ अकारादिनानावर्णात्मकावयवयुक्तत्वेनभासमान
मित्यर्थः ॥ २१ ॥ तदेवरूपंनिरूप्यते ॥ अकारइति ॥ तस्यप्रादुर्भूतस्वरूपस्यमूर्धामस्तकंह्रस्वाकारइत्यर्थः ॥ दीर्घइति ॥ अकारइत्यस्यानुषंगः ॥ दीर्घाका
रइत्यर्थः ॥ वर्णांतरात्मकानवयवानाह ॥ इकारमित्यादिनाक्षकारंनादउच्यतइत्यंतेन ॥ इकारमित्यादौ क्लीबत्वमार्षम् ॥ २२ ॥ परमेष्ठिनःशिवस्य ॥ २३ ॥

॥ २४ ॥ क्रमात् ऊर्ध्वाधरक्रमात् ॥ २५ ॥ २६ ॥ टादिपंचाक्षरमिति ॥ टादिपंचाक्षरंतथा तादिपंचाक्षरंचपादावित्यन्वयः ॥ पूर्वत्रपंचाक्षराणीतिबहुत्वविवक्षयाऽत्रचैकत्वविवक्षयैकैकाक्षरात्मकएकैकोभुजः अक्षरपंचकात्मकएकैकःपादः अतएवपूर्वत्र हस्ताइतिबहुवचनमत्रचपादावितिद्विवचनंचसंगच्छते तेनदर्शितरूपस्यदशभुजत्वंद्विपात्वंचगम्यते ॥ पार्श्वमिति ॥ दक्षिणमितिशेषः ॥ २७ ॥ २८ ॥ सप्तधातवः रसादयः रसासृङ्मांसमेदोस्थिमज्जाशुक्राणिधातवइतिवाग्भटादिभिरुक्ताः ॥ क्षकारंमेद्रउच्यतइत्यपिपाठः ॥ २९ ॥ अगुणस्येति ॥ अनेनपूर्वोक्तरूपंमायिकमेवेतिसूचितम् ॥

वामंकपोलमृकारंलॢनासापुटेउभे ॥ एकारमोष्ठमूर्ध्वंतुऐकारमधरंविभो ॥ २४ ॥ ओकारंचतथौकारंदंतपंक्तिद्वयंक्रमात् ॥ अंअश्चतालुनीतस्यदेवदेवस्यधीमतः ॥ २५ ॥ कादिपंचाक्षराण्यस्यपंचहस्ताश्चदक्षिणे ॥ चादिपंचाक्षराण्येवंपंचहस्तास्तुवामतः ॥ २६ ॥ टादिपंचाक्षरंपादौतादिपंचाक्षरंतथा ॥ पकारमुदरंतस्यफकारंपार्श्वमुच्यते ॥ ॥ २७ ॥ बकारंवामपार्श्वंतुभकारंस्कंधउच्यते ॥ मकारंहृदयंशंभोर्महादेवस्ययोगिनः ॥ २८ ॥ यकारादिसकारांतंविभोर्वैसप्तधातवः ॥ हकारंनाभिरूपंहिक्षकारंनादउच्यते ॥ २९ ॥ एवंशब्दमयंरूपमगुणस्यगुणात्मनः ॥ तं दृष्ट्वातुमयासार्द्धंभगवंतंमहेश्वरम् ॥ ३० ॥ प्रार्थयंतौपुनस्तंवैकृपाकार्यालयाविभो ॥ इत्येवंवचनंश्रुत्वाप्रसन्नःशंकरस्तदा ॥ ३१ ॥ उवाचवचनंतत्रप्रसन्नोभगवानिह ॥ तदीयंतद्वचस्तत्रश्रुत्वाविष्णुर्मयासह ॥ ३२ ॥ उवाचयदिदेवेशप्रसन्नोभगवानिह ॥ आवयोःकिंचित्कार्यंवैयदिछसितथाकुरु ॥ ३३ ॥ इत्येवंवचनंश्रुत्वाशंभुर्वाक्यमथाब्रवीत् ॥ सृष्टिकर्ताभवेद्ब्रह्मासृष्टेश्चपालकोहरिः ॥ ३४ ॥ मदीयश्चतथाप्यंशोभविष्यतितदंतकृत् ॥ इयंचप्रकृतिर्देवीयानारायणमाश्रिता ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

रूपमित्यस्याग्रेआसीदितिशेषः ॥ तमिति ॥ उक्तरूपोपलक्षितमित्यर्थः ॥ मयासार्धमिति ॥ हरिरितिशेषः ॥ ३० ॥ प्रार्थयंताविति ॥ परस्मैपदमार्षम् यद्वाण्यंताण्णिचिशंतरिरूपंभगवतैवप्रार्थनायांप्रेरिताविवित्यनेनगम्यते॥ प्रार्थनीयंवस्त्वाह॥ कृपेति॥ ३१॥ ३२॥ ३३॥ ततोभगवान्कर्तव्यमुपदिशति ॥ सृष्टीति ३४॥ तदंतेति ॥ सृष्ट्यंतकृदित्यर्थः ॥ तवांगजइत्यपिपाठः॥ एवंपुरुषप्रभवानंशानुक्त्वाप्रकृतिसंभवास्तच्छक्तीराह ॥ इयमिति ॥ पूर्वमुक्तेत्यर्थः ॥ तामेवाह येति ॥ ३५ ॥ ॥ ॥ ॥ ॥

तस्यामिति ॥ प्रकृताविल्यर्थः ॥ ब्रह्माणीति ॥ सृष्टेर्वर्धनादियंसंज्ञा ॥ ३६ ॥ लक्ष्मीरूपेणेति ॥ पालनादिनासृष्टेःशोभितत्वसंपादनात्लक्ष्मीनामकरूपेणेत्यर्थः ॥ कालीति ॥ सृष्टेःकालनात्संहरणादेतन्नाम्नीत्यर्थः ॥ तच्च संहरणंनदुःखप्रापणरूपमपितु मुक्तिरूपमेवेत्याह ॥ मदंशमिति ॥ ३७ ॥३८॥ एवमुक्त्वाब्रह्मविष्णुरुद्राःस्वस्वशक्तिविशिष्टाएवसृष्ट्यादिकार्यंकुर्वन्त्वित्यभिप्रेत्यभगवानुपदिशति ॥ संभूयेति तादृशस्यतेजसःपुरोवक्तुंविष्णोरेवसामर्थ्यमित्याह ॥ विष्णुरिति॥३९॥४०॥पदमिति॥पालनाधिकारस्थानमित्यर्थः॥यदभीष्टतममित्यपिपाठः ॥४१॥ विष्णुरितिब्रह्मोक्तिः॥४२॥ तत्वंशिवत

तस्यांभविष्यतिशक्तिर्ब्रह्माणिसंभविष्यति ॥ अन्याशक्तिःपुनस्तत्रप्रकृतेःसंभविष्यति ॥ ३६ ॥ समाश्रयिष्यते विष्णुंलक्ष्मीरूपेणसातदा ॥ पुनश्चकालीनाम्नीचमदंशंप्रापयिष्यति ॥ ३७ ॥ ज्योतीरूपेणसातत्रकार्यार्थंसंभविष्यति ॥ त्रयोदेवास्तथाप्रोक्ताःशक्तयःपरमाःशुभाः॥३८॥ सृष्टिकार्यंतुसंभूयकुर्वंतुतेमदाज्ञया॥इत्येवंतुवचःश्रुत्वाविष्णुर्वाक्यमथाब्रवीत् ॥३९॥ श्रीभगवानुवाच॥ भवदुक्तंकरिष्यामोनियताःसर्वएवहि॥ किंचिद्विज्ञाप्यमस्त्येवतत्वं कर्तुमिहार्हसि ॥ ४० ॥ ततोवचनमारब्धंशंकरेणपरंशुभम्॥ पदमिष्टतमंतुभ्यंदास्यामिहितकाम्यया ॥ ४१ ॥ विष्णुर्मयासहोवाचशंकरंलोकशंकरम्॥ ४२ ॥श्रीभगवानुवाच ॥ देवदेवनमस्तुभ्यंदेहितत्त्वंनमोस्तुते ॥ ध्येयं सेव्यंतथापूज्यंवक्तुमर्हसिसुव्रत ॥ ४३ ॥ यत्कृत्वासर्वसामर्थ्यंभविष्यातिनसंशयः ॥ इत्युक्तःशंकरस्तस्मैददौनादात्मकंशिवम् ॥ ४४॥ प्रणवात्मकंपरंतत्त्वंलब्धवान्परमात्मनः ॥ हरिस्तत्रपरंतत्त्वंज्ञात्वारूपमपश्यत ॥ ४५॥ तदुपायंप्रवक्ष्यामिमंत्रतत्त्वंशुभान्पथः ॥ प्रणम्यभगवान्विष्णुःपुनश्चापश्यदूर्ध्वतः ॥ ४६ ॥ ॥छ॥ ॥छ॥

त्वम् ॥ सुव्रतेति ॥ शोभनंभक्तपालनात्मकंव्रतंयस्य ॥ ४३ ॥ यत्कृत्वेति ॥ यद्ध्यानादिकृत्वेत्यर्थः सर्वसामर्थ्यंसृष्टिकर्तृत्वादिशक्तिः आवयोरितिशेषः ॥ तस्मैहरये ॥ नादात्मकमिति ॥ पूर्वोक्तवर्णध्वन्यात्मकमित्यर्थःशिवंकल्याणप्रदम् ॥ ४४ ॥ परमिति ॥ परंतत्वंददावित्युत्तरेणान्वयः ॥ हरिरिति ॥ हरिःपरमात्मनःसकाशात्परंतत्त्वंलब्धवान्सन्ज्ञात्वाअपरोक्षीकृत्यरूपमपश्यदित्यर्थः ॥ आत्मनेपदमार्षम् ॥ ४५ ॥ ॥ हरेःपरतत्त्वलाभाद्युक्त्याब्रह्मणास्वस्यनिरभिमानतासूचिता ॥ ४५ ॥ तदुपायमिति ॥ शिवतत्त्वदर्शनोपायभूतामित्यर्थः ॥ मंत्रतत्त्वमिति ॥ शुभान्शोभनान्पथःमार्गान्आश्रित्येतिशेषः मंत्रतत्त्वंप्रवक्ष्यामीत्यन्वयः॥ शुभाश्रयमित्यपिपाठः ॥ तल्लाभायविष्णोर्व्यापारमाह ॥ प्रणम्येति ॥ ४६ ॥ ॥ ॥

उपरिदर्शनमात्रेणहरेर्मंत्रतत्त्वलाभोभवदित्याह ॥ ओंकारेति ॥ ओंकारात्प्रभवःप्रादुर्भावोयस्यतमंत्रं मंत्रकलापमित्यर्थः ॥ सर्वोहिवागादिप्रपंचओंकार प्रभवएव ॥ ओमित्येतदक्षरमिदंसर्वम् ओंकारेणसर्वावाक्संतृणोतीत्यादिश्रुतिभ्यः ॥ कलेति ॥ वक्ष्यमाणएकैकोमंत्रएकैकाकला अंशः तत्पंचकसंयु तमित्यर्थः॥तत्राद्यांशभूतं महावाक्यात्मकंमंत्रमाह॥ओंतत्त्वमसीति॥उक्तमिति॥छांदोग्येश्वेतकेतुंप्रत्युक्तमेतत्॥हरस्येति॥हरसंबंधिमहावाक्यात्मकंमंत्ररू पमित्युत्तरेणान्वयः ॥ ४७ ॥ अस्यमंत्रस्यादर्शवदखंडैकरसब्रह्माभेदप्रदर्शनसमर्थरूपमाह ॥ शुद्धेति ॥ मेधाकारमिति ॥ धारणावतीयाधीस्तदाकार मित्यर्थः ॥ मेधाकरमितिपाठेतादृशबुद्धिप्रदमित्यर्थः ॥४८॥गायत्रीति॥तत्सवितुरित्यादिकम् ॥ चतुर्विंशतीति॥चतुर्विंशत्यक्षरात्रिपदेतिनारायणीयोपनिष दुक्तेः॥ यद्वा तत्पुरुषायविद्महेमहादेवायेतिशिवगायत्र्यत्रग्राह्या ॥ शिवमंत्रप्रस्तावात् ॥ चतुर्वर्गेति ॥ त्रिवर्गोधर्मकामार्थैश्चतुर्वर्गःसमोक्षकैरित्यमरः ॥ ४९ ॥

ओंकारप्रभवंमंत्रंकलापंचकसंयुतम् ॥ ओंतत्वमसीत्युक्तंमहावाक्यंहरस्यच ॥ ४७॥ शुद्धस्फटिकसंकाशंमंत्ररूप मनुत्तमम् ॥ मेधाकारमभूद्भूयःसर्वकामार्थसाधकम् ॥ ४८॥ पुनर्मंत्रंतथान्यच्चगायत्रीलक्षणंमहत् ॥ चतुर्विंशतिव र्णाढ्यंचतुर्वर्गफलप्रदम् ॥ ४९ ॥ पुनर्मृत्युंजयंमंत्रंपंचाक्षरमतःपरम् ॥ चिंतामणिंतथामंत्रंदक्षिणामूर्तिसंज्ञितम् ॥ ॥ ५० ॥ पंचमंत्रंतथालब्ध्वाजजापभगवान्हरिः ॥ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांविष्णुब्रह्मवरप्रदानं नामतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

मृत्युंजयमिति ॥ मृत्युंजयमंत्रस्तंत्रसारेत्र्यक्षरउक्तः॥ यथा तारःस्थिरासकर्णेंदुभृगुसर्गसमन्वितः॥ त्र्यक्षरात्मानिगदितोमंत्रोमृत्युंजयाभिधः अस्यार्थः स्थि राजकारः कर्णः ऊकारः भृगुःसकारः तेनओंजूंसइतिस्वरूपम्॥ क्वचिदेतद्बीजमंत्रसंपुटितत्र्यंबकमितिमृत्युंजयमंत्रउक्तः॥ पंचाक्षरमिति ॥ नमःशिवायेतिमं त्रोरुद्राध्यायेप्रसिद्धः ॥ तल्लक्षणंतज्जपादिविधानंचतंत्रसारादौस्पष्टम्॥ चिंतामणिमिति ॥ शैवचिंतामणिबीजमंत्रस्तत्रैवोक्तः॥ यथा अग्निःसंवर्तकादित्याव निलौषष्ठविंदुमत् ॥ चिंतामणिरितिख्यातंबीजंसर्वसमृद्धिदम्॥ अग्निःरेफः संवर्तकःक्षकारः आदित्योमकारः अनिलोयकारः आस्वरूपंषष्ठस्वरऊकारः विं दुरनुस्वारः एतत्स्वरूपंक्ष्म्र्यूंइतिबोध्यम् ॥ दक्षिणामूर्तीति ॥ पूर्वोक्तचिंतामणिबीजमंत्रमेवदक्षिणामूर्तिमंत्रयुक्तमित्यर्थः ॥ मंत्रभेदकल्पनेपंचत्वसंख्याविरोधःस्यात् ॥ दक्षिणामूर्तिमंत्रस्वरूपमपितत्रैवोक्तम् ॥ प्रणवोत्थदयंपश्चात्ततोभगवतेपदम् ॥ ङेन्तंचदक्षिणामूर्तिमह्यंमेधामुदीरयेदिति ॥ ओंनमोभगवते दक्षिणामूर्तयेमह्यंमेधांप्रयच्छस्वाहेतिमंत्रः ॥ ५० ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांसारबोधिन्यांतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥

ओन्नमःशिवाय ॥ वेदसंप्राप्तिरीशस्यप्रसादोहरिवेधसोः ॥ प्रादुर्भावश्चरुद्रस्यभाव्यत्रैवप्रवर्ण्यते ॥ तत्रादौब्रह्मापूर्वोक्तजपफलप्राप्तिंदर्शयति ॥ जपतइति ॥ तस्यदेवस्यश्रीविष्णोः पुरतइतिशेषः ॥ हरःप्रसन्नःसन्स्वयं पुनःप्रादुर्भूतइत्यन्वयः ॥ १ ॥ निगममिति ॥ निगमोवेदः निगम्यतेधर्मब्रह्मतत्वमनेनेतिव्युत्पत्तेः ॥ गोचरसंचरेतिसाधुः ॥ निगमोवाणिजेपुर्यांकटेवेदेवणिक्पथइतिविश्वः ॥ श्वासरूपेणेति ॥ अस्यमहतोभूतस्यनिश्वसितंयदेतदृग्वेदोयजुर्वेदःसामवेदइत्यादिश्रुतेः ॥ महात्मनइति ॥ अनेनहरेर्ग्रहणधारणशक्तिर्दर्शिता ॥ मंत्राइति ॥ अग्निमीळइत्यादयइत्यर्थः ॥ यज्ञकर्मार्थामंत्राइतिकल्पसूत्रकारैरुक्तत्वात्तत्साध्यकर्मापेक्षायामाह ॥ कर्माणीति ॥ ज्योतिष्टोमादीनीत्यर्थः ॥ अनेकशइति ॥ नित्यनैमित्तिककाम्यभेदेनेति

ब्रह्मोवाच जपतस्तस्यदेवस्यप्रादुर्भूतोहरःस्वयम् ॥ पुनःप्रसन्नस्तत्रैवहरयेपरमात्मने ॥१॥ निगमंश्वासरूपेणददौतस्मैमहात्मने॥ तत्रमंत्राह्यनेकेवैतत्रकर्माण्यनेकशः ॥२॥ सर्वविद्यानिधिर्देवोहरश्चासीन्महामुने ॥ ईशानःसर्वविद्यानांश्रुतिरेषासनातनी ॥ ३ ॥ हरात्प्राप्यस्वयंविष्णुर्हरिर्मह्यमदात्पुनः ॥ पुरतःश्वासरूपेणप्राप्तवान्निगमंतदा ॥ ४ ॥ स्वीयंज्ञानमदात्तस्मैरहस्यंपरमात्मने ॥ परमात्मापुनर्मह्यंदत्तवान्कृपयामुने ॥ ५ ॥ संप्राप्यनिगमंदेवःपप्रच्छपुनरेवतम् ॥ कथंचतुष्यसेदेवमयाध्येयःकथंप्रभो ॥ ६ ॥ किंध्यानंचप्रकर्तव्यंशंकरंचकथंव्रजेत् ॥ एतत्सर्वंमहाराजकृपांकृत्वाममोपरि ॥ ७ ॥ कथनीयंप्रयत्नेनशृण्वतांपापहारकम् ॥ इत्येतद्वचनंश्रुत्वाप्रसन्नोभगवान्हरः ॥ ८ ॥ उवाचहरयेतत्रशृणुष्वावहितोहरे ॥ इदंलिंगंसदापूज्यंध्यानंचैतादृशंमम ॥ ९ ॥

भावः ॥ २ ॥ तत्र भगवतोहरस्यहेतुगर्भविशेषणमाह ॥ सर्वेति ॥ तत्रप्रमाणंदर्शयति ॥ ईशानइति ॥ श्रुतिरेषेति ॥ नारायणीयोपनिषदिप्रसिद्धेत्यर्थः ॥ सनातनीति ॥ अनेनवेदानामनादित्वंसूचितम् ॥ ३ ॥ साक्षाच्छिवसकाशाद्ग्रहणेममसामर्थ्यंनासीदित्याह ॥ हरिरिति ॥ पुनरित्युत्तरान्वयि ॥ पुरतःप्रथमंहरिर्यदाश्वासरूपेणनिगमंप्राप्तवांस्तदापुनर्हरोरहस्यमुपनिषन्मात्रगम्यंस्वीयंज्ञानंतस्मैपरमात्मनेहरयेप्रादादितिहरपदाध्याहारेणान्वयः ॥ परमात्माहरिः ॥४॥५॥देवोःहरिः ॥ तंशिवम् ॥ ६ ॥ शंकरमिति ॥ त्वामितिशेषः ॥ व्रजेदिति ॥ भक्तजनइतिशेषः॥७॥८॥नैरंतर्येणोपास्यंदर्शयति ॥ इदमिति॥ध्यानमिति ॥ प्रत्ययैकताननतासाधनमीदृशंरूपमित्यर्थः ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

तथाकार्यमिति ॥ दृश्यमानरूपस्यांतर्धानगामित्वेऽपिबुद्धिस्थमेतन्निरंतरंकार्यमित्यर्थः ॥ १० ॥ नकेवलमभीष्टलाभोऽस्मादपितुसर्वदुःखनिवृत्तिरपीत्याह ॥ यदेति ॥ तत्रलिंगे ॥ ११ ॥ १२ ॥ तानेववरानाह ॥ अयमिति ॥ प्रथमपुरुषनिर्देशेनत्वदनुमत्यैवानेनसृष्टिःकर्तव्येतिध्वनितम् ॥ दत्ताधिकारस्य नैरंतर्येणरक्षणेसाधनमुपदिशति ॥ मद्भक्तिमिति ॥ १३ ॥ साचभक्तिर्नवाङ्मात्रेणसाधनमपितुपूजाविधिशेषत्वेनेत्याह ॥ पूजाविधिमिति ॥ येनपूजाविधानेन ॥ १४ ॥ तत्पूजाविधानम् ॥ १५ ॥ ऋग्यजुरिति ॥ वेदात्मनायविद्महइतिश्रुतेः ॥ तुष्टावेति ॥ हरिरितिशेषः ॥ इष्टाभिःशिवप्रीतिकराभिः ॥ १६ ॥

इदानींदृश्यतेयद्वत्तथाकार्यंत्वयासदा ॥ पूजितोलिंगरूपेस्मिन्प्रसन्नोविविधंफलम् ॥ १० ॥ दास्यामिसर्वलोकेभ्यो मनोभीष्टान्यनेकशः ॥ यदादुःखंभवेत्तत्रपूजितेदुःखनाशनम् ॥ ११ ॥ इतिदत्त्वाहरस्तस्मैवरानन्याननेकशः ॥ उवाचवचनंदेवोविष्णवेप्रभविष्णवे ॥ १२ ॥ अयंब्रह्मातथाकर्तासृष्टेःकार्यंनिरंतरम् ॥ पालयत्त्वंसदादेवमद्भक्तिंपर मांकुरु ॥ १३ ॥ इत्युक्तातुपुनस्तस्मैपूजाविधिमदाच्छुभम् ॥ येनैवपूजितःशंभुःफलंयच्छत्यनेकशः ॥ १४ ॥ तदहं कथयिष्यामिसर्वपापहरंपरम् ॥ ततःसर्वमयंदेवंविश्वरूपंमहेश्वरम् ॥ १५ ॥ अनंतंनिष्कलंदेवमृग्यजुःसामरूपिणम् ॥ सर्गस्थितिलयानांहिकर्त्तारंपरमेश्वरम् ॥ तुष्टावपुनरिष्टाभिर्वाग्भिर्वरदमीश्वरम् ॥ १६ ॥ हरिरुवाच ॥ एकाक्षरायदेवायअकारायात्मरूपिणे ॥ उकारायादिदेवायविद्यारूपायतेनमः ॥ १७ ॥ तृतीयायमकारायशिवायपरमात्मने ॥ जलायजलजाप्यायनमस्तेजलशायिने ॥ १८ ॥ ॥ ॥

दृष्टरूपानुसारेणस्तोतुमुपक्रमते ॥ एकाक्षरायेति ॥ प्रणवस्वरूपायेत्यर्थः ॥ ओमित्येकाक्षरंब्रह्मेतिश्रुतेः ॥ तमेवव्यष्टिरूपेणनमस्करोति ॥ अकारायेति ॥ आत्मरूपिणेब्रह्मरूपिणे ॥ विद्यारूपायेति ॥ ऋग्वेदादिविद्यास्वरूपायेत्यर्थः ॥ नमइति ॥ स्वापकर्षबोधकप्रव्हीभवनादिरूपोव्यापारोनमःपदार्थः ॥ १७ ॥ जलायेति ॥ जलरूपायेत्यर्थः ॥ जलरूपत्वंचजलसर्गस्यपूर्वंदृष्टत्वेनकार्यकारणयोरभेदग्रहादष्टासुमूर्तिषुजलस्यापिसत्त्वाच्चेतिबोध्यम् ॥ जलजाप्यायेति ॥ जलउपासितुंयोग्यायेत्यर्थः ॥ जलशायिनइति ॥ जलेशयितुंशीलंयस्यतस्माइत्यर्थः ॥ यमंतःसमुद्रेकवयोवयंतीतिश्रुतेः ॥ १८ ॥

चित्तायेति ॥ सविकल्पकभेदजनकान्तःकरणवृत्तिरूपायेत्यर्थः ॥ चित्तिरूपायेति ॥ निर्विकल्पकभेदजनकान्तःकरणवृत्तिरूपायेत्यर्थः ॥ चित्तिःस्रुगितितैत्तिरीयोपानिषदिविद्यारण्यैरेवंव्याख्यातत्वात् ॥ स्मृतिरूपायेति ॥ वासनात्मकसंस्कारजन्यान्तःकरणवृत्तिविशेषरूपायेत्यर्थः ॥ ज्ञानायेति ॥ ज्ञानस्वरूपायेत्यर्थः ॥ सत्यंज्ञानमनंतमितिश्रुतेः ॥ ज्ञानगम्यायेति ॥ श्रवणमननादिवेद्यायेत्यर्थः ॥ आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्यइतिश्रुतेः ॥ आत्मदर्शनंपुरुषार्थः श्रवणादीनितत्साधनानीतिभावः ॥ १९ ॥ हिरण्यबाहवइति ॥ सुवर्णमयभुजायेत्यर्थः ॥ उपलक्षणमेतत्सर्वावयवानाम् ॥ नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरूपायेतिश्रुतेः ॥ तदेवध्वनयन्नाह ॥ हेमरेतसइति ॥ कपर्दिनेजटाकलापधारिणे ॥ कपर्दोस्यजटाजूटइत्यमरः ॥ नागाःसर्पाःअंगाभरणानिअंगभूषणानियस्यतस्माइत्यर्थः ॥ २० ॥ वृषाकपयइति ॥ वृषंधर्मंनकंपयतीतिवृषाकपिस्तस्माइत्यर्थः ॥ कपिचलने ॥ अहिकंप्योर्नेलोपश्चेतिइः ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगइतिभगवदुक्तेः ॥ शर्वायेति ॥ शृणातिसंहरतिभूतानीतिशर्वस्तस्माइत्यर्थः ॥ यत्प्रयंत्यभिसंविशंतीतिश्रुतेः ॥ शिवायेति ॥ शिवंकल्याणंकरोतीतिशिवस्तस्माइत्यर्थः ॥ तत्करोतीतिण्यंतात्पचाद्यच् ॥ तत्रैवहेतुप्रदर्शनपूर्वकंनमस्यति ॥ शिवरूपायेति ॥ सर्वकल्याणात्मकायेत्यर्थः ॥ व्योमव्यापिनइति ॥ व्योमसर्वव्यापकंतस्यापिव्यापकायेत्यर्थः ॥ महतोमहीयानितिश्रुतेः ॥ २१ ॥ निधीनांमहापद्मादीनां ॥ महापद्मश्चपद्मश्चशंखोमकरकच्छपौ ॥ मुकुंदकुंदनीलाश्चखर्वश्चनिधयोनवेत्यमरः ॥ लिंगिनेआकारवते ॥ लिंगरूपिणइति ॥ प्रसिद्धलिंगस्वरूपायेत्यर्थः ॥ तेजसेप्रकाशरूपाय ॥ तेजसांसूर्यादिप्रकाशानांभर्त्रेपोषकाय ॥ सर्वरूपिणे सर्वजगदात्मने ॥ २२ ॥ शाश्वतायनित्याय ॥ वरिष्ठायसर्वश्रेष्ठाय ॥ वारिगर्भायजलशायिनइत्यत्रोक्तोर्थः ॥ वारिजलंगर्भेयस्येतिवा ॥ योगिने समाधिनिष्ठाय ॥ स्थिताय कालत्रयाबाध्यायेत्यर्थः ॥ सामगेयायेति ॥ सामगानप्रियत्वादितिभावः ॥ आवयोः ममकमलासनस्यच ॥ ब्रह्मवर्चसइति ॥ तत्त्वज्ञानप्रकाशकायेत्यर्थः ॥ वर्चदीप्तौ ॥ २३ ॥ ऋषयइति ॥ मुनयइत्यपिपाठः ॥ विष्णवइति ॥ वेवेष्टिव्याप्नोतीतिविष्णुस्तस्माइत्यर्थः ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥

चित्तायचित्तिरूपायस्मृतिरूपायतेनमः ॥ ज्ञानायज्ञानगम्यायनमस्तेपरमात्मने ॥ १९ ॥ हिरण्यबाहवेतुभ्यंनमस्तेहेमरेतसे ॥ कपर्दिनेनमस्तुभ्यंनागांगाभरणायच ॥ २० ॥ वृषाकपयेशर्वायकर्त्रेहर्त्रेनमोनमः ॥ शिवायशिवरूपायव्यापिनेव्योमव्यापिने ॥ २१ ॥ नमोनिधीनांपतयेलिंगिनेलिंगरूपिणे ॥ तेजसेतेजसांभर्त्रेनमस्तेसर्वरूपिणे ॥ २२ ॥ शाश्वतायवरिष्ठायवारिगर्भाययोगिने ॥ स्थितायसामगेयायआवयोर्ब्रह्मवर्चसे ॥ २३ ॥ आत्मनेऋषयेतुभ्यंस्वामिनेविष्णवेनमः ॥ ओंकारायनमस्तुभ्यंसर्वज्ञायनमोनमः ॥ २४ ॥

स्तुतिफलश्रुतिमाह ॥ इदमिति ॥ २५ ॥ २६ ॥ सर्वपापेति ॥ सर्वेषांपापस्यनाशनार्थमित्यर्थः ॥ २७ ॥ पश्यतामिति ॥ प्रथमपुरुषद्विवचनमिदं ॥ भवंतावितिशेषः ॥ प्रमुच्यतामिति ॥ कर्मणिलोट् ॥ भवद्भ्यामितिशेषः ॥ २८ ॥ अनयोर्भूतपूर्वसंशयंव्यवच्छिनत्ति ॥ युवामिति ॥ मदिच्छायाइति ॥ मदिच्छारूपप्रकृतेःसकाशादित्यर्थः ॥ हेमहाबलौ ॥ मयाममरूपंनिर्गुणमपित्रिभिः प्रकारैर्भिन्नंगुणयुक्तंकृतमित्यर्थः ॥ च्विप्रत्ययेनसगुणरूपस्यकल्पितत्वंसूचितम् ॥ २९ ॥ तस्यरूपस्यत्रैविध्यंदर्शयति ॥ अयमिति ॥ विश्वात्माविश्वांतर्यामी ॥ ३० ॥ ततस्तावनुगृण्हातिभगवान् ॥ प्रीतोहमिति ॥ मांविष्णुमिति ॥ मांचविष्णुंचेत्यर्थः ॥ ३१ ॥ सुशुभाभ्यांकराभ्यामित्यन्वयः ॥ घृणयाकृपया ॥ लब्धप्रसादोनारायणः पुनःप्रार्थितवानित्याह ॥ ततइति ॥

विररामेतितंस्तुत्वाब्रह्मणासहितोहरिः ॥ इदंस्तोत्रंपरंपुण्यंसर्वपापप्रणाशनम् ॥ २५ ॥ यःपठेच्छृणुयाद्वापिश्रावयेद्वाद्विजोत्तमान् ॥ सयातिब्रह्मणोलोकंपापकर्मरतोपिसन् ॥ २६ ॥ कल्याणंवर्धतेतस्यशुक्लपक्षेयथाशशी ॥ सर्वपापविशुद्ध्यर्थंविष्णुनापरिभाषितम् ॥ २७ ॥ सूतउवाच ॥ अथोवाचमहादेवःप्रीतोहंसुरसत्तमौ ॥ पश्यतांमांमहादेवंभयंसर्वंप्रमुच्यताम् ॥ २८ ॥ युवांप्रसूतौप्रकृतेर्मदिच्छायामहाबलौ ॥ मयारूपंत्रिधाभिन्नंनिर्गुणंसगुणीकृतम् ॥ २९ ॥ अयंमेदक्षिणेपार्श्वेब्रह्मालोकपितामहः ॥ वामपार्श्वेचमेविष्णुर्विश्वात्माहृदयेपरः ॥ ३० ॥ प्रीतोहंयुवयोःसम्यग्वरंदद्मियदीप्सितम् ॥ एवमुक्त्वातुमांविष्णुंकराभ्यांपरमेश्वरः ॥ ३१ ॥ पस्पर्शसुशुभाभ्यांचघृणयासघृणानिधिः ॥ ततःप्रहृष्टमनसाप्रणिपत्यमहेश्वरम् ॥ ३२ ॥ प्राहनारायणोनाथंलिंगस्थंलिंगवर्जितम् ॥ यदिप्रीतिःसमुत्पन्नायदिदेयोवरस्त्वया ॥ ३३ ॥ भक्तिर्भवतुनौनित्यंत्वयिचाव्यभिचारिणी ॥ देवःप्रसन्नवदनोभूत्वोवाचमहामुने ॥ ३४ ॥ कार्यार्थंनिर्मितौदेवौनादेयंविद्यतेमम ॥ जानुभ्यामवनींगत्वामुनेनारायणःस्वयम् ॥ ३५ ॥ ॥

३२ ॥ लिंगवर्जितमिति ॥ औपाधिकाकारयोगेपिवस्तुतोनिराकारमित्यर्थः ॥ ३३ ॥ अव्यभिचारिणी ॥ अनपायिनी ॥ भक्तियाच्ञयासत्वरमीश्वरप्रसादसिद्धिर्भवतीतिदर्शयन्नाह ॥ देवइति ॥ ३४ ॥ कार्यार्थमिति ॥ स्वस्वकर्मवशादुत्पद्यमानजगदनर्थनिवारणरूपकार्यार्थमित्यर्थः ॥ देवौ ॥ युवामितिशेषः ॥ अनश्नन्नन्योअभिचाकशीतीतिश्रुतिबोधितमर्थंदर्शयति ॥ नादेयमिति ॥ पुनर्नारायणःप्रार्थयते ॥ जानुभ्यामिति ॥ अष्टांगप्रणामोपलक्षणमेतत् ॥ तत्स्वरूपंत्वित्थम् ॥ उरसाशिरसादृष्ट्यामनसावचसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगउच्यतइति ॥ ३५ ॥ ॥

प्रकृतजिज्ञासितमद्भुतरूपदर्शनादिनानिर्णीतमप्यवांतरसंशयव्यवच्छेदायनिवेदयति ॥ विवादमिति ॥ सर्ववस्तुतत्त्वकथनेनशोभनं कुर्वितिशेषः ॥ विवादं
शमयप्रभोइतिक्वचित्पाठः ॥ ३६ ॥ तत्रहेतुमाह ॥ इहेति ॥ ३७ ॥ स्मरन्निति ॥ अस्यहरइत्यत्रान्वयः ॥ नारायणप्रार्थितमितिशेषः ॥ ३८ ॥
युवयोरिति ॥ अस्यभक्तिरित्यत्रान्वयः ॥ ततउपास्यंदर्शयति ॥ अभ्यनुज्ञयेति ॥ ममेतिशेषः ॥ पार्थिवीमिति ॥ मृन्मयीमित्यर्थः ॥ ३९ ॥ धर्मान्पू
जाविधिप्रकारान् ॥ अस्योपदिश्येत्यत्रसंबंधः ॥ ४० ॥ ताभ्यांविशिष्याधिकारंप्रयच्छन्नाहभगवान् ॥ ब्रह्मन्निति ॥ लब्धेप्यधिकारेस्वातंत्र्यंनकार्यमित्यु
पदिशति ॥ मदाज्ञेति ॥ ४१ ॥ नारायणेपुत्रभावंदर्शयति भगवान् ॥ वत्सेति ॥ नन्वावाभ्यामल्पसामर्थ्याभ्यांसृष्ट्यादिकंकथंक्रियेतेत्याशंकायांस्वता

प्रणिपत्यचविश्वेशंप्राहमंदतरंवशी ॥ आवयोर्देवदेवेशविवादमपिशोभनम् ॥ ३६ ॥ इहागतोभवान्यस्माद्विवाद
शमनायनौ ॥ तस्यतद्वचनंश्रुत्वापुनःप्राहहरोहरिम् ॥ ३७ ॥ प्रणिपत्यस्थितंमूर्ध्नाकृतांजलिपुटंस्मरन् ॥ ३८ ॥
महेश्वरउवाच ॥ मयिभक्तिर्दृढाभूयाद्युवयोरभ्यनुज्ञया ॥ पार्थिवींचैवमूर्तिंचविधायकुरुतंयुवाम् ॥ ३९ ॥ सेवांचवि
धिवत्प्राज्ञौकृत्वासुखमवाप्स्यथ ॥ उपदिश्यविधानेस्मिन्धर्मान्दुःखहरोहरः ॥ ४० ॥ ददौवराननेकांश्चतयोर्हि
तचिकीर्षया ॥ ब्रह्मन्सृष्टिंकुरुत्वंहिमदाज्ञापरिपालकः ॥ ४१ ॥ वत्सवत्सहरेत्वंचपालयस्वचराचरम् ॥ त्रिधाभि
न्नोह्यहंविष्णोब्रह्मविष्णुहराख्यया ॥ ४२ ॥ सर्गरक्षालयगुणैर्निष्कलोयंसदाहरे ॥ मद्रूपंपरमंब्रह्मन्नीदृशंभवदंग
तः ॥ ४३ ॥ प्रकटीभवितालोकेनाम्नारुद्रःप्रकीर्तितः ॥ मदंशात्तस्यसामर्थ्यंमूनंनैवभविष्यति ॥ ४४ ॥ योयंसोहं
नभेदोस्तिपूजाविधिविधानतः ॥ यथाचज्योतिषःसंगात्जलादेःस्पर्शतानवै ॥ ४५ ॥

दात्म्यकथनेन तयोःसामर्थ्यंद्रढयति ॥ त्रिधेति ॥ ४२ ॥ ब्रह्मेत्यादिनात्रयाणांनाम्नः प्रसिद्धिमुक्त्वा क्रमेणतदाख्यानिमित्तभूतान्गुणानाह ॥ सर्गेति ॥
अहंतुगुणैरसंबद्धएवेत्याह भगवान् ॥ निष्कलइति ॥ अयमहामित्यन्वयः ॥ कस्तर्हिहराख्यस्तृतीयइत्याशंकायांब्रह्माणंकथयति ॥ ईदृशमिति ॥ सांप्रतं
दृश्यमानमिवेत्यर्थः॥४३॥ननु मदंगजस्यलयाख्येमहातिकार्येकथंसामर्थ्यंस्यादितिब्रह्मणआशंकायामाह ॥ मदंशादिति ॥ ४४ ॥ सामर्थ्यान्यूनत्वेहेतुमा
ह ॥ योयमिति एतादृशाभेदज्ञानसाधनमाह ॥ पूजाविधीति ॥ नन्वीश्वरस्यशरीरिणातादात्म्येतद्द्वंधापत्तिरित्याशंकायामाह ॥ यथेति ॥ स्पर्शता॥स्पर्श ॥ ॥
इत्यर्थः ॥ तल्प्रत्ययआर्षः ॥ जलादिसंबद्धस्यापिज्योतिषोजलजनितमालिन्यलेपोनास्तीतिभावः ॥ ४५ ॥

तत्रहेतुगर्भविशेषणमाह ॥ अगुणस्येति ॥ वस्तुतोगुणसंबंधाभावेनबंधनासंभवादितिभावः ॥ संयोगात्कल्पितगुणसंबंधात् ॥ अपिःसंयोगान्वयी ॥ ननु निर्गुणस्यतवध्यानादिकंकथंकार्यमित्याशंकांपरिहर्तुंस्वरूपमाह ॥ शिवरूपमिति ॥ एतत्दृश्यमानं ॥ तदेवरुद्राख्यविभूतावतिदिशति ॥ रुद्रोपीति ॥ सदेति ॥ ध्येयइतिशेषः ॥ ४६ ॥ व्यावहारिकभेदसत्त्वेपिपरमार्थिकभेदबुद्धिस्तत्रनकार्येत्याह ॥ नेति ॥ त्रिजगति लोकत्रये ॥ ४७ ॥ केनचिद्रुपेणभेदसत्त्वेपिवास्तविकाभेदसद्भावेदृष्टांतानाह ॥ सुवर्णस्येत्यादिना ॥ वस्तुत्वंसुवर्णत्वादिकं ॥ नामभेदः इदंकुंडलंइदंकटकमित्यादिकः ॥ ४८ ॥ कुतोनवस्तुतोभेदइत्यत्रहेतुमाह ॥ कारणस्यैवेति ॥ कारणस्वरूपस्यैवकार्येनिदानंपर्यवसानमवस्थानमितियावत् ॥ निदानंकारणेशुद्धौतपसःफलयाचने ॥ वत्सदा

तथाममागुणस्यापिसंयोगाद्बंधनंनहि ॥ शिवरूपंममैतच्चरुद्रोपिशिववत्सदा ॥ ४६ ॥ नतत्रपरभेदोवैकर्त्तव्यश्चमहामुने ॥ वस्तुतोह्येकधाभिन्नंरूपंमेत्रिजगत्युत ॥ ४७ ॥ सुवर्णस्ययथैकस्यवस्तुत्वंनैवगच्छति ॥ अलंकारेकृतेदेवनामभेदोनवस्तुतः ॥ ४८ ॥ कारणस्यैवकार्येचनिदानंचनिदर्शनम् ॥ यथैकस्यामृदोभेदोनाम्निपात्रेनवस्तुतः ॥ ४९ ॥ यथैकस्यसमुद्रस्यविकारोनैववस्तुतः ॥ ५० ॥ एवंज्ञात्वाभवद्भ्यांचनदृश्यंभेदकारणम् ॥ वस्तुतःसर्वदृश्यंचशिवरूपंमतंमम ॥ ५१ ॥ अहंभवानयंचैवरुद्रोयंयोभविष्यति ॥ एकंरूपंनभेदोस्तिभेदेचबंधनंभवेत् ॥ ५२ ॥ तथापीहमदीयंवैशिवरूपंसनातनम् ॥ मूलभूतंसदाप्रोक्तंसत्यंज्ञानमनंतकम् ॥ ५३ ॥

न्यवसानेचेतिकोशात् ॥ निदर्शनमिति ॥ उदाहरणमिदमित्यर्थः ॥ पात्रेघटादौ ॥ नवस्तुतइति ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति श्रुतेः ॥ विकारःफेनलवणादिः ॥ अयंभावः ॥ यथाकुंडलकटकादिषुसुवर्णभेदोनवर्तते तथापरमेश्वरविभूतिषुपरमेश्वरभेदोनास्तीति ॥ ४९ ॥ ५० ॥ नदृश्यम् नचिन्तनीयम् ॥ तत्रैवहेतुमाह ॥ वस्तुतइति ॥ सर्वंदृश्यंविकारंजातम् ॥ मिथोभेदेनप्रतीयमानमपिपरमार्थतोमदीयशिवाख्यरूपात्मकमेव मेमतमित्यर्थः ॥ ५१ ॥ तदेवविशदयति ॥ अहमिति ॥ भवान् विष्णुः ॥ अयंब्रह्मा ॥ भाविनमपिरुद्रंबुद्ध्याविषयीकृत्याह ॥ रुद्रोयमिति ॥ एतद्विभूतीनांस्वाभेदंपुनर्द्रढयति ॥ एकमिति ॥ भेदेचेति ॥ द्वितीयाद्वैभयंभवतीतिश्रुतेरितिभावः ॥ ५२ ॥ भेदाभावेपिपूर्वोक्तरूपाद्विलक्षणंस्वस्वरूपंध्यानार्थंकथयति ॥ तथापीति ॥ ५३ ॥ ॥ ॥ ॥ ॥

विशेषइति ॥ ५४ ॥ प्रकृतेःपूर्वोक्तायाः ॥ नन्वस्मदपेक्षयाभाविनिरुद्रेकोविशेषइत्याशंक्याह नचेति ॥ पुनस्त्वर्थे ॥ अयंतुप्रकृतेःसकाशान्नभविष्यतीत्यर्थः ॥
ननुकुतस्तस्यसंभवइतितत्राह ॥ मदाज्ञेति ॥ अत्रापिरुद्रोत्पत्तिविषयेपि ॥ मत्प्रेरणैवजायते ॥ तथाचब्रह्मणोभ्रुकुटेःसकाशादहमेवरुद्ररूपेणप्रादुर्भविष्यामीत्य
र्थः ॥ पूर्ववत्सवत्सेत्युक्त्याश्रीविष्णौपुत्रभावोदर्शितस्तद्दृष्ट्वाब्रह्मणोभगवदननुकंपाशंकास्यात्तद्वारणायभगवान्ब्रह्मपुत्रत्वमेवांगीचकारेतिभावः॥ ५५ ॥ गु
णेष्विति ॥ सत्त्वादिगुणप्रधानेष्वित्यर्थः॥निर्धारेणेसप्तमी ॥ तेषांमध्येयस्तामसस्तमोगुणप्रधानःप्रोक्तः ॥ रुद्रइत्यब्रुवन्रुद्रोवैक्रूरइत्यादिश्रुत्यादिष्वाम्नातइत्य
र्थः ॥ दुष्टसंहारार्थमितिभावः ॥ सोऽपितमोगुणःप्रकृतिसंबंध्येवनस्वाभाविकइत्याह ॥ प्राकृतइति ॥ तदेवविशदयति ॥ वैकारिकइति ॥ प्रकृतिसंबंधितमो
गुणरूपविकारसंबद्धत्वेनभासमानइत्यर्थः ॥ अहंकारइति ॥ अहंकारेभिमानितयाप्रसिद्धोयःसनामतोवैकारिकोविज्ञेयइत्युत्तरत्रसंबन्धः ॥ वाचारंभणंविका

एवंध्यात्वासदाध्येयंतत्त्वजिज्ञासुनात्वया ॥ विशेषोत्रकथंलभ्येच्छ्रूयतांकथ्यतेमया ॥ ५३ ॥ भवंतौप्रकृतेर्जातौना
यंवैप्रकृतेःपुनः ॥ मदाज्ञाजायतेऽप्यत्रब्रह्मणोभ्रुकुटेरहम् ॥ ५५ ॥ गुणेष्वपिचयःप्रोक्तस्तामसःप्राकृतोहरे ॥ वैकारि
कश्चविज्ञेयोयोहंकारउदाहृतः ॥ ५६ ॥ नामतोवस्तुतोनैवतामसःपरिचक्षते ॥ एतस्मात्कारणाद्ब्रह्मन्करणीयमिदं
त्वया ॥ ५७ ॥ समोहंसर्वभूतेषुपालयैनंपितामह ॥ एतस्याःप्रकृतेर्लक्ष्मीर्ह्येतदंशाभविष्यति ॥ ५८ ॥ ब्रह्माणीच
तदंशाचमहाकालीतदंशिका ॥ भविष्यतिपरानूनंकार्यार्थेऽनेकतांगता ॥ ५९ ॥ त्वंचलक्ष्मीमुपाश्रित्यकार्यंकर्तुमिहा
र्हसि ॥ ब्रह्मन्त्वंचस्वरांदेवींकर्तुंकार्यमनंतकम् ॥ ६० ॥ ॥ छ ॥ ॥ छ ॥

रोनामधेयमितिश्रुतेः ॥ ५६ ॥ तदेवस्पष्टयति ॥ वस्तुतइति ॥ परमार्थतस्तामसइतिनैवाचक्षतेब्रह्मविदइत्यर्थः ॥ ततोवश्यकर्तव्यत्वेनब्रह्माणमुपदिशति
॥ एतस्मादिति ॥ इदंवक्ष्यमाणं ॥ ५७ ॥ समइति ॥ यतोऽहंसर्वभूतेषुतुल्योऽतोमद्रूपमेनंरुद्रंपालयसंमानयेत्यर्थः ॥ पितामहेतिभाव्यभिधानाभिप्रायम्
॥ ननुयतःप्रकृतेरस्मदुत्पत्तिरतःप्रकृतिसाहायकंविनाकथंजगत्स्रष्टुंशक्येतेत्याशंक्याह ॥ एतस्याइति ॥ पालनेनजगतःशोभासंपादनाल्लक्ष्मीशक्तिः ॥ व
र्धनाद्ब्रह्माणीशक्तिः ॥ सर्वभूतकालनात्संहरणान्महाकालीशक्तिरित्येतास्तिस्रः शक्तयःप्रकृतेरंशभूताभविष्यंतीत्यर्थः ॥ ५८ ॥ अनेकतामिति ॥ एकोपा
दानकत्वादभिन्नाभिरपिताभिर्विभिन्नकार्यार्थत्वाद्भिन्नरूपमाश्रितमित्यर्थः ॥ ५९ ॥ तत्रगुणानुरूपांतासांस्थितिंदर्शयन् श्रीविष्णुंजगत्पालनकार्यार्थंल
क्ष्मीशक्त्याश्रयणेनियुंक्ते ॥ त्वंचेति ॥ एवमेवसृष्टिकार्यार्थंब्रह्माणीशक्त्याश्रयणेब्रह्माणंनियुंक्ते ॥ ब्रह्मन्निति ॥ स्वरांसरस्वतीम् ॥ ६० ॥ ॥

स्वकार्यदर्शयति ॥ अहमिति ॥ रुद्ररूपेणेतिभावः ॥ कार्यमिति ॥ संहारकार्यमित्यर्थः ॥ उत्तममित्यनेननसपुनरावर्ततइत्यादिश्रुतिबोधितःपुनरावृत्त्यभावोदर्शितः ॥ तद्योग्यसाधनीभूतांजगद्रचनामुपदिशति ॥ चतुरिति ॥ चतुर्वर्णमयंब्राह्मणक्षत्रियवैश्यशूद्ररूपं ॥ लोकंजगत् ॥ तत्संख्यैश्चतुःसंख्यैः ॥ आश्रमैर्ब्रह्मचर्यगार्हस्थ्यवनस्थत्वपारिव्राज्यरूपैः ॥ ६१ ॥ विविधैरिति ॥ दुष्टनिग्रहशिष्टानुग्रहादिभिःसर्वैरित्यर्थः ॥ तत्फलंदर्शयति ॥ सुखमिति ॥ तत्र विष्ण्वादीनांहेतुगर्भविशेषणद्वयमाह ॥ ज्ञानेति ॥ ६२ ॥ लक्ष्मीकांतमभिमुखीकुर्व्याह ॥ मुक्तिदइति ॥ अत्रहेतुमाह ॥ मद्दर्शनइति ॥६३ ॥ हृदयइति ॥ अत्रोत्तरत्रचहृदयमित्यपिपाठांतरं ॥ अंतरंभेदम् ॥ ६४ ॥ सर्वमेतल्लिंगोपासनायाएव फलमितिसूचयितुंपुनस्तामेवोपदिशति ॥ इदंलिंगमिति ॥ लिंगनिर्माणेमुख्यद्रव्याण्याह ॥ राजतमिति ॥ मुने मननशील ॥ ६५ ॥ एवंविष्णुब्रह्मणोःसंशयापनोदाद्यनुग्रहंकृत्वाभगवान्परोक्षोबभूवेत्याह ॥ एवमिति ॥ स्मृतःप्रसिद्धः ॥ ६६ ॥ लिंगोपासनयाशक्तिविशिष्टस्याप्युपासनासंपद्यतइतिलिंगंमहत्वादिनास्तौति ॥ लिंगमिति ॥ ६७ ॥ ॥ लिंगाराधनंलोकानामप्युपकारकमित्याह ॥ यस्त्विति ॥ किंचिदिति ॥ स्वल्पमपिपूजनादिकार्यमित्यर्थः ॥ नशक्नोमीति ॥ अपरिच्छेद्यत्वादितिभावः ॥ ६८ ॥ एतदाख्यानपठनफलमाह ॥ यस्त्विति ॥ पठतइति ॥ आत्मनेपदमार्षम् ॥ षण्मासादिति ॥ अनंतरमितिशेषः ॥ ६९ ॥ इतिश्रीशिवमहापुराणटीकायांज्ञानसंहितायांसारबोधिन्यांशिवोत्पत्तिवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

अहंकालींसमाश्रित्यकरिष्येकार्यमुत्तमम् ॥ चतुर्वर्णमयंलोकंतत्संख्यैराश्रमैर्ध्रुवम् ॥ ६१ ॥ तदन्यैर्विविधैःकार्यैः कृत्वासुखमवाप्स्यथ ॥ ज्ञानविज्ञानसंयुक्तालोकानांहितकारकाः ॥ ६२ ॥ मुक्तिदोत्रभवानद्यभवलोकेसनातन ॥ मद्दर्शनेफलंयद्वैतदेवतवदर्शने ॥६३॥ ममैवहृदयेविष्णुर्विष्णोश्चहृदयेह्यहम्॥उभयोरंतरंयोवैनजानातिमतोमम ॥ ॥६४॥इदंलिंगंसदापूज्यंभवद्भ्यांसुखहेतवे ॥ राजतंरत्नजातंवाहैमंवापार्थिवंमुने ॥६५॥ एतस्माच्चविधेरन्योवल्लभो नमतोमम ॥ एवमुक्त्वासभगवांस्तत्रैवांतरधीयत ॥ ६६ ॥ तदाप्रभृतिलोकेस्मिन्लिंगेपूजाविधिःस्मृतः॥ लिंगंदेवी महादेवीलिंगंसाक्षान्महेश्वरः ॥ ६७॥ यस्तुलिंगसमीपेतुकार्यंकिंचित्करोतिच ॥ तत्फलस्यचसंख्यान्नशक्नोमिमहामुने ॥ ६८ ॥ यस्तुलिंगसमाख्यानंपठतेशिवसन्निधौ ॥ षण्मासाच्छिवरूपोवैनात्रकार्याविचारणा ॥६९॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवोत्पत्तिवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥

ॐनमःशिवाय ॥ अंतर्धानमगाद्देवोवरान्दत्त्वातथाहरिः ॥ तत्प्रसादाज्जगद्ब्रह्मासससर्जैत्यत्रवर्ण्यते ॥ १ ॥ एवंलिंगप्रादुर्भावादिवृत्तंश्रुत्त्वाशौनकादयोत्युत्सु
कमनसःपुनःसृष्टिप्रकारादिकंशुश्रूषवःसूतंप्रार्थयंते ॥ सूतेति ॥ श्रुत्त्वेति ॥ यस्याःश्रवणमात्रेणेत्यर्थः ॥ यस्याइत्यस्योत्तरत्रापिसंवंधमभिप्रेत्याह ॥
प्रभावेनेति ॥ सामर्थ्येनेत्यर्थः ॥ श्रवणफलेमुनिनिश्चयंदर्शयति ॥ भवेदिति ॥ १ ॥ तदंतरइति ॥ तस्मिन्नवसरइत्यर्थः ॥ अंतरमवकाशावधिपरिधा
नांतर्भेदतादर्थ्ये ॥ छिद्रात्मीयविनावहिरवसरमध्येंतरात्मानिचेत्यमरः ॥ महात्म्यंचरित्रम् ॥ प्रकारंभेदम् ॥ विशेषतइति ॥ तत्तदवान्तरसकलभेदरूपेणे
त्यर्थः ॥ २ ॥ सकलभेद्वर्णनमशक्यमपियथामतिकरिष्यामीतिसूततात्पर्यंदर्शयति ॥ संक्षेपादिति ॥ ३ ॥ ४ ॥ संव्हतमिति ॥ अनेनभगवदंतर्धानप

ऋषयऊचुः सूतसूतमहाभागलिंगोत्पत्तिःश्रुताशुभा ॥ श्रुत्वायस्याःप्रभावेनदुःखनाशोभवेदिह ॥ १ ॥ तदन्तरेच
यज्जातंमाहात्म्यंचाशिवस्यच ॥ सृष्टेःश्चैवप्रकारंतुकथयत्त्वंविशेषतः ॥ २ ॥ सूतउवाच ॥ सम्यक्पृष्टंभवद्भिश्चय
ज्जातंतदनन्तरम् ॥ कथयिष्यामिसंक्षेपाद्यथापूर्वंश्रुतंमया ॥ ३ ॥ अंतर्हितेतदादेवेशिवरूपेसनातने ॥ ब्रह्मणावि
ष्णुनारूपंहंसवाराहयोस्तदा ॥४॥ संव्हतंचततस्ताभ्यांयत्कृतंश्रूयतामिति ॥५॥ ऋषयऊचुः ॥ अस्माकंसंशयंता
वत्त्वंनाशयितुमर्हसि ॥ हंसवाराहयोरूपंताभ्यांचैवधृतंकथम् ॥ ६ ॥ अन्यद्रूपंविहायैवाकिमत्रकारणंवद ॥ इत्येत
द्वचनंश्रुत्वासूतःपौराणिकोऽब्रवीत् ॥ ७ ॥ गगनेहंसरूपस्यगतिर्भवतिनिश्चला ॥ हंसस्यचविवेकोऽस्तिजलदुग्ध
विभागयोः ॥ ८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

र्यन्तंविष्णुब्रह्माणौवाराहहंसरूपिणावेवास्तामितिगम्यते ॥ श्रूयतामिति ॥ तदितिशेषः ॥ ५ ॥ विष्णुब्रह्मभ्यांदिव्यंरूपांतरंविहायतिर्यग्रूपंकिमितिधृतमि
तिज्ञातुंकुतूहलिनोमुनयोयत्पृष्टवंतस्तदाह ॥ अस्माकमिति ॥ तावत्कात्स्न्येंन ॥ ६ ॥ पौराणिकइति ॥ एतद्विशेषणेनसूतस्ययथावदुत्तरकथने परमकुश
लतासूचिता ॥ सर्वपुराणतत्वज्ञानवत्त्वात् ॥ ७ ॥ तत्रब्रह्मणोहंसरूपस्यधारणेवीजमाह ॥ गगनइति ॥ नकेवलंगतिस्थैर्यमात्रेणहंसरूपधारणमपितुव
स्तुतत्त्वपरिक्षणकुशलत्वेनाऽपीत्याह ॥ हंसस्येति ॥ विवेकोऽत्रपृथक्करणसामर्थ्यम् ॥ तच्चलोकेप्रसिद्धं ॥ तदुक्तं ॥ हंसःश्वेतोवकःश्वेतःकोभेदोवकहंसयोः॥
क्षीरनीरविवेकेतुहंसोहंसोवकोवकइति ॥ ८ ॥ ॥ ॥ ॥ ॥

प्रकृतेर्किंविवेचनीयमितितदाह ॥ अज्ञानेति ॥ विद्याविद्ययोरित्यर्थः ॥ अविद्यैवपूर्वंप्रहातव्येतिबोधनायाज्ञानशब्दस्यपूर्वनिपातः॥तत्वमिति॥यदस्तीतिशेषः ॥ हंसकइति ॥ ईश्वरानुकम्पितोहंसइत्यर्थः ॥ ईश्वरात्मनस्तस्यैवोक्तसामर्थ्यसंभवात् ॥ हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवइतिस्मरणात् आसीदितिशेषः ॥ हंसतेतिपाठांतरेतुहंसस्वरूपमित्यर्थः ॥ धृतेतिशेषः ॥ तथाऽपिसभगवन्महिमपारंनगतइत्याह ॥ विवेकइति ॥ विलीयतइति ॥ बहुमार्गेणेनश्रांततयापरावर्ततइत्यर्थः ॥ व्यलीयतेति पाठांतरं ॥ ९ ॥ ननुभगवदनुकम्पितस्यैवंनयुक्तमतआह ॥ सृष्टीति॥ज्ञानं ॥ तस्येतिशेषः ॥ कथमिति॥बहुकार्यविचारव्यापृततत्वेनव्यग्रचित्तत्वादितिभावः ॥ विष्णोर्वाराहरूपस्यधारणेकारणंसूतआह ॥ वाराहेति ॥ वाराहंवराहसंबन्धि ॥ रूपंकारणं ॥ तत्रेत्युच्यतइतिचशेषः ॥ कल्पार्थंश्वेतवाराहसंज्ञितकल्पप्रसित्ध्यर्थमित्यर्थः ॥ प्रकल्पितमिति ॥ भगवत्प्रेरणया ॥ विष्णुनेतिशेषः ॥ १० ॥ तदेवस्पष्टयति ॥ यद्दिन

अज्ञानज्ञानयोस्तत्त्वंतद्विवेकायहंसकः ॥ विवेकोनैवलब्धश्चह्यतोहंसोविलीयते ॥ ९ ॥ सृष्टिप्रवृत्तिकामोवैकथंज्ञानंप्रजायते ॥ वाराहंकारणंरूपंकल्पार्थेचप्रकल्पितम् ॥ १० ॥ यद्दिनंहिसमारभ्यरूपंचधृतवान्हरिः॥तद्दिनंप्रतिकल्पोवैकल्पोवाराहसंज्ञकः ॥ ११ ॥ तदिच्छावायथाजाताताभ्यांरूपंधृतंतथा ॥ नैवात्रविस्मयःकार्योहंसवाराहरूपिणोः ॥ १२ ॥ प्रस्तुतंश्रूयतांपुत्रब्रह्मैवविकृतंचयत् ॥ अनंतेनिष्कलेलिंगेनिर्गुणेगुणरूपिणि ॥ १३ ॥ विष्णवेचवरान्दत्वागुणेषुमुख्यतांव्रज ॥ गुणाःसत्वादयश्चेतितेपिसर्वैविमोहिताः ॥१४॥ तस्मात्त्वंसर्वलोकेषुमान्यःपूज्योभविष्यसि ॥ ब्रह्मणानिर्मितेलोकेयदादुःखंप्रजायते ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥

मिति ॥ तदेवदिनंकल्पारम्भस्यलक्षणमित्याह ॥ तद्दिनंप्रतीति ॥ लक्ष्यलक्षणभावेकर्मप्रवचनीयेनप्रतिनायोगेद्वितीया ॥ तद्दिनमारम्भयःकल्पःप्रवृत्तःसश्वेतवाराहःकल्पइति प्रसिद्धइतिफलितोऽर्थः ॥ घटोनीलोघटइतिवद्विधेयांऽशेऽधिकावगाहनान्नघटोघटइतिवदन्वयानुपपत्तिः ॥ ११ ॥ अशोकवनिकान्यायेनाऽप्याह ॥ तदिच्छेति ॥ तस्यशिवस्येच्छेत्यर्थः ॥ १२ ॥ प्रकृतमाह ॥ प्रस्तुतमिति ॥ अनन्तेनिष्कलेनिर्गुणेऽपिलिंगेसिसृक्षयागुणरूपिणि ब्रह्मैवविकाराभासमापन्नंयदकरोत्तच्छ्रूयतामित्यर्थः॥अनंतंनिष्कलंलिंगंनिर्गुणंगुणरूपिणइतिकल्पितपाठः ॥ तत्रगुणरूपिणइतिविष्णोर्विशेषणम् ॥ १३ ॥ किंतदित्याह ॥ वरानिति ॥ तानेवाह ॥ गुणेष्विति ॥ मुख्यतामिति ॥ प्राथम्यंप्राधान्यंचव्रजेत्यर्थः ॥ तत्रसत्वगुणस्यप्राथम्यंसत्वंरजस्तमइतिगणनाव्यवहारेप्रसिद्धंदर्शयति ॥ सत्वादयश्चेतीति ॥ प्राधान्यंदर्शयति ॥ तेऽपीति ॥ सत्वगुणोत्कर्षदर्शनेनतत्रत्याःसर्वेऽपिमोहंप्राप्ताइत्यर्थः ॥ एतेनगुणगुणिनोस्तादात्म्यंदर्शितम् ॥ १४ ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥

पुनर्भगवानुपदिशति ॥ तदेति ॥ सर्वंदुःखानामिति ॥ सर्वेषांप्राणिनांदुःखानामित्यर्थः ॥ विविधानिति ॥ मत्स्यकूर्मादिभेदेनेत्यर्थः ॥ १६ ॥ नकेवलं त्वदायत्तमेतत्कार्यमपित्वहंप्रेरकोऽस्म्येवेत्याह ॥ गुणरूपइति ॥ १७ ॥ १८ ॥ हरेरस्मिन्कार्येधैर्यलाभायस्वोपास्यत्वंस्वाभेदंचदर्शयति ॥ आवयोरिति ॥ अन्तरंभेदः ॥ नकेवलमुपासनार्थमयमभेदोपदेशोऽपितुपरमार्थतोपीत्याह ॥ वस्तुत्वेचापीति ॥ अनेकत्वमिति ॥ अनेकत्वंचरतःप्राप्तवतोपितेतव निंदामित्यग्रेतनेनान्वयः ॥ तेइत्यव्ययम् ॥ १९ ॥ नारायणद्रोहिणोदोषमाह ॥ मद्भक्तइति ॥ २० ॥ २१ ॥ निग्रहेति ॥ निग्रहोनाशः ॥ सदुष्टानामितिभावः ॥ अनुग्रहःप्रसादःसचभक्तजनानामितिभावः ॥ एवमेवचतुराननेऽपिप्रीतिंभगवान्दर्शितवानित्याह ॥ इत्युक्तेति ॥ २२ ॥ ब्रह्माणंदुःखाद्रक्षितुंहरिमुपदि

तदात्वंसर्वदुःखानांनाशनेतत्परोभव ॥ विविधानवतारांश्चगृहीत्वाकीर्तिमुत्तमाम् ॥ १६ ॥ विस्तारयहरेलोकतारणायपरेश्वर ॥ गुणरूपोऽस्म्यहंरुद्रोह्यनेनवपुषापुनः ॥ १७ ॥ कार्यंकरिष्येलोकानांसर्वथानात्रसंशयः ॥ ममध्येयंभवांश्चैवतवध्येयमहंपुनः ॥ १८ ॥ आवयोरंतरंनैवह्यणुमात्रंविचारतः ॥ वस्तुत्वेचाप्यनेकत्वंचरतोऽपितथैवच ॥ १९ ॥ मद्भक्तोयोनरोभूत्वातेनिंदांयःकरिष्यति ॥ तस्याऽहंसकलंपुण्यंभस्मीकृत्याविशेषतः ॥ २० ॥ नरकेपातयिष्यामितद्दोषात्पुरुषोत्तम ॥ लोकेऽस्मिन्भुक्तिदोनॄणांमुक्तिदश्चविशेषतः ॥ २१ ॥ ध्येयःपूज्यश्चसर्वेषांनिग्रहानुग्रहंकुरु ॥ इत्युक्त्वाचैवब्रह्माणंहस्तेधृत्वास्वयंहरिम् ॥ २२ ॥ कथयामासदुःखेषुसहायोभवसर्वदा ॥ सर्वाध्यक्षश्चदेवेषुभक्तिमुक्तिप्रदायकः ॥ २३ ॥ भवत्वंसर्वदाश्रेष्ठःसर्वकार्यप्रसाधकः ॥ सर्वेषांप्राणरूपश्चभवत्वंचममाज्ञया ॥ २४ ॥ त्वांचसमाश्रितायेवैमामेवसमुपाश्रिताः ॥ अन्तरंयश्चजानातिनिरयेपततेध्रुवम् ॥ २५ ॥ इदंरूपंत्वयातावदीक्षणीयंमदाज्ञया ॥ यावच्चब्रह्मणोऽप्यायुःशतवर्षमुदाहृतम् ॥ २६ ॥ ॥ ॥

दिशति ॥ दुःखेष्विति ॥ असुरादिकृतप्रजापीडनरूपेष्वित्यर्थः ॥ २३ ॥ अतएवाह ॥ सर्वकार्येति ॥ सर्वेष्टसाधकइत्यर्थः ॥ प्राणरूपइति ॥ सएषप्राणादपिप्राणइतिश्रुतेरितिभावः ॥ तदेतत्सर्वमेतदध्यायांतेव्यक्तीभविष्यति ॥ २४ ॥ मदाराधनादपित्वदाराधनंवरमित्याशयेनाह ॥ त्वांचेति ॥ भेदबुद्धौदोषमाह ॥ अंतरमिति ॥ पततइति ॥ आत्मनेपदमार्षं ॥ २५ ॥ सृष्टिसमाप्तिकालपर्यंतंमद्ध्यानविच्छेदोनकार्यइत्याह ॥ इदमिति ॥ तत्कालावधिमाह ॥ यावदिति ॥ ब्रह्मणःपरमेष्ठिनः ॥ शतवर्षमिति ॥ शतायुर्वैपुरुषइतिश्रुतेः ॥ २६ ॥ ॥ ॥ ॥

चतुर्युगेति ॥ कृतत्रेताद्वापारकलिभेदेनेत्यर्थः ॥ ब्रह्मदिनमानमुक्त्वारात्रिमानमाह ॥ रात्रिरिति ॥ युगान्यत्रदैवानि ॥ यथाहमनुः ॥ दैविकानांयुगानांतु सहस्रंपरिसंख्यया ॥ ब्राह्ममेकमहर्ज्ञेयंतावतीरात्रिरेवचेति ॥ तस्यशतवर्षात्मकायुषः ॥ मानंसंख्यानं ॥ एतत्क्रमेणेति ॥ उक्ताहोरात्रत्रिंशत्संख्ययागुणितोमासस्तद्द्वादशकंवर्षमित्येवंक्रमेणेत्यर्थः ॥ विज्ञेयमितिशेषः ॥ २७ ॥ सृष्टिकार्यकालावधिंनिर्धारयति ॥ तावदिति ॥ गुणैःसत्वादिभिः ॥ युक्तंकार्यमित्यर्थः ॥ एतन्निदेशोपक्रमेगुणश्रैष्ठ्यमेवैतत्कार्यक्षमत्वसाधनमितिदर्शितमतस्तदेवाऽत्रस्मारयति ॥ गुणेष्विति ॥ श्रेष्ठत्वेहेतुमाह ॥ सत्वात्मेति ॥ शुद्धसत्वगुणस्वभावइत्यर्थः ॥ तथैवसंबोधयति ॥ पुरुषोत्तमेति ॥ २८ ॥ तत्सर्वंश्रीहरिरङ्गीकृतवानित्याह ॥ इत्येतदिति ॥ ओमितीति ॥ एवमङ्गीकृत्ये

चतुर्युगसहस्राणांसमूहंदिनमुच्यते ॥ रात्रिश्चतावतीतस्यमानमेतत्क्रमेणतु ॥ २७ ॥ तावत्सृष्टेश्चकार्यंवैकर्त्तव्यंविविधैर्गुणैः ॥ गुणेषुचभवान्श्रेष्ठःसत्वात्मापुरुषोत्तम ॥२८॥ इत्येतद्वचनंसर्वंतथेत्योमितिवैहरिः ॥ उवाचपरमप्रीतःशंकरप्रियकाम्यया ॥ २९ ॥ श्रीहरिरुवाच ॥ शंकरश्रूयतांमत्तःकृपासिंधोजगत्पते ॥ सर्वंचैतत्करिष्यामिभवदाज्ञापरायणः ॥ ३० ॥ ममध्येयःसदात्वंचभविष्यसिनचाऽन्यथा ॥ भवतःसर्वसामर्थ्यंलब्धंचैवपुरामया ॥ ३१ ॥ क्षणमात्रमपिचतेध्यानंवैपरमात्मनः ॥ चेतसोदूरतश्चैवमागच्छतुकदाचन ॥ ३२ ॥ ममभक्तश्चयोनित्यंतवनिंदांकरिष्यति ॥ तस्यवैनिरयेवासंप्रयच्छेनियतंध्रुवम् ॥ ३३ ॥ त्वद्भक्तोयोभवेन्नित्यंमद्भक्तःसमुदाहृतः ॥ एवंयोवैविजानातितस्यमुक्तिर्नदुर्लभा ॥ ३४ ॥ ॥ ॥ ॥ ॥

त्यर्थः ॥ ओंप्रश्नेंगीकृतौरोषइतिकोशः ॥ कार्यस्वीकारदाढर्यप्रदर्शनार्थंतथेत्योमितिचेतिपृथगुक्तिः ॥ २९ ॥ भगवदुपदिष्टकार्यंकर्तुंप्रतिजानीते ॥ सर्वमिति ॥ ३० ॥ परंतुसर्वदायदित्वत्प्रेरितःस्यांतदैवकर्तुंशक्नुयांनान्यथेत्याभिप्रेत्याह ॥ ममेति ॥ ननुतवाऽसामर्थ्येमत्प्रेरणामात्रेणकिंस्यादित्याशंक्याह ॥ भवतइति ॥ भवतःसकाशादित्यर्थः ॥ ३१ ॥ क्षणमात्रमिति ॥ परमात्मनस्तेध्यानंममचेतसोदूरतोदूरंक्षणमात्रमपिनैवगच्छत्वित्यन्वयः ॥ ३२ ॥ स्वभक्तस्यापिशिवनिंदाकरणेदोषमाह ॥ ममेति ॥ निरयेनरके ॥ प्रयच्छइति ॥ आर्षमात्मनेपदम् ॥ ३३ ॥ शिवनिंदायांदोषमुक्त्वाशिवतादात्म्यबुध्यास्वभक्तस्यफलसंपत्तिमाह ॥ त्वद्भक्तइति ॥ त्वद्भक्तोयोनित्यंभवेत्समद्भक्तःसमुदाहृतइत्यन्वयः ॥ ३४ ॥ ॥ ॥

बहुकार्यवशान्मत्तः प्रमादस्याऽपिसंभवस्तत्रक्षंतव्यमित्याह ॥ कदाचिदिति ॥ अवगणनाअवज्ञा ॥ ३५ ॥ एवंविष्णुनाप्रार्थितोभगवांस्तदुक्तमङ्गीकृत्या
न्तर्धानंगतवानित्याह ॥ ततइत्यादिना ॥ ३६ ॥ अंतर्धानानंतरंब्रह्माकिंकृतवानितिसूतआह ॥ अंतर्हितइति ॥ ३७ ॥ समाधानंसमाधिः ॥ तपइ
त्यर्थः ॥ प्रजापतिरकामयतप्रजाःसृजेयेतिसतपोतप्यतेतिश्रुतेः ॥ ननुसर्वज्ञत्वंविनाकथंजगत्स्रष्टृत्वशक्तिरस्येत्यतआह ॥ नमस्कृत्येति ॥ ज्ञानमिति ॥
विश्वविषयकंज्ञानमित्यर्थः ॥ स्पष्टंचैतच्छ्रीमद्भागवते ॥ भूयस्त्वंतपआतिष्ठाविद्यांचैवमदाश्रयाम् ॥ ताभ्यामंतर्हृदिब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् ॥ तत
आत्मनिलोकेचभक्तियुक्तःसमाहितः ॥ द्रष्टाऽसिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनइत्यादिभगवद्वाक्येषु ॥ ३८ ॥ ३९ ॥ ब्रह्माण्डनिर्माणप्रकारमाह ॥
पूर्वमिति ॥ तत्रतस्मिन्सृष्टजले ॥ अंजलिमिति ॥ अंजलिनास्ववीर्यंप्राक्षिपदित्यर्थः ॥ यथाहमनुः ॥ अपएवससर्जादौतासुवीर्यमवासृजत् ॥ तदण्ड

महिमाचमदीयश्चवर्धितोभवताध्रुवं ॥ कदाचिदवगणनाजायतेक्षम्यतामिति ॥ ३५ ॥ ततःशंभुस्तदीयंहिश्रुत्वा
वचनमुत्तमम् ॥ उवाचविष्णवेविप्राःक्षंतव्यागणनातव ॥ ३६ ॥ इत्युक्त्वांतर्दधेशंभुःसर्वकल्याणकारकः ॥ अंतर्हि
तेतदादेवेब्रह्मालोकपितामहः ॥ ३७ ॥ तदीयंवचनंकर्तुंसमाधानपरायणः ॥ नमस्कृत्यतदाविष्णुंज्ञानंप्राप्यहरेस्त
दा ॥ ३८ ॥ आनंदंपरमंगत्वासृष्टिंकर्तुंमनोदधे ॥ विष्णुश्चाऽपितदातत्रह्यंतर्धानमुपागतः ॥ ३९ ॥ पूर्वंसृष्टंजलंयच्च
तत्रांऽजलिमुपाक्षिपत् ॥ अतोंऽडमभवत्तत्रचतुर्विंशतिसंज्ञकम् ॥ ४० ॥ विराड्रूपमभूद्विप्राजडरूपमपश्यत ॥ ततःसं
शयमापन्नस्तपस्तेपेसुदारुणम् ॥ ४१ ॥ द्वादशाब्दंपुनस्तेपेविष्णुध्यानपरायणः ॥ तस्मिंश्चसमयेविष्णुःप्रादुर्भूतो
हरिःस्वयम् ॥ ४२ ॥ प्रसन्नोऽस्मिवरंब्रूहिनाऽदेयंविद्यतेतव ॥ ब्रह्मोवाच ॥ युक्तमेतन्महाराजदत्तोऽहंशंभुनाचते ॥ ४३ ॥

मभवद्धैमंसहस्रांशुसमप्रभमिति ॥ चतुर्विंशतीति ॥ चतुर्विंशतितत्त्वयुक्तमित्यर्थः ॥ ४० ॥ विराड्रूपमिति ॥ विविधाकारेणदीप्यमानमित्यर्थः ॥ जडरू
पमिति ॥ जलरूपमपिघनीभूतमित्यर्थः ॥ अपश्यतेति ॥ आर्षमात्मनेपदम् ॥ ब्रह्मेतिशेषः ॥ संशयमिति ॥ सृष्ट्युत्पादनविषयमितिशेषः ॥ तपस्तेप
इति ॥ विष्ण्वनुग्रहेणसंशयापनोदार्थमितिशेषः ॥ ४१ ॥ विष्णुध्यानेति ॥ शिवकेशवयोरभेदस्यपूर्वंनिश्चितत्वेनेतिभावः ॥ ४२ ॥ नादेयमिति ॥ यद्य
त्त्वेष्टंतत्सर्वंदेयमेववात्सल्यातिशयादितिभावः ॥ दत्तइति ॥ पूर्वंशंभुनाऽहंतुभ्यमर्पितः ॥ ४३ ॥ ॥ ॥

त्वयाऽपितदुपदेशानुरूपमेवकर्तव्यमित्याह ॥ तदुक्तमिति ॥ शिवोक्तंजगदित्यर्थः ॥ जडीभूतमिति ॥ अण्डमितिशेषः ॥ इष्टवस्तुप्रार्थयते ॥ प्राणभूतइति ॥ प्राणवायुरूपइत्यर्थः ॥ आवहेति ॥ उपधारयत्वित्यर्थः ॥ मध्यमपुरुषआर्षः ॥ परब्रह्मात्माविष्णुरेवहिसूत्रात्मनाप्राणवायुरूपेणभूतान्युपधारयति ॥ तदुक्तंनमोब्रह्मणेनमस्तेवायोइतिशीक्षोपनिषद्वाक्यव्याख्यानावसरेविद्यारण्याचार्यैः ॥ यच्चब्रह्मज्ञानक्रियाशक्त्युपेतसूत्रात्मनावायुरूपधारिणांसर्वेषां प्राणिनांविधारकंभवति ॥ वायुर्वैगौतमतत्सूत्रंवायुनावैगौतमसूत्रेणायंचलोकःसर्वाणिचभूतानिसंदृब्धानिभवंतीतिश्रुतेरिति ॥ ४४ ॥ तेनब्रह्मणा ॥ प्रविवेशेति ॥ तदण्डमितिशेषः ॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः ॥ ४५ ॥ वैराजरूपेश्रुतिं संगृण्हाति ॥ सहस्रेति ॥ सहस्रशब्दोऽत्रानंतवाची

तदुक्तंयच्चतन्मेद्यजडीभूतंप्रदृश्यते ॥ प्राणभूतोभवानद्यभूत्वाचैतन्यमावह ॥ ४४ ॥ इत्युक्तेचतदातेनशंभोराज्ञापरायणः ॥ अनंतरूपमास्थायप्रविवेशहरिःस्वयम् ॥ ४५ ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंसर्वतःस्पृष्ट्वातदंडंव्याप्तवानिति ॥ ४६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांसृष्टिनिरूपणंनामपंचमोऽध्यायः ॥ ५॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथांपापप्रणाशिनीं ॥ प्रविष्टेविष्णुनातस्मिन्ब्रह्मणासंस्तुतेनवै ॥१॥ सचेतनमभूत्तच्चचतुर्विंशतिसंज्ञितम् ॥ पातालादिसमारभ्यसत्यलोकावधिस्वयम् ॥ २ ॥ राजतेस्महरिस्तत्रवैराजःपुरुषःप्रभुः ॥ सत्यंपदमुपाश्रित्यस्थितोऽसौपुरुषोत्तमः ॥ ३ ॥ तपोलोकंसमास्थायब्रह्मातिष्ठत्तपोधनः अन्येषुसर्वलोकेषुयथायोग्यमवस्थितिः ॥ ४ ॥ ॥ ॥ ॥ ॥

॥ ४६ ॥ इतिश्रीशिवमहापुराणटीकायांज्ञानसंहितायांसारबोधिन्यांसृष्टिनिरूपणंनामपंचमोऽध्यायः ॥ ५ ॥ ओंनमःशिवाय ॥ प्रादुर्भावोऽत्ररुद्रस्य कैलासेगमनंततः॥भृग्वादीनांसमुत्पत्तिः सृष्टिरेवंप्रवर्ण्यते ॥ श्रूयतामिति॥वक्ष्यमाणमितिशेषः ॥ हेश्रेष्ठाऋषयःशौनकादयइत्यर्थः ॥ कथामिति ॥ कथयामीतिशेषः ॥ ब्रह्मणाचतुर्मुखेन ॥ शिवाज्ञप्तेनसतासंस्तुतेनप्रार्थितेनेत्यर्थः ॥ विष्णुनातस्मिन्नंडेप्रविष्टेसति ॥ १ ॥ सचेतनामिति ॥ महदादिचतुर्विंशतितत्वयुक्तं ॥ तदंडंसचेतनं सप्राणमभूदित्यर्थः ॥ २ ॥ राजतइति ॥ वैराजोविराड्रूपोविष्णुः ॥ विराजोअधिपुरुषइतिश्रुतेः ॥ सत्यसंज्ञांस्वीकृत्य तत्रसत्यलोके राजतेस्मसर्वोत्कर्षेणावर्तत ॥ ३ ॥ तपोलोकमिति ॥ तपोधनस्तपएवधनंद्रव्यंयस्यसब्रह्मास्रष्टातपोलोकमतिष्ठदित्यन्वयः ॥ ४ ॥

मानसाइति ॥ तदुक्तंश्रीमद्भागवतेविदुरप्रश्ने ॥ अंतर्हितेभगवतिब्रह्मालोकपितामहः ॥ प्रजाःससर्जकतिधादैहिकीर्मानसीर्विभुरिति ॥ पुत्राः सनकसनंद नादयः ॥ तेमानसपुत्राः ॥ ऊर्ध्वरेतसःऊर्ध्वरेतःशुक्रंयेषांते तथा ॥ प्राकृतमिथुनकर्मशून्याइत्यर्थः ॥ अभवन्निातिशेषः ॥ पश्चात्ततः ॥ प्रभुर्ब्रह्मा ॥ अन्यानृषीन्निर्मितवानितिशेषः ॥ ५ ॥ प्रयोजनवशाच्छिवस्याऽनेकानिनामान्यभूवन्नित्याह ॥ तइत्यादिना ॥ सब्रह्मा ॥ पश्चाद्विरक्तेषुजातेषुसत्स्वित्यर्थः ॥ ततोरोदनानंतरं ॥ हरोउत्पन्नोऽभूत् ॥ ६ ॥ रोदनादिति ॥ सरोदनाद्रुद्रइतिप्रसिद्धः ॥ सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वमितिश्रुतेः ॥ रुद्रोब्रह्माणमाह ॥ ब्रह्मन्निति ॥ हेब्रह्मन्चतुर्मुख ॥ स्फोटयामिनाशयामि ॥ ७ ॥ एतद्वचनंरुद्रवाक्यं ॥ हेदेवरुद्र ॥ ८ ॥ तथेति ॥ यथासृष्टिरनपायिनीपीडारहितास्यात्तथा

ततश्चमानसाःपुत्रानिर्मिताब्रह्मणापुरा ॥ तेचोर्ध्वरेतसःसर्वेपश्चादन्यानृषीन्प्रभुः ॥ ५॥ तेविरक्ताश्चसंजाताःपश्चात्क्रोधमवापसः ॥ तेनैवरोदनंचक्रेततश्चैवाभवद्धरः ॥ ६ ॥ रोदनाद्रुद्रनामेतिप्रसिद्धोभगवान्भवः ॥ ब्रह्मन्दुःखंकिमुत्पन्नंस्फोटयामिनसंशयः ॥ ७ ॥ इत्येतद्वचनंश्रुत्वाब्रह्मावचनमब्रवीत् ॥ साधूक्तंचत्वयादेवसृष्टौविघ्नोदयोभवेत् ॥ ८ तथाकार्यंत्वयानित्यंसृष्टिःस्यादनपायिनी ॥ इत्येवंवचनंश्रुत्वालोकानांदुःखहाहरः ॥ ९ ॥ वचनंचोक्तवांस्तत्रस्रष्टुःप्रियचिकीर्षया ॥ अहंचैवकरिष्यामिसृष्टिमेतांसनातनीम् ॥ १० ॥ इत्युक्त्वाब्रह्मणेरुद्रोगुणरूपीहरःस्वयम् ॥ जगामसगणोदेवःकैलासमचलंततः ॥ ११ ॥ ततोब्रह्माऋषीन्सप्तभृग्वादीन्निर्ममेतदा ॥ उत्संगान्नारदंश्रेष्ठंछायायांकर्दमंपुनः ॥१२॥ अंगुष्ठाच्चतथादक्षमेवंदशक्रमेणतु ॥ भृगोश्चैवतथाजातोमरीचिर्नामवैऋषिः ॥ १३ ॥

त्वयारुद्रेणकार्यमितियोजना ॥ ९ ॥ स्रष्टुर्ब्रह्मणः ॥ प्रियचिकीर्षयाप्रियंकर्त्तुमिच्छया ॥ १० ॥ इतीति ॥ गुणरूपीतमोगुणमयः ॥ रुद्रस्वरूपोहरोब्रह्मणेचतुर्मुखायेतिपूर्वोक्तप्रकारेणोक्त्वाकैलासंजगामेत्यन्वयः ॥ ११ ॥ सृष्टिप्रकारमाह ॥ ततइत्यादिना ऋषीनाह ॥ भृग्वादीनिति ॥ आदिशब्देनवसिष्ठादयोग्राह्याः ॥ नारदादीनांत्रयाणामुत्पत्तेःप्रकारमाह ॥ उत्संगादिति ॥ उत्संगादूरुप्रदेशान्नारदंनिर्ममे ॥ छायायांस्वीयछायायांकर्दमाख्यमृषिं ॥ अंगुष्ठाद्दक्षाख्यं ॥ एवंदशपुत्रान्निर्ममइत्यर्थः ॥ १२ ॥ भृगोर्मरीचिर्जज्ञे ॥ श्रीमद्भागवतेतु ॥ मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः ॥ भृगुर्वसिष्ठोदक्षश्चदशमस्तत्रनारदः ॥ उत्संगान्नारदोजज्ञेदक्षोंऽगुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठःसंजातोभृगुस्त्वचिकरात्क्रतुरित्याद्युक्तं ॥ १३ ॥ ॥ ॥

ततोमरीचेःकश्यपोजज्ञे ॥ तेनकश्यपेन ॥ स्वसंतानद्वारेदंसर्वंजगत्पूरितंविस्तारितं ॥ तदुक्तंश्रीमद्भागवतेषष्ठस्कंधषष्ठाध्याये ॥ यासांप्रसूतिप्रसवैर्लोका आपूरितास्त्रयइति ॥ कश्यपात्कासुस्त्रीषुसंततिरभूदित्याशंकायांशिवस्यसतीलाभप्रयोजनप्रदर्शनायभिन्नप्रस्तावेनाह षष्टीति॥ महात्मनोदक्षप्रजापतेःषष्टि संख्याकाःकन्यकाःसंजाताः ॥१४॥ तासांमध्येत्रयोदशकन्याअदित्यादयःसालंकृताविवाहविधिनाकश्यपायदक्षेणदत्ताइत्यन्वयः॥ तासांनामान्युक्तानिश्री मद्भागवते ॥ अदितिर्दितिर्दनुःकाष्ठाअरिष्टासुरसाइला ॥ मुनिःक्रोधवशाताम्रासुरभिःसरमातिमिरिति ॥ १५ ॥ ततइतिवृक्षाश्चेतिच ॥ दक्षकन्याभिःक श्यपात्प्रसूतादेवादयःयैश्चराचरंनिखिलंजगद्व्याप्तमित्यन्वयः ॥ तेकेदेवादयइत्याशंकायामाह ॥ देवाश्चेति ॥ अदित्यांदेव्यांदेवाउदपद्यंत ॥ आदितेयादि

ततश्चकश्यपोजज्ञेतेनेदंपूरितंजगत् ॥ षष्टिकन्यास्तथाजातादक्षाच्चैवमहात्मनः ॥१४॥ त्रयोदशतथाकन्याःकश्य पायमहात्मने ॥ दत्तादक्षेणताःकन्याविधिवद्दषिसत्तमाः ॥१५॥ ततःप्रसूतिभिर्व्याप्तंतासांचकश्यपस्यच ॥ देवाश्च दनुजाश्चैवदैत्याश्चविविधास्तथा ॥१६॥ वृक्षाश्चपक्षिणश्चैवसर्पपर्वतवीरुधः॥प्रसूतादक्षकन्याभिर्व्याप्तमेतच्चराच रम् ॥ १७ ॥ पातालतलमारभ्यसत्यलोकावधिध्रुवम् ॥ ब्रह्मांडंसकलंव्याप्तंशून्यंनैवकदाचन ॥ १८ ॥ सतीनाम तथाकन्यारुद्रायचमहात्मने ॥ दत्तादक्षेणसाकन्याभवानीतिप्रकीर्तिता ॥ १९ ॥ ब्रह्माविष्णुश्चरुद्रश्चगुणास्त्रयउ दाहृताः ॥ विष्णुःसत्वंरजोब्रह्मातमोरुद्रउदाहृतः ॥ २० ॥ तथागुणमयीदेवीलक्ष्मीःसत्वमुपाश्रिता ॥ राजसीचत थाब्राह्मीतमोरूपातुसासती ॥ २१ ॥ गुणरूपामहाकालीयावैरुद्रमुपाश्रिता ॥ पुनश्चपार्वतीजातासाशिवंसमुपा गता ॥ २२ ॥ ततोनामान्यनेकानिप्रापसापर्वतात्मजा ॥ कालिकाचंडिकाभद्राचामुंडाविजयाजया ॥ २३ ॥

विषदइत्यमरात् ॥ दनुनाम्न्यांदानवाः ॥ दनुजादानवारयइत्यमरात् ॥ विनतायांपक्षिणः ॥ कद्रूदेव्यांसर्पाः ॥ तथावृक्षपक्षिसर्पपर्वतलताइत्यर्थः ॥ ॥ १६ ॥ १७ ॥ यत्किंचिदपिस्थलंकश्यपसंततिशून्यंनासीदित्याह ॥ पातालेति ॥ १८ ॥ प्रकृतमाह ॥ सतीति ॥ १९ ॥ सतीप्रभृतीनांतिसृणांस्व रूपबोधनायब्रह्मविष्णुरुद्राणांरजःसत्वतमोगुणात्मकत्वमाह ॥ ब्रह्मेति ॥ त्रयोगुणास्त्रिगुणात्मकाइत्यर्थः ॥ तत्प्रकारमाह ॥ विष्णुरिति ॥ तदुक्तंश्रीम द्भागवते ॥ सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्ते॥स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्वतनोर्नृणांस्युरिति ॥ २० ॥ सत्वादिगुणयोगाल्लक्ष्म्याद्यवतारानाह ॥ तथेत्यादिना॥२१॥तत्रसतीदेव्याअवतारानाह॥गुणरूपेति॥२२॥पार्वत्याअनेकानिनामान्याह ॥ ततइति ॥२३॥

त्रिविधामिति ॥ त्रिविधांसत्वरजस्तमोमयीं ॥ देवमनुष्यतिर्यग्रूपांवा ॥ अत्रविविधामितिपाठांतरं ॥ तेचब्रह्माद्याः ॥ २४ ॥ तेऋषयःशौनकादयःपप्रच्छु रित्यग्रिमेणान्वयः ॥ २५ ॥ २६ ॥ सूतेति ॥ हेसूत गुरोर्व्यासस्येत्यर्थः ॥ कथंकार्यंतथाब्रूहियथाव्यासमुखाच्छ्रुतमितिवक्ष्यमाणग्रंथप्रामाण्यात् ॥ प्र तापादुपदेशप्रभावात् ॥ कृपयाचेतिपाठांतरंसाधीयः ॥ त्वंसर्वंजानासीत्यतस्त्वन्मुखांभोजसंवृत्तंतवमुखकमलान्निःसृतंहरकथामृतंपीत्वावयंनतृप्याम इत्यग्रिमेणान्वयः ॥ २७ ॥ दक्षपुत्रीसतीनाम्नी ॥ पर्वतात्मजापार्वतीनाम्नी ॥ २८ ॥ एकशरीरेणेति ॥ शरीरभेदेत्ववतररूपत्वान्नतत्रविरोधः ॥ प्रकृ तेत्वेकशरीरेणोभयपुत्रीत्वंविरुध्यतइतिभावः ॥ २९ ॥ एतद्धिति ॥ एतत्पूर्वोक्तप्रश्नविषयीभूतं ॥ अन्यच्चप्रश्नाविषयंशिवसंबंधीत्यर्थः ॥ कथितुंवक्तुंणि

गुणमय्यस्तथादेव्योदेवागुणमयास्त्रयः ॥ मिलित्वात्रिविधांसृष्टिंचक्रुस्तेकार्यमुत्तमं ॥ २४ ॥ इत्येवंवचनंश्रुत्वाऋष यस्तेऽमलाशयाः ॥ नारदाद्याश्चयोगींद्राहर्षनिर्भरमानसाः ॥ २५ ॥ शृण्वानाःपरमांदिव्यांकथांचैवपुरातनीम् ॥ अप्राप्यतृप्तिंतेसर्वेपप्रच्छुःपुनरेवतम् ॥ २६ ॥ ऋषयऊचुः ॥ सूतसर्वंहिजानासिप्रतापाच्चगुरोरिह ॥ त्वन्मुखांभो जसंवृत्तंपीत्वाहरकथामृतम् ॥ २७ ॥ नतृप्यामःपुनस्तांचपातुमिच्छामहेवयम् ॥ प्रथमंदक्षपुत्रीचपश्चाच्चपर्वतात्म जा ॥ २८ ॥ कथमेकशरीरेणद्वयोःपुत्रीप्रजायते ॥ कथंवैपार्वतीपुण्यापुनःशिवमुपागता ॥ २९ ॥ एतत्सर्वंतथा ऽन्यच्चसत्वंकथितुमर्हसि ॥ तदुक्तंतुतदाश्रुत्वासूतोवचनमब्रवीत् ॥ ३० ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांसृ ष्टिनिरूपणंनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ श्रूयतांऋषयःश्रेष्ठाःकथयामिशुभांकथाम् ॥ य च्छ्रुत्वासफलंजन्मभविष्यतिनसंशयः ॥ १ ॥ पूर्वंदक्षस्यरुद्रस्यस्पर्धाजातामहात्मनोः ॥ ततोदक्षःस्वयंयज्ञंकृतवा न्देवसंनिधौ ॥ २ ॥ अनाहूयतदारुद्रंपूर्वंऋषिसमन्वितः ॥ ततोदेवीसतीनाम्नीपित्रानाकारितायदा ॥ ३ ॥

जभावआर्षः ॥ अर्हसियोग्योऽसीत्यर्थः ॥ ३० ॥ इतिश्रीशिवमहापुराणटीकायांज्ञानसहितायांसारबोधिन्यांसृष्टिनिरूपणंनामषष्ठोऽध्यायः ॥६॥ ओंनमः शिवाय ॥ उमावतारःसंक्षेपात्प्रातःस्नानादिकोविधिः ॥ यथावर्णंलिंगपूजासप्तमेत्रप्रवर्ण्यते ॥ श्रूयतामिति ॥ हेश्रेष्ठाऋषयःयत्कथांश्रुत्वासफलंजन्मभ विष्यतितादृशींकथांकथयामित्वयासाकथाश्रूयतामितिसंबंधः ॥ १ ॥ पूर्वंदक्षस्यरुद्रस्यचैतयोर्महात्मनोःस्पर्धाद्वेषःसंजातासमजनीत्यर्थः ॥ २ ॥ अनाहूये ति ॥ रुद्रस्याव्हानमकृत्वेतिफलितार्थः ॥ अनाकारिताऽनाहूता ॥ पित्रादक्षेण ॥ ३ ॥ ॥ ॥ ॥

अवज्ञामवमानम् ॥ ४ ॥ वीरभद्रादिकैर्देवलोकेजीवितेप्राणितेकृतेसतीत्यन्वयः ॥ कृतइत्यत्रहतेइतिपाठांतरम् ॥ ५ ॥ कथंलोकेसुखंभवति नभवेदि त्यर्थः ॥ स्तवनादपीति ॥ अपिनाशरणागतिरुपलक्ष्यते ॥ ६ ॥ कृतमिति ॥ यज्ञपूर्त्यादिकमितिशेषः ॥ ७ ॥ ८ ॥ ज्वालामुखीतिमहास्थानंहिमाल येप्रसिद्धम् ॥ ९ ॥ सादेवीज्वालामुखीनामतस्यांमेनायांजन्मसमादधेस्वीकृतवतीत्यर्थः ॥ यापितृणांमनसउद्भूताकन्यामेनेतिप्रसिद्धासा शैलराजस्यहि

तदागतापुनस्तत्रनाहूतापिपितुर्गृहे ॥ प्राप्यावज्ञांतुसातत्रदेहत्यागमथाकरोत् ॥ ४ ॥ यज्ञध्वंसेतथाजातेदेवलोके ऽथजीविते ॥ रुद्रस्याऽनुचरैस्तत्रवीरभद्रादिकैःकृते ॥ ५ ॥ रुद्रेक्रुद्धेकथंलोकेसुखंभवतिसत्तमाः ॥ पश्चाद्रुद्रःप्रसन्नो ऽभूद्देवानांस्तवनादपि ॥ ६ ॥ पूर्ववच्चकृतंतेनकृपालुत्वान्महात्मना ॥ रुद्रश्चपूजितस्तत्रदेवैर्देववरस्तदा ॥ ७ ॥ स तीदेहसमुत्पन्नाज्वालालोकभयावहा ॥ पतितापर्वतेतत्रपूजितासुखदायिनी ॥ ८ ॥ ज्वालामुखीतिसाप्रोक्तासर्व कामफलप्रदा ॥ इदानींपूज्यतेलोकैःसर्वकामफलाप्तये ॥ ९ ॥ सादेवीशैलराजस्यपत्नीमेनेतिविश्रुता ॥ पितॄणां मानसीकन्यातस्यांजन्मसमादधे ॥ १० ॥ ततश्चपार्वतीनामप्रसिद्धमभवत्तदा ॥ सापुनःशिवमाराध्यभर्तारंशिवमा श्रिता ॥ ११ ॥ भजतांसर्वलोकानांफलंयच्छत्यनेकशः ॥ एतत्सर्वंसमाख्यातंयत्पृष्टोऽहंपुरातनं ॥ १२ ॥ यच्छ्रुत्वा सर्वपापेभ्योमुच्यतेनाऽत्रसंशयः ॥ इतिश्रुत्वावचस्तस्यनैमिषारण्यवासिनः ॥ १३ ॥ पप्रच्छुरृषयःश्रेष्ठाःकथांपाप प्रणाशिनीम् ॥ ऋषयऊचुः ॥ सूतसूतमहाभागकथांपापप्रणाशिनीम् ॥ १४ ॥ श्रुत्वातुत्वन्मुखादेवनतृप्तास्मवयंप्र भो ॥ पुनःकथयतत्सर्वंशिवस्याराधनक्रमम् ॥ १५ ॥ यश्चयश्चविधिःप्रोक्तोयेनैवाराधितःशिवः ॥ प्रसन्नेनशिवेनै वकस्मैदत्तंफलंतुयत् ॥ १६ ॥ पार्वत्याश्चतपश्चैवविवाहश्चतथाऽनघ ॥ त्रिपुरस्यवधश्चैवज्योतिर्लिंगसमुद्भवः ॥ १७ ॥

माचलस्यपत्नीवभूवेतिशेषः ॥ १० ॥ ११ ॥ १२ ॥ इतीति ॥ तस्यसूतस्य ॥ १३ ॥ १४ ॥ १५ ॥ यश्चयश्चेति ॥ योयोविधिःप्रोक्तःयेनसाधने नशिवआराधितःफलंचयद्दत्तं ॥ पार्वत्यास्तपआदिकंयत्तत्सर्वंकथयेतिपूर्वेणान्वयः ॥ १६ ॥ १७ ॥ ॥ ॥

वर्णभेदेनशिवपूजाविधिभेदंपृच्छंति॥ब्राह्मणैरिति॥ १८॥श्रुतिसंमतंवेदसंमतम्॥वचनमित्यत्रशर्मदमितिपाठांतरं ॥१९॥२०॥ भवद्भिरिति॥भवद्भिर्यद्द्येनप्रकारेणपृच्छ्यतेतथातेनप्रकारेणपुरापूर्वंव्यासेनसनत्कुमारायपृष्टंतदेवोपमन्युनाश्रुतमित्यर्थः ॥ २१ ॥ ततइति ॥ सनत्कुमारादित्यर्थः ॥ २२ ॥ मह्यंपाठितमध्यापितम् ॥ कृष्णेनश्रीकृष्णेन ॥२३॥२४॥ ईप्सुःआप्तुमिच्छुः ॥२५॥ सर्वकामेति॥काम्यतइतिकामःव्रियतेस्वी॥क्रियतइतिवरःतस्याप्तयेऽभीष्टफ

ज्योतिर्लिंगानिकतिधाकिंतेषांदर्शनेफलम्॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैर्वाशंभुपूजनम्॥१८॥कथंकार्यंतथाब्रूहियथाव्यासमुखाच्छ्रुतम् ॥ तच्छ्रुत्वावचनंतेषांवचनंश्रुतिसंमतम् ॥ १९ ॥ उवाचसकलंतत्रप्रश्नस्याऽनुक्रमेणतु ॥ सूतउवाच ॥ सम्यक्पृष्टंभवद्भिश्चयद्रहस्यंमुनीश्वराः ॥ २० ॥ तदहंकथयाम्यद्ययथाबुद्धियथाश्रुतम् ॥ भवद्भिःपृच्छ्यतेयद्वत्तथाव्यासेनवैपुरा ॥ २१ ॥ पृष्टंसनत्कुमारायतच्छ्रुतंह्युपमन्युना ॥ ततोव्यासेनवैश्रुत्वाशिवपूजादिकंचयत् ॥ ॥ २२ ॥ मह्यंचपाठितंतेनलोकानांहितकाम्यया ॥ यच्छ्रुतंचैवकृष्णेनह्युपमन्योर्महात्मनः ॥ २३ ॥ तदहंकथयिष्यामिश्रूयतामृषिसत्तमाः ॥ वक्ष्यामिशृणुसंक्षेपाल्लिंगार्चनविधिक्रमं ॥ २४ ॥ वक्तुंवर्षशतेनाऽपिनशक्यंविस्तरेणतु ॥ एवंचशांकरंरूपंसुखमीप्सुःसनातनं ॥ २५ ॥ पूजयेत्परयाभक्त्यासर्वकामवराप्तये ॥ दारिद्र्यंरोगदुःखंचसंकटंशत्रुसंभवं ॥२६॥ पापंचतुर्विधंतावद्यावन्नार्चयतेशिवं ॥ संपूजितेशिवेदेवेसर्वंदुःखंविलीयते ॥ २७ ॥ योवैमानुषमाश्रित्यसुखसंतानकामुकः ॥ तेनपूज्योमहादेवःसर्वकामार्थसाधकः ॥ २८ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चविधिवत्क्रमात् ॥ प्रातःकालेसमुत्थायमुहूर्त्तेब्राह्मसंज्ञिते ॥ २९ ॥ विष्णोश्चस्मरणंकृत्वागुरोश्चैवाऽथवापुनः ॥ तीर्थानांस्मरणंकृत्वाध्यानंचैवहरेरिति ॥ ३० ॥ मेघश्यामचतुर्बाहोभक्तानामभयप्रद ॥ तेरूपंसुंदरंसर्वंत्वद्दिवसतुनित्यशः ॥ ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लप्राप्तयइत्यर्थः ॥ शिवानर्चनेदुःखमाह ॥ दारिद्र्यमिति ॥२६॥ चतुर्विधमिति ॥ कायिकवाचिकमानसिकसांसर्गिकरूपमित्यर्थः ॥ शिवार्चनेकृतेदुःखनिवृत्त्यादिफलमाह॥संपूजितइति ॥२७॥ मानुषंमनुष्यसंबंधिजन्म ॥२८॥ अधुनाब्राह्मणादिवर्णानामाचारक्रममाह ॥ ब्राह्मणाइति ॥ ब्राह्मसंज्ञितेमुहूर्त्तेब्राह्मेमुहूर्त्तेइत्यर्थः ॥ सूर्योदयात्पूर्वंघटिकाचतुष्टयंब्राह्मइत्युच्यते ॥२९॥ गुरोरिति ॥ वाचार्थे ॥३०॥ मेघश्यामवर्षाकालीनमेघवत्कृष्ण ॥ तेतवरूपम्॥ ३१ ॥

मलोत्सर्गशौचविधिम् ॥ दक्षिणस्यामिति ॥ तदुक्तमापस्तंबेन ॥ प्राङ्मुखोऽन्नानिभुंजीतव्युच्चरेद्दक्षिणामुखइति ॥ याज्ञवल्क्येनतु॥दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः ॥ कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखइत्युक्तम् ॥ इदंचसर्ववर्णसाधारणम् ॥ ३२ ॥ पंचवारमिति ॥ इदंचब्राह्मणविषयमिति प्रकरणाद्गम्यते ॥ ३३ ॥ वारत्रयंत्रिवारमित्यर्थः ॥ ३४ ॥ शूद्राणामुक्तंविधिंस्त्रीष्वतिदिशति ॥ स्त्रीणामिति ॥ ३५ ॥ द्वादशांगुलमानतइतिब्राह्मणविषयम् ॥ राजेतिपदंक्षत्रियपरम् ॥ ३६ ॥ कालदोषमिति ॥ एकादश्यादिषुदंतधावननिषेधात् ॥ अनूच्छिष्टमिति ॥ कालांतरेस्वयमन्येनवाचर्वितमित्यर्थः ॥ कालंदेशंविचार्यैवमितिपाठेतुदेशकालमनुसृत्येत्यर्थः ॥ एतेनकाष्ठालाभेतुभस्मादिनाऽपिदंतधावनंकार्यमितिगम्यते ॥ ३७ ॥ स्नानविधिमाह ॥ स्नानमिति ॥ तदुक्तंयाज्ञवल्क्येन ॥ अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः ॥ हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजादयः ॥ शुध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः ॥ स्नानमब्दैवतैर्मंत्रैर्मार्जनंप्राणसंयमइति ॥ ३८ ॥ आचम्येति ॥ आचमनप्रकारोयाज्ञवल्क्येनोक्तः ॥ अंतर्जानुःशुचौदेशउपविष्टउदङ्मुखः ॥ प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत् ॥ त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःसमुपस्पृशेदिति ॥ संध्याविधिमिति ॥ तत्रसंध्याहोरात्रयोःसंधौयाक्रियाविधीयतेसासंध्येतिमिताक्षरायाम् ॥ याज्ञवल्क्यःसंध्याविधिप्रकारमुक्तवान् ॥ जपन्नासीतसावित्रींप्रत्यगातारकोदयात् ॥ संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनादिति ॥ पूर्वांसंध्यांसनक्षत्रामुत्तरांसदिवाकरामितिसदाचारस्मृतिश्च ॥ ३९ ॥ ४० ॥

ततःस्तोत्रंशुभंनामगृण्हीयाद्विधिपूर्वकं ॥ तत्रोत्थायमलोत्सर्गंदक्षिणस्यांदिशिक्रमात् ॥ ३२॥ एकांतेतुतदाकुर्यान्मलोत्सर्गविधिंपुनः ॥ शुद्धांमृदंसमादायपंचवारंविशुद्धये ॥ ३३ ॥ क्षत्रियश्चचतुर्वारंवैश्योवारत्रयंतथा ॥ शूद्रश्चैवद्विवारंचमृदांतुग्रहणंक्रमात् ॥ ३४ ॥ हस्तौपादौचप्रक्षाल्यपूर्ववन्मृदमाहरेत् ॥ स्त्रीणांतुशूद्रवत्कार्यंमृदादिग्रहणंतथा ॥ ३५ ॥ दंतकाष्ठंतथाकुर्याद्द्वादशांगुलमानतः ॥ एकादशांगुलंराजातथावैश्योदशांगुलं ॥ ३६ ॥ शूद्रोनवांगुलंकुर्यादितिमानमिदंस्मृतं ॥ कालदोषंविचार्यैवमनूच्छिष्टंविवर्जयेत् ॥ ३७ ॥ स्नानंतुविधिवत्कार्यंतीर्थादिषुक्रमेणच ॥ देशकालाविरोधेनस्नानंकार्यंसमंत्रकम् ॥ ३८ ॥ आचम्यप्रथमंतत्रधौतवस्त्रंतुधारयेत् ॥ एकांतेतुस्थलेस्थित्वासंध्याविधिमथाचरेत् ॥ ३९ ॥ यथायोग्यंविधिंकृत्वापूजाविधिमथाचरेत् ॥ मनस्तुसुस्थिरंकृत्वापूजागारंप्रविश्यच ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

पूजाक्रममाह ॥ प्रथममित्यादिना ॥ सकलविघ्ननियामकत्वेनप्रथमंगणाधीशंपूजयेत् ॥ दिक्पालाःइंद्राद्यष्टौ ॥इंद्रोवन्हिःपितृपतिर्नैर्ऋतोवरुणोमरुत् ॥
कुबेरईशःपतयःपूर्वादीनांदिशांक्रमादित्यमरः ॥ पूज्याः ॥४१॥४२॥ उपलक्ष्यअभिमुखीकृत्य ॥४३॥ प्राणायामेति ॥ प्राणस्यमुखनासिकासंचारिवायो
रायामोनिरोधनमित्यर्थः ॥ प्राणायामप्रकारोयाज्ञवल्क्येनोक्तः॥गायत्रींशिरसासार्धजपेद्व्याहृतिपूर्विकाम्॥प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमइति॥तदर्थश्चभि
ताक्षरायाम्॥गायत्रींपूर्वोक्ताम् ॥ तत्सवितुर्वरेण्यमित्यादिरूपामित्यर्थः ॥ आपोज्योतिरित्यादिना॥शिरसासंयुक्ताम् ॥ उक्तव्याहृतिपूर्विकांप्रतिव्याहृतिप्रण
वेनसंयुक्ताम् ॥ ओंभूःओंभुवःओंस्वरितित्रीन्वारान् मुखनासिकासंचारिवायुंनिरुंधन्मनसाजपेदित्ययंसर्वत्रप्राणायामइति ॥ त्र्यंबकंत्रिनेत्रमित्यर्थः ॥

पूजाद्रव्यंसमास्थायक्रमेणपूजयेद्वरम् ॥ प्रथमंचगणाधीशंद्वारपालंततःपरं ॥ ४१ ॥ दिक्पालास्तुततःपूज्याःप
श्चात्पीठंप्रकल्पयेत् ॥ अथवाऽष्टदलंकृत्वापूजाद्रव्यसमीपतः ॥ ४२ ॥ उपविश्यततस्तत्रउपलक्ष्यशिवंप्रभुम् ॥
आचामत्रितयंकृत्वाप्रक्षाल्यचपुनःपुनः ॥ ४३ ॥ प्राणायामत्रयंकृत्वाध्यायेद्देवंचत्र्यंबकं ॥ पंचवक्त्रंदशभुजंशुद्धस्फटि
कसंनिभम् ॥ ४४ ॥ सर्वाभरणसंयुक्तंव्याघ्रचर्मोत्तरीयकं ॥ तस्यसारूप्यमाश्रित्यदहेत्पापंनरस्तदा ॥ ४५ ॥ शै
वींतनुंसमास्थायपूजयेत्परमेश्वरं ॥ देहशुद्धिंततःकृत्वामूलमंत्रंन्यसेत्क्रमात् ॥ ४६ ॥सर्वत्रप्रणवेनैवषडंगन्यासमा
चरेत् ॥ कृत्वाद्यादिप्रयोगंचततःपूजांसमारभेत् ॥४७॥ तथाचाचमनीयार्थंकल्पितंपात्रमेवच ॥ स्थापयेद्विधिवद्धी
मान्नवकुंभान्यथाविधि ॥४८॥ दर्भैराच्छाद्यतानेवसंस्थाप्याऽभ्युक्ष्यवारिणा॥तेषुतेषुचसर्वेषुक्षिपेत्तोयंसुशीतलं ॥
॥४९॥ प्रणवेनक्षिपेत्तेषुद्रव्याण्यालोक्यबुद्धिमान् ॥ उशीरंचंदनंचैवपाद्येतुपरिकल्पयेत् ॥ ५० ॥ ॥

॥४४॥ व्याघ्रचर्मोत्तरीयकमिति ॥ व्याघ्रस्यचर्मैवोत्तरीयकंप्रावरणवस्त्रंयस्यसतथातम्॥सारूप्यंसमानरूपं॥आश्रित्येति॥ तत्सदृशोहमभूवमितिभावयित्वे
त्यर्थः ॥ शिवोभूत्वाशिवंयजेदित्युक्तेः ॥ ४५ ॥ शैवीमिति ॥ शैवींशिवसंबंधिनींतनुंमूर्तिंसमास्थायमनसिस्थापयित्वेत्यर्थः ॥ देहशुद्धिमिति ॥ पापपुरु
षनाशादिनेतिभावः ॥ मूलमंत्रंओंनमःशिवायेतिप्रणवमितिवा ॥४६॥ प्रणवेनोंकारेण॥षडंगन्यासमिति॥हृदयादिषडंगन्यासमित्यर्थः॥ कृत्वेति॥अद्यादि
प्रयोगंअद्यब्रह्मणोद्वितीयपरार्धइत्यादिकम् ॥ ४७ ॥ ४८ ॥ वारिणोदकेनाभ्युक्ष्यप्रोक्ष्य ॥४९॥ प्रणवेनेति ॥ प्रणवमंत्रेणेत्यर्थः॥द्रव्याणिवक्ष्यमाणोशीरा
दीनि ॥ तेषुतेषूदकपूरितपात्रेषुक्षिपेत्प्रक्षिपेदित्यन्वयः ॥ कस्मिन्पात्रेकिंकिंद्रव्यंप्रक्षेपणीयमितितदाह ॥ उशीरमिति ॥ उशीरंवाळाइतिप्रसिद्धम् ॥
पाद्येइति ॥ पादार्थमुदकंपाद्यंतत्रेत्यर्थः ॥ ५० ॥ ॥ ॥ ॥ ॥ ॥

कंकोलःसुगंधिद्रव्यविशेषःप्रसिद्धः ॥ तमालस्तापिच्छस्तं ॥ आचमनीयकेआचमनपात्रे ॥ ५१ ॥ ५२ ॥ लिंगशुद्धिमिति ॥ लिंगोद्वर्तनादिकमित्यर्थः ॥ ५३ ॥ जप्त्वेति ॥ इडभावआर्षः ॥ मंत्राणीति ॥ नपुंसकत्वनिर्देशआर्षः ॥ प्रणवादिनमोंतकंप्रणवमारभ्यनमःपर्यंतम् ॥ ५४ ॥ पद्मासनमणिमादिशक्तिमत्वेनप्रशंसति ॥ तस्येति ॥ तस्यपद्मासनस्यपूर्वदलंपूर्वोभागः ॥ अणिमामयंअणिमाख्यविभूत्यात्मकंउच्यतइत्यग्रिमेणान्वयः ॥ एवमग्रेलघिमादिष्वपियोज्यम् ॥ अक्षरंकूटस्थंअव्याकृताकाशस्वरूपमित्यर्थः ॥ अणिमादयस्तुशिवस्यविभूतिविशेषाः ॥ अणिमामहिमाचैवगरिमालघिमातथा ॥ प्राप्तिःप्राकाम्यमीशत्वंवशित्वंचाऽष्टभूतयइत्यमरात् ॥ ५५ ॥ पत्रंदलं ॥ ५६ ॥ सर्वज्ञत्वंगरिमेतिपरिशेषाद्गम्यते ॥ पद्मस्याभ्यंतरादिभागंदेवतारूपमाह ॥ कर्णिकेति ॥ कर्णिकापद्मस्यांतर्भागविशेषः ॥ ५७ ॥ अव्यक्तादीति ॥ चतसृषुपूर्वादिदिक्षुक्रमेणाऽव्यक्तादिप्रकृतिमहदहंकारतद्विकारचतुष्टयम्कल्पयेदि

जातिकंकोलकर्पूरंबहुमूलतमालकं ॥ चूर्णयित्वायथान्यायंक्षिपेदाचमनीयके ॥ ५१ ॥ एलांसर्वेषुपात्रेषुदापयेच्चंदनंतथा ॥ पार्श्वतोदेवदेवस्यनंदीशंतुसमर्चयेत् ॥ ५२ ॥ गंधैःपुष्पैस्तथाधूपैर्विविधैःपूजयेच्छिवम् ॥ लिंगशुद्धिंततःकृत्वामुदायुक्तोनरस्तदा ॥ ५३ ॥ जप्त्वासर्वाणिमंत्राणिप्रणवादिनमोंतकं॥कल्पयेदासनंपश्चात्पद्माख्यंप्रणवेनतु ॥ ॥ ५४ ॥ तस्यपूर्वदलंसाक्षादणिमामयमक्षरम् ॥ लघिमादक्षिणंचैवमहिमापश्चिमंतथा ॥ ५५ ॥ प्राप्तिश्चैवोत्तरंपत्रंप्राकाम्यंपावकस्यच ॥ ईशित्वंनैर्ऋतंपत्रंवशित्वंवायुगोचरे ॥ ५६ ॥ सर्वज्ञत्वंतथैशान्यांकर्णिकासोमउच्यते ॥ सोमस्याधस्तथासूर्यस्तथाऽधःपावकःस्वयं ॥ ५७ ॥ धर्मादयोपिदिक्ष्वंतेअनंतंकल्पयेत्क्रमात् ॥ अव्यक्तादिचतुर्दिक्षुसोमस्यांतेगुणत्रयं ॥ ५८ ॥ सद्योजातंप्रपद्यामीत्यावाह्यपरमेश्वरम् ॥ वामदेवेनमंत्रेणतिष्ठेच्चैवासनोपरि ॥ ५९ ॥ सांनिध्यंरुद्रगायत्र्याअघोरेणनिरुध्यच ॥ ईशानःसर्वविद्यानामितिमंत्रेणपूजयेत् ॥ ६० ॥ ॥ ६१ ॥

तियोजना ॥ सोमस्यकर्णिकारूपस्यांतेसमीपे गुणत्रयंसत्वंरजस्तमइतिगुणत्रयंकल्पयेदित्यध्याहारेणान्वयः ॥५८ ॥ सद्यइति ॥ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमइतिमंत्रेण ॥ वामदेवेनेति ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःनमोसर्वभूतदमनायनमोमनोन्मनायनमइतिमंत्रेण ॥ ५९ ॥ रुद्रगायत्र्या ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयादिति ॥ अघोरेणेति ॥ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योननमस्तेअस्तुरुद्ररूपेभ्यइति ॥ ईशानइति ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम्इति ॥ ६० ॥

गंधचंदनवारिणागंधचंदनयुक्तेनवारिणा ॥६१॥ पंचगव्येति ॥ पंचगव्यप्रकारोक्तविधिनेत्यर्थः ॥ गृह्यपात्रे दुग्धादिग्रहणयोग्येपात्रे ॥ गव्यैर्गोविकारैर्दुग्ध दध्यादिद्रव्यैः ॥ समुदितैरुक्तद्रव्यैःस्नानमुक्त्वाव्यस्तैराह ॥ पयसेत्यादिना ॥ ६२ ॥ ६३ ॥ ६४ ॥ तावदिति ॥ यावतादूरदेशेनशंकरोपरिक्षिपेत् तावद्दूरंनकर्त्तव्यं ॥ किंतुशिवलिंगंस्वसंनिधावेवस्थापयेदितिभावः ॥ ६५ ॥ कुशःदर्भपुष्पं ॥ अपामार्गःआघाडाइतिप्रसिद्धः ॥ ६६ ॥ करवीरैःकणेरइतिप्रसिद्धैः ॥ कमलैरिति ॥ सहस्रपत्रैःकुमुदैश्चेत्यर्थः ॥ अपूर्वेति ॥ अपूर्वपुष्पैरभिनवपुष्पैश्चंदनाद्यैश्चशंकरंपूजयेदितिपूर्वेणान्वयः ॥ आपूर्यपुष्पैरि

पाद्यमाचमनीयंचविभोश्चाऽर्घ्यंप्रदापयेत् ॥ स्नापयेद्विधिनारुद्रंगंधचंदनवारिणा ॥ ६१ ॥ पंचगव्यविधानेनगृह्य पात्रेऽभिमंत्र्यच ॥ प्रणवेनैवगव्यैस्तुस्नापयेत्पयसाचतम् ॥ ६२ ॥ दध्नाथमधुनाचैवतथाचेक्षुरसेनच ॥ घृतेनचतथा पूज्यंसर्वकामहितावहम् ॥ ६३ ॥ पुण्यैर्द्रव्यैर्महादेवंप्रणवेनाऽभिषेचयेत् ॥ जलभांडैःपवित्रैस्तुमंत्रैस्तोयंक्षिपेत्ततः ॥ ६४ ॥ शुद्धीकृत्ययथान्यायंसितवस्त्रेणसाधकः ॥ तावद्दूरंनकर्त्तव्यंयावच्चचंदनंक्षिपेत् ॥ ६५ ॥ तंडुलैःसुंदरैस्त त्रपूजयेच्छंकरंमुदा ॥ कुशापामार्गकर्पूरजातिचंपकपाटलैः ॥ ६६ ॥ करवीरैःसितैश्चैवमल्लिकाकमलोत्पलैः ॥ अ पूर्वपुष्पैर्विविधैश्चंदनाद्यैश्चतज्जलम् ॥ ६७ ॥ जलेनजलधारांचकल्पयेत्परमेश्वरे ॥ पात्रैश्चविविधैर्देवंस्नापयेच्चमहे श्वरम् ॥ ६८ ॥ मंत्रपूर्वंचकर्त्तव्यापूजासर्वफलप्रदा ॥ मंत्राणितेप्रवक्ष्यामिशृणुसर्वार्थसिद्धये ॥ यैर्लिंगंस कृदप्येवंस्नापयंतिचमानवाः ॥ ६९ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवपूजाविधानंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ पावमानेनमंत्रेणतथावाङ्मीयकेनच ॥ रुद्रेणनीलरुद्रेणश्रीसूक्तेनशुभेनच ॥ १ ॥

त्यपिपाठांतरंसाधीयःतत्रआपूर्यसंयोज्येत्यर्थः ॥ तज्जलंतत्पुष्पादियुक्तंकुर्यादितियावत् ॥ ६७ ॥ जलेनपूर्वोक्तेनजलधारांपरमेश्वरेविषयेकल्पयेत् प्रकल्पयेत् ॥ ६८ ॥ ननु मंत्रपूर्वपूजाकर्त्तव्येत्युक्तं तत्रमंत्रस्वरूपकथनं प्रतिजानीते ॥ मंत्राणीति ॥ नपुंसकत्वमार्षं ॥ सर्वार्थसिद्धयइति ॥ एतेनमंत्रैर्विनापूजाफलप्रदानभवतीतिगम्यते ॥ यैर्मंत्रैः ॥ ६९ ॥ इतिश्रीशिवमहापुराणटीकायांज्ञानसंहितायांसारबोधिन्यांशिवपूजाविधानंनामसप्तमोऽध्यायः ॥ ७ ॥ पावमानादिभिर्मंत्रैरभिषेकविधिस्तथा ॥ गंधपुष्पादिभिःपूजाह्यष्टमेऽत्रप्रवर्ण्यते ॥ पावमानेनेति ॥ पवमानःसुवर्जनइत्यादिनेत्यर्थः ॥ वाङ्मीयकेनतत्संज्ञकमंत्रेण ॥ रुद्रेणेति ॥ नमस्तेरुद्रमन्यवइत्यादिना ॥ नीलरुद्रेणैतदाख्येन ॥ श्रीसूक्तेनहिरण्यवर्णामित्यादिना ॥ १ ॥ ॥

रजनीसूक्तकेनेति॥रात्रीव्यख्यदायतीत्यादिना ॥ चमकेनअग्नाविष्णूइत्यादिना ॥ श्रीतारेणप्रणवेन ॥ आथर्वणेनशिरसाअथर्वशीर्षेण ॥ २ ॥ शांत्येति ॥आनोभद्राइत्यादिना ॥ भारुंडेनेतत्संज्ञकेन ॥ आरुणेनैतत्संज्ञकेन ॥ ज्येष्ठेनेतत्संज्ञकेन॥देवव्रतेनैतदाख्येन॥साम्नेतिसर्वत्रयोजना ॥ ३॥ रथंतरेणेति॥अभित्वाशूरनोनुमोदुग्धाइवधेनवः॥ईशानमस्यजगतःसुवर्दृशमीशानमिंद्रतस्थुषइतिप्रासिद्धेनसाम्नेनेत्यर्थः॥पुष्येणेति॥पुष्येणैतदाख्येन॥पुरुषेण सहस्रशीर्षेत्यादिना॥मृत्युंजयेनेति॥मृत्युंजयमंत्रःपूर्वमुक्तस्तेन॥पंचाक्षरेणनमःशिवायेत्यनेन॥४॥शतमिति॥एकोत्तरशतेनेत्यर्थः॥अभिषेकमंत्रानुक्त्वेदानींगंधादिपूजाविधिः कथ्यते॥कर्तव्येति ॥ पूजेतिशेषः॥वेदमार्गेणवेदोक्तशिवप्रतिपादकलिंगघटितेनमंत्रेण॥नामभिर्वा॥शिवायनमइत्यादिनाममंत्रैः॥५॥ रोपणीयंसमर्पणीयम्

रजनीसूक्तकेनैवचमकेनशुभेनच॥श्रीतारेणाथशिरसाशुभेनाथर्वणेनच॥ २॥शांत्यावाऽथपुनःशांत्याभारुंडेनाऽरुणेनच ॥ अथज्येष्ठेनसाम्नावातदादेवव्रतेनच ॥ ३ ॥ रथंतरेणपुष्येणसूक्तेनपुरुषेणतु ॥ मृत्युंजयेनमंत्रेणपंचाक्षरेणवापुनः ॥ ४ ॥ जलधारासहस्रेणशतमेकोत्तरेणवा ॥ कर्तव्यावेदमार्गेणनामभिर्वाऽथवापुनः ॥ ५ ॥ ततश्चंदनपुष्पादिरोपणीयंशिवोपरि ॥ दापयेत्प्रणवेनैवमुखवासादिकानिवै ॥ ६ ॥ ततःस्फटिकसंकाशंदेवंनिष्कलमक्षरं ॥ कारणंसर्वलोकानांसर्वलोकमयंपरम् ॥ ७ ॥ ब्रह्मेंद्रविष्णुरुद्राद्यैरपिदेवैरगोचरम् ॥ वेदविद्भिर्हिवेदांतेलगोचरमिति स्मृतम् ॥ ८ ॥ आदिमध्यांतरहितंभेषजंसर्वरोगिणाम् ॥ शिवतत्वमितिख्यातंशिवलिंगेव्यवस्थितम् ॥ ९ ॥ प्रणवेनैवमंत्रेणपूजयेल्लिंगमूर्धनि ॥ धूपैर्दीपैश्चतांबूलैराराात्रिकविधानतः ॥ १० ॥ ॥ ॥

मुखवासादिकानि पूगीफलतांबूलादीनि ॥ ६ ॥ ततइति॥स्फटिकसंकाशमित्यादिद्वितीयांतानांशिवलिंगमूर्धनिपूजयेदित्यादिनाऽग्रिमेणान्वयः ॥ स्फटिकमणिसदृशंशुद्धस्फटिकवच्छुभ्रंशिवमित्यर्थः ॥ पुनःकीदृशंनिष्कलंनिरवयवंउत्पत्तिशून्यमित्यर्थः ॥ अक्षरंनाशरहितं ॥ सर्वलोकानांचतुर्दशानांभुवनानांकारणं ॥ पाशुपतादिश्रुतौशिवस्यैवकारणत्वप्रतिपादनात् ॥ सर्वलोकमयंमाययानामरूपात्मकंपरमनुत्तमम् ॥ ७ ॥ परत्वमेवाह ॥ ब्रह्मेंद्रेत्यादिना॥ अगोचरंअवेद्यम् ॥ तदेवाह ॥ वेदविद्भिरिति ॥ वेदार्थान्जानद्भिरित्यर्थः ॥ वेदांतउपनिषदादौ ॥ अगोचरमवर्णनीयं॥कथमगोचरत्वेनायंज्ञायतइत्याशंकायामाह ॥ स्मृतमिति ॥ यतोवाचोनिवर्ततेअप्राप्यमनसासहेत्यादिश्रुतिभिरितिभावः ॥ ८ ॥ पूर्वोक्तमेवार्थमज्ञानांस्पष्टप्रतिपत्तयआह ॥ आदीति ॥ भेषजमौषधरूपं ॥ व्यवस्थितंसंनिहितं ॥ ९ ॥ पूजयेत्लिंगांतर्यामित्वेनानुसंधायपूजयेदित्यर्थः ॥ आरात्रिकेति॥नीराजनविधिनेत्यर्थः ॥१०॥

स्तवैःस्तोत्रैः ॥ प्रदक्षिणामिति ॥ कुर्यादितिशेषः ॥ ११ ॥ विकीर्य क्षिप्त्वा ॥ आत्मना मनसा ॥ १२ ॥ अनेनेति ॥ अनंतरंवक्ष्यमाणेनेत्यर्थः ॥
॥ १३ ॥ सकोऽसोमंत्रइतितमाह ॥ अज्ञानादिति ॥ १४ ॥ पठित्वेति ॥ एवंमंत्रंपठित्वोच्चार्य तत्पुष्पं हस्तगृहीतपुष्पंन्यसेत् प्रक्षिपेदित्यर्थः ॥ स्व
स्त्ययनमिति ॥ स्वस्त्ययनंतार्क्ष्यमित्यादिभिर्मंत्रैःप्रार्थनांकुर्वेत्यर्थः ॥ आशिषइति ॥ कालेवर्षतुपर्जन्यःपृथिवीसस्यशालिनी ॥ देशोऽयंक्षोभरहितोब्राह्म
णाःसंतुनिर्भयाइत्याद्याशीर्वचनानि ॥ १५ ॥ नमस्कारमिति॥कुर्यादितिशेषः ॥ क्षांतिंक्षमां ॥ अपराधसहस्राणिक्रियंतेऽहर्निशंमया ॥ तानिसर्वाणिमेदेव
क्षमस्वपरमेश्वरेत्यादिनायाचेतेत्यर्थः ॥ पुनरागमनायचेति ॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीम् ॥ इष्टकाम्यार्थसिध्यर्थंपुनरागमनायचेत्यादिनामंत्रे

नमस्कारैःस्तवैश्चाऽन्यैर्मंत्रैर्नानाविधैरपि ॥ स्तोत्रंजपंचविधिनानमस्कारंप्रदक्षिणाम् ॥ ११ ॥ अर्घंदत्वातुपुष्पा
णिपादयोस्तुविकीर्यच ॥ प्रणिपत्यचदेवेशमात्मनाराधयेच्छिवम् ॥ १२ ॥ हस्तेपुष्पंगृहीत्वाचसमुत्थायकृतांज
लिः ॥ प्रार्थयेत्पुनरीशानंमंत्रेणाऽनेनवैशिवम् ॥ १३ ॥ अज्ञानाद्यदिवाज्ञानाज्जपपूजादिकंमया ॥ कृतंतदस्तुसफलं
कृपयातवशंकर ॥ १४ ॥ पठित्वैवंतुतत्पुष्पंशिवोपरिन्यसेत्तदा ॥ स्वस्त्ययनंततःकृत्वाह्याशिषोविविधास्तदा ॥
॥ १५ ॥ मार्जनंतुततःकार्यंशिवस्योपरिवैपुनः ॥ नमस्कारंततःक्षांतिंपुनरागमनायच ॥ १६ ॥ अघोच्चार
णमुच्चार्यनमस्कारंप्रकल्पयच ॥ प्रार्थयेच्चपुनस्तत्रसर्वभावसमन्वितः ॥ १७ ॥ शिवेभक्तिःशिवेभक्तिःशिवेभ
क्तिर्भवेभवे ॥ अन्यथाशरणंनास्तित्वमेवशरणंमम ॥ १८ ॥ इतिसंप्रार्थ्यदेवेशंसर्वसिद्धिप्रदायकम् ॥ पूजये
त्परयाभक्त्यागल्लनादैर्विशेषतः ॥ १९ ॥ नमस्कारंततःकृत्वापरिवारगणैःसह ॥ प्रहर्षमतुलंलब्ध्वाकार्यंकुर्याद्यथा
सुखम् ॥ २० ॥ एवंयःपूजयेन्नित्यंशिवभक्तिपरायणः ॥ तस्यैवसकलासिद्धिर्जायतेतुपदेपदे ॥ २१ ॥

णपुनरागमनंप्रार्थयेतेत्यर्थः ॥ १६ ॥ अघोच्चारणमिति ॥ अघपूर्वोच्चरितैवंगुणविशेषणेत्यादि ॥ सर्वभावसमन्वितः ॥ नवविधभक्तिसमन्वितः प्रतिबिंबे
बिंबभावनायुक्तोवा ॥ १७ ॥ भवेभवइति ॥ जन्मनिजन्मनीत्यर्थः ॥ १८ ॥ इतीति ॥ शिवेभक्तिः शिवेभक्तिःशिवेभक्तिरितिप्रकारेण देवेशं शिवं
संप्रार्थ्य गल्लनादेःगल्लांगुलिसंयोगजन्यैःशब्दैःबिलबिलाकारैर्डमरुवादनेतिप्रसिद्धैरित्यर्थः ॥ १९ ॥ कार्यंव्यवहारादिकंकार्यंयथासुखंकुर्यादित्यर्थः॥२०॥
पूजाफलंश्रावयति ॥ एवमिति ॥ पदेपदेप्रतिक्षणंप्रतिस्थानमित्यर्थः ॥ २१ ॥ ॥ ॥ ॥

शिवपूजायाअभीष्टफलप्रदत्वमुक्त्वाऽनिष्टनिवर्तकत्वमप्याह ॥ रोगमित्यादिना ॥ उद्वेगंचित्तविभ्रमं कृत्रिमं परक्रियानिर्वृत्तं ॥२२॥ गरं विषं॥२३॥ कल्याणमिति ॥ शुक्लपक्षे शशी चंद्रमायथावर्धते तथा शिवपूजकस्यगुणाभक्तिज्ञानवैराग्यादयोवर्धंतइत्यर्थः ॥ २४॥ उपसंहरति ॥ एवमिति ॥ स्वकपोलकल्पितत्वशंकांनिरस्यति ॥ श्रुतमिति ॥२५॥ शिवमाहात्म्यज्ञानायाऽन्यांकथांप्रस्तौति ॥ अतःपरमिति ॥ २६ ॥ इतिश्रीशिवमहापुराणटीकायां ज्ञानसंहितायांसारबोधिन्यांसमंत्रकशिवपूजनंनामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ओंनमःशिवाय ॥ तारकासुरजन्माद्यैर्देवास्त्रस्ताःस्वकारणम् ॥ ब्रह्माणं शरणंजग्मुर्नवमेतत्प्रवर्ण्यते ॥ १ ॥ व्यासशिष्येति ॥ अनेनयथाश्रुतार्थज्ञापनंक्रियते नतु स्वकपोलकल्पितकथनमितिगम्यते ॥ १ ॥ किंसैन्यं कियद्ब

षण्मासाज्जायतेसिद्धिर्मनोभीष्टफलंध्रुवम् ॥ रोगंदुःखंचशोकंचउद्वेगंकृत्रिमंतथा ॥ २२ ॥ कौटिल्यंचगरंचैवयद्यद्दुःखमुपस्थितम् ॥ तद्दुःखंनाशयत्येवशिवःशिवकरःपरः ॥ २३॥ कल्याणंजायतेतस्यशुक्लपक्षेयथाशशी ॥ वर्धंतेतद्गुणास्तत्रशिवस्यपूजनाद्ध्रुवम् ॥ २४ ॥ एवंतुतेमयाप्रोक्तंश्रुतंव्यासमुखादिह ॥ २५ ॥ अतःपरंप्रवक्ष्यामिकथांपापप्रणाशिनीम् ॥ याप्रच्छ्यतेभवद्भिश्चतामहंविधिपूर्वकम् ॥ २६ ॥ ॥ इतिश्रीशिवपुराणेज्ञानसंहितायांशिवपूजाविधिर्नामाष्टमोऽध्यायः ॥ ८ ॥ ऋषयऊचुः ॥ व्यासशिष्यमहाभागसम्यगुक्तंत्वयानघ ॥ त्रिपुरस्यजयंब्रूहिकथंवैत्रिपुरेहतः ॥ १ ॥ किंरूपंत्रिपुरस्येहकुत्रवाविकृतिंगतः ॥ किंसैन्यंतस्यदुष्टस्यशिवस्यचमहद्बलम् ॥ २ ॥ एतत्सर्वंप्रयत्नेनअन्यद्वाविविधंपुनः ॥ कथनीयंत्वयासम्यग्धन्यस्त्वंबुद्धिमानसि ॥ ३ ॥ एवंवचस्तदाश्रुत्वासूतश्चैवाऽब्रवीत्पुनः ॥ सूतउवाच ॥ साधुपृष्टंमहाभागालोकानांहितकाम्यया ॥४॥ यच्छ्रुत्वासर्वलोकानांदुःखहानिर्भविष्यति ॥ तारपुत्रोमहामायोमायिनामपिमोहकः ॥ ५ ॥ सर्वदेवजयंकर्तुंतपस्तेपेसुदारुणम् ॥ मधोर्वनमुपाश्रित्यगुर्वाज्ञापारिपालकः ॥ ६ ॥ ॥ ॥ ॥छ॥ ॥ ॥ ॥छ॥ ॥

लसंख्याकंसैन्यं आसीदित्यध्याहारः ॥ महद्बलमित्यस्यकथनीयमित्यग्रेतनेनान्वयः ॥ २ ॥ सम्यक्कथनसामग्रींसाधयति ॥ धन्यस्त्वमिति ॥ यतस्त्वंबुद्धिमान्सर्वविद्यासंपन्नोधन्यः कृतकृत्योऽसीत्यर्थः ॥ ३ ॥ ४ ॥ यच्छ्रुत्वेति ॥ यत् युष्मत्प्रश्नविषयकथांश्रुत्वेत्यर्थः ॥ अत्रेतिहासःप्रस्तूयते ॥ तारपुत्रइति ॥ तारनाम्नाप्रसिद्धस्यासुरस्यपुत्रइत्यर्थः ॥ महामायइति ॥ मायापरवंचनेच्छातद्वानित्यर्थः ॥ ५ ॥ तेपेकृतवान् ॥ मधोरिति ॥ तदाख्यदैत्यस्य॥ गुर्विति ॥ गुरूणांपित्रादीनामभीष्टकार्यकर्त्तेत्यर्थः ॥ ६ ॥ ॥ ॥ ॥

तपःप्रकारमाह ॥ उर्ध्वबाहुरित्यादिना ॥ अंगुष्ठकेनांऽगुष्ठमात्रमवलंब्यस्थित्वेत्यर्थः ॥ ७ ॥ जलेनैव जलपानेनैवेत्यर्थः ॥ स्थंडिलेवेदिकायां ॥ ८ ॥ हस्तस्यतलेनप्रदेशेनभुवंस्पृशन्स्पर्शंकुर्वन्नधोमुखोर्ध्वपादइत्यर्थः ॥ ९ ॥ अधोमुखंयथातथागतमतीतमित्यर्थः ॥ १० ॥ कष्टतरमिति तत्तद्रूपक्रियाविशेषणं ॥ दुःसहं सोढुमशक्यम् ॥ तपःप्रभावंकथयति ॥ तस्यैवेति ॥ तस्यतारपुत्रस्यशिरसःसकाशान्निःसृतंनिर्गतं ॥ ११ ॥ तेनतेजसा ॥ वभूविरइति ॥ आत्मनेपदमार्षं ॥ तत्तपःप्रभावेनेंद्रादीनांभयसंभावनामाह ॥ इंद्रइति ॥ अयमसुरःस्वपदं स्वर्गस्थानं कर्षयिष्यति गृह्णीयादितिसंभाव्यभयंप्रापेत्य

उर्ध्वबाहुश्चैकपादोरविंपश्यन्सचक्षुषा ॥ शतवर्षंतथातस्थाशतमंगुष्ठकेनच ॥ ७ ॥ शतमेकंजलेनैवशतमेकंतुवायुभुक् ॥ शतमेकंजलेतिष्ठन्शतमेकंचस्थंडिले ॥ ८ ॥ शतमेकंतथाचाग्नौशतमेकमधोमुखः ॥ शतमेकंतुहस्तस्यतलेनचभुवंस्पृशन् ॥ ९ ॥ शतमेकंतुवृक्षाणांशाखामालंब्यवैमुने ॥ अधोमुखंतुवर्षाणांशतमेकंगतंतदा ॥ १० ॥ एवंकष्टतरंतप्तंशृण्वतामपिदुःसहम् ॥ तस्यैवशिरसस्तत्रतेजश्चनिसृतंमहत् ॥ ११ ॥ तेनैवदेवलोकास्तेदग्धप्रायावभूविरे ॥ इंद्रश्चभयमापेदेस्वपदंकर्षयिष्यति ॥ १२ ॥ अत्यंतदुःखमापन्नाःसर्वेदेवास्तदाविदुः ॥ अकांडेचैवब्रह्मांडंसंहरिष्यतिवैप्रभुः ॥ १३ ॥ इतिसंशयमापन्नानिश्चयंनोपलेभिरे ॥ एतस्मिन्समयेतेवैज्ञातवंतोऽत्रकारणम् ॥ १४ ॥ ब्रह्माणंचसमुद्दिश्यतपस्तप्यतिदारुणम् ॥ इतिनिश्चयमापन्नादेवाश्चैवपरस्परम् ॥ १५ ॥ यदिब्रह्मावरंह्यस्यनदास्यतिसुदुष्करम् ॥ तथाऽपिसर्वलोकानांनाशश्चैवभविष्यति ॥ १६ ॥ सर्वथादुःखमुत्पन्नंयदिनैवप्रदास्यति ॥ दास्यतिवावरंतस्मैदुःखंवैसर्वथाध्रुवम् ॥ १७ ॥ यदिनदीयतेह्यस्मैवरंदुःखहरंनृणाम् ॥ तथेदानींचलोकानांनाशोभवितुमर्हति ॥ १८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

र्थः ॥ १२ ॥ विदुर्भावयामासुरित्यर्थः ॥ देवाःकथंविदुरित्याह ॥ किमयं प्रभूरुद्रोऽकांडेऽनवसरे ॥ कांडोऽस्त्रीदंडबाणार्ववर्गावसरवारिष्वित्यमरः ॥ ब्रह्मांडंसंहरेदिति ॥ १३ ॥ एतस्मिन्निति ॥ तेदेवाअत्रदुःखभवनेकारणंज्ञातवंतः ॥ १४ ॥ किंतत्कारणमित्यतआह ॥ ब्रह्माणमिति ॥ यतोऽयमसुरस्तपस्तप्यति ॥ १५ ॥ ब्रह्मणाऽस्माअसुरायवरेदत्तेऽदत्तेऽपिवा लोकानांदुःखंभवेदेवेतिदेवानांवितर्ककथयति ॥ यदीत्यादिना ॥ तथापीति ॥ लोकानांनाशोभविष्यति ॥ वरादानेऽसुरस्यक्रोधोत्पादनादितिभावः ॥ १६ ॥ तदेवाह सर्वथेति ॥ १७ ॥ १८ ॥

यदिदत्तइति ॥ तद्द्वारेणनाशोभविष्यतीतिभावः ॥ वरदानेनिश्चयमाह ॥ एतस्मादिति ॥ १९ ॥ तत्र सत्यलोके ॥ सर्वंदुःखकारणंन्यवेदयन्नकथयन् ॥ २० ॥ सुनिश्चित्यविचार्य ॥ हंसवाहनोब्रह्मा ॥ २१ ॥ कजगामेतितदाह ॥ यत्रेति ॥ यथेप्सितमपेक्षितमित्यर्थः ॥ २२ ॥ अभीष्टदानेकारणमाह ॥ तपस्त त्तमिति ॥ २३ ॥ वव्रे याचितवान् ॥ सुदारुणंभयंकरम् ॥ २४ ॥ यदीति ॥ हेदेवेश पितामह ब्रह्मन् यदित्वं मम प्रसन्नोसि यदिच त्वया मम म ह्यं वरोदातव्योऽस्तितदावरद्वयंदेयमित्यग्रेतनेनाऽन्वयः ॥ २५ ॥ मत्तुल्योमत्सदृशः ॥ यद्यपीदानीमिहलोकेमत्तुल्योबलवान्कोऽपिनास्तितथापिमरणसं

यदिदत्तोवरस्तस्मैकालेनाशोभविष्यति ॥ एतस्माच्चवरंतस्मैदीयतेनात्रसंशयः ॥ १९ ॥ इतिक्लामतिंदेवाब्रह्मा णंसमुपस्थिताः ॥ नमस्कृत्यास्थितास्तत्रतस्मैसर्वंन्यवेदयन् ॥ २० ॥ ब्रह्मासर्वंसुनिश्चित्यदेवाज्ञापरिसाधकः ॥ व रंदातुंतदातत्रजगामहंसवाहनः ॥ २१ ॥ यत्रैषतारकोनामतपस्तप्यतिदारुणम् ॥ उवाचवचनंतस्मैवरंब्रूहियथे प्सितम् ॥ २२ ॥ तपस्तप्तंत्वयाघोरंनादेयंविद्यतेतव ॥ इत्येवंतुतदाश्रुत्वातारकाख्योमहासुरः ॥ २३ ॥ ब्रह्माणंप्र णिपत्यैवंवरंवव्रेसुदारुणम् ॥ दैत्यउवाच ॥ त्वयिप्रसन्नेवरदेकिमसाध्यंभवेन्मम ॥ २४ ॥ यदिप्रसन्नोदेवेशयदि देयोवरोमम ॥ वरद्वयंतदादेयंश्रूयतांचपितामह ॥ २५ ॥ त्वयाचनिर्मितेलोकेमत्तुल्योबलवान्नहि ॥ शिववीर्यसमु त्पन्नःपुत्रःसेनापतिर्यदा ॥ २६ ॥ भूत्वाशस्त्रंक्षिपेन्मह्यंतदामेमरणंभवेत् ॥ इत्युक्तेचतदातेनब्रह्मालोकपितामहः ॥ ॥ २७ ॥ वरंचतादृशंदत्वादेवानुज्ञापरायणः ॥ जगामभवनंस्वीयंदाहशांतिमुपागतः ॥ २८ ॥ दैत्योऽपितपसस्त स्माद्विरराममहामुने ॥ वरंलब्ध्वाशुभंतत्रशोणिताख्यंपुरंगतः ॥ २९ ॥ इतस्ततश्चतेदैत्यामिलितास्तमथाऽब्रुव न् ॥ राजाभवत्वमस्माकंत्रिलोक्यांतारकासुर ॥ ३० ॥ अभिषिक्तोहितैराज्येदैत्याधीशोऽभवत्पुरा ॥ आज्ञांप्रवर्त यामासपृथिव्यांनाऽन्यशासनम् ॥ ३१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

भवोऽस्तीत्याह ॥ शिववीर्येति ॥ शिववीर्यादुत्पन्नःपुत्रः सेनापतिर्भूत्वायदामह्यंममोपरिशस्त्रंक्षिपेत्तदामेमरणंभवेदिन्वयः ॥ २६ ॥ तेनतारकासुरेणेत्यु क्तप्रकारेणोक्तेसति ॥ २७ ॥ दाहशांतिं तपःकरणवेलायामुत्पन्नोयोऽग्न्यादिनादाहस्तस्यशांतिःशमनंतामुपगतोदैत्यइत्यन्वयः ॥ २८ ॥ विररामतपः समापितवानित्यर्थः ॥ २९ ॥ दैत्याःकिमब्रुवन्नित्यतआह ॥ राजेति ॥ ३० ॥ दैत्याभिप्रायंसमान्यसराजाऽभवदित्याह ॥ अभिषिक्तइति ॥ ३१ ॥

विजातयोम्लेच्छयवनादयः ॥ ३२ ॥ यक्षादेवयोनिविशेषाः ॥ विद्याधराप्सरोयक्षरक्षोगंधर्वकिंनराः ॥ पिशाचोगुह्यकःसिद्धोभूतोऽमीदेवयोनयइत्यमरः ॥ किंपुरुषाःदेवयोनिविशेषाःकुबेरानुचराः ॥ स्यात्किंनरःकिंपुरुषस्तुरंगवदनोमयुरित्यमरः ॥ तेभ्यइति ॥ तेभ्योदेवादिभ्योरत्नान्युपाददउपायनत्वेनजगृह इत्यर्थः ॥ ३३ ॥ इंद्रादिभिर्देवैःकिंकिंदत्तमितितदाह ॥ इंद्रेणेति ॥ उच्चैःश्रवाअश्वः ॥ रत्नदंडकंरत्नखचितोदंडः ॥ ३४ ॥ कुबेरेणतुगदानवनिधय श्चदत्ताः ॥ नवनिधयस्तावत् ॥ महापद्मश्चपद्मश्चशंखोमकरकच्छपौ ॥ मुकुंदकुंदनीलाश्चखर्वश्चनिधयोनवेति ॥ शुद्धाःशुभ्राः ॥ कामधुक्कामधेनुः ॥३५॥

ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चान्येविजातयः ॥ सर्वेवैपीडितास्तेनतारकेणदुरात्मना ॥ ३२ ॥ देवाश्चदानवाश्चा ऽन्येयक्षाःकिंपुरुषास्तदा ॥ पीडिताःसर्वएवैतेतेभ्योरत्नान्युपाददे ॥ ३३ ॥ इंद्रादिभिश्चदिक्पालैःस्वीयंरत्नंसम र्पितम् ॥ इंद्रेणोच्चैःश्रवास्तस्मैधर्मेणरत्नदंडकम् ॥ ३४ ॥ कुबेरेणगदातस्मैनिधयोनवएवच ॥ वरुणेनहयाःशुद्धा ऋषिभिःकामधुक्तथा ॥ ३५ ॥ यत्रयत्रशुभंदृष्टंतत्तदानीतवांस्तदा ॥ समुद्रश्चतथारत्नान्यदात्तस्मैपुरामुने ॥३६॥ सूर्यश्चतप्यतेतावद्यावद्दुःखंनजायते ॥ चंद्रस्तत्रसदादृश्योवायुःसर्वानुकूलवान् ॥ ३७ ॥ देवानांचैवयद्द्रव्यंपितृ णांकव्यमेवच ॥ तत्सर्वंसमुपादत्तमसुरेणबलीयसा ॥ ३८ ॥ त्रैलोक्यंचैवतत्सर्वंतारकाज्ञापरायणम् ॥ तेदेवाश्च सदातत्रसेवामार्गपरायणाः ॥ ३९ ॥ ऋषयश्चतदासर्वेतस्याज्ञापरिपालकाः ॥ यक्षाःकिंपुरुषाश्चाऽन्येकिंपुनर्मा नुषाइमे ॥ ४० ॥ देवोद्यानानिसर्वाणितीर्थान्यपिमहामुने ॥ आनीतानिगृहेतेननकिंचिदवशेषितम् ॥ ४१ ॥ एवंवर्षाण्यनेकानिगतानिपीडितास्तदा ॥ सर्वेदेवामिलित्वाचब्रह्माणंशरणंगताः ॥ ४२ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहितायांतारकोपाख्यानेदेवगमनंनामनवमोऽध्यायः ॥ ९ ॥ ॥ श्रीसदाशिवार्पणमस्तु ॥ ॥ छ ॥

यत्रेति ॥ शुभमुत्तमवस्तु ॥ ३६ ॥ सर्वानुकूलवान् सर्वानुकूलंसुखंतज्जनकइत्यर्थः ॥ ३७ ॥ हव्यंदेवयोग्यमन्नं ॥ कव्यंपितृयोग्यमन्नंसमुपादत्तंबला त्कारेणगृहीतम्आर्षरूपम् ॥३८॥ त्रैलोक्यमिति ॥ लोकत्रयस्थाजनाइत्यर्थः ॥ मंचाःक्रोशंतीतिवत्त्रैलोक्यपदेलक्षणा ॥ तारकाज्ञापरायणं तारकासुरस्या ऽज्ञायांपरायणमासक्तमासीदितिशेषः ॥ तदेवविशदयति ॥ तइति ॥ ३९ ॥ ४० ॥ ४१ ॥ एवमवस्थापन्नैर्देवैस्तदाकिंकृतमिति तदाह ॥ एवमिति ॥ ॥ ४२ ॥ इतिश्रीशिवमहापुराणटीकायांसारबोधिन्यांतारकोपाख्यानेदेवगमनंनामनवमोऽध्यायः ॥ ९ ॥ ॥ श्रीसदाशिवार्पणमस्तु ॥ ॥

ॐनमःशिवाय॥ इंद्रादिष्टेनकामेनतपस्यंतंशिवंप्रति ॥ अस्त्रंप्रयुक्तमित्येतद्दशमेत्रनिरूप्यते॥ तेसर्वइति ॥ तेदेवादयः॥ ऋषीश्वराइतिसंबोधनम् ॥ १ ॥ पितामहइति॥ सृष्ट्यंतर्गतसर्वप्राण्युत्पादकत्वाद्ब्रह्मणःपितामहत्वंसंगच्छते॥ पितामहोब्रह्माविषण्णान्विषादंप्राप्तान्देवादीन्समुपस्थितान्दृष्ट्वोवाचपृष्टवान् ॥ कथंपृष्टवांस्तदाह ॥ यूयमिति॥२॥ साध्यमिति ॥ तद्दुःखंयदिनाशयितुंशक्यंस्यात्तदास्फोटयामिनाशयामीत्यर्थः ॥ अत्रयथसाध्यंभवेदिहेतिपाठांतरं॥ परमर्षयइतिसंबोधनं॥ ३ ॥ ४ ॥तारकासुरात्संभूतमुत्पन्नंसमुपस्थितमस्मान्प्राप्तंयद्दुःखंतद्भवतस्तवकिमविज्ञातमपितुज्ञातमेवेत्यर्थः॥समागताइतिकारणकथनम् ॥ अतइतिशेषः॥५॥ वचनमुत्तरमाददेमुक्तवानित्यर्थः ॥६॥ यतःकारणान्मत्तोमत्सकाशात्तारकासुरोवृद्धिमुपागतस्तस्मान्मत्तोवधोनयोग्यः॥ विप

॥ सूतउवाच ॥ तेसर्वेचतदागत्वाब्रह्माणंजगतःप्रभुम्॥ नमस्कृत्यास्थितास्तत्रनम्रीभूताऋषीश्वराः॥ १ ॥ तान्विषण्णांस्तदातत्रदृष्ट्वोवाचपितामहः॥ यूयमत्रकथंप्राप्ताःकिंदुःखंभवतांपुनः॥२॥ तदहंस्फोटयाम्यद्यसाध्यंयदिभवेदिह॥ इत्येतद्वचनंश्रुत्वाब्रह्माणंपरमर्षयः॥ ३ ॥ देवाःसानुचराःसर्वेवचनंचेदमब्रुवन् ॥ देवाऊचुः॥भवतःकिमविज्ञातंदुःखंचयदुपस्थितं ॥ ४ ॥ तारकाच्चैवयद्दुःखंसंभूतंपरमेश्वर ॥ तद्दुःखंनाशयत्वंचवयंसर्वेसमागताः ॥५॥ इत्येवंवचनंश्रुत्वाब्रह्मावचनमाददे॥ मत्तोनैववधोयोग्योमत्तोवृद्धिमुपागतः॥ ६॥ उपायंवोदिशाम्यद्यश्रूयतामृपिसत्तमाः॥ ब्रह्मोवाच ॥ शिववीर्यसमुत्पन्नःपुत्रश्चैनंहनिष्यति॥ ७ ॥ तच्चैवदुर्लभंदेवाविचार्यैवंनिरंतरम् ॥ बुद्धिरेकासमुत्पन्नातथाचक्रियतेयदि ॥ ८॥ हिमवच्छिखरेरम्येशंभुस्तप्यतिनित्यशः॥ सखीभ्यांसहितातत्रपरिचर्यांशिवस्यह॥ ९ ॥ वचनान्नारदस्यैवमुमापित्राऽनुशासिता॥ करोतीहऋषिश्रेष्ठास्तस्याःसंयोगतांव्रजेत्॥ १० ॥ यदाशिवस्तदातत्रतस्यांवीर्यंसमावपेत्॥ ततश्चैवाथवःकार्यंभविष्यतिनचाऽन्यथा॥ ११ ॥

वृक्षोऽपिसंवर्ध्यस्वयंछेत्तुमसांप्रतमितिन्यायात् ॥ उपायमिति॥हेऋषिसत्तमाऋषिश्रेष्ठावोयुष्माकंतारकासुरवधउपायं वोयुष्माकंदिशामिप्रदर्शयामि ॥ उपायकथनायभविष्यमाह॥शिववीर्यमिति ॥७॥देवाइतिसंबोधनं ॥ विचार्येति ॥ एवंविचारंकृत्वातिष्ठतइतिममेतिचेत्स्यस्याध्याहृतस्यबुद्धिरित्यन्वयः ॥ ८ ॥ सखीभ्यामिति ॥ उमादेवीपित्राऽनुशासिताआज्ञप्तासखीभ्यांसहिताचसतीनारदवचनाच्छिवस्यपरिचर्यां शुश्रूषांकरोतीत्युत्तरेणान्वयः॥ ९ ॥ तस्याइति ॥ तस्याउमायाःसंयोगतांसंयोगवत्त्वमित्यर्थः॥ व्रजेदुपगच्छेत् ॥ १० ॥ वीर्यंबीजंसमावपेत्संरोपयेत् ॥ ११ ॥

शिववीर्यमिति ॥ समाधातुंग्रहीतुंपराश्रेष्ठाशिवैवक्षमा नान्येत्यर्थः ॥ रुद्रस्यसामर्थ्यप्रतिपादनायपूर्ववृत्तंब्रह्माकथयति ॥ यथावीर्यमिति ॥ वीर्यसामर्थ्यं ॥ वीर्यंबलेप्रभावेचेत्यमरः ॥ जलरूपधरःमंदाकिनीधरः ॥१२॥ तस्माद्रुद्रात् ॥ सुतइति ॥ मत्पुत्रइत्यर्थः ॥ तथातेनप्रकारेण ॥ १३ ॥ १४ ॥ मरुत्वं तमिंद्रम् ॥ इंद्रोमरुत्वान्मघवाबिडौजाःपाकशासनइत्यमरः ॥ १५ ॥ हेमघवन्इंद्र यथाशिवायरुचिरासक्तिःपार्वत्यामुत्पद्यते तथात्वयाब्रह्मोक्तंपितामहोक्तंकार्यंकर्तव्यमित्यन्वयः ॥ रुच्यर्थानांप्रीयमाणइत्यनेनशिवस्यसंप्रदानता ॥ शिवायांवैइत्यपिपाठांतरम् ॥ १६ ॥ गतेष्विति ॥ मकरध्वजंमक

शिववीर्यंसमाधातुंक्षमानाऽन्यापराशिवा ॥ यथावीर्यंमदीयंवैजलरूपधरःशिवः ॥ १२ ॥ समाधातुंसमर्थोऽस्तित स्मादन्योनवैसुतः ॥ तथोपायंकरिष्यध्वंतदासिद्धिर्भविष्यति ॥ १३ ॥ इत्येवंवचनंतस्यश्रुत्वातेसर्वएवहि ॥ नमस्कृत्यसुरास्तत्रविचार्यतुपरस्परम् ॥१४॥ तेसर्वेतुमरुत्वंतंसर्वेकार्यंन्यवेदयन् ॥ यथायथाशिवायैवरुचिरुत्पद्यतेतथा ॥ १५ ॥ मघवंस्त्वयाचकर्तव्यंब्रह्मोक्तंसर्वमेवतत् ॥ इत्येवंसकलंदेवंनिवेद्यविधिवत्पुनः ॥ १६ ॥ जग्मुस्तेमुनयोदेवाः स्वंस्वंस्थानंमुदान्विताः ॥ गतेषुतेषुदेवेंद्रःसस्मारमकरध्वजम् ॥१७॥ आगतस्तत्क्षणादेवरत्यायुक्तःस्वयंप्रभुः ॥ प्रणामंचततःकृत्वास्थित्वाप्रांजलिरब्रवीत् ॥ १८ ॥ किंकार्यंतेसमुत्पन्नंस्मृतोऽहंकेनहेतुना ॥ तत्त्वंकथयदेवेशतत्कर्तुंसमुपागतः ॥ १९ ॥ इत्युक्त्वातुमहेंद्रायस्थितस्तूष्णींतयासह ॥ इंद्रोऽपिवचनंश्रुत्वाकंदर्पस्यमहात्मनः ॥२०॥ उवाचवचनंतंवैयुक्तंयुक्तमितिस्तुवन् ॥ इंद्रउवाच ॥ त्वयासाधुसमारब्धंयत्तेकार्यमुपस्थितम् ॥ २१ ॥ तत्कर्तुमुद्यतोऽसित्वंधन्यस्त्वंमकरध्वज ॥ प्रस्तुतंशृणुमद्वाक्यंकथयामितवाऽनघ ॥ २२ ॥ मदीयंचैवयत्कार्यंतत्त्वदीयंनचाऽन्यथा ॥ मित्राणिममसंत्येवत्वत्तुल्यानिकदाचन ॥ २३ ॥ ॥ ॥ ॥

रोध्वजेयस्यतंकामंसस्मारस्मृतवान् ॥ १७ ॥ प्रभुःकामोरत्यातदाख्ययास्वपत्न्या ॥ १८ ॥ केनहेतुनाकस्मैप्रयोजनायेत्यर्थः ॥ हेतौतृतीयेत्यत्रहेतुशब्देनफलस्याऽपिग्रहणात्सर्वनाम्नस्तृतीयाचेत्यनेनतृतीया ॥ १९ ॥ इतीति ॥ कामइत्यनेनप्रकारणेंद्रायोक्त्वातयारत्यासहतूष्णींस्थितइत्यर्थः ॥ २० ॥ समारब्धंकृतमित्यर्थः ॥ २१ ॥ उद्यतःउद्युक्तः ॥ सन्नद्धोवा ॥ प्रस्तुतंप्रकृतमिदानींप्रसक्तमित्यर्थः ॥ २२ ॥ मदीयमिति ॥ मद्वाक्याभिप्रेतोयोऽर्थःस एवतवाऽभिमतइत्यर्थः ॥ मित्रत्वंविनैतादृशाभिमतिरनुपपन्नेतितत्कथयति ॥ मित्राणीति ॥ कदाचकदापिनत्वत्तुल्यानीत्यन्वयः ॥ २३ ॥

कामस्याप्यस्त्ररूपत्वमाह ॥ अन्यदिति ॥ ॥ २४ ॥ विद्धिजानीहि ॥ सुखकरमिति ॥ अस्त्ररूपत्वान्नपुंसकत्वम् ॥ एवंचहिंसात्मकवज्रापेक्षयाकामस्यसुखकरत्वेनश्रेष्ठत्वंसूचितम् ॥ श्रेष्ठत्वमेवस्पष्टंकथयति ॥ द्वयोरिति ॥ भवतोर्मध्यइत्यर्थः ॥ निर्धारणेसप्तमी ॥ अतिशयेनसंन्सत्तमस्तस्यसंबुद्धौहेसत्तमकामदेव ॥ २५ ॥ कथंश्रेष्ठत्वमित्यतआह ॥ वज्रमिति ॥ मित्रत्वसुखकरत्वेव्याप्तिमुखेनतर्कयति ॥ यतइति ॥ हितंसुखंयतःपुरुषात्प्रजायेतोत्पद्येत ततःपुरुषात्परोऽन्यःकःप्रियोमित्रंस्यादितिशेषः ॥ नकोपीत्यर्थः ॥ २६ ॥ कामेमित्रत्वंनिगमयति ॥ तस्मादिति ॥ हितकरत्वादित्यर्थः ॥ कार्यकरणेमित्रत्वस्यप्रयोजकत्वंसूचयति ॥ कार्यमिति ॥ त्वदन्यस्यकस्यापिकार्यकरणेशक्तिर्नास्तीत्याह ॥ ममेति ॥ २७ ॥ निष्कपटमित्रत्वंकथंज्ञातव्यमित्याशंक्यकालविशे

जयार्थंममदेवेननिर्मितंवज्रमुत्तमम् ॥ अन्यदस्त्रंभवानेवदेवेननिर्मितःपुरा ॥ २४ ॥ वज्रंहिंसात्मकंविद्धिभवान्सुखकरंमतम् ॥ द्वयोरपिभवानद्यश्रेष्ठःसर्वेषुसत्तम ॥ २५ ॥ वज्रंतुनिष्फलंस्याद्वैत्वंतुनैवकदापिहि ॥ यतोहितंप्रजायेततततःकोनुप्रियःपरः ॥ २६ ॥ तस्मान्मित्रवरस्त्वंचकार्यकर्तुमिहार्हसि ॥ ममदुःखंसमुत्पन्नमसाध्यंबहुकालिकम् ॥ ॥ २७ ॥ केनाऽपिनैवतच्छक्यंदूरीकर्तुंत्वयाविना ॥ दातुश्चैवपरीक्षावैदुर्भिक्षेज्ञायतेनृभिः ॥ २८ ॥ शूरस्यैवतुसंग्रामेमित्रस्यचतथाऽऽपदि ॥ अशक्तौचतथास्त्रीणांविपत्तौसुकुलस्यच ॥ २९ ॥ स्नेहस्यचपरोक्षेणसत्यस्यसंकटेगते ॥ परीक्षातुत्वदीयाऽद्यमित्रवर्यभविष्यति ॥ ३० ॥ नकेवलंमदीयंचकार्यंदेवसुखावहम् ॥ वयंचयाचितारःस्मःकार्यकार्यैत्वयाशुभम् ॥ ३१ ॥ इत्येवंमघवद्वाक्यंश्रुत्वातुमकरध्वजः ॥ उवाचप्रेमगंभीरंगद्गदस्मितपूर्वकम् ॥ ३२ ॥

षेणैवतज्ज्ञातव्यमित्यत्रान्यान्यपिलोकानुभूतान्युदाहरति ॥ दातुरिति ॥ ज्ञायतेऽनुभूयतइत्यर्थः ॥ २८ ॥ आपद्यापत्काले ॥ अशक्तौ पत्युःशारीरशक्त्याद्यभावे ॥ असंपत्तावितिपाठांतरम् ॥ तत्राऽसंपत्तौदारिद्र्यइत्यर्थः ॥ विपत्तौरोगादिदुःखकालेसुकुलस्यमहाकुलोत्पन्नस्य ॥ २९ ॥ गतेप्राप्ते ॥ ३० ॥ अथवानेदंकार्यंममैवाऽपितुतवाऽपीत्याह ॥ नकेवलमिति ॥ देवसुखावहं सर्वदेवसुखकरमित्यर्थः ॥ एतत्कार्यभवनइंद्रस्यार्थित्वंप्रकटयति ॥ वयमिति ॥ कार्यैकर्तव्यम् ॥ ३१ ॥ गद्गदंहर्षान्निरुद्धकंटं ॥ अर्शआद्यच् ॥ स्मितपूर्वकंमंदहासपूर्वकंगर्वपूर्वकंवा ॥ स्मयोगर्वेऽद्भुतेयोगेकातर्येगायकेऽपिचेतिविश्वः ॥ ३२ ॥

हेदेवेंद्रावयोरंतरंभेदबुद्धिर्नास्तीत्यतः किमर्थंभाषसे वदसि त्वयैवंनवक्तव्यमित्यर्थः ॥ कार्यसिद्धेःप्रागेवकार्यंसाधयामीतिब्रुवाणस्यनसाहजिकोपकारइत्याह॥ उपकृदिति ॥ उपकृत्उपकर्त्तापुरुषःकेवलकथनेनकृत्रिमोदृश्यतइत्यर्थः ॥ ३३ ॥ ३४ ॥ गर्वोक्तिंप्रकटयति ॥ मुक्तिमार्गमिति ॥ समापन्नंप्राप्तमपि ॥ एतेनशत्रोर्हंतुमशक्यत्वंगम्यते ॥ पातयामिनाशयामि ॥ वशीकरोमीतिवा ॥ तेपदमिति ॥ यस्तारकासुरस्तेतवपदंस्वर्गस्थानंकर्षितुंग्रहीतुंदारुणंभयंकरंतपस्तप्यतिकरोति ॥ ॥ ३५ ॥ कटाक्षेणेति ॥ स्त्रीकटाक्षस्यमदनविजयेसहकारित्वंवर्णितंकविना ॥ चंद्रेशीतलयत्यलीकनयनंशंभोःसुधाशीकरैर्विष्वगव्याकुलयत्सुसंयमधनान्कांतादृगंतेषुच ॥ लीलायैपरमैक्षवंधनुरिपून्बिभ्रत्प्रसूनात्मनःस्वच्छंदंरतिवल्लभोविजयतेत्रैलोक्यवीरःस्मरइति ॥ हेदेवसत्तमदेवश्रेष्ठेंद्र ॥

कामउवाच ॥ किमर्थंभाषसेदेवनांऽतरंह्यावयोरिह ॥ उपकृत्कृत्रिमोलोकेदृश्यतेकथनेनच ॥ ३३ ॥ कंठेनैवचयोब्रूयात्सकिंकार्यंकरिष्यति ॥ तथाऽपिचमहाराजकथयामिशृणुष्वतत् ॥ ३४ ॥ मुक्तिमार्गंसमापन्नंतेशत्रुंपातयाम्यहम् ॥ तेपदंकर्षितुंयोवैतपस्तप्यतिदारुणम् ॥ ३५ ॥ क्षणेनपातयाम्यद्यकटाक्षेणस्त्रियास्तथा ॥ देवंवादानवंवाऽपिऋषिंवादेवसत्तम ॥ ३६ ॥ मानुषाणांनवैमेद्यगणनापातनेमता ॥ वज्रंतिष्ठतुदूरेवैशस्त्राण्यन्यान्यनेकशः ॥ ३७ ॥ किंतेकार्यंकरिष्यंतिमयिमित्रेस्थितेप्रभो ॥ अन्येषांगणनानास्तिपातयामिहरंयदि ॥ ३८ ॥ एवंतुवचनंतस्यश्रुत्वाहर्षमुपागतः ॥ उवाचप्रणयन्वाचंकामंकांतासुखावहम् ॥ ३९ ॥ इंद्रउवाच ॥ यत्कार्यंमनसोद्दिष्टंतत्कार्यंकथितंत्वया ॥ शृणुकामप्रवक्ष्यामियदर्थंस्मरणंतव ॥ ४० ॥ तारकाख्योमहादैत्योब्रह्मणोवरमुत्तमम् ॥ संप्राप्यपीडयतेलोकान्नष्टधर्माह्यनेकशः ॥ ४१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३६ ॥ तिष्ठत्विति ॥ प्रयोजनभावादितिभावः ॥ ३७ ॥ यदिहरंपातयामि वशीकरोमितदाऽन्येषांपातनेप्रयोजनंनास्ति ॥ महामल्लभंगन्यायादित्यर्थः ॥ ३८ ॥ ॥ ३९ ॥ उद्दिष्टंचिकीर्षितं ॥ ४० ॥ तारकासुरवधोद्देशेनकथाप्रस्तूयते ॥ तारकाख्यइति ॥ नष्टधर्मानष्टोधर्मोवेदप्रतिपाद्योयस्यसनष्टधर्मा ॥ धर्मादनिच्केवलादित्यनिच् ॥ अधार्मिकइत्यर्थः ॥ तारकाख्योऽसुरोब्रह्मणःसकाशाद्वरंप्राप्यानेकशोऽनेकसंख्याकान्लोकान्जनान्स्वर्गादीन्वा ॥ लोकस्तुभवनेजनेइत्यमरः ॥ पीडयतीत्यर्थः ॥ पीड्यतइत्यार्षोऽयंप्रयोगः ॥ ४१ ॥ ॥ ॥ ॥ ॥ ॥

पीडाफलमाह॥दुःखिताइति॥विफलानिनिरर्थकानि॥विकलानीतिपाठांतरं॥तत्रविकलानिस्वकार्यकरणेऽसमर्थानीत्यर्थः॥४२॥मरणमिति ॥ इत्थंशस्त्रादिप्र योगप्रकारेणेत्यर्थः॥मरणप्रयोजकंदर्शयति॥एतस्येति ॥दुरात्मनोदुष्टआत्मास्वभावोयस्यसतस्यैतस्यतारकासुरस्यमरणंशंभुवीर्याच्छंभुवीर्योत्पन्नादर्थात्तत्पुत्रा दित्यर्थः॥ ४३ ॥ ४४ ॥अथशिवः कतिष्ठतितदाह ॥ शंभुरिति॥गिरिराजेहिमालयेआस्थितःतपःकुर्वन्स्थितइत्यर्थः ॥ हेमहाराजेंद्रपार्वतीपित्राज्ञयापितुर्हि माचलस्याज्ञयाशिवसमीपेसेवार्थतिष्ठतीतिमयाश्रुतमित्यन्वयः ॥४५॥४६॥ इतीति ॥ कृतीधन्यःस्याःभवेः ॥ गमिष्यत्यपगच्छेत् ॥ ४७ ॥ लोकस्वा

दुःखितादेवताःसर्वाऋषयश्चतथाऽमलाः ॥ देवानांचायुधान्यत्रविफलान्यभवन्प्रभो ॥ ४२ ॥ मरणंनैवतस्येत्थंभ विष्यतिकदाचन ॥ एतस्यमरणंप्रोक्तंशंभुवीर्याद्दुरात्मनः ॥ ४३ ॥ एतत्कार्यंत्वयासाध्यंदेवानांपरमंसुखम् ॥ ममा पिचहितंलोकेकर्तुमर्हसिसांप्रतम् ॥ ४४ ॥ शंभुश्चगिरिराजेवैतपःपरममास्थितः ॥ तत्समीपेचसेवार्थंपार्वतीस खिसंयुता ॥ ४५ ॥ तिष्ठतिचमहाराजपित्राज्ञयामयाश्रुतम् ॥ तथातस्यांरुचिस्तस्यशिवस्यपरमात्मनः ॥ ४६ ॥ जायतेनितरांकामतथाकार्यंत्वयाध्रुवम् ॥ इतिकृत्वाकृतीस्यास्त्वंदुःखंचैवगमिष्यति ॥ ४७ ॥ लोकस्वास्थ्यंप्रतापात्ते भविष्यतिनचाऽन्यथा ॥ इत्युक्तःसतुकामोवैप्रफुल्लमुखपंकजः ॥ ४८ ॥ अब्रवीत्तंतदातत्रहितमुत्पादयन्प्रभुम् ॥ प्रेम्णास्निग्धंचदेवेशंकरिष्यामिनसंशयः ॥ ४९ ॥ इत्युक्त्वावचनंतस्मैतथेत्योमितितद्वचः ॥ गृहीत्वाशिरसाकामःस दारःसवसंतकः ॥ ५० ॥ यत्रचैवहरःसाक्षात्तपतेपरमंतपः ॥ तत्रगत्वामधुश्चादौधर्मंविस्तारयन्स्थितः ॥ ५१ ॥ वसंतस्यचयेधर्मास्तेधर्मास्तद्वनेगताः ॥ वनानिचप्रफुल्लानिपलाशानांचतद्वने ॥ ५२ ॥ ॥ छ ॥

स्थ्यंलोकानांनिर्दुःखत्वं ॥ प्रफुल्लमुखपंकजोहर्षाद्विकसितवदनकमलः ॥ ४८ किमब्रवीत्तदाह ॥ प्रेम्णेति ॥ देवेशंशिवंप्रेम्णाप्रीत्यास्निग्धंपार्वत्यांस्नेह वंतंकरिष्यामि ॥ ४९ ॥ ओमितिचांगीकारार्थकम् ॥ ओंप्रश्नेऽगीकृतौरोषइत्यमरः ॥ सदारःसपत्नीकः ॥सवसंतकइति ॥ वसंतःऋतुविशेषाभिमानीदे वताविशेषः ॥ वसंतःपुष्पसमयइत्यमरः ॥ तत्सहितःसवसंतकः ॥ वसंतस्यापिकामविजयेसहकारित्वादितिभावः ॥ ५० ॥ तत्रेति ॥ मधुर्वसंतोयत्रस्थाने हरस्तपस्तप्यतितत्रस्थानआदौस्मरगमनात्पूर्वंधर्मंपुष्पलतादिसौगंध्योद्भवंविस्तारयम्कुर्वन्स्थितइत्यन्वयः ॥ ५१ ॥ तद्विस्तारमेवाह ॥ वसंतस्येतिं ॥ ५२ ॥

सहकारेषुसुगंधयुक्ताम्रवृक्षेषु ॥ आम्रश्चूतोरसालोसौसहकारोऽतिसौरभइत्यमरः ॥ अशोकवनिकास्वशोकवृक्षेषु ॥ तत्राशोकःप्रसिद्धः ॥ भ्रमराकुलितानि भ्रमरैर्व्याप्तानि ॥ ५३ ॥ तिलकाःवृक्षविशेषाः ॥ तिलकःक्षुरकःश्रीमानित्यमरः ॥ कोकिलाकलकूजितम् कोकिलानामव्यक्तशब्दः ॥ ध्वनौतुमधुरा स्फुटे॥कलइत्यमरः ॥ तथाकिंचेत्यर्थः ॥ भ्रमराणांशब्दोझंकारोमहानभूदित्यर्थः ॥ ५४ ॥ चंद्रस्येति॥दूतिकाइवचंद्रस्यकिरणाज्योत्स्नाःसाहाय्यकर्तारः॥ दूतिकादीनांसहायत्वंकामशास्त्रेप्रसिद्धम् ॥ तदुक्तम् ॥ दूतीदासीसखीचैवधात्रेयीप्रातिवेशिनी॥लिंगिनीशिल्पिनीचेतिसहायाःपरिकीर्तिताइति॥मानिनइति॥ मानईर्ष्याकोपस्तद्दतःपुरुषान्कालेरतियोग्यकालेकामपदेकामस्थानेऽर्पितान्आरूढानित्यर्थः ॥ पूर्वदिनेप्रेमकलहादिनास्वस्त्रीभ्योनिवृत्ताःकामिजनाश्चंद्र

पुष्पाणिसहकारेषुअशोकवनिकासुच ॥ बकुलेषुचपुष्पाणिभ्रमराकुलितानिच ॥ ५३ ॥ तिलकेषुतथैकेषुकोकिला कलकूजितम् ॥ भ्रमराणांतथाशब्दोह्यनेकोऽभून्महामुने ॥५४॥ चंद्रस्यविशदाह्यासन्किरणादूतिकाइव ॥ मानि नःप्रेरयामासुःकालेकामपदार्पितान् ॥५५॥ मारुतश्चसुखश्चात्रववौविरहिणांप्रियः ॥ वनौकसांतदातत्रमुनीनांदुः सहोह्यभूत् ॥ ५६ ॥ अचेतनानांतत्रासीत्कामासक्तिःसचेतसाम् ॥ अकालिनींप्रवृत्तिंचमधोर्वीक्ष्यहरस्तदा ॥५७॥ आश्चर्यपरमंगत्वातपःपरमदुष्करम् ॥ तपयामासतत्रैवहरोदुःखहरःपरः ॥ ५८ ॥ वसंतेप्रसृतेतत्रकामोरतिसम न्वितः ॥ चूतंबाणंसमाकृष्यस्थितःपार्श्वेतुवामतः ॥५९॥ रत्यायुक्तंतदाकामंदृष्ट्वाकोवानमोहितः ॥ एतस्मिन्नंतरेदेवी पुष्पाभरणभूषिता ॥६०॥ सखीभ्यांसंयुतातत्रयत्रातिष्ठद्धरःस्वयम् ॥ जगामशिवपूजार्थंनीलापुष्पाण्यनेकशः ॥६१

ज्योत्स्नांदृष्ट्वाकामोद्रिक्ताःसंतोमानंपरित्यज्यस्वस्त्रीणामभिमुखाअभूवन्निितिभावः ॥ अकालेकामदर्पितानितिपाठेतुअकालेमधुभिन्नकालेऽपिकामदर्पिता न्कामगर्वितानित्यर्थः ॥५५॥मारुतइति ॥ मंदवातआववावित्यर्थः॥वनौकसांवनंओकोगृहंयेषांतेषाम्॥धिष्ण्यमोकोनिवसनंस्थानावसथवास्तुचेतिकोशः ॥ ५६ ॥ अचेतनानामिंद्रियनिग्रहवताम् ॥ अथवाऽचेतनानांपाषाणादीनामपिकामासक्तिरभूत्किंपुनःसचेतसांकामासक्तिरभूदितिवक्तव्यमितिभावः ॥ तस्मिन्कालेहरःकिंकृतवानितितदाह ॥ अकालिनीमिति ॥ मधोर्वसंतस्याकस्मिकींप्रवृत्तिंपुष्पाद्युद्भावनरूपाम् ॥ ५७ ॥ ५८॥ वसंतइति ॥ कामोवामतः पार्श्वेहरस्येत्यादिः ॥ चूतमिति ॥ चूतंबाणम् चूतात्मकंबाणमित्यर्थः ॥ अरविंदमशोकंचचूतंचनवमल्लिका ॥ नीलोत्पलंचपंचैतेपंचबाणस्यसायकाइति कोशः ॥ समाकृष्यसन्नद्धंकृत्वास्थितइत्यन्वयः ॥ ५९ ॥ तदापार्वतीकिमकरोदितितदाह ॥ एतस्मिन्निति ॥ ६० ॥ ६१ ॥ ॥

पार्वत्यालोकोत्तरंसौंदर्यंकथयति ॥ पृथिव्यामिति ॥ ६२ ॥ आर्तवानिऋतुकालोत्पन्नानि ॥ तयापार्वत्या ॥६३॥ कामास्त्रप्रयोगंकथयति ॥ यदेति ॥ सा पार्वतीयदाशिवस्यसमीपंगतातदाकामस्तांतत्समीपस्थांदृष्ट्वाशूलपाणिनःशिवस्यरुच्यर्थंपार्वत्यामासक्त्यर्थंचापंधनुराकर्षयदित्यन्वयः॥ ६४॥ ६५ ॥ नमस्कृत्येति ॥ सापार्वतीसुंदरांगंसुंदरावयववान् ॥ जातावेकवचनम् ॥ विवृण्वतीप्रकाशयंतीत्यर्थः ॥ ६६ ॥ शिवकर्तृकांगवर्णनप्रकारमाह ॥ किमिति ॥ किमितिवितर्के ॥ एवमग्रेपिबोध्यम् ॥ अत्ररूपकालंकारउत्प्रेक्षालंकारावोज्ञेयः ॥ ६७ ॥ भृकुट्याविति ॥ कंदर्पस्यकामस्यकिंधनुषी ॥ शुकचंचुकाशुक

पृथिव्यांयादृशंलोकेसौंदर्यंविविधंमहत् ॥ तत्सर्वंचैकतस्तस्यांपार्वत्यांतुविनिश्चितम् ॥ ६२ ॥ आर्तवानिचपुष्पाणिधृतानिचतयातदा ॥ तत्सौंदर्यंकथंवर्ण्यमपिवर्षशतैरपि ॥ ६३ ॥ यदाशिवसमीपेतुगतासापर्वतात्मजा ॥ तदैवाकर्षयच्चापंरुच्यर्थंशूलपाणिनः ॥ ६४ ॥ तच्चापंपतितंहस्तात्पार्श्वेतस्यचवैतदा ॥ तयागलोत्पलाक्ष्यावैदृष्टःशंभुःस्वयंतदा ॥ ६५ ॥ नमस्कृत्यतदापूजांकृत्वासीत्पुरतःस्थिता ॥ सादृष्टाप्रभुणातत्रसुंदरांगंविवृण्वती ॥ ६६ ॥ शिवोऽपिवर्णयामासतदंगंसुंदरंतदा ॥ किंमुखंकिंशशांकश्चकिंनेत्रेचोत्पलेमते ॥ ६७ ॥ भृकुट्यौधनुषीचैवकंदर्पस्यमहात्मनः ॥ अधरःकिंचबिंबंचकिंनासाशुकचंचुका ॥ ६८ ॥ किंस्वरःकोकिलालापःकिंमध्यंचैववेदिका ॥ किंगतिर्वर्ण्यतेह्यस्याःकिंरूपंवर्ण्यतेमुहुः ॥ ६९ ॥ पुष्पाणिवर्ण्यतेकिंचवस्त्राणिचपुनःपुनः ॥ लालित्यंचैवयत्सृष्टौतदेकत्रविनिर्मितं ॥ ७० ॥ इत्येवंवर्णयित्वातुतपसोविरराममह ॥ हस्तंवस्त्रांचलेयावत्तावच्चदूरतोगता ॥ ७१ ॥ स्त्रीस्वभावात्तदासाचलज्जितासुंदरीस्वयम् ॥ विवृण्वतीतथांगानिपश्यंतीचमुहुर्मुहुः ॥ ७२ ॥ एवंचेष्टांतदादृष्ट्वाशंभुर्मोहमुपागमत् ॥ यद्यालिंगनमेतस्याःकरोमिकिंपुनःसुखम् ॥ ७३ ॥ ॥ ॥ ॥

मुखाग्रभागः ॥६८॥६९॥ पुष्पाणीति ॥ कबरीस्थानिपुष्पाणीत्यर्थः ॥ वर्ण्यतेवर्ण्यंते॥एकवचनमार्षम् ॥ जगद्गतंसौंदर्यंपार्वत्यामातिदिशति ॥ लालित्यमिति ॥ ७० ॥ विररामनिवृत्तइत्यर्थः ॥ स्त्रीपुंसयोःस्वभावमाह ॥ हस्तमिति ॥ हरःस्वहस्तंपार्वत्यावस्त्रांचलेयावत्प्राक्षिपत्तावत्सादूरतोगतेत्यर्थः॥७१॥ पश्यंतीस्वांगानीत्यनुषंगः ॥ अनेनस्त्रीणांमायावित्वंसूचितम् ॥ ७२ ॥ तदाहरोमनसिविचारंकृतवानित्याह ॥ यदीति ॥ ७३ ॥

तदाशिवस्यप्रज्ञाविशिष्टत्वंकथयति ॥ किमिति ॥ ईश्वरइति ॥ ईश्वरोप्यहंयदिपररूपवयवस्पर्शनामिच्छेयामिच्छांकुर्यांतर्हिलोके कः क्षुद्रः पुरुषएवमसत्कार्यंन करिष्यत्यपितुकुर्यादेवेत्यर्थः ॥ ७४ ॥ पर्यंकबंधनंकटिबंधनमित्यर्थः ॥ ईश्वरस्यनिःसंगत्वंकथयति ॥ किंपतेदिति ॥ अपितुनपतेदित्यर्थः ॥ ७५ ॥ इतिश्रीशिवमहापुराणटीकायांज्ञानसंहितायांसारबोधिन्यांशिवतपोवर्णनंनामदशमोऽध्यायः ॥ १० ॥ ॐनमःशिवाय ॥ शिवश्छुष्टस्मरोत्पत्तेः प्रतीक्षामकरोद्रतिः ॥ तपेतिनारदोगौरींप्राहेत्येकादशेस्थितं ॥ १ ॥ सूतसूतेति ॥ आदरात्द्विरुक्तिः ॥ १ ॥ च्यवनंस्खलनम् ॥ तत्परआसक्तः ॥ २ ॥ शिवःकीदृशंविचारं

क्षणमात्रंविचार्यैवंकिमहंमोहमागतः ॥ ईश्वरोऽहंयदीच्छेयंपरांगस्पर्शनंमुदा ॥ ७४ ॥ तर्हिकोऽन्यतमःक्षुद्रःकिंकिंनैवकरिष्यति ॥ एवंविवेकमासाद्यपर्यंकबंधनंदृढम् ॥ रचयामाससर्वात्माईश्वरःकिंपतेदिह ॥ ७५ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवतपोवर्णनंनामदशमोऽध्यायः ॥ १० ॥ ॥ ऋषयऊचुः ॥ सूतसूतमहाभागकिंजातंचततःपरम् ॥ कथयत्वंप्रसादेनकथांपापप्रणाशिनीम् ॥ १ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठायज्जातंतदनंतरम् ॥ धैर्यस्यच्यवनंदृष्ट्वाविचारेतत्परःशिवः ॥ २ ॥ कारणंकिंचिदुत्पन्नंनाऽन्यथेदंभवेदिति ॥ दिशोविलोकयामासपरितःशंकरस्तदा ॥ ३ ॥ वामभागेस्थितंकामंददर्शबाणकर्षिणम् ॥ तंदृष्ट्वाक्रोधसंयुक्तःसंजातस्तत्क्षणादपि ॥ ४ ॥ अहोदुष्टेनकामेननमुक्तोहंदुरासदः ॥ इत्येवंमनसाक्रुद्धःशिवःपरमकोपनः ॥ ५ ॥ तृतीयात्तस्यनेत्राद्वैनिःससाराऽग्निरुच्छिखः ॥ भस्मसात्कृतवांस्तेनमदनंतावदेवहि ॥ ६ ॥ यावच्चमरुतांवाचःक्षम्यतांवैप्रभोत्वया ॥ भवंतिचततःपूर्वंहतोऽसौमकरध्वजः ॥ ७ ॥ हतेतस्मिन्महावीर्येदेवादुःखमुपागताः ॥ शिवोऽपितत्क्षणादेवविहायाश्रममन्यतः ॥ ८ ॥

कृतवानितितदाह ॥ कारणमिति ॥ ३ ॥ बाणकर्षिणमाकृष्टबाणम् ॥ ४ ॥ मुक्तस्त्यक्तः ॥ दुरासदोदुर्धर्षोऽपीत्यर्थः ॥ अत्रकिंकृतंदुरात्मनेतिपाठांतरम् ॥ ५ ॥ उच्छिखःउद्गतज्वालोऽग्निस्तस्यशिवस्य तृतीयान्नेत्राल्ललाटनेत्रान्निःससार निर्गतइत्यन्वयः ॥ तेनाऽग्निनाभस्मसाद्भस्माधीनंभस्मीभूतमित्यर्थः ॥ ६ ॥ यावच्चेति ॥ हेप्रभोशिवत्वयाकामकृतोयमपराधःक्षम्यतामित्येवंप्रकारेणमरुतांदेवानांवाचोयावद्यदाभवंतिप्रादुर्भवेयुस्ततःपूर्वमेवाऽसौमकरध्वजःमकरोध्वजेयस्यसकामोहतइत्यन्वयः ॥ ७ ॥ विहायत्यक्त्वाऽन्यतोऽन्यत्रजगामेतिवक्ष्यमाणपदस्यानुषंगेणान्वयः ॥ ८ ॥ ॥

शिवेगतेसतिपार्वतीकिंकृतवतीतितदाह ॥ वेगेति ॥ वेगेनत्वरागमनेनदीर्घीकृतआत्मामनः ॥ शरीरंवाययासा आत्माजीवेधृतौदेहेस्वभावेपरमात्म नीतियादवः ॥ समादायपुष्पाभरणादीनीतिशेषः ॥ ९ ॥ भिन्नप्रस्तावेनाह ॥ क्षणेति ॥ रतिःकामपत्नीविसंज्ञाविगतप्रज्ञा ॥ भर्तृजन्यंस्वपत्युर्नाशादुत्पन्न मित्यर्थः ॥ १० ॥ विललापेति ॥ तदावनमचेतनमपिदुःखितमासीत् ॥ ११ ॥ मयूराश्चेति ॥ मयूराबर्हिणोनृत्यंजहुरत्यजन् ॥ १२ ॥ १३ ॥ तदार तिःशोकंकृतवतीत्याह ॥ किंकरोमीति ॥ स्वामिनंमन्मथंसमाहूयाऽऽह्वानंकृत्वाहेस्वामिन्नागच्छेति ॥ १४ ॥ आस्फाल्यताडयित्वा ॥ ब्रह्मणेति ॥ सदृशःस्त्रीपुं

वेगदीर्घीकृतात्माचगिरिराजसुतातदा ॥ समादायसखीयुक्ताजगाममंदिरंस्वयम् ॥ ९ ॥ क्षणमात्रंरतिस्तत्रविसं ज्ञाह्यभवत्तदा ॥ भर्तृजन्यंचयद्दुःखंनज्ञातमृषिसत्तमाः ॥ १० ॥ जातायांचैवसंज्ञायांरतिर्दुःखसमन्विता ॥ विल लापतदातत्रवनमासीत्सुदुःखितम् ॥ ११ ॥ मयूराश्चैवनृत्यंहिवृक्षाश्चचलनंजहुः ॥ मृगाश्चभ्रमणंब्रह्मन्भृंगागुं जारवंपुनः ॥ १२ ॥ पक्षिणश्चतदाविप्रामूकाश्चमुनयोयथा ॥ वायवश्चलनंहित्वावांतिनैवदिशोदश ॥ १३ ॥ रति रुवाच ॥ किंकरोमिक्वगच्छामिकिंकृतंदैवतैरिह ॥ स्वामिनंतुसमाहूयहाहाप्रियप्रियेतिच ॥ १४ ॥ हस्तौपादौत थास्फाल्यकेशानत्रोटयत्तदा ॥ ब्रह्मणासदृशोयोगोनसोढोममकर्मणा ॥ १५ ॥ सुखदातानकोऽप्यस्तिदुःखदाता नकश्चन ॥ सर्वोऽपिस्वकृतंभुंक्तेदेवाःशोच्यामयावृथा ॥ १६ ॥ तद्विलापंतदाश्रुत्वादेवाःशिवमुपाययुः ॥ स्तुत्वादेवं प्रपद्यैवंवचनंचेदमब्रुवन् ॥ १७ ॥ देवाऊचुः ॥ भगवन्छ्रूयतामेतद्वचनंचशुभंप्रभो ॥ कामेनैवकृतंयच्चनस्वार्थंलोकशं कर ॥ १८ ॥ दुष्टेनपीडितैर्दैवैःकारितंतद्विनान्यथा ॥ रतिस्त्वेकाकिनीदेवीविलापंदुःखितासती ॥ १९ ॥ करोतिशं करत्वंचप्रसन्नोभवसर्वथा ॥ संहारंकर्तुकामोऽसिदैवतैःसहशंकर ॥ २० ॥ दुःखंतस्यास्तथादृष्ट्वानष्टप्रायाश्चदेव ताः ॥ तस्मात्त्वयाचकर्तव्यंरत्याःशोकापनोदनम् ॥ २१ ॥

सानुरूपोयोगःसंबंधोब्रह्मणानसोढोनमर्षितः ॥ अत्रकारणमाह ॥ ममकर्मणेति ॥ ब्रह्मणासदृशोयोगोनन्यायेननकर्मणेतिपाठांतरम् ॥ १५ ॥ भुंक्तइति ॥ नाऽभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपीतिस्मरणादितिभावः ॥ १६ ॥ तद्विलापमिति ॥ तस्यारत्याःविलापंशोकवाक्यं ॥ १७ ॥ १८ ॥ दुष्टेनेति ॥ दु ष्टेनतारकासुरेणपीडितैर्दैवैस्तच्छिवतपोनाशनम् ॥ १९ ॥ संहारमिति ॥ तमोगुणाभिमानित्वाद्रुद्रस्येतिभावः ॥ २० ॥ शोकापनोदनंशोकनाशनम् ॥ २१ ॥

॥ २ २ ॥ प्रसन्नइति ॥ भगोऽस्यास्तीतिभगवान्ऐश्वर्यादिषड्गुणसंपन्नइत्यर्थः ॥ ऐश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियः ॥ ज्ञानविज्ञानयोश्चैवषण्णांभगइतीरितमित्युक्तेः ॥ देवाश्चेति ॥ हेदेवाःहेसर्वेऋषयःयत् मन्मथभस्मीभवनंजातंतदन्यथानभवेत् ॥ २ ३ ॥ यावद्रुक्मिणीपतिःश्रीकृष्णःपुत्रानुत्पादयिष्यति ॥ तावदयंकामोऽनंगःसन्नेवस्यात्तिष्ठत्वित्यर्थः ॥ ॥ २ ४ ॥ २ ५ ॥ २ ६ ॥ हत्वेति ॥ घातयित्वेत्यर्थः ॥ णिजभावआर्षः ॥ २ ७ ॥ तदीयंशंबरसंबंधि ॥ २ ८ ॥

नमस्कृत्यतदादेवाःस्तुतिंकृत्वाविधानतः ॥ प्रसन्नंकृतवंतस्तेशिवंलोकसुखावहम् ॥ २२ ॥ प्रसन्नोभगवांस्तत्र वचनंचेदमब्रवीत् ॥ शिवउवाच ॥ देवाश्चऋषयःसर्वेयज्जातंऽनान्यथाभवेत् ॥ २३ ॥ अनंगस्तावदेवस्याद्यावद्रुक्मिणीपतिः ॥ द्वारकायांस्वयंस्थित्वापुत्रानुत्पादयिष्यति ॥ २४ ॥ ततःकृष्णस्तुरुक्मिण्यांकाममुत्पादयिष्यति ॥ प्रद्युम्नंनामतस्यैवभविष्यतिनसंशयः ॥ २५ ॥ जातमात्रंतुतंदेवाःशंबरःसहरिष्यति ॥ हत्वाप्राप्यसमुद्रेवैनगरंसगमिष्यति ॥ २६ ॥ तावच्चनगरेतस्यरत्यास्थेयंयथासुखम् ॥ तत्रकामंमिलित्वातुहत्वाशंबरमाहवे ॥२७॥ तदीयंचैव यद्द्रव्यंनीत्वास्वनगरंपुनः ॥ गमिष्यतिस्वयंसावैदेवाःसत्यंवचोमम ॥२८॥ इत्युक्त्वांतर्दधेरुद्रोदेवानांस्तुवतांतदा ॥ देवास्तांचसमासाद्यरुद्रस्यवचनाद्रतिम् ॥ २९ ॥ उक्त्वावचस्तदीयंचस्वंस्वंभुवनमाययुः ॥ कामपत्नीयथादिष्टंनगरंसागतातदा ॥ ३० ॥ प्रतीक्षंतीचतंकालंरुद्रादिष्टंमुनीश्वराः ॥ देवाश्चदुःखिताःसर्वेहाहाकिंचभविष्यति ॥३१॥ तारकस्यकथंनाशोभविष्यतिपरस्परम् ॥ पितुर्गृहंतदागत्वामिलित्वामातरंमुदा ॥ ३२ ॥ पुनर्जातंतदात्मानंमेने सापर्वतात्मजा ॥ निनिंदचस्वकंरूपंहाहताऽस्मितदाब्रवीत् ॥ ३३ ॥ स्वपंतीचपिबंतीचह्यश्नंतीगच्छतीतदा ॥ तिष्ठंतीचसखीमध्येधिक्रूपंचमदीयकम् ॥ ३४ ॥ इतिसादुःखितातत्रस्मरंतीहरचेष्टितम् ॥ सुखंनलेभेकिंचिद्वैशिव शिवेतिसाऽब्रवीत् ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

इतीति ॥ अंतर्दधेऽदृश्योऽभूदित्यर्थः ॥ २ ९ ॥ तदीयंरुद्रसंबंधि ॥ यथादिष्टंयथाकथितम् ॥ ३ ० ॥ देवाइति ॥ तारकासुरस्यनाशःकथंभविष्यतीतिदेवाःपरस्परमूचुरितिशेषः ॥ ३ १ ॥ पितुरिति ॥ मातरंमेनाम् ॥ ३ २ ॥ आत्मानंस्वदेहम् ॥ पार्वत्याःशिवप्राप्त्यसंभावनयाचित्तचांचल्यंदर्शयति ॥ निनिंदेति ॥ स्वकंस्वकीयम् ॥ ३ ३ ॥ गच्छतीति ॥ नुमभावआर्षः ॥ ३ ४ ॥ ३ ५ ॥ ॥ ॥ ॥

प्राप्तौप्राप्तिविषयेप्राप्त्यर्थमित्यर्थः ॥ १६ ॥ पृष्टोनारदोवचनंहरस्तपःसाध्यइतिवचनमुक्तवानित्यन्वयः ॥ ३७ ॥ ३८ ॥ इतिश्रीशिवमहापुराणीय ज्ञानसंहितटीकायांसारबोधिन्यांपार्वतीपरिवर्तनंनामैकादशोऽध्यायः ॥ ११ ॥ ॐनमःशिवाय ॥ शिवएवपतिर्भूयान्ममेतिप्रज्ञयाऽगजा ॥ पित्राज्ञप्तात पश्चक्रइतिद्वादशईर्यते ॥ १ ॥ पार्वतीति ॥ तपोर्थंतपःकर्तुंमनआदधेस्थापितवतीत्यर्थः ॥ १ ॥ सखीभ्यांसखीद्वारेत्यर्थः ॥ २ ॥ हिमवन्निति ॥ हेहिमाचलपुत्र्या स्तवेत्यादिः ॥ साफल्यमीश्वरार्पणेनसफलत्वमितिभावः ॥ ३ ॥ इच्छतीति ॥ इयमितिशेषः ॥ अन्यथातपोविनावश्यतांनव्रजेत्गच्छेच्छिवइतिशेषः

एतस्मिन्समयेतत्रनारदोह्यगमत्तदा ॥ पूजितःसुखमासीनःपृष्टःप्राप्तौशिवस्यच ॥ ३६ ॥ उक्तवान्वचनंह्येतत्तपः साध्योहरःस्वयम् ॥ नाऽन्यथालभ्यतेदेविदेवैर्ब्रह्मादिकैरपि ॥ ३७ ॥ इत्येवंवचनंतस्यैनारदोभगवत्प्रियः ॥ ज गामसहरेर्नामगृणन्नारायणेतिच ॥ ३८ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपार्वतीपरावर्तनंनामैकादशो ऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ पार्वतीचतदाश्रुत्वावचनंनारदस्यच ॥ तपःसाध्यंहरंमेने तपोर्थंमनआदधे ॥ १ ॥ मातरंपितरंचैवसखीभ्यांपर्यपृच्छत ॥ लज्जमानास्वयंवक्तुंपार्वतीविनयान्विता ॥ २ ॥ ॥सख्यावूचतुः॥हिमवन्छ्रूयतांपुत्र्यावचनंकथ्यतेऽधुना ॥ साफल्यंचैवदेहस्यरूपस्यचतथापुनः ॥ ३ ॥ भवतश्चकुल स्याऽस्यसाफल्यंकर्तुमिच्छति ॥ तपसाराधनीयोऽसौनाऽन्यथावश्यतांव्रजेत् ॥ ४ ॥ तस्माच्चपर्वतश्रेष्ठदेयाज्ञाभव ताऽधुना ॥ इत्येवंचतदापृष्टोगिरिराजोऽब्रवीदिदम् ॥ ५ ॥ हिमाचलउवाच ॥ मह्यंचरोचतेसख्यौमेनायैरोच्यतां पुनः ॥ यद्येवंभवितव्यंचकिमतःपरमुत्तमम् ॥६॥ साफल्यंचमदीयस्यकुलस्यचनसंशयः ॥ मात्रेचरोच्यतांचेद्धेततः शुभतरंनुकिम् ॥ ७ ॥ इत्येवंवचनंपित्राह्युक्तंश्रुत्वातुतेतदा ॥ जग्मतुर्मातरंसख्यौतदाज्ञप्तेमुनीश्वराः ॥ ८ ॥

॥ ४ ॥ आज्ञातपःकरणेदेया ॥ ५ ॥ मेनायैममपत्न्यै ॥ ६ ॥ कुलस्येति ॥ गृहस्येतिपाठांतरम् ॥ मात्रइति ॥ मात्रेपार्वतीमात्रेमेनायै ॥ एतेन पत्नीनामग्रहणंनकर्तव्यमितिसूचितम् ॥ तथाचस्मृतिः ॥ आत्मनामगुरोर्नामनामातिकृपणस्यच ॥ श्रेयस्कामोनगृण्हीयाज्ज्येष्ठापत्यकलत्रयोरिति ॥ नु इतिवितर्के ॥ किमिति ॥ एतदपेक्ष्यशुभतरंनास्तीत्यर्थः ॥ ७ ॥ इतीति ॥ तेइतिसखीविशेषणम् ॥ तदाज्ञप्तेहिमाचलेनाज्ञप्तेइत्यर्थः ॥ मुनीश्वराइति संबोधनम् ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

तस्याःपार्वत्याः ॥ मातरिति ॥ स्वसखींपार्वतीमातर्यपिमेनायांस्वमातृत्वमप्युपचर्यते ॥ पुत्र्याःपार्वत्याः ॥ ९ ॥ शिवार्थेशिवप्राप्त्यर्थे ॥ प्राप्तेति ॥ पि
तुर्हिमाचलस्यसकाशात्प्राप्तानुज्ञास्वीकृतानुज्ञेत्यर्थः ॥ १० ॥ ११ ॥ समाकर्ण्येति ॥ श्रुत्वेत्यर्थः ॥ विव्हलाव्यग्रेत्यर्थः ॥ १२ ॥ दुःखितेति ॥ हेपुत्रि
पार्वतिपुरात्वयायदितपस्तप्तंतत्पुण्येनात्रगृहेतवजन्मप्राप्तमित्यग्रिमेणान्वयः ॥ यदीत्यत्रयथेतिपाठांतरम् ॥ इहगृहेतवकिंनुन्यूनंनकिमपीत्यन्वयः ॥ १३ ॥
कुत्रेति ॥ देवाममगृहेसंतिमदधीनाइत्यर्थः ॥ देवादीनामत्रैवसत्वेतपोऽर्थमन्यत्रनत्वयागंतव्यमितिभावः ॥ तीर्थानीति ॥ नसंतीतिकाकुः ॥ अपितुसंत्ये

गत्वातुमातरंतस्यावचनंह्यूचतुस्तदा ॥ मातस्त्वंवचनंपुत्र्याःश्रुत्वाकर्त्तुमिहाऽर्हसि ॥ ९ ॥ तप्तुकामास्तितेपुत्रीशिवा
र्थेपरमंतपः ॥ प्राप्ताऽनुज्ञापितुश्चैवतुभ्यंचपरिपृच्छति ॥ १० ॥ इयंचरूपसाफल्यंकर्त्तुकामापतिव्रता ॥ त्वदाज्ञाय
दिजायेततप्यतेचतयाऽधुना ॥ ११ ॥ समाकर्ण्यवचस्त्वेतन्मेनादुःखमुपागता ॥ समाहूयतदापुत्रीमुवाचविव्हला
सती ॥ १२ ॥ दुःखिताऽसिकथंपुत्रितपस्तप्तंपुरायदि ॥ प्राप्तंजन्मगृहेह्यत्रकिंन्यूनंनुभवेदिह ॥ १३ ॥ कुत्रयासि
तपःकर्त्तुंदेवाःसंतिगृहेमम ॥ तीर्थानिचविचित्राणिनसंतितेपितुर्गृहे ॥ १४ ॥ त्वयाऽत्रैवतपःकार्यंसिद्धिःस्यादनपा
यिनी ॥ साधितंकिंत्वयागत्वापुनःकिंसाधयिष्यसि ॥ १५ ॥ शरीरंकोमलंवत्सेतपस्तुकठिनंमहत् ॥ एतस्मात्त्व
याकार्यंस्थित्वैतत्सुलभंभवेत् ॥ १६ ॥ इत्येवंबहुधापुत्रीमात्राऽपिवारितासती ॥ सुखंनैवाऽत्रसंपेदेह्यनाराध्यशिवं
तदा ॥ १७ ॥ दुःखंज्ञात्वातदीयंसामात्राज्ञप्ताजगामसा ॥ मातरंपितरंचैवप्रणिपत्यपुनस्तदा ॥ १८ ॥ सखीभ्यां
संयुतातत्रतपस्तप्तुमुपाययौ ॥ हित्वाभरणान्यनेकानिवस्त्राणिविविधानिच ॥ १९ ॥

वेत्यर्थः ॥ निवसंतिपितुर्गृहइतिपाठांतरम् ॥ १४ ॥ अन्यत्रगमनेयादृशंफलंतादृशमत्रभवेदित्याह ॥ त्वयेति ॥ सिद्धिरिति ॥ अर्केचेन्मधुविंदेतकिमर्थं
पर्वतंव्रजेदितिन्यायादितिभावः ॥ अनपायिनीनाशशून्येत्यर्थः ॥ १५ ॥ तपःकरणेअशक्तिमाह ॥ शरीरमिति ॥ एतस्मादिति ॥ एतस्मात्त्वयाकार्यंयत्ने
वसुलभंभवेदितिपाठांतरम् ॥ १६ ॥ सुखमिति ॥ पार्वतीशिवमनाराध्याराधनाकरणेनेत्यर्थः ॥ सुखंनसंपेदेप्रपेदे ॥ शिवाराधनंविनासुखंनभवेदितिमेनइ
तिभावः ॥ १७ ॥ दुःखमिति ॥ मात्रामेनयातदीयंपार्वतीसंबंधिदुःखंज्ञात्वाऽऽज्ञप्तासापार्वतीजगामेत्यन्वयेनसमानकर्तृकत्वनिर्वाहः ॥ १८ ॥ १९ ॥

मौंजींतृणविशेषनिर्मितमेखलाम् ॥ मुंजीमित्यपिपाठः ॥ हित्वेति ॥ हारंमौक्तिकमालांहित्वात्यक्त्वा ॥ २० ॥ शृंगेशिखरे ॥ यत्रोत्तमंतीर्थंस्यादित्यन्वयः ॥ कूटोऽस्त्रीशिखरंशृंगमित्यमरः ॥ शृंगेऽस्यतीर्थमुत्तममितिपाठांतरम् ॥ गौरीति ॥ तपःकरणाद्गौरीशिखरेतिनाम्नाप्रसिद्धंतीर्थंशृंगंवा ॥ २१ ॥ सुंदराश्चेति ॥ तत्रतीर्थेशृंगेवाआसन्निति शेषः ॥ तदायज्ञस्थानंकारितवतीत्याह ॥ भूमीति ॥ भूमिशुद्धिंलांगूलादिनाभूशोधनम् ॥ २२ ॥ २३ ॥ तपःप्रकारमाह ॥ सूर्यइति ॥ दीप्तानामिति ॥ घर्मकेउष्णकालेग्रीष्मेपंचाग्निसंन्निधौतपःकृतवतीतिभावः ॥ अत्रदीप्तानांचतुरग्नीनामितिपाठांतरम् ॥ २४ ॥ शी

वल्कलंचतदाधृत्वामौंजींबध्वासुशोभनाम् ॥ हित्वाहारंतदाचर्ममृगस्यपरमंशुभम् ॥ २० ॥ जगामतपसेतत्रशृंगेस्यात्तीर्थमुत्तमम् ॥ गौरीशिखरनामासीत्तपसःकारणादिह ॥ २१ ॥ सुंदराश्चद्रुमास्तत्रपवित्राःफलभाजिनः ॥ भूमिशुद्धिंततःकृत्वाविधायवेदिकांशुभाम् ॥ २२ ॥ तयातपःसमारब्धंमुनीनामपिदुष्करम् ॥ चांचल्यंचतदास्थाप्यशरीरस्यविशेषतः ॥ २३ ॥ सूर्येदृष्टिंसमाक्षिप्यचकारपरमंतपः ॥ दीप्तानांचतथाऽग्नीनांमध्येस्थित्वातुघर्मके ॥ वर्षासुस्थंडिलेस्थित्वाशीतेजलसमीपगा ॥ एवंतपःप्रकुर्वाणावृक्षानारोपयत्तदा ॥ २५ ॥ सिंचतीप्रत्यहंतत्रह्यातिथ्यंचाऽप्यकल्पयत् ॥ वातश्चैवतथाशीतौवृष्टिश्चविविधातदा ॥ २६ ॥ दुःखंचविविधंतत्रगणितंनतयातथा ॥ तथातपस्तयातप्तंमुनिभिश्चसुदुष्करम् ॥ २७ ॥ श्रुत्वातुऋषयस्तत्रविस्मयंपरमंगताः ॥ दर्शनार्थंसमाजग्मुःकीदृक्तप्तंतपोऽनया ॥ २८ ॥ महतांधर्मवृद्धेषुगमनंश्रेयउच्यते ॥ प्रमाणंवयसोनास्तिमान्योधर्मःसदाबुधैः ॥ २९ ॥

तादिकालेषुशैत्याद्याधिक्यंसहमानासतीतपःकृतवतीत्याह ॥ वर्षास्विति ॥ वर्षाकालइत्यर्थः ॥ आरोपयदिति ॥ आतिथ्यार्थमितिभावः ॥ २५ ॥ शैत्यादिसहिष्णुत्वमेवस्पष्टमाह ॥ सिंचतीत्यादिना ॥ तत्रवृक्षसंवलितस्थले ॥ २६ ॥ २७ ॥ श्रुत्वेति ॥ विस्मयंआश्चर्यम् ॥ दर्शनार्थमिति ॥ अनयापार्वत्याकीदृक्तपस्तप्तमितिद्रष्टुमाजग्मुरागताइत्यन्वयः ॥ २८ ॥ नन्वनाहूतावृद्धाऋषयःकथंतत्रगताइत्याशंकायांधर्मस्यसकलपुरुषार्थमूलत्वेनावेद्दृदभिमतत्वाद्यत्रधर्मवृद्धास्तत्रमहद्भिरपिगंतव्यमित्याह ॥ महतामिति ॥ प्रमाणमिति ॥ वयसःप्रमाणंनास्तिवयोवृद्धत्वमपेक्ष्यधर्मवृद्धत्वंश्रेष्ठमितिभावः ॥ २९ ॥

श्रुत्वेति ॥ येकठिनांगादृढावयवानतुकोमलावयवास्तैरन्यैरपिकिमीदृशंतपःक्रियतेअपितुकर्तुमशक्यमेवेत्यर्थः ॥ इतितेऋषयोजल्पंतोऽभवन्नितिशेषः ॥ ॥ ३० ॥ तदानींतत्तपोमहिम्नातपोवनस्थागोव्याघ्रादयोऽपिपरस्परंविरोधंहित्वासंचेरुरित्याह ॥ तदाश्रमगताइति ॥ ३१ ॥ तदानींपार्वतीतपोमहिम्नावृक्षादयोऽपिसपुष्पफलाअभूवन्नित्याह ॥ वृक्षाइत्यादिना ॥ ३२ ॥ तद्वनमपिसर्वंकैलासपर्वतवत्सकलसिद्धिप्रापकमभूदित्याह ॥ तद्वनमिति ॥ समन्वितंसदृशम् ॥ ३३ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपार्वतीतपश्चर्यावर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ओंनमःशिवाय ॥ पा

श्रुत्वादृष्ट्वातपस्तस्याःकिमन्यैःक्रियतेतपः ॥ जल्पंतस्तेतदातत्रकठिनांगाश्चयेपुनः ॥ ३० ॥ तदाश्रमगतायेचविरोधरहितास्तदा ॥ सिंहागावस्तथाऽन्येचरागादिदोषसंयुताः ॥ ३१ ॥ तन्महिम्नैवतेतत्रनाबाधंतपरस्परम् ॥ वृक्षाश्चसफलास्तत्रतृणानिविविधानिच ॥ ३२ ॥ पुष्पाणिचविचित्राणितत्रासन्नृषिसत्तमाः ॥ तद्वनंचतदासर्वंकैलासेनसमन्वितम् ॥ जातंचतपसस्तस्याःसिद्धरूपमभूत्तदा ॥ ३३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपार्वतीतपश्चर्यावर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ ७ ॥ सूतउवाच ॥ एतस्मिन्समयेदेवाऋषयोनारदादयः ॥ पार्वत्यास्तत्तपोदृष्ट्वातेजसाव्यापितास्तथा ॥ १ ॥ जग्मुस्तेचतदातत्रयत्राऽऽस्तेवृषभध्वजः ॥ तत्रगत्वाचतेदेवानारदंप्रैषयंस्तदा ॥ २ ॥ नारदोऽपितदागत्वादेवानाहूयतांस्ततः ॥ प्रणम्यशंकरंदेवंस्तुतिंचक्रुःपरस्परं ॥ ३ ॥ ऋषयऊचुः ॥ शंभुस्त्वंशंकरोऽसित्वंदयालुस्त्वंविशेषतः ॥ पार्वत्यावैतपस्तप्तंदारुणंलोकशोषणम् ॥ ४ ॥ अपूर्वंदृष्टंनोभाविदेवदानवदुर्लभं ॥ प्रीतोभवत्वमस्माकंकुरुकार्यंसदाशिव ॥ ५ ॥ ॥ ॥ ॥

वैत्याश्चतपश्चर्यांदृष्ट्वाशंभुस्तदावरम् ॥ दातुंप्रचक्रमेऽध्यायेत्रयोदशइतीर्यते ॥ १ ॥ एतस्मिन्निति ॥ तेजसातपःप्रभावेन ॥ १ ॥ जग्मुरिति ॥ वृषभध्वजोवृषभोबलीवर्दोध्वजेयस्यसशिवः ॥ प्रैषयन्प्रेषितवंतः ॥ २ ॥ नारदइति ॥ तान्देवानाहूयाऽऽतिष्ठदितिशेषः ॥ स्तुतिंस्तोत्रंचक्रुःकृतवंतोदेवाइतिशेषः ॥ ३ ॥ पार्वत्याइति ॥ पार्वत्यास्तपसातप्तमितिपाठांतरम् ॥ ४ ॥ अपूर्वेति ॥ पूर्वंकेनापिनैवंतपस्तप्तमितिभावः ॥ नोभावि ॥ एतदुत्तरंकेनाप्येवंनतपःक्रियेतेतिभावः ॥ तदेवविशदयति ॥ देवेति ॥ ५ ॥ ॥ ॥ ॥

नारदप्रख्यैर्नारदश्रेष्ठैर्ऋषिभिः ॥ केवलेनतपसादुर्दर्शोऽप्यहंभक्तियुतेनतपसापार्वत्यावशीकृतइतिशिवआह ॥ देवानामित्यादिना ॥ ६ ॥ क्रीतइत्यनेनभक्ताधीनत्वंबोध्यते ॥ ७ ॥ संयतउद्युक्तःसन्नद्धोवा ॥ ८ ॥ ९ ॥ पार्वत्याभक्तियुतंतपःपरीक्षितुंशिवोवेषांतरंधृत्वाजगामेत्याह ॥ जटिलमिति ॥ जटिलंजटायुक्तम्॥ वृद्धब्राह्मणस्वरूपमितिसमुदितार्थः ॥ १० ॥ शिवापार्वती ॥ शिवाभवानीरुद्राणीशर्वाणीसर्वमंगलेत्यमरः ॥ वृद्धमिति ॥ अनेनपूजार्हत्वंगम्यते ॥ ११ ॥ १२ ॥ पार्वतीति ॥ त्वंकुतोगतइतिपप्रच्छेत्यन्वयः ॥ स्वीयंवृत्तांतमुक्त्वातांपार्वतींपृष्टवानित्यग्रिमेणान्वयः ॥ शिवइतिशेषः ॥ १३ ॥ उ

इत्युक्तेनारदप्रख्यैःशंभुर्वचनमब्रवीत् ॥ देवानामप्यदर्शोहंतपसादुष्करेणच ॥ ६ ॥ तयापर्वतराजस्यसुतयातपसाह्यहं ॥ क्रीतोऽस्मिवचनंतस्याःकरिष्यामिभवत्प्रियं ॥ ७ ॥ अवश्यमेतद्भवितानात्रकार्याविचारणा ॥ गच्छतस्वपुरंतावद्यूयमत्रास्मिसंयतः॥८॥स्वयमेवकरिष्यामिकर्तव्यंभवतांप्रियं ॥ आश्वास्यचतथाशीघ्रंशिवस्तत्परिपालकः॥ ॥९॥इत्युक्त्वाचतदादेवान्विसृज्यशंकरस्तदा॥जटिलंरूपमास्थायजगामपार्वतीवनम्॥१०॥आगतंचतदादृष्ट्वाशिवाप्यपूजयत्तदा ॥ वृद्धंचैवस्थितंदेवीपूजांतस्यतदाकरोत् ॥ ११ ॥ फलपुष्पादिभिस्तत्रपूजितंपरयामुदा ॥ स्थितंतंनिंद्रयाव्याप्तंजराजर्जरितंतदा ॥ १२ ॥ पार्वतीकुशलंत्वंवैपप्रच्छत्वंकुतोगतः ॥ इतिपृष्टेतयातत्रह्युक्त्वास्वीयंचतांपुनः ॥ १३ ॥ पृष्टवान्कपटेनैवगोपयन्रूपमुत्तमम् ॥ अयिदेविजलंह्येतत्फलादिचनिरंतरम् ॥ १४ ॥ अन्वच्छिन्नंभवेदत्रयथाशक्तितपस्यसि ॥ नवेवयसियद्देविकृतंवैतपउत्तमम् ॥ १५ ॥ अतःकिंचिद्धिपृच्छेयंकथनीयंत्वयाऽधुना॥ पूजाविधिस्त्वयादेविकृतोवैसर्वथात्मना ॥ १६ ॥ तस्मान्मैत्रीचसंजातारहस्यंवदमेशुभे ॥ किमिच्छसिवरंदेविप्रष्टुमिच्छाम्यतःपरम् ॥ १७ ॥ त्वय्येवतपसोदेविफलंसर्वंप्रदृश्यते ॥ वरार्थेचतपश्चेद्धैतिष्ठतुतपएवतत् ॥ १८ ॥

त्तमंरूपंत्रिनेत्रादिस्वरूपंगोपयन्आच्छादयन्सन्तपःकुर्वत्याःपार्वत्याभक्षणाद्युपचारमाशीर्वचनमहिम्नाशिवःसमर्थयतइत्याह ॥ अयीति ॥ १४ ॥ अन्वच्छिन्नंपरिपूर्णम् ॥ अविच्छिन्नमितिपाठांतरम् ॥ शिवस्तत्तपसोपकारंभावयति ॥ नवइति ॥ १५ ॥ १६ ॥ तस्मादिति ॥ रहस्यंगोप्यं ॥ हेशुभे ॥ ॥ १७ ॥ तपसोवरप्रयोजनकत्वेवैयर्थ्यंसंभावयति ॥ तिष्ठत्विति ॥ १८ ॥ ॥ ॥ ॥ ॥

अत्रैवलोकप्रसिद्धमुदाहरति ॥ रत्नमिति ॥ रत्नंप्रसिद्धंस्त्रीरत्नंवाग्रहीतारंस्वयमेवग्रहीष्यतिस्वीकुर्यादित्यर्थः ॥अथवाग्रहीतापुरुषःस्वयमेवदृष्ट्वाअरंशीघ्रंरत्नंग्रहीष्यति ॥ रत्नंतुतद्गृहीतारंस्वयंज्ञात्वाग्रहीष्यतीतिपाठांतरम् ॥ ईदृशमिति ॥ यतस्त्वयाऽऽभरणानिहित्वाचर्मादिधृतमतःसौंदर्यंव्यर्थीकृतमित्याग्रिमेणान्वयः ॥ १९ ॥ तत्सर्वमिति ॥ कारणंचर्मादिधृतौब्रूहिकथय ॥ उपागमेउपगच्छामीत्यर्थः ॥ आत्मनेपदमार्षम् ॥ २० ॥ सापार्वतीतन्मुखेनसखीमुखेनेत्यर्थः ॥ एतेनकुलस्त्रीणांपरपुरुषैःसहसाक्षात्संभाषणंनकर्तव्यमितिगम्यते ॥ २१ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपार्वतीतपोव

रत्नंतुग्रहीतारंवैनपृच्छतिग्रहीष्यति ॥ ईदृशंचैवसौंदर्यंसवव्यर्थीकृतंत्वया॥१९॥ हित्वाभरणान्यनेकानिचर्मादिचधृतंत्वया ॥ तत्सर्वंकारणंब्रूहिदृष्ट्वाहर्षमुपागमे ॥ २० ॥ इतिपृष्टातदातेनसखींप्रेरयतीतदा ॥ तन्मुखेनैवतत्सर्वंकथयामाससुव्रता ॥ २१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपार्वतीतपोवर्णनंनामत्रयोदशोऽध्यायः ॥ १३ ॥
॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथांपापप्रणाशनीम् ॥ यज्जातंचततःपश्चात्पार्वतीशिवयोस्तदा ॥ १ ॥ तयाचप्रेरितातत्रसखीजटिलमाहतत् ॥ सख्युवाच ॥ श्रूयतांविप्रवक्ष्यामियदित्वंश्रोतुमिच्छसि ॥ २ ॥ यदर्थमेतयासख्याह्यारब्धंतपउत्तमम् ॥ हित्वेंद्रप्रमुखान्देवानैश्वर्यसंयुतानपि ॥ ३ ॥ पतिंपिनाकपाणिंवैप्राप्तुमिच्छतिसांप्रतम् ॥ इयंसखीमदीयावैवृक्षानारोपयत्पुरा ॥ ४ तेषुवृक्षेषुसंजातंफलंपश्यपुरःप्रभो ॥ मनोरथांकुरंत्वस्याःपश्यामिनकथंचन ॥ ५ ॥ रूपहार्यंशिवंदेवंमदनस्याऽनुहारिणम् ॥ तस्माच्चनारदादेशात्तपस्तप्यतिदारुणम् ॥६॥ यत्तेपृष्टंमयाख्यातंसख्याश्चसमभीप्सितम् ॥ इत्येवंवचनंश्रुत्वाजटिलोवाक्यमब्रवीत् ॥ ७ ॥ ॥ छ ॥ ॥

र्णनंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॐनमःशिवाय ॥ गौरीतपःपरीक्षार्थमात्मन्यारोपयद्धरः ॥ पतित्वदूषकान्दोषांश्चतुर्दशइतीर्यते ॥ १ ॥ श्रूयतामिति ॥ ततःपश्चात्तदनंतरंपार्वतीशिवयोर्यज्जातंतत्कथाभवाद्भिःश्रूयतामहंतुकथयामिकथामित्यर्थः ॥ १ ॥ हेविप्रजटिल ॥ २ ॥ ३ ॥ सखीतपःप्रयोजनंकथयति ॥ पतिमिति ॥ इयंपार्वती ॥ ४ ॥ मनोरथेति ॥ मनोरथेंऽकुररूपेणप्रादुर्भूतम् ॥ रूपेणसौंदर्येणन्हियतेऽसौतंरूपहार्यंमदनसंहारकंशिवंशिवरूपंफलंनपश्यामिनिश्चिनोम्यपितुसंदेहामीत्याग्रिमेणाऽन्वयः ॥ ५ ॥ ६ ॥ यदिति ॥ तेत्वयायत्पृष्टंतत्सख्याअभीष्टंमयाऽऽख्यातंकथितम् ॥ ७ ॥ ॥

जटिलःस्वमनसिचिंतयति॥ सख्येति ॥ हेदेविपार्वतितवसख्याकथितंवचनंसत्यमुतपरिहासोवेत्यहंनजानामि ॥ अतस्त्वंसाक्षात्समक्षंमुखेनकथंनपरिभाषस इत्यन्वयः ॥ साक्षात्संभाषणेनैवांऽतःस्थंत्वद्यंगम्यतइतिभावः ॥ ८ ॥ किमुवाचेतितदाह ॥ तत्तथैवेति ॥ यथासख्योक्तंपतिंपिनाकपाणिमित्यादिनातत्त थैवास्ति ॥ नचाऽन्यथातद्विपरीतमित्यर्थः ॥ ९ ॥ यद्यपिमनसावचसाचशंकरवरणस्यसुलभत्वेऽपिकायेनतद्वरणस्यदुर्लभत्वेनाऽप्राप्यंतद्दस्त्विरत्याह ॥ जानामीति ॥ १० ॥ ननुतद्दस्त्वन्यलभ्यत्वेननिश्चितेतत्किमर्थदारुणंतपःक्रियतइत्यतआह ॥ तथाऽपीति ॥ गिरिजापार्वती ॥ ११ ॥ १२ ॥ ननुशि वस्यकीदृशीच्छाऽऽसीदित्याकांक्षायांतदाह ॥ किमिति ॥ काम्यतीकामयमाना ॥ आर्षरूपम् ॥ दृष्ट्वाज्ञात्वेत्यर्थः ॥ कामनामित्यादिः ॥ तस्याव्रतंरतु

॥ जटिलउवाच ॥ सख्येदंकथितंसत्यंपरिहासउताऽपिवा ॥ यथार्थंनकथंदेविमुखेनपरिभाषसे ॥ इत्युक्तेचतदातेन स्वीयेनैवसखीतदा ॥ उवाचपार्वतीदेवीतत्तथैवनचाऽन्यथा ॥ ९ ॥ मनसावचसासाक्षाद्वृतोवैशंकरोमया ॥ जानामिदुर्लभंवस्तुकथंप्राप्यंमयाभवेत् ॥ १० ॥ तथाऽपिमनसौत्सुक्यात्तप्यतेचमयाऽधुना ॥ इत्युक्त्वावचनंतस्मै स्थितासागिरिजातदा ॥ ११ ॥ उवाचब्राह्मणस्तत्रमयाचगम्यतेऽधुना ॥ एतावत्कालपर्यंतंममेच्छामहतीह्यभूत्॥ ॥ १२ ॥ किंवस्तुकाम्यतीदेवीदृष्ट्वायामिस्तुवन्व्रतम् ॥ अवगतंमयासम्यक्त्वन्मुखात्सुंदरिश्रुतम् ॥ १३ ॥ इतोगच्छाम्यहंदेवियथेच्छसितथाकुरु ॥ नकथ्यतेमयातुभ्यंमित्रत्वंनिष्फलंभवेत् ॥ १४ ॥ यथाकार्यंयथाभाविकथनीयं शुभेनच ॥ इत्युक्त्वावचनंतस्यैयावद्गंतुमियेषसः ॥ १५ ॥ तावच्चपार्वतीदेवीह्युवाचकिंगमिष्यसि ॥ इत्युक्तेचतयात त्रस्थित्वोवाचसदंडधृक् ॥ १६ ॥ दंडधृगुवाच ॥ शृणुदेविप्रवक्ष्यामिमित्रत्वादुच्यतेमया ॥ इतश्चप्रथमंत्वंमेमान्यापूज्यासदाशुभा ॥ १७ ॥ इदानींतद्विपरीतंजातंमेनात्रसंशयः ॥ इतिकृतंत्वयाचैवतच्चैवश्रूयतामिति ॥ १८ ॥

वन्यामिगच्छामीत्यर्थः ॥ अवगतंज्ञातम् ॥ १३ ॥ १४ ॥ नन्विदमेवंकुर्वितिकथितेकथंमित्रत्वस्यनिष्फलत्वमतआह ॥ यथेति ॥ शुभेकार्येकर्त्तव्ये भाविनकथनीयमित्यर्थः ॥ अथवाहेशुभेपार्वतियथाभावियद्भाविष्यंतन्नकथनीयम् ॥ भाविकार्यस्यभाग्याधीनत्वादितिभावः ॥ यथाकार्यंतथाभाविकथनी यंशुभंनचेतिपाठांतरम् ॥ इतीति ॥ सजटिलःइयेषइष्टवानित्यर्थः ॥ इषुइच्छायामितिधातोरूपं ॥ १५ ॥ दंडधृक्दंडंधृतवानितिदंडधृक् ॥ वृद्धब्राह्मणइ त्यर्थः ॥ धृपिरत्रधारणे ॥ धातूनामनेकार्थत्वात् ॥ १६ ॥ १७ ॥ १८ ॥ ॥ ॥ ॥

ननुपार्वत्या वैपरीत्यं किंकृतमित्यतो दृष्टांतमुखेनोदाहरति ॥ दत्वेति ॥ अल्पमतिरपिसुवर्णंदत्वाकाचंनगृण्हातीतितवमौर्ख्यमितिभावः ॥ १९ ॥ ननुसुवर्णा दीनिदत्वैवकाचमयकटकान्यावश्यकानिचेल्लोकेगृण्हंतीत्यस्वरसादाह ॥ गांगमिति ॥ गंगासंबंधीत्यर्थः ॥ समीहसइच्छसि ॥ २० ॥ ननुवर्षाकाली नंगांगमपिजलंपरित्यज्यकूपोदकंजनाःस्वीकुर्वंतीत्यस्वरसादाह ॥ सूर्येति ॥ खद्योतद्युतिंखद्योतःकीटविशेषः॥खद्योतोज्योतिरिंगणइत्यमरः॥तस्यद्युतिःकां तिस्ताम् ॥ चीनांशुकंपट्टवस्त्रम् ॥ चित्रांशुकमितिक्वचित्पाठः ॥ उपाससेइच्छसीतियावत् ॥ २१ ॥ हेदेवेशेपार्वति ॥ २२ ॥ दार्ष्टांतिकंप्रकृतंकथय ति ॥ तथेति ॥ असुराणामसुरवेषधारिणांभयंकररुंडादिवेषधारिणांशिवप्रभृतीनामितिकपटोक्तिः ॥ २३ ॥ २४ ॥ शिवपार्वत्योरूपादिवैलक्षण्यरूपंवि

दत्वासुवर्णमुद्रांचकाचंग्रहीतुमिच्छसि ॥ हित्वाचचंदनंशुभ्रंकर्दमंलेप्तुमीहसे ॥ १९ ॥ नागंचवाहनंहित्वाबलीवर्दंत्व मिच्छसि ॥ गांगंजलंपरित्यज्यकूपोदकंसमीहसे ॥ २० ॥ सूर्यंतेजःपरित्यज्यखद्योतद्युतिमिच्छसि ॥ चीनांशुकंवि हायैवचर्मांबरमुपाससे ॥ २१ ॥ गृहेवासंचवैदेवित्यक्त्वावनंसमीहसे ॥ करोषित्वंचदेवेशेनयुक्तंकर्तुमुद्यता ॥ २२ ॥ तथात्वंसर्वदेवानांहित्वाचसंनिधिंपुनः ॥ इच्छसित्वसुराणांचनयुक्तंक्रियतेत्वया ॥ २३ ॥ इंद्रादिलोकपालांश्चहित्वा शिवमनुव्रता ॥ नैतद्युक्तंहिलोकेषुविरुद्धंदृश्यतेऽधुना ॥ २४ ॥ क्वत्वंकमलपत्राक्षिक्वचाऽसौचत्रिलोचनः ॥ शशांक वदनात्वंचपंचवक्त्रःशिवःस्मृतः ॥ २५ ॥ कबर्याश्चैवतेरूपंवर्णितुंनैवशक्यते ॥ जटाजूटंशिवस्यैवप्रसिद्धंपरिचक्षते ॥ ॥ २६ ॥ चंदनंचत्वदीयेंऽगेचिताभस्मशिवस्यच ॥ क्वदुकूलंत्वदीयंवैगजाजिनमथाऽशुभम् ॥ २७ ॥ क्वांऽगदादीनि दिव्यानिक्वसर्पाःशंकरस्यच ॥ क्वचरादेवताःसर्वाःक्वचभूतावलिःप्रिये ॥ २८ ॥ ॥ छ ॥ ॥ छ ॥

रोधंदर्शयति ॥ क्वेत्यादिना ॥ अवयवकृतंवैलक्षण्यंप्रदर्श्यस्वरूपकृतंवैलक्षण्यंदर्शयति ॥ शशांकेति ॥ पंचवक्त्रःकरालवदनइतिभावः ॥ २५ ॥ कबर्या इति ॥ कबरीकेशवेशःतस्यारूपंकार्ष्ण्यमार्दवादि ॥ प्रसिद्धंभस्मधूसरत्वमालिन्यादिनाप्रसिद्धम् ॥ परिचक्षतेकथयंति ॥ जनाइतिशेषः ॥ २६ ॥ दुकूल मिति ॥ दुकूलंक्षुमावस्त्रम् ॥ क्षौमंदुकूलंस्यादित्यमरः ॥ गजाजिनंगजचर्मशिवस्येत्यध्याहारः ॥ अशुभमपवित्रम् ॥ २७ ॥ क्वांगदेति ॥ अंगदादीनि बाहुभूषणादीनितवेतिशेषः ॥ केयूरमंगदंतुल्येइत्यमरः ॥ दिव्यानुत्तमानि ॥ हेप्रियेसर्वादेवतास्तवचराःसेवकाः ॥ चरस्पशइत्यमरः ॥ भूतावलिःपिशा चपंक्तिः ॥ वीथ्यालिरावलिःपंक्तिरित्यमरः ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

डमरुःशिवस्यवाद्यविशेषः ॥ वाद्यप्रभेदाडमरुरित्यमरः ॥ भेरीदुंदुभिस्तत्कलापः ॥ शृंगीरवोवाद्यविशेषः ॥ २९ ॥ ढक्कमयःढक्कापटहः ॥ स्याद्यशःपटहोढक्केत्यमरः ॥ तत्प्रचुरःढक्कमयः ॥ तादात्म्यार्थेविकारार्थेप्राचुर्यार्थेमयट्त्रिधेत्युक्तेः ॥ गल्लनादोविलविलइत्याकारकः ॥ भवत्याइति ॥ नयुक्तरूपमीदृशमितिपाठःसाधीयान् ॥ तत्रईदृशंवैलक्षण्ययुक्तरूपमनुरूपंनेत्यर्थः ॥ ३० ॥ वपुरिति ॥ विरूपाक्षंविरूपंविलक्षणमसुंदरंवाऽक्षिनेत्रंयस्यतत्तथा ॥ कदाकदापीत्यर्थः ॥ दिगंबरोदिगेवांऽवरंवस्त्रंयस्यसः ॥ नग्नइत्यर्थः ॥ ३१ ॥ वरेष्विति ॥ गुणाविद्याकुलशीलादयः ॥ तत्रोक्तंयाज्ञवल्क्येन ॥ एतैरेवगुणैर्युक्तःसवर्णःश्रोत्रियोवरः ॥ यत्नात्परीक्षितःपुंस्त्वेयुवाधीमान्जनप्रियइति ॥ वाहनमिति ॥ बलीवर्दोवृषभः ॥ ब्राह्मणानांबलीवर्दवाहनस्यनिषेधा

क्वाऽसौमृदंगनादोवैक्वचापिडमरुस्तथा ॥ क्वचभेरीकलापश्चक्वचशृंगीरवोऽशुभः ॥ २९ ॥ क्वचढक्कमयःशब्दोगल्लनादःक्वचाऽपिहि ॥ भवत्याश्चशिवस्यैवनयुक्तंरूपमुत्तमम् ॥ ३० ॥ वपुश्चैवविरूपाक्षंजन्मनज्ञायतेकदा ॥ यदिधनंभवेत्तस्यकथंदिगंबरोभवेत् ॥ ३१ ॥ वरेषुयेगुणाःप्रोक्ताएकोऽपिनशिवेस्मृतः ॥ वाहनंचबलीवर्दोवसनंचर्मएवच ॥ ॥ ३२ ॥ यदिग्राहीभवेत्सोहिकथंचमदनंदहेत् ॥सहायास्तुपिशाचाश्चविषंकंठेविराजते ॥३३॥ अनादरस्तस्याद्दष्टोहित्वावनमुपागतः ॥ जातिर्नलभ्यतेतस्यविद्याज्ञानंनदृश्यते ॥ ३४ ॥ एकाकीचसदानित्यंविरागीचविशेषतः ॥ तस्मात्त्वंतुशिवेनैवमनोयोक्तुमिहार्हसि ॥ ३५ ॥ क्वचहारस्त्वदीयोवैक्वचवैरुंडमालिका ॥ सर्वंविरोधिरूपंचतववचैवशिवस्यच ॥ ३६ ॥ मह्यंनरोचतेदेवियदिच्छसितथाकरु ॥ समयाविदितोदेवःश्मशानेवासमीहते ॥ ३७ ॥ असद्वस्तुचयत्किंचित्तत्सर्वंसेवतेस्वयं ॥ निवर्त्तयमनस्तस्मान्नोचेद्गच्छेःसमीपतः ॥३८॥ इत्येतद्वचनंश्रुत्वापार्वतीक्रोधसंयुता ॥ उवाचक्रुध्यमानासाशिवनिंदापरंचतम् ॥ ३९ ॥ ॥ ॥ ॥ ॥

दितिभावः ॥ वसनमिति ॥ अत्रआयुधंचत्रिशूलकमितिपाठांतरम् ॥ ३२ ॥ ग्राहीसर्वसंमतः ॥ सोहीति ॥ सुलोपाभावआर्षः ॥ ३३ ॥ शिवोजनैःकृतंस्वतुच्छीकरणंदृष्ट्वावनेदुद्रावेत्याह ॥ अनादरइति ॥ ३४ ॥ भार्यात्वायतद्ग्रहणेशिवस्याऽयोग्यतांदर्शयति ॥ विरागीति ॥ ३५ ॥ आभरणवैरूप्यामिदानींदर्शयति ॥ क्वेतिमुंडमालिकेतिपाठांतरम् ॥ ३६ ॥ सइति ॥ सशिवःस्मशानेवासंवसितुमित्यर्थः ॥ ईहतंइच्छतीत्यतःसचाऽमंगलत्वास्पृश्यत्वादिनाविदितइतिभावः ॥ ३७ ॥ निवर्तयेति ॥ तस्माच्छिवात् ॥ ३८ ॥ ३९ ॥ ॥ ॥ ॥ ॥

एतावदिति ॥ अयंकश्चिद्धन्योज्ञानीभविष्यतीत्येतावत्कालपर्यंतंज्ञातमित्यर्थः ॥ त्वमबद्धोऽनभिज्ञोमूर्खइत्यर्थः ॥ ४० ॥ त्वयेति ॥ मयादेवोविदितःसर्वज्ञ
त्वेनज्ञातः ॥ त्वयोक्तंतच्छिववविषयवृत्तंत्वलीकमनृतमित्यन्वयः ॥ अथवादेवोऽमंगलत्वास्पृश्यत्वादिनाविदितइतियदुक्तंत्वयातदलीकमेवनाऽन्यथेतिसंबं
धः ॥ ४१ ॥ यदिकश्चिद्धौर्त्यशाठ्यादिगुणविशिष्टःपुरुषस्त्वयादृष्टःस्यात्तर्हिसशिवादन्यएवस्यादितिपार्वतीकथयतीत्याह ॥ यदिचेति ॥ उच्यतउच्येत॥
॥ ४२ ॥ ननुतर्हिशंकरःकीदृशःस्यादित्यतस्तत्स्वरूपंकथयतीत्याह ॥ शंकरस्येति ॥ ४३ ॥ शंकरस्यस्वरूपमाह ॥ वस्तुतइति ॥ वस्तुतोवस्तुगत्ये
त्यर्थः ॥ निर्गुणःसत्वादिगुणशून्यइत्यर्थः॥तथाचवृहदारण्यकश्रुतिः॥ अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसंगमरसमगं
धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनंतरमबाह्यंनतदश्नातिकिंचननतदश्नातिकिंचनइति ॥ कारणेनेति ॥ प्रयोजनमनुसृत्ये
त्यर्थः ॥ सगुणःगुणयुक्तः ॥ तथाचश्रुतिः ॥ सईक्षांचक्रे ॥ यतोवाइमानिभूतानिजायंतेइत्यादिः ॥ श्रीमद्भागवतेऽपि ॥ सत्वंरजस्त

पार्वत्युवाच ॥ एतावद्धिमयाज्ञातंकश्चिद्धन्योभविष्यति ॥ परंतुसकलंज्ञातमबद्धोदृश्यसेऽधुना ॥ ४० ॥ श्रूयतांवच
नंह्येतत्कथयामिक्रमेणच ॥ त्वयोक्तंविदितोदेवस्तदलीकंनचाऽन्यथा ॥ ४१ ॥ यदिचविदितःस्याद्वैविरुद्धंनोच्यतेत्व
या ॥ कश्चिद्दृष्टःप्रदृश्येतवेषधारीनसंशयः ॥ ४२ ॥ ब्रह्मचारिस्वरूपेणकश्चिद्धूर्तःसमागतः ॥ शंकरस्यस्वरूपंतुप्र
वक्ष्यामिशृणुष्वतत् ॥ ४३ ॥ वस्तुतोनिर्गुणःसाक्षात्सगुणःकारणेनच ॥ कुतोजातिर्भवेत्तस्यनिर्गुणस्यगुणात्मनः ॥
॥ ४४ ॥ सर्वासामपिविद्यानामधिष्ठानंसदाशिवः ॥ उच्छ्वासरूपिणोवेदादत्तास्तुविष्णवेपुरा ॥ ४५ ॥ किंतस्यवि
द्ययाकार्यंपूर्णस्यपरमात्मनः ॥ सर्वेषांचादिभूतस्यवयोमानंकुतःस्मृतम् ॥ ४६ ॥ प्रकृतिस्तुततोजाताकिंशक्तेस्त
स्यकारणम् ॥ योवैभजतिनित्यंतंतस्यशक्तित्रयंसदा ॥ ४७ ॥ ॥ ॥ ॥

मइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्तइति ॥ निर्गुणत्वेनजातिरपिनास्तीत्याह ॥ कुतइति ॥ गुणात्मनोगुणस्वरूपस्येत्यर्थः ॥ ४४ ॥
शिवस्यसकलविद्याधिष्ठानत्वमेवकथयति ॥ उच्छ्वासेति ॥ उच्छ्वासरूपिणउच्छ्वासोत्पन्नाः ॥ अस्यमहतोभूतयोनेःसमुच्छ्वसितंऋग्वेदोयजुर्वेदः
सामवेदोऽथर्ववेदश्चेतिश्रुतेः ॥ यस्यनिश्वसितंवेदाइतिच ॥ ४५ ॥ अनादित्वेनवयोमानमपिनास्तीत्याह ॥ सर्वेषामिति ॥ आदिभूतस्यपुरातनस्ये
त्यर्थः ॥ ४६ ॥ सर्वजगत्कारणीभूतासर्वशक्त्यात्मिकाचप्रकृतिरपितस्मादेवोत्पन्नेत्याह ॥ प्रकृतिरिति ॥ कारणंप्रयोजनम् ॥ शिवभजनादपिसर्ववशीभ
वतीत्याह ॥ यइति ॥ शक्तित्रयंप्रभावजोत्साहजमंत्रजप्रभेदेन ॥ शक्तयस्तिस्रःप्रभावोत्साहमंत्रजाइत्यमरः ॥ प्राप्नोतीतिशेषः ॥ ४७ ॥

॥ ४८ ॥ पूजाफलमाह ॥ यस्येति ॥ ४९ ॥ देवराडिंद्रःशिवस्यदर्शनार्थंयदाऽऽगच्छेत्तदातत्रत्याद्वारपालाः ॥ येस्युस्तैःस्वदंडैःकाष्ठैर्विद्धंताडितमिंद्रस्यमुकुटं खंडंखंडंचूर्णीभूतंसद्भुविभूप्रदेशेव्रजेदपगच्छेदितिसमुदितान्वयः ॥ ५० ॥ ५१ ॥ कल्याणेति ॥ तस्यसेवयाकिंन्यूनंभवेदपितुनकिंचिदपीत्यग्रिमेणान्वयः ॥ ५२ ॥तत्सेवनेनलक्ष्मीप्राप्तिरपिभवतीत्याह सप्तेति ॥ ५३ ॥ नित्यत्वृतस्यशिवस्याग्रेष्टौसिद्धयोदासीवत्तिष्ठंतीत्याह ॥ यदिति ॥ ५४ ॥ अवाङ्मुखालज्जयाऽधोमुखाइतिसिद्धिविशेषणं ॥ अमंगलानिरुंडमालास्मशानादीनि ॥ ५५ ॥ शिवनामस्मरणमाहात्म्यंदर्शयति ॥ शिवेतीति ॥ तदु

यस्यैवभजनाल्लोकोमृत्युंजयतिनिश्चितम् ॥ तस्मान्मृत्युंजयंनामप्रसिद्धंजगतीतले ॥ ४८ ॥ यस्यपूजाप्रभावेन आरोग्यंजायतेनृणाम् ॥ तस्यारोग्यंकुतोऽपीहभविष्यतिसुदुर्मते ॥ ४९ ॥ तस्यैवपक्षपातेनदेवादेवत्वमागताः ॥ दर्शनार्थंशिवस्यैवयदागच्छतिदेवराट् ॥ ५० ॥ तदाभूताःपिशाचाश्चद्वारपालाःशिवस्यच ॥ दंडैश्चमुकुटंविद्धंखंडंखंडंव्रजेद्भुवि ॥ ५१ ॥ किंतस्यबहुपक्षेणस्वयमेवप्रभुःसदा ॥ कल्याणरूपिणस्तस्यसेवयाकिंभवेदिह ॥ ५२ ॥ किंन्यूनंदेवदेवस्यमामिच्छतिसदाशिवः ॥ सप्तजन्मदरिद्रःस्यात्सेवतेयदिशंकरम् ॥ ५३ ॥ तस्यैवदुर्लभालोकेलक्ष्मीःस्यादनपायिनी ॥ यदग्रेसिद्धयोऽष्टौचनृत्यंतिप्रतिवासरम् ॥५४॥ अवाङ्मुखःसदातत्रकुतोवित्तंसुदुर्लभम् ॥ यद्यप्यमंगलानीहसेवतेशंकरःसदा ॥ ५५ ॥ तथाऽपिमंगलंतस्यस्मरणादेवजायते ॥ शिवेतिमंगलंनाममुखेयस्य निरंतरम् ॥ ५६ ॥ तस्यैवदर्शनादन्येपवित्राःसंतिनित्यशः ॥ यद्यपूतंभवेद्भस्मचितायाश्चलयोदितम् ॥ ५७ ॥ नृत्यस्याऽपगमेदेवैःशिरोभिर्धार्यतेकथम् ॥ यश्चैवजगतश्चाऽदिर्जगतश्चेश्वरोमतः ॥ ५८ ॥ जगत्संहारकर्त्ताचसज्ञेयोवैकथंभवेत् ॥ अगम्यंब्रह्मणोरूपंशिवस्यपरमात्मनः ॥ ५९ ॥ ॥ छ ॥ ॥ छ ॥

क्तंमध्वमतानुयायिनानारायणपंडिताचार्येणशिवस्तुतौ ॥ निवासनिलयश्चितातवशिरस्ततिर्मालिकाकपालमपितेकरेत्वमशिवोस्यनंतार्धियां ॥ तथापिभवतःपदंशिवशिवेत्यदोजल्पतामकिंचननकिंचनवृजिनमस्त्यभस्मीभवादिति ॥ ५६ ॥ चिताभस्मनोपिपवित्रत्वंतर्केणद्रढयति ॥ यदीति ॥ अपूतमपवित्रं ॥ ॥ ५७ ॥ अपगमेऽवसाने ॥ उत्पत्तिस्थितिलयकर्तृत्वेनशिवस्याज्ञेयत्वंकथयति ॥ यश्चेत्यादिना ॥ आदिरुत्पत्तिकारणं ॥ ईश्वरोनियामकः ॥ एतेनस्थितिकर्तृत्वंसूचितं ॥ ५८ ॥ अगम्यमिति ॥ अगम्यंज्ञानाविषयमित्यर्थः ॥ ५९ ॥ ॥ ॥ ॥ ॥

कथमिति ॥ त्वादृशास्त्वत्सदृशावाहिर्मुखाःशिवतत्वानभिज्ञाइत्यर्थः ॥ तत्वंशिवतत्वम् ॥ तत्वस्वरूपमुक्तंश्रीमद्भागवते ॥ वदंतितत्तत्वबिदस्तत्वंयज्ज्ञानमद्द यम् ॥ ब्रह्मेतिपरमात्मेतिभगवानितिशब्धतइति ॥ कथंविजानंति ॥ अपितुनजानंत्येवेत्यर्थः ॥ अनभिज्ञत्वेकारणमाह ॥ दुराचाराइति ॥ विनिर्गतावहिष्कृताइत्यर्थः॥ क्वचित्तथैवपाठः॥ ६० ॥ अज्ञानतःकृतयापिशिवनिंदयापुण्यनाशोभवतीत्याह ॥ शिवनिंदामिति ॥ अज्ञायेति ॥ ल्यबार्षः॥ ६१ ॥ संचितंसंपादितम् ॥ ६२ ॥ निंदकपूजांकर्तुरपिपापमुत्पद्यतइत्याह ॥ त्वत्पूजेति ॥ शिवद्वेषिणोदर्शनमपिनकर्तव्यामित्याह ॥ शिवविद्वेषिणमिति ॥ ६३ ॥ रेरेइतिकठि

कथंतत्त्वंविजानंतित्वादृशाहिबहिर्मुखाः ॥ दुराचाराश्चपापाश्चवेदेभ्यस्तेबहिष्कृताः ॥६०॥ तत्त्वंनैतेविजानंतिशिवस्याऽगुणरूपिणः ॥ शिवनिंदांकरोतीहतत्त्वमज्ञाययःपुमान् ॥ ६१ ॥ आजन्मसंचितंपुण्यंतस्माद्भस्मीभविष्यति ॥ त्वयानिंदाकृताह्यत्रहरस्यामिततेजसः ॥ ६२ ॥त्वत्पूजाचकृतायस्मात्तस्मात्पापंभजाम्यहम् ॥ शिवविद्वेषिणंदृष्ट्वासचैलंस्नानमाचरेत् ॥ ६३ ॥ रेरेदुष्टत्वयाप्रोक्तंजानामिचमहेश्वरम् ॥ निश्चयेनैवनज्ञातःशिवएवसनातनः ॥ ६४ ॥ यथातथाभवेत्सोवैममाऽभीष्टतमोमतः ॥ पुनर्वचनमादातुंप्रक्रमेतावदेवहि ॥ ६५ ॥ उवाचगिरिजादेवीसर्वांदुष्टमनाह्यसौ ॥ वारणीयःप्रयत्नेनशिवनिंदांकरिष्यति ॥ ६६ ॥ नकेवलंभजेत्पापंनिंदाकर्ताशिवस्यच ॥ योवैशृणोतितांनिंदांपापभाक्सभवेदिह ॥ ६७ ॥ अयंदुष्टःपुनर्निंदांकरिष्यतिशिवस्यच ॥ स्थलमेतत्तथाहिलायास्यामोऽन्यत्रमाचिरम् ॥ ६८ ॥ इत्युक्त्वाचलनायाऽसौपदमुत्क्षिपतेयदा ॥ तदाऽसौचशिवःसाक्षादाललंबेप्रियांस्वयम् ॥ ६९ ॥

नामंत्रणे ॥ निश्चयेनेति ॥ नज्ञातस्त्वयेतिशेषः ॥ ६४ ॥ त्वदनभिमतोऽपिशिवोममाऽभिमतइत्याह ॥ यथातथेति ॥ जातिविद्याशीलादिशून्योऽस्त्वित्यर्थः ॥ प्रक्रमेउपक्रमे ॥ तुभ्यंपुनर्वचनमुत्तरमादातुंतावदेवममाभीष्टतमोमतइत्युत्तरमेववरंनान्यदितिभावः ॥ प्रक्रमइत्यत्रप्रकृतइतिपाठांतरम् ॥ ६५ ॥ किमित्युवाचेत्यतआह ॥ दुष्टेति ॥ दुष्टमनादुष्टंमनोयस्यसोऽसौजटिलोवारणीयोनिवारणीयः ॥ ६६ ॥ नकेवलंशिवनिंदांकर्तुरेवाऽपितुश्रोतुरपिदोषमाह ॥ नकेवलमिति ॥ ६७ ॥ अतःशिवनिंदायाःश्रोतुमनर्हत्वेमाऽन्यत्राऽहंगच्छामीत्याह ॥ स्थलमिति ॥ माचिरंशीघ्रमित्यर्थः ॥ ६८ ॥ इतीति ॥ असौपार्वतीतिपूर्वोक्तप्रकारेणोक्त्वाचलनायगमनाययदापदंपादमुत्क्षिपतेतदाऽसौशिवःस्वयंसाक्षात्प्रियांपार्वतीमालंलंबेप्रत्यक्षोऽभूदितिभावः ॥ ६९ ॥

स्वीयंरूपंसगुणमित्यर्थः ॥ दर्शयित्वेति ॥ अवाङ्मुखीमधोमुखीम् ॥ लज्जयेतिभावः ॥ ७० ॥ ब्रूहियाचेत्यर्थः ॥ तवतुभ्यमदेयंमयेतिशेषः नविद्यते ॥ यद्यत्त्वयायाच्यतेतत्सर्वंमयादेयमेवेतिभावः ॥ ७१ ॥ भक्तवश्यत्वंदर्शयति ॥ अद्यप्रभृतीति ॥ तेतवदासोऽहंप्रेमनिर्भरैःप्रेमातिशयवद्भिस्तपोभिःक्रीतोऽस्मीत्यन्वयः ॥ तवेति ॥ सौंदर्यात्सौंदर्यंदृष्ट्वेत्यर्थः ॥ ल्यब्लोपेपंचमी ॥ एकंक्षणंयुगायतेयुगवदाचरति ॥ क्षणमितिनपुंसकत्वमार्षम् ॥ ७२ ॥ इतीति ॥ देवदेवेनशिवेत्युक्तेसतिपार्वतीपूर्वंतस्यतपसोजातंयद्दुःखंगतंप्राप्तंतज्जहौतत्याजेतिसमुदितान्वयः ॥ ७३ ॥ ननुक्लेशक्लिष्टतपोजनितंदुःखंकथंजहाविल्याशंकायांलोकानुभवमाह फलइति फलेकार्येजातेसिद्धेसतिपूर्वंजातःफलप्रयोजकश्रमोनश्यति ॥ सफलश्रमस्यदुःखानापादकत्वादितिभावः ॥ ७४ ॥

कृत्वास्वीयंस्वरूपंचयथाध्यातंतयातथा ॥ दर्शयित्वापुनस्तांचह्युवाचाऽवाङ्मुखींशिवाम् ॥ ७० ॥ कुत्रयास्यसिमांहित्वानत्वंत्याज्यामयापुनः ॥ प्रसन्नोऽस्मिवरंब्रूहिनाऽदेयंविद्यतेतव ॥ ७१ ॥ अद्यप्रभृतितेदासस्तपोभिःप्रेमनिर्भरैः ॥ क्रीतोऽस्मितवसौंदर्यात्क्षणमेकंयुगायते ॥ ७२ ॥ त्यज्यतांचत्वयालज्जाएहियामोगृहंमम ॥ इत्युक्तेदेवदेवेनजहौदुःखंपुरातनम् ॥ ७३ ॥ तपसश्चैवयज्जातंमहद्दुःखंगतंतदा ॥ फलेजातेश्रमःपूर्वंजातोनाशमवाप्नुयात् ॥ ७४ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपार्वतीवरप्रदानंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ऋषयऊचुः ॥ व्यासशिष्यमहाभागततोजातंचयत्पुनः ॥ तत्सर्वंकथयत्वंहिकथांलोकमलापहां ॥ १ ॥ सूतउवाच ॥ मुनयःश्रूयतांसम्यक्कथयामिकथांमुदा ॥ पार्वतीवचनंश्रुत्वाहरस्यपरमात्मनः ॥ २ ॥ उवाचव्रीडितादेवीवचःस्मृत्वापुरातनम् ॥ सखीमुखेनसातत्रशिवंसम्यग्व्यवस्थितम् ॥ ३ ॥ एहियामोगृहेदेविकथंचैवंविलंबसे ॥ एवंब्रुवंतंतंदेवंपार्वतीवचनात्सखी ॥ ४ ॥

इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपार्वतीवरप्रदानंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ॐनमःशिवाय ॥ पार्वत्यासाकमुद्वाहेदेवादीनाह्वयच्छिवः ॥ नारदेनोत्सवेपंचदशेत्रैतत्प्रवर्ण्यते ॥ १ ॥ व्यासशिष्येति ॥ लोकमलापहांलोकानांजनानांपापापहारिणीम् ॥ १ ॥ मुदाहर्षेण नतुबलात्कारेणेत्यर्थः ॥ २ ॥ पार्वतीति ॥ व्रीडितालज्जिता सम्यग्व्यवस्थितंविवाहसन्नद्धंसखीमुखेनसखीद्वाराशिवमुवाचेत्यन्वयः ॥ ३ ॥ तदेवस्पष्टार्थंपुनरनुवदति ॥ एहीति ॥ एहियामोगृहइत्यादिब्रुवंतंतंदेवंशिवंप्रतिसखीपार्वतीवचनात्पार्वतीवचनमनुरुध्येत्यर्थः ॥ ल्यब्लोपेपंचमी ॥ उवाचेतिशेषः ॥ ४ ॥

किमुवाचेतितदाह ॥ यदीति ॥ ५ ॥ प्रसिद्धैरिति ॥ प्रसिद्धैर्लोकप्रसिद्धैःपुरुषैर्यद्द्यथाविवाहःक्रियतेतथासकर्तव्यइत्यर्थः ॥ अत्रप्रसिद्धइतिपाठांतरम् ॥ ६ ॥
॥ ७ ॥ रीतिःसंप्रदायः ॥ कृतमिति ॥ ममपुत्र्यापार्वत्याशुभंतपसाशिववरणरूपंकार्यंसम्यक्कृतमितिहिमवानपिममपितापिजानातिजानीयादित्यर्थः ॥ ८ ॥
॥ ९ ॥ इतीति ॥ काशींवाराणसीम् ॥ सप्तर्षीन्वसिष्ठादीन्विरहाविष्टमानसःपार्वतीवियोगव्यापृतांतःकरणःसन्सस्मारस्मृतवानित्यर्थः ॥ १० ॥ पा
र्वत्यपीति ॥ अपिशब्दोविभिन्नप्रस्तावंदर्शयति ॥ कृत्वामत्वेत्यर्थः ॥ विरहकातराशिववियोगव्यापृतांतःकरणासतीपितुर्हिमालयस्यधामगृहंजगामेत्य

सख्युवाच ॥ यदिप्रसन्नोदेवेशकरोषिचकृपांयदि ॥ तदेवंचत्वयाकार्यंकृपांकृत्वाममोपरि ॥ ५ ॥ पितुर्गृहेमयासम्य
ग्गम्यतेत्वदनुज्ञया ॥ प्रसिद्धैःक्रियतेयद्वद्विवाहःपरमःशुभः ॥ ६ ॥ तथाचैवत्वयाकार्यंलोकेषुख्यापयन्यशः ॥ पितु
र्मेसफलंसर्वंकुरुष्वेहगृहाश्रमम् ॥ ७ ॥ विवाहस्ययथारीतिःकर्तव्यंतत्तथाध्रुवम् ॥ जानातिहिमवान्सम्यक्कृतंपुत्र्या
शुभंमम ॥ ८ ॥ इत्येवंवचनंश्रुत्वाशिवोऽपिचाशिवांतदा ॥ उवाचवचनंत्वंचयदिच्छसितथेतितत् ॥ ९ ॥ इत्युक्त्वांत
र्दधेशंभुर्गत्वाकाशींविचारयन् ॥ सस्मारचऋषीन्सप्तविरहाविष्टमानसः ॥ १० ॥ पार्वत्यपिसखीयुक्तारूपंकृत्वातु
सार्थकम् ॥ जगामचस्वकंधामपितुर्विरहकातरा ॥ ११ ॥ पिताचैवतथामातासख्यश्चैवाऽप्यनेकशः ॥ संबंधिनस्त
थाचाऽन्येसंमुखाःसंययुस्तदा ॥ १२ ॥ जयेतिचब्रुवंतस्तेदृढालिंगनमादधुः ॥ साधितंतुत्वयासम्यक्पाविताःस्मो
वयंत्वया ॥ १३ ॥ चंदनैःपुष्पवर्यैश्चपूजयित्वाशिवांमुदा ॥ गृहंप्रवेशयामासुर्बहुमानपुरःसरम् ॥ १४ ॥ आश्रमंस
फलंमेनेकुपुत्रात्पुत्रिकावरा ॥ हिमवान्नारदंतत्रप्रस्तुवन्साधुसाध्विति ॥ १५ ॥ ऋषयश्चैवतेसर्वेशंभुनाचस्मृताय
दा ॥ तदाजग्मुःस्वयंसर्वेकल्पवृक्षाइवाऽपरे ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥

न्वयः ॥ ११ ॥ तदानींहिमालयादयःसंबंधिजनाःपार्वत्याःसंतोषार्थंसंमुखाआगच्छन्नित्याह ॥ पितेति ॥ १२ ॥ आदधुरकुर्वन्नित्यर्थः ॥ पाविताःपवित्री
कृताः ॥ १३ ॥ संबंधिजनाःपार्वतींगृहंप्रवेशयामासुरित्याह ॥ गृहमिति ॥ १४ ॥ आश्रममिति ॥ कुपुत्रात्कुत्सितपुत्रमपेक्ष्यपुत्रिकावराश्रेष्ठेति ॥ स्व
पुत्रींपार्वतींप्रस्तुवन्हिमाचलआश्रमंसफलंमेनेइत्यन्वयः ॥ १५ ॥ ऋषयइति ॥ चशब्दोभिन्नप्रस्तावंदर्शयति ॥ जग्मुरिति ॥ शिवमितिशेषः ॥ क
ल्पवृक्षाइवेत्यनेनस्मृतिमात्रेणर्षीणामभीष्टफलप्रदत्वंसूचितम् ॥ १६ ॥ ॥ ॥ ॥ ॥

ब्रह्मेति ॥ परमात्मानंवेदंवागृणंतोध्यायंतःपठंतोवा ॥ १७ ॥ यासाक्षात्सिद्धिरिवासीत्तयाऽरुंधत्यावसिष्ठपत्न्यायुक्तात्यर्थः ॥ सूर्यसंकाशान्सूर्यसदृशान् ॥ निभसंकाशनीकाशप्रतीकाशोपमादयइत्यमरः ॥ १८ ॥ १९ ॥ पुरतःशिवप्रत्यक्षेपि तस्यनिर्गुणत्वेनाऽगम्यत्वात्स्वप्नमायावदेवनेत्राभ्यांतद्दर्शनमृषयोमेनिरइत्याह ॥ सत्यमिति ॥ २० ॥ २१ ॥ नमइति ॥ अमिततेजसेऽपरिमितमहिम्नेकपर्दिने कपर्दोजटाजूटःसोऽस्यास्तीतितस्मै ॥ कपर्दोऽस्यजटाजूटइत्यमरः ॥ २२ ॥ हिरण्यबाहवेहिरण्यवत्सुवर्णवद्देदीप्यमानौबाहूभुजौयस्यतस्मै ॥ नमोहिरण्यबाहवइतिश्रुतेः ॥ व्यापकायाऽहंकाराभिमानितयासूक्ष्मस्वरूपेणसर्वा

परंब्रह्मगृणंतश्चहेमवल्कलधारिणः ॥ मुक्ताफलैर्विचित्रैश्चभूषिताभूषणैःपरैः ॥ १७ ॥ अरुंधत्यातयायुक्ताःसाक्षात्सिद्धिरिवाऽपरा ॥ यान्दृष्ट्वासूर्यसंकाशान्जहौलज्जांहरःस्वयम् ॥ १८ ॥ स्थिताऽग्रेऋषयःश्रेष्ठानमस्कृत्यशिवंमुदा ॥ मेनिरेचतदात्मानंकृतार्थंयेतपस्विनः ॥ १९ ॥ सत्यंवास्वप्नमायावानेत्राभ्यांदृश्यतेयथा ॥ वयंक्वदर्शनंचाद्यशिवस्यदुर्लभंकुतः ॥ २० ॥ इतिविस्मयमापन्नानमस्कृत्यस्थिताःपुरः ॥ प्रोचुःप्रांजलयस्तेवैशिवंलोकमलापहम् ॥ २१ ॥ ऋषयऊचुः ॥ नमस्तुभ्यंभगवतेशिवायामिततेजसे ॥ कपर्दिनेनमस्तुभ्यंपंचवक्त्रायतेनमः ॥ २२ ॥ हिरण्यबाहवेतुभ्यंशितिकंठायतेनमः ॥ व्यापकायनमस्तुभ्यंव्याप्यरूपायतेनमः ॥ २३ ॥ परायपररूपायसर्वोत्कृष्टायतेनमः ॥ शिवायशिवरूपायप्रणवायनमोनमः ॥ २४ ॥ इत्येवंचस्तुवंतस्तेपुनरूचुःपरात्मने ॥ सर्वोत्कृष्टमहाराजसर्वानुग्रहकारक ॥ २५ ॥ भाग्यंकिंवर्ण्यतेऽस्माभिःस्वीयंकिंतुपुनःपुनः ॥ तपस्तप्तंत्रिधापूर्वंवेदाध्ययनमुत्तमम् ॥ २६ ॥ अग्नयश्चहुताःपूर्वंयज्ञाश्चविविधाःकृताः ॥ तपांसिचविचित्राणिपर्वण्यपिविशेषतः ॥ २७ ॥ दानानिचतथापूर्वंतीर्थानिविविधानिच ॥ वाङ्मनःकायजंकिंचित्पुण्यंस्मरणसंभवम् ॥ २८ ॥ ॥ ॥

तर्यामिणइत्यर्थः ॥ व्याप्यायमहीयस्त्वेनस्थूलस्वरूपायेत्यर्थः ॥ अणोरणीयान्महतोमहीयानितिश्रुतेः ॥ २३ ॥ प्रणवायोंकारशब्दवाच्यायेत्यर्थः ॥ प्रणवायनमोस्तुतेइतिपाठांतरम् ॥ २४ ॥ किंपुनरूचुरित्याकांक्षायामृषयःस्वकीयंपुण्यंशिवदर्शनेनाऽभूतपूर्वंभावीतिमेनिरइत्याह ॥ सर्वोत्कृष्टेति ॥ हे सर्वोत्कृष्टशिव ॥ २५ ॥ त्रैविध्यमेवाह ॥ वेदाध्ययनमिति ॥ २६ ॥ अग्नयऔपासनादयः ॥ तृतीयांविधामाह ॥ यज्ञाश्चेति ॥ ज्योतिष्टोमादयइत्यर्थः ॥ पर्वणिदर्शादौ ॥ २७ ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यज्ञादिसंपादितंसर्वपुण्यंत्वद्दर्शनेनसफलंजातमित्याहुरित्याह ॥ तत्सर्वमिति ॥ संगतंसफलमित्यर्थः ॥ भजतीति ॥ स्मरतीतिपाठांतरम् ॥ २९ ॥ कि मिति ॥ त्वयायेषाम् ॥ कर्मणिषष्ठी ॥ स्मरणंकृतंतेषांनोभाग्यंकिंवर्ण्यते महाभाग्यशालिनोवयमित्यर्थः ॥ सर्वोत्कृष्टाःश्रेष्ठावयमितिशेषः ॥३०॥ योगि नामपिध्यानेनागम्यस्यतवसाक्षाद्दर्शनमेतत्कथमस्माकंस्यादित्याहुरित्याह ॥ मनोरथेति ॥ तथापिकाकतालीयन्यायेनत्वद्दर्शनमस्माकमभूदितिदृष्टांतमु खेनाह ॥ वामनस्येति ॥ ऱ्हस्वपुरुषस्येत्यर्थः ॥ फलंवृक्षवृत्तिविप्रकृष्टफलंदुर्लभमित्यग्रिमेणान्वयः ॥ एवंचक्षुरादिष्वपिदुर्लभपदस्यालिंगवचनविपरिण तस्यान्वयोबोध्यः ॥ ३१ ॥ वाचालत्वंवाक्पटुत्वम् ॥ स्याज्जल्पाकस्तुवाचालइत्यमरः ॥ निधिर्निक्षेपस्तद्दर्शनम् ॥ गिरिपरावृत्तिःपर्वतोल्लंघनंवंध्यस्यपु

तत्सर्वंसंगतंचाऽद्यस्मरणानुग्रहस्तव ॥ योवैभजतिनित्यंत्वांकृतकृत्योभवेन्नरः ॥ २९ ॥ किंभाग्यंवर्ण्यतेतेषांयेषांनः स्मरणंत्वया ॥ सर्वोत्कृष्टास्तथाजाताःस्मरणात्तेसदाशिव ॥ ३० ॥ मनोरथपथंनैवगच्छसित्वंवयंकुतः ॥ वामनस्य फलंयद्वज्जन्मांधस्यचचक्षुषी ॥३१॥ वाचालत्वंचमूकस्यदरिद्रेनिधिदर्शनम् ॥ पंगोर्गिरिपरावृत्तिर्वंध्यस्यपुत्रकास्तथा ॥ ३२ ॥ दर्शनंभवतोह्येवंजातंचदुर्लभंप्रभो ॥ अद्यप्रभृतिलोकेषुमान्याःपूज्यामुनीश्वराः ॥ ३३ ॥ जातास्तेनुग्रहा देवउच्चैःपदमुपाश्रिताः ॥ अत्रकिंबहुनोक्तेनमान्यपात्रंवयंगताः ॥ ३४ ॥ पूर्णानांकिंचकर्त्तव्यमस्तिचेत्परमाकृपा॥ सदृशंसेवकानांतुदेयंकार्यंशुभंत्वया ॥ ३५ ॥ इत्येवंवचनंतेषांश्रुत्वावाक्यमुपाददे ॥ शिवउवाच ॥ ऋषयश्चसदापू ज्याःकारणात्स्मरणंकृतं ॥ ३६ ॥ ममाऽवस्थाभवद्भिश्चज्ञायंतेह्युपकारिकाः ॥ देवानांदुःखमुत्पन्नंतारकात्सुदुरात्म नः ॥ ३७ ॥ ब्रह्मणाचवरोदत्तःकिंकरोमिदुरासदः ॥ मूर्तयोऽष्टौचयाःप्रोक्तामदीयाःपरमर्षयः ॥ ३८ ॥ ताःसर्वाउप कारार्थंनतुस्वार्थमितिस्फुटम् ॥ तथाचकर्त्तुकामोऽहंविवाहंशिवयासह ॥ ३९ ॥ ॥ ॥

त्रशून्यस्य ॥ ३२ ॥ दार्ष्टांतिकंप्रपंचयति ॥ दर्शनमिति ॥ ३३ ॥ उच्चैःपदमुन्नतप्रतिष्ठामित्यर्थः ॥ मान्यपात्रंमान्यश्चासौपात्रंचतत् ॥ भावप्रधानोनि र्देशः ॥ मान्यत्वंपात्रत्वंचेत्यर्थः ॥ ३४ ॥ सदृशमिति ॥ सेवकानांनःसदृशंयोग्यतानुरूपंकार्यंदेयमाज्ञापनीयमित्यर्थः ॥ ३५ ॥ उपाददेउवाचेत्यर्थः ॥ कार णात्प्रयोजनायेत्यर्थः ॥ ३६ ॥ अवस्थाअष्टौमूर्तयः ॥ अवतारप्रयोजनप्रदर्शनायपूर्ववृत्तांतंकथयति ॥ देवानामिति ॥ ३७ ॥ मूर्तयइति ॥ मूर्त्यष्टकंच मध्वमतानुसारिनारायणपंडिताचार्येणशिवस्तुतावुक्तम् ॥ रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषुनिविष्टमित्यजभजामिमूर्त्यष्टकमिति ॥३८॥३९॥

परमर्षिभिः ऋषिश्रेष्ठैरपिदुष्करंकर्तुमशक्यम् ॥ ४० ॥ तत्पत्नींहिमालयपत्नीम् ॥ ४१ ॥ उद्वाहंविवाहम् ॥ ४२ ॥ पुत्रीअर्थाद्धिमालयस्य ॥ यापार्वतीतिप्र सिद्धनाम्न्यस्तितांप्रार्थनीयोयाचनीयइत्यन्वयः ॥ ४३ ॥ भवद्भिरिति ॥ अविकल्पकोविकल्पशून्योविधिर्विवाहविधिः ॥ ४४ ॥ अमलाशयाःशुद्धमन स्काइत्यर्थः ॥ छंदोभिप्रायआशयइत्यमरः ॥ ४५ ॥ अनुग्रहीकृताःअनुग्रहोयेष्वस्तीत्यनुग्रहिणस्तत्त्वेनसंपद्यमानास्तथा ॥ च्व्यंतविग्रहः ॥ ४६ ॥

तयाऽपिचतपस्तप्तंदुष्करंपरमर्षिभिः ॥ तस्याःफलंवरंदेयमभीष्टंतद्धितावहम् ॥ ४० ॥ तस्माद्भवंतोगच्छंतुहिमाच लगृहंध्रुवम् ॥ तत्रगत्वाहितंचैतत्तत्पत्नींतुपुनस्तथा ॥ ४१ ॥ कथनीयंप्रयत्नेनयथास्यात्कार्यमुत्तमम् ॥ उद्वाहंकर्तु मिच्छामितत्पुत्र्यासहसत्तमाः ॥ ४२ ॥ हिमाचलगृहेपुत्रीपार्वतीचगुणान्विता ॥ अस्मदर्थेचतांतत्रप्रार्थनीयोहिमा लयः ॥ ४३ ॥ तंतथाचप्रवक्तव्यंदेवानांचहितंयथा ॥ भवद्भिःकल्पितोयोवैविधिःस्यादविकल्पकः ॥ ४४ ॥ भवतां नैवकथ्येतभवंतःकार्यभाजिनः ॥ इत्येवंवचनंश्रुत्वामुनयस्तेऽमलाशयाः ॥ ४५ ॥ आनंदंलेभिरेसर्वेप्रभुणाऽनुग्रही कृताः ॥ वयंधन्यामहांतश्चकृतकृत्यास्तथापुनः ॥ ४६ ॥ ब्रह्मणाविष्णुनायोवैवंद्यःसर्वार्थसाधकः ॥ सोऽस्मान्संप्रे रयत्येषकार्येलोकसुखावहे ॥ ४७ ॥ अयंवैजगतःस्वामीसोमाऽपिजननीमता ॥ अयंयुक्तश्चसंबंधोवर्धतांचंद्रवत्स दा ॥ ४८ ॥ इत्युक्त्वाऋषयोदिव्यानमस्कृत्यशिवंमुदा ॥ गताश्चाकाशमार्गेणयत्रस्याद्धिमवत्पुरम् ॥ ४९ ॥ चिंतयं तश्चतेचात्रकिंपुण्यंवैभविष्यति ॥ यस्मादेवंविधेकार्येशिवेनविनियोजिताः ॥ ५० ॥ दृष्ट्वातत्परमंदिव्यंऋषयस्तेऽ तिविस्मिताः ॥ ऊचुःपरस्परंसर्वेकिमेतदितिसस्फुटम् ॥ ५१ ॥ अलकायाश्चस्वर्ग्यायाभोगवत्यास्तथापुनः ॥ विशे षोऽत्रामरावत्यादृश्यतेऋषिसत्तमाः ॥ ५२ ॥ ॥ ॥ ॥ ॥

ब्रह्मणेति ॥ यःशिवः ॥ ४७ ॥ उमापार्वती ॥ चंद्रवद्वितीयाचंद्रवदित्यर्थः ॥ ४८ ॥ ४९ ॥ पुण्यंस्वकीयंचिंतयंतोविचारयंतइत्यर्थः ॥ ५० ॥ दृष्ट्वे ति ॥ तद्धिमवत्पुरम् ॥ ऊचुरिति ॥ किमितिवितर्के ॥ अनिर्वाच्यमित्यर्थः ॥ ५१ ॥ सर्वनगर्यपेक्षयाहिमवत्पुरस्यवैशिष्ट्यंकथयति ॥ अलकायाइत्यादि ना ॥ अलकायाःकुबेरपुर्याः ॥ भोगवत्याःशेषपुर्याः ॥ स्वर्ग्यायाःस्वर्गस्थायाअमरावत्याइंद्रपुर्याःअत्रहिमालयपुरेविशेषोदृश्यतइत्यर्थः ॥ ५२ ॥

अंगणान्यजिराणि ॥ अंगणंचत्वराजिरेइत्यमरः ॥ ५३ ॥ गृहइति ॥ स्वर्गसमुद्भवाःकल्पवृक्षाइवेत्यर्थः ॥ लुप्तोपमेयम् ॥ ५४ ॥ तोरणानांबहिर्द्वाराणाम् ॥ तोरणोऽस्त्रीबहिर्द्वारमित्यमरः ॥ चित्राण्यालेख्यानिशुभ्रहंसालिखितायेषुतानितैर्विमानकैर्लिखितैर्विचित्राणीत्यर्थः ॥ ५५ ॥ वितानानिउल्लोचाः ॥ अस्त्रीवितानमुल्लोचोदूष्याद्यंवस्त्रवेश्मनीत्यमरः ॥ चैलंवस्त्रम्॥वस्त्रमाच्छादनंवासश्चैलमित्यमरः ॥पल्लवःकिसलयःपल्लवोऽस्त्रीकिसलयमित्यमरः ॥ जलाशयाःजलाधाराः ॥ जलाशयोजलाधाराइत्यमरः ॥ दीर्घिकाःवाप्यः॥वापीतुदीर्घिकेत्यमरः ॥५६॥ उद्यानानिक्रीडावनानि ॥पुमानाक्रीडउद्यानामित्यमरः ॥ भरितानियुक्तानीत्यर्थः ॥ कलकंठाहंसविशेषास्तेषांरवाःशब्दाः॥५७॥देवताइवनराः॥अथवारूपकमिदम्॥एवमुत्तरत्रापिज्ञेयम् ॥ ५८ ॥ महिम्नोवर्णनीयत्वंविशदयति

किंगृहाणिसुरम्याणिस्फाटिकैर्विविधैरिह ॥ मणिभिर्वाविचित्राणिरचितान्यंगणानिच ॥ ५३ ॥ सूर्यकांताश्चमणयश्चंद्रकांतास्तथैवच ॥ गृहेगृहेविचित्राश्चवृक्षाःस्वर्गसमुद्भवाः ॥ ५४ ॥ तोरणानांतथालक्ष्मीर्दृश्यतेचगृहेगृहे ॥ चित्राणिचविचित्राणिशुभ्रहंसैर्विमानकैः ॥५५॥ वितानानिविचित्राणिचैलपल्लवतोरणैः ॥ जलाशयान्यनेकानिदीर्घिकाविविधास्तथा ॥ ५६ ॥ उद्यानानिविचित्राणिपुष्पैश्चभरितान्यथ ॥ पक्षिणश्चाऽप्यनेकेत्रकलकंठरवास्तथा ॥ ॥ ५७ ॥ नराश्चदेवताःसर्वेस्त्रियश्चाऽप्सरसस्तथा ॥ परस्परविरुद्धास्तेतेषांरूपंतुकिंपुनः ॥ ५८ ॥ किंवर्ण्यतेनगर्याश्चमहिमाचऋषीश्वराः ॥ अन्येचयाज्ञिकाश्चैवपुण्यानिस्वर्गकाम्यया ॥ ५९ ॥ कुर्वंतेतेवृथासर्वेविहायहिमवत्पुरम् ॥ यावन्नदृष्टमेतच्चतावत्स्वर्गपरानराः ॥ ६० ॥ इत्येवमृषिवर्यास्तेवर्णयंतस्तथापुरं ॥ गताहिमालयस्याऽथगृहंसर्वसमृद्धिमत् ॥ ६१ ॥ तान्दृष्ट्वासूर्यसंकाशान्हिमवान्विस्मितस्तथा ॥ सूर्याःसप्तकथंचाऽत्रआयांतिमेप्रियांप्रति ॥ ६२ ॥ ॥ ॥ ॥ ॥ ॥

॥अन्यइति॥याज्ञिकाःयजमानाः॥पुण्यानीति॥पुण्यहेतून्ज्योतिष्टोमादियागानित्यर्थः॥ स्वर्गकाम्ययास्वर्गेच्छया ॥ ५९ ॥ हिमवत्पुरंहिमाचलनगरंविहायोज्झित्वावृथाकुर्वतइत्यन्वयः ॥ तथाचस्वर्गापेक्षयाहिमवत्पुरएवपुण्यसंपदासुखाधिक्यमितिभावः ॥ ननुलोकेकस्मात्स्वर्गोद्देशेनयागंकुर्वंतीत्यतआह ॥ यावदिति ॥ एतावद्धिमवत्पुरंयावन्नदृष्टंतावत्स्वर्गपराःस्वर्गासक्ताइत्यर्थः ॥ तथाचहिमवत्पुरमहिमाज्ञानादेवयागान्कुर्वंतीतिभावः ॥ ६० ॥ ६१ ॥ सप्तऋषीन्दृष्ट्वाहिमवान्वितर्कयत्स्वप्रियांमेनांप्रतिवक्तीत्याह ॥ सूर्याइति ॥ प्रियांमेनांगृहंप्रतीतिपाठांतरम् ॥ ६२ ॥ ॥ ॥

हिमवान्किमब्रवीदितितदाह ॥ पूजेति ॥ ६३ ॥ ६४ ॥ पूजामिति ॥ विधायकृत्वा ॥ दंडवद्दंडाकारंप्रपपात नमस्कृतवानित्यर्थः ॥ हस्तैःस्वहस्तैः॥ ॥ ६५ ॥ हिमाचलःस्वभाग्यंचिंतयति ॥ धन्यइति ॥ ६६ ॥ आसनेष्विति ॥ स्थितउपविष्टइत्यर्थः ॥ ६७ ॥ ६८ ॥ पूर्णानामिति ॥ कृपणानांदीनानांनइतिशेषोऽस्माभिरित्यर्थः ॥ पूर्णानांतृप्तानांनिरपेक्षाणांवायुष्माकंकिंकार्यंकिंकर्तव्यमस्तिनकिंचिदपीत्यर्थः ॥ १ ॥ तर्हिपूर्णाअपिसाधवःकिमर्थंकृपण

कार्यापूजाप्रयत्नेनगृहस्थत्वात्सदाप्रिये ॥ वयंधन्यागृहस्थाश्चसर्वेषांसुखदायिनः ॥ ६३ ॥ एतस्मिन्नंतरेतेवैह्याकाशादपतंस्तदा ॥ संमुखोहिमवान्दृष्ट्वाययौमानपुरःसरम् ॥ ६४ ॥ पूजांविधायतेषांचदंडवत्प्रपपातह ॥ हस्तैश्चहिमवंतंतेगृहीत्वोचुःशुभंशुभम् ॥ ६५ ॥ अथाऽग्रतश्चतान्कृत्वाधन्योममगृहाश्रमः ॥ इत्युक्त्वाऽऽसनमानीयददौभक्तिपुरःसरम् ॥ ६६ ॥ आसनेषूपविष्टेषुतदाज्ञप्तःस्वयंस्थितः ॥ उवाचहिमवांस्तत्रऋषीन्ज्योतिर्मयांस्तदा ॥ ६७ ॥ हिमाचलउवाच ॥ धन्योऽहंकृतकृत्योऽहंसफलंजीवितंमम ॥ लोकेषुदर्शनीयोऽहंबहुतीर्थसमोमतः ॥ ६८ ॥ यस्माद्भवंतोमद्गेहंह्यागताविष्णुरूपिणः ॥ पूर्णानांचैवकिंकार्यंकृपणानांगृहेगृहे ॥ ६९ ॥ तेषांचदुःखनाशार्थंगृहेष्वागमनंसताम् ॥ मद्गेहपावनार्थंचभवंतःसुसमागताः ॥ ७० ॥ तथाऽपिकिंचित्कार्यंहिसदृशंसेवकस्यच ॥ कथनीयंभवद्भिश्चसफलस्तुममाश्रमः ॥ ७१ ॥ महतामाज्ञयालोकेमान्यतांगच्छतिध्रुवम् ॥ तस्माच्चकुत्रचित्कार्येयोज्योऽहमृषिसत्तमाः ॥ ७२ ॥ एवंवचनमाकर्ण्यऋषयश्चप्रहर्षिताः ॥ ऊचुस्तेगिरिराजंवैस्मृत्वास्मृत्वाशिवस्यच ॥ ७३ ॥ धन्योऽसिकृतकृत्योऽसिभाग्यवानसिसांप्रतम् ॥ शिवःपरोपकारायकर्तुकामःप्रजासुखम् ॥ ७४ ॥ अस्मन्मुखेनतेपुत्रींयाचतेशंकरःस्वयम् ॥ जगद्गुरोर्गुरुस्त्वंचभविष्यसिनसंशयः ॥ ७५ ॥ ॥ छ ॥ ॥ छ ॥

गृहमागच्छंतीत्याह ॥ तेषामिति ॥ ७० ॥ दुःखनाशकमेवलौकिककार्यमस्माभिराज्ञापनीयामितिहिमवान्प्रार्थयते ॥ तथापीति ॥ ७१ ॥ ७२ ॥ एवमिति ॥ शिवस्यस्मृत्वाअधीगर्थदयेशांकर्मणीत्यनेनषष्ठी ॥ ७३ ॥ ७४ ॥ जगद्गुरोरिति ॥ जगद्गुरोःशिवस्यगुरुःश्रेष्ठोमान्यइत्यर्थः ॥ गुरुस्तुगीष्पतौश्रेष्ठेगुरौपितरिदुर्भरइतिवैजयंती ॥ जगद्गुरोर्नमस्कृत्यइतिपाठांतरम् ॥ ७५ ॥ ॥ ॥ ॥ ॥

शिवयोर्जगत्पितृत्वेप्रमाणंस्मरति ॥ जगत्पितेति ॥ प्रोक्तःउपनिषद्यादिशास्त्रइत्यादिः ॥ ७६ ॥ कन्यादानेजन्मसाफल्यंकल्पयति ॥ तस्माइति ॥ सा
र्थकंजन्मेतिशेषः ॥ ७७ ॥ मदीयमिति ॥ यामेनापत्नीमतासामदीयंशरीरमित्यन्वयः ॥ अत्रतैत्तिरीयश्रुतिः ॥ अथोअर्धोवाएषआत्मनः ॥ यत्पत्नी यज्ञ
स्यधृत्याअशिथिलंभावायेति ॥ बृहस्पतिस्मृतिरपि ॥ आम्नायेस्मृतितंत्रेचलोकाचारेचसूरिभिः ॥ शरीरार्धंस्मृताजायापुण्यापुण्यफलेसमेतिप्रमाणंद्रष्टव्य
म् ॥ मदीयंचशरीरंवैपत्नीनामचयामतेतिपाठांतरम् ॥ ७८ ॥ एवमिति ॥ तांपुत्रींमातरंसर्वजनानांज्ञात्वाविलोक्य तदंगंपार्वत्याअवयवान् ॥ जातावेक

जगन्माताचतेपुत्रीतस्यैवाऽनुग्रहाद्भवेत् ॥ जगत्पिताशिवःप्रोक्तोजगन्माताशिवास्मृता ॥ ७६ ॥ तस्मैदेयात्वयाक
न्यासार्थकंतेभविष्यति ॥ एवंवचनमाकर्ण्यगिरिराजोऽब्रवीदिदम् ॥ ७७ ॥ मदीयंचशरीरंवैपत्नीमेनाचयामता ॥
ऋद्धिःसिद्धिश्चकीर्तिश्चश्रीर्मदीयानचान्यथा ॥ ७८ ॥ एवंज्ञात्वातदापुत्रींविलोक्यमातरंचताम् ॥ भूषयित्वातदंगंचऋ
ष्युत्संगेन्यवेशयत् ॥ ७९ ॥ इदंभैक्षंमयानामदातव्यमृषिसत्तमाः ॥ ऋषयऊचुः ॥ ईदृशाभिक्षुकास्तेद्यदाताचैव
भवान्स्वयम् ॥ ८० ॥ भैक्षंचपार्वतीप्रोक्तंकिमतःपरमुत्तमम् ॥ हिमवन्शिखराणांतेमनसःसदृशीगतिः ॥ ८१ ॥
एवमुक्त्वातुतांकन्यामृषयोविमलाशयाः ॥ आशिषंदत्तवंतस्तेशिवायसुखदाभव ॥ ८२ ॥ स्पृष्ट्वाकरेणतांतत्रक
ल्याणंतेभविष्यति ॥ शुक्लपक्षेयथाचंद्रोवर्धतेत्वद्गुणास्तथा ॥ ८३ ॥ मिलिलाचगृहंतेऽद्यवर्धयिष्यंतिनित्यशः ॥ इ
त्युक्त्वाऋषयःसर्वेगिरिराजंपरस्परम् ॥ ८४ ॥ पुष्पाणिफलयुक्तानिव्यत्ययंचक्रिरेतदा ॥ अरुंधतीतदातत्रमेनांसा
श्रुमुखींतदा ॥ ८५ ॥ ॥ ॥ ॥ ॥ ॥

वचनम् ॥ उत्संगेऋषीणामंकेन्यवेशयदित्यन्वयः ॥ विलोक्यमाचिरंततइतिपाठांतरम् ॥ तत्रमाचिरंशीघ्रमित्यर्थः ॥ ७९ ॥ भैक्षंभिक्षाकदंबकम् ॥ भै
क्षंभिक्षाकदंबकमित्यमरः ॥ तेऋषयः ॥ ८० ॥ हिमवन्निति ॥ यथातवशिखराणिमहांतिवर्तंतेतद्वदेवमनसोगतिर्वृत्तिर्महत्यतिविचारशालिनीत्यर्थः ॥
॥ ८१ ॥ किमाशिषंदत्तवंतइतितदाह ॥ शिवायेति ॥ हेपार्वतित्वंशिवायमहादेवायसुखदासुखदात्रीभवेति ॥ ८२ ॥ ८३ ॥ ८४ ॥ व्यत्ययमत्यंतंशुभविधिं
वाग्दानरूपम् ॥ अयःशुभावहोविधिरित्यमरः ॥ अरुंधतीति ॥ साश्रुमुखीमश्रुयुक्तनेत्रामित्यर्थः ॥ कन्यादानसमयेमातूरोदनंलोकेप्रसिद्धम् ॥ ८५ ॥

गुणैरिति॥परमाश्रेष्ठासतीपतिव्रतारुंधतीशिवस्यगुणैःसर्वज्ञत्वादिभिर्मेनांलोभयामासेतिपूर्वेणान्वयः॥ शिवस्यसर्वज्ञत्वादिगुणान्कथयित्वासांत्वयामासेति भावः॥ परिमार्जयदिति ॥ अडभावआर्षः ॥८६ ॥ निर्धार्यनिश्चित्य ॥ ८७ ॥ महाकाशींवाराणसीं॥चक्रुरिति॥ शिवंप्रतिअकथयन्नित्यर्थः॥ धातूनामनेकार्थ

गुणैश्चलोभयामासशिवस्यपरमासती ॥ हरिद्राकुंकुमैस्तत्रह्यश्रूणिपरिमार्जयत् ॥ ८६ ॥ ततश्चतेचतुर्थेऽन्हिनिर्धा र्यलग्नमुत्तमम् ॥ परस्परंचसंहृष्यजग्मुस्तेशिवसंनिधिम् ॥ ८७ ॥ महाकाशींप्रयातास्तेयत्रास्तेशंकरःस्वयम् ॥ वि वाहस्यविधिंसम्यक्चक्रुस्तेऋषिसत्तमाः ॥ ८८ ॥ तदाज्ञप्ताश्चतेतत्रगताश्चागमनायवै ॥ यूयमध्वर्यवःप्रोक्ताविवाहे चमयापुनः ॥ ८९ ॥ अतःशीघ्रंभवद्भिस्तुऋषयोब्रह्मवित्तमाः ॥ आगंतव्यंसशिष्यैस्तुभवंतःकार्यकारकाः ॥ ९० ॥ इत्युक्तास्तेगतास्तत्रतथेतिपरमंवचः ॥ शिवोऽपिसगणस्तत्रप्रसन्नमुखपंकजः ॥ ९१ ॥ कैलासमगमद्देवोविवाहरच नायवै ॥ सस्मारनारदंदेवःस्मरणादागतःक्षणात् ॥ ९२ ॥ निवेदितंचतत्सर्वंश्रुत्वाहृष्टोथनारदः ॥ शिवोऽपिकथ यामासपार्वत्यावचनंतदा ॥ ९३ ॥ तयातपस्तथातप्तंवशीभूतोह्यहंतदा ॥ एवंश्रुत्वावचस्तस्यनारदोवाक्यमब्रवीत् ॥ ९४ ॥ भवतांतुव्रतमिदंभक्तवश्योभवाम्यहम् ॥ सम्यक्कृतंत्वयादेवपार्वतीमनसेप्सितम् ॥ ९५ ॥ कार्यंमत्सदृशं किंचित्कथनीयंत्वयाप्रभो ॥ इत्युक्तस्तुशिवस्तस्मैकथयामासवैतदा ॥ ९६ ॥ भवतोवचनंह्यत्रकर्तव्यंमेनाऽत्रसंशयः ॥ इदंत्वयातुकर्तव्यंदेवानांचनिमंत्रणम् ॥ ९७ ॥ ब्रह्माणंचतथाविष्णुमन्यान्देववरांस्तथा ॥ कथनीयंप्रयत्नेनऋषिव र्यांस्तथैवच ॥ ९८ ॥ ॥ ॥ ॥ ॥ ॥

त्वात् ॥ ८८ ॥ तदाज्ञप्ताःशिवेनाज्ञप्ताः ॥ ननुकाऽसावाज्ञेतितदाह ॥ यूयमिति ॥ अध्वर्यवोमुख्याइत्यर्थः ॥ ८९ ॥ सशिष्यैर्भवद्भिरागंतव्यमित्यन्वयः ॥ ९० ॥ तथेतीति ॥ अंगीकृत्येतिभावः ॥ ९१ ॥ ९२ ॥ ९३ ॥ शिवःकिंकथितवानितितदाह ॥ तयेति ॥ पार्वत्येत्यर्थः ॥ ९४ ॥ किंतद्व्रतंतदाह ॥ भक्तवश्यइति ॥ ॥ ९५ ॥ ९६ ॥ भगवतइति ॥ वचनंपार्वत्यादुष्करंतपस्तप्तमितितांस्वीकुर्वितिवचनमित्यर्थः ॥ ९७ ॥ ९८ ॥ ॥ ॥

मातृगणान्सप्तमातृगणान् ॥ ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराहीचतथैंद्राणीचामुंडासप्तमातरइत्यमरः ॥ ऋष्यादीन्प्रतिकिंकथनीयमितित
दाह ॥ नागमिष्यंतीति ॥ येविवाहकार्यार्थमत्रनागमिष्यंतितेमदीयानेत्यर्थः ॥ निष्ठुरनिमंत्रणमिदम् ॥ अथवायेमदीयास्तेनागमिष्यंतीतिनाऽपितुआग
मिष्यंत्येवेत्यर्थः ॥ कोमलनिमंत्रणमिदम् ॥ ९९ ॥ मनइति ॥ मनोवेगवत्समागतःसंगतः ॥ १०० ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहितांटीकायां
सारबोधिन्यांशिवनिमंत्रणंनामपंचदशोऽध्यायः ॥ १५ ॥ ॥ ॐनमःशिवाय ॥ शिवोद्वाहोत्सवायैवससेनाअमरादयः ॥ समागमन्नित्यध्यायेषोडशेऽत्र
निरूप्यते ॥ १ ॥ सर्वइति ॥ उपकरणानिविवाहसाधनसामग्रीः ॥ १ ॥ प्रेरयामासुःप्रेरितवंतः ॥ २ ॥ मातरइति ॥ सप्तमातरःपूर्वोक्ताःब्राह्मयादयः ॥

सर्वान्मातृगणांश्चैवयक्षगंधर्वकानथ ॥ नागमिष्यंतियेप्यत्रमदीयानकदाचन ॥ ९९ ॥ इत्युक्तोनारदोब्रह्मन्प्रणि
पत्यसदाशिवम् ॥ जगामसर्वतोदेवान्यदुक्तंशंभुनापुरा ॥ कथयित्वापुनस्तत्रमनोवेगसमागतः ॥१००॥ इतिश्री
शिवमहापुराणेज्ञानसंहितायांशिवनिमंत्रणंनामपंचदशोऽध्यायः ॥ १५ ॥ ॥ सूतउवाच ॥ सर्वेदेवास्तदा
तत्रशिवसेवासमीहया ॥ स्वीयान्येवोपकरणानिसेवार्थंतुशिवस्यच ॥ १ ॥ सर्वेतेप्रेरयामासुर्देवाइंद्रादयस्तदा ॥
गंधर्वाप्सरसस्तत्रवाद्यंनृत्यंचचक्रिरे ॥ २ ॥ मातरःसप्ततास्तत्रशिवभूषाविधिंपरम् ॥ चक्रिरेचमुदायुक्तायथायोग्यं
तथापुनः ॥ ३ ॥ कर्तव्यंकिंचपूर्णस्यसर्वैःप्रियचिकीर्षया ॥ तस्यस्वाभाविकोवेषोभूषाविधिरभूत्तदा ॥ ४ ॥ तदेवकथ
याम्यद्यश्रूयतामृषिसत्तमाः ॥ चंद्रस्तुमुकुटस्थानेसान्निध्यमकरोत्तदा ॥ ५ ॥ तिलकंसुंदरंह्यासीन्नयनंतुतृतीयकम्
॥ कर्णाभरणानियान्यासंस्तान्येवाभरणानिच ॥ ६ ॥ भूतिश्चचंदनंह्यासीद्दुकूलंचर्मउच्यते ॥ सर्पाह्याभरणान्या
सन्मणयोविविधाश्चये ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

भूषाविधिमलंकारविधानम् ॥ ३ ॥ ननुपूर्णस्यवेषादिविधानेकिंप्रयोजनमपितुतस्यस्वतःसिद्धएववेषइत्याशंक्यशिवप्रीत्यर्थमेवमात्रादयोवेषादिविधानम
कुर्वन्नित्याह ॥ कर्तव्यमिति ॥ ४ तदेवेति ॥ वेषविधानमेवेत्यर्थः ॥ स्वाभाविकवेषमाह ॥ चंद्रास्त्विति ॥ मुकुटस्थानेशिवस्याकिरीटस्थानेचंद्रःसांनिध्यंसं
निधानमकरोत् चंद्रएवमुकुटरूपोऽभूदित्यर्थः ॥ ५ ॥ तृतीयकंनयनंललाटनेत्रंतिलकमभूदित्यर्थः ॥कर्णेति ॥ कर्णाभरणानिमणिमयानियान्यासंस्तान्ये
वस्वाभाविकभूषणानीत्यर्थः ॥ ६ ॥ दुकूलंक्षौमवस्त्रम् ॥ ७ ॥ ॥ ॥ ॥

प्राकृतालौकिकजनालंकाराः ॥ विकृर्तितिरस्कृतिम् ॥ वर्णनदुष्करंवर्णितुमशक्यमित्यर्थः ॥ ८ ॥ ९ ॥ ब्रह्मेति ॥ आजगामेतिशेषः ॥ १० ॥ स्वीयाटोपेनस्वकीयौत्कंठया ॥ स्वीयरूपेणेतिपाठांतरम् ॥ तत्रचतुर्मुखादिस्वरूपेणेत्यर्थः ॥ स्थिताइति ब्रह्मादयइतिशेषः ॥ ११ ॥ पक्षिराजोगरुडः ॥ नि

तत्प्रभावात्तदासर्वेप्राकृताविकृतिंगताः ॥ ईदृशंसुंदरंरूपंजातंवर्णनदुष्करम् ॥ ८ ॥ ईश्वरोऽपिस्वयंसाक्षादैश्वर्यंलब्धवानिह ॥ गणास्तत्रचवाद्यानिचक्रिरेविविधान्यपि ॥ ९ ॥ एतस्मिन्समयेदेवाआजग्मुःप्रभुसेवया ॥ ब्रह्मातुहंसमारुह्यऋषिभिःसहितस्तदा ॥ १० ॥ स्वीयाटोपेनवैतत्रभूतानांपतिमीश्वरम् ॥ नमस्कृत्यस्थितास्तत्रतावद्विष्णुःसमागतः ॥ ११ ॥ वाहनंपक्षिराजश्चनिजसेवकसंयुतः ॥ स्वचिन्हैर्भूषितश्चासौनमस्कृत्यस्थितःपुरः ॥ १२ ॥ तावदिंद्रादयोदेवाःस्वीयाटोपसमन्विताः ॥ इंद्रश्चैवयमश्चैवकुबेरोवरुणस्तथा ॥ १३ ॥ अन्येतेलोकपालाश्चस्वीयचिन्हसमन्विताः ॥ वसवश्चतथासूर्याऋषयश्चतथाशुभाः ॥ १४ ॥ नद्योगंगादयःसर्वाःसमुद्राःसर्वएवहि ॥ गंधर्वाप्सरसस्तत्रनागाःसर्वेतथाविधाः ॥ १५ ॥ सेवावसरमाज्ञायसमाजग्मुर्मुदान्विताः ॥ तस्मिन्दिनेतदातत्रशोभाभावसमन्विताः ॥ १६ ॥ देवाव्यूहंतदाचक्रुःस्वीयंस्वीयंतुभागशः ॥ निःससारततस्तस्मात्कैलासात्पर्वतोत्तमात् ॥ ॥ १७ ॥ शिवःपरमसंतुष्टोदेवान्कृत्वापुरस्तदा ॥ तेदेवाश्चतदाज्ञप्तायथायोग्यंपुरःसराः ॥ १८ ॥ अभवंस्तेतुवादित्रैर्युक्तानादंपरस्परम् ॥ तदेवकथयामासुर्येनतुष्येच्चशंकरः ॥ १९ ॥ हिमवानपितत्रैवस्त्वानाहूयसुहृद्वृतः ॥ विधिवत्कारयामासमंडपादिविधिंक्रमात् ॥ २० ॥ विविधानिविचित्राणितोरणानितथापुनः ॥ ध्वजांश्चैवविचित्रांश्चचकारपरयामुदा ॥ २१ ॥ ॥ ॥ ॥ ॥ ॥

जसेवकसंयुतः ॥ निजाःस्वीयाःसेवकाःसनकसनंदनादयस्तैर्युक्तइतिविष्णुविशेषणम् ॥ स्वचिन्हैश्चतुर्भुजत्वशंखचक्रादिभिः ॥ १२ ॥ १३ ॥ वसवोऽष्टौ ॥ सूर्याद्वादशसमाजग्मुरित्यग्रिमेणान्वयः ॥ १४ ॥ १५ ॥ आज्ञायज्ञात्वा ॥ १६ ॥ व्यूहंरचनाविशेषम् ॥ १७ ॥ तइति ॥ तेदेवाःपरस्परंयुक्ताःसंतःवादित्रैर्वाद्यविशेषैर्नादंचक्रुरित्यन्वयः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ ॥

हिमवत्संबंधिनस्तदानीमागताइत्याह ॥ पर्वताइति ॥ जंगमंगच्छतीतिजंगमंचेतनात्मकमित्यर्थः ॥ तत्पत्न्यःपर्वतपत्न्यः ॥ पुत्र्यइति ॥ अत्रपौत्राइति पाठांतरम् ॥ २२ ॥ हिमवद्गृहसंभवंहिमालयगृहवृत्तितत्रत्यंतत्रभवंकार्यंचक्रुरित्यर्थः ॥ २३ ॥ सहिमवान्दानार्थंशिवायेतिशेषः ॥ कन्यांपार्वतींसु स्नाप्यतैलाभ्यंगादिना स्नापयित्वाऽलंचकाराऽलंकृतवानित्यर्थः ॥ २४ ॥ विवाहविधियोग्यंस्रक्चंदनयुक्तम् ॥ २५ ॥ संविधायकृत्वा ॥ प्रेषयन्निति ॥ हिमवान्शिवःशीघ्रंविवाहार्थमायात्वागच्छत्वितिबुध्यागंधमादनंतदाख्यंपर्वतंततोऽन्यमेकंसेवकंचशिवस्याव्हानार्थंप्रेषयन्स्थितइत्याग्रिमेणान्वयः ॥ २६ ॥

पर्वताश्चतथारम्याजंगमंरूपमास्थिताः ॥ तत्पत्न्यश्चैवपुत्राश्चपुत्र्यश्चैवतथाविधाः ॥ २२ ॥ वस्त्रालंकारसंयुक्ताः सर्वेहर्षसमाकुलाः ॥ कार्यंचक्रुश्चतत्रत्यंहिमवद्गृहसंभवम् ॥ २३ ॥ तच्छोभांवर्णितुंनैवशक्नोमिऋषिसत्तमाः ॥ क न्यांचैवतुदानार्थंसुस्नाप्याऽलंचकारसः ॥ २४ ॥ विवाहविधियोग्यंचवेषंसंपाद्यसंस्थितः ॥ देवतापूजनंकृत्वानानो पकरणानिच ॥ २५ ॥ संविधायतदासर्वंप्रेषयन्गंधमादनम् ॥ सेवकंतुतथाऽन्यंचशीघ्रमायातुवैशिवः ॥ २६ ॥ प्र तीक्षांवरवर्गस्यकृत्वाचहिमवान्स्थितः ॥ एतस्मिन्समयेरुद्रःसमीपेस्वबलैर्वृतः ॥२७॥ आजगाममहावीर्यःसर्वसि द्धिसमन्वितः ॥ तमागतंतदाश्रुत्वाहिमवान्बलसंयुतः ॥ २८ ॥ जगामसंमुखस्तत्रधन्योऽहमितिचिंतयन् ॥ देवसे नांतथादृष्ट्वाहिमवान्विस्मयंगतः ॥ २९ ॥ देवाहितद्बलंदृष्ट्वाविस्मयंपरमंगताः ॥ पर्वतानांतथासेनादेवानांचतथापु नः ॥ ३० ॥ मिलित्वातुतथारेजेमन्यतेसागरावुभौ ॥ परस्परंमिलित्वातुदेवाश्चपर्वतास्तथा ॥ ३१ ॥ कृतकृत्यंतथा त्मानंमेनिरेपरयामुदा ॥ रचित्वाशिबिरंसम्यक्संस्थाप्यदेवताबलम् ॥ ३२ ॥ जगामपर्वतस्तत्रयत्रस्याद्विधिवेदिका ॥ कारयित्वाविशेषेणचतुष्कंतोरणैर्युतम् ॥ ३३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २७ ॥ बलसंयुतःसैन्ययुक्तः ॥ वरूथिनीबलंसैन्यमित्यमरः ॥ २८ ॥ २९ ॥ देवाइति ॥ तद्बलंहिमाचलसेनाम् ॥ परममत्यंतमित्यर्थः ॥ ३० ॥ मन्यतइति ॥ हिमवान्उभयसेनेउभौसागरावितिमन्यतेस्मेत्यर्थः ॥ ३१ ॥ रचित्वेति ॥ शिबिरंनिवेशम् ॥ निवेशःशिबिरमित्यमरः ॥ भाषयाडेरा इतिप्रसिद्धम् ॥ रचित्वाविरचय्यतत्रदेवताबलंसंस्थाप्येत्यन्वयः ॥ ३२ ॥ विधिवेदिकाविवाहविधिवेदिकेत्यर्थः ॥ चतुष्कंचतुष्कोणयुक्तंमंडपमित्यर्थः ॥ ३३ ॥

प्रतीक्षांवरागमनइतिशेषः ॥ मेनेति ॥ चंद्रशालांशिरोगृहम् ॥ चंद्रशालाशिरोगृहामित्यमरः ॥ ३४ ॥ ३५ ॥ मेनास्वमनसावितर्क्यचिंतयति ॥ प्रथममिति ॥ निरीक्षाम्यवलोकयामि ॥ आर्षरूपम् ॥ ३६ ॥ तत्वेति ॥ मेनातत्वज्ञानपराशिवःकिंरूपइतिजिज्ञासमानेत्यर्थः ॥ इत्यज्ञानपरेतिपाठांतरम् ॥ मुनिवरोनारदः ॥ ३७ ॥ बुद्धिभ्रंशइति ॥ यथामेनायाबुद्धिभ्रंशोभवेत्तथाशिवोदर्शयामासेत्यन्वयः ॥ ३८ ॥ ३९ ॥ मेनादेवसेनांदृष्ट्वाऽतिविस्मययुक्तासत्येतत्सेनाधिपतिःकीदृशःशिवःस्यादितिमनसाचिंतितयतीत्याह ॥ एतत्पतिरिति ॥ सेनाधिपतिरित्यर्थः ॥ श्रूयतामिति ॥ वक्ष्यमाणकथेतिशेषः ॥ कौतुकावहांकुतूहल

स्नानदानादिकंकृत्वाप्रतीक्षामकरोत्तदा ॥ मेनाऽपिचतथातत्रचंद्रशालामुपागता ॥ ३४ ॥ हर्षभारसमायुक्ताशिवंभक्तसुखावहं ॥ द्रष्टुकामाभवत्तत्रनारदेनसमन्विता ॥ ३५ ॥ प्रथमंचनिरीक्षामिहर्षनिर्भरमाश्रिता ॥ कीदृशंशिवरूपंचयदर्थैतपउत्तमम् ॥ ३६ ॥ तत्वज्ञानपरासाचदर्शनार्थंशिवस्यच ॥ स्थिताशिरोगृहंदेवीमेनामुनिवरस्तथा॥३७॥ शिवोऽपिचतदातस्याज्ञात्वाऽहंकारमात्मनः ॥ तथैवदर्शयामासबुद्धिभ्रंशोभवेद्यथा ॥ ३८ ॥ एतस्मिन्समयेसेनांदेवानांपरमांशुभाम् ॥ निरीक्षंतीतदामेनादृष्ट्वाहर्षसमाकुला ॥ ३९ ॥ एतत्पतिःशिवःसाक्षात्कीदृशोवैभविष्यति ॥ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथांचकौतुकावहाम् ॥ ४० ॥ प्रथमंचैवगंधर्वाःसुंदराःसुभगास्तथा ॥ वस्त्रैश्चविविधैर्युक्तानानालंकारभूषिताः ॥ ४१ ॥ नानावाहनयुक्ताश्चनानावाद्यपरायणाः ॥ पताकाभिर्विचित्राभिरप्सरोगणसंयुताः ॥ ४२ ॥ दृष्ट्वाविश्वावसुंतत्रतत्पतिंपरमंशुभम् ॥ दृष्ट्वाचहर्षिताचाऽसीच्छिवोऽयमितिचाऽब्रवीत् ॥ ॥ ४३ ॥ देवानांगायकश्चाऽयंकुतोदेवःसनातनः ॥ इत्येवंनारदस्तस्यैह्युवाचऋषिसत्तमः ॥ ४४ ॥ एवंश्रुत्वातदामेनाविचारेतत्पराऽभवत् ॥ इतश्चाऽप्यधिकोयोवैशिवःकीदृक्भविष्यति ॥ ४५ ॥ ॥ ॥

कारिणीम् ॥ अथवाकौतुकंविवाहमावहतीतिकौतुकावहातांविवाहसंबंधिनीमित्यर्थः ॥ कौतुकंतुविवाहेस्यादित्यभिधानम् ॥ कथयामीतिशेषः ॥ ४० ॥ प्रथममिति ॥ प्रथमतोगंधर्वाआगताइतिशेषः ॥ ४१ ॥ ४२ ॥ गंधर्वसेनाधिपतिंविश्वावसुनामानंगंधर्वराजंसेनायांदृष्ट्वाऽयंशिवइतिमेनायाभ्रांतिस्तदाभूदित्याह ॥ दृष्ट्वेति ॥ ४३ ॥ मेनायाःशंकानिवारणार्थंनारदःकथयति ॥ देवानामिति ॥ अयंशिवःकुतोऽपिहेतोर्नभवितुमर्हतीत्याह ॥ कुतइति ॥ ४४ ॥ पुनर्मेनामनसाचिंतयति ॥ इतश्चेति ॥ विश्वावसुतइत्यर्थः ॥ ४५ ॥ ॥ ॥ ॥

॥ ४६ ॥ मेनायक्षाधिपतिंकुवेरंदृष्ट्वाऽयंरुद्रःसमागतइतिभ्रांतिमत्यभूदित्याह ॥ तत्पतिमिति ॥ अन्वेत्यागच्छति ॥ अयंरुद्रश्चवान्योस्तीतिपाटांतरम् ॥४७॥ नारदःकथयति ॥ रुद्रस्तथानहीति ॥ यमदर्शनेनमेनायाःशिवत्वभ्रांतिरभूदित्याह ॥ जगामेति ॥ ४८ ॥ नारदःकथयति ॥ सोयंतथानहीति ॥ ४९ ॥ यत्र यत्रशिवत्वभ्रमोमेनायाअभूत्तत्रनायशिवःकिंतुतत्सेवकइतिनारदःकथितवानित्याह ॥ योयइति ॥ ५० ॥ सूर्यदर्शनेनरुद्रभ्रमोऽभूदित्याह ॥ तावदिति ॥ ५१ ॥ नारदःकथयति ॥ रुद्रस्तथानहीति ॥ ५२ ॥ ततश्चेति ॥ शोभामिति ॥ दृष्ट्वेतिशेषः ॥ मेनायाःशंकारुद्रोयमिति ॥ नारदोत्तरंतुनोभवेदिति ॥ ५३ ॥

एतस्मिन्नंतरेयक्षामणिग्रीवादयश्चये ॥ तेषांसेनातयादृष्टाशोभादिद्विगुणीकृता ॥ ४६ ॥ तत्पतिंचकुबेरंचदृष्ट्वाशोभा समन्वितम् ॥ अयंरुद्रस्तथाऽन्वेतिवरुणश्चसमागतः ॥ ४७ ॥ ततोऽपिद्विगुणांशोभांदृष्ट्वारुद्रस्तथानहि ॥ जगाम धर्मराजश्चसर्वशोभासमन्वितः ॥ ४८ ॥ शोभांचद्विगुणांतस्यदृष्ट्वासोयंतथानहि ॥ तावदिंद्रःसमायातःसर्वदेववरः शुभः ॥ ४९ ॥ किंवर्ण्यतेतदीयाचशोभावैद्विगुणीकृता ॥ योयोऽप्यग्रेसमायातिशोभयाद्विगुणीकृतः ॥ ५० ॥ तंदृ ष्ट्वाशंकरःसोयंनायंरुद्रस्यकिंकरः ॥ तावत्सूर्यःसमायातःसर्वदेवमयःशुभः ॥ ५१ ॥ तेजसार्दाप्तिमान्लोकेदृष्ट्वारुद्र स्तथानहि ॥ तावच्चंद्रःसमयातोग्रहैःसर्वैःसमन्वितः ॥ ५२ ॥ ततश्चद्विगुणांशोभांरुद्रोऽयंनोभवेदिति ॥ मेनामेने चतांपुत्रींधन्यांकुलसुखावहाम् ॥ ५३ ॥ एतेषांयःपतिःसोवैतस्याःपतिर्भविष्यति ॥ तस्याःकिंवर्ण्यतेभाग्यमपिवर्ष शतैरपि ॥ ५४ ॥ तावद्ब्रह्मासमायातस्तेजसांराशिरुत्तमः ॥ ऋषिवर्ययुतःसाक्षाद्धर्मपुंजइवस्थितः ॥ ५५ ॥ अयंवै भवितानेतितावद्विष्णुःसमागतः ॥ मेघश्यामश्चतुर्बाहुःपीतांबरधरःशुभः ॥ ५६ ॥ श्रीवत्सवक्षालक्ष्मीशःशंखादि लक्षणैर्युतः ॥ मुकुटादिभूषणैर्युक्तःसिध्यष्टकसमन्वितः ॥ ५७ ॥ ॥ ॥

किंमेनइतितदाह ॥ एतेषामिति ॥ देवादीनामित्यर्थःसोवै सुलोपाभावआर्षः ॥ तस्याःपार्वत्याः ॥ ५४ ॥ धर्मपुंजोधर्मराशिः ॥ पुंजराशीतूत्करःकूटमस्त्रिया मित्यमरः॥५५॥मेनाशिवोयमितिसंदेहयति ॥ अयमिति ॥ तावदिति ॥ तस्मिन्समयइत्यर्थः ॥ ५६ ॥ श्रीवत्सवक्षाइति ॥ श्रीवत्सोभृगुलत्ताप्रहारज नितश्चिन्हविशेषः ॥ श्रीवत्सोलांछनंमतमित्यमरः ॥ सवक्षसियस्यसश्रीवत्सवक्षाः ॥ ५७ ॥ ॥ ॥

राजीवलोचनःकमलनेत्रः ॥ विसप्रसूनराजीवपुष्करांभोरुहाणिचेत्यमरः ॥ अथवाराजीवौचंद्रसूर्यौतावेवलोचनेवामदक्षनेत्रेयस्यसः ॥ राजीवश्चंद्रसूर्ययोरित्यभिधानम् ॥ ५८ ॥ पक्षींद्रवाहनोगरुडवाहनः ॥ अप्रमेयपराक्रमोऽपरिमितपराक्रमः ॥ तमिति ॥ मेनातंविष्णुंदृष्ट्वाअहंधन्याऽहंसत्पथंसन्मार्गंगताप्राप्ताऽस्मीतिमत्वाचकिताविस्मितमनाआसीदित्यर्थः ॥ ५९ ॥ मेनाचिंतयति ॥ सोयमिति ॥ नारदःकथयति ॥ नेति ॥ अतइतिविष्णुतइत्यर्थः ॥ ६० ॥ ॥ ६१ ॥ कल्पवृक्षाइतिलुप्तोपमा ॥ गच्छंतःपर्यटंतः कामपूरकाअपेक्षितार्थदाः ॥ सुरभ्यादिपरैःकामधेनुप्रभृतिश्रेष्ठवस्तुभिः ॥ ६२ ॥ अनूचानाःस्व

कोटिकंदर्पलावण्यःप्रसन्नमुखपंकजः ॥ राजीवलोचनःशांतोनिजभक्तसमन्वितः ॥ ५८ ॥ पक्षींद्रवाहनःश्रीमानप्रमेयपराक्रमः ॥ तंदृष्ट्वाचकिताचासीद्धन्याऽहंसत्पथंगता ॥ ५९ ॥ सोऽयंशिवोभवेत्साक्षान्नेतितांनारदोऽब्रवीत् ॥ अतोऽधिकोभवेत्सोवैवर्णितुंनैवशक्यते ॥ ६० ॥ तावच्चऋषयोयाताभृग्वाद्याश्चमुनीश्वराः ॥ गंगादिसर्वतीर्थैश्च शिष्यशाखासमन्विताः ॥ ६१ ॥ ज्ञायंतेकल्पवृक्षाश्चगच्छंतःकामपूरकाः ॥ सुरभ्यादिपरैर्युक्तास्तेजसांराशयःपरे ॥ ६२ ॥ गृणंतस्तेपरंब्रह्मह्यनूचानाःसुखावहाः ॥ तन्मध्येचैववागीशंदृष्ट्वासोऽयंभविष्यति ॥ ६३ ॥ नाऽयमन्यःसमायातिनिर्गुणोगुणवान्हरः ॥ इत्येवंनारदाच्छुत्वामेनामानवतीमुदा ॥ ६४ ॥ त्रैलोक्यसारंयच्चासीत्तदृष्टंहिमयापुनः अतोरुद्रश्चयोवैस्यात्कीदृक्सोऽयंभविष्यति ॥ ६५ ॥ तावद्रुद्रःसमायातोनारदस्तामुवाचह ॥ अयंवैशंकरःसाक्षात्पश्यतांसुंदरित्वया ॥ ६६ ॥ हर्षितासातदातत्रददर्शशंकरंमुदा ॥ वात्यारूपधराःकेचिदायातामर्मरस्वराः ॥ ६७ ॥ अंगुल्यादर्शयामासनारदस्तांशुभाननाम् ॥ हरस्यसेवकान्पश्यपुनरन्यान्विलोकय ॥ ६८ ॥

शाखाध्यायिनः ॥ वागीशंबृहस्पतिं ॥ बृहस्पतिःसुराचार्योगीष्पतिर्धिषणोगुरुरित्यमरः ॥ मेनातंसंभावयति ॥ सोयमिति ॥ ६३ ॥ नारदःकथयति ॥ नायमिति ॥ नायंहरःकिंत्वन्यएवसमायातीत्यन्वयः ॥ इतीति ॥ मानवतीतदेतिपाठांतरम् ॥ ६४ ॥ पुनर्मेनाचिंतयति ॥ त्रैलोक्यसारमिति ॥ अतइति ॥ बृहस्पतेरित्यर्थः ॥ श्रेष्ठइतिशेषः ॥ ६५ ॥ पश्यतामिति ॥ आर्षोऽयंप्रयोगः ॥ ६६ ॥ शिवसेवकगणाःस्वस्ववेषंधृत्वाऽऽगताइत्याह ॥ वात्यारूपधराइति ॥ वात्यावायुसमूहास्तद्रूपधराइत्यर्थः ॥ अत्रवालरूपधराइतिपाठांतरम् ॥ मर्मरस्वराःमर्मरोवस्त्रपर्णादिजन्यशब्दस्तद्वत्स्वरोयेषांतेतथा ॥ अथमर्मरः ॥ स्वनितेवस्त्रपर्णानामित्यमरः ॥ ६७ ॥ ६८ ॥ ॥ ॥ ॥

वक्रतुंडावक्रवदनाः ॥ वक्रास्यवदनंतुंडमाननंलपनंमुखमित्यमरः ॥ विरूपाविलक्षणरूपाः ॥ ६९ ॥ करालाभयंकराइत्यर्थः ॥ श्यामलाःकृष्णाः ॥ कृष्णेनीलासितश्यामकालश्यामलमेचकाइत्यमरः ॥ खंजाःगतिविकलाः ॥ लोमशाःरोमयुक्ताः ॥ तनूरुहंरोमलोमेत्यमरः ॥ मुद्गरोयष्टिविशेषः ॥ ७० ॥ दुरालापकराःदुर्भाषणकारिणः ॥ डमरूनूवाद्यविशेषान् ॥ गल्लनादंबिलबिलाकारंशब्दंकृतवंतइतिशेषः ॥ ७१ ॥ असंख्याताइति ॥ यथातान्दृष्ट्वात्राससंयुताभवंतीमेनाभवेत्तथातयामेनयाभूतप्रेतादयोदृष्टाइतिसमुदितान्वयः ॥ ७२ ॥ शीर्णंविदीर्णमित्यर्थः ॥ ७३ ॥ भूतिभूषितंभस्मरूषितम् ॥ भूतिर्भस्मनिसंपदीत्यमरः ॥ ७४ ॥ कपर्दिनंकपर्दोजटासमूहःसोस्यास्तीतितथातम् ॥ कपालिनंकपालंनरशिरस्तदस्यास्तीतिकपालीतम् ॥ स्यात्कर्परःकपालो

तावदन्येसमायाताभूतप्रेतपिशाचकाः ॥ वक्रतुंडास्तथाकेचिद्विरूपाश्चतथापरे ॥ ६९ ॥ करालाःश्यामलाःकेचित् खंजाश्चलोमशाःपरे ॥ दंडपाशधराःकेचित्केचिन्मुद्गरधारकाः ॥ ७० ॥ विरुद्धवाहनाःकेचिद्दुरालापकरास्तथा ॥ डमरूनूवादयंतोवैगल्लनादंतथापरे ॥ ७१ ॥ तालनादकृतःकेचिच्छृंगीनादंतथाऽपरे ॥ असंख्यातास्तथायातास्तान्दृष्ट्वात्राससंयुता ॥ ७२ ॥ भवंतीतत्क्षणादेवतथादृष्टास्तयातदा ॥ तान्दृष्ट्वाहृदयंतस्याःशीर्णमासीत्समाकुलम् ॥ ॥ ७३ ॥ तन्मध्येशंकरंदेवंनिर्गुणंगुणवत्तरम् ॥ वृषभस्थंपंचवक्त्रंत्रिनेत्रंभूतिभूषितम् ॥ ७४ ॥ कपर्दिनंचंद्रमौलिंदशहस्तंकपालिनम् ॥ व्याघ्रचर्मोत्तरीयंचपिनाकपाणिनंशिवम् ॥ ७५ ॥ खर्परेणतथायुक्तंशंखादिभूषणैर्युतम् ॥ गजचर्मवृषेयस्यतीव्रमक्षिसमन्वितम् ॥ ७६ ॥ निद्रितंकंपयुक्तंचशिवोऽयंमुनिरब्रवीत् ॥ तदीयंवचनंश्रुत्वावाताहतलतायथा ॥ ७७ ॥ ॥ ॥ ॥ ॥

ऽस्त्रीत्यमरः ॥ तदुक्तंनारायणपंडिताचार्येण ॥ निवासनिलयश्चितातवशिरस्ततिर्मालिकाकपालमपितेकरेत्वमशिवोऽस्यनंतार्धियामिति ॥ व्याघ्रचर्मोत्तरीयंव्याघ्रस्यचर्मैवोत्तरीयंप्रावरणवस्त्रंयस्यसतथातम् ॥ पिनाकपाणिनंपिनाकोऽजगवाख्यंधनुस्तदस्यास्तीतितथातम् ॥ पिनाकोऽजगवंधनुरित्यमरः ॥ इन्नार्षः ॥ ७५ ॥ खर्परेणास्थिविशेषेण ॥ नारदःशिवमंगुल्यानिर्दिश्य तांप्रदर्शयति ॥ गजचर्मेति ॥ यस्यपुरोवर्तिनःपुरुषस्यवृषेवृषभेवाहनेतीव्रंदेदीप्यमानमित्यर्थः ॥ अक्षिसमन्वितंनेत्रतुल्यरोममयचिन्हयुक्तंनेत्रयुक्तंवा ॥ निद्रितंमुकुलितंकंपयुक्तंवायुनैतादृशंगजचर्मास्तरणमास्तिसोऽयंशिवइतिमुनिरब्रवीदितिसमुदितान्वयः ॥ ७६ ॥ वाताहतलतावायुताडितवल्लीवेत्यर्थः ॥ ७७ ॥ ॥ ॥ ॥

मेनापार्वतींधिकृत्यवदति ॥ किमिति ॥ ७८ ॥ विसंज्ञानष्टप्रज्ञा ॥ प्रयत्नैरिति ॥ स्वकीयसंबंधिजनानामितिशेषः ॥ संज्ञांप्रज्ञाम् ॥ ७९ ॥ इतिश्री शिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांविवाहवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥ ॐनमःशिवाय ॥ इहसप्तदशेमेनांनिंदंतींशिवमच्युतः ॥ आगतस्तत्त्वमाख्यातुमित्याख्यानंनिरूप्यते ॥ १ ॥ संज्ञामिति ॥ तिरस्कारंशिवस्येतिशेषः ॥ १ ॥ इमांपार्वतीम् ॥ २ ॥ पश्चादिति ॥ अनंतरंत्वयाशिवस्यपूजार्थंपार्वतीविनिवेशितानियोजितेत्येताद्धिमवतःकृत्यंकार्यम् ॥ हिमवताकृत्येइतिपाठांतरम् ॥ दृष्टमितिमर्मोक्तिः ॥ ३ ॥ मेनापार्वतीतपसःफलंफलाभास

सापपाततदाभूमौमेनादुःखभरासती ॥ किमिदंचकृतंदुष्टेधिक्त्वांमांचदुराग्रहे ॥ ७८ ॥ इत्युक्त्वामूर्च्छितातत्रविसंज्ञाह्यभवत्क्षणात् ॥ प्रयत्नैर्विविधैःसावैसंज्ञांलेभेथमेऽनका ॥ ७९ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांविवाहवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ सूतउवाच ॥ संज्ञांलब्ध्वापुनःसाचतिरस्कारमथाऽकरोत् ॥ नारदस्याथपुत्र्याश्चनिनिंदचरितंतथा ॥ १ ॥ प्रथमंनारदस्यैवकथयामासदुर्वचः ॥ मेनोवाच ॥ प्रथमंतुलयाह्युक्तंशिवश्चेमांवरिष्यति ॥ २ ॥ पश्चाद्धिमवतःकृत्यंपूजार्थंविनिवेशिता ॥ ततोदृष्टंफलंसद्यस्तथापिवंचितालया ॥ ३ ॥ पुनस्तपस्तयातप्तंदुष्कृतंमुनिभिश्चयत् ॥ पुनर्लब्धंफलंह्येतत्पश्यतांदुःखदायकम् ॥ ४ ॥ किंकरोमिक्वगच्छामिहतंतुममजीवितं ॥ कस्यापिकिंगतंनैवममाऽपिचहतंगृहम् ॥ ५ ॥ हस्तेदीपंतथागृह्यपतितंकूपकेस्वयम् ॥ किंवश्छिन्नमिदानींतुसर्वंव्यर्थीकृतंमम ॥ ६ ॥ क्वगताऋषयोदिव्याःश्मश्रूण्युत्रोटयाम्यहं ॥ तत्पार्श्वेचैवयापत्नीसाधूर्तास्वयमागता ॥ ७ ॥ ॥ ॥ ॥ ॥

त्वेनकथयति ॥ पुनर्लब्धामिति ॥ ४ ॥ अस्मिन्विवाहेकर्तव्येमदितरस्यकस्यापिहानिर्नास्तीत्याह ॥ कस्यापीति ॥ ५ ॥ प्रत्यक्षेसत्यप्यज्ञानमभूदिति दृष्टांतमुखेनाह ॥ हस्तइति ॥ यथाकेनचित्स्वहस्तेदीपंगृहीत्वापिकूपेपतितम् तद्वदयंविवाहप्रसंगइतिभावः ॥ ६ ॥ क्वेति ॥ दिव्याइतिमर्मोक्तिः ॥ श्मश्रूणिमुखगतलोमविशेषानर्थाद्दषिणाम् ॥ श्मश्रुपुंमुखइत्यमरः ॥ उत्रोटयाम्युत्पाटयामि ॥ पत्नीवसिष्ठपत्न्यरुंधती ॥ ७ ॥ ॥

शिवमपेक्ष्यान्यदेवानांश्रेष्ठत्वंमन्यमानामेनादृष्टांतमुखेनाशिवंनिंदति ॥ हेमेत्यादिना ॥ हेमसुवर्णंहित्वात्यक्त्वाअनयापार्वत्या ॥ ८ ॥ हंसमिति ॥ उड्डीयोत्पात्य ॥
अंतर्भावितण्यर्थोयंप्रयोगः ॥ उन्नीयेतिपाठांतरम् ॥ ९ ॥ ब्रह्मजलंब्रह्मस्वरूपंबहिरावरणोदकम् ॥ गंगाजलमित्यर्थः ॥ १० ॥ तुषभक्षणंतुषस्यतुंडुल
त्वचोभक्षणम् ॥ घृतमिति ॥ त्यज्यत्यक्त्वा ॥ ल्यबादेशआर्षः ॥ भोजितंभुक्तं ॥ स्वार्थेणिच् ॥ ११ ॥ मुक्त्वात्यक्त्वा ॥ १२ ॥ चितासंभवंस्मशानस्थशवसंबंधि ॥
ईदृशमन्यैर्दुष्करमित्यर्थः ॥ १३ ॥ चर्याचरितम् ॥ वर्यान्तृषिसत्तमानितिपाठांतरम् ॥ क्रियादाक्ष्यंकर्मणिदक्षता ॥ तयापावर्त्या ॥ त्वयेतिपाठांतरम् ॥ १४ ॥

तेषांचैवाऽपराधोनसर्वंपुत्र्याकृतंस्वयम् ॥ हेमहित्वाऽनयानीतंकाचंचदुष्टयास्वयम् ॥ ८ ॥ हित्वातुचंदनंसद्योलेपितः
कर्दमस्तया ॥ हंसमुड्डीयकाकोवैगृहीतोहस्तपंजरे ॥ ९ ॥ हित्वाब्रह्मजलंदूरेपीतंकूपोदकंतया ॥ सूर्यंत्यक्त्वातुखद्यो
तंगृहीत्वासुखमीहते ॥ १० ॥ तंडुलांश्चतथाहित्वाकृतंतुतुषभक्षणम् ॥ घृतंत्यज्यतथातैलमैरंडंभोजितंस्वयम् ॥
॥ ११ ॥ सिंहसेवांतथामुक्त्वाशृगालःसेवितस्तया ॥ यज्ञगृहविभूतिंहिदूरीकृत्यतयास्वयम् ॥ १२ ॥ सेवितं
चतथाभस्मचितासंभवमित्युत ॥ सर्वान्देववरांस्त्यक्त्वाशिवार्थंतपईदृशम् ॥ १३ ॥ धिक्त्वांचतवबुद्धिंधिक्चर्यांचऋ
षिसत्तम ॥ धिक्कुलंधिक्क्रियादाक्ष्यंसर्वंतुच्छीकृतंतया ॥ १४ ॥ गृहंतुधुक्षतुह्येतन्मरणंतुममैवह ॥ पर्वतानांतथारा
जानेत्राद्दूरंकथंनहि ॥ १५ ॥ ऋषयश्चकिमर्थंमेदर्शयंतिमुखंस्वयम् ॥ साधितंकिंचसर्वैस्तुमिलित्वापातितंकुलम् ॥
॥ १६ ॥ वंध्याऽहंनकथंजातागर्भोनगलितःकथम् ॥ अथवानमृताचाऽहंमृतानपुत्रिकाकथम् ॥ १७ ॥ राक्षसैर्वा
कथंनैवभक्षितागहनेवने ॥ हतावानकथंकैश्चिन्मृताव्याघ्रवरान्नकिम् ॥ १८ ॥ छेदयामिशिरस्तेऽद्यकिंकरोमिकले
वरम् ॥ त्यक्ष्यामिवाकुतोयामिहाहाचजीवितंहतम् ॥ १९ ॥ ॥ ॥ ॥

धुक्षतुदहतु ॥ पर्वतानामिति ॥ पर्वतानांराजाहिमवान्ममनेत्रपथाद्दूरंकथंनहिगतः ॥ तन्मुखावलोकनमहंनकुर्यामितिभावः ॥ १५ ॥ १६ ॥ मेनाऽत्मा
नंदूषयति ॥ वंध्येति ॥ वंध्याप्रसवशून्या ॥ वंध्योऽफलोऽवकेशीचेत्यमरः ॥ गलितःस्खलितः ॥ १७ ॥ १८ ॥ छेदयामीति ॥ बाहुलकात्स्वार्थेणि
च् ॥ कलेवरंशरीरंत्यक्ष्यामीत्यन्वयः ॥ त्यक्ष्यामीत्यत्रत्यक्त्वापिवेतिपाठांतरम् ॥ अथवादेहमपित्यक्त्वाक्वमयागंतव्यमित्याह ॥ यामीति ॥ १९ ॥

भर्तृसंनिधौहिमाचलनिकटे ॥ २० ॥ नारदइति ॥ तस्यैपार्वत्यै ॥ तस्माइतिपाठांतरम् ॥ तत्रचतुर्मुखायेत्यर्थः ॥ किमित्युवाचनारदइत्याह ॥ यथार्थमिति ॥ निर्गुणत्वेनेत्यर्थः ॥ ज्ञातंमेनयेतित्वयेतिवाशेषः ॥ २१ ॥ तदानारदंरुषितामेनाहेत्याह ॥ तिष्ठेति ॥ २२ ॥ जगत्सृष्ट्यादिकर्तृत्वंब्रह्मलक्षणंशंकरस्याह ॥ लोककर्तेति ॥ २३ ॥ २४ ॥ किमर्थमिति ॥ तस्याःपार्वत्याःपरंश्रेष्ठंरूपंसौंदर्यम् ॥ रूपंस्वभावःसौंदर्यमाकारश्लेषयोरगीतिविश्वः ॥ व्यर्थीकर्तुंभवंतःकिमर्थं कस्मैप्रयोजनायसमुद्यताउद्युक्ताभवंति ॥ नामप्रसिद्धम् ॥ अथवापार्वतीहन्यतांभवद्भिरित्यनुषंगः ॥ सौंदर्यस्यव्यर्थीकरणमपेक्ष्यहननमेवश्रेयइतिभावः ॥ २५ ॥

इत्युक्त्वापतितासाचनायातिभर्तृसंनिधौ ॥ एतस्मिन्समयेब्रह्माह्याजगामस्वयंतदा ॥ २० ॥ नारदोऽपिवचस्तस्या उवाचऋषिसत्तमः ॥ यथार्थंसुंदरंरूपंनज्ञातंशंकरस्यच ॥ २१ ॥ तिष्ठदूरेतथातंचमेनावचनमब्रवीत् ॥ ब्रह्मापुनस्त थागत्यकथयामासतांप्रति ॥ २२ ॥ श्रोतव्यंचलयामेनेमदीयंवचनंशुभम् ॥ शंकरोलोककर्ताचहर्तापालयितास्वयम् ॥ २३ ॥ नत्वंजानासितद्रूपंकथंदुःखंसमीहसे ॥ इत्युक्ताचतथासातुब्रह्माणंवाक्यमब्रवीत् ॥ २४ ॥ किंमर्थंतुभवंत श्चव्यर्थीकर्तुंसमुद्यताः ॥ रूपंतस्याःपरंनामहन्यतांवास्वयंपुनः ॥ २५ ॥ नवक्तव्यंभवद्भिस्तुशिवायदीयतामिति ॥ इत्युक्तेचतदादेवाइंद्राद्यालोकपालकाः ॥ २६ ॥ समागत्यतदासर्वेवचनंचेदमब्रुवन् ॥ अयंवैपरमःसाक्षाच्छिवःपर मदुःखहा ॥ २७ ॥ कृपयाचभवत्पुत्र्यादर्शनंशंकरस्यच ॥ जातंचाऽद्यकृपाहेतुनाऽन्यथादर्शनंकुतः ॥ २८ ॥ अथोवा चपुनर्मेनाहन्यतांपुत्रिकाशुभा ॥ नदेयाचमयासम्यक्शंकरायकुरूपिणे ॥ २९ ॥ इत्युक्तेचतयातत्रऋषयःसप्तएव ते ॥ ऊचुस्तेवचनंसुभ्रुमध्येवयमुपागताः ॥ ३० ॥ ॥ ॥ ॥

॥ २६ ॥ शिवइति ॥ कृपयापरमदुःखहाऽत्यंतदुःखनाशकइत्याग्रिमेणान्वयः ॥ परसुखावहइतिपाठांतरम् ॥ २७ ॥ भवदिति ॥ भवत्पुत्र्यास्तुशंकरस्यदर्शनंतत्कृ पाहेतुनाकृपयैवाद्यजातम् ॥ अन्यथाकृपायाहेतुत्वास्वीकारेदर्शनंकुतःकथंभवेदित्यर्थः ॥ २८ ॥ २९ ॥ ऋषयइति ॥ सप्तएवतेइत्यत्रसर्वएवहीतिपाठांतरम् ॥ एतस्मिन्विवाहकार्येविषयेवयंमध्यस्थाइतिनकोपिविरोधइत्याह ॥ सुभ्र्विति ॥ हेसुभ्रुसुष्ठुभ्रुवौयस्यास्तस्याःसंबुद्धौ ॥ ३० ॥ ॥

॥३१॥ कन्यादानयोग्योयदिकन्यांयाचेततदाऽवश्यंतस्मैकन्यादेयेत्याह॥दानपात्रमिति ॥दानपात्रंदानसंप्रदानत्वयोग्यः॥ योग्यभाजनयोःपात्रमित्यमरः ॥ ॥ ३२ ॥ निराकरोद्धिक्कृतवतीत्यर्थः ॥ अत्रदुष्टवाक्यंतथाकरोदितिपाठांतरम् ॥ दास्येदद्यामहमितिलभ्यते ॥ ३३ ॥ तदाहिमालयोप्यागत्यकुतोवात्वंदुःखितासीतिमेनांप्रतिपृष्टवानित्याह ॥ हिमालयइति ॥ विकलादुःखिताव्यग्रावा ॥ विकत्थसेनिंदसीत्यर्थः ॥ ३४ ॥ निग्रहेति ॥ कर्तेत्यत्रताच्छील्येतृन् ॥ ३५ ॥ कर्तुमिति ॥ इच्छसीच्छेत्यर्थः ॥ ३६ ॥ शिवायपार्वत्यादानमपेक्ष्यसागरेक्षेपणमेववरमित्याह ॥ गृहीत्वेत्यादिना ॥ ३७ ॥ ३८ ॥

विरुद्धंचैवयत्कार्यंवयंमन्यामहेकथम् ॥ अयंवैपरमोलाभोदर्शनंशंकरस्यच ॥ ३१ ॥ दानपात्रंतथाभूत्वाऽऽगतश्चसंदिरेतव ॥ अतःशुभतरंकिंतुशिवोद्धारमुपागतः ॥ ३२ ॥ इत्युक्तेचपुनर्मेनाऋषिवाक्यंनिराकरोत् ॥ शस्त्रैर्वाघातयाम्यद्यनदास्येशंकरायवै ॥ ३३ ॥ हिमालयःसमागत्यविकलाऽसिकथंप्रिये ॥ केकेसमागतागेहंकथंचैतान्विकत्थसे ॥ ३४ ॥ शंकरस्तुमयाज्ञातःसर्वेषांप्रतिपालकः ॥ निग्रहानुग्रहौकर्तासंपूज्योजगतामिह ॥ ३५ ॥ मुंचदुःखंतथाकार्यंकर्त्तुमिच्छसिसांप्रतम् ॥ तेनोक्तेचतथातस्मैमेनावाक्यमुपाददे ॥ ३६ ॥ हिमवन्श्रूयतामेतच्छ्रुत्वाकर्तुमिहाऽर्हसि ॥ गृहीत्वातनुजांत्वेतांबध्वाकंठेतुपर्वतात् ॥ ३७ ॥ गत्वाचसागरेस्वामिन्क्षिप्त्वात्वंचसुखीभव ॥ नदेयाचशिवेपुत्रीनिश्चितंमेवचःपुनः ॥ ३८ ॥ यदिदास्यसित्वंपुत्रींत्यक्ष्याम्येतत्कलेवरम् ॥ इत्युक्तेचतयातत्रपार्वतीस्वयमागता ॥ ३९ ॥ पार्वत्युवाच ॥ मातस्तेविपरीतावैबुद्धिस्त्वांसमुपागता ॥ धर्मावलंबनात्वंतुकथंधर्मंप्रहास्यसि ॥ ४० ॥ अयंवैपरमःसाक्षात्सर्वेषांयोनिरुच्यते ॥ शंभुश्चशंकरश्चैवदेवानांप्रभुरीश्वरः ॥ ४१ ॥ अधिष्ठानंतथाकर्त्तापालकश्चसनातनः ॥ यदग्रेदेवताःसर्वाआयाताःकिंकरीकृताः ॥ ४२ ॥ ॥ ॥ ॥

॥ ३९ ॥ मातरिति ॥ हेमातस्तेतवबुद्धिर्विपरीताकार्याकार्यविचाराक्षमासंजाताऽतोहंत्वांसमुपागता ॥ अथवातेबुद्धिर्विपरीतासतीत्वांसमुपागताप्राप्ता ॥ वस्तुतोधर्मावलंबनाधर्ममार्गानुसारिणीत्वंतुकथंधर्मंप्रहास्यसित्यक्ष्यसीत्यर्थः ॥ ४० ॥ पार्वतीरुद्रस्यगुणान्प्रशंसति ॥ अयमिति ॥ सर्वेषांस्थावरजंगमानांजगतांयोनिःकारणम् ॥ ४१ ॥ अधिष्ठानमाश्रयः ॥ सनातनःपुरातनः ॥ किंकरीकृताःसेवकीकृताः ॥ ४२ ॥ ॥ ॥

ततइति ॥ तस्मादिति ततः ॥ पंचम्यर्थेतसिल् ॥ शिवादित्यर्थः ॥ शुभतरःश्रेष्ठः ॥ हेहितकारिणि ॥ ४३ ॥ देहीति ॥ दानंपार्वत्याइतिशेषः ॥ अथवादीय तइतिदानंकन्यारूपंद्रव्यमित्यर्थः ॥ सार्थकंसफलमित्यर्थः ॥ ४४ ॥ यदीति ॥ अन्यमुत्तममुत्तमत्वेनत्वदभिमतंनाहंवृणे ॥ नान्यपुरुषेणपाणिंग्राहयामीत्यर्थः ॥ पार्वत्यन्योक्तिव्याजेनमहादेवंप्रशंसति ॥ सिंहभागमिति ॥ सिंहभोग्यांशमित्यर्थः ॥ लभ्येदित्यार्षरूपम् ॥ हेशुभेमातः ॥ ४५ ॥ वृतइतित्रिवारकथनेनहरए वपतिर्नान्यइतिनिश्चितामितिगम्यते ॥ ४६ ॥ गृहीत्वेति ॥ तत्तदासामेनादंतान्घर्षयतीसती ॥ नुमभावआर्षः ॥ कलेवरेशरीरे केशेषुगृहीत्वेतिवत्सप्तमी ॥

ततःशुभतरःकोनुवदत्वंहितकारिणि ॥ उत्तिष्ठत्वंप्रयत्नेनजीवितंसफलंकुरु ॥ ४३ ॥ देहिदानंशिवायैवह्याश्रमं सार्थकंकुरु ॥ त्यजदुःखंपरंतापंहित्वासुखमवाप्नुहि ॥ ४४ ॥ यदिनदास्यसित्वंचनवृणेऽन्यंतथोत्तमम् ॥ सिंहभा गंकथंलभ्येत्सृगालःपरमंशुभे ॥ ४५ ॥ मनसावचसादेविकर्मणावाहरःस्वयम् ॥ वृतोवृतोवृतश्चैवयदिच्छसितथा कुरु ॥ ४६ ॥ उमावचनमाकर्ण्यगृहीत्वातत्कलेवरे ॥ मुष्टिभिःकूर्परैश्चैवदंतान्घर्षयतीतथा ॥ ४७ ॥ ताडयामा सतांपुत्रींविकलाइवसातदा ॥ येचाऽन्येऋषयश्चैवनारदाद्याश्चयेपुनः ॥ ४८ ॥ तद्धस्तात्तांपरिच्छिद्यनीत्वादूरत रंस्थिताः ॥ तांचतथाविधांदृष्ट्वाभर्त्सयामासवैतदा ॥ ४९ ॥ किमेनांचकरिष्यामिदुष्टांग्रहवतींध्रुवम् ॥ गरंददामि तांपुत्रींक्षिपामिवाऽथकूपके ॥ ५० ॥ शस्त्रैर्वाछेदयाम्येतांसागरेवाक्षिपाम्यहम् ॥ स्वीयंवाऽथशरीरंवैत्यक्ष्यामिवाऽ थकूपके ॥ ५१ ॥ वरश्चकीदृशोलोकेलब्धश्चदुष्टयापुनः ॥ नमातानपिताबंधुर्नभ्रातानचगोत्रजः ॥ ५२ ॥ नरूपंन चचातुर्यंनगृहंचशुभंपुनः ॥ नवस्त्रंनाऽप्यलंकारःसहायानशुभास्तथा ॥ ५३ ॥ वाहनंनशुभंचाऽस्यनवयोनधनंत था ॥ नपावित्र्यंनविद्याचकिंदृश्यमेकमेवयत् ॥ ५४ ॥ ॥ ॥ ॥

पुत्रींपार्वतींगृहीत्वामुष्टिभिःकूर्परैश्चविकलामूर्खेवोन्मत्तेववाताडयामासेतिसमुदितान्वयः ॥ ४७ ॥ ४८ ॥ तद्धस्तादिति ॥ तद्धस्तान्मेनाहस्तात्तांपार्वतींपरि च्छिद्यसमाकृष्य भर्त्सयामासेत्यन्वयः ॥ मेनेतिशेषः ॥ ४९ ॥ मेनाचिंतयति ॥ किमित्यादिना ॥ ग्रहवतींदुराग्रहवतीमित्यर्थः ॥ दुष्टाग्रहवतीमितिपाठांतरम् ॥ गरंविषम् ॥ ५० ॥ ५१ ॥ कीदृशोविवाहानर्हः ॥ दुष्टयापार्वत्या ॥ मेनातदेवनिरूप्याशिवंदूषयति ॥ नेत्यादिना ॥ माताअस्येत्यग्रिमेणान्वयः ॥ अ स्याशिवस्येत्यर्थः ॥ एवंपित्रादिष्वप्यन्वयोनुसंधेयः ॥ ५२ ॥ ५३ ॥ किंदृश्यमिति ॥ यदेकमेवलिंगंतत्किंदृश्यमितिबीभत्सोक्तिरियम् अथवायत्किंचिद्दृ श्यंद्रष्टुंयोग्यंकुलशीलादिकंतन्नैकमपिनास्तीत्यर्थः ॥ ५४ ॥ ॥ ॥ ॥

एतस्मिन्निति ॥ इदंवक्ष्यमाणवचनम् ॥ ५५ ॥ किंपार्वतींप्रत्यब्रवीदितितदाह ॥ पितृणामिति ॥ हेमेनेत्वंपितृणांमानसीमनउद्भवापुत्र्यसीत्यर्थः ॥ किंचाहिमव
तःपत्नी ॥ ५६ ॥ शिवस्यविवाहार्हत्वसामग्रींनिरूपयतिविष्णुः ॥ सहायाइति ॥ सहायाःसहचराईदृशामहात्मानइत्यर्थः ॥ ५७ ॥ विरुद्धमिति ॥ किंदेवादिभि
विरुद्धंकथ्यतेकथ्येतापितुनेत्यर्थः ॥ त्वयातुकथ्यतइत्यर्थः ॥ देवाभिप्रेतार्थाच्छुभतरमतिश्रेष्ठांकिंनुनकिंचिदित्यर्थः ॥ अथवात्वयेति ॥ अतःपरंशुभतरंत्वया
किंनुकर्तव्यमिदमेवशुभतरमित्यर्थः ॥ ५८ ॥ मेनायाअज्ञानंकथयति ॥ शिवमिति ॥ तर्हिकीदृशःशिवइतितदाह ॥ निर्गुणइति॥तेनैवेति॥शिवेनैवेत्यर्थः ॥
प्रकृतिःप्रधानंनिर्मितोत्पत्तिंप्रापिता ॥ ममयोनिरप्स्वंतःसमुद्रइतिश्रुतेः ॥ ५९ ॥ तत्पार्श्वेप्रकृतिपार्श्वे ॥ ताभ्यामिति ॥ प्रकृतिपुरुषाभ्यामित्यर्थः ॥ निर्मितइ

किंविलोक्यमयापुत्रीदीयतेकिंकरोम्यहम् ॥ एतस्मिन्समयेविष्णुःसमागत्याऽब्रवीदिदम् ॥ ५५ ॥ पितृणांत्वंशु
भापुत्रीमानसीगुणसंयुता ॥ पत्नीहिमवतःसाक्षाद्ब्रह्मणःकुलसमुद्भवा ॥ ५६ ॥ सहायाश्चेदृशालोकेधन्याऽसिकिंव
दाम्यहम् ॥ धर्मस्याऽधारभूताऽसिकथंधर्मंप्रहास्यसि ॥ ५७ ॥ देवैश्चऋषिभिश्चैवब्रह्मणावामयातथा ॥ विरुद्धंक
थ्यतेकिंचत्वयाशुभतरंनुकिम् ॥ ५८ ॥ शिवंत्वंचनजानासिनिर्गुणःसगुणोह्यभूत् ॥ तेनैवनिर्मितादेवीप्रकृतिर्मूलका
रणम् ॥ ५९ ॥ तत्पार्श्वेचतथातेननिर्मितःपुरुषोत्तमः ॥ ताभ्यांचाऽहंतथाब्रह्मातातश्चगुणरूपतः ॥ ६० ॥ अवती
र्णःस्वयंशंभुर्लोकानांहितकारकः ॥ ततोवेदास्ततोदेवायत्किंचिद्दृश्यतेजगत् ॥ ६१ ॥ स्थावरंजंगमंयच्चतत्सर्वंशं
करादभूत् ॥ तद्रूपंवर्ण्यतेलोकेज्ञायतेकेनवापुनः ॥ ६२ ॥ मयानब्रह्मणायोवैवर्षाणांतुसहस्रकम्॥ तस्यपारोनवैल
ब्धोह्यन्येनवर्ण्यतेकथम् ॥ ६३ ॥ ॥ ॥ ॥

त्यध्याहारेणान्वयः ॥ गुणरूपतःसत्वरजोगुणतइत्यर्थः ॥ ६० ॥ ननुप्रकृतिपुरुषाभ्यांविष्णुब्रह्मवच्छंभुरपितमोगुणतोजातइत्यतआह ॥ अवतीर्णइति ॥
प्रादुर्भूतइत्यर्थः ॥ ततइति ॥ वेदाजाताइतिशेषः ॥ शंकरादित्यग्रिमेणान्वयः ॥ ऋचःसामानिजज्ञिरइतिश्रुतेः ॥ ६१ ॥ स्थावरंवृक्षादिकं ॥ जंगमंगच्छ
तीतितथा ॥ मनुष्यपशुपक्ष्यादिकमित्यर्थः ॥ तद्रूपमिति ॥ केनतद्रूपंशिवस्वरूपंवर्ण्यते ॥ वर्णितुमशक्यमित्यर्थः ॥ यतोवाचोनिवर्तंते ॥ अप्राप्यमनसास
हेतिश्रुतेः ॥ ६२ ॥ अस्मदादिभिरपितद्रूपमवर्ण्यमस्तीतिकथमन्येनवर्ण्यतेत्याह ॥ मयेति ॥ ६३ ॥ ॥ ॥

वास्तवंतत्स्वरूपमाह ॥ सत्येति ॥ सत्यमयोज्ञानमयश्चेत्यर्थः ॥ तादात्म्यार्थेमयट् ॥ सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ व्याप्यव्यापकःव्याप्येजगतिव्यापकः सर्वांतर्यामीत्यर्थः ॥ अजरइति ॥ जराशून्योनित्यइत्यर्थः ॥ अमरोमरणशून्यः ॥ सवाएषमहानजआत्माऽजरोऽमरोऽमृतोऽभयोब्रह्मेतिबृहदारण्यकश्रुतेः ॥ सर्वाध्यक्षःसर्वसाक्षी ॥ ६४ ॥ आब्रह्मस्तंबपर्यंतंसर्वंजगच्छिवादेवोदपद्यतेत्याह ॥ अहमित्यादिना ॥ अन्नसयथोर्णनाभिरतंतुनोच्चरेद्यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिव्युच्चरंतीतिबृहदारण्यकश्रुतिःप्रमाणत्वेनग्राह्या ॥ ६५ ॥ ६६ ॥ शिवस्य विलक्षणस्वरूपमाह ॥ अरूपइति ॥ प्राकृतस्वरूपशून्यइत्यर्थः ॥ अचक्षुरश्रोत्रमित्यादिश्रुतेः ॥ सरूपोबाहुनेत्राद्यवयवयुक्तइत्यर्थः ॥ नमोहिरण्यबाह

सत्यज्ञानमयश्चैवव्याप्यव्यापकएवच ॥ अजरश्चामरश्चैवसर्वाध्यक्षःसमीपगः ॥ ६४ ॥ अहंब्रह्माहरश्चैवदेवाःसर्वेपुरातनाः ॥ सूर्यश्चचंद्रमाश्चैवग्रहाःसर्वेशुभावहाः ॥ ६५ ॥ पर्वताश्चैवनद्यश्चवृक्षाश्चधनदस्तथा ॥ ब्रह्मादितृणपर्यंतंयत्किंचिदृश्यतेजगत् ॥ ६६ ॥ तत्सर्वंशिवतोजातंनाऽत्रकार्याविचारणा ॥ अरूपश्चसरूपश्चजायतेशंकरःस्वयम् ॥ ६७ ॥ बीजाद्वृक्षप्ररोहश्चनानात्वमुपजायते ॥ अंतेचफलमेवस्यात्तस्मात्फलमुदाहृतम् ॥ ६८ ॥ आदौमध्येशिवश्चैवअंतेशिवउदाहृतः ॥ सर्वंशिवमयंचैतच्छिवःसर्वमयस्तथा ॥ ६९ ॥ सूत्रेचैवतुपुष्पाणिपुष्पेषुसूत्रमुच्यते ॥ एवंशिवश्चसर्वेषुशिवेसर्वंतथास्मृतम् ॥ ७० ॥ अहंशिवःशिवश्चाऽहंत्वंचाऽपिशिवएवच ॥ सर्वंशिवमयंब्रह्मशिवात्परंनकिंचन ॥ ७१ ॥ अज्ञानादन्यभावश्चज्ञानेभ्यःसमुदाहृतः ॥ कारणंकार्यवस्तुत्वेएकएवनचाऽपरः ॥ ७२ ॥

वइत्यादिश्रुतेः ॥ ६७ ॥ यथैकेनैवबीजेननानावृक्षाद्युत्पत्तिरेवमेकेनशिवेनैतन्नानाप्रपंचंजगदुत्पादितमित्याह ॥ बीजादिति ॥ ६८ ॥ शिवस्यत्रिकालाबाध्यत्वमाह ॥ आदाविति ॥ सर्वत्रशिवप्राचुर्येशिवेतुसर्वमयत्वंचाह ॥ सर्वमिति ॥ ६९ ॥ तत्रदृष्टांतमाह ॥ सूत्रइति ॥ सर्वंखल्विदंब्रह्मेतिश्रुत्यर्थमनुसंधायोपसंहरति ॥ एवमिति ॥ ७० ॥ स्वस्यापिशिवमयत्वमाह ॥ अहमिति ॥ सर्वमिति ॥ सर्वंशिवमयंब्रह्मैव ॥ शिवात्परमन्यत्किंचनकिमपिवस्तुनास्तीत्यर्थः ॥ सर्वंखल्विदंब्रह्मनेहनानास्तिकिंचनेतिश्रुतेः ॥ सएषनेतिनेत्यात्मेतिश्रुतेश्च ॥ ७१ ॥ अज्ञानादिति ॥ अन्यभावःइदंसर्वंशिवादन्यदितिज्ञानमज्ञानादुत्पद्यतइत्यर्थः ॥ ७२ ॥ ॥ ॥ ॥ ॥

ज्ञानेतुकार्यकारणयोरैक्यमेवगम्यतइत्याह ॥ कारणमित्यादिना ॥ कार्यवस्तुत्वेकार्यसत्यत्वे ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतेरि तिभावः ॥ ननुतर्हिकिंकारणंकार्यंचेतितदाह ॥ कारणंचेति ॥ ७३ ॥ ज्ञानिनांकार्यकारणयोर्भेदोनदृश्यतइत्याह ॥ ज्ञानिनामिति ॥ तदेवविशदयति ॥ स र्वमिति ॥ ७४ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांमेनाऽज्ञानयोगोनामसप्तदशोऽध्यायः ॥ १७ ॥ ओंनमःशिवाय ॥ अस्मिन्नष्टादशोऽ ध्यायेमेनायैभगवान्हरिः ॥ शिवस्वरूपज्ञानार्थंवेदांतार्थमुपादिशत् ॥ १ ॥ विष्ण्वादिदेवाःशिवयोर्विवाहंविधाप्यमेनाहिमवद्गिरिभ्यां ॥ संस्थाप्यकैलासगि रौशिवौतेतदाज्ञयास्वस्वगृहंप्रयाताः ॥ २ ॥ एतस्मादिति ॥ दृश्यंकार्यात्मकंजगत् ॥ वेदसंमतमिति ॥ विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् ॥ सर्वोह्येष रुद्रइत्यादिश्रुतिसंमतमित्यर्थः ॥ १ ॥ अन्यथाभावोऽतस्मिंस्तद्बुद्धिर्भवतीतिशेषः ॥ ज्ञानेबाधज्ञानेसतिवस्त्वधिष्ठानमेवप्रदृश्यतेप्रमाविषयीक्रियते नत्वारोपित

कारणंचशिवःसाक्षात्कार्यंदृश्यंमतंबुधैः ॥ अज्ञानाच्चैवकार्येतुकारणेभेदइष्यते ॥ ज्ञानिनांनैवभेदोऽस्तिसर्वंशिवम यंजगत् ॥ ७३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांमेनाऽज्ञानयोगोनामसप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥

॥ विष्णुरुवाच ॥ एतस्माच्चशिवादन्यद्दृश्यंनैवभवेदिह ॥ वस्तुतस्तुशिवइतिप्रसिद्धंवेदसंमतम् ॥ १ ॥ अज्ञानाद न्यथाभावोज्ञानेवस्तुप्रदृश्यते ॥ स्थाणौतुपुरुषभ्रांतिरज्ञानादथजायते ॥ २ ॥ ज्ञानेजातेतथास्तंभेवस्तुज्ञानप्रदर्श नम् ॥ रज्जौतुसर्पविज्ञानमज्ञानसंभवंनृणां ॥ ३ ॥ ॥ ॥ ॥ ॥

प्रकारः ॥ सर्वंज्ञानंधर्मिण्यभ्रांतंप्रकारेतुविपर्ययइतिन्यायादारोपितस्यावस्तुत्वादितिभावः ॥ अत्रदृष्टांतयति ॥ स्थाणाविति ॥ इदंत्वेनज्ञातेऽपिस्तंभादिरूपेस्था णौस्तंभत्वेनाज्ञानाद्भ्रांतिरुपपद्यतइतिभावः ॥ २ ॥ ज्ञानइति ॥ अयंस्थाणुरित्याकारकेबाधज्ञानेजातेसतीत्यर्थः ॥ स्तंभइति ॥ स्तंभस्वरूपेस्थाणावित्यर्थः ॥ वस्तुज्ञानप्रदर्शनंवस्तुज्ञानस्ययथार्थज्ञानस्येदंत्वावच्छिन्नविशेष्यकस्तंभत्वप्रकारकज्ञानस्यप्रदर्शनमनुभवोऽनुव्यवसायरूपोजायतइत्यध्याहारेणान्वयः ॥ तादृशबाधज्ञानानंतरंस्तंभंसाक्षात्करोमीत्याकारकआत्मविशेष्यकइदंत्वावच्छिन्नविशेष्यकत्वविशिष्टस्तंभत्वप्रकारकज्ञानप्रकारकोऽनुव्यवसायोजायतइति भावः ॥ ननुयथापुरोवर्तिवस्तुनिपुरुषत्वव्याप्यकरचरणादिमान्वृक्षत्वव्याप्यवक्रकोटरादिमान्वाऽयमित्याकारकविशेषदर्शनाभावदशायांपुरोवर्तिनिपुरुषत्व वृक्षत्वरूपकोटिद्वयोपस्थित्यातादृशविरुद्धकोटिद्वयावगाहीसंशयएवोत्पद्यते नतुतदभाववतितत्प्रकारकनिश्चयात्मकज्ञानरूपाभ्रांतिःप्रसिद्धातथात्रापीत्य स्वरसाद्दृष्टांतांतरमाह ॥ रज्जाविति ॥ अज्ञानसंभवंरज्जुत्वविषयकाज्ञानोत्पन्नमित्यर्थः ॥ ३ ॥ ॥ ॥

संजातइति ॥ विज्ञाने नायंसर्पोऽपित्वियंरज्जुरेवेत्याकारकेबाधज्ञानइत्यर्थः ॥ संपन्नइतिक्वचित्पाठः ॥ शुक्ताविति ॥ रजतज्ञानमज्ञानसंभवमित्यनुषज्यते ॥ कश्चनविवेकीपुरुषोध्यायन्विवेकतोविचारयन्सन्पश्यत्यधिष्ठानमेवशुक्तित्वादिनाजानातीत्यर्थः ॥ ध्यायन्नित्यत्रभ्रांत्येतिपाठांतरम् ॥ ४ ॥ तदेवविशदयति ॥ विवेकइति ॥ अत्रेदंज्ञेयम् ॥ रज्जौसर्पवुद्धिश्चान्यत्रप्रसिद्धसर्पादिविषयकप्रमारूपानुभवजनितसंस्कारजन्यास्मृतिरूपैवेतिमायावादिशांकरमतम् ॥ द्वैतवादिनांमध्वाचार्याणांमतेतुअसदेवेदंप्रत्यभादितिप्रत्ययानुरोधादसद्भूतसर्पएवपुरोवर्तिरज्ज्वादिपदार्थेतादात्म्येनभासतइति ॥ नैयायिकानांतुमते सर्पादिवृत्तिसर्पत्वंतव्द्यक्तित्वेनज्ञातंपुरोवर्तिरज्ज्वादिपदार्थइदंत्वेनज्ञातेसर्पशरीरसंस्थानगतदैर्ध्यवक्रत्वादि साधारणधर्मदर्शनवशात्समवायसंबंधावच्छिन्नप्रकारतयाभासतइति ॥ रज्जौसर्पइतिज्ञानेप्रसिद्धरज्जुसर्पत्वयोरलीकएवसमवायोभासतइत्यसत्ख्यातिवादिवाचस्पतिमिश्रमतम् ॥ मीमांसकमतेत्वयथार्थ

संजातेचैवविज्ञानेरज्जुरेवनचाऽन्यथा ॥ शुक्तौतुरजतज्ञानंध्यायन्पश्यतिकश्चन ॥ ४ ॥ विवेकेचसमुत्पन्नेशुक्तिरेव नसंशयः ॥ तथैवाऽज्ञानजाबुद्धिःशिवादन्यत्रयाभवेत् ॥ ५ ॥ एवंचज्ञानदृष्टीनांशिवःशिवशिवस्तथा ॥ अन्यन्निदर्शनंदेविश्रूयतांचवदाम्यहम् ॥ ६ ॥ यथाचनटकःकश्चिद्वेषांतरसमीहया ॥ गृण्हातिविविधंवेषंवस्तुलेनटएवच ॥ ॥ ७ ॥ अज्ञातॄणांमनोत्दृत्वाप्रतार्यधनमाहरेत् ॥ ज्ञाताविहसतेतत्रनटेनैवाऽऽत्दृतंधनम् ॥ ८ ॥ तथैवज्ञानवान्देवि शिवादन्यन्नपश्यति ॥ अज्ञानाद्विविधंरूपंपश्यतीतिसुनिश्चितम् ॥ ९ ॥ देहीवस्त्राण्यनेकानिदधातिविविधेहया ॥ वस्त्राणिविविधानीहधारकस्त्वेकएवसः ॥ १० ॥ तथैवशिवरूपंतुसंयोगाद्विविधंभवेत् ॥ वस्तुतोबंधनंनास्तिह्याकाररहितेशिवे ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥

ज्ञानमेवाप्रसिद्धमित्यलमप्रस्तुतप्रसक्त्या ॥ प्रकृतंदार्ष्टांतिकमुपन्यस्यति ॥ तथैवेति ॥ शिवादन्यत्रसर्वंजगच्छिवाद्भिन्नमित्याकारिकेत्यर्थः ॥ ५ ॥ उपसंहरति ॥ एवंचेति ॥ ज्ञानदृष्टीनांभगवदपरोक्षज्ञानिनामित्यर्थः ॥ शिवशिवइति ॥ मंगलानामपिमंगलरूपइत्यर्थः ॥ अत्रशिवःशिवइतिपाठांतरम् ॥ निदर्शनंदृष्टांतः ॥ ६ ॥ मेनायाःशिवस्वरूपज्ञानार्थंविष्णुरन्यदप्युदाहरति ॥ यथेति ॥ नटकोनर्तकोवेषांतरसमीहयाऽन्यवेषंग्रहीतुमिच्छयाविविधंनानाविधंवेषंराजादिस्वरूपंगृण्हाति ॥ वस्तुत्वेपरमार्थतस्तुसनटएवेत्यर्थः ॥ ७ ॥ ज्ञातेति ॥ नटेनैवधनंत्दृतमितिनिश्चित्यज्ञाताऽज्ञान्प्रतिविहसतइत्यर्थः ॥ आर्षमात्मनेपदम् ॥ ८ ॥ ९ ॥ एकत्वेदृष्टांतमुदाहरति ॥ देहीति ॥ १० ॥ संयोगादितिप्रकृतिसंयोगादित्यर्थः ॥ बंधनाभावेहेतुगर्भंविशेषणमाह ॥ आकारेति ॥ ११ ॥

॥ १२ ॥ प्रकृतिसंयोगाच्छिवस्यानेकविधस्वरूपत्वेदृष्टांतांतरमाह ॥ यथेति ॥ यथाजपाकुसुमसंयोगात्स्फाटिकमणिरनेकविधस्वरूपोदृश्यतेतथेत्यर्थः ॥
॥ १३॥विवेकता विवेचकत्वमित्यर्थः ॥ तस्याः प्रकृतेः ॥ प्रकृतेरिति ॥ परंश्रेष्ठं ॥ महतःपरमव्यक्तमव्यक्तात्पुरुषःपरइतिभगवद्गीतोक्तेः ॥ १४ ॥ सएवेति ॥
ब्रह्मस्वरूपः शिवएवेत्यर्थः ॥ गुणरूपेणसगुणस्वरूपेण ॥ तस्येति ॥ नजानीमइतिद्विरुक्त्यातत्तत्त्वस्यसर्वथाज्ञानविषयत्वंनास्तीतिगम्यते ॥ ब्रह्माद्याश्चवयंप्र

यावद्देहंप्रजायेततावद्वैबंधनंदृढम् ॥ निवृत्तेचाऽप्यहंकारेकर्त्ताशिवउदाहृतः ॥ १२ ॥ यथाचस्फटिकश्चैवसंयोगाद्वि
विधोभवेत् ॥ तथाप्रकृतिसंयोगाच्छिवस्याऽनेकतामता ॥१३॥ तथाविवेकतातस्याग्रहणेमोचनेशिवे ॥ प्रकृतेश्चपरं
ब्रह्मयत्तच्छिवउदाहृतम्॥१४॥सएवगुणरूपेणह्यवतीर्णोहरःस्वयम्॥तस्यतत्त्वंनजानीमोनजानीमोवयंप्रभो॥१५॥
तस्मात्त्वंहिमवत्पत्निदुःखंमुंचशिवंभज ॥ तस्यास्तुकोमलंकिंचिन्मनोविष्णुप्रबोधितम् ॥ १६ ॥ एतस्मिन्नंतरेरुद्रो
नारदेनप्रबोधितः ॥ तावत्पार्श्वेगतोयावद्रुद्रेणरूपमुत्तमम् ॥ १७ ॥ धृतंतुभक्तवात्सल्यात्कृपालुत्वंप्रदर्शितम् ॥
सुंदरंसुभगंदृष्ट्वामोहंप्राप्तायथापुरा ॥ १८ ॥ शिवंपश्यपुनस्तत्रनारदोवाक्यमब्रवीत् ॥ साददर्शशिवंतत्रश्रूयतां
कीदृशंप्रभुम् ॥ १९ ॥ सूर्यकोटिप्रतीकाशंसुनेत्रैर्भूषणैर्युतम् ॥ मुकुटेनविराजंतंविचित्रवसनंशुभम् ॥ २० ॥ वाहन
स्यतथाशोभावर्णितुंनैवशक्यते ॥ सुप्रसन्नंसुहासंचसर्वैर्देवगणैर्युतम् ॥ २१ ॥ सूर्येणछत्रितोयोऽसौचंद्रेणवीजित
स्तथा ॥ सिद्धयोऽष्टौप्रनृत्यंचकुर्वंतिस्मतदग्रतः ॥ २२ ॥ गंगाचयमुनाचैवचामरेदधतुःशुभे ॥ ब्रह्माचैवतथाविष्णु
रिंद्राद्यादेवतास्तथा ॥ २३ ॥ स्वीयंस्वीयंतथावेषंसंभूष्यपुरतोऽचरन् ॥ जयजयेतिभाषंतोनानाऋषिगणास्तथा॥
॥ २४ ॥ परंब्रह्मगृणंतस्तेपताकाभिरलंकृताः ॥ विश्वावसुमुखास्तत्रह्यप्सरोगणसंयुताः ॥ २५ ॥

भोरितिपाठांतरम् ॥ १५ ॥ विष्णुप्रबोधितंविष्णुप्रेरितम् ॥ १६ ॥ भक्तवात्सल्याद्रुद्रेणधृतंसुस्वरूपंदृष्ट्वामेनामोहिताऽभूदित्याह ॥ तावदित्यादिना ॥
अत्रतावन्मासोगतइतिपाठांतरम् ॥ १७ ॥ १८ ॥ १९ ॥ शिवस्वरूपंवर्णयति ॥ सूर्यकोटीत्यादिना ॥२०॥२१॥ तदानींदेवादयोऽपिसेवामकुर्वन्नित्या
ह ॥ सूर्येणेत्यादिना ॥ २२ ॥ २३ ॥ अचरन्संचेरुरित्यर्थः ॥ २४ ॥ विश्वावसुमुखा विश्वावस्वाख्यगंधर्वप्रमुखाः ॥ २५ ॥ ॥

गणाइति ॥ शिवगणानंदिप्रमुखाइत्यर्थः ॥ २६ ॥ तत्त्वानि चतुर्विंशतिस्तत्त्वानिमूर्तिमंतिसंतिपुरतोययुः॥ तत्त्वानीत्यत्रतत्रापीतिपाठांतरम् ॥ समुद्राइति॥अत्रसमुद्रादिपदेनतदभिमानिन्योदेवताग्राह्याः ॥ एवमनंतरोदाहृततत्वपदेनापिदेवताग्राह्या ॥२७॥ हेऋषिसत्तमाः ऋषिश्रेष्ठाः ॥ २८ ॥ चित्रगताइवचित्रलिखितेव ॥ सांधिकार्यमविवक्षितम् ॥ मेनायाथार्थ्येनदेववर्णितांशिवस्वरूपंमत्वास्वपुत्र्याःसुदैवंप्रशंसति ॥ यथेत्यादिना ॥ यथाचेत्यत्रपश्चाच्चेतिपाठांतरम्

गायंतोऽप्यग्रतस्तस्यशोभायुक्ताःपरस्परम् ॥ गणास्तत्रचवाद्यानिमृदंगादिक्रमेणतु ॥ २६ ॥ ह्यकुर्वंतपरंतत्रतत्वानिपुरतोययुः ॥ समुद्राश्चतथानद्योनानाभूषाविभूषिताः ॥ २७ ॥ तस्मिंश्चसमयेतत्रशोभाचाऽस्यमहात्मनः ॥ जातातांवर्णितुंकोवाशक्नोतिऋषिसत्तमाः ॥ २८ ॥ तंदृष्ट्वाचतथामेनाक्षणंचित्रगताइव ॥ यथाचवर्णितंदेवैर्यद्रूपंतत्तथैवहि ॥ २९ ॥ धन्यापुत्रीमदीयाचयया ऽसौपरवान्कृतः ॥ वर्णनंचतदातस्यकुलालज्जापराभवत् ॥ ३० ॥ शिवोऽपिचतथाद्वारिगतोदेवगणैःसह ॥ मेनातंपूजयामासब्रह्मविष्णुसमन्वितम् ॥३१॥ तावत्स्त्रियःसमाजग्मुर्हित्वाकामाननेकशः ॥ मज्जनंकुर्वतीकाचित्चूर्णेनसंयुतायया ॥ ३२ ॥ काचित्तुस्वामिनःसेवांविहायसखिसंयुता ॥ चामरेणतथायुक्तादर्शनार्थंशिवस्यच ॥ ३३ ॥ काचित्तुबालकंहित्वाह्यतृप्तंद्रष्टुमाययौ ॥ रशनांबध्नतीकाचित्तथैवसंयुताययौ ॥ ३४ ॥ वस्त्रंचविपरीतंचधृत्वाकाचिदुपाययौ ॥ काचिद्धस्तेशलाकांचधृत्वांजनसमन्विता ॥ ३५ ॥ आदर्शंचतथाऽन्यस्मिन्नीत्वानेत्रमुपाययौ ॥ काचित्तुभोजनार्थंचस्थितंचस्वामिनंतदा ॥ ३६ ॥ हित्वान्नेनसमायुक्तादर्शनार्थंप्रभोरिति ॥ दोहनार्थंस्थिताकाचित्तद्धित्वाह्यपराययौ ॥ ३७ ॥ काचित्तुकामिनीपादंरंजयंतीयदातदा ॥ श्रुत्वोद्घोषंचतद्धित्वादर्शनार्थमुपागता ॥ ३८ ॥ ॥ ॥ ॥ ॥ ॥

॥२९॥३०॥३१॥ कुलस्त्रियस्तदानीमावश्यकमपिस्वकार्यंहित्वाशिवंद्रष्टुकामाआगताइत्याह॥तावदित्यादिना ॥ हित्वाकामानित्यत्रद्रष्टुकामाइतिपाठांतरम् ॥ चूर्णेनकेशादिलेपनसुगंधिद्रव्येण ॥३२॥३३॥ अतृप्तंस्तनपानइतिशेषः ॥ रशनांमेखलाम् ॥ स्त्रीकट्यांमेखलाकांचीसप्तकीरशनातथेत्यमरः ॥३४॥ शलाकांनेत्रशलाकामेकस्मिन्हस्तेआदर्शंत्वन्यस्मिन्धृत्वातांनेत्रंप्रतिनीत्वाकाचिदुपाययावित्यग्रिमेणान्वयः ॥ आदर्शंदर्पणम् ॥ दर्पणेमुकुरादर्शावित्यमरः ॥ ३५ ॥ ३६ ॥ ३७ ॥ पादंपतिपादंरंजयंतीमर्दयंती ॥ उद्घोषंशिवसेवककोलाहलम् ॥ श्रुत्वातूर्याणीतिपाठांतरम् ॥ ३८ ॥ ॥

पुत्तिकामक्षिकाविशेषाइवेतिलुप्तोपमेयम् ॥ पतंगिकापुत्तिकास्यादित्यमरः ॥ अत्रताःपुनरितिपुत्रिकाइतिचपाठांतरम् ॥ ३९ ॥ ४० ॥ ताःस्त्रियःकिम वदन्नितितदाह ॥ सम्यक्कृतमिति ॥ ४१ ॥ यथार्थमिति ॥ भोसख्यःमंगलकारकत्वाच्छिवइतियथार्थंसार्थकंनामेत्यर्थः ॥ तदेवाह ॥ दर्शनादिति ॥ ॥ ४२ ॥ ४३ ॥ ४४ ॥ मेनास्वपुत्र्यास्तपःसाफल्यंप्रशंसति ॥ पार्वत्येति ॥ साधितंसंपादितम् ॥ ४५ ॥ प्रीणयिष्यतीति ॥ तोषयिष्यतीत्यर्थः ॥

इत्यादिविविधंकार्यंहित्वाऽन्याःसमुपागताः॥ दृष्ट्वाचशांकरंरूपंमोहंप्राप्ताश्चपुत्तिकाः ॥ ३९॥ यथाऽचेतनास्तिष्ठंति तथाताश्चस्थितास्तदा ॥ क्षणमात्रंतदास्थित्वावचनंचेदमब्रुवन् ॥४०॥ सम्यक्कृतंतुपार्वत्यानाऽन्यथायद्भवेदिह॥ अ होपश्यतकिंरूपंवर्णनीयंकथंभवेत् ॥ ४१ ॥ यथार्थंनामसख्यस्तुदृश्यतेनाऽन्यथाक्वचित् ॥ शिवइतिचविख्यातं दर्शनाच्चलभेच्छिवम् ॥ ४२ ॥ नेत्राणिसफलान्यासन्हिमवत्पुरवासिनाम् ॥ योवैपश्यत्यदोरूपंतस्यैवसार्थकंभवे त् ॥ ४३ ॥ तस्यैवसफलंजन्मतस्यैवसफलाःक्रियाः ॥ येनदृष्टःशिवःसाक्षात्सर्वपापप्रणाशकः ॥ ४४ ॥ पार्वत्या साधितंसर्वंशिवार्थंतुतपःकृतम् ॥ धन्येयंकृतकृत्येयंशिवंप्राप्यपतिंसदा ॥ ४५ ॥ प्रीणयिष्यतिसानित्यमचिंत्यसु खहेतुकम् ॥ यदीदंयुगलंब्रह्मासंगमायाक्षमोभवेत् ॥ ४६ ॥ तदाचसकलोऽप्यस्यश्रमोनिष्कलतामियात् ॥ सम्य क्कृतंतथातेनमेलितंयुग्ममुत्तमम् ॥ ४७ ॥ अनयायत्तपस्तप्तंसार्थकंसकलंकृतम् ॥ विनातुतपसाह्येतत्प्राप्तुंचैवसुदु र्लभम् ॥ ४८ ॥ लक्ष्मीर्नारायणंलेभेस्वामिनंचतथाशिवम् ॥ सुवर्णंमणियुक्तंचराजतेनितरांयथा ॥ ४९ ॥ तथाऽ सौपार्वतीदेवीहरंप्राप्यसुभूषितम् ॥ इत्येवंवचनंह्युक्त्वाचंदनैश्चाऽक्षतैरपि ॥ ५० ॥ शिवंचैवार्चयामासुर्धन्याऽयमि तिचाऽब्रुवन् ॥ कथास्तथाविधाःशृण्वन्शिवोद्वारिसमागतः ॥ ५१ ॥ ॥ ॥ ॥

क्रीडयिष्यतीतिपाठांतरम् ॥ यदीति ॥ संगमायसंयोगाय ॥ अस्यचतुर्मुखब्रह्मणःनिष्कलतांनिष्फलत्वम् ॥ अत्रपाठांतरम् यदीदंयुगलंब्रह्मासंगमा यक्षमोभवेत् ॥ तदाचसकलोऽप्यस्यश्रमोनिश्चलतामियादिति ॥४६॥ तेनब्रह्मणा ॥ ४७ ॥ एतच्छिववस्तु ॥ प्राप्तुमित्यत्रप्राप्यमितिपाठांतरम् ॥ ४८ ॥ दृष्टांतयति ॥ लक्ष्मीरिति ॥ ४९ ॥ प्राप्येति ॥ राजतइत्यनुषंगः ॥ ५० ॥ शिवमिति ॥ अत्रशिवंचवर्धयामासुरितिपाठांतरम् ॥ तत्राशीर्वचनादिनेतिशेषः ॥ ५१

॥ ५२ ॥ ५३ ॥ अपावृताप्रष्ठभागेगतेत्यर्थः ॥ ५४ ॥ देवभियाउपलक्षितेतिशेषः ॥ ५५ ॥ चतुष्केविवाहवेदिकायां ॥ अंगणेइतिपाठांतरम् ॥ वेष्टितः परिवृतः ॥ ५६ ॥ तत्रत्यंतदानींबनंस्वस्तिवाचनादिकार्यम् ॥ ५७ ॥ प्रयोगादि ॥ वैवाहिकनंदिन्यादिस्थापनादिलक्षणम् ॥ परयोःपार्वतीपरमेश्वरयोः ॥ होत्राणिविविधान्यपीतिपाठांतरम् ॥ ५८ ॥ तेनहिमवता ॥ ५९ ॥ ६० ॥ वैवाहंविवाहसंबंधिनम् ॥ अक्षतारोपणमिति ॥ विवाहहोमानंतरंपतिपुत्रवतीभिःपुरं

सर्वेदेववरास्तत्रह्यच्युताद्याःशिवंप्रति ॥ स्थितास्तत्रशिवस्याऽर्थेकश्चिच्चकौतुकंपुनः ॥ ५२ ॥ करिष्यतीतितन्मलासावधानतयातथा ॥ एतस्मिन्नंतरेदेवीमेनाहर्षसमन्विता ॥ ५३ ॥ परिधायशुभंवेषंलज्जितादेवसन्निधौ ॥ आगत्यशिवपूजांचकृत्वाशीघ्रमपावृता ॥ ५४ ॥ वस्त्रंशिवस्यकंठेतुकृत्वादेवभियाशुभा ॥ कर्षयंतीक्षणंतत्रहास्यंकृत्वागृहंययौ ॥ ५५ ॥ चतुष्केचतथाब्रह्माऋषिभिर्वेष्टितःस्वयम् ॥ तावदेवशिवस्तत्रह्याजगामप्रहर्षितः ॥ ५६ ॥ तावच्चहिमवान्स्नात्वासपत्नीकःस्वयंगतः ॥ ब्रह्मासर्वंचतत्रत्यंकारयामासवैतदा ॥ ५७ ॥ प्रयोगादिविधायैववेदोच्चारणतत्पराः ॥ ऋषयःपाठयामासुर्गोत्राणिपरयोर्हिताः ॥ ५८ ॥ आवाहनंतथापाद्यंसर्वंचविधिपूर्वकम् ॥ दुकूलंसुंदरंतेनदत्तंतस्मैमहात्मने ॥ ५९ ॥ तिलकंपुष्पहारंचकांचनस्ययथाविधि ॥ पुनश्चतुष्कमासाद्यदंपतीतौमुदान्वितौ ॥ ॥ ६० ॥ संस्थाप्याऽग्निंपुनस्तत्रवैवाहमकरोद्विधिम् ॥ अक्षतारोपणंतत्रस्त्रियश्चक्रुस्तदाज्ञया ॥ ६१ ॥ प्रदक्षिणंतथाचाग्नेश्चतुर्धाचकृतंतदा ॥ ब्रह्मणःस्खलनंजातंशिवांगुष्ठप्रदर्शनात् ॥ ६२ ॥ तद्गोपितंतदातेनह्युत्संगेपतितंचयत् ॥ ततोजातास्त्वसंख्याताबटुकाब्रह्मसूत्रकाः ॥ ६३ ॥ जटादंडधरास्तेचबद्धकच्छाःसहस्रशः ॥ नमस्कृत्यचब्रह्माणंस्थितास्तेतुतदग्रतः ॥ ६४ ॥ ॥ ॥ ॥ ॥

ध्रीभिस्त्रीभिर्वधूवरयोर्ललाटेऽक्षतलापनरूपंकर्तव्यंकार्यमित्यर्थः ॥ तदाज्ञयाचतुर्मुखाज्ञया ॥ ६१ ॥ विवाहविधावग्नेःप्रदक्षिणंकुर्वाणायाःपार्वत्याअंगुष्ठंपश्यतःपुरोहितस्यचतुर्मुखस्यस्खलिताद्रेतसोबालरूपधराऋषयउदपद्यंतेत्याह ॥ प्रदक्षिणमित्यादिना ॥ ब्रह्मणइति ॥ स्खलनंरेतसइतिशेषः ॥ स्खलनंरेतसोजातमितिपाठांतरम् ॥ ६२ ॥ तदिति ॥ तद्रेतः ॥ गोपितंआच्छादितम् ॥ तद्बोधितमितिपाठांतरम् ॥ तेनब्रह्मणा ॥ ब्रह्मसूत्रकायज्ञोपवीतयुक्ताः ॥ ॥ ६३ ॥ बद्धकच्छाबद्धकौपीनाः ॥ ६४ ॥ ॥ ॥ ॥ ॥ ॥

शिवोपीति ॥ ब्रह्मणइत्यत्रक्रुधद्रुहेर्ष्यासूयार्थानामित्यनेनसंप्रदानता ततश्चतुर्थी ॥ संप्रार्थितइति ॥ देवैर्ब्रह्मणावासंप्रार्थितइतिपूर्वान्वयः ॥ अभूदिति शेषः ॥ ततोऽनंतरंदेवींगंगांदत्वापाययित्वाब्रह्मापावितःपवित्रीकृतः ॥ शिवेनेतिशेषः ॥ ६५ ॥ अनुगृह्येति ॥ पितामहोब्रह्माशिवेनानुगृह्यस्थापितः ॥ रोषं त्यक्त्वास्वकार्येपुनर्नियोजितइतिभावः ॥ ६६ ॥ ६७ ॥ प्रकृतंकथयति ॥ अवशिष्टमिति ॥ वैवाहिकमित्यर्थः ॥ ६८ ॥ ध्रुवस्येति ॥ तदाख्यनक्षत्र स्येत्यर्थः ॥ ध्रुवमरुंधतींसप्तऋषीनितिदं ष्ट्वेतिगृह्यसूत्रात् ॥ ६९ ॥ वेदोक्ताइति ॥ वर्धाप्यवृद्धिंभवंतोब्रुवंत्वित्यादिनाऽऽशीर्वादंकृत्वेत्यर्थः ॥ ७० ॥ ७१ ॥

शिवोऽपिबटुकान्दृष्ट्वाब्रह्मणेकुपितस्तदा ॥ संप्रार्थितस्तदादेवींगंगांदत्वातुपावितः ॥ ६५ ॥ अनुगृह्यपुनस्तत्र स्थापितश्चपितामहः ॥ बटुकान्सूर्यशिष्यांश्चकृत्वाकार्यमथाऽकरोत् ॥ ६६ ॥ बटुकावर्धितास्तत्रसूर्यसेवापराय णाः ॥ रथपृष्ठेरथाग्रेचधावंतितितेतपस्विनः ॥ ६७ ॥ ब्रह्मचारिस्वरूपेणस्थितास्तेवेदपारगाः ॥ अवशिष्टंचयत्कृत्यं कारयामासवैतदा ॥ ६८ ॥ अनुज्ञांचैवदत्वातुकन्यायैसपितामहः ॥ ध्रुवस्यदर्शनंतत्रकारयामासवैतदा ॥ ६९ ॥ पुनः स्थाप्यासनेदेवंचक्रुःस्वस्त्ययनंशुभम् ॥ वेदोक्ताह्याशिषोदत्वावर्धाप्यचपुनःपुनः ॥ ७० ॥ तेदेवाश्चतदादेवींजग तोमातरंशिवाम् ॥ नमस्कृत्यपुनस्तेवैस्थितास्तेशंकरंपुनः ॥ ७१ ॥ नमस्कृत्याऽब्रुवंस्तत्रशिवत्वंजगतःपिता ॥ इ यंचजगतोमाताह्यारभ्यदिनमद्यतः ॥ ७२ ॥ तह्यैवचपुनर्देवागंधर्वाप्सरसस्तदा ॥ नृत्यंगानंचवाद्यंचचक्रुस्तेपर यामुदा ॥ ७३ ॥ गिरिराजोऽपितत्रैवसंपाद्यविधिमुत्तमम् ॥ मेनेकृतार्थमात्मानंसफलंचगृहाश्रमम् ॥ ७४ ॥ तौदंप तीतदातत्रसंपूज्यकुलदेवताम् ॥ वर्धाप्यमंडपंतत्रह्युद्धृह्यकौतुकौषधिम् ॥ ७५ ॥ ऋषीन्प्रणम्यसर्वांस्तांश्चकारा नुग्रहंशिवः ॥ हिमवानपितत्रैवयथायोग्यमपूजयत् ॥ ७६ ॥ सर्वान्देवगणांस्तत्रसेवार्थयेसमागताः ॥ यथाचभे निरेदेवावयंकेपर्वताग्रतः ॥ ७७ ॥ ॥ ॥ ॥ ॥

किमब्रुवन्नितितदाह ॥ शिवेति ॥ हेशिवाऽद्यतोऽद्यतनंदिनमारभ्यत्वंजगतःपिताइयंपार्वतीचमातेत्यन्वयः ॥ ७२ ॥ तह्यैवतदैव ॥ ७३ ॥ ७४ ॥ ताविति ॥ दंपती जायाचपतिश्चदंपतीपार्वतीपरमेश्वरावित्यर्थः ॥ मंडपंवर्धाप्य ॥ उत्तिष्ठब्रह्मणस्पतेअभ्यारामिदद्रयइतिमंत्राभ्यांनंदिन्यादिमंडपदेवताविसृज्येत्यर्थः ॥ कौतुकौ षधिंविवाहेहस्तबद्धकंकणमुद्धृह्यविमुच्येत्यर्थः ॥ ७५ ॥ ७६ ॥ यथाचेति ॥ पर्वताग्रतःहिमालयादिपर्वतेभ्योवयंकेकथंश्रेष्ठाइतिदेवामेनिरइत्यर्थः ॥ ७७ ॥

तथेति ॥ तेदेवसत्तमायथामनसिग्लानिंगतालज्जयाऽधोमुखाभवेयुस्तथातेनाहिमवतातेषांपूजासेवाचक्रतेत्यन्वयः ॥ ७८ ॥ समागतेष्विति ॥ सर्वेषुसर्वेषांमध्ये ॥ यतश्चनिर्धारणइत्यनेनसप्तमी ॥ कश्चिद्दुःखंनागतोनप्राप्तः ॥ प्रत्युताहंधन्यःशिवादिनानुमानितोयथातथानकेनाप्यनुमानितइतितेदेवाःपरस्परंवदंतोऽभूवन्निति शेषेणसमुदितान्वयः ॥ ७९ ॥ ८० ॥ किंप्रार्थयामासेतितदाह ॥ ममेति ॥ धन्यमित्यत्रधनमितिपाठांतरम् ॥ ८१ ॥ निंदांपूर्वकृत

तथापूजाचसेवाचकृतातेनमहात्मना ॥ यथातेमनसिग्लानिंगतास्तेदेवसत्तमाः ॥ ७८ ॥ समागतेषुसर्वेषुनकश्चिद्दुःखमागतः ॥ अहंधन्यःशिवेनैवगिरिणाचानुमानितः ॥ ७९ ॥ तथानकोऽपितत्रैवमानितश्चपरस्परम् ॥ तेदेवाश्चतथासर्वेवदंतश्चतपोधनाः ॥ ८० ॥ गिरिराजस्तदातत्रप्रार्थयामासतांस्तथा ॥ ममाऽद्यसफलंजातंजीवितंधन्यमेवच ॥ ८१ ॥ मेनाचाऽपिपुनस्तत्रस्तुतिंचक्रेशुभानना ॥ निंदांनिवर्त्तयामाससर्वेषांप्रांजलिस्तदा ॥ ८२ ॥ धन्याऽहंकृतकृत्याऽहंयस्याश्चपुत्रिकाशुभा ॥ जाताममकुलंधन्यंपावितंत्वनयाध्रुवम् ॥ ८३ ॥ यदिनपुत्रिकाचेयंयूयंवाशिवएववा ॥ कुतस्तेऋषयोदेवाविष्णुश्चैवसनातनः ॥ ८४ ॥ इयंवैपुत्रिकाधन्यासर्वपापापनुत्तये ॥ मदीयंदुष्टकृत्यंचक्षंतव्यंजगदीश्वराः ॥ ८५ ॥ एवंसंप्रार्थ्यतान्सर्वान्नमस्कृत्याऽक्षमापयत् ॥ गिरिराजोऽपितान्सर्वान्नमस्कृत्यतथाऽवदत् ॥ ८६ ॥ तेदेवाःपूजितास्तेनप्रसन्नाश्चेदमब्रुवन् ॥ धन्योऽसिकृतकृत्योऽसिजीवितंसफलीकृतम् ॥ ८७ ॥ येनैवकन्यकादानंशिवायैवसमर्पितम् ॥ इत्युक्त्वाचपुनर्मेनामूचुस्तेविनयान्विताः ॥ ८८ ॥ धन्यात्वंगिरिराजस्यपत्नीमेनेतिविश्रुता ॥ यदुदरात्समुत्पन्नंशिवारत्नंशुभानने ॥ ८९ ॥ त्वदीयश्चतिरस्कारःसुखरूपोऽनुमानितः ॥ सौभाग्यंवर्द्धतांतेऽद्यगच्छामःसुखमस्तुते ॥ ९० ॥ ॥ ॥ ॥ ॥

शिवभर्त्सनाम् ॥ ८२ ॥ मेनास्वात्मानंकृतार्थयति ॥ धन्याहमिति ॥ यस्याममेत्यर्थः ॥ ८३ ॥ यदीति ॥ यदीयंपार्वतीममपुत्रिकानस्यात्पुत्रिकारूपेणनोत्पन्नास्यात्तदाशिवादयोयूयंकुतोमद्गृहमागताःस्यातेत्यर्थः ॥ ८४ ॥ ८५ ॥ अक्षमापयत्क्षमांययाचेत्यर्थः ॥ तथावददिति ॥ क्षमांययाचेत्यर्थः ॥ ८६ ॥ ॥ ८७ ॥ ८८ ॥ मेनायाधन्यत्वेकारणमाह ॥ यदुदरादिति ॥ हेशुभाननेयस्यास्तवोदराच्छिवारत्नंपार्वतीरूपंरत्नमुत्पन्नमतइत्यर्थः ॥ ८९ ॥ त्वदीयइति ॥ त्वदीयस्त्वत्कृतस्तिरस्कारस्तुच्छीकरणं ॥ शिवादेरितिशेषः ॥ अनुमानितोऽस्माभिरित्यर्थः ॥ ९० ॥ ॥ ॥

॥ ११ ॥ अन्वगच्छंतपार्वतीमनुसृत्यगतवंतइत्यर्थः ॥ १२ ॥ कियत्स्थानपर्यंतमन्वगच्छन्नितितदाह ॥ गंधमादनेति ॥ गंधमादनाख्यपर्वतपर्यंतं ॥ ए तेनमहानदीपर्वतादयोनोल्लंघनीयाइतिसदाचारःसूचितः ॥ १३ ॥ सोत्सुकाःसोत्कंठाःपराजग्मुःपरावृत्यागताइत्यर्थः ॥ गिरीश्वराहिमालयाद्याःपर्वताः ॥ ॥ १४ ॥ तदाविष्ण्वाद्यादेवाःशिवावनुसृत्यकैलासपर्यंतमागत्यशिवानुज्ञांगृहीत्वास्वस्वस्थानंगताइत्याह ॥ अच्युताद्याइति ॥ १५ ॥ १६ ॥ १७ ॥

गिरिराजंतथैवाऽत्रसंप्रार्थ्यदेवतागणाः ॥ दत्वाचह्याशिषस्तस्मैवंदितास्तेययुर्मुदा ॥ ९१ ॥ हिमवत्पुत्रिकांसर्वेवा द्यगानपरायणाः ॥ अन्वगच्छंततेतत्रगिरिराजादयश्चये ॥ ९२ ॥ मेनाद्याश्चैवतत्पत्न्योगच्छंतिस्मशिवांप्रति ॥ गंधमादनपर्यंतंगत्वानुज्ञामवाप्यच ॥ ९३ ॥ सोत्सुकाश्चपराजग्मुःस्वस्थानंतेगिरीश्वराः ॥ तद्दिनंहिसमारभ्यक्र तार्थाःपर्वताइमे ॥ ९४ ॥ सुखंचपरिवृद्धंचवर्णितुंनैवशक्यते ॥ अच्युताद्याश्चयेदेवाऋषयोनिर्मलाशयाः ॥ ९५ ॥ समागताश्चतेतत्रवाद्यनृत्यपरायणाः ॥ समागत्यतुकैलासंसंस्थाप्यमंदिरेशिवम् ॥ ९६ ॥ पत्न्यायुक्तंचसंप्रार्थ्यद त्तानुज्ञाययुश्चते ॥ प्रशंसंतोविवाहंचकृपांचैवशिवस्यच ॥ ९७ ॥ स्वपदंचतथासर्वेयएतेऽत्रसमागताः ॥ दृष्ट्वाचशि वयोर्योगंदेवानांप्रीतिरुत्तमा ॥९८॥ वर्णितुंनैवशक्येतवर्षाणांचशतेनच ॥ एतच्चैवसमाख्यातंयत्पृष्टोऽहंमुनीश्वराः ॥ ९९ ॥ विवाहस्यविधिंसम्यक्देवस्यपरमात्मनः ॥ यएवंशृणुयान्नित्यंश्लोकंश्लोकार्धमेववा ॥ १०० ॥ तस्यवैविपु लालक्ष्मीर्जायतेनाऽत्रसंशयः ॥ अज्ञानंनाशमायातिवर्धतेसुखसंपदः ॥ १०१ ॥ आरोग्यंजायतेतस्यकन्यालाभो भवेदिह ॥ १०२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपार्वतीविवाहवर्णनंनामाऽष्टादशोऽध्यायः ॥ १८ ॥ छ ॥

॥ ऋषयऊचुः ॥ सूतसूतमहाभागकिंजातंतुततःपरम् ॥ तारकस्यवधश्चैवकथ्यतांतुत्वयाऽनघ ॥ १ ॥ ॥

स्वपदंस्वस्थानंस्वर्गादि ॥ ९८ ॥ कथामुपसंहरति ॥ एतच्चेति ॥ हेमुनीश्वराःशौनकादयः ॥ ९९ ॥ कथाश्रवणफलमाह ॥ यएवमिति ॥ १०० ॥ ॥ १०१ ॥ १०२ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपार्वतीविवाहवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ तारकस्यवधंवक्तुं तत्कार्यकरणक्षमः ॥ स्कंदावतारएकोनविंशेऽध्यायेऽत्रवर्ण्यते ॥ १ ॥ तारकस्यतनयैःपितामहाल्लब्धलब्धवरदर्पितैःसुराः ॥ पीडितामयकृतत्रिपुरेषुवास तोऽधिकबलैर्विधिमीयुः ॥ २ ॥ सूतसूतेति ॥ १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यच्छ्रुत्वेति ॥ मुच्यंतेमुक्ताभवंतीत्यर्थः ॥ ओदनःपच्यतेस्वयमितिवत्कर्मकर्तरिलट् ॥ २ ॥ अतितरामत्यंतं ॥ देवकृत्यंदेवसामर्थ्यरूपंकार्यं ॥ देवार्थंकर्तव्यंकर्म वा ॥ पीडांतारकासुरकृतामित्यर्थः ॥ ३ ॥ ४ ॥ प्रमथाद्याःप्रमथाख्यप्रभृतयःशिवसेवकाः॥प्रमथाःस्युःपारिषदाइत्यमरः ॥५॥ देवाइति ॥ देवाअतःपरमेतदनंत रंशिवोऽस्माकमुपरिकृपांकरिष्यतीतिमत्वाहर्षमागताइत्यन्वयः ॥६॥ शिवइति ॥ शिवासार्धंपार्वत्यासह ॥ सुप्सुपेतिसमासः ॥ नानारंगंनानाविधक्रीडामक रोदित्यर्थः ॥ देवाइति ॥ देवास्तेनतारकासुरेण पीडिताःसंतःशिवःकिंकरिष्यतीदानींकीदृशकार्यलग्नचित्तोऽस्तिकथंवातेनशिवेनतारकासुरवधेकर्तव्येविलंबः

सूतउवाच ॥ श्रूयतांकथयाम्यद्यकथांपापप्रणाशिनीम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यंतेमानवाःकलौ ॥ २ ॥ कैलास मासाद्यशिवांसमेत्यशोभांप्रपेदेऽतितरांशिवोऽपि ॥ विचारयामासचदेवकृत्यंपीडांजनस्याऽपिसदेवदेवः ॥ ३ ॥ वि चार्यचकृतंतेनश्रूयतामृषिसत्तमाः ॥ शिवोऽपिभगवान्साक्षात्कैलासमगमद्यदा ॥ ४ ॥ गणाश्चसर्वेतत्राऽऽसन्प्रम थाद्यामहाबलाः ॥ वाद्यंचविविधंचक्रुर्हर्षनिर्भरमानसाः ॥ ५ ॥ देवाअपिचयेतत्राऽऽगतास्तेहर्षमागताः ॥ अतःप रंशिवोऽस्माकंकृपांचैवकरिष्यति ॥ ६ ॥ शिवस्तत्रशिवासार्धंनानारंगमथाऽकरोत् ॥ देवाश्चपीडितास्तेनशिवःकिं नुकरिष्यति ॥ ७ ॥ विलंबःक्रियतेतेनकथंचाऽग्निंसमीरयन् ॥ अग्निर्धृत्वाकपोतस्यरूपंतत्रजगामह ॥ ८ ॥ गत्वा शिवसमीपंचयदाचाऽग्निर्निरीक्षयेत् ॥ तावदग्निंशिवोदृष्ट्वाभोगादुपरतःस्वयम् ॥ ९ ॥ कस्त्वंकपटरूपोऽसिगृह्यतां शुक्रमेवमे ॥ इत्युक्त्वाऽप्यग्नयेवीर्यंदत्तंतेनमहात्मना ॥ १० ॥ कपोतोवीर्यमादायचंचुपुटगतंयदा ॥ वहिर्गतोमहा वीर्यंधर्तुमक्षमएवसः ॥ ११ ॥ ॥ ॥ ॥

क्रियतेइतिमनसानुसंधायाग्निंसमीरयन्प्रेरयामासुरित्यर्थः ॥ अडागमाभावआर्षः ॥ अथवाशिवःकिंममकरिष्यतिकुर्यात् ॥ नकिमपीत्यर्थः ॥ क्रीडासक्त त्वादितिभावः ॥ अतएवतेनशिवेनममवधादौविलंबऔदासीन्यंक्रियतेइतिनिश्चित्यतेनतारकेणपीडितादेवाअग्निंप्रेरयन्नित्यर्थः ॥ अत्रार्थेकथमितियत्नगौ रवार्थकंबोध्यं ॥ कथमादितथाप्यंतंयत्नगौरववाढयोरित्युत्पलः ॥ देवाश्चपीडिताश्चान्यइतिपाठांतरं ॥ ७ ॥ अग्निरिति ॥ कपोतस्यपक्षिविशेषस्य ॥ ॥ ८ ॥ निरीक्षयेदिति ॥ आर्षंरूपं ॥ उपरतोनिवृत्तइत्यर्थः ॥ ९ ॥ शिवोवक्ति ॥ कस्त्वमिति ॥ शुक्रंरेतः ॥ शुक्रंतेजोरेतसीचबीजवीर्येंद्रियाणिचेत्य मरः ॥ १० ॥ चंचुपुटंमुखाग्रं तत्रगतंस्थापितंसत् ॥ महावीर्यममोघरेतः ॥ ११ ॥ ॥ ॥

दुःसहंसोढुमशक्यं ॥ १२ ॥ शरस्तंबेतृणविशेषयुक्तदेशे ॥ १३ ॥ १४ ॥ पीतमिति ॥ स्तन्यंस्तनवृत्तिक्षीरंपीतं॥बालेनेतिशेषः ॥ १५ ॥ षाण्मातुरइ
ति ॥ षट्मातरोऽस्येतिषाण्मातुरःषण्णांमातृणामपत्यं ॥ तद्धितार्थेदिनासमासेऽपत्यार्थेऽणिमातुरुत्संख्येत्युदादेशः ॥ षाण्मातुरःशक्तिधरःकुमारःक्रौंचदारण
इत्यमरः ॥ षण्मुखस्यतदावहूनिनामान्यभवंस्तान्याह ॥ पार्वतीनंदनामिति ॥ १६ ॥ शरजन्मेति ॥ अत्रषड्जन्माचेतिपाठांतरम् ॥ १७ ॥ ताइति ॥ गृह्यगृ

तद्वीर्यंचैवगंगायांप्राक्षिपद्दुःखपीडितः ॥ गंगयाऽपिचतद्वीर्यंदुःसहंपरमात्मनः ॥ १२ ॥ निक्षिप्तंचशरस्तंबेतत्रबा
लोऽव्यजायत ॥ सुंदरःसुभगःश्रीमान्दर्शनात्सुखदायकः ॥ १३ ॥ एतस्मिन्नंतरेतत्रराजकन्याःसमागताः ॥ षट्सं
ख्याश्चैवस्नानार्थंताभिर्दृष्टस्तुबालकः ॥ १४ ॥ मदीयोऽयंमदीयश्चवदंत्यश्चपरस्परम् ॥ संपाद्यषण्मुखानीहपीतं
स्तन्यंस्वयंतदा ॥१५॥ षाण्मातुरस्तदानामप्रसिद्धंतुमहात्मनः ॥ पार्वतीनंदनंनामप्रथमंचाऽभवत्तदा ॥ १६ ॥ अ
ग्निभूश्चततःपश्चात्ततःस्कंदोऽभवत्पुनः ॥ गंगापुत्रस्तदानामशरजन्माततःपरम् ॥ १७ ॥ षाण्मातुरस्ततश्चैवना
मानिबहुधाऽभवन् ॥ ताःकन्यास्तुततोगृह्यपुत्रंकृत्तासुहर्षिताः ॥ १८ ॥ सर्वंचनारदाज्ज्ञात्वाशिवानुज्ञामवाप्यच ॥
तेदेवाश्चततोनीलासेनांदेवमयींतदा ॥ १९ ॥ स्कंदंचतत्पतिंकृत्वाययुर्दैवास्ततश्चते ॥ शोणिताख्यंपुरंगत्वायुद्धंचक्रुः
सुदारुणम् ॥ २० ॥ दशाहंतुतदाजातंसंमर्दंकष्टमुत्कटम् ॥ ततोदैत्याधिपश्चैवहतस्तेनमहात्मना ॥ २१ ॥ कियं
तोऽपिपलायंतकियंतश्चूर्णमागताः ॥ पातालंचगताःकेचित्सर्वेतेचक्षयंगताः ॥ २२ ॥ शोणिताख्येपुरेतैश्चयुद्धमे
वाऽभवत्तदा ॥ सर्वंनिष्कंटकंह्यासीद्धतेतस्मिन्दुरात्मनि ॥ २३ ॥ तेदेवाःसुखमापन्नाःस्वंस्वंराज्यमकुर्वत ॥ आनं
दंपरमंगत्वानीत्वास्कंदंशिवाग्रतः ॥ २४ ॥ ॥ ॥ ॥ ॥

हीत्वा ॥ ल्यबापोबोध्यः ॥ पूर्वपदलोपइति करहाटकीयगोपालाचार्यादयोवैयाकरणाआहुः ॥ १८ ॥ सर्वमिति ॥ स्कंदोत्पत्तिवृत्तांतमित्यर्थः ॥ तइ
ति ॥ देवमयींदेवप्रचुरांदेवसंबंधिनीमित्यर्थः ॥ १९ ॥ तत्पतिंदेवसेनाधिपतिं ॥ २० ॥ दशाहमिति ॥ दशदिवसपर्यंतमित्यर्थः ॥ संमर्दंतुमुलमुत्कटंरौ
द्रं ॥ २१ ॥ कियंतइति ॥ केचिद्दैत्याइत्यर्थः ॥ अत्रकियंतश्चहतास्तत्रकियंतोवैपलायिताइतिपाठांतरं ॥ २२ ॥ शोणिताख्यइति ॥ सर्वमिति ॥ सर्वं
जगन्निष्कंटकंनिरुपद्रवमासीदित्यर्थः ॥ २३ ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥

प्रणिपातं नमस्कारं ॥ २५ ॥ तवेति ॥ रूपंस्वरूपं ॥ गतिंप्रभावादि ॥ २६॥ हेविश्वेश्वर यस्त्वमसिसत्वंपरःश्रेष्ठोऽसि ॥ योसियोसीतिपाठांतरं ॥ तत्रपाठेयस्त्वं परोऽसितस्मैतेनमइत्यन्वयः ॥ आदराद्विरुक्तिः ॥ वरदेति ॥ हेवरददेवदेवंत्वांनमस्कुर्मइतिशेषः ॥ २७ ॥ नमइति ॥ भवायभवतिप्रभवतीत्याविर्भवतीतिवा भवस्तस्मैभव्यायोत्कृष्टाय ॥ भुवनायचतुर्दशभुवनात्मकाय ॥ अथवाभुवनायचतुर्दशलोकार्थमुद्भवस्तस्माइत्यर्थः ॥ युगात्मनइति ॥ २८ ॥ युगस्वरूपाय॥गुणात्मनइतिपाठांतरं ॥ २९ ॥ त्र्यंबकायत्रीण्यंबकानिनेत्राणियस्यतस्मै ॥ हुताशायहुतंहविरश्नातीतिहुताशस्तस्मै ॥ अथवाकंदर्पायकामार्थकामस्येतियावत्॥हुताशायाग्निस्वरूपाय॥दाहकत्त्वादितिभावः ॥३०॥ शंकरायभक्तानांशांतिकराय ॥ वृषांकायवृषभध्वजाय ॥ अन्यत्स्पष्टं ॥ ३१ ॥ शतजिव्हाय ॥ पुराणादिष्वीश्वरस्यशतजिव्हत्वंप्रासिद्धं ॥ अथवायजमानकृतयज्ञरसस्वादस्यानेकदेवताद्वाराग्रहणाच्छिवस्यशतजिव्हत्वंज्ञेयम् ॥ जगत्कर्तृत्वंकथयति ॥ भूतमिति ॥ ३२ ॥ जगतःस्थितिलयकर्तृत्वंकथयति ॥ पासीति ॥ भगवंस्ततइत्यत्रभगवंस्तुतेरितिपाठांतरं ॥ ३३ ॥ दिग्वाससेदिगंबराय ॥ कृतांतायकृतोंतोनाशोयेनतस्मै ॥ रुद्रस्यतमोगुणवत्त्वेनसर्वनाशकत्वादितिभावः ॥ ३४ ॥ ३५ ॥ श्रीकंठायश्रीर्विषंसाकंठेयस्यतस्मै ॥ ३६ ॥

आरोप्यप्रणिपातंचस्तुतिंकृत्वापुरःस्थिताः ॥ अकुर्वन्पुनरेवाऽत्रप्रफुल्लमुखपंकजाः ॥ २५ ॥ देवाऊचुः ॥ देवदेवमहादेवभक्तानामभयप्रद ॥ तवरूपंनजानीमोगतिंनैवचनैवच ॥ २६ ॥ विश्वेश्वरपरोदेवयोऽसिसोऽसिनमोऽस्तुते ॥ वरदत्वांमहादेवदेवदेवंमहेश्वरम् ॥ २७ ॥ नमोभवायभव्यायभुवनायोद्भवायच ॥ अनंतबलवीर्यायभूतानांपतयेनमः ॥ २८ ॥ संहर्त्रेकपिशांगायअव्ययायव्ययायच ॥ गंगासलिलधारायआधाराययुगात्मने ॥ २९ ॥ त्र्यंबकायत्रिनेत्रायत्रिशूलवरधारिणे ॥ कंदर्पायहुताशायनमोवैपरमात्मने ॥ ३० ॥ शंकरायवृषांकायगणानांपतयेनमः ॥ दंडहस्तायकालायपाशहस्तायवैनमः ॥ ३१ ॥ वेदमंत्रप्रधानायशतजिव्हायतेनमः ॥ भूतंभव्यंभविष्यंचस्थावरंजंगमंचयत् ॥ ३२ ॥ तवदेहात्समुत्पन्नंदेवसर्वमिदंजगत् ॥ पासिहंसिचभद्रंतेप्रसीदभगवंस्ततः ॥ ३३ ॥ ऋषयऊचुः ॥ नमोदिग्वाससेतुभ्यंकृतांतायत्रिशूलिने ॥ विकटायकरालायकरालवदनायच ॥ ३४ ॥ अरूपायसरूपायविश्वरूपायतेनमः ॥ वषट्कारायरुद्रायस्वाहाकारायतेनमः ॥ ३५ ॥ सर्वप्रणतदेहायस्वयमप्रणतायच ॥ नित्यंनीलशिखंडायश्रीकंठायनमोनमः ॥ ३६ ॥ ॥ ॥ ॥ ॥

चिताभस्मांगधारिणेस्मशानगतभस्मरूषितावयवायेत्यर्थः ॥ शिवंसर्वश्रेष्ठत्वेनप्रशंसंति ॥ त्वंब्रह्मेत्यादिना ॥ देवादीनांमध्येब्रह्मादिस्वरूपस्त्वमेवासीत्यर्थः ॥ अतःसर्वश्रेष्ठस्त्वंदुःखदग्धानांनस्त्राताभवेत्यग्रिमेणान्वयः ॥ ३७ ॥ सांख्यःसांख्यशास्त्रप्रसिद्धः ॥ ३८ ॥ वासवइंद्रः ॥ ओंकारइति ॥ ज्येष्ठसामज्येष्ठाख्यं सामेत्यर्थः ॥ ३९ ॥ दुःखदग्धानांदुःखव्याप्तानां ॥ ४० ॥ भूतानिपृथिव्ययादीनिपंच ॥ परिषिंचस्युत्पादयसि ॥ ॥ ४१ ॥ रूपेति ॥ रूपशब्दोत्रावतारपरः

नीलकंठायदेवायचिताभस्मांगधारिणे ॥ त्वंब्रह्मासर्वदेवानांरुद्राणांनीललोहितः ॥ ३७ ॥ आत्माचसर्वभूतानांसांख्यःपुरुषउच्यते ॥ पर्वतानांमहामेरुर्नक्षत्राणांचचंद्रमाः ॥ ३८ ॥ ऋषीणांचवसिष्ठस्त्वंदेवानांवासवस्तथा ॥ ओंकारःसर्ववेदानांज्येष्ठसामचसामसु ॥ ३९ ॥ आरण्यानांपशूनांचसिंहस्त्वंपरमेश्वर ॥ असकृद्दुःखदग्धानांत्राताभवसुरेश्वर ॥ ४० ॥ त्वंचलोकहितार्थायभूतानिपरिषिंचसि ॥ महेश्वरमहाभागशुभाशुभनिरीक्षक ॥ ४१ ॥ आज्ञापयवयंनाथकर्त्तारोवचनंतव ॥ रूपकोटिसहस्रेषुरूपकोटिशतेषुते ॥ ४२ ॥ अंतंगंतुंनशक्ताःस्मदेवदेवनमोस्तुते ॥ इतिस्तुतस्तदादेवाःस्कंदंदत्वास्थिताःपुरः ॥ ४३ ॥ प्रसन्नोभगवान्रुद्रउवाचदेवसत्तमान् ॥ यदायदाभवेद्दुःखंतदायांतुमुनीश्वराः ॥ ४४ ॥ देवाश्चसर्वएवैतेभजंतुमांममाज्ञया ॥ इत्याज्ञप्तास्तदासर्वैःशिवेनपरमात्मना ॥ ४५ ॥ ओमित्युक्त्वानिजंधामजग्मुस्तेदेवतागणाः ॥ ऋषयऊचुः ॥ अतःपरंचयज्जातंकथनीयंत्वयासखे ॥ ४६ ॥ सूतउवाच ॥ कथयामिश्रुतंसम्यग्व्यासाद्विश्वार्थसूचकात् ॥ निहतेतारकेदैत्येतारपुत्रेसबांधवे ॥ ४७ ॥ स्कंदेनचाप्रयत्नेनतस्यपुत्रामहाबलाः ॥ विद्युन्मालीतारकाक्षःकमलाक्षश्चवीर्यवान् ॥ ४८ ॥ तपस्तेपुर्महात्मानोमहाबलपराक्रमाः ॥ तपउग्रंसमास्थायनियमेपरमेस्थिताः ॥ ४९ ॥ ॥ ॥

सहस्राणिसहस्रशोयेरुद्राइतिश्रुतेः ॥ ४२ ॥ ४३ ॥ रुद्रःकिमुवाचेतितदाह ॥ यदेति ॥ यदायुष्माकंदुःखंभवेत्तदामामायांतुभवंतआगत्यचमांभजंत्वित्यन्वयः ॥ ४४ ॥ ४५ ॥ ओमित्युक्त्वातद्वचनमंगीकृत्येत्यर्थः ॥ ऋषयःशौनकादयइत्यर्थः ॥ अतःपरमिति ॥ ४६ ॥ विश्वार्थसूचकात्सर्वज्ञादित्यर्थः ॥ व्यासात्सत्यवतीसुतात् ॥ श्रुतं नतुस्वकपोलकल्पितमितिभावः ॥ ४७ ॥ स्कंदेनेति ॥ स्कंदेनषडाननेनाप्रयत्नेनानायासेनसबांधवेतारकेनिहतेरूतितिपूर्वेणान्वयः ॥ तस्यतारकस्यपुत्रास्त्रयोऽवशिष्टाः ॥ तेकेपुत्रास्तेचकिंतदाऽकुर्वन्नितितदाह ॥ विद्युन्मालीति ॥ ४८ ॥ ४९ ॥ ॥

कर्शयामासुःकृशत्वंप्रापयामासुरित्यर्थः ॥ कर्षयामासुरितिपाठांतरं ॥ तेषांतपसःप्रकारमाह ॥ वर्षाणामित्यादिना ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ब्रह्माचतत्तपसातुष्टःसंस्तेषांवरंददावित्याह ॥ तेषामिति ॥ पितामहोब्रह्मा ॥ परमेष्ठीपितामहइत्यमरः ॥ पितामहोवदति ॥ प्रसन्नइति ॥ बलदर्पिताब लगर्विताहेदानवाः ॥ ५४ ॥ अवध्यत्वमिति ॥ सर्वभूतेषुसर्वप्राणिषुमध्येसर्वेषांनोऽवध्यत्वममरत्वंदेहीतिशेषः ॥ अवध्यत्वंचदेवानांसर्वभूतेषुसंयतीतिपा

तपसाकर्शयामासुर्देहान्स्वान्दानवोत्तमाः ॥ वर्षाणांशतकंचैवपदमेकंनिधायच ॥ ५० ॥ भूमौस्थित्वापरंतत्रतेपुस्तेबलवत्तराः ॥ तेसहस्रंतुवर्षाणांवातभक्षाःसुदारुणाः ॥ ५१ ॥ तपस्तेपुर्दुरात्मानःपरंतापमुपागताः ॥ वर्षाणांतु सहस्रंवैमस्तकेनास्थितास्तदा ॥ ५२ ॥ वर्षाणांतुशतंतेनैवऊर्ध्वबाहवआस्थिताः ॥ तेतुदुःखतरंप्राप्तादुराग्रहपराइमे ॥ ५३ ॥ तेषांपितामहःप्रीतोवरदःप्रददौवरम् ॥ प्रसन्नोऽस्मिवरंब्रूतदानवाबलदर्पिताः ॥ ५४ ॥ दानवाऊचुः ॥ यदिप्रसन्नोदेवेशयदिदेयोवरस्तथा ॥ अवध्यत्वंचसर्वेषांसर्वभूतेषुसर्वदा ॥ ५५ ॥ तेसर्वेवरयामासुःसर्वलोकपितामहम् ॥ तानब्रवीत्तदादेवोलोकानांप्रभुरव्ययः ॥ ५६ ॥ नास्तिसर्वामरत्वंवैनिवर्तध्वमतोऽसुराः ॥ अन्यंवरंवृणीध्वंवैयादृशःसंप्ररोचते ॥ ५७ ॥ ततस्तेसहिताःसर्वेसंप्रधार्यपरस्परम् ॥ ब्रह्माणमब्रुवन्दैत्याःप्रणिपत्यजगद्गुरुम् ॥ ५८ ॥ वरंपुराणित्रीण्येवसमास्थायमहीमिमाम् ॥ चरिष्यामोहिलोकेशत्वत्प्रसादाज्जगद्गुरो ॥ ५९ ॥ तथावर्षसहस्रांतेसमेष्यामःपरस्परम् ॥ एकीभावंगमिष्यंतिपुराण्येतानिचाऽनघ ॥ ६० ॥ यदासमानिचैतानियोहन्याद्भगवंस्तदा ॥ एकेनैवेषुणादेवसनोमृत्युर्भविष्यति ॥ ६१ ॥ ॥ ॥

ठांतरं ॥ तत्रपाठेसंयतियुद्धइत्यर्थः ॥ ५५ ॥ ५६ ॥ ब्रह्माऽवध्यत्वरूपंवरंनदातुमीष्टइत्याह ॥ नास्तीति ॥ अन्यमिति ॥ यादृशोयोरोचतेतमवध्यत्वादन्यंवरमित्यर्थः ॥ ५७ ॥ संप्रधार्यविचार्य ॥ ५८ ॥ वरमिति ॥ हेलोकेशत्रीण्येववक्ष्यमाणानिकांचनरजतायोमयानिपुराणिदुर्गरूपाणिनगराणिवरंसमास्थायभवतःस्वीकृत्यवयमिमामहींचरिष्यामइतिसंबंधः ॥ ५९ ॥ एकीभावंपरस्परसंबंधं ॥ ६० ॥ यस्मात्स्वकीयोमृत्युर्भवेत्तंसंभाव्यकथयामासुः ॥ समानीति ॥ समानितुल्यदार्ढ्यकानि ॥ इषुणाबाणेन ॥ ६१ ॥ ॥ ॥ ॥ ॥

एवमिति ॥ देवोब्रह्मातान्देवानेवंतथास्त्वित्युक्त्वामयस्यतदाख्यासुरस्यनगरत्रयंकुर्वित्याज्ञांदत्वाचप्रत्यक्षंतत्समक्षंदिवंप्राविशददृश्योभूदित्यर्थः ॥ ६१ ॥ कथमाज्ञापयामासेतितदाह ॥ कांचनमिति ॥ ६३ ॥ तरसा वेगेन शीघ्रमितिभावः ॥ रंहस्तरसीतुरयःस्यदइत्यमरः ॥ ६४ ॥ योजनायामंक्रोशचतुष्टयपरिमितदेशपरिच्छिन्नम् ॥ ६५ ॥ कांचनमिति ॥ तेषामसुराणांतिस्रःपुरआसन्नयस्मय्यवमाथरजताथहरिणीतितैत्तिरीयश्रुतेः ॥ ६६ ॥ ६७ ॥

एवमस्त्वितितान्देवःप्रत्यक्षंप्राविशद्दिवम् ॥ आज्ञांदत्वामयस्याऽपिकुरुत्वंनगरत्रयम् ॥ ६२ ॥ कांचनंराजतंचैवआयसंचतथाकुरु ॥ इत्युक्त्वाचततोब्रह्माजगामस्वयमेवच ॥ ६३ ॥ ततोमयश्चतरसाचक्रेधीरःपुराण्यथ ॥ कांचनंदिवितत्रासीदंतरिक्षेचराजतम् ॥ ६४ ॥ आयसंचाऽभवद्भूमौपुरंतेषांमहात्मनाम् ॥ एकैकंयोजनायामंसुंदरंसुभगंपुनः ॥ ६५ ॥ कांचनंतारकाक्षस्यकमलाक्षस्यराजतम् ॥ विद्युन्मालेश्चायसंचत्रिविधंदुर्गमुत्तमम् ॥ ६६ ॥ मयश्चतत्रबलवान्दैत्यदानवपूजितः ॥ दत्वातेभ्यस्त्रयंतर्हिहितकामपरायणः ॥ ६७ ॥ पुरत्रयंप्रविश्यैवबभूवुस्तेबलाधिकाः ॥ कल्पद्रुमैश्चसंकीर्णंगजवाजिसमाकुलम् ॥ ६८ ॥ नानाप्रासादसंकीर्णंमणिजालसमावृतम् ॥ सूर्यमंडलसंकाशैर्विमानैर्विश्वतोमुखैः ॥ ६९ ॥ पद्मरागमयैश्चैवशोभितंचेंदुसंनिभैः ॥ प्रासादैर्गोपुरैर्दिव्यैःकैलासशिखरोपमैः ॥ ७० ॥ दिव्यस्त्रीभिश्चसंकीर्णंगंधर्वैःसिद्धचारणैः ॥ रुद्रालयैःप्रतिगृहंह्यग्निहोत्रैर्द्विजोत्तमैः ॥ ७१ ॥ वापीकूपतडागैश्चदीर्घिकाभिःसुशोभितम् ॥ मत्तमातंगयूथैश्चतुरंगैश्चसुशोभनैः ॥ ७२ ॥ रथैश्चविविधाकारैःशिविकाभिरलंकृतम् ॥ सभाप्रपादिभिश्चैवक्रीडास्थानैःपृथक्पृथक् ॥ ७३ ॥ वेदाध्ययनशालाभिर्विविधाभिःपृथक्पृथक् ॥ अदृष्टंमनसाप्यन्यैःपुण्यवद्भिःप्रदृश्यते ॥ ७४ ॥ ॥ ॥ ॥ ॥

पुरत्रयमिति ॥ तेविद्युन्माल्यादयः ॥ पुरत्रयंवर्णयति ॥ कल्पद्रुमैरित्यादिनापृथिव्यांचैवयेधर्माइत्यंतेनग्रंथेन ॥ ६८ ॥ सूर्यमंडलसंकाशैःसूर्यमंडलसदृशैः ॥ निभसंकाशनीकाशप्रतीकाशोपमादयइत्यमरः ॥ विश्वतोमुखैर्जलवत्सर्वावयवावच्छेदेनगमनशीलैरित्यर्थः ॥ ६९ ॥ ७० ॥ रुद्रालयैः शिवमंदिरैः ॥ ७१ ॥ दीर्घिकाभिर्गृहवापीभिः ॥ वापीतुदीर्घिकेत्यमरः ॥ मत्तमातंगयूथैर्मत्तगजसमूहैस्तुरंगैरश्वैः ॥ ७२ ॥ शिविकाभिर्मनुष्यनेयैःपालकीतिभाषयाप्रसिद्धैर्वाहनविशेषैः ॥ सभेति ॥ सभाप्रसिद्धा ॥ प्रपापानीयशाला ॥ अत्रसप्तशालादिभिरितिपाठांतरं ॥ ७३ ॥ ७४ ॥ ॥

सदारैःसपत्नीकैः ॥ भार्याजायाथपुंभूम्निदाराःस्यात्तुकुटुंबिनीत्यमरः ॥ ७५ ॥ व्यूढोरस्कैरिति विशालवक्षःस्थलैरित्यर्थः ॥ वृषस्कंधैः वृषवद्दृढस्कंधैः सामयुद्धधरैः साम्नासांत्वनेनयुद्धंकुर्वाणैः ॥ ७६ ॥ कुब्जैःविकरालावयवयुतैः ॥ वामनकैःडित्थैः ॥ ह्रस्वस्तुवामनइत्यमरः ॥ नीलोत्पलेति ॥ नील कमलतुल्यशोभैरित्यर्थः ॥ वालाकुंचितमूर्धजैःकोमलचूर्णकुंतलैः ॥ ७७ ॥ युद्धलालसैर्युद्धलंपटैः ॥ लोलुपोलोलुभोलोलोलंपटोलालसोपिचेतियाद वः ॥ ७८ ॥ अथेति ॥ समररतैर्युद्धासक्तैः ॥ अजशिवपूजनया ॥ अकारोविष्णुःअकारोवासुदेवःस्यादित्येकाक्षरकोशः॥तस्माज्जायतइत्यजोब्रह्मास चशिवश्चतौतयोःपूजनयापूजया ॥ रवीति ॥ सूर्यवायुमहेंद्रसदृशैरित्यर्थः ॥ सुरमथनैर्दैत्यैः ॥ ७९ ॥ ८० ॥ तत्रहेति ॥ आसान्निति शेषः तेषांदैत्यानांप्र

पतिव्रताभिःसर्वत्रपावितंमुनिपुंगवाः ॥ दैत्येश्वरैर्महाभागैःसदारैःससुतैर्द्विजैः ॥ ७५ ॥ श्रौतस्मार्तार्थधर्मज्ञैःस्वध र्मनिरतैःसदा ॥ व्यूढोरस्कैर्वृषस्कंधैःसामयुद्धधरैःसदा ॥ ७६ ॥ प्रशांतैःकुपितैश्चैवकुब्जैर्वामनकैस्तथा ॥ नीलोत्प लदलप्रख्यैर्वालकुंचितमूर्धजैः ॥ ७७ ॥ मयेनरक्षितैःसर्वैःशिक्षितैर्युद्धलालसैः ॥ ७८ ॥ अथसमररतैस्तदासमंता दजशिवपूजनयासुलब्धवीर्यैः ॥ रविमरुदमरेंद्रसंनिकाशैःसुरमथनैःसुदृढैःसुसेवितंचतत् ॥ ७९ ॥ शास्त्रवेदपुरा णानियेयेधर्माःसनातनाः ॥ तैस्तैरविहतैश्चैवसेवितंतुसदाशुभैः ॥ ८० ॥ पृथिव्यांचैवयेधर्मास्तेधर्मास्तत्रतत्रह ॥ तेषांचप्रभयादग्धादेवाःसेंद्रादयःस्तदा॥८१॥दुःखितास्तुतदासर्वेब्रह्माणंशरणंययुः॥तेतुब्रह्माणमागत्यस्वंस्वंदुःखं न्यवेदयन् ॥ ८२ ॥ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिपुरजयोनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥

॥ सूतउवाच ॥ त्रिपुरस्यचतद्दुःखंश्रुत्वोवाचपितामहः ॥ मत्तोहिवर्धितोदैत्योवधंमत्तोनचार्हति ॥ १ ॥ तथापिपुण्यं वर्ततेनगरेत्रिपुरेपुनः ॥ शिवंचप्रार्थयध्वंवैसवःकार्यंकरिष्यति ॥ २ ॥ ॥ ॥

भयातेजसा ॥ ८१ ॥ दुःखिताइति ॥ तइंद्रादयोदेवाः ॥ ८२ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरजयोनामैकोनविंश तितमोऽध्यायः ॥ १९ ॥ ॥ ओंनमःशिवाय ॥ शिवेनप्रेषितान्देवान्विष्णुस्त्रिपुरनाशने ॥ विचार्योपायमाहेतिविंशेऽध्यायेत्रकथ्यते ॥ १ ॥ त्रिपुरस्ये ति ॥ त्रिपुरादुत्पन्नमित्यर्थः ॥ संबंधसामान्यविवक्षायांषष्ठी ॥ मत्तइति ॥ अस्मच्छब्दात्पंचम्यर्थेतसिल् ॥ नचेति ॥ विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसां प्रतमितिन्यायादितिभावः ॥ १ ॥ लोकहितार्थंविषवृक्षन्यायानादरेऽपितत्पुण्यबलान्ममसामर्थ्यंनास्तीत्याह ॥ तथापीति ॥ २ ॥ ॥

॥ ३ ॥ ४ ॥ यत्रेति ॥ हंतव्यमितिभावेतव्यप्रत्ययः ॥ ५ ॥ निवेद्येति ॥ स्वस्थाभवतेतिशेषः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ कथमिति ॥ भविष्यंत्युत्प त्स्यंतेऽस्मत्तइतिशेषः ॥ नोचेदिति ॥ यदिधर्मानोत्पत्स्यंतेतदेत्यर्थः ॥ अकालिकीकालानपेक्षासंहृतिःसंहारःक्रियतांत्वयेतिशेषः ॥ १० ॥ विधी यतांक्रियताम् ॥ विधीयतइतिपाठांतरम् ॥ ११ ॥ स्थिताइति ॥ देववराद्ब्रह्मवराद्ब्रह्मवरस्यसद्भावादित्यर्थः ॥ गतिंतन्मरणोपायंनचक्रुर्नाविदुरित्यर्थः

तदुक्तास्तेययुस्तत्रयत्रास्तेवृषभध्वजः ॥ तत्रगत्वाचतद्दुःखंनिवेद्यसंस्थितापुरः ॥३॥ शिवोऽपितद्वचःश्रुत्वावचनंचेद मब्रवीत् ॥ अयंवैत्रिपुराध्यक्षःपुण्यवान्वर्ततेऽधुना ॥ ४ ॥ यत्रपुण्यंप्रवर्तेतनहंतव्यंबुधैःपुनः ॥ तावत्सर्वैनहंतव्यो यावत्पुण्यंविवर्धते ॥ ५ ॥ तथाचविष्णवेदेवानिवेद्यकारणंत्विदम् ॥ तदीयंतद्वचःश्रुत्वादेवाविष्णुंन्यवेदयन् ॥ ६ ॥ ज्ञात्वावृत्तंचतेषांवैविष्णुर्वचनमब्रवीत् ॥ इदंसत्यंवचश्चैवयत्रधर्मःसनातनः ॥ ७ ॥ तत्रदुःखंनजायेतसूर्येदृष्टेयथात मः ॥ इत्येतद्वचनंश्रुत्वादेवादुःखमुपागताः ॥ ८ ॥ पुनरूचुस्तदाविष्णुंपरिम्लानमुखांबुजाः ॥ कथंचैवप्रकर्तव्यंक थंस्थास्यामहेवयम् ॥ ९ ॥ कथंधर्माभविष्यंतित्रिपुरेजीवितेसति ॥ नोचेदकालिकींदेवसंहृतिःक्रियतांध्रुवम् ॥१०॥ अथवात्रिपुरस्येहवधश्चैवविधीयताम् ॥ इत्युक्त्वातेतदादेवादुःखंकृत्वापुनःपुनः ॥११॥ स्थितानैवगतिंतेऽद्यचक्रुर्देव वरादिह ॥ तांस्तांस्तथाविधान्दृष्ट्वाविष्णुर्विनयसंयुतान् ॥ १२ सोऽपिनारायणःश्रीमांश्चिंतयामासचेतसा ॥ किं कार्यंदेवकार्येषुभगवानितिसुव्रतः ॥ १३ ॥ ततोयज्ञाःस्मृतास्तेनदेवकार्यार्थमक्षयाः ॥ १४ ॥ यज्ञास्तंपुरुषंदिव्यं प्रणम्यतुष्टुवुस्तदा ॥ भगवानपितान्दृष्ट्वायज्ञान्प्राहसनातनान् ॥ १५ ॥ सनातनस्तदासेंद्रान्देवानालोक्यचा च्युतः ॥ अनेनोपसदादेवायजध्वंपरमेश्वरं ॥ १६ ॥ ॥ ॥ ॥

॥ गतिमुपायम् ॥ अथवागमनंनकृतवंतइत्यर्थः ॥ तथाविधान्दुःखपीडितान् ॥ १२ ॥ सुव्रतोभगवान्नारायणश्चेतसामनसादेवकार्येषुकिंकार्यंकिंक र्तव्यमितिचिंतयामासेतिसंबंधः ॥ १३ ॥ ततइति ॥ यज्ञाएवत्रिपुरवधोपायाइतिविचार्यतेनविष्णुनायज्ञाःस्मृताः ॥ १४ ॥ तेयज्ञादिव्यंपुरुषंविष्णुंप्रणम्यतुष्टुवु रित्यन्वयः ॥ १५ ॥ सनातनःपुरातनः ॥ आलोक्यआज्ञापयामासेतिशेषः ॥ कासावाज्ञेतितदाह ॥ अनेनेति ॥ उपसदोपसन्नामकयज्ञेनेत्यर्थः ॥ ताउ पसदेवाजिगीषचितितैत्तिरीयश्रुतेः ॥ १६ ॥ ॥ ॥ ॥ ॥

॥ १७ ॥ संस्तुवन्निति ॥ अत्राडागमाभावआर्षः ॥ १८ ॥ त्रिदशान्देवान् ॥ त्रिदशाविबुधाःसुराइत्यमरः ॥ येचपापाः ॥ अर्शआद्यच् पुरुषास्तेस र्वेयज्ञेन ॥ सर्वेयज्ञेनेतिपाठांतरम् ॥ साधुहंतव्याः ॥ हेसुरोत्तमा एतेतु दैत्याःकथंवध्यावधार्हाइत्यन्वयः ॥ अपापत्वादितिभावः ॥ १९ ॥ असुराइति ॥ कदा चित्पापाअप्यसुरामहाबलैर्देवैःकथंवध्याइत्यनुषक्तान्वयः ॥ ईश्वरेणैववध्याइतिभावः ॥ २० ॥ ईश्वरप्रसादंविनातद्वधे नकेषांचिदपिशक्तिरस्तीश्वरादेव तद्वधइत्याह ॥ तस्मादित्यादिना ॥ २१ ॥ शिवएवभवत्कार्यकर्तेत्याह ॥ सएवेति ॥ २२ ॥ शिवपूजनेनैवकार्यसिद्धिर्भविष्यतीतितत्पूजनस्यमाहात्म्यमाह ॥

पुरत्रयविनाशायजगत्त्रयविभूतये ॥ अच्युतस्यवचःश्रुत्वादेवदेवस्यधीमतः ॥ १७ ॥ सिंहनादंमहत्कृत्वायज्ञेशंसंस्तुवन्सुराः ॥ ततःसंचिंत्यभगवान्स्वयमेवजनार्दनः ॥ १८ ॥ पुनःप्राहेतिसर्वांस्तांस्त्रिदशांस्त्रिदशेश्वरः ॥ अपापानैवहंतव्याःपापायेचनसंशयः ॥ १९ ॥ हंतव्याःसर्वयज्ञेनकथंवध्याःसुरोत्तमाः ॥ असुरादुर्मदाःपापाअपिदेवैर्महाबलैः ॥ २० ॥ तस्मात्तवध्यारुद्रस्यप्रभावात्परमेष्ठिनः ॥ कोवाब्रह्माथवादैत्यादेवावारिपुसूदनाः ॥ २१ ॥ मुनयश्चमहात्मानःप्रसादेनविनाप्रभोः ॥ सएवसर्वदःशर्वःसर्वेषामपिशंकरः ॥ २२ ॥ लीलयादेवदेवश्चसर्वकार्यंकरिष्यति ॥ तस्यांशमेकंसंपूज्यदेवादेवत्वमागताः ॥ २३ ॥ ब्रह्माब्रह्मत्वमापन्नोह्यहंविष्णुत्वमेवच ॥ तमपूज्यजगत्यस्मिन्कःपुमान्सिद्धिमागतः ॥ २४ ॥ तस्मात्तेनैवहंतव्यालिंगार्चनविधेर्बलात् ॥ रुद्रमिष्ट्वायथान्यायंजेष्यामोदैत्यसत्तमान् ॥ २५ ॥ एवमुक्त्वाहरंचेष्ट्वायज्ञेनोपसदाप्रभुं ॥ मृन्मयंपार्थिवंकृत्वालक्षसंख्याविधायकं ॥ २६ ॥ गंधपुष्पाक्षतैश्चैवविष्णुर्देवास्तथाऽयजन् ॥ उपातिष्ठन्ददर्शाऽथभूतसंघान्सहस्रशः ॥ २७ ॥ शूलशक्तिगदाहस्तान्दंष्ट्राचापशिलायुधान् ॥ नानाप्रहरणोपेतान्नानावेषधरांस्तथा ॥ २८ ॥ ॥ ॥ ॥

तस्येति ॥ शिवस्येत्यर्थः ॥ अंशमवतारविशेषम् ॥ २३ ॥ अपूज्येति ॥ ल्यवार्षः ॥ २४ ॥ तेनैवेति ॥ शिवपूजनेनैवेत्यर्थः ॥ २५ ॥ एवमिति ॥ विष्णुर्देवानेबमुक्त्वायज्ञेनोपसदातदाख्येनप्रभुंहरमुद्दिश्येष्ट्वायज्ञंकृत्वाभूतसंघान्ददर्शेत्यग्रिमान्वयः ॥ २६ ॥ देवाइति ॥ अथदेवाअपिहरमयजन् ॥ यज्ञेनयज्ञमयजंतदेवाइति श्रुतेः ॥ उपातिष्ठन्शिवोपस्थानमकुर्वन् ॥ २७ ॥ भूतसंघान्विशिनष्टि ॥ शूलेत्यादिना ॥ दंष्ट्राचापशिलायुधान्दंष्ट्रादंतविशेषाश्चापोधनुःशिलापाषाणस्तान्यायुधान्येषांतान् ॥ नानेति ॥ प्रहरणान्यायुधानि ॥ आयुधंतुप्रहरणमित्यमरः ॥ २८ ॥ ॥ ॥

कालाग्नीति ॥ प्रलयकालीनाग्निरुद्रसदृशानित्यर्थः ॥ २९ ॥ विष्णुःकिंप्राहेतितदाह ॥ दग्ध्वेति ॥ हेभूतायूयंभूतयेलोककल्याणायदैत्यपुरत्रयंभित्वावि
दार्यभङ्क्त्वात्रोटयित्वायथाभवद्भिरत्रागतंतथास्वस्थानंगंतुमर्हथेत्यन्वयः ॥ ३० ॥ ३१ ॥ ३२ ॥ वधादेतेषांनाशोनभविष्यतीतिविष्णुश्चिंतयति ॥ नाश
इति ॥ अभिचारोवधः ॥ श्येनेनाभिचरन्यजेतेत्यादिदर्शनात् ॥ ३३ ॥ ३४ ॥ पुनर्लिंगार्चनस्यैवपापनाशकत्वंभोगसाधकत्वंचाह ॥ कृत्वेति ॥ अंभ

कालाग्निरुद्रसंकाशान्कालसूर्योपमांस्तदा ॥ प्राहदेवोहरिःसाक्षात्प्रणिपत्यस्थितान्पुरः ॥ २९ ॥ दग्ध्वाभित्वाच
भङ्क्त्वाचगत्वादैत्यपुरत्रयम् ॥ पुनर्यथागतंभूतागंतुमर्हथभूतये ॥ ३० ॥ ततःप्रणम्यदेवेशंपरमात्मानमीश्वरम् ॥
तान्दृष्ट्वाचिंतयामासभगवान्पुरुषोत्तमः ॥ ३१ ॥ किंकृत्यमितिसंतप्तःसंतप्तान्सेंद्रकान्क्षणात् ॥ कथंचतेषांदैत्या
नांबलंहत्वाप्रयत्नतः ॥ ३२ ॥ देवकार्यंकरिष्यामिप्रसादात्परमेष्ठिनः ॥ नाशोऽभिचारतोनास्तिधर्मिष्ठानांनसंशयः
॥ ३३ ॥ दैत्याश्चतेहिधर्मिष्ठाःसर्वेत्रिपुरवासिनः ॥ तस्मादवध्यतांप्राप्तानान्यथासुरपुंगवाः ॥ ३४ ॥ कृत्वापिसुम
हत्पापंरुद्रमभ्यर्चयंतिये ॥ मुच्यंतेपातकैःसर्वैःपद्मपत्रमिवांभसा ॥ ३५ ॥ पूजयाभोगसंपत्तिरवश्यंजायतेभुवि
॥ तस्मात्तेभोगिनोदैत्यालिंगार्चनपरायणाः ॥ ३६ ॥ तत्रकृत्वाधर्मविघ्नंक्षणादेवात्ममायया ॥ दैत्यानांदेहनाशार्थं
हनिष्येत्रिपुरंक्षणात् ॥ ३७ ॥ विचार्यैत्थंततस्तेषांभगवान्पुरुषोत्तमः ॥ कर्तुंव्यवसितःपश्चाद्धर्मविघ्नंसुरारिणाम् ॥
॥ ३८ ॥ यावच्चवेदधर्मास्तुयावच्चशंकरार्चनं ॥ यावच्चशुचिकृत्यादिस्तावन्नाशोभवेन्नहि ॥ ३९ ॥ तस्मादेवंप्रकर्त
व्यंवेदधर्मस्ततोव्रजेत् ॥ इतिनिश्चित्यतेविष्णुर्विघ्नार्थमकरोत्तदा ॥ ४० ॥ ॥ ॥

सोदकेनपद्मपत्रंयथामुच्यतेतथातेमुच्यंतेयेरुद्रमर्चयंतीत्यन्वयः ॥ ३५ ॥ पूजयेति ॥ एतेनशिवपूजायाःकाम्यफलकत्वमापिबोध्यते ॥ ३६ ॥ अतोलिंगार्चने
विघ्नःकर्तव्यइत्याह ॥ तत्रेति ॥ ततइतिपाठांतरम् ॥ देहनाशार्थमित्यत्रदेवकार्यार्थमितिपाठांतरम् ॥ ३७ ॥ व्यवसितउद्युक्तः ॥ ३८ ॥ धर्मनाशंविनाऽसुर
नाशोनभवेदितिधर्मनाशोऽवश्यंकर्तव्यइत्याह ॥ यावदित्यादिना ॥ शुचिकृत्यादिःस्नानदानजपादिः ॥ श्रुतिकृत्यादिरितिपाठांतरम् ॥ ३९ ॥ तस्मादि
ति ॥ यथाततोदैत्येभ्योवेदधर्मोव्रजेदपगच्छेदेवंतथाकर्तव्यमित्यर्थः ॥ इतीति ॥ विष्णुःस्वयंदेवान्प्रत्याज्ञांदत्वाविघ्नार्थंधर्मविघ्नार्थमकरोद्यत्नमितिशेषः ॥
नेसुराहरेर्विष्णोराज्ञांमत्वागृहीत्वेत्यर्थः ॥ स्वस्थानंगताइतिकुलकम् ॥ ४० ॥ ॥ ॥

॥ ४१ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरवर्णनंनामविंशोऽध्यायः ॥ २० ॥ ॐनमःशिवाय ॥ दैत्यधर्मांतरायार्थंसृष्टोमुंडीमुरारिणा ॥ मरुदेशंतदाज्ञप्तोगत्वाव्यामोहयन्जनान् ॥ १ ॥ शिष्यप्रशिष्यैर्जिनधर्मतत्परैःस्वीयैरनेकैःकृतवान्पुरत्रयम् ॥ तद्व्याप्तमित्येवकथाप्रसंगोऽस्मिन्नेकविंशेचनिरूप्यतेऽग्रतः ॥ २ ॥ असृजदिति ॥ महातेजाविष्णुःस्वात्मसंभवंस्वकायोत्पन्नमिवपुरुषंजैनपतिमसृजत्सृष्टवान् ॥ १ ॥ सपुरुषःकीदृशइतितंविशेषयति ॥ मुंडमिति ॥ मुंडिनमित्यर्थः ॥ कुंडिपात्रंकाष्ठमयपात्रंतदान्वितम् ॥ गुंफिपात्रमितिपाठांतरम् ॥ पुंजिकांहिंसाभियाजंतुनिवारणार्थंचामरवाद्दि

दत्वादेवान्स्वयंतत्रआज्ञांमत्वागताहरेः ॥ ततश्चैवाऽकरोद्विष्णुर्देवार्थंविधिमुत्तमं ॥ तदेवश्रूयतांसम्यक्सर्वपापप्रणाशनम् ॥ ४१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिपुरवर्णनंनामविंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ सूतउवाच ॥ असृजच्चमहातेजाःपुरुषंस्वात्मसंभवम् ॥ मायीमायामयंतेषांधर्मविघ्नार्थमच्युतः ॥ १ ॥ मुंडंमलिनवस्त्रंचकुंडिपात्रसमन्वितम् ॥ दधानंपुंजिकांहस्तेचालयंतंपदेपदे ॥ २ ॥ वस्त्रयुक्तंतथाहस्तंक्षिप्यमाणंमुखेसदा ॥ धर्मेतिव्याहरंतंतंनमस्कृत्यस्थितंहरेः ॥ ३ ॥ उवाचवचनंतत्रहरयेप्रांजलिस्तदा ॥ अरिहन्नुच्यतांपूज्यकिंकरोमितदादिश ॥ ४ ॥ इत्येवंभगवान्श्रुत्वावचनंचेदमब्रवीत् ॥ यदर्थंनिर्मितोऽसित्वंनिबोधकथयामिते ॥ ५ ॥ ममांगात्त्वंसमुत्पन्नोमत्कार्यंकर्तुमर्हसि ॥ मदीयस्त्वंसदापूज्योभविष्यसिनसंशयः ॥ ६ ॥ मायिन्मायामयंशास्त्रंग्रंथंषोडशसहस्रकम् ॥ श्रौतस्मार्तविरुद्धंचवर्णाश्रमविवर्जितम् ॥ ७ ॥ इहैवस्वर्गनरकप्रत्ययान्नान्यथापुनः ॥ वेदभ्रंशमयंशास्त्रंकर्मवादपरंशुभम् ॥ ८ ॥ एतच्छास्त्रंत्वयाग्राह्यंविस्तारंतद्गमिष्यति ॥ ददामितवसामर्थ्यंनिर्माणेचभविष्यति ॥ ९ ॥ मायाचविविधात्वत्तोवश्यावश्यकरीशुभा ॥ रोधनारोधनंचैवभवतःसंभविष्यति ॥ १० ॥ ॥

ग्रमानांकूर्चिकाम् ॥ २ ॥ क्षिप्यमाणंपारसीकोपाध्यायवन्मुखओष्ठोपरिवस्त्रंक्षिपंतमित्यर्थः ॥ धर्मेतीति ॥ व्याहरंतंभाषमाणमिदानीमपिमागधशूरसेनभाषया (धम्मोस्तुधम्मलाभोभोदु) इतिजैनतीर्थंकराव्याहरंतीतिप्रत्यक्षमनुभूयते ॥ ३ ॥ अरिहन्निति ॥ हेशत्रुनाशकेत्यर्थः ॥ आदिशाज्ञापय ॥ ४ ॥ ५ ॥ मत्कृपयालोकेत्वंपूज्योभविष्यसीत्यत्रहेतुंप्रथमतआह ॥ ममेति ॥ ६ ॥ ७ ॥ वेदभ्रशइति ॥ अपभ्रंशइतिपाठांतरम् ॥ कर्मेति ॥ प्रत्यक्षफलकर्मवादपरमित्यर्थः ॥ ॥ ८ ॥ विस्तारंप्रसृतिम् ॥ लोकइतिशेषः ॥ निर्माणेशास्त्रस्येतिशेषः ॥ ९ ॥ रोधनारोधनम् आविर्भावतिरोभावौ ॥ मायायाइतिशेषः ॥ १० ॥ ॥

॥ ११ ॥ स्थितामिति ॥ हे विष्णोऽधुनात्वंकर्तव्यंममादिशेत्युक्तवंतंजैनयतिमित्यर्थः ॥ १२ ॥ शास्त्रमिति ॥ सूत्रमितिपाठांतरम् ॥ १३ ॥ शास्त्रपाठनेनदैत्यामोहनी याइतिविष्णुर्जैनयतिमाह ॥ मोहनीयाइति ॥ १४ ॥ १५ ॥ तूर्णंशीघ्रम् ॥ भोइतिसंबुद्धिद्योतकमव्ययम् ॥ १६ ॥ मरुस्थल्यांमरुदेशे ॥ १७ ॥ स्वी

इष्टानिष्टप्रदश्यंचनानापिशुनकल्पनाः ॥ विचित्रंचैवयत्कृत्यंतत्तेसर्वंभविष्यति ॥ ११ ॥ तच्छ्रुत्वावचनंतस्यहरेश्चप रमात्मनः ॥ नमस्कृत्यस्थितंतत्रकर्तव्यमादिशाऽधुना ॥ १२ ॥ इत्युक्तेपाठयामासशास्त्रंमायामयंतदा ॥ तच्छास्त्र मुपदिश्यैवपुरुषायाच्युतःस्वयम् ॥ १३ ॥ तमुवाचपुनस्तत्रमोहनीयाइमेत्वया ॥ एतेदैत्यास्त्वयासर्वेपाठनीयामदा ज्ञया ॥ १४ ॥ धर्मास्तत्रप्रकाशंतेश्रौतस्मार्तानसंशयः ॥ अनयाविद्ययासर्वेस्फोटनीयंनसंशयः ॥ १५ ॥ पुरत्रय विनाशार्थंप्राहतंपुरुषंहरिः ॥ गंतुमर्हसिनाशार्थंभोतूर्णंपुरवासिनाम् ॥ १६ ॥ ततोधर्मंप्रकाश्यैवनाशयित्वापुरत्रय म् ॥ ततश्चैवपुनर्गत्वामरुस्थल्यांत्वयापुनः ॥ १७ ॥ स्थातव्यंचस्वधर्मेणकलिर्यावत्समाव्रजेत् ॥ प्रवृत्तेचयुगेतस्मि न्स्वीयोधर्मःप्रकाश्यताम् ॥ १८ ॥ शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वर्धनीयस्त्वयापुनः ॥ मदाज्ञयाभवद्धर्मोविस्तारंया स्यतिध्रुवम् ॥ १९ ॥ मदनुज्ञापरानित्यंगतिंप्राप्स्यथमामकीं ॥ एवमाज्ञातदादत्ताविष्णुनाप्रभविष्णुना ॥ २० ॥ ततःसमुंडीपरिपालयन्हरेराज्ञांतदानिर्मितवांश्चशिष्यान् ॥ यथास्वरूपंचतुरश्चतांस्तदामायामयंशास्त्रमपाठयत्स्व यम् ॥ २१ ॥ यथास्वयंतथातेचचत्वारोमुंडिनःशुभाः ॥ नमस्कृत्यस्थितास्तत्रहरयेपरमात्मने ॥ २२ ॥ हरिश्चापि पुनस्तत्रचतुरस्तांस्तदास्वयम् ॥ उवाचपरमप्रीतोधन्याःस्थइतिसंस्तुवन् ॥ २३ ॥ यथागुरुस्तथायूयंभविष्यथम दाज्ञया ॥ चत्वारोमुंडिनस्तेचधर्मंपाखंडमाश्रिताः ॥ २४ ॥ हस्तेपात्रंदधानाश्चतुंडेवस्त्रस्यधारकाः ॥ मलिनान्येव वासांसिधारयंतोऽल्पभाषिणः ॥ २५ ॥ ॥ ॥ ॥ ॥

योजैनीयइत्यर्थः ॥ १८ ॥ १९ ॥ मामकींमत्संबंधिनींगतिंवैकुंठादिलोकम् ॥ २० ॥ ततइति ॥ मुंडीसयतिश्चतुरश्चतुःसंख्याकांस्तांच्छिष्यान्यथा स्वरूपंयथासंप्रदायंमायामयंशास्त्रमपाठयदध्यापयामासेत्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥ विष्णुस्तदाप्रसन्नोवरंचतुर्णांददावित्याह ॥ यथागुरुरिति ॥ पाखंडमार्हतमित्यर्थः ॥ २४ ॥ २५ ॥ ॥ ॥ ॥ ॥

धर्मइति ॥ लभ्यतइतिलाभएतादृशोधर्मएवपरंश्रेष्ठंतत्वमितिवदंतइत्यर्थः ॥ मार्जनीं प्राणिनिवारककूर्चिकां स्वयंहरिणाधार्यमाणामित्यन्वयः॥२६॥२७॥ ॥२८॥२९॥३०॥ अरिहन्निति ॥ तन्नामतस्यनामत्वरिहन्निति ॥ त्रिपुरादिशत्रुनाशकत्वादितिभावः ॥३१॥ ततइति ॥ मायीमुंडी॥३२॥

धर्मोलाभःपरंतत्त्वंवदंतस्तेतथास्वयम् ॥ मार्जनींधार्यमाणास्तेवस्त्रखंडविनिर्मिताम् ॥२६॥ तेसर्वेचतदादेवंभगवंतंमुदान्विताः ॥ नमस्कृत्यपुनस्तत्रहर्षनिर्भरमानसाः ॥२७॥ हरिणाचतदाहस्तेधृत्वाचगुरवेऽर्पिताः ॥ यथात्वंचतथैतेवैमदीयानैवसंशयः ॥२८॥ आदिरूपंचतन्नामपूज्यत्वात्पूज्यउच्यते ॥ ऋषिर्यतिस्तथाचार्यउपाध्यायइतिस्वयम् ॥२९॥ इमान्यपितुनामानिप्रसिद्धानिभवंत्विति ॥ ममापिचभवद्भिश्चनामग्राह्यंशुभंपुनः ॥३०॥ अरिहन्नितितन्नामध्येयंपापप्रणाशनम् ॥ भवद्भिश्चैवकर्तव्यंकार्यंलोकसुखावहं ॥३१॥ ततःप्रणम्यतंमायीशिष्ययुक्तःस्वयंतदा ॥ प्रविश्यतत्पुरंतूर्णमृषिर्मायांतदाकरोत् ॥३२॥ निकटस्थेवनेगत्वाशिष्यैर्युक्तःस्थितस्तदा ॥ मायांप्रवर्तयामाससमायिनामपिमोहिनीम् ॥३३॥ येयेगतास्तदातत्रतेतेदीक्षामुपागताः ॥ येयेपश्यंतितांस्तत्रमोहमायापरायणाः ॥३४॥ अभूवंस्तत्क्षणादेवदर्शनान्मायिनामपि ॥ नारदोऽपितदामायानियोगान्मायिनःप्रभोः ॥ ॥३५॥ प्रविश्यतत्पुरंतेनमायिनासहदीक्षितः ॥ ततश्चनारदोगत्वाराज्ञेसर्वंन्यवेदयत् ॥३६॥ कश्चित्समागतश्चाऽत्रयतिर्धर्मपरायणः ॥ दृष्टाश्चबहवोधर्मानैतेनसदृशाःपुनः ॥३७॥ वयंचदीक्षितास्तत्रदृष्ट्वाधर्मंसनातनम् ॥ तवेच्छायदिवर्तेतग्राह्यादीक्षात्वयाधुना ॥३८॥ तदीयंतद्वचःश्रुत्वाराजातत्रजगामह ॥ नारदोदीक्षितोयस्माद्वयंदीक्षामवाप्नुमः ॥३९॥ इत्येवंचविदित्वावैजगामस्वयमेवह ॥ तदाटोपंतदादृष्ट्वामोहितोमाययातया ॥४०॥ उवाचवचनंतस्मैनमस्कृत्यमहात्मने ॥ दीक्षादेयात्वयामह्यमृषयोनिर्मलाशयाः ॥४१॥ ॥

॥३३॥३४॥ तदानारदोऽपिविष्णुमाययागत्यतद्धर्मंस्वीकृतवानित्याह ॥ नारदइति ॥ मायिनातेनमुंडिनेत्यर्थः ॥३५॥ ततइति ॥ राज्ञेतारपुत्राय विद्युन्मालिनेमोहनार्थंसर्वधर्मप्रशंसात्मकंवृत्तंन्यवेदयदकथयदित्यर्थः ॥३६॥३७॥३८॥ अवाप्नुमइति ॥ महाजनोयेनगतःसपंथाइतिन्यायादितिभावः ॥३९॥ तदाटोपंमुंडिनआडंबरम् ॥४०॥४१॥ ॥ ॥ ॥

॥ ४२ ॥ मुंडीकिंतद्वचनमुवाचेतितदाह ॥ वरेति ॥ हेवरश्रेष्ठमहाराजममवचनंवाक्यंदेहिंकुरुकिंचममवचनंनलोप्यंव्यर्थनकुर्विति ॥ मायामयोमोहितः
॥ ४३ ॥ यथेति ॥ यथात्वंदास्यसिधर्मोपदेशंतत्तथैवाहंस्वीकरोमिनान्यथेतिराजावददित्यर्थः ॥ ४४ ॥ अंततएकांतइत्यर्थः ॥ ४५ ॥ ४६ ॥ ४७ ॥
इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरदीक्षाविधानंनामैकविंशोऽध्यायः ॥२१॥ ओंनमःशिवाय॥ आम्नायस्मृतिधर्मखंडनभवास
द्धर्मयुक्तायदाजातास्तेत्रिपुरस्थितादितिसुतास्तेषांदुराचारतः ॥ दारिद्र्यंमतिविभ्रमंचसततंदृष्ट्वाऽतिहृष्टाःसुराविष्ण्वाद्याःशिवमस्तुवन्निितिकथाद्वाविंशकेत्रैर्य

इत्येवंवचनंश्रुत्वाराज्ञोक्तंपरमंवचः ॥ उवाचमुंडिराजस्त्वंश्रूयतांपरमंवचः ॥ ४२ ॥ वरत्वंवचनंदेहिनलोप्यंवचनंम
म ॥ इतिश्रुत्वावचस्तस्यराजामायामयोऽभवत् ॥ ४३ ॥ यथाचदास्यसित्वंचतत्तथैवनचाऽन्यथा ॥ दूरीकृत्यमुखा
द्वस्त्रमुवाचऋषिसत्तमः ॥ ४४ ॥ आगच्छराजशार्दूलमंत्रमेनंगृहाणच ॥ इत्युक्त्वातंमहाराजंविद्युन्मालिनमंततः ॥
॥ ४५ ॥ कथयामासस्वंतत्त्वंयेनधर्मोविनश्यति ॥ दीक्षतांवचनंश्रुत्वादीक्षितस्तत्क्षणादपि ॥ ४६ ॥ सर्वेचदीक्षिता
स्तत्रयेवैत्रिपुरवासिनः ॥ मुनेःशिष्यैःप्रशिष्यैश्चव्यापितंत्रिपुरंमहत् ॥ ४७ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहिता
यांत्रिपुरदीक्षाविधानंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ सूतउवाच ॥ स्त्रीधर्मंखंडयामासश्राद्धधर्मा
स्तथैवच ॥ शिवपूजांतथाविष्णोर्यज्ञभागाननेकशः ॥ १ ॥ स्नानदानादिकंतीर्थंसर्वकालेसुशोभनम् ॥ वेदधर्माश्च
येकेचित्तेसर्वेदूरतःकृताः ॥२॥ मायाचदेवदेवस्यविष्णोस्तस्याज्ञयाप्रभोः ॥ अलक्ष्मीश्चस्वयंतस्यनियोगात्त्रिपुरंगता
॥ ३ ॥ यालक्ष्मीस्तपसातेषांलब्धादेवेश्वराज्ञया ॥ बहिर्गतापरित्यज्यनियोगाद्ब्रह्मणःप्रभोः ॥ ४ ॥ ॥

ते ॥ १ ॥ स्त्रीधर्ममिति ॥ स्त्रीधर्ममन्वाद्युक्तंपातिव्रत्यपतिसेवापारतंत्र्यादिकं ॥ तथाचोक्तं मनुना ॥ बालयावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातं
त्र्येणकर्तव्यंकिंचित्कार्यंगृहेष्वपि ॥ तथा ॥ अस्वतंत्राःस्त्रियःकार्याःपुरुषैःस्वैर्दिवानिशम् ॥ विषयेषुचसज्जंत्यःसंस्थाप्याआत्मनोवशेइति ॥ श्राद्धधर्माःप्रसिद्धाः
॥ १ ॥ सर्वकालइत्यत्रपर्वकालइतिपाठांतरम् ॥ वेदधर्मावेदप्रतिपाद्यधर्माःदूरतःकृताःनिराकृताइत्यर्थः ॥ तत्रोक्तंमनुना योवमन्येततेमूलेहेतुशास्त्राश्रया
द्द्विजः ॥ ससाधुभिर्बहिष्कार्योनास्तिकोवेदनिंदकइति ॥ २ ॥ अलक्ष्मीर्दारिद्र्यम् ॥ ३ ॥ ४ ॥ ॥ ॥

तथाभूतंधर्मनाशकम् ॥ तेषामिति ॥ तेषांविद्युन्मालिप्रभृतीनांमायीमायावीनारदस्तषांविद्युन्मालिप्रभृतीनांबुद्धिमोहंदत्वाजगामेतिशेषः ॥ ५ ॥ तदेवाह ॥ नारदइति ॥ यथामायीमुंडीतथानारदस्तथारूपस्तद्धर्मसंपन्नइत्यर्थः ॥ ६ ॥ पाखंडः ॥ पाखंडाःसर्वलिंगिनइत्यमरः ॥ विश्वयोनिनाविश्वस्यजगतोयोनिःकारणंतेन ॥ ७ ॥ कृतार्थःकृतकृत्योदेवेशोविष्णुः ॥ ८ तुष्टावअस्तौत् ॥ कथमस्तौदितितदाह ॥ महेश्वरायेति ॥ ९ ॥ नारायणायनाराउदकानितेषामयनमाश्रयस्तस्माइत्यर्थः ॥ आपोनाराइतिप्रोक्ताइतिश्रुतेः ॥ रुद्राय रुजंद्रावयतीतिरुद्रस्तस्मै ॥ रुजंद्रावयतेयस्माद्रुद्रस्तस्मादुदीरितइतिस्मरणात् ॥ १० ॥ रुद्रमंत्रं त्र्यंबकंयजामहइत्यादिकम् ॥ दक्षिणामूर्तिसंभवम् ॥ व्याख्यातपूर्वमिदम् ॥ तदानींसार्धकोटित्रयवर्षपर्यंतंजलेस्थित्वापरमेश्वरम

बुद्धिमोहंतथाभूतंविष्णोर्मायाविनिर्मितम् ॥ तेषांदत्वाक्षणादेवतेषांमायीचनारदः ॥ ५ ॥ नारदोऽपितथारूपोयथामायीतथैवसः ॥ एवंनष्टेतदाधर्मेश्रौतस्मार्तेसुशोभने ॥ ६ ॥ पाखंडःस्थापितस्तेनविष्णुनाविश्वयोनिना ॥ त्यक्तेमहेश्वरेदैत्यैस्त्यक्तेलिंगार्चनेतथा ॥ ७ ॥ स्त्रीधर्मेनिखिलेनष्टेदुराचारेव्यवस्थिते ॥ कृतार्थइवदेवेशोदेवैःसार्धमुमापतिम् ॥ ८ ॥ तरसाप्राप्यसर्वज्ञंतुष्टावपुरुषोत्तमः ॥ महेश्वरायदेवायनमस्तेपरमात्मने ॥ ९ ॥ नारायणायरुद्रायब्रह्मणेब्रह्मरूपिणे ॥ एवंस्तुत्वामहादेवंदंडवत्प्रणिपत्यह ॥ १० ॥ जजापरुद्रमंत्रंचदक्षिणामूर्तिसंभवम् ॥ जलेस्थित्वातदाकोटित्रयंचार्धंतथैवच ॥ ११ ॥ तावद्देवास्तदासर्वेतुष्टुवुःपरमेश्वरम् ॥ नमःसर्वात्मनेतुभ्यंशंकरायार्तिहारिणे ॥ १२ ॥ रुद्रायनीलरुद्रायविरूपायप्रचेतसे ॥ गतिर्नःसर्वदाऽस्माभिर्वंद्योदेवारिसूदनः ॥ १३ ॥ त्वमादिस्त्वमनादिश्चआनंदश्चाऽक्षयःप्रभुः ॥ प्रकृतेःपुरुषस्यापिसाक्षात्स्त्रष्टाजगद्गुरुः ॥ १४ ॥ कर्ताहर्ताजगत्यस्मिन्सर्वेषांपरिपालकः ॥ वरदोवाङ्मयोवाच्योवाच्यवाचकवर्जितः ॥ १५ ॥ ॥ ॥ ॥

स्तुवन्नित्याह ॥ जलइति ॥ ११ ॥ सर्वात्मनेऽहंकारतत्वाभिमानित्वात्सर्वांतर्यामिणइत्यर्थः ॥ १२ ॥ विरूपायेत्यत्रचिद्रूपायेतिपाठांतरम् ॥ तत्रचिद्रूपायज्ञानरूपाय ॥ नोऽस्माकम् ॥ देवारिसूदनोदैत्यनाशकः ॥ १३ ॥ आदिःकारणमनादिरुत्पत्तिशून्यः ॥ प्रकृतेरिति ॥ प्रकृतेर्जडप्रकृतेःस्रष्टा ॥ एतेनसांख्यमतंप्रत्याख्यातम् ॥ तन्मतेप्रकृतेरनादित्वादिति ॥ १४ ॥ जगत्सृष्ट्यादिकर्तृत्वमपिदर्शयति ॥ कर्तेत्यादिना ॥ वाच्योवेदप्रतिपाद्यः ॥ वाच्यवाचकवर्जितइति ॥ तस्यनिर्गुणत्वादितिभावः ॥ १५ ॥ ॥ ॥ ॥ ॥

योयोगिभिर्मुक्त्यर्थंयाच्योयाचनीयः ॥ हृत्पुंडरीकशिखरेहृत्कमलेसंस्थितःस्थितः ॥ सवाएषमहानजआत्मायोयंविज्ञानमयः प्राणेषुयएषोंतर्हृदयआ काशस्तस्मिंच्छेतेसर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिरित्यादिवृहदारण्यकश्रुतेः ॥ १६ ॥ वदंतीति ॥ वेदाःसदेवसौम्यइदमग्रआसीद्ब्रह्मवाइदमग्र आसीदित्यादिश्रुतयइत्यर्थः ॥ वेदैश्चसर्वैरहमेववेद्यइतिभगवद्गीतोक्तेः ॥ भवंतमिति ॥ तत्त्वंब्रह्मस्वरूपम् ॥ वदंतितत्तत्वविदस्तत्वंयज्ज्ञानमद्वयम् ॥ ब्र ह्मेतिपरमात्मेतिभगवानितिशब्द्यतइतिश्रीमद्भागवतोक्तेः ॥ १७ ॥ सर्वंजगत्स्वरूपत्वंशिवस्यनिरूपयति ॥ दृष्टमिति ॥ दृष्टंघटादि श्रुतंस्वर्गनरका दि ॥ तत्सर्वंत्वामाहुः ॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुतेः ॥ १८ ॥ अणोरिति ॥ अणोरप्यल्पतरमत्यल्पम् ॥ अणोरणीयान्महतोमहीयानितिश्रुतेः ॥

याच्योमुक्त्यर्थमीशानोयोगिभिर्योगवित्तमः ॥ हृत्पुंडरीकशिखरेयोगिनांसंस्थितःसदा ॥ १६ ॥ वदंतिवेदास्त्वां संतंपरंब्रह्मस्वरूपिणम् ॥ भवंतंतत्त्वमित्याहुस्तेजोराशिंपरात्परम् ॥ १७ ॥ परमात्मानमित्याहुरस्मिन्जगतिय त्प्रभो ॥ दृष्टंश्रुतंस्तुतंसर्वंजायमानंजगद्गुरो ॥ १८ ॥ अणोरल्पतरंप्राहुर्महतोपिमहत्तरम् ॥ सर्वतःपाणिपादांतंस र्वतोऽक्षिशिरोमुखम् ॥ १९ ॥ महादेवमनिर्देश्यंसर्वज्ञंत्वामनावृतं ॥ विश्वरूपंविरूपाक्षंसदाशिवमनुत्तमम् ॥२०॥ कोटिभास्करसंकाशंषड्विंशकमनीश्वरम् ॥ प्रवर्तकंजगत्यस्मिन्प्रकृतेश्चपितामहम् ॥ २१ ॥ वदंतिवरदंदेवंसर्ववा संस्वयंप्रभुम् ॥ श्रुतयःश्रुतसारंत्वांश्रुतिसारज्ञमेवच ॥ २२ ॥ अदृष्टमस्माभिरनेकमूर्तेत्वयाकृतंयद्भवनाथलोके ॥ त्वामेवदेवासुरभूसुराश्चदैत्याःसुराःस्थावरजंगमाश्च ॥ २३ ॥ पाहिनान्यागतिःशंभोविनिहत्यासुरान्क्षणात् ॥ मा ययामोहिताःसर्वेभवतःपरमात्मनः ॥ २४ ॥ स्तुतश्चैवंसुरेंद्राद्यैर्विष्णोर्जाप्येनचेश्वरः ॥ विष्णुमालिंग्यतत्रैवप्रगृ हीतकरःस्वयं ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥

सर्वतइति ॥ सर्वतःपाणिपादांतंसर्वतोक्षिशिरोमुखं ॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठतीतिश्रवणादितिभावः ॥ १९ ॥ अनिर्देश्यंशब्दावाच्यम् ॥ अनावृत मविद्यासंबंधशून्यम् ॥ विरूपाक्षंभालनेत्रं ॥ अनुत्तमंनविद्यतउत्तमोयस्मात्तंसर्वोत्तममित्यर्थः ॥ २० ॥ षड्विंशकंषड्विंशातितमतत्त्वरूपम् ॥ तच्चयोगशास्त्रे प्रसिद्धम् ॥ अनीश्वरंनियामकशून्यम् ॥ प्रकृतेःप्रवर्तकंपितामहंकूटस्थमित्यर्थः ॥ २१ ॥ २२ ॥ त्वामिति ॥ हेभवहेनाथ ॥ भूसुराब्राह्मणाः ॥ द्विजात्य ग्रजन्मभूदेववाडबाइत्यमरः ॥ स्तुवंतीतिशेषः ॥ हेभवशर्वहेनाथस्वामिन् ॥ २३ ॥ २४ ॥ २५ ॥ ॥ ॥

॥ २६ ॥ हेविष्णो ॥ २७ ॥ अथेति ॥ सेंद्रोपेंद्राइंद्राच्युतसहिताः ॥ २८ ॥ अध्यायोक्तकथाश्रवणफलमाह ॥ यइति ॥ २९ ॥ ३० ॥ इतिश्री शिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरविजयोनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॐनमःशिवाय ॥ जपरूपहराचैवमवक्कार्यसुसाधिका ॥ इतिविष्णूपदेशेनदेवास्तेऽनन्यवृत्तयः ॥ १ ॥ कुर्वतःकोटिसंख्याकंशैवमंत्रजपंशिवम् ॥ अस्तुवन्नेवमाख्यानंत्रयोविंशेऽत्रवर्ण्यते ॥ २ ॥ अथेति ॥ जयेतिशुभलक्षणंजयजयेत्याकारकंशुभलक्षणंशुभशब्दयुतंवाक्यंव्याजहारोचुः ॥ एकवचनमार्षम् ॥ १ ॥ ततइति ॥ सनंदीनंदिकेश्वराख्यःशिवस्यप्र

प्राहगंभीरयावाचादेवानालोक्यशंकरः ॥ ज्ञातंमयेदमधुनादेवकार्यंसुरेश्वर ॥ २६ ॥ विष्णोर्मायाबलंचैवनारदस्य चधीमतः ॥ तेषामधर्मनिष्ठानांदैत्यानांदेवसत्तम ॥ २७ ॥ पुरत्रयविनाशंचकरिष्येऽहंसुरोत्तम ॥ अथसब्रह्मकादे वाःसेंद्रोपेंद्राःसमागताः ॥ २८ ॥ श्रुत्वाप्रभोस्तदावाक्यंप्रणेमुस्तुष्टुवुश्चते ॥ यइदंकीर्तयेत्स्तोत्रंशुचिर्भूत्वासदान रः ॥ २९ ॥ शृणुयाद्वामहापुण्यंसर्वान्कामानवाप्नुयात् ॥ ३० ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिपुरविज योनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ सूतउवाच ॥ अथैतदंतरेदेवाःपुत्रैःसहसमन्विताः ॥ व्याजहारप्रियं वाक्यंजयेतिशुभलक्षणम् ॥ १ ॥ ततःसनंदीसहषण्मुखेनतयाचसार्द्धंगिरिराजपुत्र्या ॥ विवेशभव्यंभवनंनतोपि सुरैःसमस्तैरभिवंद्यमानः ॥ २ ॥ द्वारस्यपार्श्वतस्तस्थुर्देवदेवस्यधीमतः ॥ किंकर्तव्यंक्वगंतव्यंहाहताःस्मेतिवादि नः ॥ ३ ॥ किंतुकिंत्वितिचाऽन्योन्यंप्रेक्ष्यचात्यंतमाकुलाः ॥ पापावयमितीहान्येअभाग्याश्चेतिचाऽपरे ॥ ४ ॥ ते भाग्यवंतोदैत्येंद्राइतिचाऽन्येसुरेश्वराः ॥ इत्युक्त्वातुपुनर्यावद्गंतुमीषुःशिवालयं ॥ ५ ॥ एतस्मिन्नंतरेतेषांश्रुत्वाशब्दा ननेकशः ॥ कुंभोदरोमहातेजादंडेनाऽताडयत्सुरान् ॥ ६ ॥ दुद्रुवुस्तेभयाविष्टादेवाहाहेतिवादिनः ॥ अपतन्मुन यश्चाऽन्येइंद्रश्चधरणितले ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

धानसेवकः ॥ नंदिनोनंदिकेश्वरइत्यमरः ॥ नतोपिनम्रोपिसुरैरभिवंद्यमानस्तूयमानोनमस्क्रियमाणोवासन् ॥ वदिअभिवादनस्तुत्योरितिधातुः ॥ षण्मु खेनकार्तिकेयेनपार्वत्याचसार्धंदिव्यमुत्तमंभवनंशिवस्यविवेशेतिसंबंधः ॥ २ ॥ केचिद्देवास्तदाऽस्माभिःकिंकर्तव्यंवयंपापिनोदुर्भगादैत्यास्तुसुभगाश्चे त्यवदन्नित्याह ॥ किमिति ॥ ३ ॥ ४ ॥ ईषुरिच्छामकुर्वन् ॥ ५ ॥ कुंभोदरस्तदाख्यःशिवसेवकविशेषः ॥ ६ ॥ दुद्रुवुःपलायिताः ॥ ७ ॥

विधिवलंदैववलम् ॥ विधिर्विधानेदैवेपीत्यमरः ॥ ८ ॥ ९ ॥ विष्णुःशिवस्यजपतपआद्याराधनंविनाकार्यसिद्धिर्नभविष्यतीतिपंचाक्षरमंत्रजपःकार्यइत्या
ह ॥ महदित्यादिना ॥ महदाराधनंमहतःशिवस्याराधनम् ॥ १० ॥ मंत्रस्वरूपमाह ॥ प्रणवमिति ॥ ओंकारमित्यर्थः ॥ ओंकारप्रणवौसमावित्यमरः ॥
॥११॥ शिवायेति ॥ ओंनमःशिवायेतियावत् ॥ शुभद्वयमिति ॥ कुरुद्वयमितिच ॥ शुभंकुरुशुभंकुर्वितियावत् ॥ १२ ॥ यावच्छिवकृपाभवेत्तावदेतन्मं

अहोविधिवलंचैतन्मुनयःकश्यपादयः ॥ वदंतिस्मतदासर्वेहरिंलोकसुखावहम् ॥ ८ ॥ अभाग्यान्नसमाप्तंतुकार्य
मित्यपरेद्विजाः ॥ इत्येवंवचनंश्रुत्वाहरिर्वाक्यमुपाददे ॥ ९ ॥ किमर्थंदुःखमापन्नादुःखंतुत्यज्यतांपुनः ॥ महदाराध
नंदेवाह्यसाध्यंभवतिनृणां ॥ १० ॥ शिवःसर्वगणाध्यक्षःकथंवश्योभवेदिति ॥ प्रणवंपूर्वमुच्चार्यनमःपश्चादुदाहरे
त् ॥ ११ ॥ शिवायेतिततश्चैवशुभद्वयमतःपरम् ॥ कुरुद्वयंपुनःप्रोक्तंशिवायचततःपुनः ॥ १२ ॥ नमश्चप्रणवश्चैव
मंत्रमेतंसदाबुधाः ॥ आवर्तध्वंपुनर्यूयंयदाशिवकृपातदा ॥ १३ ॥ कोटिमेकांतथाजप्त्वाशिवःकार्यंकरिष्यति ॥ इ
त्युक्तेचतदातेनहरिणाप्रभविष्णुना ॥ १४ ॥ तथादेवाःपुनश्चक्रुर्हरस्याराधनंरहः ॥ शिवशिवेतिभाषंतोदेवाधैर्यस
मन्विताः ॥ १५ ॥ कोटिसंख्याजपंकृत्वासर्वेतेदेवसत्तमाः ॥ एतस्मिन्नंतरेसाक्षाच्छिवःप्रादुरभूत्स्वयम् ॥ १६ ॥ य
थोक्तेनस्वरूपेणवचनंचेदमब्रवीत् ॥ प्रसन्नोऽस्मिवरंब्रूतमनसोभीप्सितंपरम् ॥ १७ ॥ प्रसन्नेवरदेदेवेशिवेमाहेश्व
रेहरे ॥ सर्वेदेवास्तदासर्वेस्तुतिंचक्रुःशुभावहाम् ॥ १८ ॥ देवाऊचुः ॥ शंकरायनमस्तेऽस्तुनमस्तेपरमात्मने ॥ प
रावरस्वरूपायनमस्तेशूलपाणये ॥ १९ ॥ नमोगणाधिदक्षायकपर्दिनेनमोस्तुते ॥ नमोस्तुतेत्रिनेत्रायवेदानांपत
येनमः ॥ २० ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्रावृत्तिःकार्येत्याह ॥ आवर्तध्वमिति ॥ १३ ॥ जपसंख्यामाह ॥ कोटिमिति ॥ जप्त्वामंत्रजपंकृत्वास्थितानांवइतिचशेषःकार्यः ॥ अतोनसमानकर्तृकत्वहा
निः ॥ १४ ॥ १५ ॥ १६ ॥ यथोक्तेनेति ॥ दिव्येनेत्यर्थः ॥ अभीप्सितमपेक्षितम् ॥ १७ ॥ माहेश्वरेमहेश्वरएवमाहेश्वरस्तस्मिन्स्वार्थेऽण् ॥ १८ ॥
परावरस्वरूपायउच्चनीचस्वरूपाय ॥ सएषपरोवरीयानुद्गीथइतिश्रुतेः ॥ १९ ॥ २० ॥ ॥ ॥ ॥

मूलप्रकृतिहेतवेमूलप्रकृतिरव्यक्तंतस्यहेतवे ॥ एतेननिरीश्वरसांख्यमतंनिराकृतंभवति ॥ व्यापकायेति ॥ एतेनात्मनोमध्यमपरिमाणरूपत्ववादिचार्वाकमतंप्रत्याख्यातंभवति ॥ २१ ॥ स्तोत्रमुपसंहरति ॥ एवमिति ॥ देवावदंति ॥ यदीति ॥ हन्यतांनाश्यताम् ॥ एकवचनमार्षम् ॥ २२ ॥इतीति ॥ शिवःपुनरब्रवीद्विश्वकर्माणमितिशेषः॥ २३ ॥ २४ ॥ २५ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरोपाख्यानेत्रयोविंशोऽध्यायः ॥ २३ ॥ औंनमःशिवाय ॥ रथंदेवमयंशंभुर्विश्वकर्मविनिर्मितम् ॥ आरुह्यत्रिपुरंगत्वादेवसेनासमावृतः ॥ १ ॥ जघानत्रिपुरंदेवानिर्दुःखाश्चतदाभवन् ॥ स्तुत्यालब्ध

कार्यकारणरूपायमूलप्रकृतिहेतवे ॥ व्याप्यायचनमस्तुभ्यंव्यापकायनमोनमः ॥ २१ ॥ एवंस्तुतस्तदादेवैःप्रसन्नोजगदीश्वरः ॥ यदिप्रसन्नोदेवेशहन्यतांत्रिपुराणिच ॥ २२ ॥ इत्युक्तंवचनंतेषांश्रुत्वाचपुनरब्रवीत् ॥ रथंचसारथिंशंभोःकार्मुकंशरमुत्तमं ॥ २३ ॥ कर्त्तुमर्हसियत्नेननष्टंमत्वापुरत्रयं ॥ इतिश्रुत्वावचस्तस्यकल्पनंतुरथस्यच ॥ ॥ २४ ॥ सर्वदेवमयंदिव्यंरथंपरमशोभनं ॥ रचयामासविश्वार्थैविश्वकर्मास्वयंतथा ॥ २५ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिपुरोपाख्यानेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ सूतउवाच ॥ अथरुद्रस्यदेवस्यनिर्मितोविश्वकर्मणा ॥ सर्वलोकमयोदिव्योरथोयत्नेनसादरम् ॥ १ ॥ सर्वभूतमयश्चैवसौवर्णःसर्वतःस्मृतः ॥ रथांगंदक्षिणंसूर्योवामांगंसोमउच्यते ॥ २ ॥ दक्षिणंद्वादशारंहिषोडशारंतथोत्तरम् ॥ अरेषुतेषुविप्रेंद्राआदित्याद्वादशैवतु ॥ ॥ ३ ॥ शशिनःषोडशारास्तुकलावामस्यसुव्रताः ॥ ऋक्षाणिचतथातस्यवामस्यैवविभूषणम् ॥ ४ ॥ ॥

वराएवंचतुर्विंशोत्रवर्ण्यते ॥ २ ॥ अथेति ॥ सर्वलोकमयश्चतुर्दशभुवनप्रचुरः ॥ दिव्यःसर्वोत्तमः ॥ १ ॥ सर्वभूतमयःसर्वप्राणिमयः ॥ सर्वैरथावयवादेवमयाआसन्नित्याह ॥ रथांगमिति ॥ दक्षिणंरथस्यदक्षिणदेशस्थंरथांगंरथावयवःसूर्यआसीत् ॥ एवमग्रेपिद्रष्टव्यम् ॥ २ ॥ रथचक्रारपरिमाणमाह ॥ दक्षिणमिति ॥ अरेष्विति ॥ तेषुदक्षिणदेशस्थेषुद्वादशस्वरेषुदलेषुद्वादशादित्याः ॥ हेविप्रेंद्राःशौनकादयः ॥३॥ शशिनइति ॥ हेसुव्रताःवामस्योत्तरभागस्यचषोडशारास्तुशशिनश्चंद्रमसःकलाएवाभवन्नितिशेषः ॥ भूषणमिति ॥ नक्षत्राधिपस्यचंद्रमसोवामभागेधिष्ठितत्वान्नक्षत्राण्यपितस्यैवभूषणान्यासन्नितिभावः ॥ ४ ॥

तेभ्यइति ॥ तेभ्यःसप्तविंशतिसंख्याकेभ्योनक्षत्रेभ्यःकल्पिताःषड्ऋतवोवसंतादयस्तयोर्वामदक्षिणयोरधिष्ठिताः अथवातेभ्योद्वादशादित्याभिमानिकमासेभ्यःकल्पिताःषड्ऋतवआसन्नित्यर्थः ॥ अन्यत्पूर्ववत् ॥ पुष्करंरथाग्रंअंतरिक्षंद्यौः ॥ रथनीडंरथकुलायंः॥कुलायोनीडमस्त्रियामित्यमरः ॥ मंथरोमंदराचलः॥मंदिरमितिपाठांतरम् ॥ ५ ॥ कूबरौयुगंधरौयुगकीलकावित्यर्थः ॥ कूबरस्तुयुगंधरइत्यमरः ॥ अयनेदक्षिणोत्तरसंज्ञकेलोहधारकेआस्ताम् ॥६॥ रथकुंडलिकारथपरिवेपरूपाः ॥ ७ ॥ रश्मिधरोरज्जुधरः ॥ किरणप्रग्रहौरश्मीइत्यमरः ॥ ८ ॥ प्रतोदः (कोरडा) इतिभाषयाप्रसिद्धः ॥ मेकरइति ॥

तेभ्यःषड्ऋतवश्चैवतयोर्वैविप्रपुंगवाः ॥ पुष्करंचांतरिक्षंचरथनीडंचमंथरः ॥ ५ ॥ अस्ताद्रिरुदयाद्रिस्तुउभौतौकूबरौस्मृतौ ॥ वेगःसंवत्सरस्तस्यअयनेलोहधारके ॥ ६ ॥ समुद्रास्तस्यचत्वारोरथकुंडलिकाःस्मृताः ॥ गंगाद्याःसरितःश्रेष्ठाःसर्वाभरणभूषिताः ॥ ७ ॥ चामरासक्तहस्ताश्चदिव्यस्त्रीरूपधारिकाः ॥ सारथिर्भगवान्ब्रह्मादेवोरश्मिधरःस्मृतः ॥ ८ ॥ प्रतोदोब्रह्मणस्तस्यप्रणवोब्रह्मदैवतम् ॥ मेकरश्चमहच्छत्रंमंदरःपार्श्वदंडकः ॥ ९ ॥ शैलेंद्रःकार्मुकंतस्यज्याभुजंगाधिपःस्वयम् ॥ घंटासरस्वतीदेवीधनुषःश्रुतिरूपिणी ॥ १० ॥ इषुर्विष्णुर्महातेजाअग्निःशल्यंप्रकीर्तितम् ॥ हयास्तस्यतथाप्रोक्ताश्चत्वारोनिगमास्तथा ॥ ११ ॥ ज्योतींषिभूषणंतेषामवशिष्टान्यतःपरम् ॥ ब्रह्मांडेचैवयत्किंचिद्वस्तुसर्वंरथंस्मृतं ॥ १२ ॥ एवंकृतंरथंदिव्यंकार्मुकंचशरास्तथा ॥ सारथिर्जगतांचैवब्रह्मातुप्रभुरीश्वरः ॥ १३ ॥ आरुरोहरथंयुक्तंरणमंडनमद्भुतम् ॥ सर्वदेवमयोभूत्वाकंपयन्निवरोदसी ॥ १४ ॥ ॥

मेकरोरलयोःसावर्ण्यान्मेकलोनर्मदोत्पत्तिस्थानभूतोविंध्याद्रिः ॥ रेवातुनर्मदासोमोद्भवामेकलकन्यकेत्यमरात् ॥ ९ ॥ शैलेंद्रोमेरुः ॥ ज्यामौर्वी ॥ मौर्वीज्यासिंजनीगुणइत्यमरः ॥ भुजंगाधिपःशेषः ॥ १० ॥ इषुर्बाणः ॥ हयाअश्वाः ॥ निगमावेदाः ॥ ११ ॥ ज्योतींषीति ॥ ध्रुवादिज्योतिर्गणाः ॥ अन्यद्ब्रह्मांडगतंसर्वंरथएवासीदित्याह ॥ ब्रह्मांडइति ॥ रथमितिनपुंसकत्वमार्षम् ॥ १२ ॥ रथनिर्माणनिरूपणमुपसंहरति ॥ एवमिति ॥ सारथिर्नियुक्तइतिशेषः ॥ ईश्वरःशिवोयुक्तंपूर्वोक्तहयादिनानियुक्तंरणमंडनंयुद्धालंकारभूतंरथमारुरोहेत्यग्रिमेणान्वयः ॥ १३ ॥ रोदसीद्यावाभूमी ॥ द्यावाभूमीतुरोदसीइत्यमरः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

धरणीधरःकूर्मउत्थायवृषेंद्ररूपीवृषभस्वरूपीसन्रथंसंस्थापयामासेत्यग्रिमेणान्वयः ॥ १५ ॥ चोदयामासप्रेरयामास ॥ मनोमारुतरंहसंमनोवायुवद्वेगवत्तरम् ॥ १६ ॥ पुराणीति ॥ तरस्विनांयुद्धार्थसन्नद्धानांदानवानांपुराणित्रिपुराण्युद्दिश्यप्रेरयामासेतिपूर्वेणान्वयः ॥ त्रिपुरनाशायेतिभावः ॥ शंकरंसुखकरम् ॥ १७ ॥ जयजयपशुपतइति ॥ अत्रतदारभ्यपशुपतिरितिनामाभवद्विभोरितिपाठांतरम् ॥ १८ ॥ १९ ॥ जातमिति ॥ वर्ण्यतेइतिकाकुः ॥ अपितुवर्णयितुमशक्यमित्यर्थः ॥ अथवावर्षशतैरपिकिंचिदेववर्ण्यतेनतुसंपूर्णरूपमित्यर्थः ॥ २० ॥ २१ ॥ तदादेवाअपिस्वसेनाभिःसहशिवस्यपुरतोजग्मुरित्याह ॥

ऋषिभिस्तूयमानस्तुवृतश्चाऽप्सरसांगणैः ॥ अथाऽधःसरथस्यास्यभगवान्धरणीधरः ॥ १५ ॥ वृषेंद्ररूपीचोत्थायस्थापयामासवैरथम् ॥ ततश्चचोदयासमनोमारुतरंहसम् ॥ १६ ॥ पुराण्युद्दिश्यस्वस्थानिदानवानांतरस्विनाम् ॥ अथालोक्यतथारुद्रंदेवालोकस्यशंकरम् ॥ १७ ॥ तथाचऋषयःसर्वेतुष्टुवुश्चसदाशिवम् ॥ जयजयपशुपतेप्रसिद्धमभवत्तदा ॥ १८ ॥ जयजयेतिभाषंतःसर्वेऋषिगणास्तथा ॥ तस्मिंश्चसमयेयच्चरूपंतस्यमहात्मनः ॥ १९ ॥ जातंतद्वर्ण्यतेकिंचिदपिवर्षशतैरपि ॥ शिवापिचतदातत्राशिवेनसहसंगता ॥ २० ॥ जगामत्रिपुरंहंतुंसर्वेषांसुखदायिनी ॥ २१ ॥ तंदेवदेवंत्रिपुरंनिहंतुंतदातुदेवेंद्ररविप्रकाशाः ॥ गजैर्हयैःसिंहवरैरथैश्चवृषैर्युयुस्तेऽमरराजमुख्याः ॥ २२ ॥ हलैश्चशालैर्मुसलैर्भृशुंडैर्गिरींद्रकूटैर्गिरिसंनिभैश्च ॥ ययुःपुरस्ताद्धिमहेश्वरस्यतदेंद्रपद्मोद्भवविष्णुमुख्याः ॥ २३ ॥ ननृतुर्मुनयःसर्वेदंडहस्ताजटाधराः ॥ ववृषुःपुष्पवर्षाणिखेचराःसिद्धचारणाः ॥ २४ ॥ पुरत्रयेचविप्रेंद्राव्रजन्सर्वेगणेश्वराः ॥ प्रक्रंदुःकुंददंतश्चकंपनश्चप्रकंपनः ॥ २५ ॥ इंद्रश्चेंद्रयवश्चैवयंताहिमकरस्तथा ॥ शताक्षश्चैवपंचाक्षःसहस्राक्षोमहोदरः ॥ २६ ॥ ॥ ॥ ॥ ॥

तमिति ॥ देवेंद्रोवृहस्पतीरविःसूर्यस्तयोःप्रकाशोयत्रतेतथा ॥ अमरराजमुख्याःपुरंदरप्रमुखादेवाः ॥ २२ ॥ देवानामायुधान्याह ॥ हलैरिति ॥ शालैर्भृशुंडैश्चायुधविशेषैः ॥ गिरींद्रकूटैर्महापाषाणैः ॥ पद्मोद्भवोब्रह्मा ॥ २३ ॥ २४ ॥ तदानींशिवगणाअप्यगमन्नित्याह ॥ पुरत्रयइति ॥ हेविप्रेंद्राःशौनकादयः ॥ व्रजन्नगमन् ॥ अडागमाभावआर्षः ॥ तेकेकेरुद्रगणाइतितन्नामान्याह ॥ प्रक्रंदुरित्यादिना ॥ कंपनश्चप्रकंपनइत्यत्रकंपयंश्चप्रकोपनइतिपाठांतरम् ॥ २५ ॥ २६ ॥ ॥ ॥ ॥ ॥

॥ २७ ॥ २८ ॥ समावृत्यसमागत्येत्यर्थः ॥ महेश्वराःशिवगणाः ॥ मनसैवसर्वंजगन्नाशयितुंसमर्थोऽपित्रिपुरनाशार्थमयंशिवःसेनयासहकथंस्वयंगतइति प्रोचुरित्याह ॥ दग्धुमित्यादिना ॥ २९ ॥ रथेनेति ॥ किंप्रयोजनंनकिमपीत्यर्थः ॥ ३० ॥ तथाप्येतादृशफटाटोपोदैत्यानांभयायलोकेयशःप्रख्यापनायच भवतीत्याह ॥ किंत्विति ॥ प्रत्ययायस्वमाहात्म्यज्ञापनाय ॥ परमलापहंभक्तपापनाशकम् ॥ ख्यापनमेवार्थःप्रयोजनंयस्यतद्यशइतिविग्रहोद्रष्टव्यः ॥ अथ वायशसइतिपष्ठ्यर्थेप्रथमा ॥ ३१ ॥ अन्यच्चेति ॥ हेऋषिसत्तमशौनकतुभ्यमन्यत्कारणंवदामीत्यर्थः ॥ मंताज्ञाता ॥ यतइतिपाठांतरम् ॥ विशिष्यतेऽतिरि

शतजिव्हःशतास्यश्चकंकटःकटपूतनः ॥ द्विशिरास्त्रिशिराश्चैवतथाह्येकाननस्तथा ॥ २७ ॥ अजवक्रोहयवक्रोगजव क्रोऽर्द्धवक्रकः ॥ इत्याद्याःपरिवार्येशंलक्षालक्षणवर्जिताः ॥ २८ ॥ समावृत्यमहादेवंतदोचुस्तेमहेश्वराः ॥ दग्धुंसम र्थोमनसाक्षणेनसचराचरं ॥ २९ ॥ सर्वंकिमर्थंत्रिपुरंपिनाकीस्वयंगतश्चात्रगणैश्चसार्धं ॥ रथेनकिंचात्रशरेणतस्य गणैश्चकिंदेवगणैश्चशंभोः ॥ ३० ॥ किंत्वत्रकारणंह्येतद्दुष्टानांप्रत्ययायवै ॥ लोकेषुख्यापनार्थंवैयशःपरमलापहम् ॥ ३१ ॥ अन्यच्चकारणंतुभ्यंवदामिऋषिसत्तम ॥ सर्वेष्वपिचदेवेषुमंतानान्योविशिष्यते ॥ ३२ ॥ तस्मिन्स्थितेम हादेवेरुद्रेविततकार्मुके ॥ पुराणितेनकालेनजग्मुरेकत्वमाशुवै ॥ ३३ ॥ एकीभावंगतेऽत्रैवत्रिपुरत्वमुपागते ॥ बभूव तुमुलोहर्षोदेवानांसुमहात्मनां ॥ ३४ ॥ ततोदेवगणाःसर्वेसिद्धाश्चपरमर्षयः ॥ जयेतिवाचोमुमुचुस्तुष्टुवंतश्चाऽष्टमू र्तिनम् ॥ ३५ ॥ अथाहभगवान्ब्रह्माविष्णुश्चजगतांपतिः ॥ समयोऽपितदाजातएकत्वमपिचागतम् ॥ ३६ ॥ अ थाऽधिज्यंधनुःकृत्वाशर्वःसंधायतंशरम् ॥ युज्यपाशुपतास्त्रेणत्रिपुरंतमचिंतयत् ॥ ३७ ॥ यावन्नायांतिदेवेशविप्रयो गंपुराणिवै ॥ अथदेवोमहादेवःसावज्ञंतदवैक्षत ॥ ३८ ॥ ॥ ॥ ॥

च्यते ॥ शिवादितिशेषः ॥ ३२ ॥ विततकार्मुकेअधिज्यधन्वनीत्यर्थः ॥ एकत्वमेकीभावंमेलनमित्यर्थः जग्मुःप्राप्नुवन्युद्धार्थमितिभावः ॥ ३३ ॥ त्रिपुरत्वंत्रिपु रसंज्ञामित्यर्थः ॥ तुमुलोमहानित्यर्थः ॥ ३४ ॥ मुमुचुरुक्तवंतइत्यर्थः ॥ अष्टमूर्तिनंशिवम् ॥ नांतत्वमार्षम् ॥ ३५ ॥ किमाहेतितदाह ॥ समयइति ॥ ३६ ॥ अथे ति ॥ अधिज्यंमौर्व्यारूढम् ॥ युज्यसंयुज्यम् ॥ ३७ ॥ ततोब्रह्मावदति ॥ यावदिति ॥ हेशर्वत्रिपुराणिविप्रयोगंविश्लेषंशैथिल्यंवायावत्साकल्येननायांतीतिब्रह्मो क्तवानित्यर्थः ॥ अथेति ॥ अथदेवोब्रह्मवाक्यंश्रुत्वापुरत्रयंक्षणाद्भस्मसाद्भस्मीभूतंकृतमिवसावज्ञंसावमानंयथातथैक्षतेतिसमुदितान्वयः ॥ ३८ ॥

ततोब्रह्मापुनराह ॥ दग्धुमिति ॥ हेदेवेशशर्वत्वंजगत्त्रयंभूर्भुवःस्वरात्मकंवीक्षणेनावलोकनमात्रेणापिदग्धुंयद्यपिसमर्थइतिशेषस्तथाप्यस्मत्कीर्तिख्यापनार्थंश रंमोक्तुंप्रयोऽक्तुमर्हसियोग्योसीत्यर्थः ॥ शरंमोचयेतिभावः ॥ ३९ ॥ ततस्तच्छरःशिवमुक्तबाणस्त्रिपुरंसमासाद्यप्राप्यदग्ध्वाचत्रिपुरंव्यवस्थितस्तत्रैवोवासेत्य र्थः ॥ ४० ॥ रेजइति ॥ दैत्यकोटिशतैर्वृतंपुरत्रयंतेनेषुणादग्धंसत्कल्पांतेप्रलयांतेरुद्रेणदग्धंजगत्त्रयमिवरेजे शुशुभइत्यन्वयः ॥ ४१ ॥ शिवाराधकदै

पुरत्रयंविरूपाक्षस्तत्क्षणाद्भस्मसात्कृतम् ॥ दग्धुमप्यथदेवेशवीक्षणेनजगत्त्रयम् ॥ ३९ ॥ अस्मद्यशोविवृद्ध्यर्थंश रंमोक्तुमिहार्हसि ॥ तत्क्षणात्त्रिपुरंदग्ध्वात्रिपुरंतच्छरःक्षणात् ॥ ४० ॥ देवदेवंनमस्कृत्यसमासाद्यव्यवस्थितः ॥ रे जेपुरत्रयंदग्धंदैत्यकोटिशतैर्वृतम् ॥ ४१ ॥ इषुणातेनकल्पांतेरुद्रेणेवजगत्त्रयम् ॥ येपूजयंतितत्रापिदैत्यारुद्रंसबां धवाः ॥ ४२ ॥ गाणपत्यंययुःसर्वेभवपूजाविधेर्बलात् ॥ नकिंचिदब्रुवन्देवाःसेंद्रोपेंद्रादयस्तदा ॥ ४३ ॥ भयाद्देवंनि रीक्ष्यैवदेवींचहिमवत्सुताम् ॥ दृष्ट्वाभीतंतदानीकंदेवानामृषिपुंगवाः ॥ ४४ ॥ किंचेत्याहुस्तदादेवाःप्रणेमुस्तेसमं ततः ॥ तुष्टावतुष्टहृदयोब्रह्मादेवैःसमाहितः ॥ ४५ ॥ विष्णुनाचभवंदेवंत्रिपुरारिंमहेश्वरम् ॥ पितामहउवाच ॥ प्र सीददेवदेवेशप्रसीदपरमेश्वर ॥ ४६ ॥ प्रसीदजगतांनाथप्रसीदानंददायक ॥ ओंकारायनमस्तुभ्यमगुणायनमो ऽस्तुते ॥ ४७ ॥ सगुणायनमस्तुभ्यंस्वर्गेशायनमोस्तुते ॥ सदाशिवायशांतायमहेशायपिनाकिने ॥ ४८ ॥ सर्वज्ञा यशरण्यायसद्योजातायतेनमः ॥ स्तुत्वैवंदेवताःसर्वानमस्कारंपृथक्तदा ॥ ४९ ॥ चक्रुस्तेपरमप्रीताःप्रार्थयंतःस दाशिवम् ॥ ब्रह्मोवाच ॥ भगवन्देवदेवेशत्रिपुरांतकशंकर ॥ ५० ॥ त्वयिभक्तिःपरामेऽद्यप्रसीदपरमेश्वर ॥ प्रसी दभक्तिर्देवेशसारथ्यंचास्तुसर्वदा ॥ ५१ ॥ ॥ ॥

त्यागाणाधिपत्यपदंप्राप्नुवन्नित्याह ॥ यइति ॥ ४२ ॥ पार्वतीपरमेश्वरयोस्तदानींतनरूपदर्शनेनभीतांदेवसेनामालोक्यैंद्रोपेंद्रादयोनकिंचिदूचुर्देवास्तु कथंकर्तव्यमिदंचकिंजातमित्यूचुरित्याह ॥ नकिंचिदित्यादिना ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ सर्वज्ञायेति ॥ शरण्यायशरणेरक्षणे साधुःशरण्यस्तस्माइत्यर्थः ॥ सद्योजातायतत्कालिकावतारकर्त्रे ॥ सद्योजातंप्रपद्यामीतिश्रुतेः ॥ ४९ ॥ ५० ॥ ५१ ॥ ॥

निर्गुणायेति ॥ अत्रपुनरित्यनेननमस्काराणामभ्यासोबोध्यते ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ त्वयीति ॥ अनपायिनीनाशशून्यानित्येत्यर्थः ॥
॥ ५७ ॥ ५८ ॥ ५९ ॥ तदाशिवोयुष्माकंदुःखनाशंकरिष्यामीतिवरंदत्तवानित्याह ॥ तथाचास्त्विति ॥ ६० ॥ ध्रुवंशाश्वतंमोक्षमित्यर्थः ॥ सर्वदाध्रु

जनार्दनोऽपिभगवान्नमस्कृत्यमहेश्वरम् ॥ कृतांजलिपुटोभूत्वाप्राहदेवंचशंकरम् ॥ ५२ ॥ निर्गुणायनमस्तुभ्यंपु
नश्चसगुणायच ॥ पुनःप्रकृतिरूपायपुनश्चपुरुषायच ॥ ५३ ॥ पश्चाद्गुणस्वरूपायततोविश्वात्मनेनमः ॥ भक्तिप्रि
यायशांतायशिवायपरमात्मने ॥ ५४ ॥ सदाशिवायरुद्रायजगतांपतयेनमः ॥ त्वयिभक्तिर्दृढामेऽद्यवर्धमानाभव
त्विति ॥ ५५ ॥ सर्वेदेवाःप्रणम्योचुस्ततश्चपरमेश्वरम् ॥ प्रसीदजगतांनाथप्रसीदपरमेश्वर ॥ ५६ ॥ प्रसीदसर्व
कर्त्तात्वंनमामःशंकरंमुदा ॥ त्वयिभक्तिर्दृढाऽस्माकंनित्यंस्यादनपायिनी ॥ ५७ ॥ इतिस्तुतःसदेवेशःशंकरोलोकशं
करः ॥ प्रसन्नोऽस्मिवरंब्रूतवचनंह्युक्तवांस्तदा ॥ ५८ ॥ सर्वेदेवाऊचुः ॥ यदिप्रसन्नोभगवान्यदिदेयोवरस्त्वया ॥
यदादुःखंतुदेवानांजायतेदेवसत्तम ॥ ५९ ॥ तदात्वंप्रकटीभूत्वादुःखंनाशयसर्वदा ॥ इत्युक्तोभगवान्रुद्रस्तथा
चाऽस्तुनिरंतरम् ॥ ६० ॥ स्तवेनाऽनेनतुष्टोऽस्मिदास्यामिसर्वदाध्रुवम् ॥ यदभीष्टतमंलोकेतत्सर्वंचप्रदत्तवान् ॥
॥ ६१ ॥ एतस्मिन्नंतरेतेवैमुंडिनश्चसमागताः ॥ प्रणम्योचुश्चतान्सर्वान्वयंकिंकरवामहे ॥ ६२ ॥ तेषांतद्वचनंश्रु
त्वाविष्णुब्रह्मादयोब्रुवन् ॥ तावन्मरुस्थलीसेव्यायावत्कलिःसमाव्रजेत् ॥ ६३ ॥ नमस्कृत्यगतास्तत्रयथोद्दिष्टंस
माश्रयम् ॥ तेसर्वेचतदाज्ञप्तादेवाधामस्वकंययुः ॥ ६४ ॥ शृणोतीहसदायोवैसर्वान्कामानवाप्नुयात् ॥ ६५ ॥ इ
तिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिपुरवधोनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥

वमित्यत्रसर्वदावरमितिपाठांतरम् ॥ आमुष्मिकंसुखंदत्वैहिकमपिदत्तवानित्याह ॥ यदभीष्टमिति ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ कथाश्रवणफल
माह ॥ शृणोतीति ॥ ६५ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांत्रिपुरवधोनामचतुर्विंशोऽध्यायः ॥ २४ ॥

ओंनमःशिवाय ॥ क्षीरांबुधौविरंचिप्रमुखैरमरैर्नुतोहरिर्देवान् ॥ लिंगार्चनफलमुक्त्वातैजसमणिमृन्मयानिलिंगानि ॥ १ ॥ त्वष्टानिर्माप्यतदायथाधिकारंप्रदत्तवांस्तेभ्यः ॥ इतिपंचविंशकेऽस्मिन्नध्यायेकथ्यतेशिवंचरितम् ॥ २ ॥ गत्वेति ॥ प्रहस्यविहस्य ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ उपतस्थुस्तुष्टुवुः ॥ ५ ॥ मेघश्यामेति ॥ वर्षाकालीननीलमेघकांतियुक्तेत्यर्थः ॥ अव्ययनाशशून्य ॥ ६ ॥ पुंडरीकाक्षकमलाक्ष ॥ ७ ॥ कंदर्पःकामस्तद्वल्लावण्यंसौंदर्यंयस्यसतत्सं

॥ सूतउवाच ॥ गत्वाब्रह्मास्वकंधामऋषीनाहूयसर्वतः ॥ प्रहस्याहसुरेंद्राणांभगवान्पद्मसंभवः ॥ १ ॥ ब्रह्मोवाच ॥ यदिनित्यंशुभेच्छावैयदिसिद्धेश्चकामुकाः ॥ आगंतव्यंमयासार्धंतीरंक्षीरपयोनिधेः ॥२॥ आगंतव्यमृषिश्रेष्ठामयासाधुविचारितम् ॥ इत्येतद्वचनंश्रुत्वागतास्तेब्रह्मणासह ॥ ३ ॥ यत्रास्तेभगवान्विष्णुःसर्वेषांहितकारकः ॥ तत्रगत्वाजगन्नाथंदेवदेवंजनार्दनम् ॥ ४ ॥ उपतस्थुस्तदादेवास्तोत्रैर्नानाविधैरपि ॥ ब्रह्माद्याऊचुः ॥ देवदेवजगन्नाथभक्तानामभयप्रद ॥ ५ ॥ लक्ष्मीकांतनमस्तुभ्यंसदाभयविधायक ॥ मेघश्यामचतुर्बाहोपीतांबरधराव्यय ॥ ६ ॥ शंखचक्रगदापद्मैर्युक्तस्त्वंपुरुषोत्तम ॥ मुकुटादिभूषणैर्युक्तपुंडरीकाक्षसत्तम ॥ ७ ॥ श्रीवत्सलक्षणश्रीमन्कंठेकौस्तुभभूषण ॥ कोटिकंदर्पलावण्यकोटिसूर्यसुशोभन ॥ ८ ॥ शरण्यसर्वजंतूनांभुक्तिमुक्तिफलप्रद ॥ मायाचदूरतोयस्यनृत्यतेकिंकरीयथा ॥ ९ ॥ सिद्धयोऽष्टौचयस्यैवदासत्वंसमुपागताः ॥ निजभक्तैःसदासेव्योनानालंकारभूषितः ॥ १० ॥ यस्यैवकृपयासर्वेमुक्तिंप्राप्ताःसुदुर्लभाम् ॥ यस्यदुःखस्यनाशोवैकुतोऽपिनप्रजायते ॥ ११ ॥ तस्यदुःखस्यहर्तात्वंकृपांकुरुसदाहरे ॥ इत्युक्त्वातेतदादेवाउच्चैर्जयजयेतिच ॥ १२ ॥ प्रसीददेवदेवेशप्रसीदपुरुषोत्तम ॥ प्रसीदजगतांनाथप्रसीदकरुणाकर ॥ १३ ॥ इतिस्तुतस्तदादेवैःप्रसन्नोजगदीश्वरः ॥ दर्शयामासरूपंस्वंदर्शयन्भक्तवश्यताम् ॥ १४ ॥ ऊचुस्तेचतदादेवाजयेतिचशुभंवचः ॥ तान्दृष्ट्वाचतदाविष्णुरब्रवीत्परमंवचः ॥ १५ ॥

बुद्धौ ॥ ८ ॥ ९ ॥ मायेति ॥ मायाऽप्रकृतिर्यस्यतवदूरतोयंविहायेत्यर्थः ॥ दासीवन्नृत्यति व्याप्रियते ॥ मायाशून्येत्यर्थः ॥ १० ॥ यस्येति ॥ कुतोपित्वत्तोन्यस्मान्नप्रजायतेनोत्पद्यतेर्किंतुत्वत्तएवेतिभावः ॥ कुतोपिनप्रजायतइत्यत्रकृतैःपुण्यशतैरपीतिपाठांतरम् ॥ ११ ॥ जयजयेति ॥ जयजयेतिशब्दमकुर्वन्नितिशेषः ॥ १२ ॥ पुनर्देवाःसंस्तुवंति ॥ प्रसीदेति ॥ १३ ॥ १४ ॥ १५ ॥

इतीति ॥ तेपृष्टादेवाअब्रुवन् ॥ देवसहितोब्रह्मैवाब्रवीदितिभावः ॥ १६ ॥ कृपयेति ॥ व्यलीयत ॥ नष्टमभूदित्यर्थः ॥ १७ ॥ मयेति ॥ मयादेवैश्च यत्सेव्यंतदुपदिश्यतामित्यन्वयः ॥१८॥१९॥ तथापीति ॥ त्वयाश्रुतत्वेपिदेवैरश्रुतत्वात्कथयामीतिभावः ॥ दृश्यमिति ॥ दृष्टमितिपाठांतरम् ॥ २० ॥ ॥ २१ ॥ ननुकिंतदृश्यंतदाह ॥ प्रस्तुतामिति ॥ दृष्टोऽतस्त्रिपुरवधोयत्रतत् ॥ २२ ॥ २३ ॥ विनष्टाइति ॥ लिंगार्चनाकरणेनेतिभावः ॥ लिंगार्चना

कथंसमागतायूयंकिंकार्यंविद्यतेऽधुना ॥ इतिपृष्टास्तदातेनअब्रुवन्वचनंशुभम् ॥ १६ ॥ ब्रह्माद्याऊचुः ॥ कृपया तवदेवेशसर्वंदुःखंव्यलीयत ॥ तथापिपृच्छ्यतेत्वांचसर्वदेवहितायवै ॥ १७॥ नित्यंसेवातुकस्यैवकार्यादुःखापहाध्रुवम् ॥ मयाचदैवतैःसर्वैर्यत्सेव्यंचोपदिश्यताम् ॥ १८ ॥ इत्येतद्वचनंश्रुत्वाभगवान्वाक्यमब्रवीत् ॥ श्रीभगवानुवाच ॥ भोब्रह्मन्श्रूयतांसम्यक्श्रुतंचभवतापुरा ॥ १९ ॥ तथापिकथ्यतेतुभ्यंदेवेभ्यश्चतथापुनः ॥ दृश्यंचदृश्यतेचैवाकिंपुनःपृच्छ्यतेऽधुना ॥ २० ॥ यदिसेव्यःसदादेवाःशंकरःसर्वदुःखहा ॥ ममापिकथितंतेनब्रह्मणोपिविशेषतः ॥ २१ ॥ प्रस्तुतंचैवदृष्टंचसर्वैर्दृष्टांतमद्भुतम् ॥ संत्यज्यदेवदेवेशंलिंगमूर्तिमहेश्वरम् ॥ २२ ॥ तारपुत्रास्तथैतेवैनष्टास्तेचैवबांधवाः ॥ मयाचमोहितास्तेवैमाययादूरतःकृताः ॥ २३ ॥ सर्वेविनष्टाःप्रध्वस्ताःशिवेनरहितायदा ॥ तस्मात्सदापूजनीयोलिंगमूर्तिधरोहरः ॥ २४ ॥ यदिसुखंसुरेशाश्चनैरंतर्यंभवेदिह ॥ पूजनीयःशिवोनित्यंश्रद्धयादेवपुंगवैः ॥ ॥ २५ ॥ सर्वलिंगमयोदेवःसर्वलिंगेप्रतिष्ठितः ॥ तस्मात्संपूजयेन्नित्यंयदीच्छेत्सिद्धिमात्मनः ॥ २६ ॥ सर्वेलिंगार्चनादेवदेवादैत्याश्चदानवाः ॥ वयंचैवतथाब्रह्मन्किमर्थंविस्मृतंत्वया ॥ २७ ॥ अर्चयत्वंलिंगमूर्तिंसंसित्ध्यैनात्रसंशयः ॥ तस्माल्लिंगेऽर्चयेन्नित्यंयेनकेनापिवैसुराः ॥ २८ ॥ साहानिस्तन्महच्छिद्रंसोऽधर्मःसाचमूढता ॥ यन्मुहूर्तंक्षणंवापिशिवंचैवनचिंतयेत् ॥ २९ ॥ ॥ ॥ ॥ ॥

करणेहानिमुक्त्वालिंगार्चनमवश्यंसुखार्थंकर्तव्यमित्याह ॥ तस्मादित्यादिना ॥ २४ ॥ देवपुंगवैर्देवश्रेष्ठैरित्यर्थः ॥ स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः ॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराइत्यमरः ॥ २५ ॥ प्रतिष्ठितोंऽतर्यामित्वेनस्थितः ॥ २६ ॥ सर्वइति ॥ देवाःसंसिद्धाइत्यध्याहृतेनान्वयः ॥ ॥ २७ ॥ २८ ॥ येनकेनापि ॥ केनचिद्विधिनेत्यर्थः ॥ अत्रवचनान्ममसत्तमाइतिपाठांतरम् ॥ शिवानवधानमेवसर्वानर्थकारीत्याह ॥ सेति ॥ २९ ॥

शिवभक्तिमतांदुःखंनभवतीत्याह ॥ भवेति ॥ भवःशिवस्तस्मिन्भक्तिस्तत्रपराआसक्ताः ॥ एवमग्रेपिद्रष्टव्यम् ॥ ३० ॥ येशिवमर्चयंतितऐहिकभोगा नवाप्नुवंतीत्याह ॥ भवनानीत्यादिना ॥ ३१ ॥ तुष्टिपर्यंतमापर्याप्तेरितिभावः ॥ ३२ ॥ अलौकिकींलोकोत्तराम् ॥ वस्तुंनिवासंकर्तुम् ॥ ३३ ॥ ऐहिकफलमुक्त्वाऽऽमुष्मिकफलमाह ॥ अंतइति ॥ मरणांतइत्यर्थः ॥ लिंगार्चनस्यसर्वपापनाशकत्वविशिष्टसर्वसिद्धिप्रदत्वमाह ॥ लिंगमिति ॥ ३४ ॥ इतीति ॥ उक्ताविष्णुनेतिशेषः ॥ देवाःप्रार्थयामासुः ॥ ३५ ॥ ३६ ॥ ममवचनान्मदाज्ञयेत्यर्थः ॥ ३७ ॥ लिंगानीति ॥ देवेभ्योऽधिकारानुरूपतोयथा

भवभक्तिपरायेचभवप्रणतचेतसः ॥ भवसंस्मरणायेचनतेदुःखस्यभाजनम् ॥ ३० ॥ भवनानिमनोज्ञानिविविधाभरणाःस्त्रियः ॥ धनंचतुष्टिपर्यंतंपुत्रपौत्रादिसंततिम् ॥ ३१ ॥ आरोग्यंचशरीरेचवस्त्राणिविविधानिच ॥ वाहनानिचदिव्यानिप्रतिष्ठांचाऽप्यलौकिकीम् ॥ ३२ ॥ येवांछंतिमहाभागावस्तुंचत्रिदिवालये ॥ आयुर्वाचयथामानंमित्राणिचशुभानिच ॥ ३३ ॥ अंतेमुक्तिफलंचैवतेऽर्चयंतिसदाशिवम् ॥ लिंगंपूजयतेनित्यंयोवैभक्तिपरायणः ॥ ३४ ॥ तस्यवैसकलासिद्धिर्नसपापैर्विलिप्यते ॥ इत्युक्ताश्चतदादेवाःप्रणिपत्यहरिंस्वयम् ॥ ३५ ॥ लिंगानिप्रार्थयामासुःसर्वकामाप्तयेनृणाम् ॥ हरिरपितथाब्रह्माविश्वकर्माणमब्रवीत् ॥ ३६ ॥ लिंगानिचत्वयादेवकल्पयित्वाशुभानिच ॥ देयानिसर्वदेवेभ्योवचनान्ममसत्तम ॥ ३७ ॥ लिंगानिकल्पयित्वैवंचाधिकारानुरूपतः ॥ विश्वकर्माददौतेभ्योनियोगाद्ब्रह्मणःप्रभोः ॥ ३८ ॥ तदेवकथयाम्यद्यश्रूयतामृषिसत्तमाः ॥ पद्मरागमयंशक्रोहैमंविश्रवसःसुतः ॥ ३९ ॥ पीतंमणिमयंधर्मोवरुणःश्यामलंशिवम् ॥ इंद्रनीलमयंविष्णुर्ब्रह्माहेममयंतथा ॥ ४० ॥ ॥ ॥

धिकारंयोग्यतामनुरुध्येत्यर्थः ॥ लिंगानि ॥ प्रभोर्ब्रह्मणोनियोगादाज्ञयाददावितिसंबंधः ॥ ३८ ॥ सूतोवक्ति ॥ तदेवेति ॥ विश्वकर्मालिंगानिकल्पयित्वादेवेभ्योददावित्युक्तंतत्रतानिकिंमयानिदेवेषुतुकःकिंलिंगमगृण्हादितितदाह ॥ पद्मरागमयमित्यादिनादधिमयंतथायक्षाइत्यंतेन ॥ तत्रपद्मरागमयंपद्मरागोरत्नविशेषस्तन्मयंतद्विकृतंविकारार्थेमयट् ॥ एवमग्रेऽपिविज्ञेयम् ॥ तल्लिंगंशक्रइंद्रःपूजयंतीत्यग्रेतनस्यवचनविपरिणतस्यपूजयतीत्यर्थः ॥ एवमग्रेपिवोध्यम् ॥ हैमंसौवर्णंविश्रवसःसुतःकुवेरः ॥ किंनरेशोवैश्रवणइत्यमरः ॥ ३९ ॥ इंद्रनीलोमरकतमणिः ॥ गारुत्मतंमरकतमश्मगर्भोहरिन्मणिरित्यमरः ॥ ४० ॥

आरकूटमयंरीतिमयं ॥ रीतिस्त्रियामारकूटमित्यमरः ॥ ४१ ॥ वज्रलिंगंहीरकमयंलिंगं ॥ वज्रोऽस्त्रीहीरकेपवावित्यमरः ॥ विभावसुरग्निः ॥ चित्रभानुर्विभावसुरित्यमरः ॥ ४२ ॥ तथैवमृन्मयमेवेत्यर्थः ॥ ४३ ॥ मयस्तदाख्योऽसुरः ॥ अनंतः आद्योयेषांतेनवविधानागाःसर्पाः ॥ तदुक्तं ॥ अनंतंवासुकिंशेषंपद्मनाभंचकंबलं ॥ धृतराष्ट्रंशखपालंतक्षकंकालियंतथेति ॥ ४४ ॥ शिवेति ॥ पूज्याशच्यादिभिःशिवापार्वतीनवनीतविनिर्मितंलिंगंपूजयते ॥ ४५ ॥ दारुजंकाष्ठमयं ॥ काष्ठंदार्वित्यमरः ॥ सूर्यपत्नीछाया ॥ ब्रह्माणीब्रह्मपत्नीसरस्वती ॥ ४६ ॥ ४७ ॥ ४८ ॥ तथेति

विश्वेदेवास्तथारौप्यंवसवश्चतथैवच ॥ आरकूटमयंवायुराश्विनौपार्थिवंतदा ॥ ४१ ॥ लक्ष्मीश्चस्फाटिकंदेवीआदित्यास्ताम्रनिर्मितं ॥ मौक्तिकंसोमराजोवैवज्रलिंगंविभावसुः ॥ ४२ ॥ मृन्मयंचैवविप्रेंद्राविप्रपत्न्यस्तथैवच ॥ चंदनेनकृतंयद्वैमयःपूजयतेशिवम् ॥ ४३ ॥ अनंताद्यास्तथानागाःप्रवालकमयंशिवम् ॥ दैत्याश्चगोमयंलिंगंराक्षसाश्चमहाबलाः ॥ ४४ ॥ लोहमयंतथालिंगंपिशाचाःपूजयंतिहि ॥ शिवादेवीसदापूज्यानवनीतविनिर्मितं ॥ ४५ ॥ दारुजंनिर्ऋतिर्भक्त्यायोगीभस्ममयंतथा ॥ सूर्यपत्नीपिष्टमयंब्रह्माणीरत्नसंभवं ॥ ४६ ॥ दधिमयंतथायक्षाःपूजयंतिनिरंतरम् ॥ एवंविधानिलिंगानिदत्तानिविश्वकर्मणा ॥ ४७ ॥ तेपूजयंतिसर्वेवैदेवाऋषिगणास्तथा ॥ ब्रह्माचैवतथाविष्णुरन्येदेवाश्चयेपुनः ॥ ४८ ॥ पूजयंतितदादेवंनित्यंसिद्धिसमीहया ॥ तथाकृत्वाचलिंगानिदेवानांहितकाम्यया ॥ ४९ ॥ पूजाविधिंसमाचख्यौब्रह्मणेऽनंतशक्तये ॥ तच्छ्रुत्वावचनंविष्णोर्ब्रह्मादेवगणैःसह ॥ ५० ॥ जगामचस्वकंधामहर्षनिर्भरमानसः ॥ विष्णुश्चांतर्हितस्तत्रह्युपदिश्यतथाविधिं ॥ ५१ ॥ तत्रागत्यऋषीन्सर्वान्देवांश्चैवतथापुनः ॥ शिवपूजाविधिंसम्यक्कथयामासनिश्चलः ॥ ५२ ॥ यंविधिंचतथाकृत्वालोकानांफलमुत्तमम् ॥ भवतीतिसुनिश्चित्यतस्मात्पूज्योहरःसदा ॥ ५३ ॥ ॥ ॥ ॥ ॥

॥ देवानांहितकाम्ययाहितेच्छयालिंगानिकृत्वापूजयंतीतिपूर्वेणान्वयः ॥ ४९ ॥ पूजाविधिंसमाचख्यावुक्तवानेवंविष्णुरितिशेषः ॥ ५० ॥ स्वकंस्वीयंधामसत्यलोकम् ॥ अंतर्हितोऽदृश्यः ॥ ५१ ॥ तत्रेति ॥ ब्रह्मानिश्चलःसमाहितमनाःयंपूजाविधिंकृत्वाकुर्वतामित्यर्थः लोकानामुत्तमंफलंभवतिभवेत्तंविधिंकथयामीत्येवंसुनिश्चित्यनिर्णीयतंशिवपूजाविधिंदेवादीन्कथयामासेतिसमुदितान्वयः ॥ ५२ ॥ शिवपूजामुपसंहरति ॥ तस्मादिति ॥ ५३ ॥

इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांशिवपूजाविधानंनामपंचविंशोऽध्यायः ॥ २५ ॥ ओंनमःशिवाय ॥ सिद्धार्थोनांयदिमदनहार्चार्हणावश्यकत्वंनैवाप्येतत्सकलगृहिणांज्ञानलाभायनित्यं ॥ कर्तव्यंस्यादितिकमलभूरादिशन्निर्जरेभ्यइत्थंषड्विंशकइहसमाख्यानकंकीर्त्यतेऽग्रे ॥ १ ॥ ॥ सूतेति ॥ १ ॥ २ ॥ यथेचेति ॥ लोककाम्ययालोकहितेच्छयाभवत्प्रश्नोऽनादिरित्याह ॥ तथेति ॥ सनत्पूर्वकःसनच्छब्दपूर्वकःकुमारः सनत्कुमारइत्यर्थः ॥ सनपूर्वकइतिपाठांतरं ॥ तत्राप्ययमेवार्थोबोध्यः ॥ ३ ॥ तेनेति ॥ तेनैवसनत्कुमारेणैवतस्मैव्यासायकथितस्तेनव्यासेनचमह्यंतथाकथितइत्यर्थः ॥ तमिति ॥ तंविधिमित्यर्थः ॥ हेमुनीश्वराःशौनकादयः ॥ ४ ॥ ब्रह्माशिवपूजाविधिमृषिभ्यःकथयति ॥ श्रूयतामिति ॥ संप्राप्येति ॥ कर्मस्वोक्तंसमाचरेदित्यग्रिमेणान्वयः ॥ ५ ॥ अव्यंगमंगविकलत्वाभावंसंप्राप्यस्वोक्तंब्राह्मणादिस्वस्वजात्युक्तंकर्मशास्त्रोक्तंवर्णाश्रमधर्ममित्यर्थः ॥ ६ ॥ तत्तत्कर्मनोल्लंघनीयमित्याह ॥ यद्यदिति ॥ विधिविहितत्यागेनापूर्वद्वाराऽनिष्टंफलमुत्पद्यतइत्याह ॥ ततइति ॥ ७ ॥ ननुकियंतंकालंतत्कर्मकर्तव्यमितितदवधिमाह ॥ यावदिति ॥ संपत्तिःप्राप्तिः ॥ कर्माद्यपेक्षयाध्यानस्योत्कृष्टत्वकथनपूर्वकं शिवापरोक्षज्ञानसाधनत्वंकथयति ॥ कर्मयज्ञेत्यादिना ॥ कर्मरूपयज्ञेत्यर्थः एवमग्रेऽपिद्रष्टव्यं ॥ विशिष्यतेऽतिरिच्यते ॥ ८ ॥ ९ ॥ ॥ ॥ ॥

इतिश्रीशिवमहापुराणेज्ञानसंहितायांपूजाविधानंनामपंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ऋषयऊचुः ॥ सूतसूतमहाभागकिंजातंतदनंतरम् ॥ ब्रह्मणाचकथंप्रोक्तःपूजाविधिःशिवस्यच ॥ १ ॥ यथाचकथितस्तेनतथात्वंकथयाऽधुना ॥ इत्येतद्वचनंश्रुत्वासूतोवाक्यमथाऽब्रवीत् ॥ २ ॥ सूतउवाच ॥ यथाचपृच्छ्यतेमह्यंभवद्भिर्लोककाम्यया ॥ तथाव्यासेनसंपृष्टःकुमारःसनत्पूर्वकः ॥ ३ ॥ तेनैवकथितस्तस्मैतेनमह्यंतथापुनः ॥ तमहंकथयाम्यद्यभवद्भ्यश्चमुनीश्वराः ॥ ४ ॥ ब्रह्मोवाच ॥ श्रूयतामृषयःसर्वेशिवपूजाविधिःक्रमात् ॥ मानुषंजन्मसंप्राप्यदुर्लभंसर्वजंतुषु ॥ ५ ॥ तत्राऽपिसत्कुलेदेवादुष्प्रापंचमुनीश्वराः ॥ अव्यंगंचैवसंप्राप्यकर्मस्वोक्तंसमाचरेत् ॥ ६ ॥ यद्यज्जातिसमुद्दिष्टंतत्तत्कर्मनलंघयेत् ॥ ततश्चतत्समुत्पन्नंफलंभवतिनिश्चितम् ॥७॥ यावज्ज्ञानस्यसंपत्तिस्तावत्कर्मसमाचरेत् ॥ कर्मयज्ञसहस्रेभ्यस्तपोयज्ञोविशिष्यते ॥ ८ ॥ तपोयज्ञसहस्रेभ्योजपयज्ञोविशिष्यते ॥ जपयज्ञसहस्रेभ्योध्यानयज्ञोविशिष्यते ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ध्यानयज्ञादिति ॥ ध्यानात्मकयज्ञात्परमपरोक्षज्ञानसाधनत्वेनश्रेष्ठंवस्तुनास्ति तदेवानुध्यानमेवापरोक्षज्ञानसाधनमित्यर्थः ॥ तदेववक्ति ॥ ज्ञानस्येति ॥ आसन्नमंतर्हृदयवर्तीत्यर्थः ॥ पश्यति मनसाऽपरोक्षीकरोति ॥ १० ॥ नकेवलंध्यानस्यभगवदपरोक्षज्ञानसाधनत्वमपितुशिवप्राप्तिसाधनत्वमपीत्याह ॥ यदेति ॥ यदायस्मिन्कालेसमरसस्तुल्यलोष्टकांचनादिर्योगीभीष्टंस्वोपास्यंध्यानेनपश्यतितस्याशिवःसंनिहितःसामीप्यंप्राप्तइत्यर्थः ॥ ११ ॥ विद्यावतांकृतकार्यत्वात्कर्मतदकरणप्रयुक्तप्रायश्चित्तादिकंकिंचिदपिनास्तीत्याह ॥ नास्तीति ॥ प्रायश्चित्तादिस्पष्टं ॥ अथवाविज्ञानिनांचित्तादिप्रायोवाहुल्येनशोभनंशुद्धमस्तीति नकर्मापेक्षास्तीत्यर्थः ॥ तदेवस्पष्टंनिरूपयति ॥ विशुद्धाइति ॥ ब्रह्मविद्याविदःसर्वेजनाविद्ययाविशुद्धाःशुद्धांतःकरणाइतितेषांक्रियाकर्मसुखंदुःखंचव्यावहारिकंनास्तीतिसमुदितसंबंधः ॥ अथकामयमानोयोऽकामोनिष्काम आप्तकामोनतस्यप्राणाउत्क्रामंतिब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः ॥

ध्यानयज्ञात्परंनास्तिध्यानंज्ञानस्यसाधनम् ॥ सदासन्नंपरंब्रह्मयोगीध्यानेनपश्यति ॥१०॥ यदासमरसोऽभीष्टंयोगीध्यानेनपश्यति ॥ ध्यानयज्ञरतस्यास्यसदासन्निहितःशिवः ॥ ११ ॥ नास्तिविज्ञानिनांचेतिप्रायश्चित्तादिशोभनम् ॥ विशुद्धाविद्ययासर्वेब्रह्मविद्याविदोजनाः ॥ १२ ॥ नास्तिक्रियाचलोकेचसुखंदुःखंविचारतः ॥ धर्माधर्मौजपोहोमोध्यानंज्ञाननिधिःस्मृतः ॥ १३ ॥ परानंदकरंलिंगंविशुद्धंशिवमक्षरम् ॥ निष्कलंसर्वगंज्ञेयंयोगिनांहृदिसंस्थितम् ॥ १४ ॥ लिंगंतुद्विविधंप्रोक्तंबाह्यमभ्यंतरंद्विजाः ॥ बाह्यंस्थूलंमुनिश्रेष्ठाःसूक्ष्ममभ्यंतरंशुभम् ॥ १५ ॥ कर्मयज्ञरतायेचस्थूललिंगार्चनेरताः ॥ असतांभावनार्थायसूक्ष्मेतुस्थूलविग्रहं ॥ १६ ॥ आध्यात्मिकंतुयल्लिंगंप्रत्यक्षंयस्यनोभवेत् ॥ तस्यलिंगेतथास्थूलेकल्पयेच्चनचाऽन्यथा ॥ १७ ॥ ॥ ॥ ॥

॥ १२ ॥ १३ ॥ अक्षरंकूटस्थं ॥ कूटस्थोऽक्षरउच्यतइतिस्मृतेः ॥ निष्कलं निरवयवं ॥ ननुनिरवयवत्वेऽणुत्वापत्तिरित्यतआह ॥ सर्वगमिति ॥ व्यापकमित्यर्थः ॥ १४ ॥ लिंगप्रकारमाह ॥ लिंगंत्विति ॥ शुभंस्थूलादपिश्रेष्ठतरमित्यर्थः ॥ १५ ॥ अधिकारानुरूपंलिंगार्चनंनिरूपयति ॥ कर्मयज्ञरताइति ॥ कर्मरूपयज्ञासक्ताइत्यर्थः ॥ असतामज्ञानिनांसूक्ष्मेलिंगेभावनार्थायभक्त्यर्थं स्थूलविग्रहंस्थूलमूर्तिलिंगंस्मृतमितिशेषः ॥ १६ ॥ यदाध्यात्मिकमभ्यंतरंयस्यचलिंगस्यप्रत्यक्षंनभवेत् स्थूलेलिंगेतस्याभ्यंतरस्यसांनिध्यमितिशेषः ॥ कल्पयेत्संभावयेद्भक्त्यर्थं ॥ अथवायस्याज्ञानिनःपुरुषस्याभ्यंतरंयल्लिंगंप्रत्यक्षंनभवेत्तस्यपुरुषस्यभक्त्यर्थंस्थूलेलिंगेतदाभ्यंतरंकल्पयेदित्यर्थः ॥ १७ ॥ ॥ ॥

अज्ञानिविषयउक्काज्ञानिविषयआह ॥ ज्ञानिनामिति ॥ अयुक्तानामज्ञानिनां ॥ १८ ॥ वस्तुतोज्ञानिनांनकिमपिविषयइत्याह ॥ अहोइति ॥ तत्वार्थेवा
दिनोवेदांतार्थज्ञाःआहुरितिशेषः ॥ शिवमयमिति ॥ ज्ञानिनांमनसिभासतइतिभावः ॥ १९ ॥ ज्ञानिनांविधिनिषेधदोषादिगंधोऽपिनास्तीत्याह ॥ एवमित्या
दिना ॥ २० ॥ विधःप्रकारः ॥ विधाविधौप्रकारेचेत्यमरः ॥ तत्रदृष्टांतमाह ॥ यथेति ॥ २१ ॥ ज्ञानपर्यंतमेवकर्मप्रवर्तनामित्याह ॥ इतीति ॥ २२ ॥ प्र
त्ययार्थंज्ञानार्थमितिपूर्वेणैवान्वयः ॥ जलाधारेषुजलाशयेषु ॥ जलाशयोजलाधारइत्यमरः ॥ २३ ॥ बिंबप्रतिबिंबभावमाह एकस्थइति ॥ शिवात्मकंशि

ज्ञानिनांसूक्ष्मममलंभवेत्प्रत्यक्षमव्ययम् ॥ यस्मात्स्थूलमयुक्तानांमृत्काष्ठाद्यैप्रकल्पितम् ॥ १८ ॥ अहोविचारतो
नास्तीत्यन्येतत्वार्थवादिनः ॥ निष्कलंसकलंचित्तेसर्वंशिवमयंजगत् ॥ १९ ॥ एवंज्ञानविमुक्तानांनास्तिदोषविक
ल्पना ॥ विधश्चैवतथानास्तिविहिताविहितेतथा ॥ २० ॥ यथाजलेचकमलंजलेनचनलिप्यते ॥ तथाज्ञानीगृहेति
ष्ठन्कर्मणानसबध्यते ॥ २१ ॥ इतिज्ञानंसमुत्पन्नंयावन्नैवनरस्यच ॥ तावच्चकर्मणादेवंशिवमाराधयेन्नरः ॥ २२ ॥
प्रत्ययार्थंचजगतामेकस्थोऽपिदिवाकरः ॥ एकोऽपिबहुधादृष्टोजलाधारेषुसुव्रताः ॥२३॥ दृश्यतेश्रूयतेयद्यत्तत्तद्विद्धि
शिवात्मकम् ॥ भेदोजनानांलोकेऽस्मिन्प्रतिभासोविचारतः ॥२४॥ एवमाहुस्तदाचान्येसर्वेवेदार्थतत्त्वगाः ॥ हृदि
संसारिणांसाक्षात्सकलःपरमेश्वरः ॥ २५ ॥ इतिविज्ञानयुक्तस्यकिंतस्यप्रतिमादिभिः ॥ इतिविज्ञानहीनस्यप्रति
माकल्पनाशुभा ॥ २६ ॥ पदमुच्चैःसमारोढुंपुंसोऽनालंबनंस्मृतम् ॥ नालंबनंविनातस्यपदमुच्चैःसुदुष्करम् ॥ २७ ॥
निर्गुणप्राप्तयेनॄणांप्रतिमालंबनंस्मृतम् ॥ सगुणान्निर्गुणप्राप्तिर्भवतीतिसुनिश्चितम् ॥ २८ ॥ ॥

वाधीनसत्ताकमित्यर्थः ॥ भेदोऽहंममेतिबुद्धिः ॥ तदाभेदोनिवर्तते ॥ अहंचायंपुनःपुत्रोमित्रंशत्रुर्धनंस्त्रियइत्यग्रिमग्रंथप्रामाण्यात् ॥ २४ ॥ वेदार्थतत्वंग
च्छंतिजानंतीतिवेदार्थतत्वगाः ॥ सकलःसगुणः ॥ २५ ॥ २६ ॥ उच्चैःपदंस्वर्गादिकंसमारोढुमिदंलिंगमालंबनंसाधनंनेतिनर्किंतुसाधनमेवेत्यर्थः ॥ आ
लंबनंविनोच्चैःपदंदुर्धरमेवेत्यर्थः ॥ २७ ॥ निर्गुणेति ॥ अतइत्यादिः ॥ सगुणादिति ॥ सुनिश्चितमिति ॥ उपायावक्ष्यमाणानांबालानामुपलालनाः ॥
असत्येवर्त्मनिस्थित्वाततःसत्यंसमीहतइतिस्मरणात् प्रत्ययावहाज्ञानसाधिकाः ॥ २८ ॥ ॥ ॥ ॥

एवमिति ॥ प्रत्ययावहाज्ञानदायिनी ॥ देवइति ॥ अयंमदीयोदेवइतिसंकल्प्यतस्यार्थइदंपूजनमित्यनुसंधायप्रतिमापूजनंकार्यमितिभावः ॥ २९ ॥ ३० ॥ पूजायाज्ञानपूर्वककरणएवसाफल्यमन्यथाऽनिष्टफलमित्याह ॥ ज्ञानाभावेनेति ॥ पतनंनरकपातः ॥ अतोज्ञानपूर्वकमेवपूजनंकार्यम् ॥ यदेवविद्ययाक रोतितदेववीर्यवत्तरंभवतीतिश्रुतेरितिभावः ॥ ३१ ॥ ३२ ॥ ३३ ॥ तत्रदृष्टांतयति ॥ यथेति ॥ रंगोमहारजनादि ॥ शुभतरोदेदीप्यमानः ॥ ३४ ॥ वि सज्जतेसंलग्नोभवतिप्रकाशकत्वेनदृश्यतेवा ॥ ३५ ॥ विज्ञानंतत्त्वमसिद्वासुपर्णेत्यादिमहावाक्यगम्यज्ञानम् ॥ तत्रतत्रसाधनमाह ॥ विज्ञानस्येति ॥ मूलं

एवंचसर्वदेवानांप्रतिमाप्रत्ययावहा ॥ देवश्चायंमदीयोवैतस्यार्थेपूजनंत्विदम् ॥ २९ ॥ गंधचंदनपुष्पादिकिमर्थंप्र तिमांविना ॥ तावच्चप्रतिमापूज्यायावद्विज्ञानसंभवः ॥ ३० ॥ ज्ञानाभावेनपूज्येतपतनंतस्यनिश्चितम् ॥ एतस्मा त्कारणाद्विप्राःश्रूयतांकथयामिच ॥ ३१ ॥ स्वजात्युक्तंतुयत्कर्मकर्तव्यंतत्प्रयत्नतः ॥ यत्रयत्रतथाभक्तिःकर्तव्यंपूज नादिकम् ॥ ३२ ॥ विनापूजनदानादिपातकंनविदूरतः ॥ यावच्चपातकंदेहेतावत्सिद्धिर्नजायते ॥ ३३ ॥ गतेचपा तकेतस्यसर्वंचसफलंभवेत् ॥ यथाचमलिनेवस्त्रेरंगःशुभतरोनहि ॥ ३४ ॥ क्षारादिनाकृतेशुद्धेसर्वोरंगोविसज्जते ॥ तथाचनिर्मलेदेहेदेवानांपूजयातथा ॥ ३५ ॥ ज्ञानरंगःप्रजायेतविज्ञानंसंभवेत्तदा ॥ विज्ञानस्यचयन्मूलंज्ञानंसम्य गुदाहृतम् ॥ ३६ ॥ ज्ञानस्यैवतुयन्मूलंभक्तिरव्यभिचारिणी ॥ भक्तेर्मूलंतुयत्कर्मदेवादिपूजनंशुभम् ॥ ३७ ॥ त न्मूलंसद्गुरुःप्रोक्तस्तन्मूलंसंगतिःसताम् ॥ संगत्यागुरुर्लभ्येतगुरोर्मंत्रादिपूजनम् ॥ ३८ ॥ पूजनाज्जायतेभक्तिर्भ क्त्याज्ञानंप्रजायते ॥ ज्ञानाद्विज्ञानसंपत्तिःसत्यमेवनसंशयः ॥ ३९ ॥ विज्ञानंचयदाजातंतदाभेदोनिवर्तते ॥ अहं चाऽयंपुनःपुत्रोमित्रंशत्रुर्धनंस्त्रियः ॥४०॥ मानेचैवाऽपमानेचलाभेचैवाऽप्यलाभके ॥ तथाजयाजयौतस्यसमौख्या तौनिरंतरम् ॥ ४१ ॥ द्वंद्वदुःखविहीनश्चशिवरूपोभवत्यसौ ॥ द्वंद्वप्राप्तौनजायेतेसुखदुःखेविजानतः ॥ ४२ ॥

साधनम् ॥ ज्ञानंसम्यक्सम्यग्ज्ञानमितियावत् ॥ ३६ ॥ ३७ ॥ इदानींतत्तत्कार्यमाह ॥ संगत्येति ॥ सतामित्यनुषंगः ॥ ३८ ॥ ३९ ॥ भेदोऽहंका रादिद्वैतप्रपंचः ॥ तदेवस्पष्टंनिरूपयति ॥ अहंचेत्यादिना ॥ ४० ॥ तथेति ॥ तस्याविज्ञानिनोजयाजयौसमौख्यातौ ॥ सुखदुःखेसमेकृत्वालाभालाभौ जयाजयावितिस्मृतेः ॥ ४१ ॥ द्वंद्वेति ॥ द्वंद्वदुःखंतुशीतोष्णशत्रुमित्रसुखदुःखरूपम् ॥ तेनविहीनः ॥ विजानतोविज्ञानवतः ॥ ४२ ॥

विहिताविहिते विधिनिषेधावित्यर्थः ॥ तस्यविज्ञानिनोनश्यतः ॥ तथाचस्मर्यते ॥ बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृतेइति ॥ अन्यच्च ॥ यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेति ॥ गृहाश्रमविवर्तिषुगृहाश्रमस्थितेषुमध्ये ॥ निर्धारणेसप्तमी ॥ ४३ ॥ तादृशंविज्ञानिनंपुरुषम् ॥ ४४ ॥ तीर्थदेवतादीनांविज्ञानिनमपेक्ष्याल्पयोग्यताकत्वंनिरूपयति ॥ तादृशानीति ॥ उदकमयानीत्यर्थः ॥ दर्शनादपिदर्शनादेवेत्यर्थः ॥ तत्रस्मर्यते ॥ नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनदर्शनादेवसाधवइति ॥ अथवातादृशानिविज्ञानिसदृशानिनैवसंतीत्यर्थः ॥ तत्रहेतुमाह ॥ तइति ॥ ४५ ॥ गृहस्थाश्रमिणांपंचायतनरूपाकारपूजनमावश्यकमितिदर्शयति ॥ यावदिति ॥ आकारपूजनंप्रतिमापूजनम् ॥ पंचायतनान्याह ॥ शिवस्येति ॥ शिवस्यप्राधान्यात्पूर्वंनिर्देशः ॥ अत्रवाशब्दश्चार्थे ॥ ४६ ॥ ४७ ॥ पक्षांतरमाह ॥ अथवेति ॥ शिवमात्रपूजनेकारणमाह ॥ मूलमिति ॥ मूलंमुख्योविशिष्यतइतरेभ्यइतिशेषः ॥ तत्रदृष्टांतयति ॥ मूलइति ॥ सिक्तेजलेनेतिशेषः ॥ हेमुनीश्वराः ॥ ४८ ॥ वैपरीत्यंनिवारयति ॥ शाखायामिति ॥ कर्हिचित्कदापीत्यर्थः ॥ पूजिताइति ॥ एकविज्ञानेनसर्वविज्ञातंभवति ॥ यथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादितिवच्छिवेपूजितेसर्वेदेवाःपूजितप्रायाभवंतीतिभावः ॥ ४९ ॥ उपसंहरति ॥ तस्मादिति ॥ शिवपूजनस्यफलंकथयति ॥ सर्वकामेति ॥ ५० ॥

विहिताविहितेतस्यनश्यतोऋषिसत्तमाः ॥ ईदृशोविरलोलोकेगृहाश्रमविवर्त्तिषु ॥ ४३ ॥ यदिभवतिलोकेऽस्मिन्दर्शनात्पापहारकः ॥ तीर्थानिश्लाघयंतीहतादृशमृषिसत्तमाः ॥ ४४ ॥ तादृशान्येवतीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनविज्ञानीदर्शनादपि ॥ ४५ ॥ यावद्गृहाश्रमेतिष्ठेत्तावदाकारपूजनम् ॥ शिवस्यप्रतिमावापिशिवायाःप्रतिमातथा ॥ ४६ ॥ विष्णोश्चैवप्रयत्नेनसूर्यस्यैवाथवापुनः ॥ गणपतेर्वापुनस्तत्रपंचायतनमुत्तमम् ॥ ४७ ॥ अथवाचशिवःपूज्योमूलमेवविशिष्यते ॥ मूलेसिक्तेयथाशाखास्तृप्ताःसंतिमुनीश्वराः ॥ ४८ ॥ शाखायांचैवतृप्तायांमूलंतृप्तंनकर्हिचित् ॥ शिवेचपूजितेदेवाःपूजिताःसर्वएवहि ॥ ४९ ॥ तस्माच्चपूजयेद्देवंत्र्यंबकंलोकशंकरम् ॥ सर्वकामफलावाप्त्यैसर्वभूतहितेरतम् ॥ ५० ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपूजाप्रकरणंनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपूजाविधौज्ञानाधिक्यनिरूपणंनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ॥

ओंनमःशिवाय ॥ शुद्धिहेतुंमलोत्सर्गस्नानाद्यंकर्मधूर्जटेः ॥ पूजाविधिस्तथाऽत्रैवप्रोच्यतेसप्तविंशके ॥ १ ॥ अतःपरमिति ॥ पूजाविधिनासुखमावहतिप्रतिपादकतयेतितथातांपूजाविधिसुखावहांकथामहंप्रवक्ष्यामि ॥ हेऋषयोभवद्भिःश्रूयतांतत्कथेत्यध्याहारः ॥ १ ॥ ब्राह्मेतत्संज्ञकेमुहूर्तेसमये ॥ ब्राह्मसंज्ञातु सूर्योदयात्पूर्वंषड्घटिकात्मककालस्य ॥ तथाच ॥ ब्राह्मोमुहूर्तोरात्रेःपश्चिमोयामइतिकुल्लूकभट्टः ॥ दक्षोपि ॥ प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् ॥ प्रहरद्वयंशयानोहिब्रह्मभूयायकल्पतइतिब्रवीति ॥ उत्थायेति ॥ तदुक्तंमनुना ॥ ब्राह्मेमुहूर्तेबुध्येतधर्मार्थौचानुचिंतयेत् ॥ कायक्लेशांश्चतन्मूलान्वेदतत्वार्थमेवच ॥ उत्थायावश्यकंकृत्वाकृतशौचःसमाहितः ॥ पूर्वांसंध्यांजपंस्तिष्ठेत्स्वकालेचापरांचिरम् ॥ ऋषयोदीर्घसंध्यात्वाद्दीर्घमायुरवाप्नुयुः ॥ प्रज्ञांयशश्चकीर्तिंचब्रह्मवर्चसमेवचेति ॥ गदाधरंस्मृत्वागदाधरत्वेनविष्णुंस्मृत्वेत्यर्थः ॥ तदाप्रार्थनाकर्तव्येतितच्छ्लोकमाह ॥ उत्तिष्ठेति ॥ हृदयेशयहृदयेंऽतर्हृदयेशेतइतितत्संबुद्धिर्हृदयेशय ॥ २ ॥ कमलास्वामिन्लक्ष्मीपते ॥ कमलाश्रीर्हरिप्रियेत्यमरः ॥ ब्रह्मांडेजगतीत्यर्थः ॥ धर्माब्धौपुनर्भूमिप्रार्थना ॥ समुद्रवसनेदेविपर्वतस्तनमंडले ॥ विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमइति ॥ ३ ॥ देहशुद्धिमिति ॥ मलमूत्राद्युत्सर्गविधिमित्यर्थः ॥ तृणाद्यंतर्हितभूमौशिरःप्रावृत्ययज्ञोपवीतंनिवीतंपृष्ठतः कर्णेवाकृत्वाघ्राणपिधानंकृत्वादिवासंध्ययोरुदङ्मुखोरात्रौदक्षिणामुखोमौन्यनुपानत्कआसीनोमूत्रपुरीषोत्सर्गंकुर्यादिति ॥ तत्रमलाद्वादशविधामनुनोक्ताः ॥ वसाशुक्रमसृङ्मज्जामूत्रविट्घ्राणकर्णविट् ॥ श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाइति ॥ शुद्धिरपितेनैवोक्ता ॥ एकालिंगेगुदेतिस्रस्तथैकत्रकरेदश ॥ उभयोःसप्तदातव्यामृदःशुद्धिमभीप्सता ॥ एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणाम् ॥ त्रिगुणंस्याद्वनस्थानांयतीनांतुचतुर्गुणमिति ॥ मृत्परिमाणप्रतिपादकंदक्षवचनं लिंगेपिमृत्समाख्यातात्रिपर्वापूर्यतेयया ॥ द्वितीयाचतृतीयाचतदर्धार्धाप्रकीर्तिताइतिकुल्लूकभट्टेनोदाहृतम् ॥ अन्यच्चस्मर्यते ॥ सूरिस्तूदङ्मुखोह्नन्यपिचनिशिपुनर्दक्षिणास्योनिशायांकुर्यान्मूत्रादिशौचंबहिरथसलिलात्तत्रलिंगेमृदेका ॥ पंचापानेथहस्तेदशपुनरुभयोरित्यादि ॥ आपस्तंबेनतत्राचमनमु

॥ सूतउवाच ॥ अतःपरंप्रवक्ष्यामिपूजाविधिसुखावहाम् ॥ श्रूयतामृषयःश्रेष्ठाःकथांपापप्रणाशिनीम् ॥ १ ॥ ब्राह्मेमुहूर्त्तउत्थायस्मृत्वादेवंगदाधरम् ॥ उत्तिष्ठोत्तिष्ठदेवेशउत्तिष्ठहृदयेशय ॥ २ ॥ उत्तिष्ठकमलास्वामिन्ब्रह्मांडेमंगलंकुरु ॥ इत्येवंवचनंह्युक्त्वास्मृत्वाचगुरुपादकौ ॥ ३ ॥ देहशुद्धिंतथाकृत्वाप्रक्षाल्यचरणौमुदा ॥ हस्तौचविधिवत्क्षाल्यदंतधावनमाचरेत् ॥ ४ ॥ ॥ ॥

क्रम् ॥ मूत्रंकृत्वापुरीषंवामूत्रपुरीषलेपानवलेपानुच्छिष्टलेपान्नेतसश्रयेलेपास्तान्प्रक्षाल्यपादौचाचम्यप्रयतोभवतीति ॥ तदागंडूषकरणमपिस्मर्यते ॥ चत्वार्यष्टौचगंडूषाःक्रमान्मूत्रपुरीषयोः ॥ भुक्त्यंतेद्वादशैवस्यूरेतोत्सर्गेतुषोडशेति ॥ हस्ताविति ॥ हस्तौक्षाल्यप्रक्षाल्यदंतधावनंविधिवदाचरेदित्यन्वयः ॥ दंतधावनविधिस्तुधर्माब्धावुक्तः ॥ दंतधावनंकंटकिक्षीरवृक्षापामार्गादिकाष्ठैःकार्यम् ॥ काष्ठालाभेश्राद्धोपवासादिनिषिद्धदिनेचपर्णादिनाप्रदेशिनीवर्जमं गुल्यावाद्वादशगंडूषैर्वादंतान्शोधयेदिति ॥ ४ ॥ अनुदितइति ॥ दिवानाथेसूर्ये ॥ ५ ॥ सुस्नायादिति ॥ तत्राचमनप्राणायामादिकंयाज्ञवल्क्येनोक्तं ॥ त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःसमुपस्पृशेत् ॥ अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः ॥ हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः ॥ शुध्येरन्स्त्री चशूद्रश्वसकृत्स्पृष्टाभिरंततः ॥ स्नानमब्देवतैर्मंत्रैर्मार्जनंप्राणसंयमः ॥ सूर्यस्यचाप्युपस्थानंगायत्र्याःप्रत्यहंजपइति ॥ यथावकाशमित्यनेनावश्यककार्यविरो

अनुदितेदिवानाथेकुर्यात्तुदंतधावनम् ॥ मुखंषोडशवारंतुप्रक्षाल्यांजलिभिस्तथा ॥ ५ ॥ यथावकाशंसुस्नायान्न द्यादिष्वथवागृहे ॥ देशकालाविरुद्धंचस्नानंकार्यंनरेणच ॥ ६ ॥ रवेर्दिनेतथाश्राद्धेसंक्रांतौग्रहणेतथा ॥ महादानेतथा तीर्थेह्युपवासदिनेतथा ॥ ७ ॥ आशौचेप्यथवाविप्रानस्नायादुष्णवारिणा ॥ तैलाभ्यंगंनकुर्वीतवारान्दृष्ट्वाक्रमेणच ॥ ८ ॥ रवौतापंतथाकुर्यात्सोमेकांतिंलभेन्नरः ॥ भौमेमृत्युंलभेताथबुधेलक्ष्मींलभेन्नरः ॥ ९ ॥ गुरौदरिद्रतांचैवशु क्रेचाप्यसुखंभवेत् ॥ सुखंशनैश्चरेचैववारादिफलमुत्तमम् ॥ १० ॥ अशक्तौचतथाकार्यंश्रूयतामृषिसत्तमाः ॥ अर्के पुष्पंक्षिपेत्तैलेगुरौदूर्वांतथैवच ॥ ११ ॥ भूमिपुत्रेरजश्चैवशुक्रेचजलबिंदुकम् ॥ नित्यमभ्यंगकेचैववासितेनैवदूषण म् ॥ १२ ॥ केनापिचनकर्त्तव्यंश्राद्धेचग्रहणेतथा ॥ उपवासेतथाप्राप्तेप्रतिपद्दिवसेतथा ॥ १३ ॥ ॥

धेनकर्त्तव्यइतिगम्यते ॥ अथवापर्वकालाद्यभावेनद्यादितीर्थाद्यभावेच ॥ देशकालाविरुद्धमिति ॥ एतेनमरुदेशादाववगाहनस्नानासंभवेपिनदोषइतिग म्यते ॥ नरेणेत्यनेनसौभाग्यवतीनांस्त्रीणामाकंठस्नानमपिगम्यते ॥ ६ ॥ कालविशेषउष्णोदकस्नाननिषेधमाहसार्धश्लोकेन ॥ रवेरिति ॥ ७ ॥ महादानेषोड शमहादानेदातव्ये ॥ तीर्थेपुष्करादौ ॥ इदानींतैलाभ्यंगविधिनिषेधावाह ॥ तैलाभ्यंगमिति ॥ वारान्निषिद्धवारान् ॥ तैलाभ्यंगंतुकुर्वीतेतिपाठांतरम् ॥ ॥ ८ ॥ फलमाह ॥ रवाविति ॥ रवौवारेथनोकुर्यादितिपाठांतरम् ॥ ९ ॥ १० ॥ अशक्तिविषयेतैलेपुष्पादिकंक्षिप्त्वाऽभ्यंगंनिरंतरंकार्यमित्याह ॥ अशक्ता विति ॥ ११ ॥ अभ्यंगकेतैलेवासितेसुवासिते ॥ १२ ॥ तदपवदति ॥ केनापीति ॥ १३ ॥ ॥ ॥

अशक्तविषयेप्रत्यपवादमुखेनतैलविशेषेणाऽभ्यंगंविदधाति ॥ अथवेति ॥ सार्षपंसर्षपोधान्यविशेषस्तत्संबंधिसार्षपम् ॥ तदपिरव्यादिग्रहणेनकर्तव्यमित्याह ॥ ग्रहणंविनेति ॥ क्रमप्राप्तंस्नानमनुवदति ॥ देशमिति ॥ यथाविधिविधिमनुसृत्येत्यर्थः ॥ विधिस्तुसंक्षेपतःकथ्यतेधर्माब्धौ ॥ नद्यादौगत्वाशिखांबध्वाजानूर्ध्वजलेतिष्ठन्नन्यथातूपविश्याचम्यममकायिकवाचिकमानसिकदोषनिरसनपूर्वकंसर्वकर्मसुशुद्धिसित्ध्यर्थंप्रातःस्नानंकरिष्यइतिसंकल्प्यजलंनत्वाप्राङ्मुखःप्रवाहाभिमुखोवात्रिरवगाह्यांगानिनिमृज्यस्नात्वाद्विराचम्यापोहिष्ठेतिमार्जनंकृत्वाइमंमेगंगइतित्रिर्जलमालोड्याघमर्षणेत्रिरावृतेनऋतंचेतिसूक्तेनकात्यायनैर्द्रुपदेतिऋचाजलेनिमग्नतयाकृत्वाप्लुत्याचम्यजलतर्पणंकुर्यादिति ॥ १४ ॥ कथंस्नानंकार्यमितितदाह ॥ उत्तराभिमुखइति ॥ उच्छिष्टेनपरधृतेनस्वकीयेनापिवस्त्रेण ॥ १५ ॥ परधार्यमन्यस्यवस्त्रं ॥ परधृतादिनापिक्षालितेनसतावस्त्रेणस्नानंकार्यमित्याह ॥ तेनेति ॥ परधृतादिवस्त्रेणेत्यर्थः ॥ १६ ॥

अथवासार्षपंतैलंनदुष्येद्ग्रहणंविना ॥ देशंकालंविचार्यैवस्नानंकुर्याद्यथाविधि ॥ १४ ॥ उत्तराभिमुखश्चैवप्राङ्मुखोप्यथवापुनः ॥ उच्छिष्टेनैववस्त्रेणनस्नायान्मुनिसत्तमाः ॥१५॥ परधार्यंतथोच्छिष्टंरात्रौचविधृतंचयत् ॥ तेनस्नानंतदाकार्यंक्षालितंचयदाभवेत् ॥ १६ ॥ प्रक्षाल्यचरणौप्राग्वैपश्चादाचमनंचरेत् ॥ पश्चादावाहनंकार्यंतीर्थानांस्मरणंतथा ॥ १७ ॥ अद्यप्रयोगमुच्चार्यस्नानकालेसदानरः ॥ प्रक्षिपेच्चजलंपूर्वंमस्तकेऋषिसत्तमाः ॥१८॥ तीर्थनामावलिंतत्रपठेच्चविधिपूर्वकम् ॥ पश्चादंगेषुचक्षेप्यंजलंचमार्जनंपुनः ॥ १९ ॥ कृत्वामृदाशुचिंतत्रक्षालयेन्मतिमान्नरः ॥ पश्चादाचमनंकृत्वागंगांविष्णुंस्मरेत्पुनः ॥२०॥ ॥ ॥ ॥

आचमनमिति ॥ आचमनविधिस्तुधर्माब्धौ ॥ अप्रावृतशिरःकंठउपविष्टउपवीतीप्राङ्मुखउदङ्मुखोवांगुष्ठमूलेनमुक्तांगुष्ठकनिष्ठहस्तेनानुष्णंफेनादिरहितंजलंहृदयंगतंत्रिःपिबेत् ॥ केशवाद्यैस्त्रिभिःपीत्वैकेनदक्षकरंमृजेत् ॥ द्वाभ्यामोष्ठौचसंमृज्यएकेनोन्मार्जयेच्चतौ ॥ जलमेकेनसंमंत्र्यैकेनवामकरंमृजेत् ॥ एकेनदक्षिणंपादंवाममेकेनचैववहि ॥ संप्रोक्ष्यैकेनमूर्धानमूर्ध्वोष्ठंनासिकाद्वयं ॥ नेत्रयुग्मंकर्णयुग्मंदक्षिणोपक्रमंक्रमात् ॥ नाभिंहृदयमूर्धानौदक्षवामभुजौस्पृशेदित्यादि ॥ १७ ॥ अद्यप्रयोगमिति ॥ अद्यपूर्वोच्चरितैवंगुणविशेषणेत्यादिसंकल्पंकृत्वेत्यर्थः ॥ प्रक्षिपेत्सिंचेत् ॥ १८ ॥ तीर्थनामावलिंगंगायमुनाकृष्णागोदावरीत्यादिकां ॥ स्मर्यतेच ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छतीत्यादि ॥ मार्जनमिति ॥ आपोहिष्ठेत्यादिमंत्रेणमार्जनंकर्तव्यमित्यर्थः ॥ १९ ॥ कृत्वेति ॥ मृदाम्रृत्तिकयाऽवयवंशुचिंशुद्धंकृत्वाउद्धृतासिवराहेणेत्यादिमंत्रेणेत्यर्थः ॥ २० ॥

॥ २१ ॥ शुद्धेति ॥ शुद्धिस्तुजातिविशेषेणतक्षणादिनावा ॥ ऊर्णांतरितंऊर्णाकंबलविशेषस्तदास्तरणयुतमित्यर्थः ॥ २२ ॥ सर्वकामेति ॥ एतेनेदमासनंकामनार्थमितिसूचितं ॥ यथायोग्यमितिमृगचर्माद्यासनंचब्रह्मचारिव्रतप्रकरणेआपस्तंबेनोक्तं ॥ हारिणमैणेयंवाकृष्णंब्राह्मणस्य ॥ रौरवँराजन्यस्य ॥ बस्ताजिनंवैश्यस्य ॥ आविकंसार्ववर्णिकं ॥ कंबलश्चेति ॥ २३ ॥ तिलकंगोपीचंदनादिनेतिललाटेइतिचशेषः ॥ तेषुपंचसुमध्येइत्यर्थः ॥ तिलकस्यपंचप्रकारानाह ॥ त्रिपुंड्रमिति ॥ २४ ॥ सदृशमिति ॥ वंशपत्रेणवेणुपत्रतुल्यमित्यर्थः ॥ पंचमंप्रकारंमेमत्तः ॥ निबोधजानीहि ॥ २५ ॥ पुष्पमिति ॥ पारिजातपुष्पतुल्याकारमितियावत् ॥ तिलकस्यभक्तिविशेषपरत्वमाह ॥ त्रिपुंड्रमिति ॥ २६ ॥ २७ ॥ ऊर्ध्वपुंड्रवंशपत्राकृत्योस्तिलकयोर्विष्णुभक्ता

धौतवस्त्रंततोधार्यंपुनराचमनंचरेत् ॥ शुद्धदेशेततोगत्वागोमयाद्युपमार्जिते ॥ २१ ॥ आसनंचशुभंतत्ररचनीयंद्विजोत्तमाः ॥ शुद्धकाष्ठसमुत्पन्नमूर्णांतरितमेवच ॥ २२ ॥ चित्रासनंतथाकुर्यात्सर्वकामफलप्रदम् ॥ यथायोग्यंपुनर्ग्राह्यंमृगचर्मादिकंचयत् ॥ २३ ॥ तत्रोपविश्यकुर्वीततिलकंमतिमान्नरः ॥ तिलकंपंचधाप्रोक्तंतेष्वेकंपरिकल्पयेत् ॥ २४ ॥ त्रिपुंड्रंचोर्ध्वपुंड्रंचह्यर्धचंद्रमथापिवा ॥ सदृशंवंशपत्रेणपंचमंचनिबोधमे ॥ २५ ॥ पुष्पंचपारिजातस्यतेनैवसदृशंपुनः ॥ त्रिपुंड्रंचोर्ध्वपुंड्रंचशिवभक्तेविशिष्यते ॥ २६ ॥ ब्रह्मक्षत्रविशांतत्रचत्वारितिलकानिवै ॥ अर्धचंद्रंतथाशूद्रैरूर्ध्वपुंड्रमथापिवा ॥ २७ ॥ विष्णुभक्तैर्विशेषेणतिलकंसुप्रतिष्ठितम् ॥ उर्ध्वपुंड्रंतथाचात्रवंशपत्राकृतिर्यथा ॥ २८ ॥ तस्माच्चतिलकंकार्यंकृत्वासिद्धिमवाप्नुयात् ॥ जपस्तपस्तथादानंतिलकात्सफलंभवेत् ॥ २९ ॥ अभावेतिलकस्यापिजलस्यापिप्रकीर्तितम् ॥ कृत्वातिलकंवर्णोक्तंविधिंसंपादयेन्नरः ॥ ३० ॥ संपाद्यचस्वकंकर्मपुनराराधयेच्छिवम् ॥ पुनराचमनंकृत्वात्रिवारंमंत्रपूर्वकम् ॥ ३१ ॥ एकंवाथप्रकुर्वीतगंगांविष्णुंब्रुवन्निति ॥ आत्मतत्वंशिवतत्वंविद्यातत्वंतथैवच ॥ ३२ ॥

न्प्रत्याह ॥ विष्णुभक्तैरिति ॥ २८ ॥ उपसंहृत्यफलंकथयति ॥ तस्मादिति ॥ तिलकंप्रशंसति ॥ जपइति ॥ २९ ॥ तिलकसाधनाभावेऽनुकल्पमाह ॥ अभावइति ॥ कृत्वेति ॥ वर्णोक्तंब्राह्मणादिवर्णोक्ततिलकमित्यर्थः ॥ विधिंविहितंकर्मेत्यर्थः ॥ ३० ॥ ३१ ॥ एकमिति ॥ एकवारंवाऽऽचमनमित्यर्थः ॥ गंगामिति ॥ गंगाविष्णिवतिशब्दमुच्चारयन्नित्यर्थः ॥ आत्मतत्त्वमिति चतुर्थ्यंतपदमाचमनविधौग्राह्यं ॥ केशवायस्वाहेत्यादिवत्आत्मतत्वायस्वाहाशिवतत्वायस्वाहाविद्यातत्वायस्वाहेत्युदकंग्राह्यमित्यग्रिमेणसमुदितान्वयः ॥ ३२ ॥ ॥ ॥

अर्घोदकमिति ॥ अशुच्यसंस्पृष्टमपीतावशिष्टंपूजामुद्दिश्यानेयमुदकमित्यर्थः ॥ ३३ ॥ ३४ ॥ दक्षिणांशेदक्षिणभागे ॥ ३५ ॥ यस्यदेवेपराभक्तिर्यथा देवेतथागुरावितिप्रमाणमनुसंधायगुरुकर्मकमपिनमनध्यानादिकमाह ॥ गुरोरिति ॥ तदनुज्ञांपूजायांगुरोरनुज्ञां ॥ ३६ ॥ कामनामिति ॥ अमुकफलप्रा प्त्यर्थमित्याकारांनिप्रयुज्योल्लिख्येत्यर्थः ॥ ३७ ॥ प्रथमंगणाधिपतिंपूजयेदित्याह ॥ मुद्रामिति ॥ शंखधेन्वादिमुद्रांशास्त्रांतरप्रसिद्धां॥कुसुमैरित्यत्रकुंकुमैरिति पाठांतरं ॥ ३८ ॥ लक्षलाभयुतंलक्षलाभाख्यौसेवकविशेषौताभ्यांयुतंयुक्तं ॥ नंदिकेश्वरस्यापिपूजनमाह ॥ नंदिनामिति ॥ नंदिकेश्वरमित्यर्थः ॥ ३९ ॥

चतुर्थ्यंतपदंग्राह्यमाचमनेविधौनरैः ॥ अर्घोदकंतथातत्रपूजार्थंचसमाहरेत् ॥ ३३ ॥ अन्यद्वस्तुचयत्किंचिद्यथाशक्ति समीपगं ॥ कृत्वास्थेयंचतत्रैवधैर्यमास्थायवैनरः ॥ ३४ ॥ अर्घपात्रंतथाचैकंजलगंधाक्षतैर्युतम् ॥ दक्षिणांशेतथा स्थाप्योपचारकल्पनायवै ॥ ३५ ॥ गुरोश्चस्मरणंकृत्वातस्मैनत्वाविशेषतः ॥ ध्यानंपूजांतथाकृत्वातदनुज्ञामवाप्यच ॥ ३६ ॥ अद्यादिपुनरुच्चार्यकामनांनिप्रयुज्यच ॥ पूजयेत्परयाभक्त्याशिवंसपरिवारकं ॥ ३७ ॥ मुद्रामेकांप्रदर्श्यैवपू जयेद्विघ्नहारकं ॥ सिंदूरैःकुसुमैर्देवंसिद्धिबुद्धिसमन्वितम् ॥ ३८ ॥ लक्षलाभयुतंतत्रपूजयित्वानमेत्पुनः ॥ क्षमाप्यनं दिनंदेवंभ्रात्रासहसमन्वितम् ॥ ३९ ॥ पूजयेत्परयाभक्त्यानमस्कृत्यततःपुनः ॥ द्वारपालंसदाद्वारितिष्ठंतंचमहोदर म् ॥ ४० ॥ पूजयित्वाततःपश्चात्पूजयेद्गिरिजांसतीम् ॥ चंदनैःकुंकुमैश्चैवधूपैर्दीपैरनेकधा ॥ ४१ ॥ नैवेद्यैर्विविधैश्चैवपूज यित्वाततःशिवां ॥ नमस्कृत्यपुनस्तत्रगच्छेच्चशिवसंनिधौ ॥ ४२ ॥ यदिगृहेपार्थिवीवाहैमीवाराजतीतथा ॥ धातुज न्यातथावान्यापारदीधातुसंभवा ॥ ४३ ॥ तस्यांतुपूजितायांवैसर्वेस्युःपूजितास्तथा ॥ स्थापितंचयदालिंगंविधानं विधिपूर्वकम् ॥ ४४ ॥ कर्तव्यंसर्वथातत्रगृहेनियमोनविद्यते ॥ जीवप्राणप्रतिष्ठांचभूतशुद्धिंविधायच ॥ ४५ ॥

महोदरंतदाख्यंद्वारपालं ॥ ४० ॥ ४१ ॥ गिरिजापूजामुक्त्वाशिवपूजामाह ॥ गच्छेदित्यादिना ॥ ४२ ॥ स्थिरचरभेदेनाशिवप्रतिमाद्वैविध्यात्तत्रचरप्र तिमार्चामाह॥यदीति ॥ पार्थिवीमृन्मयीप्रतिमेतिशेषः ॥ एवमग्रेपिबोध्यं ॥ ४३ ॥ येनविज्ञातेनसर्वंविज्ञातंभवतीत्युपनिषदर्थमनस्यनुसंधायाशिवालिंगेपूजि तेसतिसर्वेदेवाःपूजिताइत्याह ॥ तस्यामिति ॥ स्थिरप्रतिमार्चामाह ॥ स्थापितमिति ॥ विधानंकर्म ॥ ४४ ॥ जीवप्राणेति ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्ये त्यादिविधिनेतिशेषः ॥ भूतशुद्धिमिति ॥ भूशुद्ध्यादीनामुपलक्षणमेतत् ॥ ४५ ॥ ॥ ॥ ॥

तास्तुदिग्बंधनादिनाकर्तव्याः ॥ अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेत्यादिस्मार्तमंत्रेण ॥ श्रौतमंत्रस्तुनिरस्तः परावसुरित्यादिः ॥ दिक्पालानिति ॥ इंद्रादीनित्यर्थः ॥ इंद्रोवन्हिःपितृपतिर्नैर्ऋतोवरुणोमरुत् ॥ कुवेरईशःपतयःपूर्वादीनांदिशांक्रमादित्यादिक्रमेणपूजयेत् ॥ मूलमंत्रःपंचाक्षरमंत्रःओंनमःशिवायेति ॥ तदभियोगतस्तेनसाधनेनेत्यर्थः ॥ ४६ ॥ गृहेलिंगार्चनेद्वारपालादिपूजादिनियमोनास्तीत्याह ॥ तत्रेति ॥ अनियमेकारणमाह ॥ तस्मिन्निति ॥ ४७ ॥ ४८ ॥ ४९ ॥ मूलमंत्रेणेति ॥ दशावर्त्तंदशवारमित्यर्थः ॥ ५० ॥ पंचेति ॥ मुद्राधेन्वादयः ॥ ५१ ॥ पद्मासनमिति ॥ स्थिरसुखमासनंपद्मासनभद्रासनवीरासनस्वस्तिकासनदंडकासनसोपाश्रयपर्यंकक्रौंचनिषदनोष्ट्रनिषदनसमसंस्थानभेदाद्दशविधं ॥ तत्र

दिक्पालान्पूजयेत्तत्रस्थापितेचाशिवालये ॥ गृहेशिवःसदापूज्योमूलमंत्राभियोगतः ॥ ४६ ॥ तत्रतुद्वारपालानांनियमोनास्तिसर्वथा ॥ गृहेलिंगंचसंपूज्यतस्मिन्सर्वंप्रतिष्ठितम् ॥ ४७ ॥ पूजाकालेचसांगंवैपरिवारयुतंतदा ॥ आवाह्यपूजयेद्देवंनियमोऽत्रनविद्यते ॥ ४८ ॥ शिवस्यसंनिधिंगत्वाह्यासनंपरिकल्पयेत् ॥ उदङ्मुखस्तदास्थित्वाचमनंपुनरेवच ॥ ४९ ॥ प्रक्षाल्यहस्तौपश्चाद्वैप्राणायामंप्रकल्प्यच ॥ मूलमंत्रेणतत्रैवदशावर्त्तंजपेन्नरः ॥ ५० ॥ पंचमुद्राःप्रकर्तव्याःपूजादौशुभमीप्सता ॥ एतामुद्राःप्रदर्श्यैवपूजाविधिंसमाचरेत् ॥ ५१ ॥ दीपंकृत्वातदातत्रनमस्कारंगुरोरथ ॥ बध्वापद्मासनंतत्रभद्रासनमथापिवा ॥ ५२ ॥ उत्तानासनकंकृत्वापर्यंकासनकेनच ॥ यथासुखंतथास्थित्वाप्रयोगंपुनरेवच ॥ ५३ ॥ कृत्वापूजांपुराजातांबटुकेनैवकारयेत् ॥ यदिवास्वयमेवेहगृहेनियमोनविद्यते ॥ ५४ ॥ पश्चाद्वैवाऽर्घपात्रेणक्षालयेल्लिंगमुत्तमम् ॥ अनन्यमानसोभूत्वापूजांकृत्वायथाविधि ॥ ५५ ॥ पश्चादवाहयेद्देवंमंत्रेणाऽनेनवैनरः ॥ कैलासशिखरस्थंचपार्वतीपतिमुत्तमं ॥ ५६ ॥ ॥ ॥ ॥

पद्मासनंतु ॥ पादांगुष्ठौनिवध्नीयाद्धस्ताभ्यांव्युक्रमेणतु ॥ ऊर्वोरुपरिविप्रेंद्रकृत्वापादतलेउभे ॥ पद्मासनंभवेदेतत्सर्वेषामभिपूजितमित्यादिनायाज्ञवल्क्यःपद्मासनादिस्वरूपंनिरूपितवान् ॥ तत्सर्वंततएवावगंतव्यं ॥ विस्तरभयान्नात्रनिरूप्यते ॥ ५३ ॥ प्रयोग इपूर्वोच्चरितेत्यादिकं ॥ ५३ ॥ बटुकेनबालब्रह्मचारिणा ॥ ५४ ॥ अनन्यमानसःसमाहितमनस्कः ॥ ५५ ॥ अनेनवक्ष्यमाणेन ॥ मंत्रमाहाऽध्यायांतेनग्रंथेनकैलासेत्यादिना ॥ कैलासशिखरस्थमित्यादिद्वितीयांतंशिवमावाहयाम्यहमित्यग्रिमेणसंबध्यते ॥ ५६ ॥ ॥ ॥ ॥ ॥

॥ ५७ ॥ ५८ ॥ कपालेति ॥ गरलशोभितंविषशोभितं ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधि
न्यांपूजाविधानवर्णनंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ ॥ ओंनमःशिवाय ॥ उपचारैःषोडशभिःसांगंशंकरपूजनम् ॥ तत्प्रकारस्तथास
म्यगष्टाविंशेत्रवर्ण्यते ॥ १ ॥ अर्घपात्रेति ॥ तत्पार्श्वेशिवपार्श्वे ॥ जलमेवेतिपाठांतरं ॥ १ ॥ अशक्तविषयेमंत्रंकथयति ॥ यथोक्तेति ॥ निर्गु
णंगुणरूपिणमित्यादिनोक्तस्वरूपमित्यर्थः ॥ २ ॥ उपचारान्षोडशोपचारान्पंचोपचारान्वा ॥ पूर्वोक्तेनैवकैलासशिखरस्थंचेत्यादिना ॥ ३ ॥ चतु

यथोक्तरूपिणंदेवंनिर्गुणंगुणरूपिणम् ॥ पंचवक्रंदशभुजंत्रिनेत्रंवृषभध्वजम् ॥ ५७॥ कर्पूरगौरकंदिव्यंचंद्रमौलिंक
पर्दिनम् ॥ व्याघ्रचर्मोत्तरीयंचगजचर्मांबरंशुभम् ॥ ५८ ॥ वासुक्यादिपरीतांगंपिनाकादिविभूषितम् ॥ कपालड
मरुयुक्तंकंठेगरलशोभितम् ॥ ५९ ॥ सिद्धयोऽष्टौचयस्याऽग्रेनृत्यंतीहनिरंतरम् ॥ जयजयेतिशब्दैश्चसेवितंनिजभ
क्तकैः ॥ ६० ॥ तेजसादुःसहेनैवसंबद्धंदेवसेवितम् ॥ शरण्यंसर्वसत्त्वानांप्रसन्नमुखपंकजम् ॥ वेदशास्त्रैर्यथागीतंशि
वमावाहयाम्यहम् ॥ ६१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपूजाविधानवर्णनंनामसप्तविंशोऽध्यायः ॥ २७॥
सूतउवाच ॥ अर्घपात्रजलेनैवसेचयेल्लिंगमुत्तमम् ॥ अथवाचतत्पार्श्वेहिजलेनैवाक्षिपेद्दिति ॥ १ ॥ एवंध्यानेप्यश
क्तोहिसूक्ष्ममंत्रमुदीरयेत् ॥ यथोक्तरूपिणंशंभुंशिवमावाहयाम्यहम् ॥ २ ॥ इत्युक्त्वाउपचारादीन्कल्पयेद्विधिवत्त
दा ॥ पूर्वोक्तेनैवध्यानेनह्यासनंपरिकल्पयेत् ॥ ३ ॥ चतुर्थ्यंतपदेनैवसर्वंकुर्याद्यथाक्रमं ॥ पश्चात्पाद्यंप्रदद्याद्वैशिवा
यपरमात्मने ॥ ४ ॥ ततश्चाचमनंदत्वाशंभवेगुणरूपिणे ॥ पश्चाच्चपंचभिर्द्रव्यैःस्नापयेच्छंकरंमुदा ॥ ५ ॥ वेदमंत्रै
र्यथायोग्यंनामभिर्वास्वमंत्रकैः ॥ चतुर्थ्यंतपदेनैवद्रव्याण्येवार्पयेत्तदा ॥ ६ ॥ दुग्धंदधितथाचाऽन्यद्घृतंमधुचशर्करा ॥
तस्यतस्यचमंत्रेण अर्पयेच्छंकरायवै ॥ ७ ॥ ॥ ॥ ॥

र्थ्यंतेति ॥ शिवायेदमासनमित्येवंप्रकारेणेत्यर्थः ॥ पाद्यंपादोदकं ॥ पाद्यंपादार्थवारिणीत्यमरः ॥ ४ ॥ पंचभिर्वक्ष्यमाणैःक्षीरदध्यादिभिः ॥ ५ ॥ नामभिः
शिवसहस्रनामांतर्गतनामभिरित्यर्थः ॥ ६ ॥ पंचद्रव्याण्याह ॥ दुग्धमिति ॥ मधुक्षौद्रं ॥ मंत्रेणेति ॥ तत्रदुग्धमंत्रश्चाप्यायस्वेत्यादिः ॥ दधिमंत्रोदधिक्रा
व्णइत्यादिः ॥ घृतमंत्रोघृतंमिमिक्षइत्यादिः ॥ मधुमंत्रोमधुवाताऋतायतइत्यादिः ॥ शर्करामंत्रस्तुस्वादुःपवस्वेतिदिवेक्रतुमपिवृंजंतीत्यादिः ॥ ७ ॥

एतदन्यान्यपियान्यभिलषितानितानिद्रव्याण्यर्पणीयानीत्याह ॥ यथाभिलाषमिति ॥ ८ ॥ वारुणंवरुणदेवतामंत्रकंस्नानं ॥ पश्चाच्चंदनमिति ॥ हस्तेहस्तपरिमाणेहस्तपरिमितेदेशेदूरतःस्थित्वेत्यर्थः ॥ ९ ॥ शुभेनेति ॥ शुद्धेनेत्यर्थः ॥ वेदमंत्रैर्ऋगादिमंत्रैः ॥ षडंगैःशिक्षाव्याकरणछंदोनिरुक्तज्योतिषकल्पसूत्रैः॥अथवा परिणोरुद्रस्यहेतिरित्यादिषड्ऋगात्मकरुद्रसूक्तेनेत्यर्थः ॥ रुद्रसंख्ययैकादशसंख्याकैरित्यर्थः ॥ १० ॥ तांजलधारां ॥ ११ ॥ १२ ॥ कामनारूपंकाम्यफल

यथाभिलाषंतद्द्रव्यमर्पयेच्छंकरोपरि ॥ अथवामंत्रमुच्चार्यदेयंजलमनुत्तमम् ॥ ८ ॥ पश्चाच्चवारुणंस्नानंकरणीयंशिवायवै ॥ पश्चाच्चचंदनंदत्वास्वल्पहस्तेविदूरतः ॥ ९ ॥ शुभेनैवजलेनैवजलधारांप्रसिंचयेत् ॥ वेदमंत्रैःषडंगैर्वानामभीरुद्रसंख्यया ॥ १० ॥ यथावकाशंतांदत्वावस्त्रेणामार्जयेत्ततः ॥ तस्मैचमार्जनंदत्वाशिवायपरमात्मने ॥ ११ ॥ पश्चादाचमनीयंचततोवस्त्रंपरात्मने ॥ पश्चाच्चचंदनंदेयंशिवायसुभगायवै ॥ १२ ॥ पश्चाच्चतंडुलान्श्वेतानर्पयेत्परमात्मने ॥ अथवाकामनारूपंयोग्यंधान्यंसमर्पयेत् ॥ १३ ॥ तिलाश्चैवयवावापिगोधूमामाषकास्तथा ॥ अर्पणीयाःशिवायैवमंत्रैर्नानाविधैरपि ॥ १४ ॥ ततःपुष्पाणिदिव्यानिपंचवक्त्रमहात्मने ॥ प्रतिवक्त्रंयथाधान्यंकृत्वापुष्पंसमर्पयेत् ॥ १५ ॥ पश्चान्मंत्रैरनेकैश्चपुष्पाणिविविधानिच ॥ देयानिशंभवेतत्रयथायोग्याभिलाषतः ॥ १६ ॥ कमलैःशतपत्रैश्चशंखपुष्पैस्तथैवच ॥ करवीरभवैश्चैवबिल्वीदलपुरःसरैः ॥ १७ ॥ कुशदूर्वादलैश्चैवधत्तूरकुसुमैस्तथा ॥ तुलसीदलैस्तथादेवंपूजयेत्परयामुदा ॥ १८ ॥ गृहेवास्थापितेलिंगेपूजांवापार्थिवेपुनः ॥ चूर्णंवाविविधंतत्रवासितंतैलमुत्तमम् ॥ १९ ॥ पश्चाद्धूपःप्रकर्तव्योगुग्गुलागुरुभिस्तथा ॥ दीपोदेयस्तथातस्मैशिवायपरमात्मने ॥ २० ॥ अर्घंदद्यात्पुनस्तस्मैमंत्रेणानेनवैतदा ॥ रूपंदेहिजयंदेहिभाग्यंभगवन्देहिमे ॥ २१ ॥ भुक्तिमुक्तिफलंदेहिगृहीत्वाऽर्घ्यंशिवाऽधुना ॥ पश्चाद्देयंशिवायैवनैवेद्यंविविधंतदा ॥ २२ ॥

विहितमित्यर्थः ॥ एतेनशिवपूजाविधेःकाम्यत्वमपिदर्शितं ॥ १३ ॥ काम्यपूजामेवकथयति ॥ तिलाश्चेति ॥ शंखपुष्पैश्चोरपुष्पैर्भाषयासांखवेलेतिप्रसिद्धैः॥ शंखिनीचोरपुष्पीस्यात्केशिनीत्यमरः ॥ १४ ॥ १५ ॥ १६ ॥ कमलैःसहस्रपत्रैः ॥ शतपत्रैः कुशेशयाख्यैः ॥ करवीरभवैरित्यत्रकर्णवीरभवैरितिपाठांतरं ॥ १७ ॥ १८ ॥ चूर्णंसुगंधद्रव्यं ॥ १९ ॥ गुग्गुलःप्रसिद्धः ॥ अगुरुःकृष्णागुरुः ॥ २० ॥ अनेनवक्ष्यमाणेन ॥ अर्घमंत्रश्लोकमाह ॥ रूपमिति ॥ २१ ॥ २२ ॥

आरात्रिकंनीराजनविधिं ॥ मंत्रेणअर्चेतप्रार्चेतेतिमंत्रेण ॥ पंचावर्तिंपंचवर्तियुक्तमित्यर्थः ॥ २३ ॥ २४ ॥ पुनश्चतांबूलमिति ॥ अत्रपुनश्चतांबूलंदद्यादें लायुक्तंमहात्मनइतिपाठांतरं ॥ तत्रैलायुक्तमेलाभाषयाएलदोडाइतिप्रसिद्धातद्युक्तम् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ पुष्पांजलिमंत्रात्मकश्लो कद्वयमाह ॥ अज्ञानादिति ॥ २९ ॥ तावकस्त्वदीयः ॥ ३० ॥ क्षमाप्यअपराधसहस्राणिक्रियंतेऽहर्निशंमया ॥ तानिसर्वाणिमेदेवक्षमस्वपरमेश्वरेतिमंत्रेण क्षमांयाचित्वेत्यर्थः ॥ ३१ ॥ विसृजति ॥ पूजाकालइति ॥ आगंतव्यमिति ॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीम् ॥ इष्टकाम्यार्थसित्ध्यर्थंपुनरागम

ततश्चारात्रिकंकुर्यान्मंत्रेणपरमात्मने ॥ पंचावर्तिंतुमंत्रेणकूलानैराजनंविधिम् ॥ २३ ॥ कुर्याच्चमतिमांस्तत्रसंकल्पं पुनरेवच ॥ कर्तव्यश्चविधिस्तत्रनैराजनइतिक्रमात् ॥ २४ ॥ पुनश्चतांबूलंदद्यात्तस्मैचपरमात्मने ॥ पुनःप्रदक्षिणं तत्रशिवायशिवरूपिणे ॥ २५ ॥ नमस्कारंततःकुर्याच्छंभवेशंकरायच ॥ ततोध्यानंयथोक्तंचकूलामंत्रमुदीरयेत् ॥ यथासंख्यंयथाज्ञानंकुर्यान्मंत्रविधिंनरः ॥ गुरूपदिष्टमार्गेणकूलाजपमनुत्तमम् ॥ २७ ॥ स्तोत्रैर्नानाविधैस्तत्रस्तु वीतवृषभध्वजम् ॥ ततश्चैवतुयत्कार्यंश्रूयतामृषिसत्तमाः ॥ २८ ॥ पुष्पांजलिःप्रदातव्यामंत्रेणाऽनेनवैतदा ॥ अ ज्ञानाद्यदिवाज्ञानाज्जपपूजादिकंमया ॥ २९ ॥ कृतंतदस्तुसफलंकृपयातवशंकर ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदामृड ॥ ३० कृपानिधइतिज्ञात्वाभूतनाथप्रसीदमे ॥ पुष्पांजलिंसमर्प्यैवंक्षमाप्यविधिपूर्वकम् ॥ ३१ ॥ पूजाका लेपुनर्देवत्वयाऽगंतव्यमेवहि ॥ विसर्जयेत्ततस्तंवैयथोक्तरूपिणंशिवम् ॥ ३२ ॥ इतिशिवमहापुराणेज्ञानसंहिता यांपूजाविधिवर्णनंनामाऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ऋषयऊचुः ॥ व्यासशिष्यमहाभागकथयत्वंप्रमा णतः ॥ केनवैपूजितःशंभुःकिंकिंयच्छतिवैफलम् ॥ १ ॥ ॥ ॥

नायचेत्यनेनमंत्रेणविसर्जनंकुर्यादितिभावः ॥ ३२ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपूजाविधिवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॐनमःशिवाय ॥ धान्यादिपरिमाणेनशिवपूजाचतत्फलम् ॥ एकोनत्रिंशकेऽध्यायेकथ्यतेऽस्मिन्नभीप्सितम् ॥ १ ॥ व्यासशिष्येति ॥ प्रमाणतःपरिमा णतःसप्रमाणंवायाथातथ्येनवेत्यर्थः ॥ केनसाधनेनपूजितःशंभुःकिंफलंददातीतिपृच्छति ॥ केनेति ॥ १ ॥ ॥ ॥

कमलैःसहस्रपत्रैः ॥ सहपत्रंकमलमित्यमरः ॥ शतपत्रैःकुशेशयाख्यैःपद्मैः ॥ शतपत्रंकुशेशयमित्यमरः ॥ २ ॥ तत्तत्पूजाफलंवक्तुंतत्तत्पुष्पाणितत्तत्पुष्पसंख्यापरिच्छेदादीनिचकथयति ॥ शंखपुष्पैरित्यादिना ॥ शंखपुष्पैःपूर्वोक्तैः ॥ ३ ॥ पारिभाषितपरिमाणमाह ॥ विंशतिरिति ॥ प्रस्थसंज्ञकंपरिमाणं ॥ एवमग्रेपिबोध्यं ॥ पुरातनैःप्राचीनैरुदाहृतमित्यनुषंगः ॥ ४ ॥ प्रस्थमानमाह ॥ पलैरिति ॥ पलमानमाह ॥ पलमिति ॥ टंकदशटंकदशक मित्यर्थः ॥ अमरस्तुगुंजाःपंचाद्यमाषकः ॥ तेषोडशाक्षःकर्षोस्त्रीपलंकर्षचतुष्टयमित्युक्तवान् ॥ ५ ॥ पार्थिवानांलिंगानां ॥ ६ ॥ प्रतिशिवंप्रत्ये

सूतउवाच ॥ सर्वेवैकथयाम्यद्यश्रूयतामृषिसत्तमाः ॥ कमलैर्बिल्वपत्रैश्चशतपत्रैस्तथापुनः ॥ २ ॥ शंखपुष्पैस्तथा देवंलक्ष्मीकामोभवेद्यदा ॥ एतैश्चलक्षसंख्याकैर्लक्ष्मीःस्यान्नात्रसंशयः ॥ ३ ॥ विंशतिःकमलानांतुप्रस्थमेकमुदाहृतम् ॥ बिल्वीदलसहस्रेणप्रस्थमेकंपुरातनैः ॥ ४ ॥ शतपत्रसहस्रेणप्रस्थार्द्धंपरिभाषितम् ॥ पलैःषोडशभिःप्रस्थं पलंटंकदशस्मृतम् ॥ ५ ॥ अनेनैवतुमानेनतुलामारोपयेद्यदा ॥ राज्यस्यकामुकोयोवैपार्थिवानांचपूजया ॥ ६ ॥ तोषयेच्छंकरंदेवंदशकोट्यामुनीश्वराः ॥ प्रतिशिवंतथापुष्पमखंडितदलंतथा ॥ ७ ॥ चर्चितंचंदनेनैवजलधारांतथा पुनः ॥ प्रतिरूपंतथामंत्रंबिल्वीदलमनुत्तमम् ॥ ८ ॥ अथवाशतपत्रंचकमलंवातथापुनः ॥ शंखपुष्पंतथाप्रोक्तंविशेषेणपुरातनैः ॥ ९ ॥ धूपंदीपंचनैवेद्यमर्घमारात्रिकंतथा ॥ प्रदक्षिणांनमस्कारंक्षमापनविसर्जनम् ॥ १० ॥ कृत्वासांगंतथाभोज्यंकर्तव्यंयेनभवेदिह ॥ तस्यवैसर्वथाराज्यंशंकरोलोकशंकरः ॥ ११ ॥ प्राधान्यकामुकोयोवैतदर्द्धेनाऽर्चयेत्पुमान् ॥ कारागृहगतोयोवैलक्षेणैवार्चयेद्धरम् ॥ १२ ॥ रोगग्रस्तोयदास्याद्वैतदर्द्धेनार्चयेच्छिवम् ॥ कन्याकामोभवेद्योवैतदर्द्धेनशिवंपुनः ॥ १३ ॥ विद्याकामस्तथायःस्यात्तदर्धेनशिवंतथा ॥ शत्रूणांसंकटेजातेह्ययुतेनशिवंतथा ॥ १४ ॥ उच्चाटनार्थंशत्रूणांतथैवपूजनंहरे ॥ मारणेचतुर्लक्षेणमोहनेतुतदर्द्धकम् ॥ १५ ॥ ॥

कंपार्थिवप्रतिमायां ॥ ७ ॥ चर्चितंलिप्तं ॥ प्रतिरूपंप्रतिलिंगं ॥ ८ ॥ ९ ॥ १० ॥ कृत्वेति ॥ भोज्यंभोजनंराज्यंददातीतिशेषः ॥ ११ ॥ प्राधान्यकामुकोऽमात्यकामइत्यर्थः ॥ तदर्धेनपंचकोट्येत्यर्थः ॥ कारागृहगतोबंधनालयगतः ॥ कारास्याद्बंधनालयइत्यमरः ॥ १२ ॥ तदर्द्धेनपंचाशत्सहस्रपरिमितेनेत्यर्थः ॥ १३ ॥ कन्याकामस्तुपंचविंशतिसहस्रेण ॥ १४ ॥ अयुतेनदशसहस्रेण ॥ उच्चाटनार्थमिति ॥ निर्वासयेत्यर्थः ॥ हरइत्यत्रहरेरितिपाठांतरं ॥ १५

सामंतेति ॥ सामंतानामधीश्वराणांविजयेजये ॥ सामंतःस्यादधीश्वरइत्यमरः ॥ १६ ॥ वाहनाप्त्यैहस्त्यश्वशिबिकादिवाहनप्राप्तये ॥ पूज्यःसंपूज्यः ॥ १७ ॥ १८ ॥ पुष्पपूजनफलमुक्त्वाजपफलमाह ॥ तथेत्यादिना ॥ मृत्युंजयोमृत्युंजयमंत्रश्चपूर्वंसूक्तएव ॥ कामनाफलरूपतस्तत्तत्काम्यफलमनुसृत्येत्यर्थः ॥ १९ ॥ जपसंख्याफलमाह ॥ पंचलक्षइति ॥ पंचलक्षसंख्यापरिमितोजपइत्यर्थः ॥ ताद्धितार्थेत्यादिनाद्विगुः ॥ प्रत्यक्षंप्राप्नोतीतिशेषः ॥ प्रत्यक्षविषयोभवतीतिभावः ॥ तदेवक्रमेणकथयति ॥ लक्षेणेति ॥ द्वितीयेलक्षइत्यर्थः ॥ जातिसंस्मरःजन्मस्मर्त्ता ॥ एवमग्रेपि ॥ २० ॥ काम

सामंतविजयेचैवकोटिपूजाप्रशस्यते ॥ वशीकरणेतथाराज्ञामयुतंचप्रशस्यते ॥ १६ ॥ यशसेचतथातत्रपूजयेच्छंकरंमुदा ॥ वाहनाप्त्यैतथापूज्यःसहस्रेणशिवस्तथा ॥ १७ ॥ मुक्तिकामोभवेद्योवैपंचकोट्याशिवंनरः ॥ ज्ञानार्थीचतदादेवंकोट्यावैपूजयेच्छिवम् ॥ १८ ॥ शिवदर्शनकामोवैतदर्धेनप्रपूजयेत् ॥ तथामृत्युंजयोजाप्यःकामनाफलरूपतः ॥ १९ ॥ पंचलक्षोयदाजातःप्रत्यक्षंतुसदाशिवः ॥ लक्षेणदेहशुद्धिःस्याद्द्वितीयेजातिसंस्मरः ॥ २० ॥ तृतीयेकामनाज्ञानंचतुर्थेस्वप्नदर्शनम् ॥ पंचमेतुशिवःसाक्षादाविर्भवतिचाग्रतः ॥ २१ ॥ अनेनैवतुमंत्रेणदशलक्षेफलंभवेत् ॥ मुक्तिकामोभवेद्योवैदर्भैश्चपूजनंचरेत् ॥ २२ ॥ लक्षसंख्यातुसर्वत्रज्ञातव्याऋषिसत्तमाः ॥ आयुष्कामोभवेद्योवैदूर्वाभिःपूजनंचरेत् ॥ २३ ॥ पुत्रकामोभवेद्योवैधत्तूरकुसुमैर्नरः ॥ रक्तदंडश्चधत्तूरःपूजनेशुभदःस्मृतः ॥ २४ ॥ अगस्त्यकुसुमैर्यश्चतस्यवैविपुलंयशः ॥ भुक्तिमुक्तिफलंतस्यतुलसीपूजनंचरेत् ॥ २५ ॥ अर्कपुष्पैःप्रतापैश्चकुब्जकल्हारकैस्तथा ॥ जपाकुसुमपूजातुशत्रूणांमृत्युदास्मृता ॥ २६ ॥ ॥ ॥

नाज्ञानमित्यत्रकामलाज्ञानमितिपाठांतरम् ॥ तत्रकामलाज्ञानंकामलातदाख्योनेत्रदोषविशेषस्तस्याज्ञानंभवति ॥ पंचमइति ॥ अत्रपंचमंचयदालक्षंफलंयच्छत्यसंशयइतिपाठांतरम् ॥ तत्रफलंप्रत्यक्षात्मकंयच्छतिददातीत्यर्थः ॥ २१ ॥ अनेनेति ॥ पूर्वोक्तेनमृत्युंजयेनेत्यर्थः ॥ इदानींपूजासाधनसामग्रीपूजनफलमाह ॥ मुक्तिकामइत्यादिना ॥ २२ ॥ २३ ॥ धत्तूरकुसुमैःकनकाव्हयनामकपुष्पैः ॥ उन्मत्तःकितवोधूर्तोधत्तूरःकनकाव्हयइत्यमरः ॥ सचकीदृशोधत्तूरःपूजोपयोगीतितदाह ॥ रक्तदंडइति ॥ २४ ॥ २५ ॥ कुब्जकल्हारकैरिति ॥ कुब्जानिपुष्पविशेषाः ॥ कल्हारकाणिचप्रासिद्धानि ॥ २६ ॥

करवीराणिभाषयाकण्हेरइतिप्रसिद्धानि ॥ प्रतिहासशतप्रासचंडातहयमारकाः ॥ करवीरइत्यमरः ॥ रोगोच्चाटनकानिरोगनाशकानीत्यर्थः ॥ बंधूकैर्बंधुजीवकपुष्पैर्भाषयादुपारीइतिख्यातैः ॥ रक्तकस्तुबंधूकोबंधुजीवकइत्यमरः ॥ जात्या जाईतिभाषयाप्रसिद्धेनपुष्पेण ॥ २७ ॥ इयात्प्राप्नुयात् ॥ २८ ॥ देवस्त्रियंशुभतरींसुंदरांसाध्वींचयच्छतीतिशेषः ॥ यूथिकाकुसुमैःस्वर्णयूथीकुसुमैः ॥ कुब्जकैःस्वर्णयूथीभिर्नागपुन्नागजातिभिरितिश्रीमद्भागवतोक्तेः ॥ सस्यंधान्यादिकंकर्तृगृहंनविमुंचतिनत्यजतीत्यर्थः ॥ गृहंसस्यपूर्णंभवतीतिभावः ॥ २९ ॥ कर्णिकारैःपांगाराइतिभाषयाप्रसिद्धैः ॥ अथद्रुमोत्पलः ॥ कर्णिकारःपरिव्याधइत्यमरः ॥ निर्गुंडीकुसुमैरिंद्राणिकापुष्पैर्भाषयानिगडीतिख्यातैः ॥ सिंदुवारेंद्रसुरसौनिर्गुंडींद्राणिकेत्यपीत्यमरः ॥ ३० ॥ यद्येतादृशानिपूर्वो

रोगोच्चाटनकानीहकरवीराणिवैक्रमात् ॥ बंधूकैर्भूषणावाप्तिर्जात्यावाहनसंभवः ॥ २७ ॥ अतसीपुष्पकैर्देवोविष्णुर्वल्लभतामियात् ॥ शमीपत्रैस्तथामुक्तिःप्राप्यतेपुरुषेणच ॥ २८ ॥ मल्लिकाकुसुमैर्देवःस्त्रियंशुभतरांशिवः ॥ यूथिकाकुसुमैःसस्यंगृहंनैवविमुंचति ॥ २९ ॥ कर्णिकारैस्तथावस्त्रसंपत्तिर्जायतेनृणां ॥ निर्गुंडीकुसुमैर्लोकेमनोनिर्मलतांव्रजेत् ॥ ३० ॥ तत्कुसुमंनविद्येतयच्चैवशिववल्लभम् ॥ चंपकंकेतकंहित्वाअन्यत्सर्वंशिवेऽर्पयेत् ॥ ३१ ॥ एतत्तेकथयिष्यामिकारणंदुष्करंनृणाम् ॥ यदालक्षंशिवेदद्यात्तदाचविपुलंफलम् ॥ ३२ ॥ पुष्पाणितिलजातानिमुक्तिदानिनसंशयः ॥ राजिकाकुसुमानीहशत्रूणांमृत्युदानिच ॥ ३३ ॥ अतःपरंचधान्यानांफलंशृणुतसत्तमाः ॥ तंडुलारोपणेनृणांलक्ष्मीवृद्धिःप्रजायते ॥ ३४ ॥ प्रस्थानांषट्केनैवतदर्धेनतथापुनः ॥ पलद्वयंतथातत्रलक्षमानमुदाहृतम् ॥ ॥ ३५ ॥ पूजांरुद्रविधानेनकृत्वावस्त्रंचसुंदरम् ॥ शिवोपरिन्यसेत्तत्रतंडुलार्पणमुत्तमम् ॥ ३६ ॥ ॥

क्तानिशिवप्रियाणिचपुष्पाणिनमिलिष्यंतितदाचंपकंकेतकंचविहायान्यत्सर्वंपुष्पंशिवायसमर्पयेदित्याह ॥ तत्कुसुममिति ॥ ३१ ॥ पुष्पपरिमाणफलमाह ॥ यदालक्षमिति ॥ लक्षमित्यत्रलक्ष्यमितिपाठांतरम् ॥ ३२ ॥ तिलजातानितिलाःक्षुरकाख्यवृक्षविशेषास्तज्जातानि ॥ तिलकःक्षुरकःश्रीमानित्यमरः ॥ राजिकाकुसुमानि ॥ कृष्णिकाख्यानिपुष्पाणि ॥ राजिकाकृष्णिकासुरीत्यमरः ॥ ३३ ॥ पुष्पसाधनकपूजाफलमुक्त्वाधान्यपूजाफलम् ॥ तंडुलतिलादिधान्यपरिमाणंचाह ॥ अतःपरमित्यादिना ॥ तंडुलारोपणेतंडुलसमर्पणेसति ॥ ३४ ॥ ३५ ॥ प्रस्थानामिति ॥ रुद्रविधानेनअथातःपंचांगरुद्राणांन्यासपूर्वकंजपहोमार्चनविधिमित्यादिबौधायनसूत्रोक्तविधिनेत्यर्थः ॥ ३६ ॥ ॥ ॥ ॥

श्रीफलंबिल्वफले ॥ विल्वेशांडिल्यशैलूषौमालूरश्रीफलावपीत्यमरः ॥ ३७ ॥ प्राजापत्यद्वयंप्राजापत्यद्वयपरिमितद्रव्येणेत्यर्थः ॥ ब्राह्मणान्विंशतिसंख्याक
ब्राह्मणान्भोजयेदित्यर्थः ॥ तत्रैकप्राजापत्यप्रत्याम्नायश्चसपादरूपकषट्कपरिमितंद्रव्यम् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ यवपूजा ॥ यवोधान्यविशेषः
सचदीर्घशूकविशेषः ॥ यत्रान्याओषधयोम्लायंते ॥ अथैतेमोदमानाइवावतिष्ठंतेइतिवाक्यात् ॥ वसंतेसर्वसस्यानांजायतेपत्रशातनम् ॥ मोदमानाश्चतिष्ठं
तियवाःकणशशालिनइतिवाक्यशेषाच्च ॥ यवपूजेत्यत्रपर्वपूजेतिपाठांतरम् ॥ ४२ ॥ ४३ ॥ प्राजापत्यमिति ॥ प्राजापत्यंपूर्वोक्ततत्परिमितद्रव्यंब्राह्म

उपरिश्रीफलंलेकंगंधपुष्पादिभिस्तथा ॥ रोपयित्वाचधूपादिकृत्वापूजाफलंलभेत् ॥ ३७ ॥ प्राजापत्यद्वयंतत्रब्रा
ह्मणान्भोजयेत्ततः ॥ लक्षपूजातथाजातासांगाचमंत्रपूर्वकम् ॥ ३८ ॥ शतमष्टोत्तरंतत्रमंत्रैर्विधिरुदाहृतः ॥ तिलानां
चतथालक्षंमहापातकनाशनम् ॥ ३९ ॥ एकादशपलैरेवलक्षमानमुदाहृतम् ॥ पूर्ववत्पूजनंतत्रकर्तव्यंहितकाम्य
या ॥ ४० ॥ पूज्यास्तुब्राह्मणास्तस्मादत्रकार्यानरेणह ॥ महापातकजंदुःखंनश्यतितत्क्षणाद्ध्रुवम् ॥ ४१ ॥ यव
पूजातथाप्रोक्तालक्षेणपरमाशिवे ॥ प्रस्थानामष्टकंचैवप्रस्थार्धसंयुतंपुनः ॥ ४२ ॥ पलद्वययुतंतच्चमानमेतत्पुरात
नम् ॥ यवपूजातथाप्रोक्तास्वर्गैसुखविवर्द्धिनी ॥ ४३ ॥ प्राजापत्यंब्राह्मणानांकर्तव्यंफलमीप्सुना ॥ गोधूमानांत
थापूजाप्रशस्ताऋषिसत्तमाः ॥ ४४ ॥ संततिंवर्द्धयेत्सापियदिलक्षावधिक्रमात् ॥ द्रोणार्धेनभवेल्लक्षंविधानंविधिपू
र्वकम् ॥ ४५ ॥ पुनश्चब्राह्मणानांहिप्राजापत्यंभवेदिह ॥ मुद्गानांपूजनादेवशिवोयच्छतिवैसुखम् ॥ ४६ ॥ प्रस्था
नांसप्तकेनैवप्रस्थार्धेनाऽथवापुनः ॥ पलद्वययुतेनैवलक्षमेकंविदुर्बुधाः ॥ ४७ ॥ माषाणांचतथापूजारोगनाशकरी
तथा ॥ प्रस्थानामष्ठकेनैवप्रस्थार्द्धेनाऽथवापुनः ॥ ४८ ॥ ॥ ॥

णानांकर्तव्यंभोजनार्थमर्पणीयमित्यर्थः ॥ अथवाप्राजापत्यपरिमितद्रव्येणभोजनंकारयेदितियावत् ॥ ४४ ॥ द्रोणार्द्धेनद्रोणश्चतुराढकः ॥ द्रोणःस्याच्चतु
राढकइत्युक्तेः ॥ तत्राढकश्चचतुःप्रस्थात्मकः ॥ प्रस्थस्तुकुडवचतुष्टयात्मकोभाषयाशेरइतिप्रसिद्धोवेदितव्यः ॥ ४५ ॥ ४६ ॥ लक्षमिति ॥ परिभाष
यालक्षपरिमाणम् ॥ एवंसर्वत्रविज्ञेयम् ॥ ४७ ॥ प्रस्थानामिति ॥ अथवेतिविकल्पोऽशक्तविषयइतिज्ञेयम् ॥ ४८ ॥ ॥

रुद्रसंख्यावधिएकादशसंख्यायुतम् ॥ अथवायत्संख्याकोरुद्रजपस्तत्संख्यायुतमित्यर्थः ॥ ४९ ॥ प्रियंगुर्धान्यविशेषः ॥ सर्वाध्यक्षेसर्वसाक्षिणिपरात्मनिप्रत्यगात्मनि ॥ ५० ॥ अर्काणांसंख्ययाद्वादशसंख्ययेत्यर्थः ॥ मुनेरितिपाठेसप्तसंख्ययेतिकल्पांतरमितिद्रष्टव्यम् ॥ ५१ ॥ राजिकेति ॥ राजिकाधान्यविशेषस्तयापूजनम् ॥ ५२ ॥ ५३ ॥ बलीवर्दोवृषभः ॥ ५४ ॥ मरीचिर्मिरेइतिभाषयाप्रसिद्धस्तत्संभवातत्साधनिकापूजेत्यर्थः ॥ इतोप्यधिकंधान्यपूजनंवक्ष्यामी

प्रस्थानांसप्तकेनैवलक्षमुक्तंपुरातनैः ॥ ब्राह्मणानांतथाभोज्यंरुद्रसंख्यावधिस्मृतम् ॥ ४९ ॥ प्रियंगुपूजनंदेवेसर्वाध्यक्षेपरात्मनि ॥ धर्मार्थवर्धनायैवपूजासर्वसुखाहा ॥ ५० ॥ प्रस्थमेकंचयत्प्रोक्तंलक्षमेकंपुरातनैः ॥ ब्रह्मभोज्यंतथाप्रोक्तमर्काणांसंख्ययामुने ॥ ५१ ॥ राजिकापूजनंतस्यशत्रोर्मृतिकरंस्मृतम् ॥ प्रस्थेनपलयुक्तेनलक्षमेकंतथास्मृतम् ॥ ५२ ॥ सर्षपाणांतथालक्षंपलैर्विंशतिसंख्यया ॥ तेषांचपूजनादेवशत्रोर्मृतिरुदाहृता ॥ ५३ ॥ विप्राणांभोजनंतत्रशतमेकोत्तरंस्मृतम् ॥ एकागौश्चप्रदातव्याबलिवर्दस्तथैवच ॥ ५४ ॥ मरीचिसंभवापूजाशत्रोर्नाशकरीस्मृता ॥ अतोऽपिविविधैर्धान्यैःपूजनंशंकरस्यच ॥ ५५ ॥ आढकीनांदलैश्चैवरंजयित्वार्चयेच्छिवम् ॥ नानासुखकरीपूजाह्येषाचऋषिसत्तमाः ॥ ५६ ॥ इत्येतद्वचनंश्रुत्वापुनरूचुर्ऋषीश्वराः ॥ लक्षमानंतुपुष्पाणांवदत्वंहिहितावहम् ॥ ५७ ॥ इतिश्रुत्वावचस्तेषांपुनर्वचनमाददे ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथयामिकथामिति ॥ ५८ ॥ प्रस्थमानंतुलक्षाणांशंखीपुष्पसमुद्भवम् ॥ लक्षंप्रोक्तंतुव्यासेनसूक्ष्ममानदिदृक्षुणा ॥ ५९ ॥ एकादशभिस्तथाप्रस्थैर्जातिमानमुदाहृतम् ॥ यूथिक्याश्चतथामानंराजिकायास्तदर्धकम् ॥ ६० ॥ प्रस्थैर्विंशतिकैश्चैवमल्लिकामानमुत्तमम् ॥ तिलपुष्पेतथामानंप्रस्थन्यूनंतथैवच ॥ ६१ ॥ ततश्चद्विगुणंमानंकरवीरभवेस्मृतम् ॥ निर्गुंडीकुसुमेमानंतथैवकथितंबुधैः ॥ ६२ ॥ ॥ ॥ ॥ ॥

त्याह ॥ अतइति ॥ ५५ ॥ आढकीति ॥ आढकीनांतुवरिकानां ॥ अथाढकी ॥ काक्षीमृत्स्नातुवरिकेत्यमरः ॥ आठकीनामितिपाठांतरम् ॥ ५६ ॥ किमूचुरितितदाह ॥ लक्षमानमिति ॥ लक्षपरिमाणमित्यर्थः ॥ वदत्रूहि ॥ ५७ ॥ कथामितीत्यत्रयथामतीतिपाठांतरम् ॥ तत्रयथामतीतिस्वाहंकारखंडनार्थम् ॥ ५८ ॥ सूक्ष्ममानदिदृक्षुणासूक्ष्मपरिमाणज्ञेनेत्यर्थः ॥ एतेनव्यासस्यसर्वज्ञत्वंकथितम् ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ॥

बंधुजीवोबंधूकाख्यःपुष्पविशेषःपूर्वोक्तस्तस्मिन् ॥ ६३ ॥ ६४ ॥ यस्येति ॥ धारापूजाख्यानस्येत्यर्थः ॥ ६५ ॥ पश्चादिति ॥ तदनंतरमित्यर्थः ॥ हे मुनीश्वराः ॥ ६६ ॥ ज्वरप्रतापोज्वरदाहस्तस्यशांत्यर्थंनाशायेत्यर्थः ॥ शतरुद्रीयमंत्रेणेति ॥ त्वमग्नेरुद्रोअसुरोमहोदिवइतिमंत्रेणेत्यर्थः ॥ त्वमग्नेरुद्रइति शतरुद्रीयस्यरूपमितिश्रुतेः ॥ एकादशेनेति ॥ नमस्तेरुद्रेत्याद्येकादशानुवाकात्मकेनेत्यर्थः ॥ षडंगेनेति ॥ परिणोरुद्रस्यहेतिरित्यादिषड्ऋगात्मकेन रुद्रसूक्तेनेत्यर्थः ॥ ६७ ॥ मृत्युंजयेनेति ॥ मृत्युंजयमंत्रस्तुपूर्वमेवोक्तः ॥ ६८ ॥ गायत्र्येति ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदया

कर्णिकारेतथामानंशिरीषकुसुमेपुनः ॥ बंधुजीवेतथामानंप्रस्थानांदशकेनच ॥ ६३ ॥ इत्यादिविविधैर्मानैर्दृष्ट्वाचपूजनंचरेत् ॥ सर्वकामसमृद्ध्यर्थंपूजयेत्परमेश्वरम् ॥ ६४ ॥ अतःपरंप्रवक्ष्यामिधारापूजाफलंह्यहम् ॥ यस्यश्रवणमात्रेणकल्याणंजायतेनृणाम् ॥ ६५ ॥ विधानपूर्वकंपूजांकृत्वाचैवशिवस्यच ॥ पश्चाच्चजलधाराहिकर्तव्याश्चमुनीश्वराः ॥ ६६ ॥ ज्वरप्रतापशांत्यर्थंजलधाराशुभावहा ॥ शतरुद्रीयमंत्रेणरुद्रमेकादशेनतु ॥ ६७ ॥ रुद्रजाप्येनवातत्रपुरुषसूक्तेनवापुनः ॥ षडंगेनाथवातत्रसहमृत्युंजयेनच ॥ ६८ ॥ गायत्र्याप्यथवाविप्रानामभिर्वाविशेषकैः ॥ अथवाप्यागमोक्तैर्वाजलधारादिकंतथा ॥ ६९ ॥ सुखसंतानवृद्ध्यर्थंधारापूजनमुत्तमम् ॥ घृतधाराशिवेकार्यायावन्मंत्रसहस्रकम् ॥ ७० ॥ तदावंशस्यविस्तारोजायतेनात्रसंशयः ॥ एवमयुतमंत्रेणकार्यैवैशिवपूजनम् ॥ ७१ ॥ प्रमेहरोगशांत्यर्थंप्राप्नुयाच्चमनेप्सितम् ॥ पंडत्वंचयदायातस्तदाघृतसुपूजनम् ॥ ७२ ॥ ब्रह्मभोज्यंतदाप्रोक्तंप्राजापत्यंमुनीश्वरैः ॥ केवलंदुग्धधाराचतदाकार्याविशेषतः ॥ ७३ ॥ ॥ ॥ ॥

दितिरुद्रगायत्र्येत्यर्थः ॥ विशेषकैर्नामभीरुद्रसहस्रनामभिः ॥ हेविप्राः ॥ आगमोक्तैःशैवपाशुपताद्यागमोक्तैर्मंत्रैः ॥ ६९ ॥ ७० ॥ ७१ ॥ प्रमेहरोग शांत्यर्थंप्रमेहोमेहाख्योवैद्यशास्त्रप्रसिद्धःसचासौरोगश्चप्रमेहरोगस्तस्यशांत्यर्थं ॥ मनेप्सितंमनसेप्सितमपेक्षितमभीष्टमित्यर्थः ॥ मनेप्सितमित्यार्षोयंप्रयोगः ॥ मनईप्सितामित्येवदर्शनात् ॥ पंडत्वमिति ॥ पंडत्वंनपुंसकत्वंयातःप्राप्तः ॥ तृतीयाप्रकृतिःषंढःक्लीबःपंडोनपुंसकइत्यमरः ॥ ७२ ॥ ब्रह्मब्राह्मणाः ॥ जातावेकवचनम् ॥ भोज्यंभोजनीयाः ॥ अथवाब्रह्मभोज्यंब्राह्मणभोजनमित्यर्थः ॥ ७३ ॥ ॥ ॥

शर्करेति ॥ यदाबुद्धिर्जडामंदाभवेत्तदाशर्करामिश्रितादुग्धधाराकार्येतिसंबंधः ॥ केनापीति ॥ कृत्रिमंक्रियानिर्वृत्तंपरिकीलितमभिचारादिकमित्यर्थः ॥ ॥ ७४ ॥ यदेति ॥ उच्चाटनंचांतःकरणशरीरयोरनवस्थाऽबलंच ॥ कारणंविनाऽकस्मादित्यर्थः ॥ ७५ ॥ अप्रेमाऽस्नेहः ॥ ७६ ॥ तस्यामिति ॥ शर्करा मिश्रितदुग्धधारायामित्यर्थः ॥ विलीयतेनश्यति ॥ ७७ ॥ वासितेनसुगंधद्रव्यादिनासुवासितेनतैलेन ॥ सार्षपेनसर्षपजन्येन ॥ ७८ ॥ यक्ष्मराजोयक्ष्माख्यमहा रोगः ॥ यक्षराजइतिपाठेमहायक्षोगच्छेदपगच्छेत् ॥ ७९ ॥ ८० ॥ ८१ ॥ अपृष्टकथनशंकानिवृत्तिपूर्वकमुपसंहरति ॥ एतादिति ॥ ८२ ॥ सक

शर्करामिश्रितातत्रयदाबुद्धिर्जडाभवेत् ॥ केनापिकृत्रिमंचेद्वैशरीरेपरिकीलितम् ॥ ७४ ॥ यावन्मंत्रायुतंस्याद्वैताव द्धाराप्रपूजनम् ॥ यदाचोच्चाटनंदेहेजायतेकारणंविना ॥ ७५ ॥ यत्रकुत्रापिचाऽप्रेमदुःखंचपरिवर्द्धते ॥ स्वगृहेकल होनित्यंयदाचैवप्रजायते ॥ ७६ ॥ तस्यांचैवकृतायांवैसर्वदुःखंविलीयते ॥ शत्रूणांतापनार्थंवैतैलधाराशिवायवै ॥ ॥ ७७ ॥ वासितेनैवतैलेनभोगवृद्धिःप्रजायते ॥ सार्षपेनचतैलेनशत्रुनाशोभवेदिह ॥ ७८ ॥ मधुनायक्ष्मराजोवै गच्छेद्वैशिवपूजनात् ॥ इक्षुरसस्यवैधारासर्वदुःखहरीमता ॥ ७९ ॥ गंगाजलसमुद्भूताधारामोक्षफलप्रदा ॥ एताः सर्वाश्चयाःप्रोक्तामृत्युंजयशुभावहाः ॥८०॥ अयुतेनकृतास्तास्तुकृत्वाचैवविधानकम् ॥ कर्तव्यंब्राह्मणानांतुभोज्यंच रुद्रसंख्यया ॥ ८१ ॥ तदावैसफलंसर्वंभवेच्चैवनचाऽन्यथा ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहंमुनीश्वराः ॥ ८२ ॥ एवं पूजाविधिंकृत्वासर्वपापैःप्रमुच्यते ॥ एतद्वैसकलंलोकेसर्वकामहितायवै ॥ ८३ ॥ स्कंदोमासहितंलोकेसंपूज्यविधि नासकृत् ॥ यत्फलंलभतेमर्त्यस्तद्वदामियथाक्रमम् ॥ ८४ ॥ अत्रसंभोगजातंवैभुक्त्वापुत्रादिकंशुभम् ॥ अंतेचजा यतेयच्चश्रूयतामृषिसत्तमाः ॥ ८५ ॥ ॥ ॥ ॥ ॥

लंपूर्वोक्तंसर्वंपूजनमित्यर्थः ॥ सफलमितिपाठांतरम् ॥ ८३ ॥ स्कंदेति ॥ स्कंदोमासहितम् ॥ स्कंदःकार्तिकेयउमापार्वतीताभ्यांसहितंशिवमित्यर्थः ॥ मर्त्योमनुष्यः ॥ तद्वदामीति ॥ ऐहिकामुष्मिकफलंवदामीतिभावः ॥ ८४ ॥ अत्रेति ॥ अत्रत्यंभोगसारंवेतिपाठांतरम् ॥ तत्रपाठेर्थश्चात्रत्यमैहिकंभो गसारमुत्कृष्टसुखम् ॥ अंतेमरणकालइत्यर्थः ॥ अंतोनाशोद्वयोर्मृत्युर्मरणंनिधनोऽस्त्रियामित्यमरः ॥ ८५ ॥ ॥

सूर्यकोटिप्रतीकाशैः सूर्याणांकोटिः कोटिसंख्याकसूर्यास्तत्प्रतीकाशैस्तत्सदृशैः प्रकाशमानतया ॥ निभसंकाशनीकाशप्रतीकाशोपमादयइत्यमरः ॥ रुद्र कन्यासमाकीर्णैरुद्रस्यैकादशरुद्रगणस्यकन्याः कुमार्यस्ताभिर्युतैः ॥ अथवारुद्रएवरुद्रकस्तस्याविषयेन्यासश्चित्तवृत्तिनिरोधस्तान्निष्ठमनस्कत्वंवाऽऽकीर्णैः प्रा तैरित्यर्थः ॥ तथागेयानिगातुंयोग्यानियानिवाद्यानितैः समन्वितैरितिविमानविशेषणम् ॥ भोगीसुखीसन्नित्यर्थः ॥ आभूतसंप्लवंभूतानांप्राणिनांसंप्लवो नाशोयत्रतदवधिमहाप्रलयपर्यंतमित्यर्थः ॥ ८६ ॥ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांपूजाविधिवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॐनमःशिवाय ॥ केतकीजानकीशापान्निषिद्धाशिवपूजने ॥ यत्रतद्रामचरितंत्रिंशेऽध्यायेत्रवर्ण्यते ॥ १ ॥ शौनकादयः सूतंस्तुवंति ॥ धन्यइति

सूर्यकोटिप्रतीशैर्विमानैः सर्वकामिकैः ॥ रुद्रकन्यासमाकीर्णैर्गेयवाद्यसमन्वितैः ॥ शिववत्क्रीडतेभोगीयावदाभूतसंप्लवम् ॥ ८६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपूजाविधिवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ऋषयऊचुः ॥ धन्योऽसिकृतकृत्योऽसिमहापुण्योसिवैपुनः ॥ त्वयाचकथितंसर्वंमाहात्म्यंशंकरस्यच ॥ १ ॥ तत्रैवंकथितंयच्चचंपकंकेतकंतथा ॥ नयोग्यंचशिवायैवकिंत्वत्रकारणंवद ॥ २ ॥ सूतउवाच ॥ श्रूयतामृषयः श्रेष्ठाः कारणंकथयामिच ॥ कदाचिद्राघवोयातः फल्गुतीरेसलक्ष्मणः ॥ ३ ॥ सीतयासहितस्तत्रतस्थौपित्राज्ञयाध्रुवम् ॥ श्राद्धकालंकदाचिद्वैज्ञात्वाद्यकरवामकिम् ॥ ४ ॥ ग्रामेचप्रेषयामाससलक्ष्मणंसस्यकाम्यया ॥ किंचिद्रेकादिकंगृह्यलज्जितोगतवांस्तदा ॥ ५ ॥ ॥ ॥ ॥ ॥

॥ १ ॥ पूर्वोक्तंस्मृत्वातत्रकारणंपृच्छंति ॥ तत्रेति ॥ २ ॥ शिवपूजायांकर्तव्यायांचंपककेतक्योस्त्यागऐतिहासिकंकारणमाह ॥ कदाचिदिति ॥ राघवोरामः फल्गुतीरेफल्ग्वाख्यनदीतीरे ॥ सलक्ष्मणोलक्ष्मणाख्यभ्रातृसहितः ॥ ३ ॥ पित्राज्ञयादशरथाज्ञयातस्थौस्थितवान् ॥ श्राद्धेति ॥ ज्ञात्वास्मृत्वा ॥ अद्येति ॥ अद्यवयंकिंकरवामेतिमनसाविचारंकृतवानित्यर्थः ॥ ४ ॥ सस्यकाम्ययाफलधान्याद्यानयनेच्छयाश्राद्धार्थं ॥ रसकाम्ययेतिपाठांतरम् ॥ किंचिदिति ॥ तदालक्ष्मणोरेकादिकंरेकः संशयः श्राद्धीयपदार्थप्राप्तौ ॥ निकटेद्रव्याभावादितिभावः ॥ भीतिर्वाआरण्यकव्याघ्रकिरातादिभ्यः ॥ व्ययार्थंयत्किंचिद्द्रव्यंवातंगृह्यगृहीत्वाऽतएवलज्जितोगतवानाज्ञयारामाज्ञयेतिसमुदितान्वयः ॥ ५ ॥ ॥ ॥

विलंबंकालविलंबम् ॥ अतिकालंश्राद्धकालातिक्रमणम् ॥ ६ ॥ तदासीतामनसाविचारयति ॥ जानकीति ॥ दिवारूढंदिवाकर्तव्यत्वेनविहितंश्राद्धंकथं भवेदितिविचारतत्पराऽऽसीदितिसंबंधः ॥ दिवारूढमित्यत्रचिंतारूढेतिपाठांतरम् ॥ देवरःपत्युःकनिष्ठभ्रातालक्ष्मणः ॥ स्वामिनौदेवृदेवरावित्यमरः ॥ ७ ॥ प्राणनाथःप्राणप्रियोरामः ॥ आसुरमासुरादिसंज्ञकमनर्थकारीत्यर्थः ॥ श्राद्धंभविष्यति ॥ तथाचमनुनोक्तम् ॥ रात्रौश्राद्धंनकुर्वीतराक्षसीकीर्तिताहि सा ॥ संध्ययोरुभयोश्चैवसूर्येचैवाचिरोदितइति ॥ ८ ॥ इंगुदीदीपनमिति ॥ इंगुदीतदाख्यवृक्षफलम् ॥ इंगुदीतापसतरुरित्यमरः ॥ तस्यादीपनंश्रपणं ज्वालनंवापाकार्थंप्रकाशार्थंवाअंगदादीनितिपाठेत्वंगदादीन्स्वकीयबाहुभूषणकटकादीन् ॥ अथवापुत्रसद्भावेश्राद्धादौपुत्रस्यैवाधिकारात्प्रकृतश्राद्धसम

ततश्चैवाज्ञयातत्रविलंबंकृतवांस्तदा ॥ अतिकालंतदाज्ञात्वारामोऽपिगतवांस्तदा ॥ ६ ॥ जानक्येकाकिनीतत्रदिवारूढंकथंपुनः ॥ विचारतत्पराह्यासीन्नायातिदेवरःकथम् ॥ ७ ॥ प्राणनाथोऽपितत्रैवगतोनायातिवैकथम् ॥ श्राद्धकालेगतश्चात्रआसुरंसंभविष्यति ॥ ८ ॥ इतिविचार्यसातत्रस्नानंकृत्वाविधानतः ॥ इंगुदीदीपनंकृत्वापुलिनेसास्थितातदा ॥ ९ ॥ नायातिलक्ष्मणश्चैवराघवश्चतथैवच ॥ ममपितॄनहंदास्येपिंडानाहस्वयंतदा ॥ १० ॥ किंचिद्वस्तुगृहीत्वातुतेनैवपिंडकास्तदा ॥ दत्तायदातयातत्रहस्ताश्चनिसृतास्तदा ॥ ११ ॥ वदंतस्तर्पिताह्यद्यधन्यात्वंजनकात्मजे ॥ तान्दृष्ट्वासुंदरीहस्तान्नानालंकारभूषितान् ॥ १२ ॥ उवाचजानकीतत्रकेयूयंसमुपस्थिताः ॥ श्रुत्वातुवचनंतस्याउवाचश्वशुरस्तदा ॥ १३ ॥ अहंदशरथोनामश्वशुरस्तेचसुव्रते ॥ तृप्ताःस्मतवपिंडेनश्राद्धंतेसफलंकृतम् ॥ ॥ १४ ॥ इत्युक्त्वासातदातत्रजानकीवाक्यमब्रवीत् ॥ भर्तामेनैवमन्येतहस्तस्यदर्शनादिकम् ॥ १५ ॥ इत्युक्तेचतयातत्रस्थाप्याःसाक्ष्येत्वयाऽनघे ॥ इतिवाणींसमुत्पन्नांश्रुत्वासाजनकात्मजा ॥ १६ ॥ ॥

येरामस्यात्रासत्वेनजानकीरामस्वरूपधारणार्थंरामबाहुभूषणादिकंधृतवतीत्यर्थः ॥ स्थिताप्रतीक्षमाणा ॥ ९ ॥ १० ॥ किंचिद्वस्तुतत्रत्योयःकश्चित्पदार्थविशेषस्तम् ॥ पिंडकाःपिंडाःकृताइतिशेषः ॥ यदापिंडकादत्तास्तदाहस्तादशरथादिपितृहस्तानिसृतानिर्गताः ॥ ११ ॥ १२ ॥ समुपस्थिताःप्राप्ताः ॥ अत्रवचनंप्रभोइतिवदनःप्रभोइतिचपाटांतरम् ॥ १३ ॥ श्वशुरोदशरथः ॥ १४ ॥ तेत्वया ॥ भर्तेति ॥ हस्तस्यभवद्धस्तस्यदर्शनादिकंममजातामितिमेभर्त्तारामोनमन्येतनविश्वस्यात् ॥ असंनिधानादितिभावः ॥ श्वशुरोवदति ॥ स्थाप्याइति ॥ साक्ष्येसाक्षित्वेस्थाप्याः ॥ केचनसाक्षिणोत्रकर्तव्याइत्यर्थः ॥ १६ ॥

इतीति ॥ समुत्पन्नापिंडतउद्धृतां ॥ वाणींश्रुत्वाजनकात्मजाफल्गुनदींगामग्निंकेतकींचयूयंसाक्षिणोभवतेत्युवाचेत्यर्थः ॥ १७ ॥ तेफल्गुनद्यादयः ॥ रामआह ॥ शीघ्रमिति ॥ शिवतयाशुचित्त्वेनपाकार्थमितिभावः ॥ हेसाध्वि ॥ १८ ॥ श्राद्धेति ॥ गतःप्राप्तः ॥ १९ ॥ २० ॥ विलंबमिति ॥ पाककरणे विलंबंक्रियमाणांकुर्वाणां ॥ यगार्षः ॥ २१ ॥ २२ ॥ व्यलीकमनृतं ॥ अलीकंत्वप्रियेनृतइत्यमरः ॥ २३ ॥ व्रीडितालज्जिता ॥ एतेफल्गुनद्यादयः

फल्गुंनदींतथागांचह्यग्निंचकेतकींतदा ॥ उवाचश्रूयतांसम्यक्तेसर्वेसाक्षित्तांगताः ॥ १७ ॥ ततश्चांतर्हितास्तेवैता वद्रामःसमागतः ॥ शीघ्रंशिवतयासाध्विभवितव्यंत्वयाऽधुना ॥ १८ ॥ श्राद्धकालोगतश्चाऽद्यश्वशुरःसमुपस्थितः ॥ इत्युक्तेचतदातेनजानकीविस्मितासती ॥ १९ ॥ नोवाचवचनंकिंचित्तदादृष्ट्वातथाविधाम् ॥ विलंबंक्रियमाणांता मुवाचराघवस्तदा ॥ २० ॥ वैदेहिविस्मितात्वंचदृश्यसेभामिनिकथम् ॥ इतिपृष्टातदातेनसर्वंचकथितंतया ॥ २१ ॥ तच्छ्रुत्वाराघवस्तत्रभ्रातरंवाक्यमब्रवीत् ॥ भ्रातस्त्वयाश्रुतंसम्यक्जानक्याकथितंचयत् ॥ २२ ॥ अस्माभिर्विधि नानैवदृष्टश्चैवाऽधुनातया ॥ कार्यार्थेव्याकुलासावैव्यलीकंह्युच्यतेतया ॥ २३ ॥ एवमुक्तेतदातेनव्रीडितासाऽब्रवी दिदम् ॥ मयाचस्थापिताह्येतेसाक्षित्वेरघुनंदन ॥ २४ ॥ एवमस्त्वितिसत्यंवैयद्येतेवचनंमम ॥ कथयिष्यंतितेसुभ्रुम न्येसत्यंवचस्तथा ॥ २५ ॥ इत्युक्तेचतदापृष्टाश्चत्वारःसाक्षिणस्तदा ॥ तेसर्वेमोहमापन्नानजानीमोवयंत्विदम् ॥ २६ ॥ इतिश्रुत्वावचस्तेषांरामश्चलक्ष्मणस्तदा ॥ ऊचतुर्भ्रातरौतत्रहास्यंकृत्वापरस्परम् ॥ २७ ॥ कार्यंचकरणीयंतेदिवा रूढंबुभुक्षता ॥ जानकीदुःखमापन्नाकिंजातंकिंकृतंत्विह ॥ २८ ॥ पाकंकृतवतीतत्ररामःश्राद्धंतदात्वयं ॥ आवाहने कृतेतत्रवाणीसूर्यसमीपतः ॥ २९ ॥ ॥ ॥ ॥ ॥

॥ २४ ॥ सुभ्रुसुष्टुभ्रुवौयस्यास्तत्संबुद्धिर्हेसुभ्रु ॥ २५ ॥ मोहंभ्रांतिमज्ञानंवा ॥ २६ ॥ २७ ॥ तेत्वयाकार्यंश्राद्धोपकारकंकरणीयंकर्तव्यंमयातुबुभुक्षताअभुक्तेवे त्यर्थःदिवारूढंदिवैवकर्तव्यत्वेनविहितंश्राद्धंकरणीयम् ॥ अतःशीघ्रंपाकंकुर्वित्यभिप्रायः ॥ २८ ॥ श्राद्धमिति ॥ कर्तुमारेभेइतिशेषः ॥ क्वचित्तदात्वय मित्यथाकरोदितिपाठांतरं ॥ आवाहनंपितृरूपत्वेनब्राह्मणध्यानंतस्मिन् ॥ वाणीवाक् ॥ निर्गतेतिशेषः ॥ २९ ॥ ॥

कीदृशीसेतितदाह ॥ किमर्थमिति ॥ हेपुत्रहूयतेपितृनुदिश्याग्नौकरणंक्रियतेवयंतर्पितास्तृप्तिंप्रापिताः ॥ सूर्यस्यरामकुलकूटस्थत्वेनपितृस्वरूपत्वादितिभावः नेति ॥ रामवाक्यमिदं ॥ ३० ॥ पुनर्वागाह ॥ कृतमिति ॥ ३१ ॥ पुनरपिवागाह ॥ सूर्यइति ॥ जयेतीति ॥ जयजीवेतिशब्दंतांसीतांप्रत्यूचतुरितिशेषः ॥ ३२ ॥ कुलवधूःकुलांगनाकुलपावनकर्त्रीत्यर्थः ॥ ३३ ॥ रामःफल्ग्वादीन्निंदति ॥ किंकृतमिति ॥ अब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बिषीतिदोषस्मरणादितिभावः ॥ ३४ ॥ ३५ ॥ पातालइति ॥ भूमंडलेत्वत्प्रवाहोमाभूदितिभावः ॥ इदानीमपिगयासमीपेफल्गुनद्याःप्रवाहोभुवोऽधोभागएवदृश्यते ॥ योग्या

किमर्थंहूयतेपुत्रह्यनयातर्पितावयम् ॥ तत्रत्यंचवचःश्रुत्वानमन्येऽहंवचोविभो ॥ ३० ॥ कृतंश्राद्धंपुनर्नैवकर्त्तव्यंहिल
याऽनघ ॥ तथापिराघवस्तत्रनमेनेपरमंवचः ॥ ३१ ॥ सूर्यश्चसाक्षितांयातःकिमर्थंक्रियतेत्वया ॥ जयेतिचतदातांवै
रामश्चलक्ष्मणस्तदा ॥३२॥ धन्यावयंयथाऽस्माकंसाध्वीकुलवधूरिति ॥ पाकंकृत्वातदाभुक्त्वारामोलक्ष्मणमब्रवीत्
॥३३॥ एतेतुसाक्षितांप्राप्ताःकिंकृतंदुष्टवत्तथा ॥ एतस्मिन्नंतरेदेवीशापंतेभ्योददात्पुनः ॥३४॥ नदित्वयाश्रुतंयच्चदृष्टंय
च्चतथापुनः ॥ सत्यंनिवेदितंनैवपातालेत्वंवहाऽधुना ॥३५॥ केतकित्वंशिवायेहनयोग्याभवसर्वदा ॥ नसत्यंकथितंचा
ऽद्यतथात्वंफलमाप्नुहि ॥ ३६ ॥ संनिकृष्टेतथागांचउवाचजनकात्मजा ॥ यदिसत्यंत्वयानोक्तमीदृशीत्वंभवाऽधुना ॥
॥ ३७ ॥ पुच्छेशुद्धामुखेऽयोग्याभवत्वंसर्वदानघे ॥ देवानांमुखमग्नेत्वंयदिसत्यंनभाषितम् ॥ ३८ ॥ सर्वभक्षीभवत्वं
चवचनान्ममसत्तम ॥ केतकित्वंतथानैवयथादृष्टंश्रुतंतथा ॥ ३९ ॥ शिवायवल्लभामाभूःसर्वकालमुदाहृता ॥ इतिशा
पंतदाप्राप्तायथायोग्यंगतास्तदा ॥ ४० ॥ तद्दिनंहिसमारभ्यनदीह्यंतरवाहिनी ॥ अग्निश्चसर्वभुक्तत्रकेतकीशि
वदुर्लभा ॥ ४१ ॥ ॥ ॥ ॥ ॥

पूजार्हा ॥ ३६ ॥ संनिकृष्टेसमीपेविद्यमानामितिशेषः ॥ ईदृशीवक्ष्यमाणगुणा ॥ ३७ ॥ कीदृशीभाव्येतितदाह ॥ पुच्छइति ॥ पुच्छेशुद्धत्वंमुखेत्वशुद्धत्वमि त्यर्थः ॥ ३८ ॥ देवानामिति ॥ हेअग्नेत्वंदेवानांमुखमसि ॥ अग्निर्मुखंप्रथमोदेवतानामितिश्रुतेः ॥ ३९ ॥ केतकीति ॥ हेकेतकित्वंसर्वकालंसदा ॥ अत्यंतसंयोगेद्वितीया ॥ वल्लभामाभूः ॥ नमाङ्योगइत्यडागमनिषेधः ॥ ४० ॥ अंतरवाहिनीफल्गुनद्यधोवाहिनीत्यर्थः ॥ ४१ ॥ ॥

शिवदुर्लभाशिवपूजानर्हा ॥ ४२ ॥ कथामुपसंहरति ॥ एतदिति ॥ अतइति ॥ कारणंशापकारणमित्यर्थः ॥४३॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटी
कायांसारबोधिन्यांशिवपूजाविधिर्नामत्रिंशोऽध्यायः ॥ ३० ॥ ओंनमःशिवाय ॥ कस्यचिच्चंपकसुमैस्तदीयशिवपूजया ॥ वशंवदान्नृपाल्लब्धदानाध्यक्षपद
स्यच ॥ १ ॥ विप्रस्यवकुरनृतंद्विजपीडाविधायिनः ॥ शिवाज्ञयाविराधाख्यंरक्षःस्याइतिशापकं ॥ २ ॥ रामस्यदर्शनात्तस्यमोचनानुग्रहंततः ॥ असदुत्त
रदानेनचंपकस्यचनारदः ॥ ३ ॥ शिवपूजासाधनत्वयोग्यतानभवेत्तव ॥ इतिशापमदादेवमेकत्रिंशेऽत्रकथ्यते ॥ ४ ॥ गोकर्णेशइति ॥ गोकर्णेश्वरइतिपाठां
तरं ॥ दक्षिणस्यामिति ॥ कर्णाटदेशेषुरामेश्वरात्पश्चिमायामित्यर्थः ॥ १ ॥ २ ॥ गम्यमानेनआर्षोयंप्रयोगःगच्छतेत्यर्थः ॥ चंपकश्चंपकवृक्षः ॥ ३ ॥ सइ

गौश्चापिहिंयथाचाऽत्रयदुक्तंहितयातथा ॥ एतत्सर्वंसमाख्यातंकेतकीशापकारणम् ॥ अतःपरंचंपकस्यकारणंकथ
यामिच ॥ ४२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ सूतउवाच ॥ गोकर्णे
शइतिख्यातःशंभुर्लोकसुखावहः ॥ दक्षिणस्यांदिशिचैवनिकटेवर्ततेऽधुना ॥ १ ॥ तस्यदर्शनमात्रेणपातकंभस्मसा
द्व्रजेत् ॥ तन्निकटेनारदोदेवोदर्शनार्थंसमाययौ ॥ २ ॥ कदाचिद्गम्यमानेननारदेनमहार्षिणा ॥ पुष्पितःसुरभिश्चैव
पथिदृष्टश्चचंपकः ॥ ३ ॥ तत्रकश्चिद्द्विजश्रेष्ठःपुष्पार्थंचसमागतः ॥ सदृष्ट्वानारदंतत्रवीणांचमहतींतथा ॥ ४ ॥ नाद
यंतंतथालोक्यक्षणमात्रंतदास्थितः ॥ सपुष्पावचयार्थंचह्याजगामस्वयंतदा ॥ ५ ॥ यदर्थमागतंतेननकृतंतेनतत्त
था ॥ करिष्यामियदाकार्यंपृष्टश्चायंकरिष्यति ॥ ६ ॥ इतिज्ञात्वातदातेननकृतंकार्यमुत्तमम् ॥ हस्तेचवंशपात्रंचदृष्ट्वो
वाचद्विजंतदा ॥ ७ ॥ किमर्थमागतंब्रह्मन्किंपात्रंहस्तकेतव ॥ तस्यतद्वचनंश्रुत्वाद्विजोवाक्यमुपाददे ॥ ८ ॥ भिक्षा
र्थंचगमिष्यामियथार्थंनैवभाषितम् ॥ तद्गत्वानारदस्तत्रननामशिवमंदिरे ॥ ९ ॥ ॥ ॥

ति ॥ सब्राह्मणः ॥ महतींमहतीनाम्नीं ॥ विश्वावसोश्चबृहतीतुंबरोस्तुकलावती ॥ महतीनारदस्याथसरस्वत्यास्तुकच्छपीतिवैजयंती ॥ वीणांनादयन्तामित्य
ग्रिमेणान्वयः ॥ ४ ॥ सब्राह्मणः ॥ ५ ॥ यदर्थमिति ॥ पुष्पावचयार्थमित्यर्थः ॥ तत्पुष्पावचयरूपंकार्यं ॥ तदानींसमनसाविचारयामासेत्याह ॥ करिष्या
मीति ॥ ब्राह्मणस्तत्कार्याकरणेकारणंतर्कयति ॥ पृष्टइति ॥ आदिकर्मणिक्तःकर्तरिचेत्यनेनकर्तरिक्तप्रत्ययः ॥ अयंनारदः ॥ ६ ॥ वंशपात्रंपुष्पस्थापनयोग्यं
वंशमयपटलं ॥ नारदःपृच्छति ॥ किमिति ॥ ७ ॥ तदानींब्राह्मणेनसत्यंनभाषितमित्याह ॥ भिक्षार्थमिति ॥ ८ ॥ तद्गत्वेति ॥ नारदोब्राह्मणवचोभिप्रा
यंगत्वाज्ञात्वाशिवमंदिरेगत्वाशिवंननामनमस्कृतवान्नमस्कृत्यचपरिवर्तितवान्शिवमंदिरान्निवृत्यब्राह्मणसमीपमागंतुंनिर्गतवानितिसमुदितार्थः ॥ ९ ॥

॥ १० ॥ व्यलीकमनृतम् ॥ अलीकंत्वप्रियेऽनृतइत्यमरः ॥ ११ ॥ किंतदनृतमितितदाह ॥ नलब्धेति ॥ रहस्यंगुप्तमनृतभाषितमित्यर्थः ॥ जगामज्ञातवानित्यर्थः ॥ गत्यर्थानांधातूनांज्ञानार्थकत्वात् ॥ १२ ॥ आगत्येति ॥ पृष्टश्चंपकवृक्षइतिशेषः ॥ नारदेनचंपकंप्रतिकिंपृष्टमितितदाह ॥ ब्राह्मणइति ॥ १३ ॥ गृहीतानीतिच ॥ ब्राह्मणेनेतिशेषः ॥ हेऋषिसत्तमाः ॥ वृक्षसत्तमेतिपाठांतरम् ॥ तत्रहेवृक्षसत्तमचंपक ॥ तमिति ॥ नारदंप्रतिसत्यंनैववदेतिबुद्ध्याद्विजन्मनाब्राह्मणेननिषिद्धोवृक्षश्चंपकःकोवाद्विजस्तमहंनजानेइत्याद्यर्थकंवाक्यंतंनारदंप्रत्युवाचेतिसमुदितान्वयः ॥ १४ ॥ १५ ॥ १६ ॥ समीहसेइच्छासि

गत्वाशिवंचसंतोष्यपरिवर्तितवांस्तदा ॥ सद्विजोऽपितदाकार्यंकृत्वाऽऽछाद्यचपात्रकम् ॥ १० ॥ मिलितश्चतदामार्गे पुनःपृष्टंकुतोगतः ॥ एवंश्रुत्वापुनस्तत्रव्यलीकंपरिभाषितम् ॥ ११ ॥ नलब्धाचमयाभिक्षागच्छामिचयथागतम् ॥ तच्छ्रुत्वानारदःसर्वंरहस्यंचजगामह ॥ १२ ॥ चंपकस्यसमीपेचआगतोनारदःस्वयं ॥ आगत्यचतदापृष्टोब्राह्मणश्चकुतोगतः ॥ १३ ॥ गृहीतानिचपुष्पाणिकियंतिऋषिसत्तमाः ॥ तमुवाचतदावृक्षोनिषिद्धश्चद्विजन्मना ॥ १४ ॥ कोवाद्विजश्चाकिंपुष्पंकोवात्वंपरिपृच्छसि ॥ ततश्चनारदोज्ञात्वापरावृत्याशिवंगतः ॥ १५ ॥ सर्वाण्यपिचपुष्पाणि शतमेकोत्तराणिच ॥ गणितानितदातेननारदेनमहात्मना ॥ १६ ॥ अन्येनकेनचित्तत्रकृतापूजामहात्मना ॥ तंपप्रच्छ पुनस्तत्रकोवाकिंत्वंसमीहसे ॥ १७ ॥ केनाऽऽनीतानिपुष्पाणिकथमुत्तारितानिच ॥ इतिश्रुत्वावचस्तथ्यंब्राह्मणोऽहंसदाशिवम् ॥ १८ ॥ पूजयित्वाऽर्थयेमुक्तिंसत्यमेतद्ब्रवीमिते ॥ अयंवैब्राह्मणःकश्चित्प्रत्यहंपरमेश्वरं ॥ १९ ॥ चंपकैःपूजयित्वातुराज्ञोमोहंददात्यसौ ॥ ततोधनंगृहीत्वातुबहून्पीडयतेद्विजान् ॥ २० ॥ राज्ञोऽधिश्रयणंगत्वापूजा विधिबलेनच ॥ अंधोभूत्वाद्विजश्चाऽयंगणयेन्नपरान्स्वकान् ॥ २१ ॥ ॥ ॥

॥ १७ ॥ उत्तारितानिशिवलिंगायसमार्पितानि ॥ सत्यवादिब्राह्मणःस्वकृतशिवपूजाप्रयोजनकथनपूर्वकं पूर्वोक्तानृतवादिब्राह्मणदुष्टकृत्यंनारदंप्रतिचतुर्भिःश्लोकैराह ॥ इतिश्रुत्वेति ॥ तथ्यंसत्यंवचः ॥ सत्यंतथ्यमृतंसम्यगित्यमरः ॥ १८ ॥ अर्थयेइच्छामि ॥ अयमिति ॥ अनृतवादीब्राह्मणइत्यर्थः ॥ प्रत्यहंप्रतिदिनं ॥ १९ ॥ ततोराज्ञःसकाशात् ॥ २० ॥ अधिश्रयणमाश्रयणंदानाध्यक्षपदरूपमित्यर्थः ॥ अंधइति ॥ द्रव्यादिमदांधइत्यर्थः ॥ २१ ॥

उत्तारितानिसमर्पितानि शिवलिंगान्निष्कासितानिवा ॥ तदानारदोऽपरब्राह्मणायवरंददावित्याह ॥ इतीति ॥ २२ ॥ चंपकपुष्पैःशिवपूजनाद्राज्ञिवश्य
तांगतेतदाऽनृतवादिनोब्राह्मणात्तत्रत्यानांब्राह्मणानांपीडाभवेत्तन्माभूदितिमनसिसंधायनारदःशिवसमीपंजगामेत्याह ॥ चंपकैस्तोषितइत्यादिना ॥ २३ ॥
नयेदिति ॥ अनृतवादिब्राह्मणइतिशेषः ॥ दानाध्यक्ष्यमिति ॥ दानाध्यक्षपदमित्यर्थः ॥ २४ ॥ २५ ॥ ईदृशंब्राह्मणकर्मकपीडनरूपं ॥ २६ ॥ द्विजन्मना
ऽनृतवादिनाब्राह्मणेन ॥ २७ ॥ चंपकैरिति ॥ वशीकुर्यात्स्वाधीनीकुर्यात् ॥ अनृतवादिब्राह्मणइतिशेषः ॥ चंपकैःपूजितश्चासमितिपाठांतरम् ॥ अनृतवा

पुष्पाण्युत्तारितानीहपूजार्थैचमयाप्रभो ॥ इतिश्रुत्वावचस्तस्मैमुक्तिस्तेह्यनपायिनी ॥२२॥ भविष्यतिनसंदेहइति
सत्यंवचोमम ॥ चंपकैस्तोषितःशंभुस्तस्यराज्ञोवशंनयेत् ॥ २३ ॥ राजानंचवशेनीत्वाद्विजानन्यान्प्रपीडयेत् ॥
दानाध्यक्ष्यंतथालब्ध्वाब्राह्मणान्पीडयत्यसौ ॥ २४ ॥ एतत्सर्वंचंपकेभ्यःफलंलब्धंतथापुनः ॥ चंपकैस्तोषितःशं
भुर्वश्यत्वंचप्रयच्छति ॥ २५ ॥ नारदःकथयामासशिवायपरमात्मने ॥ ईदृशंत्वंफलंस्वामिन्किंद्विजायप्रयच्छसि
॥ २६ ॥ तमुवाचततोदेवःकिंकरोमीहनारद ॥ ईदृशंचंपकाल्लब्धंफलंचैवद्विजन्मना ॥२७॥ चंपकैःपूजितश्चाहंवशी
कुर्याज्जगत्रयम् ॥ एतस्मिन्समयेकाचिद्ब्राह्मणीदुःखिताशिवं ॥ २८ ॥ हाहताऽस्मिमहाराजवार्यतांदुष्टकस्त्वया ॥
मद्गृहस्थंधनंसर्वंहृतंचैवद्विजन्मना ॥ २९ ॥ एतस्मिन्समयेतेनपृष्टासाब्राह्मणीस्वयं ॥ किंदुःखंतेसमुत्पन्नंकुतस्त्वं
चविलप्यसे ॥ ३० ॥ तदीयंतद्वचःश्रुत्वाब्राह्मणीवाक्यमब्रवीत् ॥ श्रूयतांचद्विजश्रेष्ठमदीयंदुःखकारणम् ॥ ३१ ॥
मत्स्वामीकर्मयोगाच्चपंगुश्चवर्ततेऽधुना ॥ कन्याचैकादानयोग्यावर्ततेमद्गृहेद्विज ॥ ३२ ॥ ॥ ॥

दिब्राह्मणस्यान्यमपिदुष्टाचारंकथयितुंतदानींतनंवृत्तांतमाह ॥ एतस्मिन्समयइत्यादिना ॥२८॥ दुष्टकः ॥ कुत्सितेकप्रत्ययः ॥ ब्राह्मणइतिशेषः ॥ द्विजन्म
नाऽनृतवादिब्राह्मणेन ॥ २९ ॥ नारदेनकिंतत्पृष्टमितितदाह ॥ किंदुःखमिति ॥ कुतोहेतोर्विलप्यसआर्तस्वरेणरोदिषीत्यर्थः ॥ ३० ॥ हेद्विजश्रेष्ठनारद ॥
॥ ३१ ॥ कर्मयोगाद्दैवबलात् ॥ पंगुःपादविकलः ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥

प्रतिग्रहइति॥तदर्थेकन्याविवाहप्रयोजनकद्रव्ये॥वैषयिकीसप्तमी॥प्रतिग्रहःस्वीकारः॥राज्ञःसकाशादितिशेषः॥तदर्धमिति॥तद्रव्यस्यार्धमित्यर्थः॥गृण्हातीति॥अयमनृतवादीद्विजःपूर्वंराजसकाशान्मह्यंद्रव्यंदापितमपितत्स्वयंपुनःपरतोगृण्हातीतिभावः॥३३॥तर्हिराजसमीपउत्थानंकर्तव्यमितिनेत्याह॥राजेति॥तेनद्विजन्मनाराजांधीकृतः॥मूढीकृतःमूढराजनिकटउत्थानेफलाभावादितिभावः॥राजत्वेधिकृतस्तेनब्रवीतिहकथंचनेतिपाठांतरं॥३४॥किंदत्तमिति॥हेवराननेसुंदरमुखि॥३५॥प्रसूयमानाप्रसवोन्मुखा॥उभयतोमुखीत्यर्थः॥उभयतोमुखीगोप्रदानफलमाहयाज्ञवल्क्यः॥सवत्सारोमतुल्यानियुगान्युभयतोमुखीं॥दाताऽस्याःस्वर्गमाप्नोतिपूर्वेणविधिनाददिति॥उभयतोमुखीस्वरूपंतुतेनैवनिरूपितं॥यावद्वत्सस्यपादौद्वौमुखंयोन्यांचदृश्यते॥तावद्गौःपृथिवीज्ञेयायावद्गर्भंन

प्रतिग्रहस्तदर्थेवैकृतोभर्त्रांममाऽधुना ॥ तदर्धंचद्विजश्चाऽयंहठाद्गृण्हातिकिंपुनः ॥ ३३ ॥ राजात्वंधीकृतस्तेनन ब्रवीतीहकिंचन ॥ किंकरोमिक्वगच्छामित्राताकश्चिन्नविद्यते ॥ ३४ ॥ नित्यमत्रसमायातिशिवस्यपूजनायवै ॥ नारदउवाच ॥ किंदत्तंतवभर्त्रेचराज्ञादानंवरानने ॥ ३५ ॥ इत्युक्त्वाचपुनस्तत्रद्विजपत्नीवचोऽब्रवीत् ॥ प्रसूयमानागौर्दत्ताराज्ञाबहुधनान्विता ॥३६॥ तेनैवदापितात्रैवकथ्यतेचमयापुनः ॥ तदर्द्धंगृह्यतेतेनकिंकरोमिकुतोव्रजे ॥ ३७ ॥ मद्भर्त्रानगृहीतंवैदुष्टदानंकदापिह ॥ बलाद्गृहीतमस्माभिःकन्याकालोव्रजेद्द्विज ॥३८ ॥ इत्युक्त्वाग्राहितंतेनतदर्धंगृह्यतेकथम् ॥ अस्माभिरुच्यतेवार्ताधनंसर्वंविभज्यताम् ॥ ३९ ॥ तेनोच्यतेधनंचैवगौश्चापिचविभज्यताम् ॥ गोश्चविभजनेपापंकुत्रवैक्षालयामहे ॥ ४० ॥ तस्यास्तद्वचनंश्रुत्वानारदोवाक्यमब्रवीत् ॥ शंकरंतुनमस्कृत्यश्रूयतांहित्वयाप्रभो ॥ ४१ ॥ ईदृशोयोभवेत्स्याद्वैतद्धस्तात्पूजनंकथम् ॥ गृह्यतेचत्वयादेवदुष्टःकोवाह्यतःपरम् ॥ ४२ ॥ राजप्रतिग्रहश्चैवदुष्करःप्रथमंभवेत् ॥ ततश्चैवविभागश्चकिंपुनर्गोविभागभुक् ॥ ४३ ॥ ॥

मुंचतीति ॥३६॥ तेनैवानृतवादिब्राह्मणेनैव ॥ व्रजेगच्छामि ॥३७॥ गृहीतंग्राहितमित्यर्थः ॥ तत्रहेतुमाह ॥ कन्याकालइति ॥ विवाहयोग्यकालइत्यर्थः ॥ व्रजेदिति ॥ अतिक्रामेदित्यर्थः ॥ विवाहेव्ययीकरणीयस्यद्रव्यस्याभावादितिभावः ॥३८॥ अस्माभिरिति ॥ विभज्यतां ॥ गांविनेतिशेषः ॥ ३९ ॥ क्षालयामहेनाशयामइत्यर्थः ॥ ४० ॥ ४१ ॥ अनृतवादिब्राह्मणस्यशिवपूजाकर्तृत्वायोग्यत्वंनारदःकथयति ॥ ईदृशइति ॥ परद्रव्यापहारकइत्यर्थः ॥ ४२ ॥ राजकर्तृकदानसंप्रदानत्वमेवशास्त्रेनिषिद्धमितिप्रथमतआह ॥ राजेति ॥ दुष्करःकर्तुमयोग्यः ॥ किंपुनरिति ॥ समहापापीयानितिभावः ॥ ४३ ॥

पापीयस्त्वमेवकथयति ॥ एतस्मादिति ॥ गोविभागेदोषमुक्तांगांगुणवत्त्वेनप्रशंसति ॥ यस्याश्चेत्यादिना ॥ ४४ ॥ सपरिवारकोनंदिकेश्वरादिस्वगणस
हितः ॥ ४५ ॥ पश्चात्पृष्ठभागे ॥ ४६ ॥ वेदाइति ॥ वेदाऋगादयः ॥ ऊधस्यापीने ॥ दुग्धाधाररूपावयवइत्यर्थः ॥ ऊधस्तुक्लीबमापीनमित्यमरः ॥ गोः
सर्वाधिष्ठानत्वंकथयति ॥ जगदिति ॥ ४७ ॥ ईदृशीमिति ॥ सर्वाधिष्ठानभूतामित्यर्थः ॥ प्रक्रमेत्प्रदक्षिणीकुर्यात् ॥ पृथिवीप्रदक्षिणाफलंगोप्रक्रमणेऽति
दिशति ॥ पृथ्वीति ॥ ४८ ॥ गोदानेपृथ्वीदानफलमप्यतिदिशति ॥ आसमुद्रामिति ॥ ४९ ॥ उभयोर्दानयोरतिदेशहेतुंफलसाम्यंकथयति ॥ तयोरि

एतस्माच्चपरोदुष्टःकोन्योभवितुमर्हति ॥ यस्याश्चदक्षिणेशृंगेगंगाचपरितिष्ठति ॥ ४४ ॥ वामेचयमुनादेवीमध्येचै
वसरस्वती ॥ स्कंदेब्रह्मातथामध्येरुद्रःसपरिवारकः ॥ ४५ ॥ कट्यांविष्णुःसदातिष्ठेत्पश्चात्तीर्थाऽन्यनेकशः ॥ ऋ
षयोदक्षिणेकुक्षौवामेसर्वाश्चदेवताः ॥ ४६ ॥ नद्यःसर्वाह्यधोभागेवेदाःखुरनिवासिनः ॥ ऊधसिचसमुद्राश्चजगत्त
स्यांप्रतिष्ठितम् ॥ ४७ ॥ ईदृशींचैवगांयोवैपूजयित्वाचप्रक्रमेत् ॥ पृथ्वीप्रक्रमणाज्जातंफलंतस्यसुनिश्चितम् ॥ ४८ ॥
आसमुद्रांतांक्ष्मांचैवसुवर्णपूरितांयदा ॥ ददातिपुरुषोयश्चगांचैवाऽत्रददातियः ॥ ४९ ॥ तयोःसमफलंप्रोक्तंनात्र
कार्याविचारणा ॥ यस्यादुग्धंनरःपीत्वागंगोदकफलंलभेत् ॥ ५० ॥ शकृन्मूत्रंचयस्यास्तुपीतंपुनातिपातकात् ॥
किमपूज्यंहितस्यागोःस्पर्शनात्पापहारिका ॥ ५१ ॥ पृथिव्यांत्रीणिदानानिगावःपृथ्वीसरस्वती ॥ नरकादुद्धरंत्ये
तेपूर्वानेकोत्तरशतं ॥ ५२ ॥ यस्यपापस्यप्रायश्चित्तंनिःसरेत्तुनकुत्रचित् ॥ तस्यपापस्यशुद्धिःस्याद्दानाद्यस्याःसुरेश्वर
॥ ५३ ॥ किंपुनर्वर्ण्यतेतस्यादानंस्पर्शश्चदर्शनम् ॥ सुवर्णशृंगयोश्चैवखुरेषुरूप्यमेवच ॥ ५४ ॥ पृष्ठंताम्रमयंकृत्वा
प्रवालंनेत्रयोस्तथा ॥ कंठेचभूषणंयस्यावस्त्रंसर्वांगकेतथा ॥ ५५ ॥ ॥ ॥

ति ॥ गोःप्रशंसांकृत्वातद्विकारप्रशंसापूर्वकंफलंकथयति ॥ यस्याइति ॥ गोरित्यर्थः ॥ ५० ॥ शकृदिति ॥ गोमयमित्यर्थः ॥ किमिति ॥ तस्यागोःसंबंध्य
वयवादिकिमपूज्यमपितुसर्वंपूज्यमेवेत्यर्थः ॥ तत्रहेतुमाह ॥ दर्शनादिति ॥ सादर्शनात्पापहारिकापापनाशिका ॥ स्यादितिशेषः ॥ ५१ ॥ गावइति ॥ गवादि
पदंलक्षणयातद्दानपरं ॥ पूर्वान्पूर्वजातान्पुरुषान् ॥ ५२ ॥ प्रायश्चित्तादिनाऽनिबर्हणीयस्यापिपापस्यगोदानेननाशोभवेदित्याह ॥ यस्येति ॥ यस्यकस्यचि
दित्यर्थः ॥ निःसरेन्निर्गच्छेत् ॥ ५३ ॥ किंपुनरिति ॥ वर्णितुमशक्यमितिभावः ॥ दानइतिकर्तव्यतांकथयति ॥ सुवर्णमित्यादिना ॥ ५४ ॥ ५५ ॥

कांस्येति ॥ कांस्यदोहनपात्रेणकांस्यमयंदोहनार्थंपात्रंतेनेत्यर्थः ॥ संयुतामित्यनुषज्यते ॥ ५६ ॥ देशकालेदेशेपुष्करादौकालेग्रहणादौ ॥ ५७ ॥ मात्रादिगोपर्यं तानांचतुर्णांविक्रयणजन्यपापेनिष्कृतिरेवनास्तीत्याह ॥ मातुरिति ॥ ५८ ॥ प्रायश्चित्तमिति ॥ पूर्वोक्तपापपरिहारायेतिशेषः ॥ प्रकृतमाह ॥ अयमिति ॥ अनृत वादिब्राह्मणइत्यर्थः ॥ ५९ ॥ ६० ॥ भुक्त्वेति ॥ अयमनृतवादीपापंप्रारब्धंभुक्त्वाततःसद्गतिंयथाप्राप्येतप्राप्नुयादित्यर्थः ॥ तथात्वयाकर्तव्यमित्यग्रिमान्वयः ॥ तथात्वयेति ॥ अनेनयेनाशिवःसेवितस्तस्यासत्यवचनप्रयुक्तदोषाद्युत्पत्तावपिमोक्षरूपसद्गतिस्तुभवत्येवेतिगम्यते ॥ ६१ ॥ इतीति ॥ यत्रेति ॥ तत्रगतइ तिशेषः ॥ ६२ ॥ पुनरिति ॥ तस्मैचंपकाय ॥ नारदेनचंपकायकिंतत्पृष्टमितितदाह ॥ नित्यमिति ॥ हेवृक्षेशचंपकत्वानेकशःपुष्पाणिनित्यंनिरंतरंके

कांस्यदोहनपात्रेणसुशीलांवत्ससंयुताम् ॥ तरुणींरूपसंपन्नांबहुदुग्धवतींयदा ॥ ५६ ॥ अर्पयेद्देशकालेवैकिंतस्यदु र्लभंभवेत् ॥ एतादृशींतुगांलब्ध्वादलाचाष्टगुणंफलं ॥ ५७ ॥ मातुर्विक्रयणेपापंकन्याविक्रयणेतथा ॥ वेदविक्रय णेचैवगवांविक्रयणेतथा ॥ ५८ ॥ प्रायश्चित्तंनलभ्येताकिंपुनर्वर्ण्यतेमया ॥ अयंवैब्राह्मणोदुष्टोगांचैवविभजिष्यति ॥ ५९ ॥ किंवक्तव्यंमयादेवतवभक्तोभवेदिह ॥ इत्येतद्वचनंश्रुत्वाशिवोवाक्यमथाऽब्रवीत् ॥ ६० ॥ त्वच्चेतसियथा स्याद्वैतथाकुरुप्रियोसिमे ॥ भुक्त्वापापंपुनश्चैवसद्गतिंप्राप्यतेयथा ॥ ६१ ॥ तथात्वयाचकर्तव्यंमद्भक्तश्चभवेदिह ॥ इत्युक्तोनारदस्तत्रयत्रतिष्ठतिचंपकः ॥ ६२ ॥ पुनःपृष्टंतदातस्मैनित्यंपुष्पाण्यनेकशः ॥ नीयतेकेनवृक्षेशसत्यंवद ममाऽग्रतः ॥ ६३ ॥ एवमुक्तस्तदासोवैनोवाचपरमंवचः ॥ तदाचनारदस्तस्मैददौशापंशिवाज्ञया ॥ ६४ ॥ शृणुचं पकवक्ष्यामिसत्यंसाधनमुत्तमम् ॥ ईदृशोगुणवाँल्लोकेयदिसत्यंवदेदिह ॥ ६५ ॥ किंपुनर्दुर्लभंतस्यइहचापिपरत्रच ॥ तथाफलंमयादेयमसत्यभाषणादिह ॥ ६६ ॥ ॥ ॥ ॥ ॥

नपुरुषेणनीयतेनीयंतेएकवचनमार्षं ॥ इत्येतत्सत्यंवदेत्यन्वयः ॥ ६३ ॥ सचंपकः ॥ सुलोपाभावआर्षः ॥ परमंसत्यम् ॥ शिवाज्ञया ॥ त्वच्चेतसीत्यादि नादत्तयेतिभावः ॥ ६४ ॥ शिवपूजायांमुख्यसाधनमपिचंपकमसत्यभाषणादिनाऽनिष्टफलंप्राप्नुयादितिसत्यवचनंनारदःप्रशंसति ॥ शृण्वित्यादिना ॥ साधनंपूजायामितिशेषः ॥ ईदृशइति ॥ ईदृशःसत्यवचनात्मकसाधनसंपत्तिमानित्यर्थः ॥ गुणवानितिप्रशंसार्थम् ॥ यःपुरुषोलोकेसत्यंवदेत्तस्यकिंफ लंदुर्लभंनकिमपीत्यग्रिमेणान्वयः ॥ ६५ ॥ तथेति ॥ फलंशापफलमित्यर्थः ॥ एतेनगुणवतोपिकस्यचिद्दोषस्यवशादनिष्टफलप्राप्तिर्भवतीतिगम्यते ॥ ६६ ॥

कीदृशंशापंददावितितदाह ॥ अद्येति ॥ अद्यदिनमारभ्येत्यर्थः ॥ ६७ ॥ विप्रःदुष्टब्राह्मणः ॥ हेमुनीश्वराः ॥ शौनकादयः ॥ ६८ ॥ दुष्टब्राह्मणस्या
पिराक्षसजन्मफलकंशापंनारदोददावित्याह ॥ राजप्रतिग्रहादित्यादिना ॥ ६९ ॥ ७० ॥ दुष्टब्राह्मणोनारदात्क्षमामयाचतेत्याह ॥ क्षम्यतामिति ॥ ७१ ॥
॥ ७२ ॥ महानुभावैःप्रोक्तंवचःकदाप्यनर्थकंनभवेदितिसूचयन्नारदआह ॥ नमिथ्येति ॥ ७३ ॥ तत्कीदृशंराक्षसजन्मेतितदाह ॥ विराधइति ॥ विरा

अद्यप्रभृतिलोकेषुशिवमान्योभवेन्नहि ॥ तवपुष्पंशिवस्यैवयोग्यंभवतुनक्कचित् ॥ ६७ ॥ एतस्मिन्नंतरेविप्रःसमा
गच्छतवैतदा ॥ तंदृष्ट्वानारदोवाक्यमब्रवीच्चमुनीश्वराः॥ ६८॥ राजप्रतिग्रहान्नूनंविभागोविहितस्त्वया ॥ चंपापुष्प
बलेनैववशीकृत्यमहेश्वरम् ॥ ६९ ॥ विप्राश्चपीडितास्तेऽद्यराक्षसस्त्वंभवाऽधुना ॥ इत्युक्तेनारदेनैवब्राह्मणोभयवि
व्हलः ॥ ७० ॥ क्षम्यतांक्षम्यतांस्वामिन्ननुग्रहंकुरुष्वमे ॥ इत्युक्त्वाचरणोपांतेनारदस्यपपातह ॥ ७१ ॥ नारदोवच
नंस्मृत्वाशिवस्यपरमात्मनः ॥ विप्रंचैवगतोदृष्ट्वादयार्द्रहृदयोऽब्रवीत् ॥ ७२ ॥ नारदउवाच ॥ नमिथ्यामेकदाप्यु
क्तंवैरिष्वपिकदाचन ॥ तस्मान्मद्वचनाद्विप्रराक्षसत्वंगमिष्यसि ॥ ७३ ॥ विराधोनामयश्चासीद्राक्षसत्वंगतःक्षणात्
॥ अनुग्रहस्तदातस्यदत्तस्तेनमहात्मनः ॥ ७४ ॥ रामस्यदर्शनंप्राप्यतद्धस्तान्मरणंध्रुवम् ॥ लब्ध्वायास्यसिसद्रूपं
प्रतापाच्छंकरस्यच ॥ ७५ ॥ इत्युक्तोनारदेनैवसोऽपिरक्षोऽभवत्क्षणात् ॥ विराधोनामविप्रेंद्राःसर्वप्राणिभयंकरः
॥ ७६ ॥ दृष्ट्वातंराक्षसंतत्रनारदःप्राहशंकरम् ॥ नमस्कृत्यपुनस्तत्रगोकर्णेशंतदाशुभम् ॥ ७७ ॥ चंपकस्यमहिमा
नंवर्णयित्वापुनःपुनः ॥ ईदृशश्चभवेल्लोकेसर्ववश्यंनयेदिह ॥ ७८॥ इत्युक्त्वानारदस्तस्मैययौस्वैरगतिर्मुनिः ॥ एत
त्सर्वंसमाख्यातंयत्पृष्टोहंमुनीश्वराः ॥ ७९ ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात् ॥ ८० ॥ इतिश्रीशिवमा
हापुराणेज्ञानसंहितायांचंपकशापनिरूपणंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ छ ॥

धारव्यइत्यर्थः ॥७४॥ शापमोचनप्रकारमाह ॥ रामस्येति॥ सद्रूपंब्रह्मस्वरूपमित्यर्थः॥ सदेवसौम्यतत्सदासीदित्यादिश्रुतेः ॥७५॥७६॥७७॥ महिमानंवशी
करणसामर्थ्यं ॥ वशकारकाच्चंपकसदृशवस्तुनोऽनिष्टफलंलोकेभवेदितिगोकर्णेश्वरंनारदआहेत्याह ॥ ईदृशइति ॥७८॥ ययाविति ॥ स्वर्गमितिशेषः ॥
एतदाख्यानश्रवणफलमाह ॥ एतदिति ॥७९॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांचंपकशापनिरूपणंनामैकत्रिंशोऽध्यायः ॥३१॥

ॐनमःशिवाय ॥ शिवपूजाप्रसंगेनतत्पंचायतनेऽर्चनम् ॥ अभिधातुंगणेशस्यतज्जन्माख्यानपूर्वकम् ॥ १ ॥ गणेशशूलिगणयोर्युद्धसन्नाहइत्यपि ॥ अद्भुतोवर्ण्यतेऽध्यायेद्वात्रिंशत्तमकेऽत्रवै ॥२॥ सूतसूतेति ॥ भागवतोत्तमेत्यनेनसूतस्यवैष्णवत्वंगम्यते ॥ अतंद्रितमनलस्यंयथातथा ॥ १ ॥ अस्माकमिति ॥ दूरतःकृतवान्नाशितवानित्यर्थः ॥ सूतंप्रशंसंति ॥ धन्यइत्यादिना ॥ २ ॥ व्यासइति ॥ हेवैराजविराजएववैराजस्तत्संबुद्धिर्हेसूत ॥ निखिलगौप्यकथाश्रावकत्वेनश्रोतृमनोरंजकत्वादितिभावः ॥ व्यासःपाराशर्यःकृष्णद्वैपायनोयस्यतेतवगुरुःसन्शिरसिराजतेप्रकाशते ॥ तस्यासंशयात्मस्वरूपिणोनिश्चितात्मतत्त्वस्यतवार्किंदुर्लभंनकिमपीत्यर्थः ॥३॥ त्वयेति ॥ पंचायतनंतत्पूजनंचत्वयाकथितमित्यर्थः ॥४॥ पंचायतनमाह ॥ विष्णुरिति ॥ विष्णुर्नारायणःपंचायतनस्थापनेपूर्वःश्रुतः

ऋषयऊचुः ॥ सूतसूतमहाभागत्वयाभागवतोत्तम ॥ यत्पृष्टंचैवतत्सर्वंनिवेदितमतंद्रितम् ॥ १ ॥ अस्माकंसंशयंसर्वंकृतवान्दूरतोभवान् ॥ धन्यस्त्वंकृतकृत्यश्चकिंपुनर्वर्णयामहे ॥ २ ॥ व्यासोवैराजतेयस्यगुरुःशिरसिराजते ॥ किंतस्यदुर्लभंलोकेऽसंशयात्मस्वरूपिणः ॥ ३ ॥ त्वयाचकथितंयच्चपंचायतनमुत्तमं ॥ पूजनंशुभदंलोकेसर्वकामफलप्रदम् ॥ ४ ॥ विष्णुर्देवःश्रुतःपूर्वःप्रकृतिःपरमाशुभा ॥ शंकरस्त्वपरोदेवःसूर्यस्तुत्रिगुणात्मकः ॥ ५ ॥ गणेशस्तत्रपंक्तौहिपूज्योजातःकथंप्रभो ॥ कोवागणपतिश्चायंकस्यपुत्रःकुतोबलम् ॥ ६ ॥ महत्त्पंक्तिंकथंप्राप्तःसर्वंकथयशोभनम् ॥ एवमेषांवचःश्रुत्वासूतोवाक्यमथाऽब्रवीत् ॥ ७ ॥ सूतउवाच ॥ साधुपृष्टंमहाभागालोकानांहितकाम्यया ॥ स्वरूपंचगणेशस्यकथयामियथाश्रुतम् ॥ ८ ॥ उद्वाहितेशिवेचाऽत्रकैलासेचगतेसति ॥ कियताचैवकालेनजयाचविजयासखी ॥ ९ ॥ पार्वत्याचमिलित्वाचविचारतत्पराऽभवत् ॥ रुद्रस्यचगणाःसर्वेनंदिभृंगिपुरःसराः ॥ १० ॥ प्रमथाश्चह्यसंख्याताह्यस्मदीयोनकश्चन ॥ द्वारितिष्ठंतिसर्वेपिशिवस्याज्ञापरायणाः ॥ ११ ॥ ॥ ॥

॥ एतेनशिवपंचायतनेपिविष्णोःपूर्वत्वेनमुख्यत्वंदर्शितम् ॥ विष्णुर्देवःश्रुतस्तत्रेतिपाठांतरम् ॥ प्रकृतिर्देवी ॥ त्रिगुणात्मकःसत्वरजस्तमोगुणात्मकः ॥ ५ ॥ गणेशइति ॥ तत्रपंक्तौपंचायतनपंक्तावित्यर्थः ॥६॥७॥ स्वरूपमिति ॥ उत्पत्त्यादिकमित्यर्थः ॥८॥ उद्वाहितेपार्वतीविवाहंकृतवति ॥ कियतेति ॥ कतिपयेनेत्यर्थः ॥ जयाचविजयाचतदाख्यौसख्यौ ॥ ९ ॥ किंतद्विचारयंत्यौसख्यौतदाह ॥ रुद्रस्येति ॥ हेपार्वतिरुद्रस्यशिवस्यनंद्यादयोगणास्त्वत्किंकराःसंतस्तवद्वारियद्यपितिष्ठंति ॥ तथापितेशिवाज्ञापरिपालकाएवेतित्वन्मनःसंतोषोनभवेदतस्त्वदाज्ञापरिपालकएकोऽपेक्षितःइतिसमुदितार्थः ॥ १० ॥ ११ ॥

॥१२॥ इतीति ॥ कार्यतत्त्वावधारिणी ॥ कार्याकार्यतत्त्वज्ञा ॥१३॥ गणेशनिर्माणेकारणमाह ॥ कदाचिदिति ॥ मज्जमानायास्नांत्याम् ॥१४॥उत्तस्थावि
विति ॥ स्नानकालेनग्नीभवनंस्त्रीणांप्रायोनैत्यकमितिभावः ॥ तद्वचःस्वभृत्यस्थापनार्थोपदिष्टंसखीवाक्यम् ॥ १५ ॥ १६ ॥ रेखामात्रमणुमात्रमपीत्य
र्थः ॥ १७ ॥ पंकमिति ॥ पंकंशारीरमलमुत्सार्यनिष्काश्येत्यर्थः ॥ पुत्रकंगणेशाख्यम् ॥ १८ ॥ निवार्यइति ॥ यःपुरुषइहास्मिन्कालेमद्गृहस्यांतराग

तेसर्वेप्यस्मदीयाश्चतथापिनमिलेन्मनः ॥ एकश्चैवाऽस्मदीयोवैरक्षणीयस्त्वयाऽनघे ॥ १२ ॥ इत्युक्तापार्वतीदेवी सखीभ्यांरुचिरंवचः ॥ हितंमेनेतदातच्चकार्यतत्वावधारिणी ॥ १३ ॥ कदाचिन्मज्जमानायांपार्वत्यांवैसदाशिवः ॥ नंदिनंपरिभर्त्स्यैवआजगामस्वयंतदा ॥ १४ ॥ उत्तस्थौमज्जमानासालज्जितासुंदरीतदा ॥ तदीयंतद्वचश्चैवहितंमेनेसुखावहं ॥ १५ ॥ एवंजातेतदाकालेकदाचित्पार्वतीशुभा ॥ मदीयःसेवकःकश्चिद्भवेच्छुभतरस्तदा ॥ १६ ॥ मदाज्ञायाःपरंनान्यद्रेखामात्रंचलेदिह ॥ इतिविचार्यसादेवीकरयोर्जलसंभवम् ॥ पंकमुत्सार्यतेनैवनिर्ममेपुत्रकंशुभम् ॥ सर्वावयवनिर्दोषंसर्वावयवसुंदरम् ॥ १८ ॥ प्रतिष्ठाप्यतदाद्वारिनिवार्योयइहागमेत् ॥ वस्त्राणिचतदातस्मै दत्वाचविविधानिच ॥ १९ ॥ नानालंकरणंतस्मैदत्वाऽऽशिषमनुत्तमाम् ॥ मत्पुत्रस्त्वंमदीयोऽसिनाऽन्यथाक्वचिदस्तिमे ॥ २० ॥ तयाह्येवंकृतेसोवैनमस्कृत्याशिवांस्थितः ॥ किंकार्यंविद्यतेतेऽद्यकरवाणितवोदितम् ॥ २१ ॥ इत्युक्तासातदातेनद्वारपालोभवाऽद्यमे ॥ उक्त्वाचस्थापयामासयष्टिपाणिंगणाधिपम् ॥ तद्रूपंसुंदरंतस्यविलोक्यहर्षमागता ॥ मुखमाच्चुंब्यसातत्रह्याालिंग्यास्थापयत्तदा ॥ २३ ॥ स्थितोद्वारिसदातत्रपार्वतीहितकाम्यया ॥ स्वयंचमज्जनार्थंसास्थिताचसखिसंयुता ॥ २४ ॥ एतस्मिन्नेवकालेतुशिवोद्वारिसमागतः ॥ गणैःसार्द्धंसमायातोद्वारिचप्राविशद्यदा ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥

मेदागच्छेत्सनिवार्योनिवारणीयइत्युक्तवतीतिशेषः ॥ १९ ॥ आशिषंशतंसमाजीवेति ॥ पार्वतीगणेशंतोषयति ॥ मत्पुत्रइति ॥ २० ॥ उदितंकथितम् ॥ २१ ॥ इतीति ॥ तेनगणेशेनेत्येवमुक्तापार्वतीहेपुत्रत्वंमेममाद्येदानींद्वारपालोभवेत्युक्त्वागणाधिपंद्वारिस्थापयामासेतिसंबंधः ॥ २२ ॥ २३ ॥ २४ ॥
एतस्मिन्निति ॥ एतस्मिन्समयेमज्जनसमयइत्यर्थः ॥ २५ ॥ ॥ ॥ ॥

तदेति ॥ हेशिवाधुनात्वयागम्यते ॥ खलुतक्कयासिगच्छसिपरंतुमाव्रजमागच्छेतितेनगणेशेननिषिद्धःशिवइत्युनुषंगः ॥ निषेधप्रयोजनंतुमज्जनार्थमिति ॥ ॥ २६ ॥ यष्टिकांवेत्रंरोधनायनिवारणार्थंसमाम्रशद्गृहीतवानित्यर्थः ॥ २७ ॥ गणेशःशिवंक्षिपति ॥ कइति ॥ कीदृशयोग्यताकइत्यर्थः ॥ २८ ॥ २९ ॥ ततइति ॥ आज्ञापयत्तत्परीक्षणार्थमितिभावः ॥ साचकीदृशीपरीक्षेतितदाह ॥ कइति ॥ किंजातियोग्यतादिमानित्यर्थः ॥ ३० ॥ द्वारपा

तदानिषिद्धस्तेनैवगम्यतेचत्वयाऽधुना ॥ मज्जनार्थंस्थितामाताक्कयासिमाव्रजाऽधुना ॥ २६ ॥ इत्युक्त्वायष्टिकांत त्ररोधनायसमामृशत् ॥ तद्दृष्ट्वातुशिवःप्राहशिवोऽहमितिनान्यथा ॥ २७ ॥ इत्युक्त्वागम्यमानंतंयष्ट्याचैवाऽप्यताड यत् ॥ कःशिवःकुत्रयासित्वंकिमर्थंगम्यतेऽधुना ॥ २८ ॥ शिवउवाच ॥ मूर्खोऽसित्वंनजानासिशिवोहंगिरिजापतिः ॥ इत्युक्त्वाप्रविशंतंतंदंडेनाऽताडयत्पुनः ॥ २९ ॥ ततःशिवश्चसंक्रुद्धोगणानाज्ञापयत्तदा ॥ कोवाऽयंवर्ततेकिंचक्रि यतेपश्यतांपुनः ॥ ३० ॥ इत्युक्त्वातुशिवस्तत्रास्थितःक्रोधसमन्वितः ॥ गणास्तेक्रोधमापन्नाःपप्रच्छुर्द्वारपालकं ॥ ॥ ३१ ॥ कोऽसित्वंकुतआयातःकिंवात्वंचचिकीर्षसि ॥ तदीयंतद्वचःश्रुत्वाद्वारपालोऽब्रवीदिदम् ॥ ३२ ॥ यूयंकेकु तआयाताभवंतःसुंदराइमे ॥ यातदूरंकिमर्थंवैस्थितायूयंविरोधिनः ॥ ३३ ॥ एवंश्रुत्वावचस्तस्यहास्यंकृत्वापरस्प रम् ॥ कश्चाऽयंवर्ततेकिंचब्रवीतिशत्रुवत्पुनः ॥ ३४ ॥ तमूचुश्चतदासर्वेश्रूयतांद्वारपालक ॥ वयंशिवगणाःसर्वेशि वाज्ञापरिपालकाः ॥ ३५ ॥ त्वांचैवतुगणंमत्वानहन्यामोऽन्यथाहतः ॥ तिष्ठदूरेह्यतस्त्वंचकिमर्थंमृत्युमीहसे ॥ ॥ ३६ ॥ इत्युक्तेपिगणेशश्चद्वारंनमुक्तवांस्तदा ॥ तेसर्वेऽपिगणास्तत्रशिवंगत्वातथाऽब्रुवन् ॥ ३७ ॥ ततश्चैवंवचः श्रुत्वागणानूचेऽथशंकरः ॥ दूरतःक्रियतामेषषंढाइवस्थिताःकथम् ॥ ३८ ॥ स्वामिनोक्तागणास्तेचपुनरागत्यतत्रह ॥ रेरेद्वारेकथंकोऽयंस्थितश्चस्थापितःकुतः ॥ ३९ ॥ ॥ ॥ ॥ ॥

लकंगणेशं ॥ ३१ ॥ ३२ ॥ यूयमिति ॥ सुंदराइतिवक्रोक्तिः ॥ वस्तुतस्तेषांविरूपशरीरत्वादितिभावः ॥ यातापगच्छत ॥ ३३ ॥ ३४ ॥ ३५ ॥ त्वामिति हेद्वारपालत्वांगणेशंपार्वतीपुत्रंमत्वाज्ञात्वावयंनहन्यामः ॥ अन्यथाताड्नश्चेत्त्वंहतःस्याइत्यर्थः ॥ ३६ ॥ इतीति ॥ तथागणेशकृतमब्रुवन्न्यवेदयन्नि त्यर्थः ॥ ३७ ॥ ३८ ॥ तत्रगणेशसमीपे ॥ ३९ ॥

अवगणय्यावमान्य ॥ अवज्ञाकरणेनेत्यर्थः ॥ ४० ॥ शिवगणाअन्यापदेशेनगणेशंभर्त्सयंति ॥ सिंहासनमिति ॥ सृगालोजंबूकः ॥ स्वपराक्रमंप्रशंसंति ॥
तावदिति ॥ गणपराक्रमोगणानामस्मदादीनांपराक्रमस्त्वयायावन्नानुभूतोनज्ञातस्तावत्पर्यंतंत्वंगर्जसीत्यग्रिमेणाग्न्वयः ॥ ४१ ॥ अनुभूत्वानुभूयज्ञात्वे
त्यर्थः ॥ ल्यबभावआर्षः ॥ इतीति ॥ उक्तोगणैर्गणेशः ॥ ४२ ॥ यातेति ॥ अपसरतेत्यर्थः ॥ दर्शयामिस्वपराक्रममितिशेषः ॥ भवतोनाशयामीतिभावः
॥ ४३ ॥ ब्रवीति ॥ गणेशइतिशेषः ॥ अस्माकंमानखंडनंकरोतीतिभावः ॥ ४४ ॥ ४५ ॥ शिवइति ॥ शिवोविहस्यतानब्रवीदितिशेषः ॥ किमब्रवीत्त

अस्मानवगणय्यैवंकथंजीवनमिच्छसि ॥ द्वारपालावयंसर्वेस्थिताःकिंपरिभाषसे ॥४०॥ सिंहासनंगृहीत्वातुसृगालः
शिवमीहते ॥ तावद्गर्जसिमूर्खत्वंयावद्गणपराक्रमः ॥ ४१ ॥ नाऽनुभूतस्त्वयाचाऽत्रह्यनुभूत्वामरिष्यसि ॥ इत्युक्तः
क्रोधमापन्नोहस्ताभ्यांयष्टिकांतदा ॥ ४२ ॥ गृहीत्वाताडयामासगणांस्तान्परिभाषिणः ॥ यातयातह्यतोदूरेनोचे
द्दर्शयाम्यहं ॥ ४३ ॥ गणाऊचुः ॥ किंकर्तव्यंक्वगंतव्यंक्रियतेतेनकिंपुनः ॥ मर्यादारक्ष्यतेऽस्माभिरन्यथाकिंब्रवी
तिच ॥ ४४ ॥ ततस्तेवैगणाःसर्वेशिवंदूरेण्यवस्थितं ॥ क्रोशमात्रंतुकैलासाद्गत्वातेचतथाऽब्रुवन् ॥ ४५ ॥ शिवोविह
स्यतान्सर्वान्गणाःकिंतुनशूकराः ॥ एकोपिचबहून्सर्वान्भर्त्संतिकिंवदेत्पुनः ॥४६॥ गम्यतांताड्यतांचैषयःकश्चनभ
वेदिह ॥ भर्त्सितास्तेनदेवेनगतास्तेगणसत्तमाः ॥४७॥ गणाऊचुः ॥ रेरेत्वंश्रूयतांबालबालवत्परिभाषसे ॥ इतस्त्वं
दूरतोयाहिनोचेत्त्वंपश्यसेऽधुना ॥ ४८ ॥ इतिश्रुत्वावचस्तेषांकिंकरोमीतिदुःखितः ॥ एतस्मिन्नंतरेदेवीतेषांतस्यचवै
पुनः ॥ ४९ ॥ श्रुत्वातुकल्कलंतत्रसखींपश्याऽब्रवीदिदम् ॥ समागत्यसखीतत्रवृत्तांतंपश्यतीतदा ॥ ५० ॥ क्षणमा
त्रंतदादृष्ट्वाहर्षितासागतातदा ॥ तत्रगत्वातुतत्सर्वंकथितंगिरिजाऽग्रतः ॥ ५१ ॥

दाह ॥ गणाइति ॥ भोगणाःयूयंशूकराग्रामवराहानकिमपितुशूकराएवेत्यर्थः ॥ कुतोवराहाइत्यत्रहेतुमाह ॥ एकोपीति ॥ ४६ ॥ ४७ ॥ रेरेइति ॥ पश्य
सेइत्यत्रात्मनेपदमार्षं ॥४८॥ इतीति ॥ दुःखितःगणेशइतिशेषः ॥ श्रुत्वेति ॥ कल्कलंकोलाहलं ॥ आर्षोयंप्रयोगः ॥ कलकलमित्येवसाधुरितिभाति ॥ श्रुत्वा
हेसखित्वमिदंकोलाहलवृत्तंपश्यविचारयेतिपार्वतीसखीमब्रवीदित्यन्वयः ॥ पश्यतीत्यत्रनुमभावआर्षः ॥ ५० ॥ तत्रेति ॥ कथितंनिरूपितंसख्येतिशेषः ॥ ५१ ॥

किंकथितमितितदाह॥अस्मदीयइति॥अस्मदीयोगणेशोयदिनभवेन्नतिष्ठेत्तदाशिवस्तद्गणाःसर्वआयांत्यागच्छेयुरित्यर्थः॥अयंभावः॥गणेशेस्थितेशिवादय आगच्छंतीति ॥ अतःकथंनिवासावसरःनिवासस्यात्रवसतेःसमयइत्यर्थः ॥ अत्रावस्थातुमशक्यामितिभावः॥ अत्रनिवार्यावसरइतिपाठेनिवार्यावसरइतिशिव विशेषणम् ॥ निवार्योनिवारणीयआगमनसमयोयस्यसतथास्मिन्समयेशिवोनिवारणीयइत्यर्थः ॥ निवारणकर्मत्वस्यशिवेप्युपचारादितिभावः ॥ ५२॥ प्रविशं तीति ॥ शिवादयइत्यनुषंगः॥ एतत्तदागमनानुज्ञानं॥ सखीगणेशंप्रशंसति ॥ सम्यगिति ॥ अनेनगणेशेन ॥ ५३ ॥ ५४ ॥गणेशोयदिवाग्वादादिकंनकुर्यात्तदा तेऽक्लेशेनैवागच्छेयुरतोवाग्वादादिनातेनिर्जित्यनिरसनीयाइतिसखीपार्वतींप्रत्याह ॥ वाग्वादश्चेत्यादिना॥५५॥ अयमिति॥गणेशइत्यर्थः॥अस्मदीयोस्ति॥अ

अस्मदीयोभवेन्नैवसर्वेह्यायांतिवैध्रुवम् ॥ शिवश्चैवगणाःसर्वेनिवासावसरःकथं ॥ ५२ ॥ प्रविशंतिहठादेवनैतच्छु भतरंतव ॥ सम्यक्कृतंह्यनेनैवकोपिप्रवेशितोनहि ॥ ५३ ॥ दुःखंचैवानुभूयापितिरस्कारादिकंतथा ॥ अतःपरंतुवा ग्वादःक्रियतेचपरस्परम् ॥ ५४ ॥ वाग्वादश्चकृतोनैवतर्ह्यायांतुसुखेनवै ॥कृतेचैवाऽत्रवाग्वादेजित्वाचविनयेनच ॥ ५५ ॥ प्रविशंतुतदासर्वेनाऽन्यथाकर्हिचित्प्रिये॥अयंचैवाऽस्मदीयोवैभर्त्सितेभर्त्सितावयम् ॥५६॥तस्माद्देविलयाभ द्रेनत्याज्योमानउत्तमः ॥ शिवोमर्कटवत्तेऽद्यवर्ततेकिंकरिष्यति ॥५७॥ तदीयंतद्वचःश्रुत्वापार्वतीमानिनीतदा ॥ अ होस्थितंक्षणंनैवहठात्कारःकथंकृतः ॥ ५८ ॥ कथंचैवात्रकर्तव्योविनयोवाऽथवापुनः ॥ भविष्यतिभवत्वेवकृतंनैवा ऽन्यथापुनः ॥ ५९ ॥ इत्युक्त्वातुसखीतत्रप्रेषिताप्रिययातदा ॥ समागत्यसखीसाचप्रिययाकथितंशृणु ॥ ६० ॥

स्मिन्भर्त्सितेवयमपिभर्त्सितप्रायाइत्यर्थः ॥ ५६ ॥ तस्मादिति॥ मानःकोपोमदीयत्वाभिमानोवा ॥ शिवमपिधिक्करोतिसखी॥ शिवइति ॥ ५७ ॥ मानिनीमा नवत्यभूदितिशेषः ॥ पार्वतीवदति ॥ अहोइति ॥ ५८ ॥ यद्भवितव्यंतद्भवत्वेवेतिदैवंविचिंतयतिपार्वती ॥ भविष्यतीति ॥ यद्भविष्यतितद्भवत्वेवकृतंकर्मतुनान्य थानिष्फलमित्यर्थः ॥ अतोयुद्धाद्युपक्रमःकार्यइत्यभिप्रायः ॥ ५९ ॥ इतीति ॥ इत्येवंप्रकारेणोक्त्वापार्वत्येत्यादिः ॥ सखीप्रेषितागणेशनिकटइत्यर्थः ॥ समागत्येति ॥ सासखीसमागत्यगणेशमब्रवीद्धेगणेशत्वंप्रिययापार्वत्याकथितंवाक्यंशृण्वितिसंबंधः ॥ ६० ॥ ॥ ॥

सम्यगिति ॥ हेभद्रप्रविशताप्रादुर्भवतात्वयासम्यक्कार्यनकृतं ॥ यतोभवदग्रएतेगणाजयंतिसर्वोत्कृष्टत्वेनवर्तते ॥ अथवाएतेगणाजयंत्यभिभवंतित्वामिति शेषः ॥ जीधातोःसकर्ममकत्वपि ॥ तथाचोक्तं ॥ जयिर्जयाभिभवयोराद्येर्थेसावकर्मकः ॥ उत्कर्षप्राप्तिराद्योर्थोद्वितीयेर्थेसकर्मकइति ॥ अतःकिंभवान् कृतवानितिशेषः ॥ नकिमपीत्यर्थः ॥ अथवाकिंभवान्कुत्सितश्चासौभवांश्चेति ॥ अल्पयोग्यताकोभवानितिनिर्भर्त्सनमेतत् ॥ ६१ ॥ कृतमिति ॥ यत्कार्यंकृतंनिष्पादितंतत्कृतमेवासिद्धत्वेनस्थितमेवनपुनस्तद्विपरीतंकर्तुंशक्यतइतिभावः ॥ किंतुयत्कर्तव्यंतदेवत्वयाक्रियतामितिसंबंधः ॥६२ ॥ बद्धेति ॥ बद्धकच्छोबद्धपरिकरः ॥ उष्णीषंमुकुटंबध्वास्वस्यजंघामूरुंचनादयन्हस्तेनताडयन् ॥ वीरावेशंधृतवानितिभावः ॥ ६३॥ ६४ ॥ ६५ ॥ तदेति ॥ भव

सम्यक्कृतंत्वयाभद्रबलात्प्रविशतानहि ॥भवदग्रेगणाएतेजयंतिकिंभवान्पुनः ॥ ६१ ॥ कृतंचेद्वैकृतंचैवकर्त्तव्यंक्रियतांत्वया ॥ जित्वायांतुपुनर्वापिविनयैरथवाध्रुवम् ॥ ६२ ॥ इतिश्रुत्वावचस्तस्यामातुश्चैवगणस्तथा ॥ बद्धकच्छस्तथोष्णीषंबध्वाजंघोरुनादयन् ॥ ६३ ॥ उवाचसगणान्सर्वान्छ्रूयतांगणसत्तमाः ॥ अहंचगिरिजासूनुर्यूयंशिवगणास्तथा ॥ ६४ ॥ उभयेसमतांप्राप्ताःकर्तव्यंक्रियतांपुनः ॥ भवंतोद्वारपालाश्चअहंचैवकथंनहि ॥ ६५ ॥ भवद्भिश्चस्थितंह्यत्रयदाभवतिनिश्चितं ॥ तदाभवद्भिःकर्त्तव्यंशिवाज्ञापरिपालनम् ॥ ६६ ॥ इदानींतुमयाचात्रशिवाज्ञापरिपालनम् ॥ हठाद्वाविनयेनापिगंतव्यंमंदिरेपुनः ॥ ६७ ॥ इत्युक्ताश्चगणाःसर्वेययुस्तेशिवसंनिधौ ॥ लज्जितंलज्जितंगत्वानमस्कृत्यपुरःस्थिताः ॥ ६८ ॥ स्थित्वानिवेदितंसर्वंशिवाग्रेगणसत्तमैः ॥ तत्सर्वंतुतदाश्रुत्वाशंकरोवाक्यमब्रवीत् ॥ ६९ ॥ श्रूयतांचगणाःसर्वेयुद्धयोग्यंभवेन्नहि ॥ अहंचैवात्रयूयंचतत्रगौरीगणस्तथा ॥ ७० ॥ विनयःक्रियतेचेद्वैवश्योवैशंकरःस्त्रियाः ॥ कृतंचैवात्रकर्तव्यमेकाकीकिंकरिष्यति ॥ ७१ ॥ ॥ ॥

द्भिःशिवाज्ञापरिपालनंशिवस्याज्ञापरिपालनंकर्तव्यं ॥ ६६ ॥ मयातुशिवाज्ञापरिपालनंशिवायाःपार्वत्याआज्ञापरिपालनंकर्तव्यमित्यनेनोभयेषांसाम्यमितिबोधितं ॥ ६७ ॥ ६८ ॥ ६९ ॥ श्रूयतामिति ॥ हेसर्वेगणाःभवाद्भिःश्रूयतां ॥ किंतच्छ्रवणयोग्यमितितदाह ॥ युद्धेति ॥ युद्धयोग्यंयुद्धस्ययोग्यंसाधनसामग्रीगणेशेनभवेत् ॥ तदेवाह ॥ अहमिति ॥ अत्रास्मत्पक्षेऽहंयूयंसर्वेगणाश्चसंति ॥ तत्रपक्षेचगौरीपार्वतीगणोगणेशश्चैतावुभावेव ॥ ७० ॥ विनयइति ॥ ततोयुद्धंविनाविनयःस्नेहोयदिक्रियतेतदास्त्रियाःपार्वत्याःवश्योहंशंकरः ॥ अतःकृतंयद्युद्धोपक्रमरूपंतत्कर्तव्यमेवेत्यर्थः ॥ ७१ ॥

शिवःस्वसैन्यपराक्रमंवर्णयति ॥ भवंतइति ॥ लाघवमल्पपराक्रमत्वं ॥ ७२ ॥ स्त्रियाइति ॥ स्त्रियापार्वत्याऽऽग्रहःकथंकार्योऽपितुनकर्तव्यः ॥ यदितुकृतः स्यात्तदास्त्रीतत्फलमवाप्स्यतिप्राप्नुयात् ॥ उपसंहरति ॥ कर्तव्यमिति ॥ ७३ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांगणयुद्धंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ओंनमःशिवाय ॥ शिवोगणान्स्वान्गणपत्युमाभ्यांपराजितान्युध्यवलोक्यरुष्टः ॥ चिच्छेदमूर्धानमुमासुतस्येत्येवंत्रयस्त्रिंश उदीर्यतेऽत्र ॥ १ ॥ इत्युक्ताइति ॥ शिवेनोक्ताइत्यर्थः ॥ १ ॥ युद्धाटोपंयुद्धसंनाहं ॥ इदंवक्ष्यमाणवाक्यं ॥ २ ॥ ३ ॥ तथापीति ॥ मय्येकस्मिन्सति ॥

भवंतश्चगणालोकेयुद्धेचैवविशारदाः ॥ मदीयाश्चकथंयुद्धंहित्वायास्यथलाघवम् ॥ ७२ ॥ स्त्रियाऽऽग्रहःकथंकार्यः कृत्वाफलमवाप्स्यति ॥ कर्तव्यंसर्वथायुद्धंयद्भावितद्भविष्यति ॥ ७३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांगण युद्धंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ सूतउवाच ॥ इत्युक्तास्तेगणास्तेननिश्चयंपरमंगताः ॥ संनद्धा स्तेतदाजग्मुःसर्वेऽपिशिवमंदिरं ॥ १ ॥ गणोऽपिचतथादृष्ट्वाह्यायातान्गणसत्तमान् ॥ युद्धाटोपंविधायैवस्थितश्चैवा ऽब्रवीदिदम् ॥ २ ॥ आयांतुगणपाःसर्वेशिवाज्ञापरिपालकाः ॥ अहमेकस्तुबालश्चशिवाज्ञापरिपालकः ॥ ३ ॥ तथाऽपिपश्यतांदेवीपार्वतीसूनुजंबलं ॥ शिवश्चैवगणानांतुबलंपश्यतुवैपुनः ॥ ४ ॥ बलवद्बालयुद्धंचमानिनीशिव पक्षयोः ॥ भवद्भिश्चकृतंपूर्वंयुद्धंयुद्धविशारदाः ॥ ५ ॥ मयापूर्वंकृतंनैवबालोऽस्मिक्रियतेऽधुना ॥ तथापिभवतांल ज्जाभविष्यतिजयाजये ॥ ६ ॥ ममैवंतुभवेन्नैववैपरीत्यंभविष्यति ॥ ममैवंभवतांनैवगिरिजाशिवयोरिह ॥ ७ ॥ एवंज्ञात्वाचकर्तव्यंयुद्धंचैवगणेश्वराः ॥ भवद्भिःस्वामिनंदृष्ट्वामयाचमातरंपुनः ॥ ८ ॥ क्रियतेकीदृशंयुद्धंभवितव्यंभ वत्विति ॥ इत्येवंभर्त्सितास्तेतुक्रुद्धालोहितचक्षुषः ॥ ९ ॥ ॥ ॥ ॥

गणेषुचबहुषुसत्स्वपीत्यर्थः ॥ पार्वतीदेवीसूनुजंसूनोर्मत्तोजायतइतिसूनुजंबलंपराक्रमंपश्यतांपश्यंत्ववलोकयतु ॥ आत्मनेपदमार्षम् ॥ ४ ॥ बलवदिति ॥ मा निनीशिवपक्षयोःपार्वतीपरमेश्वरपक्षयोर्मध्येइदंबालयुद्धंगणेशकर्तृकयुद्धमेवबलवद्बलिष्ठंभवेदित्यर्थः ॥ हेयुद्धविशारदायुद्धकुशलाः ॥ ५ ॥ तथापीति ॥ अ त्रतथापिभवतामत्रभविष्यतिपराजयइतिपाठांतरम् ॥ ६ ॥ तदेवपुनरनुवदति ॥ ममेति ॥ एवंपूर्वोक्तपराजयः ॥ वैपरीत्यंजयः ॥ इदंजयाजयरूपंभाव्यंनकेव लमस्माकमेवकिंतुगिरिजाशिवयोरपिभविष्यतीत्यर्थः ॥ यथाहमनुः ॥ यस्तुभीतःपरावृत्तःसंग्रामेहन्यतेपरैः ॥ भर्तुर्यद्दुष्कृतंकिंचितत्सर्वंप्रतिपद्यतइति ७ ८ ९

॥ १० ॥ पश्येति ॥ स्वपराक्रममितिशेषः ॥ नंदीति ॥ नंदीशिवसेवकःपादंगणेशस्यधृत्वाव्यकर्षयत् ॥ ११ ॥ धावन्निति ॥ ततोभृंग्यपरःशिवसेवको द्वितीयंगणेशस्यपादंव्यकर्षयत् ॥ १२ ॥ आहत्येति ॥ गणेशस्तौनंदिभृंगिनोःपादौहस्ताभ्यामुत्त्रोट्यद्वारिस्थितंपरिघंगृहीत्वासर्वान्शिवसेवकानापोथय त्ताडितवान् ॥ १३ ॥ १४ ॥ संमुखमिति ॥ हृदयेहृदयप्रदेशेतेहतास्ताडिताइत्यर्थः ॥ १५ ॥ विदिशोऽग्निकोणादिकोणान् ॥ १६ ॥ १७ ॥ परा

विविधान्यायुधान्येवंधृत्वातेचसमुद्ययुः ॥ घर्षयंतस्तथादंतान्हुंकृत्यचपुनःपुनः ॥ १० ॥ पश्यपश्यन्नुवंतश्चगणास्ते समुपागताः ॥ नंदीप्रथममागत्यधृत्वापादंव्यकर्षयत् ॥ ११ ॥ धावन्भृंगीद्वितीयंचपादंधृत्वातथैवच ॥ यावत्पादं व्यकृषतांतावद्धस्तेनवैगणः ॥ १२ ॥ आहत्यतौतुहस्ताभ्यामुत्त्रोट्यपादकौस्वयम् ॥ द्वारस्थंपरिघंगृह्यसर्वानापो थयत्तदा ॥ १३ ॥ केषांचित्कटयोभिन्नाःकेषांचित्पृष्ठकानिच ॥ केषांचित्तुशिरांस्येवकेषांचिन्मस्तकानिच ॥ १४ ॥ केषांचिज्जानुनीतत्रकेषांचित्कंधरास्तथा ॥ संमुखंचागतायेवैतेसर्वेहृदयेहताः ॥ १५ ॥ केचिच्चपतिताभूमौकेचिच्च विदिशोगताः ॥ केचिच्चचरणौनत्वाकेचिच्छिवांतिकंगताः ॥ १६ ॥ तेषांमध्येतुकश्चिद्वैसंग्रामेसंमुखोनहि ॥ सिंहंदृ ष्ट्वायथायांतिमृगाश्चैवदिशोदश ॥ १७ ॥ तथातेचगणाःसर्वेगताश्चैवसहस्रशः ॥ परावृत्यतथासोऽपिद्वारिचसमुप स्थितः ॥ १८ ॥ कल्पांतकरणेकालोदृश्यतेचतथाहिसः ॥ एतस्मिन्समयेतत्रब्रह्माद्याइंद्रश्चदेवताः ॥ १९ ॥ प्रेरिता नारदेनाऽथदेवाःसर्वेसमागमन् ॥ विष्णुश्चाऽपिसमायातःशिवस्यहितकाम्यया ॥ २० ॥ समागतास्तदासर्वेसमा श्वास्यपुरःस्थिताः ॥ ऋषयश्चतथासर्वेअप्सरसांगणस्तथा ॥ २१ ॥ शिवंचैवनमस्कृत्यआज्ञांदेहिप्रभोइति ॥ ग णान्भिन्नांस्तदादृष्ट्वातेभ्यःसर्वंनिवेदितम् ॥ २२ ॥ तेभ्यःसर्वंनिवेद्यैवब्रह्माणंसमुवाचह ॥ ब्रह्मंस्त्वयाचगंतव्यंप्रसा द्योऽयंमहाबलः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥

वृत्येति ॥ सोपिगणेशःपरावृत्यपरिवृत्यपुनर्द्वारिस्थितः ॥ १८ ॥ कल्पांतकरणेप्रलयकालीनध्वंसानुकूलेकालेयथादृश्यतेदृश्येततथाऽदृश्यतेत्यर्थः ॥ क ल्पांतकरणःकालइतिपठांतरम् ॥ तदाब्रह्माद्यादेवर्ष्यादयःशिवमगमन्नित्याह ॥ एतस्मिन्नित्यादिना ॥ १९ ॥ २० ॥ २१ ॥ गणानिति ॥ तदाभिन्नान्युद्धभ ग्नान्गणान्दृष्ट्वातेभ्योदेवादिभ्यःसर्ववक्ष्यमाणंनिवेदितं ॥ २२ ॥ शिवेनेतिशेषः ॥ शिवआह ॥ ब्रह्मन्निति ॥ प्रसाद्यःसांत्वनीयः ॥ अयंगणेशः ॥ २३ ॥

प्रलयोनाशः ॥ शिवाज्ञतोब्रह्मासांत्वनायगणेशंप्रतिजगामेत्याह ॥ इतीति ॥ २४ ॥ तुंदिलश्मश्रुलौशिवानुचरविशेषौ ॥ समायातमिति ॥ गणेशःस मायातंतंब्रह्माणंदृष्ट्वाऽयंशिवानुचरोमद्यंयुद्धार्थमागतइतिमत्वाब्रह्मणःश्मश्रूण्यवाकिरदुत्पाटयामासेत्यर्थः ॥ २५ ॥ तदाब्रह्मावक्ति ॥ क्षम्यतामिति ॥ समागतंमयेतिशेषः ॥ २६ ॥ यातगच्छत ॥ २७ ॥ २८ ॥ २९ ॥ भूतेति ॥ आदेशयदाज्ञापयामासयुद्धार्थमितिशेषः ॥ ३० ॥ यस्येति ॥ विमोचि तंपातितंतेनतेनेतिसंबंधः ॥ संशयंस्थितिसंशयम् ॥ ३१ ॥ नेति ॥ इच्छावशःस्वेच्छाधीनोनचपराधीनःशिवःस्वयंतथाभूतंनियतनिर्मितियुतंब्रह्मांडमका

यथानप्रलयःस्याद्वैतथाकार्यंत्वयाप्रभो ॥ इत्युक्तःसययौब्रह्मायत्रास्तेसमहाबलः ॥ २४ ॥ तुंदिलःश्मश्रुलश्चैवसर्वै ऋषिवरैःसह ॥ समायातंचतंदृष्ट्वागणःश्मश्रूण्यवाकिरत् ॥ २५ ॥ क्षम्यतांक्षम्यतांदेवनयुद्धार्थंसमागतम् ॥ इत्येवं ब्रुवतितस्मिंस्तावत्परिघमाददे ॥ २६ ॥ गृहीतंपरिघंदृष्ट्वापलायनपरास्तदा ॥ यातयातब्रुवंतस्तेपरिघेणाऽऽहता स्तदा ॥ २७ ॥ स्वयंचपतिताःकेचित्केचित्तेननिपातिताः ॥ केचिच्चशिवसामीप्यंगतास्तत्क्षणमात्रतः ॥ २८ ॥ त थाविधांश्चतान्दृष्ट्वाशिवःकोपसमन्वितः ॥ इंद्रादींश्चदेवगणान्षण्मुखप्रमुखान्गणान् ॥ २९ ॥ भूतप्रेतपिशाचांश्चस र्वानादेशयत्तदा ॥ तेसर्वेचयथाटोपंगतास्तेसर्वतोदिशम् ॥ ३० ॥ यस्ययस्यायुधंयच्चतत्तत्सर्वंविमोचितम् ॥ पृथि वीव्याकुलाजातासंशयंपरमंगता ॥ ३१ ॥ नजातंब्रह्मणोऽप्यायुर्ब्रह्मांडंसंहरन्निव ॥ अकालेचतथाभूतंशिवश्चेच्छा वशःस्वयम् ॥ ३२ ॥ तेसर्वेचगतास्तत्रषण्मुखाद्याश्चयेपुनः ॥ सर्वेव्यर्थायुधाजाताआश्चर्यंपरमंगताः ॥ ३३ ॥ श क्तिद्वयंतथातत्रनिर्मितंगणहेतवे ॥ एकाप्रचंडरूपंचधृत्वाऽतिष्ठन्महामुखी ॥ ३४ ॥ श्यामपर्वतसंकाशंविस्तार्यमुख गह्वरम् ॥ एकाविद्युत्स्वरूपाचबहुहस्तयुतासती ॥ ३५ ॥ ॥ ॥ ॥

लेचानियतकालेपिसंहरन्निवादृश्यतेतिशेषः ॥ तदाब्रह्मणश्चतुर्मुखस्यायुःशतंसमानजातमित्यभादित्यर्थः ॥ ३२ ॥ ३३ ॥ शिवात्स्वपक्षपराभवंसंभा व्यपार्वतीद्वेशक्तीनिर्मममइत्याह ॥ शक्तिद्वयमिति ॥ गणहेतवेगणेशस्यसाहाय्यार्थम् ॥ तत्रैकशक्तेःस्वरूपमाह ॥ एकेति ॥ ३४ ॥ श्यामपर्वतसंकाश मंजनाचलसदृशम् ॥ मुखगह्वरंमुखविवरम् ॥ द्वितीयशक्तेःस्वरूपमाह ॥ एकेति ॥ अपरेत्यर्थः ॥ ३५ ॥ ॥

आयुधानीति ॥ आयुधानिशस्त्राणिसर्वैःशिवपक्षीयैर्मोचितानित्यक्तानिशक्तिभयादितिभावः ॥सातानिगृहीत्वातन्मुखेन्यक्षिपदितिसंबंधः ॥ ३६ ॥ ततःशक्तिसहायोगणेशःस्वपरिवेणताडयामासेत्याह ॥ देवाइति ॥ परिघंगदाम् ॥ अभितःपरितःसमयेत्यादिनाद्वितीया ॥ लोडयामासताडयामासत्रासंप्रापयामासेतिवा ॥ ३७ ॥ गिरिवरेणमंदराचलेन ॥ सागरःक्षीरोदधिः ॥ एकेनगणेशेन ॥ ३८ ॥ व्याकुलत्वभावनामाह ॥ किमिति ॥ परिघमिति ॥ भ्रामयामासगणेशइतिशेषः ॥ ३९ ॥ रंभाचेति ॥ तिलोत्तमाऽप्सरोविशेषः ॥ शेषाःप्रसिद्धाः ॥ रंभादयःसमाजग्मुरित्यग्रिमेणान्वयः ॥ ४० ॥ ४१ ॥ विस्मयस्वरूपमाह ॥ ईदृशमिति ॥ युद्धमित्यर्थः ॥ ४२ ॥ ४३ ॥ सग्रहाभौमादिग्रहसहिताश्चीर्णाश्चलिताः ॥ ४४ ॥ षण्मुखइति ॥ आवार्यवेष्टयित्वा ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ कोपमिति ॥ मयाधुनेत्यत्रमयासहेतिपाठांतरम् ॥ ४९ ॥ ५० ॥

आयुधानिचसर्वाणिसर्वैश्चमोचितानिच ॥ गृहीत्वातन्मुखेसाचन्यक्षिपत्सकलानिच ॥ ३६ ॥ देवायुद्धेनदृश्यंतेपरितःपरिघंपुनः ॥ एकोपिसकलंसैन्यंलोडयामासदुस्तरम् ॥ ३७ ॥ यथागिरिवरेणैवलोडितःसागरःपुरा ॥ एकेननिहताःसर्वेव्याकुलाह्यभवंस्तदा ॥ ३८ ॥ किंकर्तव्यंक्वगंतव्यंनज्ञायंतेदिशोदश ॥ परिघंभ्रामयामाससव्यापसव्यमेवच ॥ ३९ ॥ रंभाचमेनकाचैवउर्वशीचतिलोत्तमा ॥ इत्याद्यप्सरसांश्रेष्ठाःपुष्पचंदनपाणयः ॥ ४० ॥ ऋषयोनारदाद्याश्चयेचयुद्धेऽतिलालसाः ॥ तेसर्वेचसमाजग्मुर्युद्धस्यदर्शनायवै ॥ ४१ ॥ तेऽपिविस्मयमापन्नाईदृशंनकदापिह ॥ गुणरूपंतदादृष्टंकालोऽयमपरःकुतः ॥ ४२ ॥ पृथिवीकंपितादेवीसमुद्रसहितातदा ॥ पर्वताःप्रतिनादंवैचक्रुःसंग्रामसंभवम् ॥ ४३ ॥ द्यौश्चैवसग्रहाश्चीर्णाःसर्वेव्याकुलतांगताः ॥ देवाःपलायिताःसर्वेगणाश्चैवपलायिताः ॥ ४४ ॥ षण्मुखश्चतदासर्वानावार्यपुरतःस्थितः ॥ शक्तिद्वयेनतद्युद्धंसर्वंचनिष्फलीकृतम् ॥ ४५ ॥ येऽवस्थिताश्चसर्वेऽपिशिवस्यांऽतिकमागताः ॥ तेसर्वेमिलिताश्चैवनमस्कृत्यशिवंतदा ॥ ४६ ॥ अब्रुवन्वचनंसर्वेकोऽयंगणवरःशुभः ॥ पुराचैवश्रुतंयुद्धमिदानींबहुधापुनः ॥ ४७ ॥ दृश्यतेनश्रुतंदृष्टमीदृशंनकदाचन ॥ किंचिद्विचार्यतांदेवह्यन्यथाप्रलयोभवेत् ॥ ४८ ॥ इत्येवंवचनंश्रुत्वाशिवःपरमकोपनः ॥ कोपंजगामतत्रैवगम्यतांचमयाऽधुना ॥ ४९ ॥ देवसैन्यंचतत्सर्वंशिवस्याऽनुजगामह ॥ एतस्मिन्नंतरेदेवंनमस्कृत्याऽथनारदः ॥ ५० ॥ ॥

॥ गणेशोहंतव्यइतिनारदःशिवंप्रत्याह ॥ अयमिति ॥ ५१ ॥ ५२ ॥ गणेशःकपटेनैवहंतव्यःकपटंविनासहंतुमशक्यइतिमनसाशिवोविचिंतयति ॥ छलेनेति ॥ ५३ ॥ ५४ ॥ ५५ ॥ तत्रविष्णुःशिवंप्रेरयामासेत्याह ॥ प्रथममिति ॥ साकाप्रेरणेतितदाह ॥ अहमिति ॥ विष्णुरित्यर्थः ॥ ५६ ॥ छलमिति ॥ अयंगणेशस्तामसस्तमोगुणप्रचुरइतिदुरासदोदुर्धर्षोहन्यात्हतःस्यात्॥ ५७ ॥ शक्तीति ॥ तदाशक्तिद्वयंकर्तृतथाविधंमायाकारिणंविष्णुंदृष्ट्वालीनंनष्टमभूदितिशेषः ॥ ५८ ॥ वलवत्तरोवलवान् ॥ एकतइति ॥ मुखंविष्णुमुखंमुख्यंवाअवकाशमितिभावः ॥ मुखंमुख्येचवक्रेस्यादितिकोशः ॥ ५९ ॥ शिवगणेश

अयंचजीवितश्चेत्स्यात्प्रलयंचकरिष्यति ॥ यथातथाप्ययंदेवहंतव्यःसर्वथालया ॥ ५१ ॥ इत्युक्त्वानारदस्तत्रह्यंतर्धानंगतस्तदा ॥ शिवोऽपिसहसैन्येनयुद्धंचक्रेसुदारुणम् ॥ ५२ ॥ महादेवोऽपितंदृष्ट्वाविस्मयंपरमंगतः ॥ छलेनैवचहंतव्योनाऽन्यथाहन्यतेपुनः ॥ ५३ ॥ इतिबुद्धिंसमास्थायसैन्यमध्येऽव्यवस्थितः ॥ शिवेदृष्टेतदादेवेनिर्गुणेगुणरूपिणि ॥ ५४ ॥ विष्णौचैवापिसंग्राममआयातेसर्वदेवताः ॥ गणाश्चैवतथाहर्षंजग्मुःसर्वेपरस्परम् ॥ ५५ ॥ प्रथमंप्रेरयामासविष्णुःसर्वसुखावहः ॥ अहंचमोहयिष्यामिहन्यतांचलयाप्रभो ॥ ५६ ॥ छलंविनानहन्याद्वैतामसोयंदुरासदः ॥ इतिकृत्वामतिंतत्रविष्णुर्मोहपरायणः ॥ ५७ ॥ शक्तिद्वयंतदालीनंहरिंदृष्ट्वातथाविधम् ॥ गणेशोऽपितदातत्रयत्रविष्णुःस्थितःस्वयम् ॥५८॥ परिघंक्षिप्तवांस्तत्रगणोपिबलवत्तरः ॥ एकतश्चमुखंदृष्ट्वाशिवोऽपिचजगामह ॥ ५९ ॥ त्रिशूलंचसमादायगतःकोपसमन्वितः ॥ त्रिशूलंपातितंहस्तात्पिनाकंपुनराददे ॥ ६० ॥ तदप्यपातयद्भूमौपरिघेणमहात्मना ॥ हताःपंचतथाहस्ताःपंचभिःशूलमाददे ॥ ६१ ॥ अहोदुःखतरंनूनंगणानांकिंपुनर्भवेत् ॥ परिघार्दिताश्चतेदेवायाताश्चैवदिशोदश ॥ ६२ ॥ विष्णुस्तंचगणंदृष्ट्वाधन्योऽयमितिचाऽब्रवीत् ॥ बहवोदेवताश्चैवमयादृष्टास्तथापुनः ॥ ६३ ॥ ॥ ॥ ॥ ॥

योर्युद्धमुपक्रांतमित्याह ॥ त्रिशूलमिति ॥ पातितंगणेशेनेतिशेषः ॥ आददेस्वीकृतवान् ॥ शिवइतिशेषः ॥ ६० ॥ तदिति ॥ पिनाकधनुरित्यर्थः ॥ अपातयत् गणेशइतिशेषः ॥ हताइति ॥ शिवस्यपंचवक्त्रत्वेनदशहस्तत्वात्तत्रपंचहस्ताहताइत्यर्थः ॥ ६१ ॥ तदाशिवपक्षस्थानांमहाकष्टमभूदित्याह ॥ अहोइति ॥ ॥ ६२ ॥ देवादीनांनकोपिशौर्यादिनागणेशस्यसमइतिविष्णुराह ॥ बहवइति ॥ बव्हइत्यर्थः ॥ बव्हादिभ्यश्चेतिविकल्पेनङीषोऽभावः ॥ ६३ ॥

॥ ६४ ॥ विष्णुगणेशयोर्युद्धमाह ॥ एवमित्यादिना ॥ चिक्षेपेति ॥ गणेशोविष्णवेपरिघंचिक्षेपक्षिप्तवान् ॥ तदाविष्णुश्चक्रेचक्रावछेदेनचूर्णतरोऽभूदि तिशेषः ॥ परिघोविष्णुमस्पृष्ट्वाचक्रमचूर्णयदितिभावः ॥ अत्रचक्रंचूर्णतरंतदेतिपाठांतरम् ॥ ६५ ॥ गृहीत्वेति ॥ अत्रग्रहीतुमुद्यतश्चक्रमितिपाठांतरम् ॥ ६६ ॥ गृहीत्वेति ॥ पक्षिणापक्षवतागरुडेनाविष्णुवाहनेनगणेशप्रक्षिप्तंपरिघखंडंगृहीत्वाविकलीकृतंचूर्णीकृतम् ॥ विफलीकृतमितिपाठांतरम् ॥ यत्रेति ॥ गणेशोयत्रयत्रयद्यद्देशेपरिघंप्राक्षिपत् ॥ ६७ ॥ शून्यमिति ॥ तंदेशंशून्यंपरिघशून्यंसविष्णुःकृतवान् ॥ किंच ॥ सत्तमःसतांब्रह्मादीनांश्रेष्ठो

दैत्याश्चबहवश्चैवयक्षगंधर्वराक्षसाः ॥ नैतेनसमतांयांतिरूपशौर्यगुणादिभिः ॥ ६४ ॥ एवंविष्णुंब्रुवंतंचपरिघंभ्राम यंस्तदा ॥ चिक्षेपविष्णवेतत्रचक्रेचूर्णतरस्तदा ॥ ६५ ॥ गृहीत्वाविष्णुश्चक्रंतुयुयुधातेपरस्परम् ॥ खंडंतुपरिघस्यापि हरयेप्राक्षिपत्तदा ॥ ६६ ॥ गृहीत्वागरुडेनाऽपिपक्षिणाविकलीकृतम् ॥ यत्रयत्राक्षिपेत्तंवैपरिघंतत्रतत्रह ॥ ६७ ॥ शून्यंचकृतवान्सोवैविजयंचापसत्तमः ॥ विष्णुश्चैवगणश्चैवयुयुधातेपरस्परम् ॥ ६८ ॥ एतदंतरमासाद्यशूलपाणि स्तथोत्तरे ॥ आगत्यचत्रिशूलेनशिरस्तस्यन्यपातयत् ॥ ६९ ॥ छिन्नेशिरसितस्यैवंदेवसैन्यंसुनिश्चलम् ॥ नारदो पितदागत्वादेव्यैसर्वंन्यवेदयत् ॥ ७० ॥ मानिनिश्रूयतांमानस्त्याज्योनैवत्वयाऽधुना ॥ इत्युक्त्वांऽतर्हितस्तत्रनारदः कलहप्रियः ॥ ७१ ॥ जयजयेतिभाषंतोदेवाःसुखमुपस्थिताः ॥ यच्चकारतदादेवीश्रूयतामृषिसत्तमाः ॥ ७२ ॥ इति श्रीशिवमहापुराणेज्ञानसंहितायांगणयुद्धभंगोनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ सूतउवाच ॥ श्रूयतां कथयाम्यद्ययज्जातंतदनंतरम् ॥ कोपयुक्तायथादेवीचकारश्रूयतांतथा ॥ १ ॥ ॥ ॥

विष्णुर्विजयमापप्राप ॥ ६८ ॥ एतदिति ॥ अंतरमवकाशंयुद्धार्थंगंतुंसमयमितिभावः ॥ उत्तरउत्तरदेशे ॥ तस्यगणेशस्यशिरोन्यपातयदच्छिनदित्यर्थः ॥ ६९ ॥ सुनिश्चलंस्वस्थम् ॥ देव्यैपार्वत्यै ॥ न्यवेदयदकथयत् ॥ ७० ॥ किमकथयदितितदाह ॥ मानिनीति ॥ हेमानिनिपार्वति ॥ मानःकोपोन त्याज्यइति ॥ ७१ ॥ ७२ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांगणयुद्धभंगोनामत्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ ॐनमःशिवाय ॥ शंकरेणशिरःकृत्तमात्मजस्ययुधीत्यपि ॥ वृत्तांतश्रवणेनैवक्रोध्यमानांशिवांशिवः ॥ १ ॥ गजत्क्षयभयाद्देवैःसांत्वनैःपरितोषयन् ॥ उज्जी वितंसुतंचक्रेसंधायगजमस्तकम् ॥ २ ॥ ततस्तंस्वगणाध्यक्षंकृतवांस्तन्मुदेतदा ॥ एवंचरितमध्यायेचतुस्त्रिंशेऽत्रवर्ण्यते ॥ ३ ॥ श्रूयतामिति ॥ १ ॥

तावदिति ॥ क्रोध्यमानाशिवेनक्रोधंप्राप्यमाणागिरिजापार्वतीकथंकरोमिकिंकरोमिप्रलयंमाशंचकरोमिकिमितिविचिंतयंतीसतीशक्तीःस्वांशभूतानिर्ममइ त्यग्रिमान्वयः ॥ २ ॥ ३ ॥ निर्ममइति ॥ निर्मितास्ताःशक्तयोजांज्वल्यमानादेदीप्यमानाःसत्योहेमातःपार्वतियत्कार्यंतत्त्वयाऽऽदिश्यतामित्यब्रुवन्निति शेषः ॥ ४ ॥ देवादीनविगणय्यप्रलयःकार्यइतिपार्वत्याह ॥ प्रलयश्चेति ॥ ५ ॥ स्वकीयत्वंपरकीयत्वंचाविगणय्यसर्वेषांनाशःकर्तव्यइतिसूचयितुंन

शिवोपितच्छिरश्छित्त्वायावद्दुःखमुपाददे ॥ तावच्चगिरिजादेवीक्रोध्यमानाचहाकथं ॥ २ ॥ किंकरोमिक्कगच्छामिप्र लयंकिंकरोम्यहं ॥ इत्येवंदुःखितासाचशक्तीःसहस्रशस्तदा ॥ ३ ॥ निर्ममेनिर्मितास्ताश्चनमस्कृत्यशिवांतदा ॥ जा ज्वल्यमानास्ताःसर्वामातरादिश्यतामिति ॥ ४ ॥ पार्वत्युवाच ॥ प्रलयश्चात्रकर्तव्योनात्रकार्याविचारणा ॥ देवां श्चैवगणांश्चैवयक्षराक्षसकानथ ॥ ५ ॥ अस्मदीयःपरश्चैवविद्यतेनममापिह ॥ तदाज्ञप्ताश्चताःसर्वाःसंहारंचक्रिरे तदा ॥ ६ ॥ कल्पांतकालेसंप्राप्तेसंहरणार्थमुद्यताः ॥ यथाचाऽत्रतृणानीहह्यग्निःसंहरतेतथा ॥ ७ ॥ एवंताःश क्तयःसर्वाःसंहारंकर्तुमुद्यताः ॥ नगणयंतिदेवंवाब्रह्माणंवाथशंकरम् ॥ ८ ॥ इंद्रंवायक्षराजंवास्कंदंवासूर्यमेववा ॥ सर्वास्ताश्चैवसंहारंकुर्वंतिस्मनिरंतरम् ॥ ९ ॥ यत्रयत्राऽनुपश्येततत्रतत्राऽपिशक्तयः ॥ करालाःकुब्जकाःखंजालंब शीर्षाह्यनेकशः ॥ १० ॥ हस्तेधृत्वाऽशुदेवांश्चमुखेनैवाक्षिपंस्तदा ॥ तंसंहारंतदादृष्ट्वाहरोहरिस्तथैवच ॥ ११ ॥ ब्र ह्माचऋषयश्चाऽन्येदेवाइंद्रादयस्तदा ॥ किंकरिष्यतिदेवीसासंहारंचाप्यकालतः ॥ १२ ॥ सर्वेसंशयमापन्नाजीव नायहितायवा ॥ सर्वेचमिलिताश्चेमेकिंकर्तव्यंविचिंत्यताम् ॥ १३ ॥ इतिविचार्यतेसर्वेह्यूचुस्तेचपरस्परम् ॥ यदि चगिरिजादेवीप्रसन्नाचभवेदिह ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कोप्यस्मदीयइत्यादिकंपार्वतीकथयति ॥ अस्मदीयइति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ शक्तीनांकरालत्वंव्यापकत्वंचदर्शयति ॥ यत्रयत्रेति ॥ १० ॥ तदा शक्तयोदेवादीनपिभक्षयितुंप्रवृत्ताइत्याह ॥ हस्तइति ॥ अत्रमुखेचैवेतिपाठांतरम् ॥ तदातादृशंलयंदृष्ट्वाब्रह्मादयोपिदेवाइतिकर्तव्यतामलभमानाःपरस्प रंव्यचारयन्नित्याह ॥ तमित्यादिना ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ ॥ ॥ ॥

तदाक्रोधाक्रांतांपार्वतींदृष्ट्वाशिवादयोपितत्निकटेगंतुंनाशक्नुवन्नित्याह ॥ शिवइति ॥ यदाकटिरर्थाच्छिवस्यभग्नाविदारिताशक्त्यातदाशिवोपिदुःखमाप
न्नःप्राप्तवान्सन् ॥ १५ ॥ उत्सहेतशक्नुयादित्यर्थः ॥ १६ ॥ केचनदेवाजाज्वल्यमानंतेजःपार्वतीतेजोदृष्ट्वादूरतरंस्थिताइत्यग्रिमान्वयः ॥ १७ ॥ देवद
र्शनोदेवस्यदेवानांवादर्शनंयस्यसतथादेवदर्शनोत्सुकइत्यर्थः ॥ १८ ॥ १९ ॥ पार्वतीप्रसादमंतरासुखसम्प्राप्तिर्नस्यादितितत्प्रसादार्थमेवयत्नःकर्तव्यइति
नारदोदेवान्प्रतिकथयति ॥ यावदिति ॥ २० ॥ २१ ॥ तदेति ॥ प्रसादयामासुस्तुष्टुवुः ॥ २२ ॥ कथंस्तोत्राण्यकुर्वन्नितितदाह ॥ जगदंबेति ॥ हेजगदं

तदाचैवभवेत्स्वास्थ्यंनान्यथाभ्भवतिध्रुवं ॥ शिवोऽपिदुःखमापन्नःकटिर्भग्नायदातदा ॥ १५ ॥ शिवांक्रोधमयींसाक्षा
द्द्रष्टुंनपुनरुत्सहेत् ॥ स्वीयोवापरकीयोवायक्षोवाकिंन्नरस्तथा ॥ १६ ॥ देवोवाचतथाविष्णुर्ब्रह्मावाशंकरस्तथा ॥
नकश्चिद्गिरिजाग्रेचस्थातुंशक्तश्चकेचन ॥ १७ ॥ जाज्वल्यमानंतत्तेजोदृष्ट्वादूरतरंस्थिताः ॥ एतस्मिन्समयेतत्रना
रदोदेवदर्शनः ॥ १८ ॥ आजगामतदातत्रदेवानांसुखहेतवे ॥ ब्रह्माणंचतथाविष्णुंशंकरप्रभृतीन्गणान् ॥ १९ ॥
समागत्यमिलित्वातुविचार्यकार्यमेवच ॥ यावन्नगिरिजालोकेकृपांनैवकरिष्यति ॥ २० ॥ तावन्नैवसुखंस्याद्वैनात्र
कार्याविचारणा ॥ ऋषयोनारदाद्याश्चगतास्तेशिवमंदिरं ॥ २१ ॥ तदाप्रसादयामासुर्मातरंजगतःशुभाम् ॥ नम
स्कृत्यतथास्तुत्वास्तोत्रैर्नानाविधैरपि ॥ २२ ॥ जगदंबनमस्तुभ्यंप्रकृत्यैतेनमोस्तुते ॥ अपर्णायैनमस्तुभ्यंगिरिजा
यैनमोस्तुते ॥ २३ ॥ भवान्यैतेनमश्चैवदुर्गायैतेनमोस्तुच ॥ भद्रायैतेनमस्तुभ्यंप्रकृत्यैतेनमोस्तुवै ॥ २४ ॥ चंडिका
यैनमस्तुभ्यंकात्यायन्यैनमोस्तुते ॥ एवंस्तुतातदादेवीऋषिभिर्नारदादिभिः ॥ २५ ॥ उच्चैर्दृष्ट्वातदातांश्चनोवाचकिं
चिदंबिका ॥ तदाचऋषयःसर्वेनत्वातच्चरणांबुजम् ॥ २६ ॥ क्षम्यतांक्षम्यतांदेविसंहारोजायतेऽधुना ॥ तवस्वामी
वयंचैवइमेदेवास्तथैवहि ॥ २७ ॥ ॥ ॥ ॥ ॥

बपार्वति ॥ अंबार्थनद्योर्ह्रस्वइत्यनेनह्रस्वः ॥ जगदंबात्वमेवकथयति ॥ प्रकृत्याइति ॥ मूलकारणीभूतायाइत्यर्थः ॥ अपर्णायैनिर्विकारायै ॥ २३ ॥
दुर्गायैदुःखेनगंतुंज्ञातुंशक्यातथातस्यैयोगिनामप्यगम्यस्वरूपायाइत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ तवेति ॥ तवस्वामीशिवइत्यर्थः ॥ त्वंस्वामिनीति
पाठांतरम् ॥ शिवादयोपिवयंभवदीयाःस्मइतिदेवाःपार्वतींक्षमांयाचंतइत्याह ॥ क्षम्यतामिति ॥ २७ ॥ ॥

एवमिति ॥ चंडिकापार्वत्युवाचेतिशेषः ॥ २८ ॥ तदापार्वतीकृतांसंविदमाह ॥ मत्पुत्रइति ॥ पार्वत्यामृतपुत्रोगणेशइत्यर्थः ॥ यदिजीवितभवतांपूज्यो ऽध्यक्षोमुख्यश्चस्यात्तदायूयंसुखमवाप्स्यथेतिसंबंधः ॥ २९ ॥ ३० ॥ शिवआह ॥ कर्तव्यमिति ॥ ३१ ॥ एतादिति ॥ एतद्गणेशशिरःकुतःकस्मिंश्चिद्देशे यातंगतंसदप्सरोभिर्धृतमित्यर्थः ॥ कलेवरंशरीरम् ॥ ३२ ॥ शिवआह ॥ उत्तरस्यामिति ॥ हेदेवर्षयोयूयमुत्तरस्यांदिशियातगच्छत ॥ तत्रगत्वायःप्राणी प्रथमंपूर्वमागच्छेत्तच्छिरःसमाहृत्यगृहीत्वाऽस्मिन्कलेवरेयोजनीयंसंयोजनीयमितिसंबंधः ॥ ३३ ॥ ३४ ॥ पूजयित्वेति ॥ उदङ्मुखाउत्तराभिमुखाइत्य

प्रजाश्चभवदीयाश्चक्षंतव्यंपरमेश्वरि ॥ एवंश्रुत्वावचस्तेषांप्रसन्नाचंडिकातदा ॥ २८ ॥ मत्पुत्रोयदिजीवेततदासं हरणंनहि ॥ यथाचभवतांमध्येपूज्योऽयंचभविष्यति ॥ २९ ॥ सर्वाध्यक्षोभवेदद्यनाऽन्यथासुखमाप्स्यथ ॥ इत्युक्ता स्तेतदातेभ्योगत्वासर्वेन्यवेदयन् ॥ ३० ॥ तेसर्वेचवचःश्रुत्वाशिवश्चाऽयंतथापुनः ॥ कर्तव्यंचतथासर्वैलोकस्वास्थ्यं भवेदिह ॥ ३१ ॥ एतच्छिरःकुतोयातमप्सरोभिश्चतद्धृतं ॥ एतत्कलेवरंचाऽत्रप्रक्षाल्यसंप्रपूज्यच ॥ ३२ ॥ उत्तरस्यां पुनर्यातप्रथमंयइहागच्छेत् ॥ तच्छिरश्चसमाहृत्ययोजनीयंकलेवरे ॥ ३३ ॥ ततस्तैस्तत्कृतंसर्वंशिवाज्ञापरिपाल कैः ॥ कलेवरंसमानीयप्रक्षाल्यविधिवच्चतत् ॥ ३४ ॥ पूजयित्वापुनस्तेवैगताश्चोदङ्मुखास्तदा ॥ प्रथमंमिलितस्त त्रहस्तीचाप्येकदंतकः ॥ ३५ ॥ तच्छिरश्चतथाछित्वानीत्वातेनाप्ययोजयन् ॥ संयोज्यदेवताःसर्वाःशिवंविष्णुंविधिं तथा ॥ ३६ ॥ ऊचुरनंतरंकर्मभवतामवशेषितम् ॥ ततस्तेतुवचःश्रुत्वाशिवाज्ञापरिपालकाः ॥ ३७ ॥ ऊचुस्तेचततः सर्वेशिवोविष्णुर्विधिस्तथा ॥ यस्माच्चतेजसःसर्वेवयंजातामहात्मनः ॥ ३८ ॥ तत्तेजश्चसमायातुवेदमंत्राभियोगतः ॥ इत्येवमभिमंत्रेणमंत्रितंचयदापुनः ॥ ३९ ॥ तदोत्तस्थौपुनश्चायंशुभांगःसुंदरस्तदा ॥ अभिषिक्तैस्तदादेवैर्गणाध्य क्षैर्गजाननः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

र्थः ॥ हस्तीगजः ॥ ३५ ॥ ३६ ॥ ३७ ॥ तदाशिवादयोपिगणेशस्यपुनर्जीवनायाभिमंत्रयंति ॥ यस्मादिति ॥ यस्मात्तेजसश्चैतन्यरूपात्परमात्मनः सकाशाद्वयंसर्वआब्रह्मस्तंबपर्यंतंजाताउत्पन्नामहात्मानःप्राप्ताधिकाराअभवामतत्तेजोऽत्रसमायात्वित्यर्थः ॥ ३८ ॥ ३९ ॥ तदेति ॥ एवमभिमंत्रितेऽ यंगणेशःपुनरुत्तस्थावजीवदितिभावः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्याइति ॥ तदागजाननोगणेशोदर्शयामासस्वरूपमितिशेषः ॥ पार्वतीतदृष्ट्वाहर्षसमन्विताऽभूत् ॥ ४१ ॥ ४२ ॥ पार्वत्याशिषंददाति ॥ धन्यइति ॥ ४३ ॥ ॥ ४४ ॥ प्रक्रमणंप्रदक्षिणां ॥ ४५ ॥ यएनंपूजयेत्तस्यफलमाह ॥ नमस्कारेति ॥ ४६ ॥ इतीति ॥ तदादेवीपार्वतीशक्तीःस्वसृष्टाआवारयदुपसंहृतव तीत्यर्थः ॥ ततस्तादेव्यःशक्तयोदेव्यादेहेशरीरेलयंतिरोभावंगताःप्राप्ताइत्यर्थः ॥ ४७ ॥ वासवाद्याइंद्राद्याःशिवांपार्वतीं ॥ ४८ ॥ उत्संगेंऽकेशिवस्येत्यादिः ॥ ४९ ॥ ५० ॥ गणेशइति ॥ गणेशोपितदोत्थायशिवायशिवमनुकूलयितुमित्यर्थः ॥ क्रियार्थोपपदेत्यादिनाचतुर्थी ॥ एवमग्रेपिबोध्यं ॥ नमस्कृत्य

तस्यैचदर्शयामासदृष्ट्वाहर्षसमन्विता ॥ वस्त्रैश्चविविधैश्चैवनानालंकरणैस्तथा ॥ ४१ ॥ पूजयित्वातयादेव्यासिद्धिभिश्चाप्यनेकशः ॥ करेणस्पर्शितःसोवैदुःखितोऽसीहपुत्रक ॥ ४२ ॥ धन्योऽसिकृतकृत्योऽसिसर्वपूज्योभवाऽधुना ॥ आननेतवसिंदूरंदृश्यतेसांप्रतंयतः ॥ ४३ ॥ तस्मात्त्वंपूजनीयोसिसिंदूरेणसदानरैः ॥ पुष्पैर्वाचंदनैर्वापिगंधेनैवशुभेनच ॥ ४४ ॥ नैवेद्येनपुनस्त्वंचकृत्वानीराजनाविधिम् ॥ तांबूलैरर्घदानैश्चकृत्वाप्रक्रमणंतथा ॥ ४५ ॥ नमस्कारविधानेनपूजांचैवविधास्यति ॥ तस्यवैसकलासिद्धिर्भविष्यतिनसंशयः ॥ ४६ ॥ इत्युक्त्वाचतदादेवीशक्तीरावारयत्तदा ॥ ततःसमस्तास्तादेव्योदेहेदेव्यालयंगताः ॥ ४७ ॥ ततःस्वास्थ्यंचदेवानांजातंतत्क्षणमात्रतः ॥ एतस्मिंश्चक्षणेदेवावासवाद्याःशिवांतदा ॥ ४८ ॥ स्तुत्वाप्रसाद्यतंदेवंनीत्वाचैवशिवांतिके ॥ प्रसाद्यगिरिशंपश्चादुत्संगेसंन्यवेशयन् ॥ ४९ ॥ शिवोऽपितस्यशिरसिकृत्वाचकरपंकजम् ॥ उवाचवचनंदेवान्पुत्रोऽयमितिचाऽपरः ॥ ५० ॥ गणेशोऽपितदोत्थायनमस्कृत्यशिवायवै ॥ पार्वत्यैचनमस्कृत्यब्रह्माणंविष्णुमेवच ॥ ५१ ॥ नारदाद्यानृषीन्सर्वान्नमस्कृत्यपुरःस्थितः ॥ क्षंतव्यश्चापराधोमेमानश्चैवेदृशोनृणां ॥ ५२ ॥ ब्रह्माचशंकरश्चैवविष्णुश्चैवतदास्वयम् ॥ त्रयोवयंयथाचात्रतथाऽयंप्रतिपूज्यताम् ॥ ५३ ॥ ॥ ॥ ॥ ॥

पुरःस्थितइत्यग्रिमेणान्वयः ॥ ५१ ॥ गणेशःशिवंप्रार्थयते ॥ क्षंतव्यइति ॥ मानोभिमानईदृशएतादृशएवनृणांस्वाभाविकोगुणोऽस्तीतिमेऽपराधस्त्वयाक्षंतव्यइति ॥ अथवानृणामग्रउत्पत्स्यमानानामेतादृशएवमानउत्पत्स्यतइतिज्ञापनायकृतोऽयमपराधःक्षंतव्यइतिभावः ॥ ५२ ॥ ब्रह्माद्यास्तदोचुः ॥ ब्रह्मेति ॥ अयंगणेशः ॥ ५३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अस्मत्पूजातःपूर्वमेवायमवश्यंपूज्यइत्याह ॥ वयमिति ॥ ५४ ॥ अस्मत्पूजातःपूर्वंगणेशापूजनेफलहानिःस्यादित्याह ॥ वयंचपूजिताइति ॥ फलहानिरस्मत्कर्मकपूजाफलहानिरित्यर्थः ॥ ५५ ॥ ५६ ॥ सार्वाध्यक्ष्येसर्वगणानांमुख्यस्थानेनियोजितोऽधिकृतः ॥ ५७ ॥ केतेवरादत्ताइतितदाह ॥ त्वन्नामेति ॥ ५८ ॥ ममेति ॥ सर्वगणाध्यक्षस्त्वंममयाऽधुनापूज्योभवेतिसंबंधः ॥ एवमिति ॥ वाद्यानिदुंदुभ्यादीनिवादयित्वेतिशेषः ॥ ५९ ॥ आशिषइति ॥ त्वंचिरंजीवविजयीभवेतिचैवमाद्याआशिषइत्यर्थः ॥ ततःशिवोदेवान् ॥ ह्रक्रोरन्यतरस्यामित्यनेनकर्मत्त्वं ॥ नृत्यंवाद्यंचकारयामासेत्यग्रिमेणान्वयः ॥ ६० ॥ ६१ ॥ शिवेनपुनर्वरोदत्तइत्युक्तंसकीदृशोवरइतितदाह ॥ चतुर्थ्यामिति ॥ हेगणेश्वरचतुर्थ्यांतिथौत्वमुत्पन्नः ॥ ततःकिमितितदाह ॥ ऊर्जइति ॥ यस्मात्कारणात्त्वमूर्जेकार्तिकेमासिमासेऽसितेपक्षेकृष्णपक्षेचतुर्थ्यांप्रथमेयामेप्रहरेचंद्रोदयसमयेसतीगिरिजातेतवरूपंशरीरंनिर्मयामास ॥ तस्मात्कारणात्तेत्वातावमुद्दिश्येत्यर्थः ॥ व्रतंसंकष्टचतुर्थीतिप्रसिद्धंतद्दिनउत्तमंप्रशस्तमित्यर्थः ॥ ६२ ॥ ६३ ॥ तदेवविशदयति ॥ तस्मादिति ॥ तद्दिनंचतुर्थीदिनं ॥ ६४ ॥ दिति ॥ व्रतंममममत्संबंधिन्याऽऽज्ञयाकर्तव्यं ॥ ६५ ॥ ॥ ॥ ॥

वयंचप्राग्यथापूज्यास्तथापूज्यतरोऽप्यसौ ॥ एतत्पूजांपुराकृत्वापश्चात्पूज्यावयंनरैः ॥ ५४ ॥ वयंचपूजिताःपूर्वंनाऽयंचपूजितोयदा ॥ तदाचफलहानिःस्यान्नात्रकार्याविचारणा ॥ ५५ ॥ शिवेनपूजितःपूर्वंविष्णुनाचप्रपूजितः ॥ ब्रह्मणाचतथैवाऽत्रपार्वत्याचप्रपूजितः ॥ ५६ ॥ सर्वैर्देववरैश्चैवपूजितःपरयामुदा ॥ सर्वैर्मिलित्वातत्रैवसार्वाध्यक्ष्येनियोजितः ॥ ५७ ॥ पुनश्चैवशिवेनैववरादत्ताह्यनेकशः ॥ त्वन्नामविघ्नहर्तेतिश्रेष्ठंचैवभवत्विति ॥ ५८ ॥ ममसर्वगणाध्यक्षःपूज्योवैत्वंभवाऽधुना ॥ एवमुक्त्वाचवाद्यानिपूजयित्वाह्यनेकशः ॥ ५९ ॥ आशिषश्चाप्यनेकाश्चकृताश्चतत्क्षणेध्रुवम् ॥ ततश्चैवतदादेवान्गीतवाद्यंचनृत्यकम् ॥ ६० ॥ कारयामासतत्रैवह्यप्सरसांगणैस्तदा ॥ पुनश्चैववरोदत्तःशिवेनैवमहात्मना ॥ ६१ ॥ चतुर्थ्यांत्वंसमुत्पन्नऊर्जेमासिगणेश्वर ॥ असितेचतथापक्षेचंद्रस्योदयनेशुभे ॥ ६२ ॥ प्रथमेचतथायामेजातेचगिरिजासती ॥ निर्मयामासतेरूपंतस्मात्तेव्रतमुत्तमम् ॥ ६३ ॥ तस्मात्तद्दिनमारभ्यव्रतंकार्यंसुशोभनम् ॥ यावत्पुनःसमायातिवर्षांतेचचतुर्थिका ॥ ६४ ॥ तावद्व्रतंचकर्तव्यंतवचैवममाज्ञया ॥ संसारेसुखमिच्छंतिह्यतुलंचाप्यनेकशः ॥ ६५ ॥ ॥ ॥ ॥

मार्गशीर्षमासेगणपतिमूर्तिपूजाविधिमाह ॥ मार्गशीर्षइत्यादिना ॥ असिताकृष्णपक्षस्थेत्यर्थः ॥ अत्रचरमासाचतुर्थिकेतिपाठांतरम् ॥ ६६ ॥ ६७ ॥ ॥ ६८ ॥ श्वेतेति ॥ श्वेतश्चासावर्कोवृक्षविशेषश्चश्वेतार्कस्तत्संभवांतन्निर्मितांमार्दवींमृद्विकृतांमूर्तिमित्यर्थः ॥ ६९ ॥ वितस्तीति ॥ वितस्तिर्द्वादशांगुल परिमाणंतन्मात्रांतत्परिमिताम् ॥ ७० ॥ ७१ ॥ ७२ ॥ पूजयित्वेति ॥ बालचंद्रंगणेशकिरीटस्थम् नवोदितमितिवा ॥ मधुरंमिष्टमन्नंभोजयेत् ॥ पूज्येत्यत्र

तेपूजयंतुलांभक्त्याचतुर्थ्यांविधिपूर्वकम् ॥ मार्गशीर्षेतथामासेऽसितायावैचतुर्थिका ॥ ६६ ॥ प्रातःस्नानंतदाकृत्वावि प्रांनिमंत्रयेत्ततः ॥ दूर्वाभिःपूजनंकार्यमुपवासस्तथाविधः ॥ ६७ ॥ रात्रेश्चप्रहरेजातेसुस्नात्वापूजनंनरः ॥ मूर्तिंधा तुमयींकृत्वाप्रवालसंभवांतथा ॥ ६८ ॥ श्वेतार्कसंभवांवापिनिर्मितांमार्दवींपुनः ॥ प्रतिष्ठाप्यतदातत्रपूजयेत्प्रयतः पुमान् ॥ ६९ ॥ गंधैर्नानाविधैर्दिव्यैश्चंदनैःपुष्पकैरपि ॥ वितस्तिमात्रांदूर्वांचत्र्यग्रांमूलविवर्जिताम् ॥ ७० ॥ ईदृ शानांदलानांतुशतमेकोत्तरंतथा ॥ एकविंशतिर्वादेवंपूजयेत्परमार्थतः ॥ ७१ ॥ धूपैर्दीपैश्चनैवेद्यैःपूजयेत्परमेश्वर म् ॥ तांबूलाद्यर्घकैश्चैवप्रणिपातैःस्तवैस्तथा ॥ ७२ ॥ पूजयित्वाचतंतत्रबालचंद्रंचपूजयेत् ॥ पश्चाच्चब्राह्मणंपूज्य भोजयेन्मधुरंमुदा ॥ ७३ ॥ स्वयंचैवतदाभोज्यंमधुरंलवणंविना ॥ विसर्जयेत्ततःपश्चादेवंपूज्यःसदानरैः ॥ ७४ ॥ एवंव्रतेचसंपूर्णेवर्षेजातेनरस्तदा ॥ उद्यापनविधिंकुर्याद्व्रतसंपूर्णहेतवे ॥ ७५ ॥ द्वादशब्राह्मणास्तत्रभोजनीयाम दाज्ञया ॥ कुंभएकश्चसंपूज्यःस्थाप्यमूर्त्तिस्त्वदीयिकाम् ॥ ७६ ॥ अष्टदलंतदाकृत्वादीपंकृत्वाविधानतः ॥ होमश्चै वाऽत्रकर्तव्योवित्तशाठ्यंनकारयेत् ॥ ७७ ॥ स्त्रीद्वयंचतदाचात्रबटुद्वयमथापिच ॥ भोजयित्वापूजयित्वामूर्त्यग्रेवि धिपूर्वकम् ॥ ७८ ॥ जागरणंततःकार्यंपुनःप्रातश्चपूजयेत् ॥ विसर्जयेत्ततश्चैवपुनरागमनायच ॥ ७९ ॥ तिल कंचाशिषोग्राह्याःस्वस्तिवाचनमेवच ॥ पुष्पांजलिंप्रदद्याच्चव्रतसंपूर्णहेतवे ॥ ८० ॥ ॥ ॥

ल्यबादेशआर्षः ॥ पूर्वपदलोपइतिकरहाटकीयगोपालाचार्याआहुः ॥ ७३ ॥ ७४ ॥ ७५ ॥ त्वदीयिकांगणेशरूपामित्यर्थः ॥ ७६ ॥ अष्टदलंपद्मं ॥ वित्तशा ठ्यंकार्पण्यंनकारयेत् ॥ यथाशक्तिदक्षिणादिकंदेयमितिभावः ॥ ७७ ॥ स्त्रीद्वयमिति ॥ सुवासिनीद्वयमित्यर्थः ॥ बटुद्वयंब्रह्मचारिद्वयम् ॥ ७८ ॥ विसर्जये दिति ॥ विसर्जनादिविधिस्तुपूर्वमुक्तएव ॥ ७९ ॥ तिलकमक्षतादिकंसमर्पणीयमितिशेषः ॥ ८० ॥ ॥

नानाकार्यंमानसिकंकार्यमित्यर्थः ॥८१॥ शिवोगणेशपूजाफलंदर्शयति ॥ यइति ॥८२॥भक्तितोनित्यंपूजाकर्तव्येत्युक्तमिदानींनित्यपूजाऽनवसरेपिकदाचिदपिपूजाकर्तव्येतितत्फलमाह॥सिंदूरेति॥८३॥८४॥उदयाभिमुखैःप्राङ्मुखैरभ्युदयकामैर्वा॥८५॥ तथेति॥ तैःशिवगणैःशिवोक्तंतथेत्युक्त्वास्वीकृत्यगजाननस्यगाणपत्यंस्वगणेष्वध्यक्षत्वंप्रकल्पितंनियोजितम् ॥ ८६ ॥ ८७ ॥ कथमिति ॥ तदापार्वत्यायोहर्षोजातस्तमहमेकेनमुखेनकथंब्रुवेकथयामिकिंतुसहर्षोवक्तुमशक्यइतिभावः ॥ इतिसूतोक्तिः ॥८८॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांगणेशोत्पत्तिर्नामचतुस्त्रिंशत्तमोऽध्यायः ॥३४॥ ॐनमःशिवाय

नमस्कारंततःकुर्यान्नानाकार्यंप्रकल्पयेत् ॥ एवंव्रतंकृतंयेनयथेप्सितफलंलभेत् ॥ ८१ ॥ योवैनित्यंत्वदीयांचपूजांचैवस्वभक्तितः ॥ सिंदूरचंदनैश्चैवतंदुलैःश्वेतकैस्तथा ॥ ८२ ॥ उपचारैरनेकैश्चपूजयंतिचयेनराः ॥ तेषांसिद्धिर्भवेन्नित्यंविघ्ननाशोभवेदिह ॥ ८३ ॥ सर्ववर्णैःप्रकर्तव्यंस्त्रीभिश्चविविधेच्छया ॥ उदयाभिमुखैश्चैवराजभिश्चतथैवच ॥ ८४ ॥ यंयंकामयतेयोवैतेनसेव्यःसदाभवान् ॥ शिवेनैवंसदाप्रोक्तंगणेशायमहात्मने ॥ ८५ ॥ तदानींदेवतैश्चैवसर्वैश्चऋषिसत्तमैः ॥ तथेत्युक्त्वातुतैःसर्वैर्गाणपत्यंप्रकल्पितम् ॥ ८६ ॥ ततश्चैवगणाःसर्वेप्रणेमुस्तंगणेश्वरम् ॥ गिरिजायाःसमुत्पन्नोयोवैहर्षस्तदाभृशम् ॥ ८७ ॥ कथंब्रुवेऽहंतंहर्षंमुखेनैकेनभोद्विजाः ॥ देवदुंदुभयोनेदुःपुष्पवर्षंपपातह ॥ जगत्स्वास्थ्यंतदाप्रापदेवेतस्मिन्प्रतिष्ठिते ॥ ८८ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांगणेशोत्पत्तिर्नामचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकिंजातंतुततःपरम् ॥ येनश्रवणमात्रेणसर्वपापक्षयोभवेत् ॥ १ ॥ ततोदेवगणाःसर्वेऋषीणांचगणास्तथा ॥ समागताश्चयेतत्रजग्मुस्तेतुशिवाज्ञया ॥ २ ॥ प्रशंसंतःशिवांतत्रगणेशंचततःपुनः ॥ शिवंचैवतथाप्रीतंकीदृशंयुद्धमेवच ॥ ३ ॥ जगत्स्वास्थ्यंतदालेभेशिवोऽपिचगणास्तदा ॥ यदाचगिरिजादेवीकोपहीनाबभूवह ॥ ४ ॥ शिवोपिगिरिजांतत्रप्रसाद्यपूर्ववत्तदा ॥ चकारविविधंसौख्यंलोकानांहितकाम्यया ॥ ५ ॥ ॥ ॥ ॥

अहंपूर्विकयोद्वाहंकर्तुंविवदमानयोः ॥ पुत्रयोःपार्वतीशंभूविचार्योचतुरात्मजौ ॥ १ ॥ परिक्रम्यधरांसर्वांयुवयोर्यस्त्वरान्वितः ॥ आगच्छेत्सप्रथमतोविवाहार्होभवेदिति ॥ २ ॥ तदागणेशःपितरौपरिक्रम्यैवतत्फलम् ॥ प्राप्तवान्सम्यगित्येवंपंचत्रिंशइहोच्यते ॥ ३ ॥ श्रूयतामिति ॥ १ ॥ २ ॥ शिवमिति ॥ कीदृशमिदंयुद्धमभूदितिसंचिंत्यप्रीतंशिवंप्रशंसंतइतिसंबंधः ॥ ३ ॥ ४ ॥ चकारेति ॥ हितकाम्ययालोकशिक्षणार्थमितिभावः ॥ ५ ॥ ॥

॥ ६ ॥ यशइति ॥ विसंधिरार्षः ॥७॥८॥ गणेशस्येति ॥ वृत्तंचरितम् ॥ ९॥ पित्रोरिति ॥ विवर्धितंगणेशेनेतिशेषः ॥ १० ॥ ताविति ॥ तौगणेशषण्मुखौतयोःशिवयोःपरिचर्यांशुश्रूषांगतौप्राप्तौअकुरुतामित्यर्थः ॥ अधितस्त्वत्यधिकम् ॥ ११ ॥ १२ ॥ शिवौमनसाविचारयतः ॥ विवाहइति ॥ षण्मुखोगणेशश्चैतयोःपुत्रयोरित्यर्थः ॥ १३ ॥ तौपुत्रावहमहंपूर्वंपरिणेष्यामीतिविवदंतावभूतामित्याह ॥ अहमिति ॥ १४ ॥ १५ ॥ पुत्रयोर्युवयोर्यःपृथिवींपरिक्रम्यपूर्वमत्रागच्छेत्स

विष्णुश्चशिवमापृच्छ्यब्रह्मापिचतथैवच ॥ जगामभवनंस्वंचकृत्वाकार्यंसुदुष्करम् ॥ ६ ॥ नारदोभगवांस्तत्रप्रशस्यगिरिजांतदा ॥ जगामभगवांस्तत्रगायन्यशअनुत्तमं ॥७॥ एतद्वःसर्वमाख्यातंयत्पृष्टोहंमुनीश्वराः ॥ एतस्मिन्नंतरेतत्रपप्रच्छुर्ऋषयस्तदा ॥ ८ ॥ ऋषयऊचुः ॥ गणेशस्यश्रुतंवृत्तंपुनःकिंचिन्निवेद्यतां ॥ सूतउवाच ॥ साधुपृष्टंभवद्भिश्चश्रूयतामृषिसत्तमाः ॥ ९ ॥ शिवाचैवशिवश्चैवपरंप्रेमसमावहत् ॥ पित्रोर्लालयतोस्तत्रसुखंचैवविवर्धितम् ॥ १० ॥ तावपिचतयोस्तत्रपरिचर्यांपरांगतौ ॥ षण्मुखश्चगणेशश्चपित्रोरधितरंतथा ॥ ११ ॥ स्नेहंचैवव्यवर्धेतांशुक्लपक्षेयथाशशी ॥ कदाचित्तौस्थितौतत्रविचारेचपरायणौ ॥ १२ ॥ विवाहश्चकथंकार्यउभयोःपुत्रयोःशुभः ॥ षण्मुखश्चप्रियतमोगणेशश्चतथैवच ॥ १३ ॥ अहंचपरिणेष्यामिअहंचैवपुनःपुनः ॥ परस्परंचनित्यंवैवादेचतत्परावुभौ ॥ १४ ॥ तच्छ्रुत्वावचनंतौचविस्मयंपरमंगतौ ॥ किंकर्तव्यंकथंकार्योविवाहविधिरेतयोः ॥ १५ ॥ इतिनिश्चित्यवैतत्रयुक्तिश्चरचितातदा ॥ कदाचित्समयेस्थित्वासमाहूयस्वपुत्रकौ ॥ १६ ॥ कथयामासतुस्तत्रपुत्रयोःपितरौतदा ॥ अस्माभिर्नियमःपूर्वंकृतश्चश्रूयतांपुनः ॥ १७ ॥ द्वावपिचसमौपुत्रौविशेषोनाऽत्रलभ्यते ॥ तस्माच्चैवंकृतंयेनपुत्रयोरुभयोरपि ॥ १८ ॥ तस्यैवप्रथमंकार्योविवाहःशुभलक्षणः ॥ यश्चैवपृथिवींसर्वांक्रांत्वाशीघ्रमुपाव्रजेत् ॥ १९ ॥ तयोरेवंवचःश्रुत्वाशरजन्मास्वयंतदा ॥ जगाममंदिरात्तूर्णंपृथिवीक्रमणायवै ॥ २० ॥ गणपतिश्चतत्रैवविचार्यचपुनःपुनः ॥ किंकर्तव्यंक्वगंतव्यंलंघितुंनैवशक्यते ॥ २१ ॥ ॥ ॥

प्रथमंविवाह्यइतिशिवावाहतुरित्याह इतीत्यादिना ॥ १६ ॥ १७ ॥ तस्मादिति ॥ एवंवक्ष्यमाणनियमनम् ॥ १८ ॥ १९ ॥ तयोरिति ॥ शरजन्माषण्मुखः ॥ २० ॥ किमिति ॥ लंघितुंपदात्पदमपिप्रचलितुंनशक्यते ॥ मयेतिशेषः ॥ वपुषोगुरुत्वादितिभावः ॥ २१ ॥ ॥

क्रोशेति ॥ अचिंत्यकमपरिमितंसुखमहंप्राप्नुयामितिशेषः ॥ २२ ॥ २३ ॥ पृथ्वीपरिक्रमणाशक्तावपिपितृपरिक्रमणमपिपृथिवीपरिक्रमणफलदायीतिनि श्चितशास्त्रार्थोगणेशःपितरौपरिक्रमितुमारब्धवानित्याह ॥ स्नानमित्यादिना ॥ २४ ॥ किंतदुवाचेतितदाह ॥ आसनेइति ॥ हेपितरौभवतोर्युवयोःपूज नार्थमत्रस्थलआसनेइहस्थापितेइति ॥ २५ ॥ अस्थातामुपाविशताम् ॥ तेनगणेशेनप्रक्रांतौप्रदक्षिणीकृतौ ॥ २६ ॥ सप्तकृत्वःसप्तवारंप्रक्रमणंप्रदक्षिणा म् ॥ २७ ॥ २८ ॥ शिवौगणेशस्यशास्त्रजनितज्ञानपरीक्षणायतंप्रत्याहतुः ॥ प्रक्रमेतेति ॥ ससागरांससमुद्राम् ॥ अत्रसकाननामितिपाठांतरम् ॥ २९॥

क्रोशमात्रंगतंस्याद्वैनगम्येतमयापुनः ॥ किंपुनःपृथिवीमेतांक्रांत्वासुखमचिंत्यकं ॥२२॥ इतिविचार्यविप्रेंद्राःश्रूयतां तदनंतरम् ॥ विचार्यैवंगणेशस्तुयच्चकारपरंशुभम् ॥ २३ ॥ स्नानंकृत्वायथान्यायंसमागत्यस्वयंगृहम् ॥ उवाचपि तरंतत्रमातरंपुनरेवच ॥ २४ ॥ आसनेस्थापितेह्यत्रपूजार्थंभवतोरिह ॥ इतिश्रुत्वावचस्तस्यपार्वतीपरमेश्वरौ ॥ ॥ २५ ॥ अस्थातामासनेतत्रपूजायाग्रहणायवै ॥ तेनैवपूजितौतौचप्रक्रांतौचपुनःपुनः ॥ २६ ॥ एवंचकृतवान्स प्तकृत्वःप्रक्रमणंतुसः ॥ बद्धांजलिस्तदोवाचपितरौप्रेमलालसौ ॥२७॥ भोमातर्भोपितस्त्वंचशृणुतंपरमंवचः ॥ शी घ्रंचैवात्रकर्तव्योविवाहःशोभनोमम ॥ २८ ॥ इत्येवंवचनंश्रुत्वापितरावूचतुस्तदा ॥ प्रक्रमेतभवान्सम्यक्पृथिवीं चससागराम् ॥ २९ ॥ कुमारोगतवांस्तत्रत्वंचाऽपिपुनरेवच ॥ गच्छशीघ्रंतथाकृत्वाऽगच्छपूर्वंतवैवहि ॥ ३० ॥ इत्ये वंवचनंश्रुत्वावचनंक्रोधसंयुतः ॥ युवाभ्यांश्रूयतांसम्यग्वचनंममसत्तमौ ॥ ३१ ॥ मयातुपृथिवीक्रांतासप्तवारंपुनः पुनः ॥ एवंकथंसमुच्येतांपुनश्चपितराविह ॥ ३२ ॥ तद्वचस्तुतदाश्रुत्वापितरावूचतुस्तदा ॥ कदाक्रांतात्वयापुत्रपृ थिवीगहनैर्युता ॥ ३३ ॥ तयोरेवंवचःश्रुत्वागणेशोवाक्यमब्रवीत् ॥ भवतोःपूजनंकृत्वाप्रक्रांताचमयापुनः ॥ ३४ ॥ सप्तवारंतुयच्चैवकिंतत्प्रक्रमणंनहि ॥ इत्येवंवचनंवेदेशास्त्रेवाधर्मसंचये ॥ ३५ ॥ ॥ ॥

गच्छेति ॥ हेगणेशत्वंशीघ्रंपृथिवींपरिक्रामितुंगच्छ ॥ तथाकृत्वापृथ्वींपरिक्रम्यपूर्वमागच्छ ॥ ततस्तवैवविवाहंपूर्वंकुर्वइतिसंबंधः ॥३०॥३१॥ एवमिति ॥ भोपितरौयुवाभ्यामेवंवैपरीत्येनकथंसमुच्येतांवाक्येइतिशेषः ॥ ३२ ॥ गहनैररण्यैः ॥ गहनंकाननंवनमित्यमरः ॥ ३३ ॥ गणेशःपृथिवीपरिक्रमणफलंपि तृपरिक्रमणेऽतिदिशति ॥ भवतोरिति ॥ प्रक्रांताप्रदक्षिणीकृता ॥ पृथिवीतिशेषः ॥ ३४ ॥ अत्रविषयेवेदादीनामपिप्रामाण्यमस्तीत्याह ॥ इतीति ॥ मातृ देवोभव ॥ पितृदेवोभवेत्यादिःश्रुतिः ॥ मनुरपि ॥ आचार्योब्रह्मणोमूर्तिःपितामूर्तिःप्रजापतेः ॥ मातापृथिव्यामूर्तिस्तुभ्रातास्वोमूर्तिरात्मनइति ॥ ३५ ॥

वर्ततइति ॥ वेदादौप्रतिपादितंकिंतथ्यंसत्यंनवर्तते ॥ किंतर्ह्यपितुसत्यमेवेतिसंबंधः ॥ तदेवानुवदति ॥ पित्रोरिति ॥ पृथिवीजन्यंपृथिवीपरिक्रमणजन्य मित्यर्थः ॥ ३६ ॥ विपरीतेऽनिष्टफलमाह ॥ अपहायेति ॥ ३७ ॥ गणेशःशास्त्रार्थमनुवदति ॥ पुत्रस्येति ॥ ३८ ॥ प्रसिद्धतीर्थेभ्यःपितृचरणतीर्थेविशे षमाह ॥ अन्यदिति ॥ सुलभमिति ॥ अर्केचेन्मधुविंदेतकिमर्थंपर्वतंव्रजेदितिन्यायादितिभावः ॥ ३९ ॥ गृहतीर्थमाह ॥ पुत्रस्येति ॥ भर्तापतिस्तीर्थ मितिशेषः ॥ ४० ॥ इतीति ॥ यदाहमनुः ॥ विशीलःकामवृत्तोवागुणैर्वापरिवर्जितः ॥ उपचर्यःस्त्रियासाध्व्यासततंदेववत्पतिः ॥ नास्तिस्त्रीणांपृथग्यज्ञो नव्रतंनाप्युपोषितं ॥ पतिंशुश्रूषतेयेनतेनस्वर्गेमहीयतइति ॥ भवद्ध्यामिति ॥ यदिपितृप्रक्रमणंपृथिवीप्रक्रमणफलकारिनस्यात्तदाभवद्ध्यांतद्वेदभाषित

वर्ततेकिंचतथ्यंनतर्हिकिंसत्यमेवच ॥ पित्रोश्चपूजनंकृत्वाप्रक्रांतिंचकरोतियः ॥ ३६ ॥ तस्यवैपृथिवीजन्यंफलंभव तिनिश्चितम् ॥ अपहायगृहेयोवैपितरौतीर्थकंव्रजेत् ॥ ३७ ॥ तस्यपापंतथाप्रोक्तंहननेचतयोरिह ॥ पुत्रस्यचमह त्तीर्थंपित्रोश्चरणपंकजम् ॥ ३८ ॥ अन्यत्तीर्थंतुदूरेवैगत्वाप्राप्यतेततःपुनः ॥ इदंसंनिहितंतीर्थंसुलभंधर्मसाधनम् ॥ ॥ ३९ ॥ पुत्रस्यचस्त्रियाश्चैवतीर्थंगेहेसुशोभनम् ॥ पुत्रस्यपितरौप्रोक्तौस्त्रियाभर्त्ताउदाहृतः ॥ ४० ॥ इतिशास्त्रंत थावेदोभाषतेयन्निरंतरम् ॥ भवद्ध्यांचप्रकर्तव्यमसत्यंपुनरेवच ॥ ४१ ॥ भवदीयंतथारूपमसत्यंचभवेदिह ॥ तदा वेदोह्यसत्योवैभवेदितिनसंशयः ॥ ४२ ॥ शीघ्रंयथाचभवतिविवाहःक्रियतांशुभः ॥ अथवावेदशास्त्रस्थंव्यलीकं कथ्यतांपुनः ॥ ४३ ॥ द्वयोःश्रेष्ठतमंयच्चकर्तव्यंतत्तथैवच ॥ इतिश्रुत्वावचस्तस्यविस्मयंपरमंगतौ ॥ ४४ ॥ इति श्रीशिवमहापुराणेज्ञानसंहितायांगणेशवचनंनामपंचात्रिंशोऽध्यायः ॥ ३५ ॥ ॥ सूतउवाच ॥ शिवश्चगिरिजाचा ऽपिपुत्रंबुद्धिविचक्षणम् ॥ ऊचतुस्तावृषिश्रेष्ठाययथार्थंभाषितंध्रुवम् ॥ १ ॥ ॥ ॥

मसत्यमेवकर्तव्यंस्यात् ॥ ४१ ॥ वेदप्रतिपादितस्याप्यसत्यत्वेदोषमाह ॥ भवदीयमिति ॥ यदिवेदप्रतिपादितमसत्यंस्यात्तदाभवदीयंनिर्गुणस्वरूपम प्यसत्यंस्यात् ॥ भवदीयरूपस्यापिवेदप्रतिपादितत्वादितिभावः ॥ तदेति ॥ किंचतदावेदोप्यसत्योभवेत् ॥ वेदस्यासत्यत्वप्रतिपादकत्वादितिभावः ॥ ४२ ॥ ४३ ॥ ४४ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांगणेशवचनंनामपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ओंनमःशिवाय ॥ कृतः पितृभ्यामनुजोपयामएवंसुरर्षेःशरजोनिशम्य ॥ क्रौंचाख्यशैलेतिरुषाजगामेत्येवेहषट्त्रिंशउदीर्यतेस्म ॥ १ ॥ शिवश्चेति ॥ हेपुत्रत्वयायथार्थंयाथातथ्ये नभाषितमितिबुद्धिविचक्षणंबुद्धिकुशलंगणेशंप्रतिशिवावूचतुर्हेऋषिश्रेष्ठाः ॥ १ ॥ ॥ ॥ ॥

तदेवकथयतः ॥ पुत्रेति ॥ २ ॥ विशिष्यतेविशिष्टाभवतिनतुशीर्यतइत्यर्थः ॥ ३ ॥ ४ ॥ सम्यगिति ॥ यत्परिक्रमणरूपंकार्ययेनकेनापिप्रकारेणबात्वयाकृतंतत्सम्यगेवकृतंभवेत् ॥ ५ ॥ ६ ॥ विश्वरूपस्यदेवविशेषस्यसुतेपुत्र्यौ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ अचिंत्यकमपरिमितम् ॥ ११ ॥ कियतेति ॥ कियताकेनचित्कालेनतस्यगणेशस्यसिद्धेःपत्न्याःसकाशाल्लक्षनामाबुद्धेरपरपत्न्याःसकाशात्तुलाभनामाचैतौपुत्रौवभूवतुरित्यर्थः ॥ १२ ॥ गुहःषण्मुखः

पुत्रतेविमलाबुद्धिःसमुत्पन्नामहात्मनः ॥ त्वयोक्तंयद्वचश्चैवतत्तथैवनचान्यथा ॥ २ ॥ समुत्पन्नेचदुःखेवैयस्यबुद्धिर्विशिष्यते ॥ तस्यदुःखंविनश्येतसूर्येदृष्टेयथातमः ॥ ३ ॥ वेदशास्त्रपुराणेषुयदुक्तंतत्त्वयाकृतम् ॥ पित्रोःप्रक्रमणेजातेपृथिव्यास्तत्कृतंभवेत् ॥ ४ ॥ इतिवेदपुराणेषुशास्त्रेषुविविधेषुच ॥ सम्यक्त्वयाकृतंयच्चतत्केनाऽपिभवेदिह ॥ ५ ॥ आवाभ्यांमानितंतच्चनाऽन्यथाक्रियतेऽधुना ॥ इत्युक्त्वातुसमाश्वास्यगणेशंबुद्धिसागरम् ॥ ६ ॥ विवाहकरणेतौचमतिंचक्रतुरुत्तमाम् ॥ एतस्मिन्नंतरेतत्रविश्वरूपसुतेउभे ॥ ७ ॥ सिद्धिबुद्धीइतिख्यातेसर्वांगसुंदरेशुभे ॥ ताभ्यांचैवगणेशस्यविवाहंचक्रतुर्मुदा ॥ ८ ॥ संतुष्टादेवताःसर्वाविवाहेसमुपागमन् ॥ यथाचैवशिवस्यैवगिरिजायामनोरथः ॥ ९ ॥ तथाचविश्वकर्माऽसौविवाहंकृतवांस्तदा ॥ यथाचऋषयोदेवालेभिरेपरमांमुदम् ॥ १० ॥ गणेशोऽपितदाताभ्यांसुखंचैवाप्यचिंत्यकम् ॥ प्राप्तवांश्चतदातत्रवर्णितुंनैवशक्यते ॥ ११ ॥ कियताचैवकालेनतस्यपुत्रौबभूवतुः ॥ सिद्धेर्लक्षस्तथाबुद्धेर्लाभःपरमशोभनः ॥ १२ ॥ एवंसुखमचिंत्यंवैभुंजानेचगणेश्वरे ॥ आजगामगुहश्चाऽथक्रांत्वाचपृथिवींतदा ॥ १३ ॥ तावच्चनारदेनैवकैलासेप्रतिबोधितः ॥ त्वयाचश्रूयतांसर्वंपितृभ्यांतुकृतंहियत् ॥ १४ ॥ निष्काम्यत्वांतुतीर्थार्थंमिषमुत्पाद्यवैशृणु ॥ गणेशश्चकृतोद्वाहोलब्धवांस्त्रीद्वयंतथा ॥ १५ ॥ पुत्रद्वयंतथालब्ध्वासुखंभुंक्तेनिरंतरम् ॥ भवतापृथिवीक्रांतातस्यैवंकृतमुत्तमम् ॥ १६ ॥ ॥ ॥

॥ १३ ॥ प्रतिबोधितोनिवोधितः ॥ नारदाज्ज्ञातवृत्तांतइत्यर्थः ॥ गुहइत्यनुषंगः ॥ किंतत्प्रतिबोधितंतदाह ॥ त्वयेति ॥ १४ ॥ निष्काम्यनिष्कास्येत्यर्थः ॥ मिषंकैतवम् ॥ १५ ॥ भवतेति ॥ भवतात्वयापृथिवीक्रांताप्रदक्षिणीकृतेत्येवमेतत्तस्यगणेशस्यार्थेउत्तमंकल्याणंकृतमितिमर्मोक्तिः ॥ भवतोदेशांतरंगच्छतःसतःपूर्वंगणेशस्यविवाहःसंपादितइतिभावः ॥ १६ ॥ ॥ ॥ ॥

पितृभ्यामिति ॥ यदिपितृभ्यामन्याय्यंक्रियतेतदाततोऽन्यःकिंनकरोत्यपितुकुर्यादेवेत्यर्थः ॥ १७ ॥ इदंचयज्जातंतन्नीतिशास्त्रविरुद्धमेवेतिप्रदर्शयितुंवि रुद्धांतरंनिरूपयति ॥ दद्यादिति ॥ १८ ॥ येनेति ॥ एवंनीतिशास्त्रविरुद्धम् ॥ १९ ॥ २० ॥ क्रौंचेक्रौंचाख्ये ॥ तदाशिवौवदतः ॥ वाग्दानमिति ॥ हेस्कंदतेविवाहंकरिष्यावइतिवाग्दानमावाभ्यांकृतम् ॥ अथवापृथिवींपरिक्रम्याहंचपरिणेष्यामीतियद्वाग्दत्तातदकृत्वात्वयाऽद्यकथंगम्यतेऽपितुगंतुमयोग्यमे वेत्यर्थः ॥ २१ ॥ तदासकिमुक्तवांस्तदाह ॥ नेति ॥ २२ ॥ २३ ॥ कुमारत्वमविवाहितत्वेनकुमारेतिनामप्रतिष्ठितंसंज्ञीकृतम् ॥ २४ ॥ कार्तिक्यां

पितृभ्यांक्रियतेचेद्वैअन्यःकिंनकरोतिच ॥ असम्यक्कृतंताभ्यांचित्तेननशुभंमतम् ॥ १७॥ दद्याद्यदिविषंमातापि त्राविक्रीयतेयदि ॥ राज्ञाचेद्ध्रियतेसर्वंकस्मैकिंचब्रवामहे ॥ १८ ॥ येनैवंचकृतंस्याद्वैतन्मुखंनविलोकयेत् ॥ इतिनी तिर्भवेदद्ययथेच्छसितथाकुरु ॥ १९ ॥ इत्युक्त्वानारदस्तस्माअंतर्द्धानमुपागतः ॥ स्कंदोऽपिपितरौनत्वाकोपाग्निज्व लितस्तदा ॥ २० ॥ जगामपर्वतेक्रौंचेपितृभ्यांवारितोऽपिसन् ॥ वाग्दानंचकृतंतेऽद्यकथंचगम्यतेत्वया ॥ २१ ॥ इत्येवंचनिषिद्धोऽपिएवमुक्त्वाजगामसः ॥ नस्थातव्यंमयाह्यत्रयद्येवंकपटंकृतम् ॥ २२ ॥ एवमुक्त्वागतस्तत्रह्यद्या पिपर्वतेशुभे ॥ वर्ततेदर्शनेनैवलोकानांपापहारकः॥ २३॥तद्दिनंहिसमारभ्यकुमारत्वंप्रतिष्ठितम्॥तन्नामशुभदंलो केप्रसिद्धंभुवनत्रये ॥२४॥ कार्तिक्यांचसदादेवाऋषयश्चतपोधनाः॥ गत्वाक्रौंचनगेतत्रकुर्वंतिस्वामिदर्शनम् ॥२५॥ कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं ॥ तस्यपापंदहेत्सर्वंमनेप्सितफलंलभेत् ॥ २६ ॥ उमापिदुःखमापन्ना स्कंदस्यविरहेसति ॥ तत्सुखार्थेस्वयंशंभुरंशेनपर्वतेगतः॥ २७ ॥ मल्लिकार्जुननामाऽऽसीज्ज्योतिर्लिंगंसुखावहम् ॥ अद्यापिदृश्यतेतत्रशिवयासहितःशिवः ॥ २८ ॥ तमागतंसविज्ञायततोगंतुंसमुत्सुकः ॥ देवैश्चप्रार्थितःसोऽपिदूर तोयोजनत्रयम् ॥ २९ ॥ ॥ ॥

कार्तिकपूर्णिमायाम् ॥ स्वामिदर्शनंकुमारस्वामिदर्शनम् ॥ २५ ॥ तद्दर्शनफलमाह ॥ कार्तिक्यामिति ॥ मनेप्सितफलमभीष्टफलम् ॥ मनेप्सितफल मितिप्रयोगआर्षः ॥ विरहेवियोगे ॥ २६ ॥ तत्सुखार्थेपार्वत्याःपुत्रविरहदुःखनाशपूर्वकंसुखोत्पत्त्यर्थम् ॥ पर्वतेक्रौंचाचलेव्यंकटाचलसमीपे ॥ २७॥२८ तमिति ॥ आगतंस्वसांत्वनार्थंतंमाल्लिकार्जुनंविज्ञायततःक्रौंचाचलादन्यत्रगंतुंसमुत्सुकःसगुहोदेवैःप्रार्थितोऽगमनार्थंततोदूरतोयोजनत्रयंद्वादशक्रोशपरिमितं देशंवस्तुंप्रतस्थइतिशेषइतिसमुदितान्वयः ॥ २९ ॥ ॥ ॥ ॥ ॥

पर्वणीति ॥ गच्छति ॥ जनइतिशेषः ॥ ३० ॥ कथाश्रवणफलमाह ॥ एतदिति ॥ ३१ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांगणपतिपरिणयनंनामषट्त्रिंशोऽध्यायः ॥ ३६ ॥॥ ॐनमःशिवाय ॥ माहात्म्यंप्रकटीकर्तुंशंभोर्नामविभूतिकम् ॥ रुद्राक्षाश्चनरैर्धार्याइतिवर्णनपूर्वकम् ॥ १ ॥ रुद्राक्षाणांविशेषेणधारणंमहिमातथा ॥ अस्मिन्प्रवर्ण्यतेध्यायेसप्तत्रिंशत्तमेशुभे ॥ २ ॥ शौनकादयःसूतमुखाद्रुद्राक्षमाहात्म्यंश्रोतुंसूतंसर्ववेत्तृत्वेन प्रशंसंति ॥ सूतेति ॥ १ ॥ धन्यइति ॥ देहधारणम् ॥ अस्माकमितिशेषः ॥ २ ॥ साध्विति ॥ हितकाम्ययेत्यत्रहितकारकैरितिपाठांतरम् ॥ ३ ॥ ४ ॥

पर्वणिपर्वणितत्रदर्शनार्थंचगच्छति ॥ अमावास्यादिनेशंभुःस्वयंगच्छतितत्रह ॥ ३० ॥ पार्वतीगच्छतेतत्रपूर्णमासीदिनेशुभे ॥ एतत्तस्यचवृत्तांतंपृष्टंचकथितंमया ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेसर्वथानरः ॥ ३१ ॥ इतिश्रीशिवमहापुराणेज्ञा॰गणपतिपरिणयनंनामषट्त्रिंशोऽध्यायः ॥ ३६ ॥ ऋषयऊचुः ॥ सूतजानासिसकलंनाऽज्ञातंविद्यतेतव ॥ शिवमाहात्म्यंविशेषेणकथनीयंत्वयाऽधुना ॥ १ ॥ धन्योऽसिकृतकृत्योऽसिसार्थकंदेहधारणम् ॥ जातंतवैवसंयोगात्किंपुनर्वर्णयामहे ॥ २ ॥ इत्येवंवचनंतेषांश्रुत्वासूतोऽब्रवीदिदम् ॥ सूतउवाच ॥ साधुपृष्टंभवद्भिश्चलोकानांहितकाम्यया ॥ ३ ॥ भवंतश्चतथाधन्याःपवित्राःकुलभूषणाः ॥ येषांचैवशिवःसाक्षाद्दैवतंपरमंशुभम् ॥ ४ ॥ सदाशिवकथालोकेवल्लभाभवतांसदा ॥ तेधन्याश्चकृतार्थाश्चसफलंदेहधारणम् ॥ ५ ॥ उद्धृतंचकुलंतैस्तुयेशिवंसमुपासते ॥ यस्यमुखेशुभंनामसदाशिवशिवेतिच ॥ ६ ॥ पापानिनस्पृशंतीहखदिरांगारकंयथा ॥ श्रीशिवायनमस्तुभ्यंमुखाद्व्याहरतेयदा ॥ ७ ॥ तन्मुखंचतदायोवैपश्यतितत्क्षणेनरः ॥ तीर्थजन्यंफलंतस्यभवतीतिसुनिश्चितम् ॥ ८ ॥ यत्रत्रयंसदातिष्ठेदेतच्छुभतरंनरे ॥ तस्यदर्शनमात्रेणवेणीस्नानफलंलभेत् ॥ ९ ॥ ॥ ॥

॥ सदाशिवेति ॥ अत्रसदाशिवोयथालोकेवल्लभोभवतांसदेतिपाठांतरम् ॥ शिवोपासनंप्रशंसति ॥ तइति ॥ ५ ॥ शिवनामप्रशंसति ॥ यस्येति ॥ ६ ॥ पापानीति ॥ यथाजनाःखदिरांगारकंखदिरोवृक्षविशेषः ॥ खदिरःखंदिरोपिचेत्यमरः ॥ तस्यांगारकंतदुपसंस्पृष्टाग्निंनस्पृशंतितथापापानितंनस्पृशंतीतिसंबंधः॥७॥८॥यत्रेति॥एतद्वक्ष्यमाणंत्रयंशिवनामविभूतिरुद्राक्षात्मकम् ॥ वेणीस्नानफलंप्रयागेत्रिवेणीसंगमेकृतंस्नानंतस्यफलंलभेतेत्यर्थः ॥ ९ ॥

पूर्वोक्तंत्रयमेवाह ॥ शिवनामेति ॥ १० ॥ तद्दर्शनमिति ॥ तद्दर्शनंयःशिवनामादित्रयंधारयतितस्यदर्शनम् ॥ वेणीगंगायमुनासरस्वत्येतत्त्रितयात्मकमितियोनजा नातितस्यदर्शनादेवपापिष्ठइत्यग्रिमेणान्वयः ॥ अथवातस्यशिवनामादित्रयस्यदर्शनम् ॥ अन्यत्पूर्ववत् ॥ ११॥ १२ ॥ १३ ॥ शिवनामादीनिगंगादित्र यसमानमाहात्म्यवत्त्वात्तद्रूपकत्वेननिर्दिशति ॥ शैवमिति ॥ १४ ॥ तत्समानयोग्यताकत्वमेवाह ॥ शरीरइत्यादिना ॥ वेणिकायागंगायमुनासरस्वती संगमस्येत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ तद्दर्शनफलमपेक्ष्यतद्धारकस्याधिकंफलमाह ॥ दर्शनस्येति ॥ १८ ॥ १९ ॥ इदानींरुद्राक्षसंख्याधारणफलमाह ॥

शिवनामविभूतिश्चरुद्राक्षातृतीयाशुभा ॥ एतत्त्रयंशरीरेचयस्यातिष्ठतिनित्यशः ॥ १० ॥ तस्यैवदर्शनंलोकेदुर्लभंपा पहारकम् ॥ तद्दर्शनंगयावेणीगंगाचैवसरस्वती ॥११॥ एवंयोनविजानातितस्यैवदर्शनादिह ॥ नरोवाप्यथवानारी पापिष्ठोभवतिक्षणात् ॥ १२ ॥ विभूतिर्यस्यनोभालेगलेरुद्राक्षधारणम् ॥ नहिशिवमयीवाणीतंत्यजेदंत्यजंयथा ॥ १३ ॥ शैवंनामतथागंगाविभूतिर्यमुनातथा ॥ रुद्राक्षाविधिजाप्रोक्तासर्वपापप्रणाशिनी ॥ १४ ॥ शरीरेचत्रयं यस्यतत्फलंचैकतःस्मृतम् ॥ एकतोवेणिकायाश्चदर्शनेनफलंतुयत् ॥ १५ ॥ तदेवतुलितंपूर्वंब्रह्मणाहितकारिणा ॥ समतांचैवतद्यातंतस्माद्धार्यंसदाबुधैः ॥ १६ ॥ तद्दिनंहिसमारभ्यब्रह्मादिभिःपुरातनैः ॥ धार्यतेत्रितयंतच्चदर्शनात्पा पहारकम् ॥१७॥ दर्शनस्यफलंह्येतत्किंपुनर्धारकस्यच ॥ ऋषयऊचुः ॥ ईदृशंहिफलंप्रोक्तंरुद्राक्षासंभवंत्वया ॥१८॥ तन्माहात्म्यंविशेषेणवक्तुमर्हसितत्त्वतः ॥ इत्येवंवचनंश्रुत्वासूतोवचनमब्रवीत् ॥१९॥ सूतउवाच ॥ सम्यक्पृष्टमृषि श्रेष्ठाःकथयामिपुरातनम् ॥ रुद्रसंख्याशतंधृत्वारुद्ररूपोभवेन्नरः ॥ २० ॥ एकादशशतानीहधृत्वायत्फलमाप्यते ॥ तत्फलंशक्यतेनैववक्तुंवर्षशतैरपि ॥ २१ ॥ पंचभिश्चशतैश्चैवशतार्धेनतथापुनः ॥ रचित्वामुकुटंयोवैधारयेत्सशिव स्तथा ॥ २२ ॥ ॥ ॥ ॥ ॥

रुद्रसंख्येत्यादिना ॥ रुद्रसंख्याशतंरुद्रसंख्यैकादशसंख्यातयायुतंशतमितिमध्यमपदलोपीसमासः ॥ रुद्राक्षाइतिशेषः ॥ २० ॥ रुद्रसंख्याकशतरुद्राक्षाणां धारणमपरिमितफलप्रापकत्वेनप्रशंसति ॥ एकादशेति ॥ २१ ॥ इदानींरुद्राक्षखचितमुकुटादिधारकस्यशिवस्वरूपलाभात्मकंफलंषड्भिःश्लोकैराह ॥ पंचभिरित्यादिना ॥ २२ ॥ ॥ ॥ ॥ ॥

उपवीतंयज्ञसूत्रम् ॥ त्रिरावृत्तंत्रिगुणितम् ॥ २३ ॥ २४ ॥ मणिवंधोहस्तमूलभागःकंकणस्थानंतस्मिन् ॥ २५ ॥ २६ ॥ एवंसंख्याइति ॥ एवंपूर्वोक्ताःसंख्यायासांतास्तथारुद्राक्षाइत्यर्थः ॥ २७ ॥ ध्यानमिति ॥ तेनपुरुषेणशिवभक्तेनेत्यर्थः ॥ स्थितमितिभावेक्तः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ रुद्राक्षमालयेति ॥ स्मरतीत्यत्रजपतीतिपाठांतरम् ॥ लभेदित्यत्रचभवेदितिपाठांतरम् ॥ ३२ ॥ पंचायतनमंत्रजपेपिरुद्राक्षविनियोगमाह ॥ शिवस्येति

त्रिभिश्चैवशतैःप्रोक्तंषष्ट्यायुक्तैर्मुनीश्वराः ॥ उपवीतंतथातस्यत्रिरावृत्तंतथापुनः ॥ २३ ॥ शिखायांचतथाप्रोक्तंत्रयं चक्रषिसत्तमाः ॥ कर्णयोःपंचषट्चैवदक्षिणोत्तरयोस्तथा ॥ २४ ॥ शतमेकोत्तरंकंठेबाव्होश्चरुद्रसंख्यया ॥ कर्णयोर्धारयेत्तत्रमणिवंधेतथापुनः ॥ २५ ॥ उपवीतेत्रयंधार्यंमुक्तिकामीभवेन्नरः ॥ शेषाश्चोर्वरिताश्चैवपंचाशन्मुनिसत्तमाः ॥ २६ ॥ कटिसूत्रंतथाकृत्वानाभौचधारयेद्बुधः ॥ एवंसंख्याधृतायेनसशिवोनात्रसंशयः ॥ २७ ॥ ध्यानंकृत्वायदातेनस्थितंस्यादासनेशुभे ॥ शिवेतिव्याहरंतंचदृष्ट्वापापैःप्रमुच्यते ॥ २८ ॥ एकासनेयदातेनलक्षाणांपंचकं ध्रुवम् ॥ मंत्रजाप्यंयथोक्तंचशापानुग्रहतांव्रजेत् ॥ २९ ॥ तद्दर्शनंतदाकृत्वागंगास्नानफलंलभेत् ॥ त्रिपुंडरेणयुक्तं चरुद्राक्षाभिःसमन्वितम् ॥ ३० ॥ मृत्युंजयंजपंतंचदृष्ट्वारुद्रफलंलभेत् ॥ कंठेचापितथाधृत्वासर्वपापैःप्रमुच्यते ॥ ॥ ३१ ॥ रुद्राक्षमालयायोवैमंत्रंस्मरतिनित्यशः ॥ तस्यनाम्नांशतेनैवसहस्रस्यफलंलभेत् ॥ ३२ ॥ शिवस्यैवतथाविष्णोःसूर्यस्यैवाऽथवापुनः ॥ शक्तेर्गणपतेर्जाप्येरुद्राक्षाःशुभदाःस्मृताः ॥ ३३ ॥ सर्वेषांचैवदेवानांजाप्येह्येताःप्रकीर्तिताः ॥ यस्यकस्यापिभक्तोपिरुद्राक्षाभिःफलंलभेत् ॥ ३४ ॥ मुक्तिकामीभवेद्योवैभुक्तिकामस्तथापुनः ॥ पुत्रार्थीचधनार्थीचविद्यार्थीचविशेषतः ॥ ३५ ॥ कन्याकामोभवेद्योवैयशस्कामस्तथापुनः ॥ यंयंकाममपेक्ष्यैव जपंकुर्यान्निरंतरम् ॥ ३६ ॥ तंतंकामंचरुद्राक्षायच्छंतिनात्रसंशयः ॥ रुद्रभक्तोविशेषेणधारयेन्मालिकांसदा ॥ ॥ ३७ ॥ विष्णोरपिचभक्तश्चजपंकुर्यात्तथैवच ॥ वस्तुतःसर्वदेवानांजाप्येमुख्याउदाहृताः ॥ ३८ ॥

॥ ३३ ॥ ३४ ॥ रुद्राक्षाणांमुक्त्यादिसर्वफलप्रदत्वमाह ॥ मुक्तिकामीत्यादिनासार्धश्लोकद्वयेन ॥ ३५ ॥ ३६ ॥ रुद्रभक्तस्यविशेषतोरुद्राक्षधारणविधिमाह ॥ रुद्रभक्तइति ॥ ३७ ॥ विष्णोरिति ॥ अत्रापिरनास्थाद्योतकः ॥ ३८ ॥ ॥ ॥ ॥

॥ ३९ ॥ सुवर्णमण्यादिमालानामैहिकमात्रफलकत्वकथनपूर्वकंरुद्राक्षाणमैहिकामुष्मिकोभयफलसाधनत्वंकथयति ॥ सुवर्णेत्यादिना ॥ सुवर्णगुलिका भिःसुवर्णमणिमालाभिः ॥ ४० ॥ ४१ ॥ देवतांतरभेदेनदेवतानांनानाविधत्वेनमालाअपिनानाविधाउक्ताइत्यर्थः ॥ ४२ ॥ तदेवनिरूपयति ॥ शि वस्येति ॥ शिवस्यतुष्ट्यर्थंतन्मंत्रजपइत्यर्थः ॥ एवमग्रेपिवोध्यम् ॥ ४३ ॥ गणेशइति ॥ तैःप्रवालैः ॥ ४४ ॥ मुक्ताभिरिति ॥ मुक्ताभिर्युताभिर्मिश्रिता

कामतोऽकामतश्चैवरुद्राक्षाभिःफलंलभेत् ॥ तस्माच्छ्रेष्ठतमालोकेरुद्राक्षाश्चप्रकीर्तिताः ॥ ३९ ॥ सुवर्णगुलिकाभि स्तुलक्ष्मीकामोजपेन्नरः ॥ मुक्ताभिस्तुयशस्कामःकुर्याज्जपमनुत्तमम् ॥ ४० ॥ स्फाटिकैःपुत्रकामस्तुप्रवालैर्वश्यतां व्रजेत् ॥ वाहनार्थंजपेद्रौप्यैरुद्राक्षामुक्तिदाःस्मृताः ॥ ४१ ॥ भुक्तिदाश्चतथाप्रोक्ताःसर्वकामफलप्रदाः ॥ देवतांतरभे देनमालानानाविधाःस्मृताः ॥ ४२ ॥ शिवस्यैवतथाविष्णोरुद्राक्षामालिकाशुभा ॥ सूर्यस्यस्फाटिकाप्रोक्ताजाप्ये श्रेष्ठापुरातनैः ॥ ४३ ॥ मुक्ताभिस्तुप्रवालैश्चचंडीतुष्टिमवाप्नुयात् ॥ गणेशश्चतथातैस्तुसंतुष्टोभवतिक्षणात् ॥ ४४ ॥ रुद्राक्षाश्चविशेषेणहरतुष्टिकराःस्मृताः ॥ मुक्ताभिर्वाथयुक्ताभीरुद्राक्षाभिर्हरिःस्वयम् ॥ ४५ ॥ नानोपासनभेदेनफ लंनानाविधंस्मृतम् ॥ ईदृशंतत्फलंचैवरुद्राक्षाभिरवाप्यते ॥ ४६ ॥ सुवर्णमालिकाप्रोक्तालक्ष्मीजाप्येसुखावहा ॥ सर्वैश्चऋषिभिश्चैवव्यासादिभिःपुरातनैः ॥ ४७ ॥ शास्त्राणिचविचार्यैवरुद्राक्षाःशुभदाःस्मृताः ॥ रुद्राक्षाविविधाः प्रोक्तास्तासांभेदंवदाम्यहम् ॥ ४८ ॥ एकमुखीभवेद्यावैसर्वसिद्धिविधायिनी ॥ सिद्धयोऽष्टौचतत्रैवयत्रस्याच्छुभ दाचसा ॥ ४९ ॥ द्विमुखीचभवेद्यावैलक्ष्मीदूरतरानहि ॥ त्रिमुखीचभवेद्यत्रविद्याःसर्वाःप्रतिष्ठिताः ॥ ५० ॥ च तुर्मुखीचयास्याद्वैचतुर्वर्गफलप्रदा ॥ पंचमुखीचयत्रैवतत्रस्यात्पापनाशनं ॥ ५१ ॥ ॥

भिरितिरुद्राक्षाविशेषणम् ॥ ४५ ॥ तत्तद्देवतोपासनभेदेनापिफलभेददर्शनात्सर्वफलसाधनत्वेनरुद्राक्षाणांधारणस्यप्राशस्त्यंवर्णयति ॥ नानेति ॥ ईदृशंत त्फलंचैवेत्यत्रेदृशंनफलंचान्यैरितिपाठांतरम् ॥ ४६ ॥ ४७ ॥ इदानींरुद्राक्षाणांनानाविधत्वेनतत्तत्फलमाह ॥ रुद्राक्षाइति ॥ ४८ ॥ एकेति ॥ यारु द्राक्षैकमुखी ॥ अत्रमुखपदंमुखाकाराग्रभागपरम् ॥ एवमग्रेपिवोध्यम् ॥ ४९ ॥ ५० ॥ चतुर्वर्गफलप्रदाधर्मार्थकाममोक्षरूपफलप्रदेत्यर्थः ॥ ५१ ॥

एकमुख्याःपरिमाणविशेषेणफलविशेषंकथयति ॥ एकमुखीचेत्यादिना ॥ ५२ ॥ आमलकेति ॥ आमलकंधात्रीफलंतत्परिमितेत्यर्थः ॥ ५३ ॥ ५४ ॥ ॥ ५५ ॥ धार्येति ॥ साचणकसदृशवर्तुलाकृतिरुद्राक्षमणिमाला ॥ ५६ ॥ मूल्यंदत्वैवसाग्राह्याऽन्यथाऽनिष्टफलंदिशतीत्याह ॥ मूल्याभावइति ॥ मूल्याभावेतन्मूल्यमदत्वागृहीतासापूर्वोक्तामणिमालाविपरीतफलमनिष्टफलंदिशेद्दद्यात्यदिपुनःपुण्यार्थमन्यैर्दीयेतसामूल्याभावेपिमूल्यदानंविनापिग्राह्येत्य

एकमुखीचरुद्राक्षादुर्लभाऋषिसत्तमाः ॥ बदरीफलमात्रासास्याच्चैवऋषिसत्तमाः ॥ ५२ ॥ तथापिफलदालोकेसुखसौभाग्यवर्धिनी ॥ आमलकसदृशीयातुसर्वारिष्टविनाशिनी ॥ ५३ ॥ चणकेनसमायातुवर्तुलाचशुभाकृतिः ॥ समणिर्बहुमूल्यःस्यात्किंपुनर्मालिकाततः ॥ ५४ ॥ प्रत्येकंचस्वयंशंभुर्नात्रकार्याविचारणा ॥ सार्वभौममिदंराज्यंनतेनतुल्यमर्हति ॥ ५५ ॥ दत्वातुहेमराशिंचशतंवामौक्तिकोत्तमान् ॥ धार्यासातुतदामालानान्यथाऋषिसत्तमाः ॥ ॥ ५६ ॥ मूल्याभावेतुसामालाविपरीतंफलंदिशेत् ॥ पुण्यदत्तातुसाग्राह्यामूल्याभावेपिमालिका ॥ ५७ ॥ चणकेनसमायाहिरुद्राक्षाबहुपुण्यदा ॥ पापघ्नीऋद्धिदाचैवभोगमोक्षप्रदायिनी ॥ ५८ ॥ सर्वस्वंतुप्रदत्वाचग्राह्यासामालिकोत्तमा ॥ गुंजयासदृशीयास्यात्सर्वार्थफलसाधनी ॥ ५९॥ यथायथालघुःस्याद्वैतथातथाऽधिकप्रदा ॥ एकैकस्यफलंप्रोक्तंदशांशैरधिकंबुधैः ॥ ६० ॥ यथाचदृश्यतेलोकेरुद्राक्षाफलदाशुभा ॥ तथानदृश्यतेन्याचमालिकाऋषिसत्तमाः ॥ ६१ ॥ रुद्राक्षाधारणंप्रोक्तंपापनाशनहेतवे ॥ तस्माच्चधारणीयावैसर्वार्थसाधनीचसा ॥ ६२ ॥ यस्यांऽगेनैवरुद्राक्षाजाप्यंवाकुरुतेनच ॥ तदंगंनस्पृशेत्प्राज्ञोदृष्ट्वादूरतरोव्रजेत् ॥ ६३ ॥ रुद्रभक्तैर्विशेषेणधारणीयाशुभायवै ॥ यश्चब्रुवन्भवेच्चैवधारयेद्भक्तिमान्सदा ॥ ६४ ॥ सर्वेष्वपिचबीजेषुदृश्यतेविविधांकुरः ॥ रुद्राक्षबीजकेसृष्टादृश्यतेमुक्तिरुत्तमा ॥ ६५ ॥ ॥ ॥ ॥ ॥

र्थः ॥ ५७ ॥ तादृशींरुद्राक्षामेवस्तौति ॥ चणकेनेति ॥ ५८ ॥ सर्वस्वंयत्किंचित्स्वनिकटास्थितंवित्तम् ॥ ५९ ॥ ६० ॥ पुनारुद्राक्षामेवस्तौति ॥ यथाचेत्यादिना ॥ रुद्राक्षातन्माला ॥ ६१ ॥ ६२ ॥ रुद्राक्षाऽसंनिधानेऽस्पृश्यत्वमाह ॥ यस्येति ॥ यस्यपुरुषस्यांगेरुद्राक्षासंबंधोनास्तियश्चजपंरुद्राक्षमालिकयानकुरुतेतदंगंनस्पृशेदित्यर्थः ॥ ६३ ॥ ६४ ॥ सर्वेष्विति ॥ रुद्राक्षबीजेरुद्राक्षात्मकेबीजेमुक्तिर्दृश्यतेजनकतयेत्यर्थः ॥ ६५ ॥ ॥

॥ ६६ ॥ ६७ ॥ अभिचारादिकंमारणप्रयोगादिकमित्यर्थःनश्यतीतिशेषः ॥ ६८ ॥ इदानींफलज्ञानार्थंरुद्राक्षास्वरूपमाह ॥ एकमुखीत्यादिना ॥ यारुद्राक्षैकमुखीस्यात्तयाप्रतिपूरंप्रवाहाद्बहिःप्रवाहसंमुखंवाव्रजेद्गच्छेत् ॥ तस्यजलनिमज्जनभयंनभवेदितिभावः ॥ प्रतिपूरमित्यत्रपतिपुत्रामितिपाठांतरं ॥ ६९ ॥ द्विमुखीति ॥ नदह्यते ॥ तस्याग्निभयंनभवेदितिभावः ॥ अथवाज्वरादिदाहोनभवेदितिभावः ॥ ७० ॥ चतुर्मुखीति ॥ यांरुद्राक्षांधारयितुर्गृहआगताश्चौरा अंधाभवेयुःसारुद्राक्षाचतुर्मुखीविज्ञेया ॥ कार्यात्कारणमनुमेयमितिन्यायादितिभावः ॥ अथवायाचतुर्मुखीस्यात्तद्गृहआगताश्चौराअंधाभवंतीत्यर्थः ॥ चतुर्मु

अन्यानिचापिदृश्यंतेफलानिऋषिसत्तमाः ॥ तदहंकथयाम्यद्यधारकाणांहितायवै ॥ ६६ ॥ रुद्राक्षमालिनंदृष्ट्वाभूतप्रेतपिशाचकाः ॥ डाकिनीशाकिनीचैवयेचान्येद्रोहकारकाः ॥ ६७ ॥ कृत्रिमंचैवयत्किंचिदभिचारादिकंचयत् ॥ रुद्राक्षमालिकांदृष्ट्वाशिवोविष्णुःप्रसीदति ॥ ६८ ॥ चिन्हैरेतैःशुभाज्ञेयाप्रेक्षावद्भिर्मुनीश्वराः ॥ एकमुखीचयास्याद्वैप्रतिपूरंव्रजेदिह ॥ ६९ ॥ द्विमुखीचतथाज्ञेयाधारकोनैवदह्यते ॥ त्रिमुखीचयदास्याद्वैशस्त्रघातादिकंनहि ॥ ७० ॥ चतुर्मुखीतदाज्ञेयाचौराश्चांधाभवंतिहि ॥ जलेतुमुच्यमानासामज्जतिनतरेदिह ॥ ७१ ॥ पंचमुखीतुयाप्रोक्तासर्वानर्थनिवर्तिनी ॥ जलेनमज्जतिसाचसर्वदाशुभदायिनी ॥ ७२ ॥ एवंज्ञात्वाफलंसम्यग्धार्याधर्मविवृद्धये ॥ सूतकेमृतकेवापिमलमूत्रविसर्जने ॥ ७३ ॥ भोजनेरतिकालेचरुद्राक्षंतुविवर्जयेत् ॥ स्नानेदानेजपेहोमेस्वाध्यायेपितृतर्पणे ॥ ७४ ॥ विष्णुशिवादिपूजायांश्राद्धकालेक्षधारणम् ॥ एतत्सर्वंसमाख्यातंयत्पृष्टोहिमुनीश्वराः ॥ ७५ ॥ एवंयःशृणुयान्नित्यंमाहात्म्यंपरमंशुभं ॥ रुद्राक्षमालिकायाश्चशिवस्यातिप्रियोभवेत् ॥ ७६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांरुद्राक्षमाहात्म्यंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ॥ ॥

ख्यागुणंस्वरूपंवापरीक्षते ॥ जलइति ॥ ७१ ॥ सर्वानर्थनिवर्तिनीसर्वदुःखनाशिनी ॥ पंचमुख्यागुणादिपरीक्षते ॥ जलइति ॥ ७२ ॥ उपसंहरति ॥ एवमिति ॥ कालविशेषेरुद्राक्षधारणंनिषेधति ॥ सूतकइति ॥ सूतकेजननाशौचे ॥ ७३ ॥ तर्हिकस्मिन्कालेरुद्राक्षधारणंकर्तव्यमितितदाह ॥ स्नानइति ॥ ७४ ॥ अक्षधारणंरुद्राक्षधारणं ॥ स्वस्मिन्नपृष्टकथनदोषंनिवारयति ॥ एतत्सर्वमिति ॥ ७५ ॥ रुद्राक्षामाहात्म्यश्रवणफलंकथयति ॥ एवमिति ॥ ७६ ॥ इति श्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांरुद्राक्षमाहात्म्यंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ॥

॥ ओंनमःशिवाय ॥ ज्योतिर्लिंगानिमुख्यानिह्युपलिंगानियानिच ॥ तेषांस्थानंचनामापिह्यष्टत्रिंशेऽत्रकीर्त्यते ॥ १ ॥ सम्यगिति ॥ १ ॥ २ ॥ अन्यत्रेति ॥ पातालस्वर्गादावित्यर्थः ॥ अस्मदज्ञातस्थलेष्वपिविद्यमानानिलिंगानिज्ञातुमृषयःपृच्छंति ॥ यत्रयत्रेति ॥ एतेनापृष्टकथनरूपदोषःसूतस्यनास्तीतिसूचितम् ॥ ३ ॥ यदिति ॥ हेऋषिश्रेष्ठास्त्वंलिंगानिकथयेतिभवद्भिरधुनायत्पृष्टंतदहंकिंकथंब्रवीमीत्यग्रिमेणान्वयः ॥ वक्तुंतदशक्यमितिभावः ॥ ४ ॥ तत्रकारणमाह ॥ सर्वेषामित्यादिना ॥ ५ ॥ ६ ॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुत्यर्थंह्यनुसंधायाह ॥ यत्किंचिदिति ॥ ७ ॥ यतोवाचो

ऋषयऊचुः ॥ सम्यगुक्तंत्वयासूतलोकानांहितकाम्यया ॥ पुनश्चकथ्यतांह्येतच्छिवमाहात्म्यमुत्तमम् ॥१॥ शृण्वंतश्चमुखांभोजान्नतृप्ताःस्मवयंप्रभो ॥ पृथिव्यांयानिलिंगानितीर्थेतीर्थेभवंतिहि ॥२॥ अन्यत्रवास्थलेयानिप्रसिद्धानि यथाप्रभो ॥ यत्रयत्रभवेल्लिंगंतत्तत्सर्वंनिवेद्यतां ॥ ३ ॥ इतिश्रुत्वावचस्तेषांवचनंचेदमब्रवीत् ॥ सूतउवाच ॥ यत्पृष्टंहि ऋषिश्रेष्ठालिंगानिकथयाऽधुना ॥ ४ ॥ सर्वेषांचैवलिंगानांसंख्यानंविद्यतेकुतः ॥ सर्वालिंगमयीभूमिःसर्वंलिंगमयं जगत् ॥ ५ ॥ लिंगमयानितीर्थानिसर्वंलिंगेप्रतिष्ठितं ॥ संख्यानविद्यतेतेषांतत्किंचैवब्रवीमिह ॥ ६ ॥ यत्किंचिद्दृश्यतेदृश्यंवर्ण्यतेस्मर्यतेचयत् ॥ तत्सर्वंशिवरूपंचनान्यदस्तीतिकिंचन ॥७॥ तथापिश्रूयतांह्येतत्कथयामियथाश्रुतम् ॥ लिंगानिचऋषिश्रेष्ठाःपृथिव्यांयानितानिह ॥ ८ ॥ पातालेचापिवर्ततेस्वर्गेचापितथैवह ॥ सर्वैश्चपूज्यतेशंभुःसदेवासुरमानुषैः ॥ ९ ॥ तथाऽपिशंभुनाव्याप्तंसदेवासुरमानुषम् ॥ अनुग्रहायलोकानांलिंगानिचमहेश्वरः ॥ १० ॥ दधातिविविधान्यत्रतीर्थेचैवस्थलेपुनः ॥ यत्रयत्रयदाशंभुर्भक्त्याभक्तैश्चसंस्मृतः ॥ ११ ॥ तत्रतत्राऽवतीर्याऽथकार्यंकृत्वाचसंस्थितः ॥ लोकानामुपकारार्थंलिंगंचैवाऽप्यकल्पयत् ॥ १२ ॥ तल्लिंगंपूजयित्वाचसिद्धिंसमधिगच्छति ॥ तेषांचापिनविद्येतसंख्याचऋषिसत्तमाः ॥ १३ ॥ ॥ ॥ ॥

निवर्ततइतिश्रुत्यर्थमनुसंधायाह ॥ तथापीति ॥ यद्यपिलिंगंसर्वरूपत्वेनानिर्वाच्यंतथापितद्यथाश्रुतंकथयामिनतुसाकल्येनेतिभावः ॥ ८ ॥ ९ ॥ व्यापकोपिशिवोभक्तानुग्रहायभूमंडलेलिंगानिदधातीत्याह ॥ अनुग्रहायेति ॥ १० ॥ ११ ॥ तत्रेति ॥ कार्यमसुरवधादिकार्यं ॥ १२ ॥ तेषामिति ॥ भूमंडलस्थानांलिंगानामित्यर्थः ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥

॥ १४ ॥ प्रधानानिमुख्यलिंगानि ॥ १५ ॥ प्रधानेष्विति ॥ प्रधानेषुमुख्येषुमध्ये ॥ निर्धारणेसप्तमी ॥ यानिज्योतिषांलिंगानिद्वादशतानिज्योतिर्लिंगानिक थयाम्यहम् ॥ नरएतच्छ्रुत्वापापंव्यपोहतित्यजतीतिसमुदितान्वयः ॥ १६॥ द्वादशज्योतिर्लिंगान्याह ॥ सौराष्ट्रइति ॥ गुर्जरदेशेष्वित्यर्थः ॥ श्रीशैलइति ॥ श्रीशैलःपूर्वस्यांदिशिव्यंकटाचलसमीपेश्रीशैलाख्यःपर्वतविशेषस्तस्मिन्नित्यर्थः ॥ १७ ॥ उज्जयिन्यांमहाकालनामलिंगमस्तीतिसर्वत्रशेषः ॥ ओंकारपरमे श्वरमोंकारेश्वरनामेत्यर्थः ॥ अत्रोंकारममरेश्वरमितिपाठांतरम् ॥ तत्रोंकारापरपर्यायममरेश्वरनामलिंगमित्यर्थः ॥ डाकिन्यांतदाख्यप्रसिद्धपुर्यां ॥ अत्रगं डिन्यामितिपाठांतरं ॥१८॥ गौतमीतटेगोदावरीतीरेत्र्यंबकइतिप्रसिद्धपुरइत्यर्थः ॥ वैद्यनाथमिति ॥ चिताभूमौपरलीइतिप्रसिद्धपुरे ॥ दारुकावने ॥ १९ ॥ शिवालयेतदाख्यस्थानेघुश्मेशंघुश्मेशंनामलिंगम् ॥ अत्रघृष्णेशमितिपाठांतरम् ॥२०॥ सर्वसिद्धिफलःसर्वसिद्धिःसर्वकार्यसिद्धिःफलंयस्यसतथा ॥ २१ ॥

तथाऽपिश्रूयतांसम्यग्यथाज्ञानंयथाश्रुतम् ॥ पृथिव्यांयानिलिंगानितेषांसंख्यानविद्यते ॥ १४ ॥ तथापिचप्रधाना निकथ्यंतेचमयापुनः ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात् ॥ १५ ॥ प्रधानेषुचयानीहमुखाच्चैववदाम्यह म् ॥ लिंगानिज्योतिषांचात्रविद्यंतेऋषिसत्तमाः ॥ १६ ॥ तान्यहंकथयाम्यद्यश्रुत्वापापंव्यपोहति ॥ सौराष्ट्रेसोम नाथंचश्रीशैलेमल्लिकार्जुनम् ॥ १७॥ उज्जयिन्यांमहाकालमोंकारपरमेश्वरम् ॥ केदारंहिमवत्पृष्ठेडाकिन्यांभीमशं करम् ॥१८॥ वारणस्यांचविश्वेशंत्र्यंबकंगौतमीतटे ॥ वैद्यनाथंचिताभूमौनागेशंदारुकावने ॥१९॥ सेतुबंधेचरामेशंघु श्मेशंचशिवालये ॥ द्वादशैतानिनामानिप्रातरुत्थाययःपठेत् ॥२०॥ सर्वपापविनिर्मुक्तोसर्वसिद्धिफलोभवेत् ॥ यंयंका ममपेक्ष्यैवपठिष्यंतिनरोत्तमाः ॥२१॥ तस्यतस्यफलप्राप्तिर्भविष्यतिनसंशयः ॥ एतेषांदर्शनादेवपातकंनैवतिष्ठति २२

तस्येति ॥ तस्यकामस्यपुत्रादिरूपस्यफलप्राप्तिःसंप्राप्तिरित्यर्थः ॥ विशिष्टवाचकानामितिन्यायात् ॥ अथवातस्येतिषष्ठ्यंतार्थस्याभेदेनफलेऽन्वयः ॥ नचाभे दान्वयबुद्धिंप्रतिसमानविभक्तिकत्वादिकंतंत्रमितिनियमविरोधइतिवाच्यम् ॥ फलप्राप्तिरित्यत्रफलपदोत्तरंलुप्तङसूविभक्तेःस्मरणकल्पनात् ॥ नचश्रूयमाण विभक्तिरेवशाब्दबोधेप्रयोजिकेतिनियमः ॥ सुंदरंदधीत्यादावम्विभक्तेरश्रवणेपिशाब्दबोधोदयात् ॥ वस्तुतस्तुधान्येनधनवान्राहोःशिरइत्यादौविरुद्धविभ क्तिमत्पदसमभिव्याहारस्येवात्रापिषष्ठ्यंतपदसमभिव्याहारस्यफलबलाच्छाब्दबोधप्रयोजकत्वकल्पनेननकाचिदनुपपत्तिरिति ॥ नचपदार्थःपदार्थेनान्वे तिनतुपदार्थैकदेशेनेत्यादिव्युत्पत्तिविरोधः ॥ तत्रपदार्थःपदार्थेनैवान्वेतिनतुपदार्थतावच्छेदकेनेतिव्युत्पत्तेःसामंजस्येनफलपदार्थस्यपदार्थतावच्छेदकत्वाभा वेनतत्रषष्ठ्यंतार्थान्वयेनकिंचिद्बाधकमित्यलंप्रसक्तानुप्रसक्त्या ॥ २२ ॥ ॥ ॥ ॥

कर्मक्षयइति ॥ पापक्षयइत्यर्थः ॥ ज्योतिषांलिंगानिज्योतिर्लिंगानिदृष्टानि ॥ यैरितिशेषः ॥ २३ ॥ तेषामिति ॥ जननीगर्भेमातृगर्भेवासोजन्मेतियावत् ॥ एतेषामिति ॥ एतेषांज्योतिर्लिंगानांपूजनेकर्तव्येवर्णानांब्रह्मणादिशूद्रांतानांदूषणमस्पर्शरूपदोषोनास्ति ॥ तेषांस्वयंभूत्वादितिभावः ॥ २४ ॥ नैवेद्यमिति ॥ ज्योतिर्लिंगेभ्योनिवेदितमन्नंप्रयत्नतःसंग्राह्यंभोजनीयंच ॥ शिवनिर्माल्यनिषेधस्तुज्योतिर्लिंगातिरिक्तलिंगनिवेदितविषयइतिभावः ॥ अतएव तद्भोजनफलमाह ॥ भुक्तइति ॥ २५ ॥ ज्योतिषामिति ॥ लिंगानांफलंपूजनस्येत्यादिः ॥ २६ ॥ अनुलोमादीनामपिज्योतिर्लिंगदर्शनेनब्राह्मणाद्युत्तमजन्मप्राप्तौमोक्षोभवेदित्याह ॥ हीनयोनाविति ॥ पश्यतीत्यनेनहीनवर्णानांज्योतिर्लिंगस्पर्शनिषेधः ॥ २७ ॥ वेदपारगोवेदार्थज्ञानसंपन्नः ॥ २८ ॥

कर्मक्षयोभवेत्तस्ययस्यतुष्टोमहेश्वरः ॥ ज्योतिषांचैवलिंगानिदृष्टानिऋषिसत्तमाः ॥ २३ ॥ तेषांचजननीगर्भेवासोनैवभवेत्पुनः ॥ एतेषांपूजनेनैववर्णानांदूषणंस्मृतम् ॥ २४ ॥ नैवेद्यंचैवसंग्राह्यंभोजनीयंप्रयत्नतः ॥ भुक्तेसर्वाणिपापानिभस्मसाद्यांतितत्क्षणात् ॥ २५ ॥ ज्योतिषांचैवलिंगानांफलंवक्तुंनशक्यते ॥ एकंचपूजितंयेनषण्मासंचनिरंतरम् ॥ २६ ॥ तस्यदुःखंनजायेतमातृगर्भसमुद्भवम् ॥ हीनयोनौयदाजातोज्योतिर्लिंगंचपश्यति ॥ ॥ २७ ॥ तस्यजन्मभवेत्तत्रविमलेसत्कुलेपुनः ॥ सत्कुलेजन्मसंप्राप्यधनाढ्योवेदपारगः ॥ २८ ॥ शुभकर्मतदाकृत्वामुक्तिंयात्यनपायिनीं ॥ म्लेच्छोवाप्यंत्यजोवापिषंढोवाऽथमुनीश्वराः ॥ २९ ॥ द्विजोभूत्वालभेन्मुक्तिंतस्मात्तद्दर्शनंचरेत् ॥ अतःपरंचतीर्थेषुस्थलेचैवाऽथवापुनः ॥ ३० ॥ प्रधानानिचवर्ततेतेषांनामानिवैतथा ॥ ज्योतिषांचोपलिंगानिश्रूयतामृषिसत्तमाः ॥ ३१ ॥ सोमेश्वरस्ययल्लिंगमंधकेशमुदाहृतम् ॥ मह्याःसागरसंयोगेतल्लिंगमुपलिंगकम् ॥ ३२ ॥

शुभकर्मेति ॥ यज्ञादिकर्मेत्यर्थः ॥ कृत्वेतिक्त्वाप्रत्ययेनकर्मानंतरंशमदमादिसंपत्त्युत्तरमुत्पत्स्यमानंज्ञानमेवमोक्षसाधनमितिगम्यते ॥ तथाचश्रुतिः ॥ तमेवंविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेति ॥ ततोनपायिनीमनश्वरीमुक्तियातिप्राप्नोतीतिसंबंधः ॥ म्लेछादीनामपिज्योतिर्लिंगदर्शनेनाद्विजत्वप्राप्तिद्वारा मोक्षप्राप्तिर्भवतीत्याह ॥ म्लेच्छेति ॥ २९ ॥ इदानींप्रधानलिंगेषुद्वादशज्योतिर्लिंगसमुद्भूतान्युपलिंगान्याह ॥ अतःपरमित्यादिना ॥ ३० ॥ प्रधानानीति ॥ प्रधानानिलिंगानिमयाकथ्यंतेतद्भवद्भिःश्रूयतामितिसंबंधः ॥ अत्रतेषांनामानिवैशृण्वितिपाठांतरम् ॥ ३१ ॥ सोमेश्वरस्येति ॥ सोमेश्वरस्यपूर्वोक्तज्योतिर्लिंगविशेषस्योपलिंगकमंधकेशंनामलिंगमुदाहृतम् ॥ इदंलिंगंसोमेश्वरात्संभूतमितिगम्यतेऽग्रिमग्रंथानुरोधादिति ॥ एवमग्रेपिबोध्यं ॥ ३२ ॥

मल्लिकार्जुनेति ॥ भृगुकच्छेपर्वततटानूपदेशे ॥ प्रपातस्तुतटोभृगुः ॥ अल्पप्रायमनूपंस्यात्पुंसिकच्छस्तथाविधइतिचकोशः ॥ शेषंस्पष्टम् ॥ ३३ ॥ ओंकारेति ॥ अत्रौकारस्यभवेल्लिंगमितिपाठांतरम् ॥ ३४ ॥ ३५ ॥ ३६ ॥ झिल्लिकेति ॥ झिल्लिकानदीविशेषस्तस्याःसरस्वत्याश्चतीरेसंगमइत्यर्थः ॥ ३७ ॥ ॥ ३८ ॥ ३९ ॥ गंगातीरइति ॥ गंगातीरेभागीरथीतीरेयेनलिंगेनमुख्यत्वंप्राप्तंतद्विमुक्तिदंमोक्षप्रदंलिंगंकृत्तवासेश्वरोनामास्तीतिशेषः ॥ तत्तुल्यःकृत्तवा

मल्लिकार्जुनसंभूतंभृगुकच्छेऽथरुद्रकम् ॥ महाकालस्ययल्लिंगंदुग्धेशमितिविश्रुतं ॥ ३३ ॥ ओंकारसंभवंलिंगंकर्दमेशमितिस्वयम् ॥ केदारेश्वरसंजातंभूतेशंयमुनातटे ॥ ३४ ॥ भीमशंकरसंभूतंभीमेश्वरइतिस्मृतम् ॥ विश्वेश्वराच्चयज्जातंशरण्येश्वरविश्रुतम् ॥ ३५ ॥ त्र्यंबकस्यचयत्प्रोक्तंसिद्धेश्वरइतिश्रुतं ॥ वैद्यनाथेश्वराज्जातंवैजनाथइतिश्रुतम् ॥ ३६ ॥ नागेश्वरसमुद्भूतंभूतेश्वरमुदाहृतम् ॥ झिल्लिकासरस्वतीतीरेदर्शनात्पापहारकम् ॥ ३७ ॥ रामेश्वराच्चयज्जातंगुप्तेश्वरमुदाहृतम् ॥ घुश्मेशाच्चैवयज्जातंव्याघ्रेश्वरइतिस्वयम् ॥ ३८ ॥ एतानिचप्रधानानिमुख्यतांचगतानिच ॥ अन्यान्यपिचमुख्यानिश्रूयतामृषिसत्तमाः ॥ ३९ ॥ गंगातीरेचमुख्यत्वंप्राप्तंयेनविमुक्तिदम् ॥ कृत्तवासेश्वरःसाक्षात्तत्तुल्योवृद्धकालकः ॥ ४० ॥ तिलभांडेश्वरश्चैवदशाश्वमेधएवच ॥ गंगासागरसंयोगेसंगमेश्वरइतिस्मृतः ॥ ४१ ॥ यमुनातीरकेयश्चगोधूमेश्वरएवच ॥ नीलेश्वरइतिख्यातोवृंदावनसमीपगः ॥ ४२ ॥ भूतेश्वरइतिप्रोक्तःसर्वार्थसाधकोनृणाम् ॥ नारीश्वरइतिख्यातःकौशिक्यास्तुसमीपतः ॥ ४३ ॥ कटुकेश्वरनामासीद्वर्ततेगल्लकीतटे ॥ पूरेश्वरइतिख्यातःपुष्करस्यसमीपतः ॥ ४४ ॥ ॥ ॥ ॥ ॥

सेश्वरसदृशोवृद्धकालकोनामेतिसंबंधः ॥ गांगातीरेचमुख्यत्वंप्राप्तंकेनविमुक्तिदमितिपाठांतरम् ॥ कृत्तवासेश्वरइत्यत्रतुकृत्तिवासेश्वरइतिपाठांतरम् ॥ ॥ ४० ॥ तिलेति ॥ दशाश्वमेधेवाराणस्यांदशाश्वमेधाख्यप्रदेशे ॥ ४१ ॥ नीलेश्वरइति ॥ अत्रतिलेश्वरइतिपाठांतरम् ॥ ४२ ॥ नारीश्वरइति ॥ कौशिक्याःकौशिकीनदीविशेषस्तस्याः ॥ ४३ ॥ कटुकेश्वरेति ॥ गल्लकीतटेगल्लकीनदीविशेषस्तस्यास्तटे ॥ अत्रकंटुकेश्वरनामासीद्वर्ततेगंडकीतटइतिपाठांतरम् ॥ पुष्करस्यक्षेत्रविशेषस्य ॥ ४४ ॥. ॥ ॥ ॥

मंडकेशइति ॥ अत्रपुंडरीकेशइतिपाठांतरम् ॥ फल्गुतीरेफल्ग्वाख्यनदीतीरे ॥ सिद्धनाथेश्वरइति ॥ अत्रश्लोकांतरम् ॥ सिद्धनाथेश्वरश्चैवगोमत्याःक्षीरसागरे ॥ दर्शनात्सिद्धिदोनॄणांभुक्तिमुक्तिप्रदायकइति ॥ ४५ ॥ दूरेश्वरइति ॥ पत्तनेपाटणाइतिप्रसिद्धपुरे ॥ मृगेश्वरइति ॥ जननाथइत्यत्रवैजनाथइतिपाठांतरम् ॥ ॥ ४६ ॥ नर्मदेति ॥ सानर्मदारुद्रस्वरूपा ॥ रुद्रस्वरूपप्रकाशकत्वेनरुद्रस्वरूपत्वंतस्याउपचारादितिभावः ॥ ४७ ॥ तस्यामिति ॥ नर्मदायामित्यर्थः ॥

मंडकेशइतिख्यातःफल्गुतीरेसदाशिवः ॥ सिद्धनाथेश्वरश्चैवदर्शनात्सिद्धिदोनॄणां ॥४५॥ दूरेश्वरइतिख्यातःपत्तने चोत्तरेतथा ॥ मृगेश्वरश्चनाम्नावैजननाथस्तथैवच ॥ ४६ ॥ नर्मदातीरकेसंतितेषांसंख्यानविद्यते ॥ साचरुद्रस्व रूपाहिवर्ततेपापहारिका ॥ ४७ ॥ तस्यांस्थिताश्चयेकेचित्पाषाणाःशिवरूपिणः ॥ तथाऽपिचप्रवक्ष्यामिनामानिच मुनीश्वराः ॥ ४८ ॥ आवर्त्तेश्वरनामाऽपिवर्त्ततेपापहारकः ॥ पद्मेश्वरइतिख्यातःसिंहेश्वरस्तथैवच ॥ ४९ ॥ सुमे श्वरस्तथाचात्रकुमारेश्वरएवच ॥ पुंडरीकेशइतिख्यातोमंडपेश्वरएवच ॥ ५० ॥ तीक्ष्णेशनामातत्रासीद्दर्शनात्पा पहारकः ॥ धुंधरेश्वरनामापिवर्त्ततेनर्मदातटे ॥ ५१ ॥ शूलेश्वरइतिख्यातःकुंभेश्वरस्तथाऽपिच ॥ कुबेरेश्वरनाम्ना वैविख्यातोभुवनत्रये ॥ ५२ ॥ ततःसोमेश्वरोदेवोनीलकंठइतिस्वयम् ॥ मंगलेशइतिप्रोक्तोमंगलायतनंमहत् ॥ ॥ ५३ ॥ ततश्चनंदिकोदेवोहत्याकोटिनिवारकः ॥ नंदिकेशंचयश्चैवपूजयेत्परयामुदा ॥ ५४ ॥ तस्यतस्याऽखिला सिद्धिर्भविष्यतिनसंशयः ॥ तत्रतीरेचयःस्नातितस्यपापंविनश्यति ॥ ५५ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहिता यांज्योतिर्लिंगनिरूपणंनामाऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ॥ ॥ ॥

यद्यपितत्रत्यानांसंख्यानास्तितथापियथामतिमुख्यान्कथयति ॥ तथापीति ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ मंगलेशइति ॥ मंगलायतनंमंगलस्यक ल्याणस्यायतनंस्थानंमंगलकारकइत्यर्थः ॥ ५३ ॥ ततइति ॥ हत्याकोटिनिवारकोऽनंतब्रह्मादिहत्याजनितपापनाशकः ॥ नंदिकपूजनमेवसर्वफलप्रदत्वेनप्र शंसति ॥ नंदिकेशमिति ॥ ५४ ॥ तत्रेति ॥ तत्रतीरेनर्मदातीरइत्यर्थः ॥ ५५ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांज्योतिर्लिंग निरूपणंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ॥ ॥

॥ ॐनमःशिवाय ॥ प्रागध्यायावसानेयोनंदिकेशउदाहृतः ॥ तन्महात्म्यंप्रवक्तुंचतत्तीर्थस्यपुरातनम् ॥ १ ॥ ब्रह्महत्यानाशकत्वप्रतिपादनगर्भितम् ॥ वृत्तमाख्यायतेऽत्रैकोनचत्त्वारिंशकेपुरा ॥ २ ॥ एवमिति ॥ एवंपूर्वोक्तप्रकारेणमाहात्म्यकमर्थाच्छिवस्यत्वयोक्तमितिशेषः ॥ १ ॥ कथामुपक्रमते ॥ पुरेति ॥ ऋषिसत्तमोनारदः ॥ अत्रनारदोमुनिरितिपाठांतरम् ॥ २ ॥ रेवायानर्मदानद्याः ॥ कर्णकीनामकर्णकीतिप्रसिद्धापुरीनगरी ॥ उतथ्यकुलसंभवउतथ्याख्यर्षिकुलोत्पन्नोद्विजवरोब्राह्मणः ॥ ३ ॥ पुत्राभ्यांस्वसुताभ्यां ॥ चतुर्थीयं ॥ स्वपत्निकांभार्यामर्पयित्वासंस्थाप्यकाश्यांगतोनिवासार्थमितिभावः ॥ ४ ॥ कृत्यमौर्ध्वदैहिकक्रियामास्तामितिशेषः ॥ ५ ॥ पुत्राविति ॥ तयामात्रोभौपुत्रौपरिणयित्वाविवाहयित्वाधनंपितामहादिप्राप्तंरिक्थंविभक्तंविभाजितं ॥ एतेन

॥ ऋषयऊचुः ॥ एवंमाहात्म्यकंतत्रकथ्यतांचत्वयाऽधुना ॥ अतःपरंचयज्जातंतत्तत्वंवक्तुमर्हसि ॥ १ ॥ सूतउवाच ॥ सम्यगुक्तंभवद्भिश्चकथयामियथाश्रुतम् ॥ पुरायुधिष्ठिरेणैवपृष्टश्चऋषिसत्तमः ॥ २॥ रेवायाःपश्चिमेतीरेकर्णकीनामवैपुरी ॥ तत्रद्विजवरःकश्चिदुतथ्यकुलसंभवः ॥ ३ ॥ काश्यांगतश्चपुत्राभ्यामर्पयित्वास्वपत्निकाम् ॥ कदाचित्सभृततस्तपुत्राभ्यांचश्रुतंतदा ॥ ४ ॥ तदीयंचैवयत्कृत्यंसंपाद्यपुत्रकावुभौ ॥ पत्नीचपालयामासपुत्रौपुत्रहितैषिणी ॥ ॥ ५ ॥ पुत्रौपरिणयित्वातौविभक्तंचधनंतया ॥ स्वीयंचरक्षितंकिंचित्कियत्कालंस्थितातदा ॥ ६ ॥ कदाचिन्म्रियमाणासापुण्यंचविविधंतथा ॥ कृत्वाप्राणान्नमुच्येतकष्टंदृष्ट्वाऽथपुत्रकौ ॥ ७ ॥ ऊचतुर्मातरंतत्रकिंन्यूनंविद्यतेतव ॥ यन्न्यूनंक्रियतांमातस्तदावांकरवावहै ॥ ८ ॥ इत्युक्तंचतयातत्रन्यूनंचविद्यतेबहु ॥ तदेवक्रियतेचेद्धिसुखेनमरणंभवेत् ॥ ९ ॥ ज्येष्ठपुत्रश्चयश्चासीत्तेनोक्तंकथ्यतांत्वया ॥ तयाचप्रार्थितंह्येतत्पुरामेमनसःस्पृहा ॥ १० ॥ ॥

पितुरभावेमातुरपिरिक्थविभजनेऽधिकारोस्तीतिसूचितम् ॥ स्वीयंस्वभागप्राप्तंकिंचिद्रिक्थंरक्षितंस्थापितंस्वकीयावश्यककार्यनिर्वाहार्थं ॥ धर्मशास्त्रेमातृभागस्यविहितत्वादितिभावः ॥ पितुरूर्ध्वंविभजतांमाताप्यंशंसमंहरेदितियाज्ञवल्क्यवचनात् ॥ ततोमाताकियत्कालंकानिचिद्वर्षाणिस्थिताजीवितवत्यभूदितिशेषः ॥ ६ ॥ अथकदाचिन्मरणोन्मुखीमातागंगाजलेस्वकीयास्थीनिप्रक्षेपणीयानीतिमनोरथवासनांधृत्वाप्राणानविमोचयंतीसतीहेमातस्तवमनोरथमहंकरिष्यामीतिवाक्यंपुत्रमुखान्निर्गतंश्रुत्वाप्राणानत्यजदित्याह ॥ कदाचिदित्यादिना॥म्रियमाणामरणोन्मुखी ॥ कष्टंप्राणाविमोचनेदुःखंमातुरितिशेषः ॥ ७ ॥ ८ ॥ ९ ॥ मातावक्ति ॥ इतीति ॥ तयेत्यत्रत्वयेतिपाठोऽसंदर्भः ॥ तयामात्रैतद्वक्ष्यमाणंप्रार्थितंयाचितं ॥ किंतत् ॥ हेपुत्रकाश्यांगंतुंतत्रैवदेहपातनार्थमितिभावः ॥ मेमनसःस्पृहाऽसीत्परंतुदुर्दैवात्तथाकाशीगमनंममनासीन्नाभूदित्यग्रिमेणान्वयः ॥ १० ॥ ॥

अतंद्रितमालस्यरहितमितिक्रियाविशेषणं ॥ ममास्थीनिगंगाजलेक्षेपणीयानि ॥ ततस्तेतवशुभंकल्याणंभविष्यतीत्याशीर्वचनमेतत् ॥ ११ ॥ १२ ॥१३॥ इतीति ॥ ततःपुत्रइतिपूर्वोक्तप्रकारेणमातुर्हस्तेवचोवचनंदत्वायावद्गृहमागतः ॥ अत्रइतिहस्तेजलंदत्वेतिपाठांतरम् ॥ १४ ॥ मासिकमिति ॥ षोडशसोदकुंभश्राद्धानीत्यर्थः ॥ कृत्वेति ॥ एतेनापकृष्यमासिकश्राद्धानिकर्तव्यानीतिसूचितम् ॥ १५ ॥ तयोरिति ॥ पुत्रयोर्मध्यइत्यर्थः ॥ तीर्थकाम्ययातीर्थेषुप्रक्षेपणेच्छया ॥ १६ ॥ तेनैवसेवकेनैव ॥ प्रियचिकीर्षयामनोरथपूरणेच्छया ॥ १७ ॥ श्राद्धमिति ॥ घृतश्राद्धमित्यर्थः ॥ यात्रारंभेतस्यविहितत्वात्

काश्यांगंतुंतथानासीदिदानींम्रियतेपुनः ॥ ममास्थीनिलयापुत्रक्षेपणीयान्यतंद्रितम् ॥ ११ ॥ गंगाजलेशुभंतेऽद्यभविष्यतिनसंशयः ॥ इत्युक्तेचतयापुत्रोवचनंचेदमब्रवीत् ॥ १२ ॥ मातस्त्वयासुखेनैवप्राणास्त्याज्यानसंशयः ॥ तवकार्यंपुराकृत्वापश्चात्कार्यंमदीयकम् ॥ १३ ॥ इतिहस्तेवचोदत्वायावत्पुत्रोगृहंगतः ॥ तावत्साचमृतातत्रहरिस्मरणतत्परा ॥ १४ ॥ तस्याश्चैवचयत्कृत्यंतत्सर्वंसंविधायवै ॥ मासिकंचैवकृत्वानुगमनायोपचक्रमे ॥ १५ ॥ तयोःश्रेष्ठतमोयोवैसुवादोनामविश्रुतः ॥ तदस्थीनिसमादायनिःसृतस्तीर्थकाम्यया ॥ १६ ॥ संगृह्यसेवकंकंचित्तेनैवसहितस्तदा ॥ आश्वास्यभार्यांपुत्रांश्चमातुःप्रियचिकीर्षया ॥ १७ ॥ श्राद्धंदानादिकंभोज्यंकृत्वाविधिमनुत्तमम् ॥ मंगलस्मरणंकृत्वानिर्जगामद्विजःस्वयम् ॥ १८ ॥ तद्दिनेयोजनंगत्वावसातिंग्रामकेशुभे ॥ द्विजगेहेतदाकृत्वासंध्यादिविधिपूर्वकम् ॥ १९ ॥ यामिनीचगतातत्रमुहूर्तद्वयसंमिता ॥ सेवकेनतदायुक्तोब्राह्मणःसंस्थितस्तदा ॥ २० ॥ स्तवनंकृतवांस्तत्रहरेरद्भुतकर्मणः॥एतस्मिन्नेवसमयेह्याश्चर्यंचाऽभवत्तदा ॥ २१ ॥ गौश्चैवचाऽभवत्तत्रह्यंगणेबंधिताशुभा ॥ एवंवैब्राह्मणस्तत्रह्याजगामबहिर्गतः ॥ २२ ॥ गौर्नैवचप्रियेदुग्धाइत्युक्त्वावत्समानयत् ॥ दोहनार्थंसमाहूयस्त्रियंशीघ्रतरंतदा ॥ २३ ॥ ॥ ॥

॥ मंगलस्मरणं गमनेविघ्ननाशनार्थं ॥ मंगलायतनंहरिः ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्ममेत्यादिनाहरिस्मरणम् ॥ १८ ॥ योजनंक्रोशचतुष्टयपरिमितमार्गं ॥ १९ ॥ यामिनीति ॥ रात्रिरित्यर्थः ॥ मुहूर्तद्वयसंमिताघटिकाचतुष्टयपरिमितेतियामिनीविशेषणमेतत् ॥ २० ॥ २१ ॥ दोहनेप्रवृत्तोगृहस्वामीब्राह्मणःस्वपादौपीडयंतंवत्संतन्मातुस्तन्यपानान्निवर्तयामासेत्याह ॥ गौश्चेत्यादिना ॥ एवमिति ॥ ब्राह्मणोगृहस्वामी ॥ २२ ॥ गृहस्वामीवदति ॥ गौरिति ॥ हेप्रियेपत्नि ॥ गौर्दुग्धादोहनकर्म ॥ अप्रधानेदुहादीनामित्यनुशासनाद्गोरभिधानमितिबोध्यम् ॥ २३ ॥

कीलेवंधनशंकौ ॥ २४ ॥ कूर्परेणकफोणिना ॥ २५ ॥ वत्सइति॥तेनगृहस्वामिब्राह्मणेनपीडितस्ताडितोवत्सःशांतोनिवृत्तक्रियोऽभवदित्यर्थः ॥२६ ॥२७ ॥ २८ ॥ २९ ॥ तद्वचइति ॥ वचनमुपाददइत्यनुषंगः ॥ किमिति ॥ कर्मवद्धाःप्रारब्धकर्मफलमुपभोक्तारः ॥ ३० ॥ प्रारब्धकर्मणःपूर्वजन्मसंपादितत्वमाह ॥ कृतमिति ॥ एतद्दशेकर्माधीनत्वे ॥ ३१ ॥ तत्तत्कर्मणएवसुखदुःखादिसाधनत्वंवदन् कर्मकर्त्राचेदंकर्मसुफलस्यसाधनंभवेदितिपरीक्ष्यैवकर्तव्यमन्यथाविपरीतफलमुपभुज्येतेत्याह ॥ हसतेति ॥ हसतासताऽविचारिणेतिभावः ॥ पुरुषेणकर्म ॥ दुष्टमितिगम्यते ॥ रुदतेत्यग्रिमपदसमवधानात् ॥३२ ॥

वत्संकीलेस्वयंवंधुंयत्नंचैवाऽकरोत्तदा ॥ वत्सोपिकर्षमाणश्चपादेनपादपीडनम् ॥२४ ॥ चकारब्राह्मणस्यैवब्राह्मणः क्रोधमर्छितः ॥ वत्संचताडयामासकूर्परेणदृढंतदा ॥ २५ ॥ वत्सोऽपिपीडितस्तेनशांतश्चैवाऽभवत्तदा ॥ दुग्ध्वातुमोचितोनैवक्रोधेनचद्विजन्मना ॥ २६ ॥ गौर्दुःखंचमहत्प्राप्तारोदनंचाऽकरोत्तदा ॥ दृष्ट्वाचरोदनंतस्यावत्सोवाक्यमथाऽब्रवीत् ॥ २७ ॥ कथंचरुद्यतेमातःकिंदुःखंतेह्युपस्थितम् ॥ पुत्रस्यवचनंश्रुत्वागौश्चवाक्यमुपाददे ॥ २८ ॥ शृणु तांपुत्रमेदुःखंवक्तुंशक्नोम्यहंनहि ॥ दुष्टेनताडितस्त्वंचतेनदुःखंसमागतम् ॥ २९ ॥ तद्वचस्तुतदाश्रुत्वावत्सश्चवचनंपुनः ॥ किंकर्तव्यंक्वगंतव्यंकर्मबद्धावयंयतः ॥ ३० ॥ कृतंचैवयथापूर्वंभुज्यतेचतथाऽधुना ॥ एतद्दशेयदाजातायदिच्छसितथाकुरु ॥ ३१ ॥ हसताक्रियतेकर्मरुदतापरिभुज्यते ॥ सुखंचजायतेतेनदुःखंतेनापिसंभवेत्॥ ३२ ॥ तस्मात्त्वपूज्यतेकर्मसर्वंचकर्मणिस्थितम् ॥ त्वंचैवाथाऽप्यहंचैवइमेजीवादयश्चये ॥ ३३ ॥ तेसर्वेकर्मणाबद्धानशोच्याःकर्हिचित्त्वया ॥ एवंवचस्तुपुत्रस्यश्रुत्वागौरिदमब्रवीत् ॥ ३४ ॥ वत्ससर्वंविजानामिकर्माधीनाःप्रजाःस्वयम् ॥ तथापिमाययाग्रस्तादुःखंप्राप्तास्म्यहंपुनः ॥ ३५ ॥ रोदनंचतदाकृत्वादुःखशांतिर्भवेन्नहि ॥ इत्येतद्वचनंश्रुत्वामातरंवाक्यमब्रवीत् ॥ ३६ ॥ ॥ ॥ ॥ ॥

तस्मादिति ॥ पूज्यतेसर्वफलकारित्वेनस्तूयते ॥ सर्वचराचरंजन्यंजगत्कर्मणिस्थितंजनकतयावर्ततइत्यर्थः ॥ ३३ ॥ तइति ॥ कर्मणाबद्धाःकर्माधीनफलभाजइत्यर्थः ॥ तथाचभगवद्गीतायां ॥ युक्तःकर्मफलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीम् ॥ अयुक्तःकामकारेणफलेसक्तोनिबद्ध्यतेइति ॥ अध्यात्मरामायणेपि ॥ सुखस्यदुःखस्यनकोपिदातापरोददातीतिकुबुद्धिरेषा ॥ अहंकरोमीतिवृथाभिमानःस्वकर्मसूत्रग्रथितोहिलोकइति ॥ ३४ ॥ ज्ञानेसत्यपिमायायादुरत्ययत्वमाह ॥वत्सेति ॥ माययाभगवदिच्छया ॥ मममायादुरत्ययेतिभगवदुक्तेः ॥ ३५ ॥ ३६ ॥ ॥ ॥

यदाज्ञानोत्पत्तिस्तदाकर्मबंधोनास्तियदातुज्ञानोत्पत्तिर्नास्तितदाकर्मफलस्यदुरत्यजत्वमेवेत्याह ॥ यदीति ॥ ३७ ॥ कर्मबद्धायाममप्रत्यपकारकरणेनैवदुःखनाशोभवेदितिमत्वागौराह ॥ ममेति ॥ गच्छेदपगच्छेत् ॥ यदातथाविधंपुत्रदुःखजन्यंदुःखंब्राह्मणस्यभवेदित्यर्थः ॥ अतोहंब्राह्मणस्यदुःखंसुखमक्लेशेनावश्यमित्यर्थः ॥ दास्यामीतिसंबंधः ॥ ३८ ॥ तथाचेति ॥ दुःखदानेनेत्यर्थः ॥ ब्राह्मणोगृहस्वामीज्ञास्यतिप्रत्यपकाररूपफलमितिशेषः ॥ ३९ ॥ तत्कीदृशंफलमितितदाह ॥ पुत्रजन्यमिति ॥ पुत्रकर्मकवधजन्यमित्यर्थः ॥ ४० ॥ हतइति ॥ हतस्ताडितोब्राह्मणपुत्रइतिशेषः ॥ जीवितंप्राणान्हास्यतित्यक्ष्यति ॥ ४१ ॥ पशुत्वप्राप्तिरूपंफलंपूर्वकृतकर्मजन्यमितिजानंत्यासत्योपभुंजानयात्वयेहजन्मनिब्रह्महत्यारूपंदुष्कर्मकथंक्रियतइतिमातरंवत्सआह ॥ प्रथममिति ॥ पूर्वजन्मनीत्यर्थः ॥ ४२ ॥ प्रारब्धकर्मणैवमरणसंभवेमुधाभवत्यातन्निमित्तत्वंस्वीक्रियतइत्याह ॥ मारितइति ॥ मारितोहतोदेवेनेतिशेषः ॥

यद्येवंचविजानासिपुनश्चरोदनंकथम् ॥ कृत्वाचसाध्यसेकिंचतस्माद्दुःखंत्यजाऽधुना ॥ ३७ ॥ एवंपुत्रवचःश्रुत्वामाताचैवाऽब्रवीदिदम् ॥ ममदुःखंतदागच्छेद्यदादुःखंतथाविधम् ॥ ३८ ॥ भवेच्चब्राह्मणस्यैवदुःखंदास्यामिवैसुखम् ॥ तथाचब्राह्मणश्चैवमनसिज्ञास्यतिस्वयम् ॥ ३९ ॥ पुत्रजन्यंचयद्दुःखमीदृशंतद्भवेत्पुनः ॥ प्रातश्चैवमयापुत्रशृंगेणैवहनिष्यते ॥ ४० ॥ हतश्चजीवितंसद्योहास्यतिनात्रसंशयः ॥ इत्युक्तस्तुपुनर्वत्सोमातरंवाक्यमब्रवीत् ॥ ४१ ॥ प्रथमंचकृतंकर्मतत्फलंभुज्यतेऽधुना ॥ अस्याश्चब्रह्महत्यायामातःकिंप्राप्स्यसेपुनः ॥ ४२ ॥ मारितस्तेपुनर्मातर्मार्यतांत्वंवृथाकृथाः ॥ शुभेनप्राप्यतेस्वर्गोदुष्टेनपततेपुनः ॥ ४३ ॥ समाभ्यांचभवेज्जन्मक्षयेमुक्तिरवाप्यते ॥ कदापिकर्मणोनाशेतत्रभोगःप्रजायते ॥ ४४ ॥ ॥ ॥ ॥

ब्राह्मणपुत्रइत्यर्थः ॥ तत्तत्कर्मणस्तत्तत्फलंभवतीत्याह ॥ शुभेनेति ॥ पुण्यकर्मणेत्यर्थः ॥ स्वर्गोभवति ॥ दुष्टेनतुकर्मणापतते ॥ आत्मनेपदमार्षं ॥ नरकादावितिशेषः ॥ येरमणीयचरणारमणीयांयोनिंश्रयंति ॥ येकुपूयचरणाःकुपूयांयोनिंश्रयंतीतिश्रुतेः ॥ ४३ ॥ समाभ्यांमिश्रकर्मभ्यामित्यर्थः ॥ क्षयेकर्मणइतिशेषः ॥ तत्कर्मणःफलोपभोगानंतरंनाशइत्यर्थः ॥ प्रारब्धकर्मणोभोगादेवपरिक्षयइत्युक्तेः ॥ मुक्तिर्मोक्षोऽवाप्यतेप्राप्यते ॥ इममेवार्थंश्रीमदानंदतीर्थभगवत्पादाचार्याःस्मृत्वाऽऽहुः ॥ शुभेनकर्मणास्वर्गंनिरयंचविकर्मणा ॥ मिथ्याज्ञानेनचतमोज्ञानेनैवपरंपदमिति ॥ कर्मणोनाशेमुक्तिरित्युक्तंतत्रपुनर्भोगःकुतोनजायतइत्यतआह ॥ कदापीति ॥ तत्रात्मनिकर्मणोनाशेकदाचिदपिभोगःसुखदुःखोपभोगरूपःसंसारःप्रजायतइतिकाकुः ॥ अपितुनजायतइत्यर्थः ॥ भोगजनकीभूतकर्मणोनाशादितिभावः ॥ अत्रविनाभोगःप्रजायतइतिपाठांतरं ॥ ४४ ॥ ॥ ॥

कर्मबंधनिमित्तपुत्रत्वमातृत्वादिकंचशरीरस्यैवधर्मोनात्मनइत्याह ॥ अहमिति ॥ ४५ ॥ नकोपीति ॥ स्वकृतंकर्मैवभुजोभुंजतइतिभुजःसंतीतिशेषः ॥ भुजेःक र्तरिक्विप् ॥ स्वकृतमितिद्वितीयार्थी ॥ ४६ ॥ वत्सउपसंत्यमातरमुपदिशति ॥ एवमिति ॥ ४७ ॥ अहमिति ॥ अहंमायांत्यजामित्यक्तुमिच्छामिपरंतुमायामां नत्यजति ॥४८॥ तइति ॥ ममशरीरमितिशेषः ॥ दहते ॥ भाविब्रह्महत्यामोचनोपायंचिंतयतिगौः ॥ पुनरिति ॥४९॥ द्विजपुत्रमिति ॥ द्विजपुत्रंहत्वा ॥ स्थिता याममेत्येतयोःसमानकर्तृकत्वनिर्वाहायशेषःकार्यः ॥ अंगंश्यामंभविष्यति ॥ पापविशेषपवृंहितत्वादितिभावः ॥ ५० ॥ पश्चादिति ॥ अंगंश्वेतंभविष्यतीत्य नुषंगः ॥ नर्मदायांनंदिकेशतीर्थेस्नानेनपापनाशादितिभावः ॥ इदंपुनःश्वेतीभवनमभिज्ञानंज्ञापकंब्रह्महत्यानिवारणइत्यादिः ॥ ५१ ॥ तयोरिति ॥ त

तस्माच्चपुनरेवत्वंमाकर्मकर्तुमुद्यता ॥ अहंकपुत्रतांतेऽद्यत्वंमाताकुतएवच ॥ ४५ ॥ कमाताकपितावंधुःकस्वामीक चबालकः ॥ नकोऽपिकस्यचाऽस्तीहसर्वेऽपिस्वकृतंभुजः ॥ ४६ ॥ एवंज्ञात्वात्वयाप्रातर्दुःखंत्याज्यंशुभंकुरु ॥ पुत्रवा क्यंपुनःश्रुत्वावचनंचेदमब्रवीत् ॥ ४७ ॥ एवंजानाम्यहंपुत्रमायाबलवतीप्रभोः ॥ अहंत्यजामितांमायांमायामांनत्य जत्यसौ ॥ ४८ ॥ तेदुःखंचमयादृष्टंदुःखंचदहतेमम ॥ पुनश्चब्रह्महत्यायानाशोयत्रभवेदिह ॥ ४९ ॥ तत्स्थलंचम यादृष्टंहत्याचैवगमिष्यति ॥ द्विजपुत्रंतदाहत्वाश्यामममंगंभविष्यति ॥ ५० ॥ पश्चाच्चैवपुनःश्वेतमभिज्ञानमिदंध्रुवम् ॥ इत्येतद्वचनंश्रुत्वावत्सेनोक्तंनकिंचन ॥ ५१ ॥ तयोस्तदद्भुतंवृत्तंश्रुत्वापांथोद्विजस्तदा ॥ इदंदृष्टंमयाप्रातर्गंतव्यं पुनरेवह ॥ ५२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ सूतउवाच ॥ प्रातः कालेतथाजातेगृहस्वामीसमुत्थितः ॥ किमर्थंसुप्यतेपांथह्यतिकालोभवेदिह ॥ १ ॥ ॥

योर्गोवत्सयोः ॥ पांथःपथिकोद्विजश्चिंतयतीतिशेषः ॥ किंतच्चिंतनमितितदाह ॥ इदमिति ॥ इदंपूर्वोक्तंगोदोहनमारभ्यब्रह्महत्यामोचनपर्यंतंभवितव्यंवृत्तंप्रा तर्दृष्टंमयाऽस्थिक्षेपणार्थंकाश्यांगंतव्यमिति ॥ ५२ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॐनमः शिवाय ॥ नंदिकतीर्थमहत्त्वंब्रह्मवधैनःप्रणाशकत्वेन ॥ सद्वतिदातृत्वेनचचत्वारिंशेऽत्रवर्ण्यतेऽध्याये ॥ १ ॥ प्रातरिति ॥ गृहस्वामीब्राह्मणःपथिकब्राह्मणंप्रत्यव ददितिशेषः ॥ किमिति ॥ अतिकालःकालातिक्रमःकाशीगमनइतिशेषः ॥ हेपांथ ॥ १ ॥ ॥ ॥

तेनेति ॥ पथिकेनेत्यर्थः ॥ मुहूर्तपर्यंतमगमनेपथिकःकारणमाह ॥ व्यथेति ॥ २ ॥ दोहनस्येति ॥ ब्राह्मणोगृहस्वामीपुत्रकंप्रत्यवददितिशेषः ॥ ३ ॥ ॥ ४ ॥ मातेति ॥ तस्यपुत्रस्यमाता ॥ गृहस्वामिपत्नीत्यर्थः ॥ आजगाम ॥ ५ ॥ बंधनार्थमिति ॥ नीचैरधोमुखइत्यर्थः ॥ तंद्विजपुत्रं ॥ ॥ ६ ॥ मर्मणिशरीरमर्मप्रदेशेसाद्विजपुत्रः ॥ तदापित्राद्याजनाआचुक्रुशुरित्याह ॥ गवेति ॥ ७ ॥ जलमिति ॥ जलमानेयमितिशेषः ॥ ८ ॥ किंकरइति ॥ अस्यपथिकब्राह्मणस्य ॥ व्यमोचयन्मुक्तवान्बहिरितिशेषः ॥ ९ ॥ अहोइति ॥ हेजनाभवद्भिरेतद्ब्राह्मणपुत्रनाशरूपंदृश्यतामितिलोकादृष्ट्वापरस्परंचुक्रु

तेनोक्तंश्रूयतांब्रह्मन्स्थित्वामुहूर्तंगम्यते ॥ व्यथाचपरिवर्त्तेतशरीरेसेवकस्यच ॥ २ ॥ इत्येवंचमिषंकृत्वासुष्वापपुरुषस्तदा ॥ दोहनस्यतदाकालेब्राह्मणःपुत्रकंप्रति ॥ ३ ॥ मयातुगम्यतेपुत्रकार्यार्थेकुत्रचित्पुनः ॥ पुत्रःसमुत्थितस्तत्रवत्संचमुक्तवांस्तदा ॥ ४ ॥ माताचतस्यदोहार्थमाजगामस्वयंतदा ॥ द्विजपुत्रस्तदावत्संबध्नन्कीलेनताडयन् ॥ ॥ ५ ॥ बंधनार्थंयदानीचैर्जातोहिद्विजबालकः ॥ पुनर्गौश्चतदाक्रुद्धाशृंगेणाऽताडयच्चतम् ॥ ६ ॥ मर्मणिताडितःसोपिमूर्छांप्राप्यपपातह ॥ लोकाश्चमिलितास्तत्रगवाबालोविहिंसितः ॥ ७ ॥ जलंजलंवदंतस्तेपित्राद्यायेचसंस्थिताः ॥ यत्नश्चक्रियतेसर्वैस्तावद्बालोमृतस्ततः ॥ ८ ॥ मृतेचबालकेतत्रहाहाकारोमहानभूत् ॥ किंकरोऽस्यतदागांचताडयित्वाव्यमोचयत् ॥ ९ ॥ सागौश्चश्वेतवर्णाऽभूत्तदाश्यामाव्यदृश्यत ॥ अहोचदृश्यतांलोकादृष्ट्वाचैवपरस्परं ॥ ॥ १० ॥ ब्राह्मणश्चतदापांथोदृष्ट्वाश्चर्यंविनिर्गतः ॥ यत्रगौश्चगतातत्रतामनुब्राह्मणोगतः ॥ ११ ॥ ऊर्ध्वपुच्छंतदाकृत्वाशीघ्रंगौर्नर्मदांप्रति ॥ आगत्यनंदिकेशस्यसमीपेविमलेजले ॥ १२ ॥ त्रिवारंमज्जयित्वातुश्वेतत्वंचगताहिसा ॥ यथागतागतासाचब्राह्मणोविस्मयंगतः ॥ १३ ॥ अहोमहत्तमंतीर्थंब्रह्महत्यानिवारकम् ॥ स्वयंचमज्जितस्तत्रब्राह्मणःसेवकस्तथा ॥ १४ ॥ ॥ ॥ ॥

शुरितिशेषः ॥ क्वचित्पुस्तकेचुक्रुशुश्चपरस्परमितिपाठांतरं ॥ १० ॥ यत्रेति ॥ नंदिकेशतीर्थइत्यर्थः ॥ ११ ॥ ऊर्ध्वमिति ॥ समीपेविमलेजलइत्यत्रसमीपेनर्मदाजलइतिपाठांतरं ॥ १२ ॥ त्रिवारमिति ॥ गतापुनःप्राप्ता ॥ सागौर्यथायेनमार्गेणपूर्वंनर्मदांगतातथैवततोनिवृत्यगृहमागतेत्यर्थः ॥ एतत्सर्वंदृष्ट्वाब्राह्मणःपथिकोविस्मयमाश्चर्यंगतःप्राप्तइत्यर्थः ॥ १३ ॥ १४ ॥ ॥ ॥ ॥

नंदिकेशतीर्थेस्नात्वाप्रतिनिवृत्तस्यससेवकस्यपाथिकब्राह्मणस्यगंगामूर्तिमतीसतीमिलित्वानंदिकेशतीर्थस्यमाहात्म्यवृध्यर्थमहमत्रापिनिवसामीत्युक्तवतीत्याह ॥ मज्जयित्वेत्यादिना ॥ तौपाथिकसेवकौ ॥ सुंदरीस्त्रीवेषंधृतवतीगंगेत्यर्थः ॥ १५ ॥ तयेति ॥ तयागंगयोक्तम् ॥ यत्हेपथिकत्वंकुतोयासीत्यादि ॥ यथातथायथास्थितमस्थिप्रक्षेपणार्थंवाराणसीगमनमित्यर्थः ॥ १६ ॥ तयोक्तमिति ॥ तयागंगयोक्तंत्वयास्थीयतामितिवाक्यंसमाकर्ण्यास्थितोद्विजोहेसुंदरित्वयाकिंकथ्यतेतद्देत्यवददितिशेषः ॥ १७ ॥ साचेति ॥ निवर्तस्वपुनर्गच्छेत्यर्थः ॥ क्वगंतव्यमितितत्राह ॥ त्वयेति ॥ हेद्विजोत्तमत्वयायत्स्था

मज्जयित्वागतौतौचप्रशंसंतौनदींतदा ॥ मार्गेचमिलिताकाचित्सुंदरीभूषणान्विता ॥ १५ ॥ तयोक्तंत्वंकुतोयासिसत्यंब्रूहिममाऽग्रतः ॥ एवंवचस्तदाश्रुत्वाद्विजेनोक्तंयथातथम् ॥ १६ ॥ पुनश्चाऽयंद्विजस्तत्रतयोक्तःस्थीयतांत्वया ॥ तयोक्तंचसमाकर्ण्यस्थितःकिंकथ्यतेवद ॥ १७ ॥ साचाहपुनरेवात्रनिवर्तस्वद्विजोत्तम ॥ त्वयादृष्टंस्थलंयच्चतत्राऽस्थीनिक्षिपाऽधुना ॥ १८ ॥ साक्षाद्दिव्यमयंदेहंधृत्वायास्यसिसद्गतिम् ॥ वैशाखेचैवसंप्राप्तेसप्तम्याश्चदिनेशुभे ॥ १९ ॥ सितेपक्षेसदागंगाआयातिद्विजसत्तम ॥ अद्यैवसप्तमीसाचगंगाहंयामितत्रवै ॥ २० ॥ इत्युक्त्वांऽतर्दधेदेवीद्विजोपिपरिवर्तितः ॥ आगत्याऽस्थिक्षिपेद्यावत्तावन्माताप्यदृश्यत ॥ २१ ॥ दिव्यदेहत्वमापन्नादत्वाशिषंदिवंगता ॥ धन्योऽसिकृतकृत्योऽसिपावितंचकुलंत्वया ॥ २२ ॥ धनंधान्यंतथाचायुर्वंशश्चवर्धतांतव ॥ इत्याशिषंपुनर्दत्वागतासाह्युत्तमांगतिम् ॥ २३ ॥ ब्राह्मणश्चपुनस्तत्रक्षिप्त्वास्थीनिगृहंगतः ॥ तद्दिनंहिसमारभ्यप्रसिद्धंतीर्थमुत्तमम् ॥ २४ ॥ नंदिकेशसमीपेतुकृत्वास्नानंतुतत्फलम् ॥ प्राप्यतेनाऽत्रसंदेहोमहतांवचनादिह ॥ २५ ॥ ॥

नंनंदिकेशतीर्थात्मकंदृष्टंतत्राधुनागत्वाऽस्थीनिक्षिपेतिसंबंधः ॥ १८ ॥ तत्रास्थिक्षेपणेनाकिंस्यादितितत्राह ॥ साक्षादिति ॥ दिव्यमयंदेहंधृत्वासद्गतिंयास्यसियास्यति ॥ मध्यमपुरुषआर्षः ॥ तवमातेतिशेषः ॥ तर्ह्यत्रगंगाकदाऽऽयातितदाह ॥ वैशाखइति ॥ १९ ॥ सासुंदरीगंगाऽहमेवेतिस्वस्वरूपंप्रदर्श्यकथयति ॥ अद्यैवेति ॥ २० ॥ २१ ॥ माताकीदृशीमाशिषंदत्तवतीतितदाह ॥ धन्योऽसीति ॥ २२ ॥ २३ ॥ २४ ॥ तत्तीर्थस्नानफलमाह ॥ नंदिकेशेति ॥ तत्फलंब्राह्मणमातृप्राप्तफलंमोक्षरूपफलमित्यर्थः ॥ महतांगंगारूपमहाजनानामित्यर्थः ॥ २५ ॥ ॥ ॥

नर्मदायांनंदिकेश्वरसंनिधानेवैशाखशुक्लसप्तम्यांगंगासमागतेतिपूर्वमुक्तम् ॥ तत्रगंगायांनंदिकेश्वरस्यचागत्यसंनिधिकरणेहेतुंवक्तुमिदानीमितिहासमाह ॥ ब्राह्मणीत्यादिना ॥ ऋषिकानामनाम्नाऋषिकेतिप्रसिद्धा ॥ ब्राह्मणीनर्मदातीरआसीदितिशेषः ॥ ऋषिकेत्यत्रनंदिकेतिपाठांतरं ॥ पार्थिवमिति ॥ पार्थिवं मृन्मयंलिंगंपूजयित्वातपस्तप्तं ॥ ब्राह्मण्येतिशेषः ॥ पार्थिवेश्वरपूजनरूपंतपस्तप्तमितिभावः ॥ अत्रतपस्तप्तुमितिपाठांतरं ॥ तत्रतपस्तप्तुंनर्मदामागतेत्यनुषंगः ॥ २६ ॥ दैत्यस्तांब्राह्मणींपातयामास ॥ तपसस्तांमोचयितुमुद्युक्तोभूदितिभावः ॥ नेति ॥ तथापितयाब्राह्मण्यानमानितंतपःप्रच्यवनंनकृतमितिभावः ॥ पश्चात्ततोदैत्यश्छलंछद्मोग्रस्वरूपादिकमदर्शयत् ॥ २७ ॥ तदेति ॥ तदासाब्राह्मणीहेशिवहेशिवेतिभाषितवतीत्यर्थः ॥ शिवंशरणंगतेतिभावः ॥ तदाशरणागतरक्षणार्थंव्रतंशिवव्रतंकर्तव्यमितियत्तद्व्रतमाहितंकृतं ॥ ब्राह्मण्येतिशेषः ॥ २८ ॥ आनंदार्थइति ॥ ततस्तद्व्रतंदृष्ट्वातस्याआनंदार्थेआनंदप्राप्त्यर्थंनंदि

ब्राह्मणीऋषिकानामबालवैधव्यमागता ॥ पार्थिवंपूजयित्वातुतपस्तप्तंसुदारुणम् ॥२६॥ मूढोनाममहादैत्योपातयामासतांतदा ॥ नमानितंतयाचैवपश्चाच्छलमदर्शयत् ॥२७॥ तदासाभयसंत्रस्ताशिवशिवेतिभाषिणी ॥ शरणागतरक्षार्थंकर्तव्यंव्रतमाहितम् ॥२८॥ आनंदार्थेसमायातंनंदीशेनमहात्मना ॥ लोकानामुपकारार्थेस्थितश्चशंकरस्तदा ॥२९॥ तदानींतीर्थसमायातंपार्थिवंशंकरःस्वयम् ॥ प्रसन्नश्चतयातत्रह्यंशेनस्थापितस्तदा ॥३०॥ गंगाऽपिचप्रसन्नातांप्राहसाध्विवराऽधुना ॥ मदर्थंचैववैशाखेदिनमेकंत्वयापुनः ॥३१॥ सामीप्यंकरणीयंवैतथेतिचस्वयंवचः ॥ तद्दिनंहिसमारभ्यईदृशंतीर्थमुत्तमम् ॥३२॥ तत्रस्नातोनरःसम्यक्पापैश्चमुच्यतेध्रुवम् ॥ एतत्तेहिसमाख्यातंयत्पृष्टोऽहंमुनीश्वराः ॥ ३३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांनंदिकेशमाहात्म्यंनामचत्वारिंशोऽध्यायः ॥ ४० ॥

केशेनसमायातमागतमित्यर्थः ॥ भावेक्तः ॥ २९ ॥ तदानीमिति ॥ तदानींतीर्थंप्रत्यायातंप्राप्तंपार्थिवंपार्थिवांतर्यामीशंकरः शंकरस्वरूपमेवेत्यर्थः ॥ प्रसन्नइति ॥ प्रसन्नःशंकरोंशेनपार्थिवेश्वरस्वरूपेणस्थापितस्तयाब्राह्मण्येत्यर्थः ॥ ३० ॥ ततोगंगापिप्रसन्नासतीतांब्राह्मणींप्राह ॥ हेसाध्विब्राह्मणित्वमधुनावरंवृणीष्ववरमितिशेषः ॥ वरेत्यार्षप्रयोगः ॥ अथवावरेतिलुप्तद्वितीयाकंपदं ॥ वरमित्यर्थः ॥ ततोब्राह्मणीगंगांवरंययाचइत्याह ॥ मदर्थमिति ॥ हेगंगेमदर्थंममोद्धृत्यर्थंवैशाखएकादिनंसप्तमीदिनं ॥ कालाध्वनोरत्यंतसंयोगइत्यनेनद्वितीया ॥ त्वयासामीप्यंकरणीयमिति ॥ त्वयाऽत्रागंतव्यमित्यर्थः ॥ ॥ ३१ ॥ तदातथेत्यहमागच्छामीतिवचउत्तरमाददइतिगंगेतिचशेषः ॥ ३२ ॥ तत्तीर्थस्नानफलमाह ॥ तत्रेति ॥ ३३ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांनंदिकेशमाहात्म्यंनामचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ॥

॥ ॐनमःशिवाय ॥ उत्तमलिंगकथानकप्रस्तावेऽत्रीश्वरस्यमाहात्म्यं ॥ वर्ण्यतइहैकचत्वारिंशत्तमकेप्रसंगतोऽध्याये ॥ १ ॥ पुनरिति ॥ १ ॥ व्यासेश्व रइति ॥ व्यासेनस्थापितइतिव्यासेश्वरइतिनामद्रष्टव्यं ॥ एवमग्रेपिप्रायशोऽनुसंधेयं ॥ २ ॥ ३ ॥ ततइति ॥ तप्तिकातीरेतप्तिकानामनदीतत्तीरइत्यर्थः ॥ तनेश्वरइत्यत्रवेनेश्वरइतिपाठांतरं ॥ ४ ॥ ऋषीश्वरइति ॥ ऋषीश्वरइत्यत्रकाचित्पुस्तकेदुग्धेश्वरइतिपाठांतरं ॥ अन्यस्मिंश्चपुस्तकेतुढुंढेश्वरइतिपाठांतरं ॥ ५ ॥ पूर्णायामिति ॥ पूर्णानामनदीविशेषस्तत्रेत्यर्थः ॥ ६ ॥ चंद्रकांतिफलप्रदश्चंद्रकांतेःफलमिवफलंप्रददातीतितथा ॥ चंद्रवदाल्हादशैत्यकरइत्य

ऋषयऊचुः ॥ पुनश्चकथ्यतांसूतलिंगानिसत्तमानिच ॥ सूतउवाच ॥ १ ॥ व्यासेश्वरश्चविख्यातोशुकेशश्चतथैव च ॥ भंडारेश्वरविख्यतोहुंकारेशस्तथैवच ॥ २ ॥ सुरेश्वरश्चविज्ञेयोभूतेश्वरइतिस्वयम् ॥ संयमेश्वरइतिप्रोक्तोमहा पातकनाशनः ॥ ३ ॥ ततश्चतप्तिकातीरेकुमारेश्वरएवच ॥ सिद्धेश्वरश्चविख्यातस्तनेश्वरस्तथैवच ॥ ४ ॥ रामेश्व रःपुनःप्रोक्तोदर्शनात्पापहारकः ॥ ऋषीश्वरस्तथाप्रोक्तःकुंभेश्वरःपरोमतः ॥ ५ ॥ नंदेश्वरस्तथापंचपुंजेशश्चतथापि हि ॥ पूर्णायांपूर्णकोनामवीरेश्वरस्तथापुनः ॥ ६ ॥ गोदातीरेकपालेशश्चक्रेशश्चतथैवच ॥ चंद्रेश्वरश्चविज्ञेयश्चंद्रकांति फलप्रदः ॥ ७ ॥ धौतपापेश्वरःसाक्षाद्दर्शनेपरमेश्वरः ॥ भीमेश्वरइतिप्रोक्तःसूर्येश्वरस्तथाऽपिहि ॥ ८ ॥ त्र्यंबकस्त प्तिकायांतुगोकर्णेशस्तथापिच ॥ नारूकेशोमहापुण्योरामेश्वरस्तथापिहि ॥ ९ ॥ नंदेश्वरश्चविज्ञेयोज्ञानदोलोकपू जितः ॥ विमलेश्वरनामायःकंटकेश्वरएवच ॥ १० ॥ पूर्वसागरसंयोगेधर्मकेशस्तथैवच ॥ ११ ॥ पश्चिमेसागरेचैव सिद्धेश्वरःस्वयंस्थितः ॥ बिलेश्वरश्चविख्यातोह्यंधकेशस्तथैवच ॥ १२ ॥ यत्रवैअंधकोदैत्योहतश्चशंकरेणच ॥ स्वयं स्वरूपमंशेनधृत्वाशर्वःपुनःस्थितः ॥ १३ ॥ शंकरेश्वरविख्यातोलोकानांसुखदायकः ॥ कर्दमेशःपरःप्रोक्तःकोटीश श्चाऽर्बुदाचले ॥ १४ ॥ अचलेश्वरश्चविख्यातोबहूनांदुःखहामतः ॥ नागेश्वरश्चकौशिक्यास्तीरेतिष्ठतिनित्यशः ॥ १५ ॥

र्थः ॥ ७ ॥ ८ ॥ त्र्यंबकइति ॥ तप्तिकायांतप्तिकानामनदीविशेषस्तस्यां ॥ ९ ॥ १० ॥ पूर्वेति ॥ पूर्वसागरसंयोगेतप्तिकायाःपूर्वसमुद्रसंगमइ त्यर्थः ॥ ११ ॥ १२ ॥ अंधकेशइतिनामभवनेहेतुंप्रदर्शयति ॥ यत्रेति ॥ १३ ॥ शंकरेश्वरइति ॥ अत्रशरण्येशश्चविख्यातइतिपाठांतरं ॥ अर्बुदाचलेऽर्बुदा ख्यपर्वते ॥ १४ ॥ नागेश्वरइति ॥ कौशिक्याःकौशिकीनदीविशेषस्तस्याइत्यर्थः ॥ १५ ॥ ॥ ॥

कल्याणसुखभाजनमैहिकामुष्मिकसुखप्रदइत्यर्थः ॥ १६ ॥ १७ ॥ तस्यैवेति ॥ संगमेश्वरस्यैवेत्यर्थः ॥ १८ ॥ पूर्वस्यामिति ॥ यानिलिंगानीत्यर्थः ॥ इदानीमत्रीश्वरनाम्नःशिवस्यमाहात्म्येनगर्भितांकथांप्रस्तौति ॥ दक्षिणस्यामिति ॥ १९ ॥ लोकानामिति ॥ अनसूयासुखायाऽनसूयाख्यायाअत्रिपत्न्याः सुखायेत्यर्थः ॥ अनावृष्ट्यांवर्षणाभावइत्यर्थः ॥ २० ॥ शिवात्रीश्वरयोस्तादात्म्यमाह ॥ सइति ॥ तादात्म्येहेतुमाह ॥ अंशेनेति ॥ अंशेनात्रीश्वरस्वरूपेणप्रादुर्भूतइतिपूर्वेणान्वयः ॥ २१ ॥ २२ ॥ २३ ॥ अत्रीश्वरकथामाह ॥ दक्षिणस्यामिति ॥ कामदंकाममिष्टंददातीतितथातदाख्यंवनंतपसेहित

अनंतेश्वरःसंप्रोक्तःकल्याणसुखभाजनं ॥ योगेश्वरश्चविख्यातोवैद्यनाथेश्वरस्तथा ॥ १६ ॥ कोटीश्वरश्चविज्ञेयःसप्तेश्वरस्तथापिहि ॥ भद्रेश्वरश्चविख्यातोभद्रनामहरःस्वयम् ॥ १७ ॥ चंडीश्वरश्चयःप्रोक्तःसंगमेश्वरएवच ॥ तस्यैवपश्चिमेतीरेगौतमेश्वरएवच ॥ १८ ॥ पूर्वस्यांचदिशियानितानीहकथितानिते ॥ दक्षिणस्यांदिशिकश्चिदत्रीश्वरइतिस्वयम् ॥ १९ ॥ लोकानामुपकारार्थमनसूयासुखायच ॥ प्रादुर्भूतःस्वयंदेवोऽह्यनावृष्ट्यांसुपूजितः ॥ २० ॥ सएवशंकरःसाक्षादंशेनस्वयमेवहि ॥ इत्येवंवचनंतस्यश्रुत्वातुपरमर्षयः ॥ २१ ॥ ऊचुस्तेवचनंतत्रकथमत्रीश्वरोहरः ॥ उत्पन्नःपरमोदेवस्तत्त्वंकथयसुव्रत ॥ २२ ॥ सूतउवाच ॥ साधुपृष्टमृषिश्रेष्ठाःकथयामिकथांशुभाम् ॥ यांकथांपरमांश्रुत्वापातकैर्मुच्यतेध्रुवम् ॥ २३ ॥ दक्षिणस्यांदिशियत्रकामदंनामवैवनम् ॥ विख्यातंयत्रऋषिश्रेष्ठास्तपसेहितदंनृणाम् ॥ २४ ॥ तत्रचब्रह्मणःपुत्रोह्यत्रिर्नामऋषिःस्वयम् ॥ तपस्तपतियःसाक्षादनसूयासमन्वितः ॥ २५ ॥ पूर्वंकदाचिदत्रैवह्यनावृष्टिरभूत्तदा ॥ शतवार्षिकीतदादैवाद्दुःखिताःप्राणिनस्तदा ॥ २६ ॥ जलंनैवपृथिव्यांतुदृश्यते ऋषिसत्तमाः ॥ वृक्षाःशुष्कास्तदासर्वेपल्लवानिफलानिच ॥ २७ ॥ नित्यार्थंनजलंक्वापिदृश्यतेदुःखितोऋषिः ॥ सांद्रंपर्णंनलभ्येतखरवातादिशोदश ॥ २८ ॥ ॥ ॥

दंतपःसाधनमित्यर्थः ॥ वनमासीदितिशेषः ॥ २४ ॥ तत्रेति ॥ तत्रवनेब्रह्मणश्चतुर्मुखस्य ॥ २५ ॥ पूर्वमिति ॥ अत्रवनेशतवार्षिक्यनावृष्टिः शतवर्षपर्यंतंवृष्ट्यभावइत्यर्थः ॥ २६ ॥ जलमिति ॥ तदावृक्षाःशुष्काअभवन्पल्लवानिफलानिचशुष्काणीतिलिंगविपरिणामेनान्वयः ॥ २७ ॥ नित्यार्थमिति ॥ नित्यकर्मार्थंसंध्यादिकर्मार्थमित्यर्थः ॥ जलंनदृश्यतइति ॥ एतेनजलंविनाकर्मनिष्पत्तिर्नभवतीतिगम्यते ॥ सांद्रंनिबिडंपर्णंछायार्थंनलभ्यते ॥ खरवातास्तीक्ष्णवाताः ॥ २८ ॥ ॥ ॥ ॥ ॥

आवर्तमिति ॥ आवर्तसंवर्तप्रलयमित्यर्थः ॥ २९ ॥ समाधाविति ॥ समाधौप्राणसंयमनेविलीनोलग्नांतःकरणोऽत्रीश्वरइत्यर्थः ॥ त्रिरावृत्तंत्रिवारंत्रिगुणितंवा ॥ ३० ॥ ध्यायतीति ॥ सोत्रिर्ऋषिरात्मनामनसाऽऽत्मस्थंजीवांतर्यामिणंशरीरांतर्यामिणंवा ॥ द्वासुपर्णासयुजेतिश्रुतेः ॥ परंज्योतिःपरमात्मतत्वंध्यायतिस्मेत्यर्थः ॥ तदास्वामिन्यत्रीश्वरेध्यानलीनेध्यानारूढांतःकरणेसति ॥ ३१ ॥ तदेति ॥ एकाकिन्यनसूयेत्यर्थः ॥ ३२ ॥ पार्थिवमिति ॥ अनसूयापार्थिवंलिंगंकृत्वापूजयित्वा ॥ पुरोऽत्रेःपुरतःसंस्थाप्यचस्वामिनमत्रिंसेवयामासेतिसंबंधः ॥ स्वामिनमत्रिंशिवंचप्रक्रम्यप्रदक्षिणीकृत्येत्यर्थः ॥ ३३॥

आवर्त्तंचैवभूतानांदृष्ट्वाचऋषिसत्तमाः ॥ साध्वीचैवाऽब्रवींद्देवीमयादुःखंनसह्यते ॥ २९ ॥ समाधौचविलीनोऽभूदासनेसंस्थितःस्वयम् ॥ प्राणायामंत्रिरावृत्तंकृत्वामुनिवरस्तदा ॥ ३० ॥ ध्यायतिस्मपरंज्योतिरात्मस्थमात्मनाचसः॥ स्वामिनिध्यानलीनेचशिष्याश्चदूरतोगताः ॥ ३१ ॥ अन्नंविनातदातेतुमुक्त्वातेचगताःक्षणात् ॥ तदैकाकिनीसंजाता सेवयामासतंमुदा ॥ ३२ ॥ पार्थिवंसुंदरंकृत्वामंत्रेणविधिपूर्वकम् ॥ मानसैरुपचारैश्चपूजयित्वाशिवंपुरः ॥ ३३ ॥ संस्थाप्यस्वामिनंचैवसेवयामासवैतदा ॥ बद्धांजलिपुटाभूत्वाप्रक्रम्यस्वामिनंशिवम् ॥ ३४ ॥ दंडवत्प्रणिपातेनप्रतिप्रक्रमणंतदा ॥ दैत्याश्चदानवाःसर्वेदृष्ट्वातुसुंदरींतदा ॥ ३५ ॥ विव्हलाश्चाऽभवंस्तत्रतेजसादूरतःस्थिताः ॥ अग्निंदृष्ट्वायथादूरेवर्त्तंतेतद्वदेवहि ॥ ३६ ॥ तथैनांचतदादृष्ट्वानायांतिहिसमीपगाः ॥ अत्रेश्चतपसश्चैवअनसूयाविशिष्यते ॥ ३७ ॥ यावत्कालंतुसादेवीपरिचर्यांचकारह ॥ तौदंपतीतदातत्रनाऽन्यःकश्चित्पुरःस्थितः ॥ ३८ ॥ एवंजातेतदाकालेअत्रिश्चऋषिसत्तमः ॥ ध्यानेचपरमेलीनोनव्यबुध्यतकिंचन ॥ ३९ ॥ अनसूयापिसासाध्वीस्वामिनंवाशिवंतथा ॥ भेजेनाऽन्यत्परंकिंचिज्जानीतेस्मचसासती ॥४०॥ तस्यैवतपसासर्वेतस्याश्चभजनेनच ॥ देवाश्चऋषयश्चैवगंगाद्याःसरितस्तथा ॥ ४१ ॥ ॥ ॥ ॥

॥ ३४ ॥ ३५ ॥ अग्निमिति ॥ अत्रासिमितिपाठांतरम् ॥ ३६ ॥ एनामनसूयाम् ॥ अत्रेरिति ॥ अत्रेस्तपसस्तपोऽपेक्ष्यानसूयाविशिष्यतेऽतिरिच्यतइत्यर्थः ॥ अत्रेश्चतपसेतिपाठांतरम् ॥ ३७ ॥ परिचर्यासेवां ॥ ताविति ॥ तौदंपतीअत्र्यनसूयेविनेतिशेषः ॥ अन्यःकश्चिदपिपुरुषोनस्थितस्तत्रनातिष्ठदित्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ ॥ ॥ ॥

॥ ४२ ॥ देवादयःकिमूचुस्तदाह ॥ उभयोरिति ॥ तपसोऽत्रिकर्तृकस्यभजनस्यानसूयाकर्तृकस्यसेवनस्यचैतयोरुभयोर्मध्येकिंविशिष्टंक्लेशतःफलतो वाऽधिकम् ॥ ४३ ॥ इत्याशंक्यदेवादयोनिर्णयंकुर्युरित्याह ॥ एतत्सर्वमिति ॥ तेदेवादयोभजनमेवतपसइत्यादिः ॥ वरंविशिष्टमित्यूचुः ॥ ४४ ॥ ॥ ४५ ॥ ४६ ॥ गंगेति ॥ साध्वीधर्मविमोहितासाध्व्याःपतिव्रतायाधर्मोऽनसूयाकर्तृकसेवनादिरूपस्तत्रतस्माद्वाविमोहितामोहंप्राप्ता ॥ अनसूयायाःप तिसेवांवीक्ष्यमोहितेत्यर्थः ॥ साध्वीलक्षणमुक्तंमनुना ॥ पतिंयानाभिचरातिमनोवाक्कायसंयता ॥ साभर्तृलोकमाप्नोतिसद्भिःसाध्वीतिचोच्यतइति ॥ ४७ ॥ गंगामनसाचिंतयति ॥ एनामिति ॥ अनसूयांप्रतीत्यर्थः ॥ किंच ॥ शिवोपिपार्थिवांतर्यामीध्यानवद्धोऽत्रिकर्तृकध्यानेनवद्धःसन्कृपांविनाकृपामकृत्वेत्य

विस्मयंपरमंमत्वादर्शनार्थंसमाययुः ॥ तयोस्तदद्भुतंदृष्ट्वाऊचुस्तेचपरस्परम् ॥ ४२ ॥ उभयोःकिंविशिष्टंचतपसोभज नस्यच ॥ अत्रेश्चैवतपःप्रोक्तमनसूयाभजनंतथा ॥ ४३ ॥ एतत्सर्वंचतेदृष्ट्वाह्यूचुर्वैभजनंवरम् ॥ पूर्वैश्चऋषिभिश्चैव दुष्करंतुतपःकृतम् ॥ ४४ ॥ एतादृशंतुकेनाऽपिनभवत्येतदब्रुवन् ॥ धन्योयंचतथाधन्याताभ्यांचक्रियतेपुनः ॥४५॥ एतादृशंशुभंचैवक्रियतेकेनसांप्रतम् ॥ तयोरेवंप्रशंसांचकृत्वातेतुयथागतम् ॥ ४६ ॥ गतास्तेचतदात्तत्रगंगांचागिरि शांविना ॥ गंगाचभजनेप्रीतासाध्वीधर्मविमोहिता ॥ ४७ ॥ एनांचैवोपकारंचकृत्वागच्छाम्यहंपुनः ॥ शिवोऽपिध्या नबद्धोवैगतोनैवकृपांविना ॥४८॥ एवंचक्रियमाणेचयज्जातंश्रूयतामिति ॥ पंचाशच्चतथाचाऽत्रचत्वारिऋषिसत्तमाः ॥ ४९ ॥ वर्षाणिचगतान्यासन्वृष्टिर्नैवाऽभवत्तदा ॥ यावच्चाप्यत्रिणाह्येवंतपसाध्यानमाश्रितम् ॥ ५० ॥ अन सूयातदानैवगृण्हामीतीषणाकृता ॥ कदाचिच्चऋषिश्रेष्ठोह्यत्रिर्ब्रह्मविदांवरः ॥ ५१ ॥ जाग्रतश्चजलंदेहीत्युवाचच प्रियांप्रति ॥ सापिसाध्वीत्यवश्यंचगृहीत्वाचकमंडलुम् ॥ ५२ ॥ ॥ ॥

र्थः ॥ नैवगतःस्यादितिशेषः ॥ नैवगमिष्यतीत्यर्थः ॥ ४८ ॥ एवमिति ॥ एवमेवंप्रकारेणविचारेक्रियमाणेसति ॥ गंगयेतिशेषः ॥ यद्वृत्तंजातंतच्छ्रूय तांहेऋषिश्रेष्ठाइत्यर्थः ॥ पंचाशदिति ॥ पंचाशच्चत्वारिचचतुरधिकपंचाशदित्यर्थः ॥ वर्षाणिगतानिव्यतीतानि ॥ तदाचतुरधिकपंचाशद्वर्षपरिमितकालप र्यंतंवृष्टिर्नाभवत् ॥ ४९ ॥ ५० ॥ अनसूयेति ॥ तदाऽहंगृण्हामि ॥ अन्नाद्याहारमितिशेषः ॥ इतीषणेच्छानकृताऽनसूयाऽनसूययेत्यर्थः ॥ तृतीया र्थेप्रथमा ॥ ५१ ॥ प्रियामनसूयाम् ॥ ५२ ॥ ॥ ॥ ॥

जगामेति ॥ नीयतेमयेतिशेषः ॥ कुतोमयाजलमानेतव्यमित्यर्थः॥ ५३ ॥ इतीति॥इतिपूर्वोक्तप्रकारेणविस्मयमाश्चर्यंव्यग्रत्वंवा॥ स्मयोगर्वेद्भुतेयोगेका तर्येगायकेपिचेतिविश्वः ॥ आपन्नांप्राप्तामनसूयांदृष्ट्वासरिद्वरागंगाऽतिष्ठादितिशेषः ॥ साऽनसूयायावद्यदातांगंगामनुव्रजत्यनुगच्छतितदातामनसूयांप्रत्य ब्रवीद्गंगेतिशेषः ॥ ५४ ॥ किंतदब्रवीत्तदाह ॥ प्रसन्नेति ॥ तद्वचइति ॥ ऋषिपत्न्यनसूयास्वयंवचोऽब्रवीदित्यनुषंगः॥ ५५ ॥ ५६ ॥ साध्वीमिति ॥ स्मितास्मितवसंनिधावित्यत्रस्थितास्मितवसंनिधावितिपाठांतरम् ॥ ५७ ॥ अहमिति ॥ हेशुचिस्मितेमंदहासकार्त्रि ॥ वृणुष्वयाचस्व ॥ ५८ ॥ ५९ ॥

जगामचवनेतत्रजलंचनीयतेकुतः ॥ किंकरोमिक्वगच्छामिकुतोनीयेतवैजलम् ॥ ५३ ॥ इतिविस्मयमापन्नांदृष्ट्वागं गासरिद्वरा ॥ तामनुव्रजतियावत्साब्रवीच्चतदाहिताम्॥ ५४ ॥ प्रसन्नाऽस्मिचतेदेवितवाज्ञांहिकरोम्यहम्॥ तद्वच श्चतदाश्रुत्वाऋषिपत्नीवचःस्वयम् ॥ ५५ ॥ कात्वंकमलपत्राक्षिकुतोवात्वंसमागता ॥ इत्युक्तेचतयातत्रगंगावाक्य मथाऽब्रवीत् ॥ ५६ ॥ गंगोवाच ॥ स्वामिनःसेवनंदृष्ट्वाशिवस्यचतथैवच ॥ साध्वींधर्मवतींवीक्ष्यस्मितास्मितवसंन्नि धौ ॥ ५७ ॥ अहंगंगासमायाताभजनात्तेशुचिस्मिते ॥ वशीभूताह्यहंजातायदिच्छासिवृणुष्वतत् ॥ ५८ ॥ इत्युक्ते गंगयासाध्वीनमस्कृत्वापुरःस्थिता ॥ उवाचचजलंदेहिप्रसन्नात्वंममाऽधुना ॥ ५९ ॥ इत्येतद्वचनंश्रुत्वागर्तंकुर्विति चाऽब्रवीत् ॥ शीघ्रंयावच्चतत्कृत्वास्थितंचक्षणमात्रतः ॥ ६० ॥ तत्रसाचप्रविष्टाचजलरूपमभूत्तदा ॥ आश्चर्यंपर मंगत्वाजलंचगृहीतंतया ॥ ६१ ॥ उवाचवचनंह्येतल्लोकानांसुखहेतवे ॥ यदित्वंचप्रसन्नामेकृपाचवर्ततेमयि ॥ ६२॥ तावत्त्वयाचस्थातव्यंयावत्स्वामीसमाव्रजेत् ॥ गंगोवाच ॥ शृणुदेविवचस्तथ्यंमयाचस्थीयतेतदा ॥ ६३ ॥ यदात्वं मासमात्रस्यफलंदास्यसिमेऽनघे ॥ इत्युक्तेचतयातत्रह्यनयापिकृतंतथा ॥ ६४ ॥ गृहीत्वाचजलंतच्चदुर्लभंसर्वदेहिनां ॥ आनीयस्वामिनेदत्तंदत्वाचपुरतःस्थिता ॥ ६५ ॥ ॥ ॥

॥ ६० ॥ ६१ ॥ उवाचेति ॥ एतद्वरयाचनरूपम् ॥ ६२ ॥ तावदिति ॥ यावत्स्वाम्यत्रिःसमाव्रजेद्ध्यानान्मुक्तांतःकरणोभवेदित्यर्थः ॥ तावत्कालमत्र त्वयास्थेयमितिसंबंधः ॥ तथ्यंसत्यम् ॥ ६३ ॥ यदेति ॥ मासमात्रस्यमासपरिमितकालेकृतपतिसेवनस्येत्यर्थः ॥ इतीति ॥ तथाकृतंगंगोक्तवचनंस्वी कृतमित्यर्थः ॥ ६४ ॥ ६५ ॥ ॥ ॥ ॥ ॥

॥ ६६ ॥ अत्रिराह ॥ अहोइति ॥ ६७ ॥ इतीति ॥ रूक्षाअचिक्कणाःशुष्काइत्यर्थः ॥ मूर्तादिधर्माणांदिक्षूपचारादितिभावः ॥ ६८ ॥ उवाचेति ॥ पृष्टवानित्यर्थः ॥ किंतत्पप्रच्छेतितदाह ॥ नेति ॥ हेनाथवर्षणंनजातमितिप्रियाऽब्रवीदितिशेषः ॥ ६९ ॥ तामिति ॥ सोऽत्रिस्तामनसूयामुवाचपप्रच्छेत्यर्थः ॥ किमिति ॥ हेप्रियेत्वयाकुतोदेशाज्जलंनीतमानीतमिति ॥ तेनात्रिणा ॥ ७० ॥ निवेद्यतेकथ्यते ॥ उत्कर्षःसाध्वीधर्मप्रकटीभावरूपंमाहात्म्यंभवेत् ॥ साध्व्यःस्वोत्कर्षंनेच्छंतीतिभावः ॥ व्रतभंगोजातवृत्तांतनिवेदनरूपंव्रतंतस्माद्भंगश्च्यवनमथवापूर्वोक्तव्रतस्यभंगोनाशः ॥ ७१ ॥ नोभयमिति ॥

ऋषिश्चापिजलेनैवआचम्यविधिपूर्वकम् ॥ पपौशुभ्रंजलंतच्चपीत्वासुखमवापह ॥ ६६ ॥ सुखमात्यंतिकंलब्ध्वापरंविस्मयमागतः ॥ अहोनित्यंजलंयच्चपीयतेतज्जलंनहि ॥ ६७ ॥ इतिविचार्यतेनैवपरितश्चावलोकितं ॥ शुष्कान्वृक्षांस्तथालोक्यदिशोरूक्षतरास्तथा ॥ ६८ ॥ उवाचतामृषिश्रेष्ठोनजातंवर्षणंपुनः ॥ तदुक्तंतत्समाकर्ण्यनाथनेतिप्रियातदा ॥ ६९ ॥ तामुवाचपुनःसोपिजलंनीतंकुतस्त्वया ॥ इत्युक्तेचतदातेनविस्मयंपरमंगता ॥ ७० ॥ निवेद्यतेमयाचेद्वैतदोत्कर्षोभवेन्मम ॥ निवेद्यतेयदानैवव्रतभंगोभवेन्मम ॥ ७१ ॥ नोभयंचयथास्याद्वैनिवेद्यंतत्तथामया ॥ इतियावद्विचार्येततावत्पृष्टापुनःपुनः ॥ ७२ ॥ उवाचश्रूयतांस्वामिन्यथार्थंकथयामिवै ॥ अनसूयोवाच ॥ शंकरस्यप्रतापाच्चतथैवसेवनात्तव ॥ ७३ ॥ गंगासमागताचैवतदीयंतुजलंशुभं ॥ एवंवचस्तदाश्रुत्वामुनिर्विस्मितमानसः ॥ ७४ ॥ उवाचसुंदरित्वंचसत्यंवाऽथव्यलीककम् ॥ ब्रवीषिचयथार्थंत्वंनमन्येदुर्लभंत्विदम् ॥ ७५ ॥ असाध्यंयोगिभिर्यच्चदेवैरपिसदाशुभे ॥ तच्चैवाऽद्यकथंजातंविस्मयःपरमोमम ॥ ७६ ॥ यद्येवंदृश्यतेचेद्वैतन्मन्येऽहंचनाऽन्यथा ॥ इतितस्यवचःश्रुत्वास्वामिनोवचनंपुनः ॥ ७७ ॥ ॥ ॥ ॥

उभयंस्वोत्कर्षव्रतभंगैतदुभयमित्यर्थः ॥ ७२ ॥ शंकरस्येति ॥ तवेतिकर्मणिषष्ठी ॥ ७३ ॥ ७४ ॥ अत्रिःपत्नीवाक्यमविश्वस्याह ॥ उवाचेति ॥ अविश्वसनेकारणमाह ॥ दुर्लभमिति ॥ इदंगंगाऽनयनंदुर्लभम् ॥ तदेवाह ॥ असाध्यमिति ॥ हेशुभे ॥ ७६ ॥ यदीति ॥ यदिगंगासाक्षाद्दृश्यतेदृश्येततदैवंपूर्वोक्तंत्वदुक्तंतद्वचनंसत्यमित्यहंमन्येनान्यथा ॥ इतीति ॥ अनसूयातत्पूर्वोक्तंतस्यस्वामिनःपत्युर्वचनंश्रुत्वावचनमुत्तरमाददइतिशेषः ॥ ७७ ॥

इतीति ॥ समादायगृहीत्वापतिमितिशेषः ॥ ७८ ॥ दर्शयामासेति ॥ तांगंगां ॥ ७९ ॥ आकंठमिति ॥ आकंठंकंठदघ्नंसुंदरंस्वच्छंसुभगंवाजलंदृष्ट्वेयं मत्पत्नीधन्येत्यब्रवीदित्यर्थः ॥ पुनरत्रिःपत्नीसाधुधर्मंदृष्ट्वास्वात्मानंप्रशंसति ॥ किमिति ॥ ८० ॥ ८१ ॥ नित्यमिति ॥ नित्यकर्मेत्यर्थः॥ ८२ ॥ ८३ ॥ महतामिति ॥ नपरित्यजेत् ॥ अंगीकृतंसुकृतिनःपरिपालयंतीत्युक्तेरितिभावः ॥ ८४ ॥ यद्यपीति ॥ सम्यगसम्यग्वाममधर्मोभवेदस्त्वित्यर्थः ॥ ८५ ॥

आगम्यतांत्वयानाथद्रष्टुमिच्छाभवेद्यदि ॥ इत्युक्त्वातुसमादायगतायत्रसरिद्वरा ॥ ७८ ॥ दर्शयामासतांतत्रगर्तेच संस्थितांस्वयम् ॥ तत्रगत्वाऋषिश्रेष्ठोगर्तंचजलपूरितम् ॥७९॥ आकंठंसुंदरंदृष्ट्वाधन्येयमितिचाऽब्रवीत् ॥ किंमदीयंतपश्चैवकिमन्येषांपुनस्तथा ॥ ८० ॥ स्तुत्वास्तुत्वाचसंस्नातःसुभगेदुर्लभेजले ॥ आचम्यपुनरेवाऽत्रस्तुतिंचक्रेपुनःपुनः ॥ ८१ ॥ अनसूयापिसंस्नातासुंदरेचजलेतदा ॥ नित्यंकृत्वापुनःसोपिसापिचैवतथापुनः ॥ ८२ ॥ तदोवाच पुनर्गंगागम्यतेचमयाऽधुना ॥ इत्युक्तेचपुनःसाध्वीतामुवाचसरिद्वराम् ॥ ८३ ॥ यदिप्रसन्नादेवेशियद्यस्तिचकृपा मयि ॥ महतांचस्वभावश्चनांऽगीकृतंपरित्यजेत् ॥ ८४ ॥ यद्यपिचैवसम्यग्वाअसम्यग्वाभवेदिह ॥ तथात्वंचकृपां कर्तुमर्हसिमेसरिद्वरे ॥ ८५ ॥ इत्युक्त्वाप्रणिपातेनस्तुत्वास्तुत्वापुनःपुनः ॥ ऋषिरत्रिरिमांतत्रकृत्वास्तवनमुत्तमं ॥ ॥ ८६ ॥ ययाचेचपुनर्गंगांकृपांकुरुममोपरि ॥ तामुवाचपुनःसाध्वीत्वयास्थेयंतपोवने ॥ ८७ ॥ ऋषिश्चापितथाह्य त्रस्थेयंचैवसरिद्वरे ॥ तदीयंतद्वचःश्रुत्वागंगावाक्यमथाब्रवीत् ॥ ८८ ॥ शंकरार्चनसंभूतंफलंवर्षस्ययच्छसि ॥ स्वामिनश्चफलंचैवयच्छसिपूजनोद्भवम् ॥ ८९ ॥ तदास्थास्येवरारोहेलोकानामुपकारणात् ॥ यथादानेनमेतुष्टिःस्नाने नैवपुनःपुनः ॥ ९० ॥ यज्ञैर्वाप्यथवायोगैर्यथापातिव्रतेनच ॥ पतिव्रतांयथादृष्ट्वामनसःप्रीणनंभवेत् ॥ ९१ ॥ तथा नतुष्यतेदेवियथासाध्वींप्रदृश्यच ॥ ममापिपापनाशोवैदृष्ट्वापातिव्रतंप्रिये ॥ ९२ ॥ ॥

॥ ८६ ॥ ८७ ॥ ८८ ॥ गंगाकिमब्रवीत्तदाह ॥ शंकरेति ॥ हेसाध्वित्वंवर्षैकपरिमितकालकृतस्यशंकरपूजनस्यपतिसेवनस्यचफलंयदियच्छसिदातुमिच्छसि ॥ ८९ ॥ तदेति ॥ तदाऽहंस्थास्येत्र ॥ हेवरारोहे ॥ पातिव्रत्यस्यदानादिनासाम्यमाह ॥ यथेति ॥ ९० ॥ इदानींपातिव्रत्यस्यैवसर्वतआधिक्यमाह ॥ पतिव्रतामिति ॥ ९१ ॥ तथेति ॥ नतुष्यतेपातिव्रत्यातिरिक्तंदानादिकंवीक्ष्यनतुष्यतइत्यर्थः ॥ यथासाध्वींप्रदृश्यचेत्यत्रयथासाध्वीप्रदृश्यतेइतिपाठांतरम् ॥ ९२ ॥

॥ ९३ ॥ इतीति ॥ वर्षसमुद्भवंशिवस्वामिसेवनफलमित्यर्थः ॥ ९४ ॥ महत्स्वभावस्यपरहितावहनेदृष्टांतानाह ॥ सुवर्णमिति ॥ सुवर्णंस्पष्टंचंदनंपा टीरइक्षुःप्रसिद्धःरसोदध्यादिरसद्रव्यंचैतेषांसमाहारश्चंदनेक्षुरसम् ॥ एतत्सुवर्णादिकंचात्मानंस्वदेहंपीडयित्वाचूर्णयित्वापरेषामुपभोक्तृणामुपकारकमलंका रसुगंधदानस्वादुरसनवनीतरूपेणोपकर्तृभवतीतिदृष्टंचैतादित्यर्थः ॥ अत्राभियुक्तोक्तिः ॥ पाटीरतवपटीयान्कःपरिपाटीमिमामुरीकर्तुं ॥ यत्पिषतामपिनृ णांपिष्टोऽपितनोषिपरिमलैस्तुष्टिमिति ॥ ९५ ॥ मनइति ॥ मनोममेतिशेषः ॥ गंगायाइत्यर्थः ॥ लग्नंतत्परंत्वयीतिशेषः ॥ भवेत् ॥ अत्रकोपिविचार

तस्माच्चयदिलोकस्यहितार्थंत्वंप्रयच्छसि ॥ तस्माच्चस्थिरतांयास्येयदिकल्याणमिच्छसि ॥ ९३ ॥ इत्येवंवचनंश्रुत्वाद दौवर्षसमुद्भवम् ॥ महतांचस्वभावोऽस्तिपरेषांहितमावहेत् ॥ ९४ ॥ सुवर्णंतत्रवैदृष्टंचंदनेक्षुरसंतथा ॥ आत्मानं पीडयित्वातुपरेषामुपकारकम् ॥ ९५ ॥ मनोलग्नंभवेन्नूनंनात्रकुर्याद्विचारणां ॥ पार्थिवेरूपकेशंभुःस्थितोयोवैतदा स्वयं ॥ ९६ ॥ प्रसन्नोस्मिवरंब्रूहिप्रियेप्रियतरासिमे ॥ पंचवक्त्रादिसंयुक्तंहरंप्रेक्ष्यसुविस्मितौ ॥ ९७ ॥ यदिप्रस न्नोदेवेशप्रसन्नाजगदंबिका ॥ तस्मात्त्वंचवनेदेवलोकानांसुखकारणात् ॥ ९८ ॥ तिष्ठत्वंपूजयादेवलोकानांसुखदो भव ॥ प्रसन्नाचयदागंगातदाचैवमहेश्वरः ॥ ९९ ॥ उभौतौचस्थितौतत्रयत्राऽऽसीदृषिसत्तमः ॥ अत्रीश्वरश्चनामा सीदीश्वरःपरदुःखहा ॥ १०० ॥ गंगाचापितदातत्रस्थितापिचोमयासह ॥ तद्दिनंहिसमारभ्यतत्राऽक्षय्यंजलंसदा ॥ १०१ ॥ हस्तमात्रंचतद्गर्तमुदकंचाऽक्षयंतदा ॥ तत्रैवऋषयोदिव्याःसमाजग्मुःसहांगनाः ॥ १०२ ॥ तीर्थात्तीर्था न्ययेसर्वेतेसर्वेचसमागताः ॥ यवाश्चव्रीहयश्चैवफलानिविविधानिह ॥ १०३ ॥ ॥ ॥

णांसंशयंनकुर्यादित्यर्थः ॥ तदाऽनसूयायाःसंनिहितपार्थिवेश्वररूपीशिवःप्रसन्नोऽभूदित्याह ॥ पार्थिवइति ॥ पार्थिवेमृन्मयेरूपकेलिंगप्रतिमायांस्थितोऽ तर्यामीशंभुरब्रवीदितिशेषः ॥ ब्रूहियाचस्वेत्यर्थः ॥ सुविस्मितावत्र्यनसूयेइत्यर्थः ॥ आहतुरितिशेषः ॥ ९६ ॥ ९७ ॥ जगदंबिकागंगापार्वतीवा ॥ ९८ ॥ ॥ ९९ ॥ अत्रीश्वरइति ॥ अत्र्यर्थमीश्वरोऽत्रीश्वरइतिविग्रहः ॥ १०० ॥ गंगेति ॥ उमयापार्वत्या ॥ अत्रस्थितागर्तेप्यहर्निशमितिपाठांतरम् ॥ तद्दि नमिति ॥ तत्रगर्ते ॥ १०१ ॥ हस्तमात्रमिति ॥ हस्तपरिमितमित्यर्थः ॥ प्रमाणेद्वयसज्दघ्नञ्मात्रजित्यनेनमात्रच्प्रत्ययः ॥ सहांगनाःसस्त्रीकाः ॥ ॥ १०२ ॥ १०३ ॥ ॥ ॥ ॥ ॥

तत्रेति ॥ कामवनस्यसार्थकनामाह ॥ कामफलप्रदमिति ॥ १०४ ॥ एतन्माहात्म्यश्रवणफलमाह ॥ अत्रीश्वरस्येति ॥ १०५ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांगंगावर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ओंनमःशिवाय ॥ ज्योतिर्लिंगातिरिक्तेभ्योलिंगेभ्योऽर्पितवस्तुनः ॥ शिवनिर्माल्यरूपत्वादग्राह्यत्वंप्रकीर्त्यते ॥ १ ॥ माहात्म्यंशिवलिंगानामितिहासमुखेनच ॥ वितन्यतइहाध्यायेद्विचत्वारिंशउत्तमे ॥ २ ॥ श्रूयतामिति ॥ १ ॥ २ ॥ तत्तथैवेति ॥ यत्त्वयालिंगपूजनमुक्तंतत्सर्वदातथैवपूर्वोक्तप्रकारेणैवकर्तव्यंवापूजनप्रकारांतरमस्तिवेति ॥ अस्तिचेत्तत्रकिंकारणंयत्त्वि

तत्राऽऽसंश्चमुनिश्रेष्ठावनंकामफलप्रदम् ॥ सर्वेतेऋषयश्चैवयज्ञयागपरायणाः ॥ १०४ ॥ कर्मभिश्चैवसंतुष्टाद्दृष्टिंचक्रुःसदाशुभाम् ॥ आनंदंपरमंलोकेयत्रतेव्रतमुत्तमं ॥ अत्रीश्वरस्यमाहात्म्यंश्रुत्वाकल्याणमाप्नुयात् ॥ १०५ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांगंगावर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथांपापप्रणाशिनीम् ॥ व्यासस्यैवमुखाच्छ्रुत्वाकथयामियथाश्रुतम् ॥ १ ॥ ऋषयऊचुः ॥ सूतजानासिसकलंवस्तुव्यासप्रसादतः ॥ तवाऽज्ञानंनविद्येततस्मात्पृच्छामहेवयम् ॥ २ ॥ लिंगंचपूज्यतेलोकैस्तत्त्वयाकथितंचयत् ॥ तत्तथैवनचान्यद्वाकारणंविद्यतेत्विह ॥ ३ ॥ सूतउवाच ॥ कल्पभेदकथाचैवश्रुताचैवमयापुनः ॥ तदेवकथयाम्यद्यश्रूयतामृषिसत्तमाः ॥ ४ ॥ पुरादारुवनेजातंयद्वृत्तंतुद्विजन्मनाम् ॥ तदेवश्रूयतांसम्यक्कथयामियथाश्रुतम् ॥ ५ ॥ दारुनामवनंश्रेष्ठंतत्राऽऽसन्नृषिसत्तमाः ॥ शिवभक्ताःसदानित्यंशिवध्यानपरायणाः ॥ ६ ॥ त्रिकालंशिवपूजांचकुर्वंतिस्मनिरंतरम् ॥ स्तोत्रैर्नानाविधैर्देवमंत्रैर्वाऋषिसत्तमाः ॥ ७ ॥ एवंसेवांप्रकुर्वंतोध्यानमार्गपरायणाः ॥ तेकदाचिद्वनेयाताःसमिदाहरणायच ॥ ८ ॥ एतस्मिन्नंतरेसाक्षाच्छंकरोनीललोहितः ॥ विरूपंचसमास्थायपरीक्षार्थंसमागतः ॥ ९ ॥

द्यतेतत्कथयेतिप्रश्नः ॥ ३ ॥ एवंप्रश्नेतत्रविशेषंकथयितुंकल्पांतरकथामाह ॥ कल्पभेदेति ॥ ४ ॥ पुरेति ॥ दारुवनेदारुसंज्ञकवनेद्विजन्मनांब्राह्मणानांजातंयद्वृत्तंवृत्तांतस्तत्कथयामीत्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ एवमिति ॥ ध्यानमार्गपरायणाध्यानमार्गतत्पराः ॥ ध्यानमार्गश्चपूर्वमुक्तएव ॥ अत्रएवंसेवांप्रकुर्वीतध्यानमार्गपरायणइतिपाठांतरम् ॥ तइति ॥ तेऋषयोवनेकस्मिंश्चिद्वनप्रदेशेसमिदाहरणाययातागतवंतः ॥ ८ ॥ विरूपंकुत्सितस्वरूपम् ॥ समागतः ॥ ऋषिस्त्रीसमीपइतिशेषः ॥ ९ ॥ ॥ ॥ ॥

विरूपप्रकारमाह ॥ दिगंबरइति ॥ नग्नइत्यर्थः ॥ लिंगंशिश्नं ॥ १० ॥ ११ ॥ विव्हलाइति ॥ व्यग्राइत्यर्थः ॥ अन्याःस्त्रियः ॥ करंहस्तं ॥ विरूपिण इतिशेषः ॥ धृत्वाऽऽलिलिंगुः ॥ १२ ॥ तथाऽपराद्दिजन्मनांपत्न्योगतंप्राप्तंपुरुषंवीक्ष्यसंहर्षात्परस्परमालिलिंगुरित्यग्रिमेणान्वयः ॥ गतेचैवाद्दिजन्मना मितिपाठांतरम् ॥ तत्रद्दिजन्मनांब्राह्मणानांगतेगमनेसतीत्यर्थः ॥ भावेक्तः ॥ १३ ॥ १४ ॥ यदेति ॥ नोक्तवान्विरूपिपुरुषइतिशेषः ॥ किमूचुस्तदा ह ॥ विरुद्धमिति ॥ १५ ॥ तदाऋषयःशापंददुरित्याह ॥ त्वदीयमिति ॥ पततांपततु ॥ आत्मनेपदमार्षम् ॥ १६ ॥ १७ ॥ १८ ॥ शर्मसुखम् ॥

दिगंबरोऽतितेजस्वीभूतिभूषणभूषितः ॥ चेष्टांचैवकटाक्षंचहस्तेलिंगंचधारयन् ॥ १० ॥ मनांसिमोहयन्स्त्रीणामा जगामहरःस्वयम् ॥ तंदृष्ट्वाऋषिपत्न्यस्ताःपरंत्रासमुपागताः ॥ ११ ॥ विव्हलाविस्मिताश्चैवसमाजग्मुस्तथापुनः ॥ आलिलिंगुस्तदाचान्याःकरंधृत्वातथाऽपराः ॥ १२ ॥ परस्परंतुसंहर्षाद्गतेचैवद्दिजन्मनाम् ॥ एतस्मिन्नेवसमयेऋ षिवर्याःसमागमन् ॥ १३ ॥ विरुद्धंवृत्तकंदृष्ट्वादुःखिताःक्रोधमूर्च्छिताः ॥ तदादुःखमनुप्राप्ताःकोऽयंकोऽयंतथाऽब्रुव न् ॥ १४ ॥ यदाचनोक्तवान्किंचित्तदातेपरमर्षयः ॥ ऊचुस्तंपुरुषंतेवैविरुद्धंक्रियतेत्वया ॥ १५ ॥ त्वदीयंचैवलिंगंच पततांपृथिवीतले ॥ इत्युक्तेतुतदातैस्तुलिंगंचपतितंक्षणात् ॥ १६ ॥ तल्लिंगंचाऽग्निवत्सर्वंददाहयत्पुरःस्थितम् ॥ य त्रयत्रचतद्यातितत्रतत्रदहेत्पुनः ॥ १७ ॥ पातालेचगतंतच्चस्वर्गेचापितथैवच ॥ भूमौसर्वत्रतद्भ्रांतंकुत्रापितत्स्थितंन हि ॥ १८ ॥ लोकाश्चव्याकुलाजाताऋषयस्तेऽपिदुःखिताः ॥ नशर्मलेभिरेकापिदेवाश्चऋषयस्तथा ॥ १९ ॥ तेस र्वेचतदादेवाऋषयोयेचदुःखिताः ॥ नज्ञातश्चशिवोयैस्तुब्रह्माणंशरणंययुः ॥ २० ॥ तत्रगत्वातुतत्सर्वंकथितंब्रह्मणेतदा ॥ ब्रह्मातद्वचनंश्रुत्वाप्रोवाचऋषिसत्तमान् ॥ २१ ॥ ब्रह्मोवाच ॥ ज्ञातारश्चभवंतोवैकुर्वंतिगर्हितंपुनः ॥ अज्ञातारोयदाकुर्युः किंपुनःकथ्यतेतदा ॥ २२ ॥ विरुध्यैवंशिवंदेवाःकुशलंकःसमीहते ॥ गृहेसमागतंदूरादतिथिंयःपरामृषेत् ॥ २३ ॥

॥ १९ ॥ तइति ॥ यैर्ऋषिभिःशिवइतिपुरुषोनज्ञातस्तेब्रह्माणंशरणंययुरित्यर्थः ॥ २० ॥ २१ ॥ ब्रह्माऋषीणांज्ञातसंपादितदोषमाह ॥ ज्ञातारइति ॥ ॥ २२ ॥ विरुध्येति ॥ साधारणोप्यतिथिरवमानितोवमंतृसंपादितपुण्यंस्वीकृत्यस्वसंपादितदोषमवमंत्रेऽर्पयित्वापगच्छतीतिकिंपुनःशिवरूपातिथिमवमं त्रइत्याह ॥ गृहइति ॥ परामृषेदवमन्येत ॥ अत्रमनुः ॥ शिलानप्युंछतोनित्यंपंचाग्नीनपिजुव्हतः ॥ सर्वंसुकृतमादत्तेब्राह्मणोनर्चितोवसन्निति ॥ गृहेसमागतं दूरादित्यत्रमध्यान्हसमयेचैवेतिपाठांतरम् ॥ २३ ॥ ॥ ॥ ॥ ॥

॥ २४ ॥ ब्रह्माभाविसंभावयति ॥ यावदिति ॥ २५ ॥ २६ ॥ ब्रह्माऋषीणांशांत्यर्थंव्यवस्थांकथयति ॥ आराध्येति ॥ २७ ॥ योनिरूपमिति ॥ वाणस्वरूपमि त्यर्थः ॥ वाणस्यैवगिरिजायोनिरूपत्वादितिभावः ॥ कुरुतपुनरित्यत्रकुरुतेपुनरितिपाठांतरम् ॥ तत्रकुरुतेकुर्यादित्यर्थः ॥ विध्यर्थेलट् ॥ २८ ॥ ब्रह्मागि रिजाराधनविधिमाह ॥ कुंभमित्यादिना ॥ २९ ॥ वेदभूतैर्वेदस्थैर्वेदार्थप्रतिपादकैःपौरुषमंत्रैर्वा ॥ ३० ॥ तल्लिंगमिति ॥ शतरुद्रियमंत्रैर्नमस्तेरुद्रे

तस्यैवसुकृतंनीत्वास्वीयंचदुष्कृतंपुनः ॥ संस्थाप्यचातिथिर्यातिकिंपुनःशिवमेवच ॥ २४ ॥ यावल्लिंगंस्थिरंनैवजग तांत्रितयेशुभम् ॥ जायतेनतदाक्वापिसत्यमेतद्वदाम्यहम् ॥ २५ ॥ भवद्भिश्चतदाकार्यंयथास्वास्थ्यंभवेदिह ॥ इत्यु क्तास्तेप्रणम्योचुःकिंकार्यंतत्समादिश ॥ २६ ॥ इत्युक्तश्चतदाब्रह्मातान्प्रोवाचतदास्वयम् ॥ आराध्यगिरिजांदेवीं प्रार्थयध्वंशुभांतदा ॥ २७ ॥ योनिरूपंभवेच्चेद्वैतदातत्स्थिरतांभजेत् ॥ तदाप्रसन्नांतांदृष्ट्वातद्देवंकुरुतपुनः ॥ २८ ॥ कुंभमेकंतदास्थाप्यकृत्वाऽष्टदलमुत्तमं ॥ तदुपरिन्यसेत्तंचऔषधीभिःसमन्वितम् ॥ २९ ॥ दूर्वायवांकुरैस्तत्रतीर्थो दकंप्रपूरयेत् ॥ मंत्रैश्चवेदभूतैश्चमंत्रयेत्कुंभमुत्तमम् ॥ ३० ॥ तल्लिंगंतज्जलेनैवसेचयेत्परमर्षयः ॥ शतरुद्रियमंत्रैस्तु प्रोक्षितंशांतिमाप्नुयात् ॥ ३१ ॥ गिरिजायोनिरूपंचबाणंस्थाप्यशुभंपुनः ॥ तत्रलिंगंचतत्स्थाप्यंपुनश्चैवाऽभिमंत्र येत् ॥ ३२ ॥ गंधैश्चचंदनैश्चैवपुष्पधूपादिभिस्तथा ॥ दीपारात्रिकपूजाभिस्तोषयेत्परमेश्वरम् ॥ ३३ ॥ प्रणिपातै स्तवैस्तंचवाद्यंगानंतदापुनः ॥ स्वस्त्ययनंततःकृत्वाजयेतिव्याहरेत्ततः ॥ ३४ ॥ प्रसन्नोभवदेवेशजगदाल्हादकार क ॥ कर्त्तापालयितात्वंचसंहर्त्तापुनरेवच ॥ ३५ ॥ जगदादिर्जगद्योनिर्जगदंतर्गतोऽपिच ॥ पालयन्सर्वलोकांश्चशांतो भवसदाशुभ ॥ ३६ ॥ एवंकृतेचस्वास्थ्यंवैभविष्यतिनसंशयः ॥ इत्युक्तास्तेतदादेवाःप्रणिपत्यपितामहम् ॥ ३७ ॥ शिवस्यशरणंगत्वाप्रार्थितःशंकरस्तदा ॥ पूजितःपरयाभक्त्याप्रसन्नःशंकरस्तदा ॥ ३८ ॥ ॥

त्यध्यायेनेत्यर्थः ॥ ३१ ॥ गिरिजेति ॥ तत्रवाणरूपयोनौ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ब्रह्माप्रार्थनामंत्ररूपंश्लोकद्वयमाह ॥ प्रसन्नइति ॥ ३५ ॥ ३६ ॥ इतीति ॥ प्रणिपत्यनमस्कृत्यप्रत्याजग्मुरितिशेषः ॥ ३७ ॥ शिवस्येति ॥ प्रार्थितःस्तुतः ॥ ऋषिभिरितिशेषः ॥ ३८ ॥ ॥

पार्वतीमिति ॥ तयालिंगंधृतंचेदित्यर्थः ॥ ३९ ॥ गृहीत्वेति ॥ ऋषिभिरितिविचार्यब्रह्माणंगृहीत्वाब्रह्मणासहेत्यर्थः ॥ गिरिजाप्रार्थितेत्यर्थः ॥ ४० ॥ ४१ ॥ ॥ ४२ ॥ तदाप्रसन्नःशिवऋषिभ्यआशिषंददावित्याह ॥ शिवइति ॥ ४३ ॥ इतीति ॥ प्रसन्नाहर्षयुक्ताइत्यर्थः ॥ ४४ ॥ ४५ ॥ लोकानामिति ॥ लिंगे पूर्वोक्तस्थापितेसति॥ रुद्रेणेतिशेषः ॥ तदालोकानांकल्याणमभवदितिसंबंधः ॥ ४६ ॥ ज्योतिर्लिंगेभ्योनिवेदितस्यान्नादेर्ग्रहणेशिवनिर्माल्यग्रहणदोषोनास्ति किंतुरुद्रस्थापितलिंगेभ्यएवनिवेदितस्यग्रहणेदोषइतिविशेषंकथयितुमाह ॥ विशेषइति ॥ लभ्येल्लभ्येतेत्यर्थः ॥ आर्षोयंप्रयोगः ॥ रुद्रेणेति ॥ यदिदंपूर्वो

पार्वतींचविनानाऽन्यालिंगंधारयितुंक्षमा ॥ तयाधृतंचशांतिंचगमिष्यतिनसंशयः ॥ ३९ ॥ गृहीत्वाचैवब्रह्माणंगिरिजाप्रार्थितातदा ॥ प्रसन्नांगिरिजांकृत्वावृषभध्वजमेवच ॥ ४० ॥ पूर्वोक्तंचविधिंकृत्वास्थापितंलिंगमुत्तमम् ॥ मंत्रोक्तेनविधानेनदेवैश्चऋषिभिस्तदा ॥ ४१ ॥ स्तवनैःपूजनैर्मंत्रैःसंतोष्यवृषभध्वजम् ॥ स्थिताःसम्यक्परंकृत्वासर्वेषांधर्महेतवे ॥ ४२ ॥ शिवोपिकृपयायुक्तोह्यब्रवीत्परमंवचः ॥ प्रसंन्नंमांचजानीतसुखंस्यात्सर्वदानृणाम् ॥ ४३ ॥ इत्युक्तेचतदातेनप्रसन्नाःसर्वदेवताः ॥ ऋषयश्चप्रणम्यैवस्तुत्वास्तुत्वापुनःपुनः ॥ ४४ ॥ ब्रह्मणाविष्णुनाचापिरुद्रेणैवपुनस्तथा ॥ कृतंसर्वंसुखंचात्रतैस्तदाचदयालुभिः ॥ ४५ ॥ लोकानांस्थापितेलिंगेकल्याणंचाऽभवत्तदा ॥ प्रसिद्धंचैवयल्लिंगंलिंगमेतत्तथापुनः ॥ ४६ ॥ विशेषोऽत्रकथंलभ्येच्छ्रूयतामृषिसत्तमाः ॥ रुद्रेणस्थापितंयच्चतल्लिंगमिदमेवच ॥ ४७ ॥ अन्यच्चज्योतीरूपंचनाऽत्रकार्याविचारणा ॥ मक्षिकापादमात्रंहिशिवस्वंनस्पृशेत्क्वचित् ॥ ४८ ॥ तंपप्रच्छुस्तदासर्वेशिवेनिर्माल्यताकथम् ॥ तच्छ्रुत्वावचनंतेषांसूतश्चैवाऽब्रवीदिदं ॥ ४९ ॥ साधुपृष्टमृषिश्रेष्ठाःकथयामियथाश्रुतम् ॥ दक्षशापाच्चयत्प्रोक्तंयच्चैवकथितंत्विह ॥ ५० ॥ ॥ ॥

क्तंलिंगंतद्रुद्रेणस्थापितम् ॥ ज्योतिर्लिंगंत्वन्यदेवनतुरुद्रस्थापितमित्यर्थः ॥ रुद्रेणस्थापितमित्यत्रशूद्रेणस्थापितमितिपाठांतरम् ॥ एवमन्यत्रापिशिवनिर्माल्यग्रहणेदोषमाह ॥ मक्षिकेति ॥ मक्षिकापादमात्रंमक्षिकापादपरिमितमित्यर्थः ॥ शिवस्वंशिवनिर्माल्यम् ॥ ४८ ॥ तमिति ॥ सूतमित्यर्थः ॥ सर्वेशौनकादयः ॥ ४९ ॥ शिवनिर्माल्याग्रहणेनिमित्तान्याह ॥ दक्षशापादिति ॥ ५० ॥ ॥ ॥

रुद्रेणेति ॥ यद्रुद्रेणैवकृतंपूर्वाख्यानेदारुवनेरुद्रेणप्रदर्शितंलिंगमित्यर्थः ॥ अत्ररुद्रेणेत्यत्रशूद्रेणेतिपाठांतरम् ॥ एवमुत्तरत्रापिपाठांतरंज्ञेयं ॥ तत्सर्वमिति ॥
इदंचज्योतिरादिलिंगपरमितिबोध्यम् ॥ ५१ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांलिंगविधानंनामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ओंनमःशिवाय ॥ अंधकेश्वरमाहाम्यवर्णनायांधकस्ययत् ॥ त्रिचत्वारिंशकेध्यायेवधादितदुदीर्यते ॥ १ ॥ अंधकस्येति ॥ प्रोक्तःकथितःसंक्षिप्येतिशेषः ॥
समासेनाशिवमाहात्म्यवर्णनप्रधानेनसंक्षेपेण १ ॥ हिरण्याक्षःकश्यपसुतोदैत्यस्तत्सुतः ॥ २ ॥ वरस्वरूपमाह ॥ स्मृतिमिति ॥ मेममशरीरेस्मृतिंचैतन्यंप्राप्ते
सतियदायवात्ब्रह्मांडंवर्ततेवर्ततेमदधीनमितिशेषः ॥ तदातावत्मेजीवितंस्यात् ॥ अन्यथाजीवितंनभवेदितिसंबंधः ॥ अथवाअहंब्रह्मास्मीतिस्मृतिंमयिप्राप्ते

रुद्रेणैवकृतंयच्चतल्लिंगेदूषणंस्मृतम् ॥ तत्सर्वंचतथाज्ञेयंभक्तोनैवविदुष्यति ॥ रुद्रेणस्थापितंलिंगंसर्वंदूषणकृद्भवेत्
॥ ५१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांलिंगविधानंनामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ छ ॥ ऋषयऊचुः ॥
अंधकस्यवधःप्रोक्तोनश्रुतोविस्तरेणच ॥ तत्सर्वंचसमासेनकथयत्वंसुशोभनम् ॥ १ ॥ सूतउवाच ॥ सम्यक्पृष्टंभव
द्भिस्तुश्रूयतामृषिसत्तमाः ॥ हिरण्याक्षसुतःप्रोक्तोअंधकोनामविश्रुतः ॥ २ ॥ ब्रह्माणंचसमाराध्यबलंप्राप्यसुदुर्ल
भम् ॥ स्मृतिंप्राप्तेशरीरेमेब्रह्मांडंवर्त्ततेयदा ॥ ३ ॥ तदामेजीवितंनैवह्यन्यथाजीवितंभवेत् ॥ एवंवरंतदालब्ध्वाब्र
ह्माणंप्रणिपत्यच ॥ ४ ॥ त्रिलोकींचाऽजयत्कृत्स्नांदेवाश्चविजितास्तदा ॥ सर्वेचदिक्पालाश्चजितास्तेनमहात्मना
॥ ५ ॥ मंदरंचसमाश्रित्यकालक्षेपंतदानयन् ॥ अंधकोऽपितदातांस्तुश्रुत्वाचमंदराचले ॥ ६ ॥ जगामसैन्यसंयुक्तो
देवानांहननेच्छया ॥ तत्रयुद्धमतीवासीद्देवदानवयोरिह ॥ ७ ॥ देवैश्चपीडितादैत्याःपरितश्चदिशोदश ॥ अंधको
ऽपिसमुद्रस्यनैर्ऋतेश्चसमीपतः ॥ ८ ॥ उपकंठेसुगर्त्तंतुकृत्वागर्तेन्यवेशयत् ॥ तस्माद्गर्ताच्चनिःसृत्यपीडयित्वापुनःप्र
जाः ॥ ९ ॥ प्राविशच्चपुनर्दैत्योमहाबलपराक्रमः ॥ गर्तेत्रियोजनंतत्रजातंनगरसंनिभम् ॥ १० ॥

सतिसर्वाधारकत्वान्ममशरीरएवसर्वंब्रह्मांडंवर्ततइतियदाबुद्धिर्भवेत्तदामेजीवितंजीवभावोनस्यादितिसंबंधः ॥ अंतकालेचत्वांदृष्ट्वात्वादृशोभवतिक्षणादितिहि
वक्ष्यते ॥ ३ ॥ ४ ॥ ५ ॥ मंदरमिति ॥ तदातेनजितादेवामंदराचलमाश्रित्यकालक्षेपंदेहयात्रामनयंश्चक्रुरित्यर्थः ॥ मंदराचलेस्थितांस्तान्देवान् ॥ ६ ॥
॥ ७ ॥ नैर्ऋतेःनिर्ऋतिकोणस्य ॥ ८ ॥ उपकंठइति ॥ पुनरुक्त्यासामीप्यातिशयोबोधितः ॥ न्यवेशयदिति ॥ आत्मानमितिशेषः ॥ निःसृत्यबहिरागत्यगर्त
मवटम् ॥ गर्तावटावित्यमरः ॥ ९ ॥ १० ॥ ॥ ॥ ॥

॥ ११ ॥ निवेद्येति ॥ स्थिताइतिशेषः ॥ तस्मैशिवाय ॥ तत्सर्वमिति ॥ अंधकासुरकृतंपीडनमित्यर्थः ॥ १२ ॥ तस्मिन्दैत्ये ॥ देवःशिवः ॥ १३ ॥ देवैरिति ॥ प्रोतस्ताडितः ॥ १४ ॥ अंधकःशिवंकिंसंप्रार्थयतेतितदाह ॥ अंतकालइति ॥ अहमंतकालेत्वदात्मकएवभवानीतितात्पर्यम् ॥ १५ ॥ १६ ॥ १७ ॥ इदानीमिति ॥ तथातेनैवप्रकारेणअस्त्वितिशेषः ॥ आक्षिपत्स्थापितवान्शंभुरितिशेषः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ लोकस्यस्वकुटुंबसंबंधिनः ॥ २४ ॥

परःस्वर्गइवाभातितत्रतिष्ठतिनित्यशः ॥ देवाश्चदुःखिताःसर्वेशिवंप्रार्थ्यपुनःपुनः ॥ ११ ॥ निवेद्यतस्मैतत्सर्वंश्रुत्वाप्रीतोहरस्तदा ॥ सैन्यंचनीयतांदेवाआयामिचगणैःसह ॥ १२ ॥ निःसृतेचतदातस्मिन्देवोगर्तमुपाश्रितः ॥ दैत्यश्चदेवताश्चैवयुद्धंचक्रुःसुदारुणम् ॥ १३ ॥ देवैश्चपीडितःसोऽपियावद्गर्तमुपागतः ॥ तावच्छूलेनसप्रोतःशिवेनपरमात्मना ॥ १४ ॥ तत्रत्यश्चतदाशंभुंध्यात्वासंप्रार्थयत्तदा ॥ अंतकालेचत्वांदृष्ट्वात्वादृशोभवतिक्षणात् ॥ १५ ॥ इत्येवंसंस्तुतःसोपिप्रसन्नःशंकरस्तदा ॥ उवाचवचनंतत्रवरंब्रूहिददामिते ॥ १६ ॥ इत्येवंवचनंश्रुत्वासदैत्यःपुनरब्रवीत् ॥ यदिप्रसन्नोदेवेशभक्तिंदेहिशुभांतव ॥ १७ ॥ इदानींतुवरोलब्धःपरजन्मनितत्तथा ॥ इत्युक्त्वातुतदादैत्यंतेनैवाऽऽक्षिपत्तदा ॥ १८ ॥ सोपिशंभुःस्वयंतत्रसंस्थितोलोककाम्यया ॥ दैत्याश्चैवतदासर्वेहतास्तत्क्षणमात्रतः ॥ ॥ १९ ॥ जगत्स्वास्थ्यंतदालेभेदेवानांपरमंसुखम् ॥ स्वंस्वंकार्यंतदासर्वेचक्रुर्वैदेवताःपुनः ॥ २० ॥ तत्रेश्वरश्चसंतस्थौपूज्यश्चैवांऽधकेश्वरः ॥ लोकानामुपकारार्थंस्थितःशंभुःस्वयंतदा ॥ २१ ॥ अंधकेशंचयोनित्यंपूजयेत्परमेश्वरम् ॥ षण्मासाज्जायतेतस्यमनसोभीष्टमेवच ॥ २२ ॥ नित्यंचपूजयेद्योवैशिवंलोकभयापहम् ॥ नदुःखीजायतेसोपिसुखंचैवाऽतुलंलभेत् ॥ २३ ॥ परद्रव्याभिलाषेणशिवमाराधयेन्नतु ॥ वृत्त्यर्थंपूजयेद्देवंलोकस्यहितकारकः ॥ २४ ॥ षण्मासंयोद्विजश्चैवसवैदेवलकःस्मृतः ॥ यथादेवलकश्चैवतथाऽसौवैभवेदिह ॥ २५ ॥ देवलकश्चयःप्रोक्तोनाऽधिकारेद्विजस्यच ॥ इत्येवंवचनंश्रुत्वाऋषयश्चवचोऽब्रुवन् ॥ २६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायामंधकेश्वरमाहात्म्यंनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ ॥ ॥

षण्मासपर्यंतंद्रव्याभिलाषिणांऽधकेश्वरपूजनेदेवलकजन्मप्राप्येतेत्याह ॥ षण्मासमिति ॥ २५ ॥ नेति ॥ वर्ततइतिशेषः ॥ द्विजकर्माधिकारस्तस्यनास्तीतिभावः ॥ २६ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यामंधकेश्वरमाहात्म्यंनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥

॥ श्रीसांवसदाशिवायनमः ॥ ॥ ॐनमःशिवाय ॥ ॥ शिवरात्रिव्रतभ्रंशाद्दधीचिसुतदूषणम् ॥ चतुश्चत्वारिंशकेत्रशिवतोषश्चवर्ण्यते ॥ १ ॥ दधीचिरिति ॥ शिवशास्त्रपरायणःशिवतत्वप्रतिपादकागमतत्परः ॥ यज्ञादीनांज्योतिष्टोमादिकर्मणांकर्ता ॥ नित्यानांसंध्याग्निहोत्रादीनांनैमित्तानांप्राप्तानामुपरागस्नानादीनांचकारकः ॥ आसीदितिशेषः ॥ २ ॥ तस्यदधीचेः ॥ नाम्नेति ॥ नाम्नैवसुदर्शनःस्वभावेनतुदुर्दर्शनइतिभावः ॥ तादृशस्तत्स्वभावस्तद्भार्यामूलकआसीदित्यभिप्रेत्याह ॥ तस्येति ॥ सुदर्शनस्येत्यर्थः ॥ तस्यादुष्कल्पात्वेहेतुमाह ॥ दुष्टकुलेति ॥ ३ ॥ पुत्रेति ॥ आसीदितिशेषः ॥ सोपिसुदर्शनोपि ॥ ४ ॥ हेऋषयःब्रह्मणःपुत्रोंदधीचिःपूर्वंयथाशिवपूजांज्ञातवांस्तथैवशिवपूजायामासक्तोनित्यकर्मपरश्चासीदित्यर्थः ॥ ब्रह्मणःसुताइतिपाठेपूर्वंब्रह्म

॥ ऋषयऊचुः ॥ देवलकश्चयःप्रोक्तःकिंकार्यंतस्यविद्यते ॥ सूतउवाच ॥ दधीचिर्नामविप्रोवैधर्मिष्ठोवेदपारगः ॥१॥ शिवभक्तिरतोनित्यंशिवशास्त्रपरायणः ॥ यज्ञादिकर्मकर्ताचनित्यनैमित्तकारकः ॥ २ ॥ तस्यपुत्रस्तथाह्यासीन्नाम्ना सुदर्शनःस्मृतः ॥ तस्यभार्याचदुष्कल्पानाम्नादुष्टकुलोद्भवा ॥ ३ ॥ तद्वशेसचभर्त्ताऽऽसीत्तस्याःपुत्रचतुष्टयं ॥ सोपि नित्यंशिवस्यैवपूजांचैवकरोत्यसौ ॥ ४ ॥ दधीचिस्तुयथापूर्वमृषयोब्रह्मणःसुतः ॥ तथाचशिवपूजायांनित्यकर्मपरायणः ॥ ५ ॥ यथाकर्मप्रवक्ताचतथाकर्ताचकारकः ॥ एवंजातेतदाकालेतस्यैवऋषिसत्तमाः ॥६॥ विपरीतंतदातस्य दैवाच्चैवाऽभवत्तदा ॥ यज्जातंश्रूयतांश्रेष्ठाःकथयामियथाश्रुतम् ॥ ७॥ दधीचिस्तुतदाह्यासीद्ग्रामांतरमथापिह ॥ ज्ञातिसंयोगतश्चैवज्ञातिभिर्नसमोचितः ॥ ८ ॥ कथयित्वाचपुत्रंसशिवभक्तिपरोभव ॥ इत्युक्त्वातुगतःसोऽपिपुत्रश्चापि तथाऽकरोत् ॥ ९ ॥ एवंचशिवरात्रिश्चह्यागताऋषिसत्तमाः ॥ तस्यामुपोषिताःसर्वेस्वयंसंयोगतस्तदा ॥ १० ॥

पुत्रायथाशिवपूजायामासक्तास्तथादधीचिरासीदित्यर्थः ॥ ५ ॥ यःक्रियावान्त्सपंडितइत्युक्त्याकर्मकर्तुःफलभाक्त्वंनकेवलंप्रवक्तृमात्रस्येत्याह ॥ यथेति ॥ कारकइति ॥ परैरपिकारयतिस्मेत्यर्थः ॥ णिजंताण्ण्वुल् ॥ तस्यैवदधीचेरेव ॥ हेऋषिसत्तमाः ॥ ६ ॥ दैवाधीनंजगत्सर्वमित्यभिप्रायेणाह ॥ विपरीतमिति ॥ तस्यदधीचेःदैवात्दुर्दैवात् ॥ ७ ॥ ग्रामांतरमिति ॥ गतइतिशेषः ॥ ज्ञातीति ॥ स्वजनसंयोगाद्धेतोरित्यर्थः ॥ ज्ञातिभिःस्वजनैःसदधीचिर्नमोचितःगृहंप्रत्यागमनेप्रतिबद्धइत्यर्थः ॥ ८ ॥ सगृहेपुत्रादेःस्वस्थतांकृत्वाजगामेत्याह ॥ कथयित्वेति ॥ पुत्रोपिपित्राज्ञयैवावर्ततेत्याह ॥ पुत्रश्चेति ॥ ९ ॥ शिवरात्रिरिति ॥ माघकृष्णचतुर्दशीत्यर्थः ॥ हेऋषिसत्तमाः ॥ उपोषिताःभोजनरहिताःसर्वेजनाः ॥ १० ॥ ॥

तदानींसुदर्शनोपिजनसंगात्स्वयमपिकिंचिदकरोदित्याह ॥ पूजामिति ॥ दुष्टस्त्रीसंयोगात्तत्कृतापूजानिष्फलैवजातेत्याह ॥ तदेति ॥ इहेति ॥ शिवलिंगसमीपइत्यर्थः ॥ ११ ॥ ततःकिमपराद्धंतेनेतितदाह ॥ नस्नातामिति ॥ कृतेति ॥ अस्नात्वैवकृतेत्यर्थः ॥ तस्यफलमाह ॥ जडत्वमिति ॥ निश्चेष्टत्वमित्यर्थः ॥ १२ ॥ ततःसाक्षाच्छिवएवतंनिर्भर्त्स्यतस्यशापंप्रकटयति ॥ शिवराज्यामिति ॥ १३ ॥ १४ ॥ द्विजोपीति ॥ दधीचिरित्यर्थः ॥ वृत्तांतंपुत्रवार्तां ॥ १५ ॥ सोपिदधीचिरपि ॥ ततोदधीचिःशोकंकृतवानित्याह ॥ हाहतोस्मीति ॥ हतंदूषितम् ॥ १६ ॥ मृतेति ॥ पत्यवस्थादर्शनजनितशोकातिशयादितिभावः ॥

पूजांकृत्वाततःसोऽपिसुदर्शनइतिश्रुतः ॥ तदारात्रौचस्त्रीसंगंकृत्वापुनरिहागतः ॥ ११ ॥ नस्नातंचतदातेनकृतापूजामहात्मनः ॥ पश्चात्सचतदाप्रातर्जडत्वंप्राप्तवान्क्षणात् ॥ १२ ॥ शिवरात्र्यांत्वयादुष्टसेवनंचस्त्रियाःकृतम् ॥ अस्नातश्चमदीयांत्वंपूजांचकृतवांस्तदा ॥ १३ ॥ ज्ञात्वाचैवंकृतंयस्मात्तस्मात्त्वंजडतांव्रज ॥ मास्पृशत्वंचपापिष्ठदर्शनंदूरतःकुरु ॥ १४ ॥ इत्युक्तस्तुतथाजातोयथोक्तंशंकरेणच ॥ द्विजोऽपिससमायातोवृत्तांतंश्रुतवांस्तदा ॥ १५ ॥ दुःखितस्तुतदासोऽपिशिवेनपरिभर्त्सितः ॥ हाहतोऽस्मीतिदुःखेनकुपुत्रेणकुलंहतम् ॥ १६ ॥ एतस्मिन्समयेतस्यभार्यासुदर्शनस्यच ॥ मृतायया चपतितःसोऽत्यंतंदुःखमागतः ॥ १७ ॥ पिताचदुःखितःसोपिशिवेनपरिभर्त्सितः ॥ संतोष्यचशिवंसोपिशिवपूजांतदाकरोत् ॥ १८ ॥ पुत्रोपिचतदाभार्यांपुंश्चलींकृतवांस्तदा ॥ पित्रापिगिरिजातत्रपूजितापुत्रहेतवे ॥ १९ ॥ प्रसन्नासातदादेवीपुत्रमंगीचकारह ॥ सुदर्शनोऽपिगिरिजांपूजयामासचस्वयम् ॥ २० ॥ चंडीपूजनमार्गेणप्रसन्नामकरोत्तदा ॥ सुदर्शनंचपुत्रत्वेचकारगिरिजातदा ॥ २१ ॥ शिवंप्रसादयामासपुत्रार्थेचंडिकास्वयम् ॥ कृत्वाकृत्वापुनश्चंडीप्रसन्नंवृषभध्वजम् ॥ २२ ॥ नमस्कृत्यशिवंतत्रह्युत्संगेसंन्यवेशयत् ॥ घृतस्नानंतदाचक्रेपुत्रस्यगिरिजास्वयम् ॥ २३ ॥ ॥ ॥ ॥ ॥

सइति ॥ सुदर्शनइत्यर्थः ॥ १७ ॥ पितादधीचिः ॥ १८ ॥ पुत्रोपिसुदर्शनोपि ॥ पुंश्चलीमिति ॥ व्रतभीत्वेनासतीमित्यर्थः ॥ पित्रापिदधीचिनापिपुत्रहेतवेपुत्रानिष्टनिवृत्तये ॥ १९ ॥ सागिरिजाअंगीचकारेति ॥ सचेष्टंकर्तुमंगीकृतवतीत्यर्थः ॥ २० ॥ तदागिरिजापार्वतीसुदर्शनंपुत्रत्वेस्वीयपुत्ररूपत्वेनचकारअनुजग्राह ॥ २१ ॥ ननुशिवविरुद्धंकथंकृतवतीत्यतआह ॥ शिवमिति ॥ २२ ॥ उत्संगेस्वांके ॥ घृतस्नानमिति ॥ पुत्रस्यपातकमलशोधनार्थमितिभावः ॥ २३ ॥

त्रिरावृत्तेति ॥ त्रिवारमावृत्तंसूत्रेणवेष्टितंयद्यज्ञोपवीतंतत्पुनःकीदृशंतदाह ॥ ग्रंथिनेति ॥ संधार्यैतिशेषः ॥ इदंतत्पुत्रशुद्धयेपुनरुपनयनंकृतंदेव्याततस्तज्जपार्थंमंत्रउपदिश्यते ॥ उपदिश्येति ॥ शिवगायत्रींतत्पुरुषायविद्महेमहादेवायेत्यादिकां ॥ षोडशेति ॥ षोडशाक्षरपरिमितपूर्वार्धयुतामित्यर्थः ॥ २४ ॥ पुनस्तज्जपार्थंमंत्रांतरमाह ॥ ओमिति ॥ ओंनमःश्रीशिवायेतिमंत्रंषोडशवारंसंकल्प्यजपित्वाऽयंवटुःसुदर्शनःपूजांकुर्यादित्युपादिशदित्यर्थः ॥ २५ ॥ पूजाप्रकारमाह ॥ जलादीति ॥ पाद्यार्घ्यजलादीत्यर्थः ॥ नमस्कारांतमिति ॥ षोडशोपचारैरित्यर्थः ॥ वादित्राणिवाद्यानि ॥ २६ ॥ नाममंत्रानिति ॥ शिवायनमइत्यादीन् ॥ एवंसुदर्शनमनुगृह्यगिरिजातदर्थांवृत्तिंकल्पयति ॥ तन्निमित्तमिति ॥ शिवपूजानिमित्तमित्यर्थः ॥ यत्किंचिदिति ॥ वक्ष्यमाणधान्यादिकमित्यर्थः ॥ तथैवेति ॥ अन्यत्राविनियुज्यैवेत्यर्थः ॥ २७ ॥ नदोषायेति ॥ शिवनिर्माल्यग्रहणेतवदोषोनेतिभावः ॥ २८ ॥ ततःशिवःस्वस्यदेव्याश्चकृत्येमुख्यत्वेनाधिकारंतस्मैददाति ॥ ममेति ॥ प्राजापत्यकृच्छ्रसुदर्शनपूजनयोःफलेसाम्यमाह ॥ प्राजापत्यमिति ॥ २९ ॥ तदपूजनेदोषमाह ॥ यदीति ॥ तदेति ॥ यदाभवानस्त्वितिवदेत्तदैवशिवपूजासंपूर्णास्यादितिसंबंधः ॥ ३० ॥ ततःशिवेनसुदर्शनपुत्राअप्यनुगृहीताइत्याह ॥ चत्वारइति ॥ सुदर्शनेति ॥ सुदर्शनश्चासौमहात्माचेतितस्येत्यर्थः ॥ अभिषिक्ताइति ॥ अभिषेकाद्युपचारैःसत्कृत्यस्थापिताइत्यर्थः ॥ दिक्षुपूर्वादिषुचतसृषु ॥ ३१ ॥ तिलकंपुंड्रकंभस्मादिनेतिशेषः ॥ वर्तुलमिति ॥ वृत्ताकारमित्यर्थः ॥ शूद्रतुल्यस्येदमेवयुक्तं ॥ तदुक्तंब्रह्मांडपुराणे ॥ ऊर्ध्वपुंड्रंद्विजःकुर्यात्क्षत्रियस्तुत्रिपुंड्रकं ॥ अर्धचंद्रंतुवैश्यस्यवर्तुलंशूद्रजातिष्विति ॥ ततःसुदर्शनादीन्प्रतिकर्तुंयोग्यंसंध्यादिकमुपदिशति ॥ शिवसंध्येति ॥ शिवदेवताप्रधानासंध्याकर्तव्येत्यर्थः ॥ तदीयकाशिवसंबंधिनी ॥ क्वचित्तदात्मिकेतिपाठः ॥ ॥ ३२ ॥ ॥ ॥ ॥ ॥

त्रिरावृत्तोपवीतंचग्रंथिनैकेनसंयुतम् ॥ उपदिश्याशिवगयत्रींषोडशाक्षरसंयुताम् ॥२४॥ ओंनमःशिवायैवश्रीशब्दपूर्वकायच ॥ वारान्षोडशसंकल्प्यपूजांकुर्यादयंबटुः ॥ २५ ॥ जलादिनमस्कारांतंपूजयेद्वृषभध्वजम् ॥ मंत्रवादित्रपूजाभिःसंनिधाद्दृषिणांतदा ॥२६॥ नाममंत्राननेकांश्चपाठयामासवैतदा ॥ तन्निमित्तंचयत्किंचित्तत्सर्वंतुतथैवच ॥ २७ ॥ धान्यंफलंचवस्त्रंचघृतंतैलंभवेच्चयत् ॥ तत्तत्सर्वंत्वयाग्राह्यंनदोषायभवेत्पुनः ॥ २८ ॥ ममकृत्येभवान्मुख्योदेवीकृत्येविशेषतः ॥ प्राजापत्यंभवेद्यद्धितद्ध्येकोऽपिभवान्भवेत् ॥ २९ ॥ यदिभवान्नपूज्येतततत्सर्वंनिष्फलंभवेत् ॥ तदापूजाचसंपूर्णायदास्तुचभवान्वदेत् ॥ ३० ॥ चत्वारोबटुकास्तस्यसुदर्शनमहात्मनः ॥ अभिषिक्ताश्चतेदिक्षुशिवेनपरमात्मना॥३१॥ तिलकंवर्तुलंकार्यंस्नानंकार्यंसदाशुभैः॥ शिवसंध्याचकर्तव्यागायत्रीचतदीयका॥३२

कुलोचितंस्वकुलपरंपराप्राप्तं ॥ वेदेति ॥ पूर्वोक्तमंत्रातिरिक्तवेदमंत्रोनवक्तव्यःशूद्रतुल्यत्वादितिभावः ॥ शूद्रस्यवेदमंत्रेनाधिकारः ॥ वेदाक्षरविचारेण शूद्रश्चांडालतांव्रजेदितिपराशरोक्तेः ॥ ननुमंत्रैर्विनास्मत्कर्मकथंभवेदित्याशंक्याह ॥ मंत्राइति ॥ भवदीयकाभवद्योग्याःपूर्वोक्ताःसंतीतिशेषः ॥ शिवप्रसादादत्राधिकारः ॥ ३३ ॥ चंडीगिरिजाचंडःशिवः ॥ स्थाप्येति ॥ पुत्रत्वेनानुगृह्येत्यर्थः ॥ तत्पुत्रान्सुदर्शनपुत्रान्प्रत्यनेकान्वरान्दत्वाप्रेरयामासबोधयामास ॥ ३४ ॥ किंतदितितदाह ॥ उभयोरिति ॥ व्यूहयोःसेनासमूहयोर्मध्येममबटुकोभवतामन्यतमःकोपिवालोयत्रव्यूहेभवेत्तत्रविजयएव स्यादित्यर्थः ॥ ३५ ॥ तदुत्कर्षांतरमाह ॥ भवानिति ॥ ३६ ॥ वेदब्रह्मेति ॥ वेदएवब्रह्मवेदमंत्रस्तद्रहितमित्यर्थः ॥ तस्यवेदमंत्रपठनेऽनधि

मत्सेवांचैवकृत्वातुकार्यमन्यत्कुलोचितम् ॥ वेदमंत्रोनवाच्योवैमंत्राश्चभवदीयकाः ॥ ३३ ॥ चंडीचैवाऽथचंडश्चपुत्रं स्थाप्यसुदर्शनम् ॥ तत्पुत्रान्प्रेरयामासवरान्दत्वाह्यनेकशः ॥ ३४ ॥ उभयोर्व्यूहयोर्यत्रबटुकोवैभवेन्मम ॥ तत्र स्याद्विजयोनित्यंनाऽत्रकार्याविचारणा ॥ ३५ ॥ भवान्वैपूजितोयेनतेनाऽहंचप्रपूजितः ॥ एवंवरंतदादत्वावेदब्रह्मविवर्जितम् ॥ ३६ ॥ कर्तव्यंचभवद्भिश्चस्वीयंकर्मसदाचयत् ॥ शिवाभ्यांस्थापितायस्मात्तस्मात्तेबटुकाःस्मृताः ॥३७॥ तपोभ्रष्टायतोजातास्तस्मात्तपोधमामताः ॥ शिवयोःकृपयासर्वेविस्तारंबहुधागताः ॥३८॥ तेषांचप्रथमापूजाततःपूजामहात्मनः ॥ तेनयावत्कृतानैवपूजाचशंकरस्यच ॥३९॥ तावत्पूजानकर्त्तव्याशिवस्यवचनादिह ॥ शुभंवाप्यशुभं वापिबटुकंनपरित्यजेत् ॥४०॥ प्राजापत्येचभोज्येचबटुरेकोविशिष्यते ॥ शिवयोश्चतथाकार्येविशेषोदृश्यतेत्विह ॥४१

कारस्योक्तत्वात् ॥ स्वीयंपूर्वोक्तसंध्यादिकं ॥ शिवाभ्यांशंकरपार्वतीभ्यां ॥ ३७ ॥ तपोधमाइति ॥ निकृष्टतपसइत्यर्थः ॥ कथंतर्हितैर्महत्वंप्राप्तमितितत्राह ॥ शिवयोरिति ॥ विस्तारंबाहुल्यम् ॥ ३८ ॥ शिवप्रसादाच्छिवादप्यग्रपूजालब्धेत्याह ॥ तेषामिति ॥ तेनेति ॥ येनबटुकपूजानकृतायावत्तावच्छिवपूजानकर्तव्येतिसंबंधः ॥ ३९ ॥ किंतत्रमानमितितदाह ॥ शिवस्येति ॥ शुभंयथोक्ताचारसंपन्नंअशुभंतद्रहितं ॥ ४० ॥ प्राजापत्यइति ॥ प्राजापत्यनिमित्तेब्राह्मणभोजनइत्यर्थः ॥ विशिष्यतइति ॥ अधिकफलदायीभवतीत्यर्थः ॥ शिवयोरिति ॥ तथाशंकरपार्वत्योःपूजनादिकार्येपिविशेषोबटुकमाहात्म्यातिशयोदृश्यतइत्यर्थः ॥ ४१ ॥ ॥ ॥ ॥ ॥

वटुकमाहात्म्यसंबंधिनींकथामाह ॥ तस्यैवेति ॥ अंधकेशसमीपवर्तिनिनगरेस्थितस्यतस्यैवप्रसिद्धस्यकल्याणयुक्तत्वाद्भद्रसंज्ञितस्यराज्ञःप्राजापत्यनियमे यन्नित्यंब्राह्मणभोजनंतत्रयज्जातंतत्कथयामितच्छ्रूयतामितिसंबंधः ॥ ४२ ॥ दत्तइति ॥ राज्ञःराज्ञे ॥ भक्तत्वादितिभावः ॥४३॥ तत्रभगवान्व्रतसंपूर्णता संसूचकंचिह्नंभवेदितिकथयति ॥ प्रातरिति ॥ प्रातःकालेवध्यतामुच्छ्रीयतांममकृत्येपूजनादौभोजनरूपेप्राजापत्येचसंपूर्णेजातेरात्रौसमागतायांध्वजःप तिष्यतीतिसंबंधः ॥ ४४ ॥ अन्यथाअसंपूर्णेचेदित्यर्थः ॥ रात्रावेवरात्रावपीत्यर्थः ॥ तस्यध्वजस्य ॥ शिवपूजेति ॥ शिवपूजाविधिवलादित्यर्थः ॥४५॥ एवंप्रतिदिनंकर्तव्यमित्याह ॥ प्राजापत्यमिति ॥ स्वयंचैवेति ॥ अत्रसायंचैवेतिपाठांतरं ॥ ४६ ॥ यदीति ॥ यदिकार्यंसंपूर्णंजातंस्यात्तदेदंभवेन्नोचेन्नपत

तस्यैवनगरेराज्ञोभद्रस्यनित्यभोजने ॥ नियमेप्राजापत्यस्यह्यंधकेशसमीपतः ॥ ४२ ॥ यज्जातंश्रूयतांतच्चकथयामि यथाश्रुतम् ॥ ध्वजएकश्चराज्ञोवैदत्तश्चशंकरेणच ॥ ४३ ॥ प्रातश्चबध्यतांराजन्रात्रौचैवपतिष्यति ॥ ममकृत्येचसं पूर्णेप्राजापत्येतथापुनः ॥ ४४ ॥ अन्यथाचेत्तदातत्ररात्रावेवस्थिरोभवेत् ॥ इतिनियमस्तस्याऽसीच्छिवपूजाविधा नतः ॥ ४५ ॥ प्राजापत्यंततश्चैवकर्तव्यंचदिनेदिने ॥ प्रातर्ध्वजोनिवध्येतस्वयंचैवपतेदिति ॥ ४६ ॥ यदिकार्यंचसं पूर्णंजातंचैवभवेदिह ॥ अन्यथानपतत्येवतथैवतिष्ठतिध्रुवम् ॥ ४७ ॥ एकस्मिन्समयेचाऽत्रबटोःकार्यंतथाह्यभूत् ॥ रा ज्ञाचभोजयित्वातुप्रेषितोबटुरेवच ॥ ४८ ॥ अभोजितेषुविप्रेषुध्वजश्चपतितोह्यभूत् ॥ दृष्ट्वातच्चतदातत्रपृष्टंराज्ञाकथं ध्वजः ॥ ४९ ॥ पतितोब्राह्मणाह्यत्रभुंजतेनोत्थिताइति ॥ कथंनिपतितश्चाऽत्रब्राह्मणाःसत्यवादिनः ॥ ५० ॥ तेपृष्टा श्चतदाप्रोचुर्बटुकोभोजितःपुरा ॥ चंडीपुत्रःशिवस्यैवतस्माच्चपतितोध्वजः ॥ ५१ ॥ एवंचमहिमातेषांवर्द्धितःशंकरेण च ॥ तस्माच्चबटुकाःश्रेष्ठाःपुराविद्भिःप्रकीर्तिताः ॥ ५२ ॥ ॥ ॥

तिपतेदित्यर्थः ॥ दार्ढ्यायपुनरुक्तिरियं ॥ ४७ ॥ इदंवृत्तंतस्यराज्ञःप्रत्यक्षमेवाभवदितितदाह ॥ एकस्मिन्निति ॥ कार्यंभोजनादिकं ॥ तदेवाह ॥ राज्ञेति ॥ ॥ ४८ ॥ विप्रेषुप्राजापत्यव्रतसंबंधिषु ॥ ४९ ॥ नोत्थिताइति ॥ ब्राह्मणोत्थानानंतरंपतनसमयइतिभावः ॥ अत्रअस्मिन्विषयेब्राह्मणाःसत्यवादिनःसंतिते वदेयुरितिशेषः ॥ ५० ॥ तैर्यत्सत्यमुक्तंतदाह ॥ वटुकइति ॥ चंडीपुत्रःगिरिजापुत्रःशिवस्यैवेति ॥ शिवस्यापिपुत्रइत्यर्थः ॥ अथवाशिवस्यकल्याणस्यैवसूच कइतिशेषः ॥ तस्मादिति ॥ अयंध्वजपतनेहेतुर्दर्शितः ॥ ५१ ॥ तेषांवटुकानां ॥ एवंवटुकानांश्रेष्ठत्वमुक्तमुपसंहरति ॥ तस्मादिति ॥ ५२ ॥

तैर्वटुकैःशिवपूजासर्वेभ्यःपूर्वंकर्तव्या ॥ यतःसासर्वप्रकारेणशुभाशुभफलदात्रीत्यर्थः ॥ उत्तारणमिति ॥ ममपूजापूर्णाभवत्वितिप्रार्थनमित्यर्थः ॥ ५३ ॥ किंतेषांकार्यमितियत्पृष्टंतदुपसंहरति ॥ एतावदिति ॥ एतत्कथाश्रवणफलमाह ॥ यच्छ्रुत्वेति ॥ ५४ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॐनमःशिवाय ॥ इंदोःक्षयित्वरूपाच्छापाद्दक्षस्यमोक्तुमात्मानं ॥ तपसिस्थितस्यसोमेश्वरःप्रसन्नोभवत्तदाख्यानं ॥ १ ॥ मल्लिकार्जुननाम्नोपिज्योतिर्लिंगस्यसंभवम् ॥ निरूपयत्यत्रपंचचत्वारिंशत्तमेखलु ॥ २ ॥ ज्योतिषामिति ॥ १ ॥ अहमिति ॥ सर्वंप्रवक्ष्यामीत्यस्यबुद्धिस्थमेवकथयिष्यामीत्यर्थः ॥ सर्वनाम्नांबुद्धिस्थवाचकत्वात् ॥ सर्वेभ्योदर्शपूर्णमासौकर्तव्यावित्यादौसर्वपदसंकोचदर्शनाच्च ॥ तदर्थमेवप्र

शिवपूजातुतैःपूर्वंकर्तव्यासर्वतःशुभा ॥ उत्तारणंचपूजायाःपूजापूर्णाभवत्विति ॥ ५३ ॥ एतावदेवतेषांतुकार्यंनान्यत्तथैवच ॥ एतत्सर्वंसमाख्यातंयत्पृष्टंचमुनीश्वराः ॥ यच्छ्रुत्वाशिवपूजायाःफलंतुलभतेनरः ॥ ५४ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ऋषयऊचुः ॥ ज्योतिषांचैवलिंगानांमाहात्म्यंकथयाऽधुना ॥ उत्पत्तिंचतथातेषांब्रूहिसर्वंयथाश्रुतम् ॥ १ ॥ सूतउवाच ॥ अहंसर्वंप्रवक्ष्यामियथाबुद्धियथाश्रुतम् ॥ एतेषांचैवमाहात्म्यंवक्तुंवर्षशतैरपि ॥२॥ शक्यतेनमुनिश्रेष्ठास्तथापिकथयामिवः॥सप्तविंशतिकन्याश्चदक्षस्यचमहात्मनः॥३॥ तेनचंद्रमसेदत्ताअश्विन्याद्यामुनीश्वराः ॥ चंद्रंचस्वामिनंप्राप्यशोभमानाविशेषतः ॥ ४ ॥ चंद्रमाअपिताःप्राप्यशोभतेस्मनिरंतरम् ॥ हेम्नाचैवमणिर्भातिमणिनाहेमएवच ॥ ५ ॥ एवंचसमयेतस्ययज्जातंश्रूयतामिति ॥ सर्वास्वपिचपत्नीषुएकाप्रियतमायथा ॥ ६ ॥ रोहिणीनामयाप्रोक्तातथाऽन्यानकदाचन ॥ अन्याश्चदुःखमापन्नाःपितरंशरणंययुः ॥ ७ ॥ तदातस्मैचयद्दुःखंताभिर्निवेदितंतथा ॥ दक्षोऽपिचतथाश्रुत्वादुःखंचप्राप्तवांस्तदा ॥ ८ ॥

दर्शयति ॥ यथाबुद्धीत्यादि ॥ सर्वपदसंकोचेकारणमाह ॥ एतेषामिति ॥ २ ॥ तत्रकथांप्रस्तौति ॥ सप्तविंशतीति ॥ ३ ॥ तेनेति ॥ तेनदक्षप्रजापतिनाऽश्विन्याद्याःकन्यकाःचंद्रमसेदत्ताःभार्यात्वायार्पिताइत्यर्थः ॥ ४ ॥ परस्परंशोभनेदृष्टांतमाह ॥ हेम्नेति ॥ ५ ॥ सर्वास्विति ॥ सर्वास्वश्विन्यादिषुपत्नीषुमध्ये ॥ निर्धारणेसप्तमी ॥ यारोहिणीनामभार्याप्रोक्तासैकैवचंद्रमसःप्रियतमाऽऽसीन्नान्येतिसंबंधः ॥ ६ ॥ ७ ॥ तदेति ॥ तस्मैदक्षायताभिरश्विन्यादिभिः ॥ ८ ॥ ॥ ॥ ॥ ॥

समागत्येति ॥ विज्ञापयत्प्रार्थयतेत्यर्थः ॥ अडभावआर्षः ॥ दक्षःकिंविज्ञापितवानितितदाह ॥ विमलइति ॥ ९ ॥ आश्रितेष्विति ॥ अबलाजनेष्वित्यर्थः ॥ तवेतिकर्तरिषष्ठी ॥ १० ॥ जगामेति ॥ निश्चयंनिश्चिततताम् ॥ भाविसंकल्परूपनिश्चयंवा ॥ ११ ॥ चंद्रस्यदक्षवचनाकरणेकारणमाह ॥ भावीति ॥ यस्यपुरुषस्यभाविभविष्यत्शुभंकल्याणंभवितव्यंस्यात्तस्यपुरुषस्यभाविशुभंभविष्यत्सुखजनककर्मेत्यर्थः ॥ इदानींप्राप्तंभवति ॥ १२ ॥ अन्वयमुक्त्वाव्यतिरेकमाह ॥ यदेति ॥ चंद्रइति ॥ चंद्रोबलवद्भाविभाविफलप्रदंतद्वचोदक्षवाक्यंनमेनेनस्वीकृतबान् ॥ तत्तद्दैवप्रसरस्यानपह्नवत्वादितिभावः ॥ १३ ॥ द

समागत्यतदादक्षश्चंद्रंविज्ञापयत्तदा ॥ विमलेचकुलेत्वंचसमुत्पन्नःकलानिधिः ॥ ९ ॥ आश्रितेषुचसर्वेषुन्यूनाधिक्यं कथंतव ॥ नकर्तव्यंत्वयातासुन्यूनाधिक्यंतथापुनः ॥ १० ॥ दक्षश्चैवंचसंप्रार्थ्यचंद्रंजामातरंस्वयम् ॥ जगाममंदिरं स्वीयंनिश्चयंपरमंगतः ॥ ११ ॥ चंद्रोऽपिवचनंतस्यनचकारविमोहितः ॥ भाविशुभंयदायस्यतस्यभाविशुभंतदा ॥ ॥ १२ ॥ यदानजायतेभाविकथंतस्यशुभंभवेत् ॥ चंद्रोऽपिबलवद्भावितदामेनेनतद्वचः ॥ १३ ॥ रोहिण्यांचसमासक्तोनान्यांमेनेकदाचन ॥ दक्षोऽपिपुनरागत्यस्वयंदुःखसमन्वितः ॥ १४ ॥ श्रूयतांतुमयापूर्वंप्रार्थितोबहुधातथा ॥ नमानितंत्वयायस्मात्तस्मात्त्वंचक्षयीभव ॥ १५ ॥ इत्युक्तेचैवचंद्रोऽपिक्षयीजातःक्षणादिह ॥ किंकर्तव्यंक्वगंतव्यंदुःखितस्तत्क्षणादिह ॥ १६ ॥ हाहाकारस्तदाह्यासीच्चंद्रेचक्षीणतांगते ॥ देवाश्चदुःखिताःसर्वेऋषयश्चपुरातनाः ॥ ॥ १७ ॥ गंधर्वाप्सरसश्चैवकिंकार्यंहाकथंभवेत् ॥ इतिदुःखंसमापन्नादेवाइंद्रादयस्तदा ॥ १८ ॥ विज्ञापिताश्चचंद्रेणब्रह्माणंशरणंययुः ॥ गत्वातेतुतदाप्रोचुस्तेदेवाश्चतदापुनः ॥ १९ ॥ वृत्तांतंचतदीयंवैब्रह्मणेतंन्यवेदयन् ॥ ब्रह्मापितद्वचःश्रुत्वाअहोदुष्टंकथंकृतम् ॥ २० ॥ ॥ ॥ ॥ ॥

क्षइति ॥ चंद्रमकथयदितिशेषः ॥ १४ ॥ किमकथयदितितदाह ॥ श्रूयतामिति ॥ दक्षश्चंद्रंशशापेत्याह ॥ नमानितमिति ॥ मद्वचनमितिशेषः ॥ १५ ॥ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ब्रह्मेति ॥ ब्रह्मातद्वचोदेववाक्यंश्रुत्वावददितिशेषः ॥ किंतदवददितितदाह ॥ अहोइति ॥ दुष्टंकार्यमितरपत्नीष्वुदासरूपंकथंकृतंचंद्रेणेतिशेषः ॥ २० ॥ ॥ ॥ ॥

चंद्रःसर्वदादुष्टस्वभावइतिब्रह्माह ॥ चंद्रइति ॥ दक्षइति ॥ दक्षश्चंद्रविषयेकथंकृतवान् ॥ कमुपायंकृतवानितिभावः ॥ पूर्वंकदाचित्दुष्टेनचंद्रेणवहुतरमत्यंतं दुष्टंकार्यंकृतमिति ॥ २१ ॥ चंद्रस्यदुष्टस्वभावमाह ॥ वृहस्पतेरिति ॥ वृहस्पतेःपत्नीनाम्नातारादुष्टेनचंद्रेणहृताऽपहृता ॥ २२ ॥ २३ ॥ मयेति ॥ ब्रह्मणेत्यर्थः ॥ ददाविति ॥ वृहस्पतयइतिशेषः ॥ तामिति ॥ तत्तदासवृहस्पतिस्तांपत्नींतारांगर्भवर्तिचंद्रकर्तृकगर्भयुतांज्ञात्वाऽहमेनांनगृण्हामीतिवचोवाक्यमुक्तवानितिशेषः ॥ तदाऽस्माभिर्वारितःअग्रहणेदुराग्रहादितिशेषः॥सवृहस्पतिस्तारकांजग्राहेतिसंवंधः॥२४॥ग्रहणप्रकारमाह ॥ यदीति ॥ तारायदितंगर्भंजहातित्यजतीत्युक्तातत्तदैनांतारांसवृहस्पतिरग्रहीत् ॥ २५ ॥ गर्भइति ॥ मयाब्रह्मणागर्भेतारयात्याजितेसतितारांप्रत्युक्तम् ॥ कस्येति ॥ हेतारेअयंगर्भःकस्येति ॥ कर्तरिषष्ठी॥ ततस्तारयाचचउक्तमयंगर्भःसोमस्येति ॥२६॥ पश्चादिति ॥ पश्चात्ततोमयावारितेनाग्रहणेनिषिद्धेनग्रहणायप्रवर्तितेनेत्यर्थः ॥ तेनवृहस्पतिनासातारागृहीतेतिसंवंधः ॥ चरित्राणिदुष्टचरितानि ॥२७॥ प्रकृतमाह ॥ इदानीमिति ॥ यच्छापजन्यक्षयित्वंजातंतज्जातमेवनान्यथानविपरीतंभवेदतइदानींकथंक्रियतेकोऽसावुपायःक्रियतइत्यर्थः ॥ २८ ॥ चंद्रस्यक्षयित्वनिवारणार्थंशिवाराधनरूपोपायमाह ॥ अतःपरमिति ॥ २९ ॥ प्रभासकेप्रभासक्षेत्रे ॥ ३० ॥ ३१ ॥

चंद्रस्तुसर्वदादुष्टोदक्षश्चकृतवान्कथम् ॥ पूर्वंदुष्टेनदुष्टंचकृतंबहुतरंपुनः ॥ २१ ॥ श्रूयतामृषयःश्रेष्ठाश्चंद्रकृत्यंपुरातनम् ॥ बृहस्पतेर्गृहेगत्वातारादुष्टेनवैहृता ॥ २२ ॥ हृत्वातारांपुनश्चैवयुद्धायसमुपस्थितः ॥ समाश्रित्यतदादैत्यान् स्पर्द्धंदेवैश्चकारह ॥ २३ ॥ मयाचैवाऽत्रिणाचैवनिषिद्धस्तारकांददौ ॥ तांचगर्भवतींसोऽपिनगृण्हामीतितद्वचः ॥ ॥ २४ ॥ अस्माभिर्वारितःसोपिजग्राहतारकांतदा ॥ यदिगर्भंजहातीहतदेनांचाग्रहीत्पुनः ॥ २५ ॥ गर्भंमयापुनस्तत्रत्याजितेऋषिसत्तमाः ॥ कस्याऽयंचपुनर्गर्भःसोमस्येतिवचःपुनः ॥ २६॥ पश्चात्तेनगृहीतासामयाचवारितेनच ॥ एवंविधानिचंद्रस्यचरित्राण्यप्यनेकशः ॥ २७ ॥ वर्ण्यंतेकिंपुनस्तानिइदानींक्रियतेकथम् ॥ यज्जातंतत्तुतज्जातंनाऽन्यथाभवतिध्रुवम् ॥ २८ ॥ अतःपरंशुभेक्षेत्रेमृत्युंजयविधानतः ॥ शिवमाराधयेत्तत्रदेवेशंचप्रभानिधिम् ॥ २९ ॥ शंकरंलोककर्तारंभजेच्चंद्रःप्रभासके ॥ प्रसन्नश्चशिवःपश्चाद्दक्षयंचकरिष्यति ॥ ३० ॥ इतिश्रुत्वावचस्तस्माद्ब्रह्मणःपरमात्मनः ॥ इंद्राद्यादेवताःसर्वाऋषयश्चपुरातनाः ॥ ३१ ॥

प्रभासइति ॥ गर्तमवटंसरस्वत्यांचक्रुः ॥ सरस्वत्याअधोमुखवहनादितिभावः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ समावृत्येति ॥ प्रभुःशिवःसमावृत्यस मागत्यप्रत्यक्षीभूयेत्यर्थः ॥ ३६ ॥ शिवोवाक्ति ॥ वरमिति ॥ ३७ ॥ ३८ ॥ शिवोवरंददाति ॥ पक्षइति ॥ हेचंद्रपक्षेकृष्णपक्षेदिनेदिनेप्रतिदिनंतेकलाक्षी यतेक्षीयतां ॥ ३९ ॥ पुनरिति ॥ पक्षेपुनःशुक्लपक्षेतुताःकलानिरंतरंवर्धतांवर्धतां ॥ एकवचनमार्षम् ॥ ४० ॥ ४१ ॥ देवाःशिवंप्रार्थयंते ॥ स्वामिन्निति ॥

गृहीत्वाचतथाचंद्रंदक्षंचाश्वास्यवैतदा ॥ प्रभासेचततोगत्वागर्तंचक्रुस्तथापुनः ॥ ३२ ॥ आवाह्यतीर्थवर्याणिसरस्वत्यामतःपरम् ॥ पार्थिवेनतदापूजामृत्युंजयविधानतः ॥ ३३ ॥ तेदेवाश्चतदासर्वेऋषयोनिर्मलाशयाः ॥ स्थाप्यचंद्रंप्रभासेचस्वंस्वंधामययुर्मुदा ॥ ३४ ॥ चंद्रेणचतपस्तप्तंषण्मासंचनिरंतरम् ॥ मृत्युंजयेनमंत्रेणपूजितोवृषभध्वजः ॥ ३५ ॥ दशकोट्याचमंत्रैर्वैसमावृत्यस्वयंप्रभुः ॥ प्रसन्नोभगवान्देवःशंकरोलोकशंकरः ॥ ३६ ॥ वरंवृणीष्वभद्रंवैमनसोयत्समीप्सितम् ॥ चंद्रउवाच ॥ यदिप्रसन्नोदेवेशकिमसाध्यंभवेन्मम ॥ ३७ ॥ तथापिमेशरीरस्यक्षयंवारयशंकर ॥ क्षंतव्योमेऽपराधश्चकल्याणंक्रियतांत्वया ॥ ३८ ॥ इत्युक्तेचतदातेनशिवोवचनमब्रवीत् ॥ शिवउवाच ॥ पक्षेचक्षीयतेचंद्रकलातेचदिनेदिने ॥ ३९ ॥ पुनश्चवर्द्धतांपक्षेताःकलाश्चनिरंतरम् ॥ एवंसतितदादेवाहर्षनिर्भरमानसाः ॥ ४० ॥ ऋषयश्चतदासर्वेसमाजग्मुःपरस्परम् ॥ आगत्यचतदासर्वेचंद्रेचाऽऽशिषमावहन् ॥ ४१ ॥ शिवंचैवतुसंप्रार्थ्यस्वामिंस्त्वंहिस्थिरोभव ॥ उमयासहितःशंभुश्चंद्रेणसंस्कृतःपुरा ॥ ४२ ॥ निराकारश्चसाकारःपुनश्चैवाऽभवत्पुरा ॥ प्रसन्नश्चैवदेवानांक्षेत्रमप्यन्नहेतवे ॥ ४३ ॥ चंद्रस्ययशसेतत्रनाम्नाचंद्रस्यवैस्वयम् ॥ सोमेश्वरश्चनामासीद्विख्यातंभुवनत्रये ॥ ४४ ॥ धन्योऽयंकृतकृत्योऽयंयन्नाम्नाशंकरःस्वयम् ॥ स्थितश्चजगतांनाथःपावयन्जगतीतलम् ॥ ४५ ॥ तत्कुंडंचैवतैस्तत्रसर्वैश्चैवप्रतिष्ठितम् ॥ शिवेनब्रह्मणातत्रह्यभिव्यक्तंतुतत्पुनः ॥ ४६ ॥

हेस्वामिन्नत्रैवत्वंस्थिरोभवतिष्ठेत्यर्थः ॥ संस्कृतोमंत्रादिनास्थापितः ॥ ४२ ॥ ४३ ॥ सोमेश्वरइतिनामभवनेकारणमाह ॥ चंद्रस्येति ॥ ४४ ॥ चंद्रकृतसुकृतफलंप्रदर्शयति ॥ धन्यइति ॥ शंकरःस्वयंयन्नाम्नाचंद्रनाम्नासोमेश्वरनाम्नेत्यर्थः ॥ स्थितः ॥ ४५ ॥ तत्कुंडमिति ॥ चंद्रकुंडाख्यंतीर्थमित्यर्थः ॥ ४६ ॥

चंद्रकुंडेस्नानफलमाह ॥ तत्रेत्यादिना ॥४७॥४८॥ प्रभासक्षेत्रप्रदक्षिणाफलमाह ॥ प्रभासमिति ॥ पृथिवीसंभवंपृथिवीपरिक्रमणजानितम् ॥४९॥५०॥५१॥ परिक्रम्येति॥प्रदक्षणीकृत्येत्यर्थः ॥ प्रशंसयन्निितिचंद्रविशेषणम्॥स्वकीयंकार्यंपृथिवीपरिभ्रमणादिकम्॥५२॥उपसंहरति ॥ एवमिति ॥५३॥सोमेश्वरस्योत्पत्तिमुक्त्वामल्लिकार्जुनस्योत्पत्यादिकमाह ॥ अतःपरमिति ॥ मल्लिकार्जुनसंभवंमल्लिकार्जुनाख्यज्योतिर्लिंगस्योत्पत्तिम् ॥ ५४ ॥ पूर्वमिति ॥ षट्त्रिंशेऽध्यायइत्यर्थः ॥ कथयामिविस्तरेणेतिशेषः ॥५५॥ शिवःपार्वतींप्रत्याह ॥ आयातीति ॥५६॥ सेति ॥ सापार्वतीयदाशिववचनंनमेनेनस्वीकृतवतीतदाशिवेनदेवताः

चंद्रकुंडंप्रसिद्धंचपृथिव्यांपापनाशनम् ॥ तत्रस्नातिनरोयस्तुसर्वपापैःप्रमुच्यते ॥४७॥ रोगाश्चैवक्षयंयांतिह्यसाध्यायेभवंतिहि ॥ तेचसर्वेक्षयंयांतिषण्मासंस्नपनादिह ॥ ४८ ॥ कुष्ठीचजायतेशुद्धःप्रायश्चित्तेकृतेसाति ॥ प्रभासंचपरिक्रम्यपृथिवीसंभवंफलम् ॥४९॥ यद्यत्फलंसमुद्दिश्यकरोतितीर्थमुत्तमं ॥ तत्तत्फलमवाप्नोतिसर्वथानात्रसंशयः ॥५० इतितेऋषयोदेवाःफलंदृष्ट्वातथाविधम् ॥ चंद्रंचैवगृहीत्वाचनमस्कृत्यशिवंमुदा ॥ ५१ ॥ परिक्रम्यचतत्तीर्थंययुस्तेचप्रशंसयन् ॥ चंद्रश्चाऽपिस्वकीयंचकार्यंचक्रेपुरातनम् ॥ ५२ ॥ इतिसर्वंसमाख्यातंसोमेशस्यकथानकम् ॥ एवंसोमेश्वरंलिंगंसमुत्पन्नंमुनीश्वराः ॥ ५३ ॥ यःशृणोतितदुत्पत्तिंसचपापैःप्रमुच्यते ॥ अतःपरंप्रवक्ष्यामिमल्लिकार्जुनसंभवम् ॥ ५४ ॥ पूर्वंचकथितंयच्चतदहंकथयाम्यहम् ॥ कुमारस्यवियोगेनमाताचागिरिजायदा ॥ ५५ ॥ दुःखिताऽऽसीत्तदाशंभुस्तामुवाचकथंप्रिये ॥ आयातिपुत्रकस्तेचत्यज्यतांदुःखमुत्कटम् ॥ ५६ ॥ सायदाचनतन्मेनेप्रेषितादेवतास्तदा ॥ ऋषयश्चैवगंधर्वाअप्सरसोमुदान्विताः ॥ ५७ ॥ तेसर्वेचसमाजग्मुःकुमारस्यास्यहेतवे ॥ विज्ञाप्यबहुधाह्येनंपरावृत्यपुनर्गताः ॥ ५८ ॥ तदाचगिरिजादेवीविरहंपुत्रसंभवम् ॥ शंभुश्चपरमंदुःखंप्राप्यचाऽशुस्वपुत्रकम् ॥ ५९ ॥ पुत्रश्चाऽपिततोदूरंयोजनत्रयमेवच ॥ गतश्चदूरतस्तस्मात्क्रौंचेचपर्वतेशुभे ॥ ६० ॥ ॥

प्रेषिताःकुमाराव्हानार्थमितिभावः ॥ ५७ ॥ तइति ॥ हेतवेआव्हानरूपप्रयोजनार्थम् ॥ विज्ञाप्येति ॥ तेदेवाएनंकुमारंबहुधाविज्ञाप्यसंप्रार्थ्याऽऽगमनार्थम् ॥ तस्यागमनविषयइच्छाभावंज्ञात्वानष्टाशाःसंतःपरावृत्यस्वस्थानंगताइत्यर्थः ॥ ५८ ॥ तदेति ॥ विरहंवियोगजनितदुःखंप्रापेतिशेषः ॥ शंभुःस्वपुत्रकंपुत्रविरहप्रयुक्तम् ॥ अथवास्वपुत्रकमलब्ध्वेतिशेषः ॥ परममत्यंतंदुःखंप्राप्यस्थितइतिसंबंधः ॥ ५९ ॥ ६० ॥ ॥

ताविति तौ पार्वतीपरमेश्वरौज्योतिषांरूपस्वरूपंतथातत्समाश्रितौ ॥ मल्लिकार्जुनसंज्ञितमित्युत्तरत्रलिंगविशेषणम् ॥६१॥६२॥ मल्लिकार्जुनलिंगदर्शनफल माह ॥ तल्लिंगमिति ॥ ६३ ॥ जननीति ॥ फलंदुःखरूपम ॥ ६४ ॥ द्वितीयंसोमेश्वराद्वितीयंज्योतीरूपंमल्लिकार्जुनाख्यंज्योतिर्लिंगंलोकहेतवेलोकक ल्याणार्थंकथितंनिरूपितमित्यर्थः ॥ ६५ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहिताटीकायांसारबोधिन्यांपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ दूषणाख्यासुरे णात्रधर्मेविप्लाविते शिवः ॥ उज्जयिन्यांमहाकालःप्रादुर्भूयजघानतम् ॥ १ ॥ नारदप्रेरितोविंध्योमेरुवद्वर्धनेच्छया ॥ शिवंप्रसादयामासतदोंकारेश्वरोभवत्

तौचतत्रसमासीनौज्योतीरूपंसमाश्रितौ ॥ तद्दिनंचसमारभ्यमल्लिकार्जुनसंज्ञितम् ॥ ६१ ॥ लिंगंचैवशिवस्यैवसिद्धं चभुवनत्रये ॥ आसीत्तत्रमहान्देवोज्योतीरूपःसनातनः ॥ ६२ ॥ तल्लिंगंचतथादृष्ट्वासर्वपापैःप्रमुच्यते ॥ दुःखंचदूर तोयातिसुखमात्यंतिकंलभेत् ॥ ६३ ॥ जननीगर्भसंभूतंफलमाप्नोतिवैपुनः ॥ धनंधान्यंसमृद्धिश्चप्रतिष्ठारोग्यमेवच ॥ ६४ ॥ अभीष्टंसकलंतस्यजायतेनात्रसंशयः ॥ द्वितीयंज्योतीरूपंचकथितंलोकहेतवे ॥ ६५ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहितायांपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ७ ॥ ऋषयऊचुः ॥ सूतसर्वंविजानासिवस्तुव्यासप्रसादतः ॥ ज्योतिषां चकथांश्रुत्वातृप्तिर्नैवविजायते ॥ १ ॥ तस्मात्त्वयाविशेषेणतदेवकथ्यतांपुनः ॥ सूतउवाच ॥ धन्योऽहंकृतकृत्योहंश्रीम तांसंगयोगतः ॥ २ ॥ श्रूयतांकथयिष्यामिकथांपापप्रणाशिनीम् ॥ अवंतीनगरीरम्यामुक्तिदासर्वदेहिनाम् ॥ ३ ॥ क्षि प्राचैवमहापुण्यावर्ततेलोकपावनी ॥ तत्रासीद्ब्राह्मणश्रेष्ठःसर्वकर्मपरायणः ॥ ४ ॥ वेदाध्ययनकर्ताचवेदकर्मरतःसदा ॥ अग्न्याधानसमायुक्तःशिवपूजारतःसदा ॥ ५ ॥

॥ २ ॥ सूतेति ॥ सर्वंत्रैकालिकंवस्तुपदार्थमात्रं ॥ ज्योतिषामिति ॥ पूर्वोक्तज्योतिर्लिंगानामित्यर्थः ॥ १ ॥ श्रीमतांभवादृशांसाधूनाम् ॥ २ ॥ अवंती उज्जयिनी ॥ मुक्तिदेति ॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायिकाइत्युक्तेः ॥ सर्वदेहिनामिति ॥ कीटपतंगा दीनामपीत्यर्थः ॥ ३ ॥ क्षिप्रेति ॥ तत्रत्याक्षिप्रानाम्नीमहानदीत्यर्थः ॥ तत्रअवंतीनगर्यां ॥ ४ ॥ वेदेति ॥ नकेवलमध्येताऽपितुवेदोदितकर्मकृदपीत्याह ॥ वेदकर्मेति ॥ पूर्वोक्तविशेषणानिविद्वणोति ॥ अग्न्याधानेति ॥ आहिताग्निरित्यर्थः ॥ ५ ॥ ॥ ॥ ॥

पार्थिवींमृन्मयीं ॥ सर्वेति ॥ नित्यनैमित्तिकादिसर्वकर्मफलंपापनाशपशुपुत्रादिकंप्राप्येत्यर्थः ॥ ६ ॥ सतांब्रह्मनिष्ठानांसाधूनांगतिपदंसमालेभेप्राप्तवांस्तत्र हेतुगर्भंविशेषणमाह ॥ सम्यगिति ॥ सम्यग्ज्ञानंब्रह्मापरोक्षविज्ञानंतत्परइत्यर्थः ॥ तत्पुत्रास्तस्यब्राह्मणस्यपुत्रास्तादृशाःपितृसदृशाः ॥ ७ ॥ तेषांनामा न्याह ॥ देवप्रियइति ॥ श्रेष्ठोज्येष्ठः ॥ धर्मवादीति ॥ धर्मवादीचतुर्थकइतिपाठांतरम् ॥ ८ ॥ धर्माणांवेदोदितकर्मणांधारकाःकर्तारः ॥ अनवमाइति ॥ अन्यूनाइत्यर्थः ॥ यतोधर्माश्रयास्तइतिभावः ॥ ९ ॥ तेषांब्राह्मणतत्पुत्राणां ॥ ऐधतअवर्धत ॥ एधवृद्धौ ॥ शुक्लपक्षइति ॥ १० ॥ गुणाइति ॥ दयासर्व भूतेषुक्षांतिरनसूयाशौचमनायासोमांगल्यमकार्पण्यमस्पृहाइत्यादयःगौतमाद्युक्तागुणाइत्यर्थः॥ ब्रह्मेति ॥ याऽवंतीतिप्रसिद्धानगरीसाब्राह्मणतेजःप्रचुराभव

पार्थिवींप्रत्यहंमूर्तिंपूजयामासवैद्विजः ॥ सर्वकर्मफलंप्राप्यवेदप्रियद्विजस्तदा ॥ ६॥ सतांगतिंसमालेभेसम्यक्ज्ञान परायणः॥ तत्पुत्रास्तादृशात्यासंश्चत्वारऋषिसत्तमाः ॥ ७॥ देवप्रियश्चश्रेष्ठोवैप्रियमेधस्ततःपरः॥ तृतीयःसुव्रतोनाम धर्मवादीचसुव्रतः ॥ ८ ॥ तेधर्मधारकात्यासन्शिवपूजापरायणाः॥ पितुरनवमानित्यंधर्माश्रयास्तथाशुभाः॥ ९॥ ते षांपुण्यप्रतापाच्चपृथिव्यांसुखमैधत॥ शुक्लपक्षेयथाचंद्रोवर्धतेचनिरंतरम्॥ १०॥ तथातेषांगुणास्तत्रवर्धतेस्मसुखाव हाः॥ ब्रह्मतेजोमयीसावैनगरीयाऽभवत्तदा ॥ ११ ॥ एतस्मिन्नंतरेतत्रयज्जातंश्रूयतांपुनः॥ पर्वतेरत्नमालेचदूषणोवैम हासुरः॥ १२॥ बलवान्दैत्यराजश्चधर्मद्वेषीनिरंतरम् ॥ ब्रह्मणोवरदानाच्चजगत्तुच्छीकरोतिच ॥ १३॥ पृथिव्यांवेदध र्माश्चस्मृतिधर्माश्चसर्वशः ॥ स्फोटितास्तेनदुष्टेनसिंहेनचशशाइव॥ १४॥ यावंतोवेदधर्माश्चतावंतोदूरतःकृताः॥ तीर्थे तीर्थेतदाक्षेत्रेअरण्येचैवयेपुनः॥ १५॥ तेसर्वेदूरतोनीतास्तेनैकेनदुरात्मना॥ नदृष्टःक्वापिधर्मोवैवेदसंभवएवच॥ १६॥

दित्यन्वयः ॥ ११ ॥ अत्रत्यंकथांतरमाह ॥ एतस्मिन्निति ॥ रत्नमालेरत्नमालनामके ॥ दूषणस्तदाख्यः ॥ १२ ॥ धर्मद्वेषीवेदोदितधर्मद्वेषीआसीदितिशे षः ॥ ब्रह्मणःपितामहस्यवरदानात्प्रसादलाभात् ॥ तुच्छीकरोतितृणीचकारेत्यर्थः ॥ १३ ॥ वेदधर्माअग्निहोत्रादयःस्मृतिधर्मागर्भाधानसंस्कारादिसदाचार रूपाः सर्वशःसर्वप्रकारेणस्फोटिताःविनाशिताःतेनदूषणनामकदैत्येन ॥ अत्रदृष्टांतमाह ॥ सिंहेनेति ॥ शशाःससाइतिभाषयाप्रसिद्धाःक्षुद्रजीवाः ॥ १४ ॥ सर्वतीर्थक्षेत्रादिषुतेनधर्मलेशोपिनस्थापितइत्याह ॥ यावंतइति ॥ १५ ॥ वेदधर्मसंभवइति ॥ वेदोऽखिलोधर्ममूलमितिमनूक्तेः ॥ १६ ॥

तदातेनकिमपिविचिंत्ययत्कृतंतच्छ्राव्यमित्याह ॥ अवंतीति ॥ तत्रतस्मिन्देशे ॥ १७ ॥ यत्तेनकृतंतदाह ॥ बहुसैन्येति ॥ ब्राह्मणान्पूर्वोक्तान् ॥ तान्भिर्त्सयति ॥ किमिति ॥ १८ ॥ स्ववचनापरिपालनेब्राह्मणानांभयंदर्शयितुंस्वभृत्यानाह ॥ सर्वइति ॥ हेदैत्यसत्तमाःमयासर्वेदेवाइंद्रादयःराजानःपार्थिवाःवशीकृताःस्वविधेयतांप्रापिताःदुर्बलाब्राह्मणाभवद्भिःस्ववशेकृत्वाकिंजेतुंनशक्याअपितुशक्याएवेत्यर्थः ॥ १९ ॥ एवंस्वामिवचनंश्रुत्वातेदैत्याःकिमकुर्वंस्तदाह ॥ युष्माकमितिशेषः ॥ यदीति ॥ धर्मंशिवस्येति ॥ शिवोपासनारूपंधर्ममित्यर्थः ॥ देवानामिति ॥ देवेष्टसंपादियज्ञादिकमित्यर्थः ॥ त्यक्त्वानाशयित्वासुखविभागिनःसुखिनःभविष्यथेतिशेषः ॥ २० ॥ अन्यथाधर्मत्यागाभावे ॥ जीवनेप्राणधारणे ॥ वासेसुखेनावस्थाने ॥ संशयइति ॥ जीवना

अवंतीनगरीरम्यातत्राऽद्दश्यतवैपुनः ॥ इतिविचार्यतेनेहयत्कृतंश्रूयतामतः ॥ १७ ॥ बहुसैन्यसमायुक्तोब्राह्मणान्समुपाययौ ॥ किमेतेब्राह्मणाःपुष्टानकुर्वंतिवचोमम ॥ १८ ॥ सर्वेदेयामयालोकेराजानश्चवशीकृताः ॥ वशेकिंब्राह्मणाःशक्यानजेतुंदैत्यसत्तमाः ॥ १९ ॥ यदिजीवितुमिच्छास्यात्तदाधर्मंशिवस्यच ॥ देवानांचैवधर्मंचत्यक्त्वासुखविभागिनः ॥ २० ॥ अन्यथाजीवनेवासेसंशयश्चभविष्यति ॥ इतिनिश्चित्यतेदैत्याश्चत्वारोवैमहाबलाः ॥ २१ ॥ चतुर्दिक्षुतथायाताःप्रलयेचयथापुरः ॥ तेब्राह्मणास्तथाश्रुत्वावचनंरक्षसांचहि ॥ २२ ॥ नदुःखंलेभिरेतत्रशिवध्यानपरायणाः ॥ धैर्यंसमाश्रितास्तेचरेखामात्रंततोद्विजाः ॥ २३ ॥ नचेलुःपरमाद्ध्यानाद्वराकाःकेशिवाग्रतः ॥ एतस्मिन्नंतरेतैस्तुव्याप्तासानगरीशुभा ॥ २४ ॥ लोकाश्चपीडितास्तेनब्राह्मणान्समुपाययुः ॥ स्वामिनःकिंचकर्तव्यंदुष्टाश्चसमुपागताः ॥ ॥ २५ ॥ हिंसिताबहवोलोकाआगताश्चसमीपतः ॥ तेषांचवचनंश्रुत्वाह्यूचुस्तेब्राह्मणाःपराः ॥ २६ ॥

दिकंभवेन्नवेतिसंशयइत्यर्थः ॥ इतीति ॥ ब्राह्मणान्प्रतिवक्तुमितिशेषः ॥ निश्चित्यएवंकृतेसमत्स्वामिप्रियंभवेदेवेतिविचार्य ॥ २१ ॥ चतुरिति ॥ तेचत्वारोदैत्याःप्रलयसमयइवजगन्नाशयितुंचतसृषुदिक्षुपुरःप्रयाताइत्यर्थः ॥ तइति ॥ तेपूर्वोक्ताः ॥ २२ ॥ दुःखालाभेहेतुगर्भंब्राह्मणविशेषणमाह ॥ शिवेति ॥ रेखामात्रंईषदपीत्यर्थः ॥ अस्याग्रिमचलनक्रियायामन्वयः ॥ २३ ॥ परमेति ॥ प्ररमेश्वरध्यानबलादेवनव्यग्राजाताइत्यर्थः ॥ वराकाःक्षुद्राःपूर्वोक्तदैत्याःशिवस्याग्रेकेकिंबलाः ॥ इदंतेषामव्यग्रत्वेहेत्वंतरंदार्शितम् ॥ तैर्दैत्यैः ॥ सानगरीअवंती ॥ २४ ॥ तेनदैत्येन ॥ समुपाययुरिति ॥ लोकाइत्यनुषज्यते ॥ तेचब्राह्मणान्प्रार्थयामासुरित्याह ॥ स्वामिनइति ॥ दुष्टाःदैत्याः ॥ २५ ॥ तेषांलोकानाम् ॥ २६ ॥ ॥

ब्राह्मणाःकिमूचुस्तदाह ॥ श्रूयतामिति ॥ परभयावहंशत्रुपीडाजनकंबलंशारीरंसैन्यंवानविद्यतेअस्माकमितिशेषः ॥ तथाशस्त्राणिखड्गादीनिनसंतियैः शस्त्रैःतेअसुराविमुखाभवेयुरितिशेषः ॥ २७ ॥ एवंतेब्राह्मणाःस्वासामर्थ्यमुक्त्वापुनर्धैर्येणाहुः ॥ सामान्यस्येति ॥ पीडावारणेऽसमर्थस्याप्याश्रयस्य रक्षितुर्मानोरक्षणाभिमानोभवेत्किमुतसर्वेश्वरस्येत्याह ॥ किंपुनरिति ॥ २८ ॥ तदेवशिवंप्रतिप्रार्थयंते ॥ शिवइति ॥ स्थैर्यंधैर्यं ॥ पार्थिवस्यमृन्मयलिंगस्यपूजांकृत्वेतिसंबंधः ॥ २९ ॥ तथाचेतोमनःसम्यक्कृत्वाप्रणिधायेत्यर्थः ॥ कुंभेति ॥ कुंभकपूरकरेचकैर्नासिकाद्वारावाय्वाकर्षणस्तंभननिर्गमनव्यापारैःप्राणायामपराःब्राह्मणाःआसन्नितिशेषः ॥ ३० ॥ दृष्ट्वेति ॥ ब्राह्मणचरित्रमितिशेषः ॥ बध्यतामितीति ॥ गर्जितामितिशेषः ॥ ध्यानमार्गपरायणैः

श्रूयतांविद्यतेनैवबलंपरभयावहम् ॥ नशस्त्राणितथासंतियैश्चैतेविमुखाःपुनः ॥२७॥ सामान्यस्याऽपिमानोवैआश्रयस्यभवेदिह ॥ किंपुनश्चसमर्थस्यशिवस्यैवभवेन्नहि ॥ २८ ॥ शिवोरक्षांकरोत्वद्यनाऽन्यथाशरणंशिवात् ॥ इतिस्थैर्यंसमास्थायपूजांतुपार्थिवस्यच ॥ २९ ॥ कृत्वाचेतस्तथासम्यक्स्थिताध्यानपरायणाः ॥ प्राणायामपरास्तेच कुंभपूरकरेचकैः ॥ ३० ॥ दृष्ट्वादैत्येनतावच्चहन्यतांबध्यतामिति ॥ तच्छ्रुतंचतदानैवध्यानमार्गपरायणैः ॥ ३१ ॥ तावच्चपार्थिवेस्थानेगर्तमासीत्सशब्दकम् ॥ महाकालःसमुत्पन्नोदृष्ट्वातांतादृशींगतिं ॥ ३२ ॥ मायांतुब्राह्मणानांहिसमीपंदूरतोव्रज ॥ इत्युक्त्वाहुंकृतेनैवभस्मसात्कृतवांस्तदा ॥ ३३ ॥ कियत्सैन्यंहतंतेनकिंचित्सैन्यंपलायितम् ॥ दूषणश्चहतस्तेनशिवेनपरमात्मना ॥ ३४ ॥ सूर्यंदृष्ट्वायथायातितमश्चसंक्षयंपुनः ॥ तथैवचशिवंदृष्ट्वासैन्यंनाशमुपागमत् ॥ ३५ ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह ॥ ब्राह्मणांश्चसमाश्वास्यप्रसन्नोहिशिवःस्वयम् ॥ ३६ ॥ तेपिदेवंशिवंप्रोचुर्मुक्तिंदेवप्रयच्छनः ॥ अत्रैवलोकरक्षार्थंस्थातव्यंहिशिवत्वया ॥ ३७ ॥ ॥

ब्राह्मणैरितिशेषः ॥ ३१ ॥ सशब्दकंशब्दयुक्तम् ॥ तस्माद्गर्तात्तादृशींदीनजनदुर्दशारूपांगतिंदृष्ट्वामहाकालःशिवसमुत्पन्नःप्रादुर्भूतइतिसंबंधः ॥ ३२ ॥ ततःशिवःकिमप्युक्त्वादैत्यंनाशितवानित्याह ॥ मेति ॥ रेदैत्याब्राह्मणानांसमीपंनैवायांत्वितिदैत्यभृत्यान्प्रत्युक्तिः ॥ दूरतइति ॥ इयंसाक्षात्तंदैत्यंप्रति ॥ भस्मसादिति ॥ दूषणासुरमितिशेषः ॥ ३३ ॥ तेनशिवेन ॥ ३४ ॥ तत्सैन्यंकथंनष्टमित्यत्रदृष्टांतमाह ॥ सूर्यमिति ॥ ३५ ॥ प्रसन्नइति ॥ बभूवेतिशेषः ॥ ३६ ॥ तेपीति ॥ ब्राह्मणाअपीत्यर्थः ॥ अत्रैवअवंत्यामेव ॥ ३७ ॥ ॥ ॥

शिवोपितथैवाकरोदित्याह ॥ इत्युक्तइति ॥ रक्षार्थमिति ॥ भक्तानांरक्षार्थंतस्थावित्यन्वयः ॥ द्विजान्द्विजेभ्यः ॥ ३८ ॥ तैःकीदृशीमुक्तिःप्राप्तेत्यत्राह ॥ द्विजाइति ॥ शिवादन्विति ॥ शिवस्यसमीपइत्यर्थः ॥ क्रोशमात्रंक्रोशपर्यंतम् ॥ ३९ ॥ दुःखकंदुःखंस्वप्नेस्वप्नेपीत्यर्थः ॥ ४० ॥ महाकालसेवयासर्वसिद्धिर्भवतीत्याह ॥ यंयमिति ॥ सेवतेभक्तइतिशेषः ॥ ४१ ॥ ओंकारमिति ॥ ओंकाराकारंयंत्रमित्यर्थः ॥ ४२ ॥ गोकर्णाख्यमिति ॥ दक्षिणदेशेगोकर्णेश्वरइतिप्रसिद्धंशिवलिंगमित्यर्थः ॥ विंध्यकेविंध्यपर्वते ॥ तेनविंध्येन ॥ ४३ ॥ ततोविंध्यःस्वैश्वर्याभिमानंदर्शयाति ॥ मयीति ॥ मानमभिमानं ॥ मानहापराभिमानस्यनाशकः ॥ ४४ ॥ निःश्वस्येति ॥ विंध्याज्ञानजनितखेदेनेतिभावः ॥ श्रुत्वेति ॥ निःश्वासमितिशेषः ॥ किमब्रवीदितितदाह ॥ किमिति ॥ मयिमत्समीपे ॥ ४५ ॥ उच्चतरइति ॥ त्वदपेक्षयेतिशेषः ॥ ४६ ॥ अस्यमेरोर्देवेष्वपिविभागोगणनावर्ततइतिशेषः ॥ मंडलदेवतासुमेर्वाविहनादिदृश्यतेनतथातवास्तीतिभावः ॥ ४७ ॥ ततोविंध्यःसेर्ष्योभूदित्याह ॥ विंध्यश्चेति ॥ जीवितादिकमिति ॥ आदिशब्देनैश्वर्यं ॥ ममेतिशेषः ॥ अमुंमेरुम् ॥ ४८ ॥ ओंकारयंत्रकइति ॥ ओंकाररूपयंत्रइत्यर्थः ॥ तत्रओंकारयंत्रसमीपेपार्थिवींशिवमूर्तिकांकृत्वेतिसंबंधः ॥ ४९ ॥ ॥

इत्युक्तस्तुशिवस्तत्रतस्थौगर्तेसुशोभने ॥ भक्तानांचैवरक्षार्थंदत्वामुक्तिंद्विजांस्तदा ॥ ३८ ॥ द्विजास्तेमुक्तिमापन्नाश्चतुर्दिक्षुशिवादनु ॥ क्रोशमात्रंतदाजातालिंगरूपिणएवच ॥ ३९ ॥ महाकालेश्वरोनामख्यातश्चभुवनत्रये ॥ तंदृष्ट्वादुःखकंस्वप्नेनायातिऋषिसत्तमाः ॥ ४० ॥ यंयंकाममपेक्ष्यैवसेवतेतत्फलंलभेत् ॥ एतत्सर्वंसमाख्यातंश्रूयतांपरमंवचः ॥ ४१ ॥ ओंकारंचयथाह्यासीत्तथाचश्रूयतांपुनः ॥ कस्मिंश्चसमयेचात्रनारदोभगवांस्तदा ॥ ४२ ॥ गोकर्णाख्यंशिवंगत्वाआगतोविंध्यकेस्वयम् ॥ तत्रैवपूजितस्तेनबहुमानपुरःसरम् ॥ ४३ ॥ मयिसर्वंचविद्येतनन्यूनंहिकदाचन ॥ इतिमानंतदाश्रुत्वानारदोमानहातदा ॥ ४४ ॥ निःश्वस्यसंस्थितस्तत्रश्रुत्वाविंध्योऽब्रवीदिदम् ॥ किंन्यूनंचत्वयादृष्टंमयिनिःश्वासकारणम् ॥ ४५ ॥ तच्छ्रुत्वानारदोवाक्यमुवाचश्रूयतांपुनः ॥ त्वयितुविद्यतेसर्वंमेरुरुच्चतरःपुनः ॥ ॥ ४६ ॥ देवेष्वपिविभागोऽस्यनतवाऽस्तिकदाचन ॥ इत्युक्त्वानारदस्तत्रजगामचयथागतम् ॥ ४७ ॥ विंध्यश्चपरितप्तोवैधिगेवजीवितादिकम् ॥ विश्वेश्वरंतथाशंभुमाराध्यचजयाम्यमुम् ॥ ४८ ॥ इतिनिश्चित्यतत्रैवओंकारयंत्रकेस्वयम् ॥ कृत्वाचैवपुनस्तत्रपार्थिवींशिवमूर्तिकाम् ॥ ४९ ॥ ॥ ॥

॥ ५० ॥ तस्मैविंध्यपर्वताय ॥ यथोक्तमिति ॥ सत्यंज्ञानमनंतंब्रह्मनमोहिरण्यबाहवेहिरण्यवर्णायेत्यादिवाक्यैरुक्तमित्यर्थः ॥ ईप्सितमाराध्यत्वेनाप्तुमिष्टम् ॥ ५१ ॥ शिवःप्रसन्नोभूत्वातमाह ॥ ब्रूहीति ॥ यत्तवेप्सितंतन्ममामांप्रतिब्रूहीतिसंबंधः ॥ वृद्धिंदेहवर्धनम् ॥ ५२ ॥ शिवएतद्वरस्यायुक्तत्वंविचारयति ॥ किमिति ॥ एतेनविंध्येनक्रियतेयाच्यतेऽतोमयादीयतेपरंत्वेतन्नयुक्तमितितत्रदोषमाह ॥ नेति ॥ परदुःखायमेरुदुःखायपरसंपदुत्कर्षोहिहीनसंपदंपुरुषंदुःखाकरोतीतिभावः ॥ ५३ ॥ भक्तवात्सल्याच्छिवस्तद्ददावेवेत्याह ॥ तथापीति ॥ दत्तवानिति ॥ अहमितिशेषः ॥ तथाकुर्विति ॥ वर्धनेच्छाचेद्वर्धस्वेतिभावः ॥

आराध्यचतदाशंभुंषण्मासंचनिरंतरम् ॥ नचचालतदास्थानाच्छिवध्यानपरायणः ॥ ५० ॥ तस्मैचदर्शयामासदुर्लभंयोगिनामपि ॥ रूपंयथोक्तंवेदेषुभक्तानामीप्सितंचयत् ॥ ५१ ॥ प्रसन्नश्चतदाशंभुर्ब्रूहिलंचममेप्सितम् ॥ विंध्यउवाच ॥ यदिप्रसन्नोदेवेशवृद्धिंदेहियथेप्सितम् ॥ ५२ ॥ किंकरोमियदैतेनक्रियतेदीयतेमया ॥ नयुक्तंपरदुःखायवरदानंमयाशुभम् ॥५३॥ तथाऽपिदत्तवांस्तत्रयथेच्छसितथाकुरु ॥ एवंचसमयेदेवाऋषयश्चतथाऽमलाः ॥५४॥ संपूज्यशंकरंतत्रस्थातव्यमितिचाऽब्रुवन् ॥ तथैवकृतवान्देवोलोकानांसुखहेतवे ॥ ५५ ॥ ओंकारेचैवयंत्रेवैलिंगमेकंतथापुनः ॥ पार्थिवेचतथारूपेलिंगमेकंतथापुनः ॥ ५६ ॥ एवंद्वयंसमुत्पन्नंलिंगमेकंद्विधाकृतम् ॥ प्रणवेचोंकारश्चनामासीत्ससदाशिवः ॥५७॥ पार्थिवेचैवयज्जातंतदासीदमरेश्वरः ॥ संपूज्यचतदादेवाःसंतुष्यवृषभध्वजम् ॥५८॥ वरान्दत्वाह्यनेकांश्चऋषयोदेवतास्तदा ॥ यएनंपूजयेद्देवंनगर्भेवसतेनरः ॥५९॥ यदभीष्टंफलंतच्चप्राप्नुयान्नात्रसंशयः ॥ इत्युक्त्वाचतदादेवाह्यंतर्ध्यानंगताहिते ॥ ६० ॥ एतत्तेहिसमाख्यातमोंकारसंभवंफलम् ॥ अतःपरंप्रवक्ष्यामिकेदारंपापनाशनम् ॥६१॥ इतिश्रीशिवमहापुराणे०ज्योतिर्लिंगोत्पत्तिवर्णनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

एवंचेति ॥ एतस्मिन्नित्यर्थः ॥ ५४ ॥ ५५ ॥ तत्रभगवान्स्वीयंरूपंद्विधाऽकरोदित्याह ॥ ओंकारइति ॥ ओंकाराख्ययंत्रएकंलिंगमकरोत्पार्थिवेचापरमित्यर्थः ॥ ५६ ॥ तत्रद्वयोर्लिंगयोर्नामनीआह ॥ प्रणवइति ॥ ओंकाराख्ययंत्रओंकारनामासीत्पार्थिवेचामरेश्वरइति ॥ तदासीत्परमेश्वरइतिक्वचित्पाठः ॥ ५७ ॥ संतुष्यसंतोष्य ॥ ५८ ॥ दत्वेति ॥ ऋषयोदेवताश्चस्वभक्तेभ्योवरान्दत्वातान्प्रतियत्तच्छिवलिंगपूजनमाहुस्तदाह ॥ यइति ॥ ५९॥६० ॥ एतत्कथामुपसंहरति ॥ एतदिति ॥६१॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांज्योतिर्लिंगोत्पत्तिवर्णनंनामषट्चत्वारिंशोऽध्यायः ॥४६॥

॥ ओंनमःशिवाय ॥ प्रियव्रतादिभिर्भूमिर्विभक्ताद्वीपसागरैः ॥ नरनारायणौतत्रस्थितौवदरिकाश्रमे ॥ १ ॥ तयोःप्रार्थनयातत्रकेदारेशःस्वयंस्थितः ॥ एवंजाताकथासप्तचत्वारिंशेत्रवर्ण्यते ॥ २ ॥ ब्रह्मणइति ॥ परमेष्ठिनइत्यर्थः ॥ तत्पुत्रोमनुपुत्रः ॥ १ ॥ तस्यप्रियव्रतस्यपुत्रार्थंपुत्रनिवासस्थानकल्पनाय ॥ स्वयमिति ॥ प्रियव्रतइत्यनुषंगः ॥ मेरोरनुमेरुंपरितः ॥ २ ॥ सप्तेति ॥ सप्तवारंप्रदक्षिणांकृत्वेत्यर्थः ॥ सप्तकृत्वस्तुतत्कृत्वेतिपाठांतरम् ॥ द्वीपानिति ॥ तन्नामान्युक्तानिश्रीमद्भागवतेपंचमस्कंधे ॥ जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञाइति ॥ भ्रमणसमयेयेगर्ताजातास्तेषुसमुद्राअभवन्नित्याह ॥ द्वीपेति ॥ द्वीपसंख्येवसंख्यायेषांतेसमुद्राइति ॥ तेपितत्रोक्ताः ॥ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाःसप्तजलधयइति ॥ तेचसमुद्राःकतिसंपन्ना

सूतउवाच ॥ ब्रह्मणश्चैवसंभूतोमनुःस्वायंभुवःपुरा ॥ तत्पुत्रश्चमहातेजानाम्नाप्रियव्रतस्तदा ॥ १ ॥ तस्यासन्पुत्रकाः सप्तपुत्रार्थंचस्वयंतदा ॥ रथंचभ्रामयामासमेरोरनुपुनःपुनः ॥ २ ॥ सप्तप्रक्रमणंकृत्वासप्तद्वीपानकल्पयत् ॥ द्वीपसंख्यास्तदाजाताःसमुद्राःसप्तएवच ॥ ३ ॥ सप्तानामपिपुत्राणांद्वीपमेकमदात्पुनः ॥ प्रत्येकंचतदादत्तंराज्ञातेनमहात्मना ॥ ४ ॥ लब्धागतिर्मुनीनांचविस्तार्यवंशमुत्तमम् ॥ आग्नीध्रश्चैवतत्पुत्रोज्येष्ठःप्रियव्रतस्यह ॥ ५ ॥ जंबुद्वीपेतदातेनकृतंराज्यंयथासुखम् ॥ तत्पुत्रस्तुतदानाभिर्नाम्नालोकसुखावहः ॥ ६ ॥ तेनचापितथाराज्यंपितृवत्परिपालितम् ॥ तस्यपुत्रास्तथाजाताऋषभाद्यामुनीश्वराः ॥ ७ ॥ तस्यपुत्रशतंह्यासीदृषभस्यमहात्मनः ॥ सर्वेषांचैवपुत्राणांज्येष्ठोभरतएवच ॥ ८ ॥ नवयोगींद्रतांप्राप्तावीतरागास्तथाऽभवन् ॥ जनकस्यचविज्ञानंतैर्दत्तंसुमहात्मभिः ॥ ॥ ९ ॥ एकाशीतिस्तदाजाताःकर्ममार्गपरायणाः ॥ क्षत्रियाणांयथाकर्मकृत्वामोक्षपरायणाः ॥ १० ॥

इत्याह ॥ सप्तेति ॥ ३ ॥ एकैकस्मैपुत्रायैकैकंद्वीपंदत्तंतदाह ॥ सप्तानामिति ॥ ४ ॥ लब्धेति ॥ तेनराज्ञोत्तमम्‌ऋणत्रयपरिहारसमर्थंवंशंविस्तार्यवर्धयित्वामुनीनांगतिःस्वर्गरूपालब्धाप्राप्ता ॥ प्रियव्रतस्यतत्पुत्रःप्रसिद्धपुत्रआग्नीध्रनामाज्येष्ठोभवत् ॥ ५ ॥ तेनाग्नीध्रेण ॥ तत्पुत्रआग्नीध्रपुत्रः ॥ ६ ॥ तेनापिनाभिनापि ॥ तस्यनाभेः ॥ ७ ॥ ८ ॥ नवनवसंख्याकाः ॥ जनकस्यजनकराजायविज्ञानंब्रह्मापरोक्षज्ञानंतैर्नवभिर्ऋषभपुत्रैः ॥ ९ ॥ कर्ममार्गेति ॥ नित्यनैमित्तिकप्रजापालनादिकर्मतत्पराइत्यर्थः ॥ तदेवाह ॥ क्षत्रियाणामिति ॥ स्वकर्मकृत्वैवशुद्धचित्ताःसंतोमुमुक्षवोजाताइत्यर्थः ॥ १० ॥

उर्वरितानामवशिष्टानांदशानांहितायकल्याणायनवखंडानिकल्पयामासेतिसंबंधः ॥ नवहितायेति ॥ नवानांपुत्राणांहितायनवखंडानीत्यर्थः ॥ ११ ॥ तत्रापीति ॥ नवभिरनुजैर्नवसुखंडेष्वधिष्ठितेष्वपिज्येष्ठत्वेनसर्वेषांनियमनायास्मिन्नेवखंडेभरतंकल्पयामासेत्यर्थः ॥ एवंचात्रह्यैन्यवसतामितिभावः ॥ स्पृहणीयकेदेवादिभिरप्याप्तुमेषितव्ये ॥ तन्नाम्नाभरतनाम्ना ॥ १२ ॥ श्रेष्ठमिति ॥ ज्येष्ठपुत्रस्थानत्वाद्रम्यत्वात्कर्मभूमिरूपत्वाच्चेतिभावः ॥ अतएवाह ॥ अमराइति ॥ सर्वेति ॥ सर्वसत्कर्मफलजनकमित्यर्थः ॥ १३ ॥ नन्वेवंखंडांतराणांदुर्दशैवस्यादित्यतआह ॥ सर्वेष्वपीति ॥ खंडेखंडइति ॥ प्रतिखंडंपृथक्पृथगवताराइत्यर्थः ॥ १४ ॥ भारतखंडेप्रकल्पितमवतारमाह ॥ तत्रापीति ॥ वदरीति ॥ एतत्संज्ञकेहिमालयप्रदेशे ॥ परमेश्वरोविष्णुः ॥ १५ ॥ शृंगंशिखरंहिम

ऋषभश्चोर्वरितानांहितायऋषिसत्तमाः ॥ खंडानिकल्पयामासनवनवहितायच ॥ ११ ॥ तत्रापिभरतंज्येष्ठंखंडेऽस्मिन्स्पृहणीयके ॥ तन्नाम्नाचैवविख्यातंखंडंचभारतंतदा ॥ १२ ॥ सर्वेष्वपिचखंडेषुश्रेष्ठंभारतमुच्यते ॥ अमराजन्मइच्छंतिसर्वकर्मसुखावहम् ॥ १३ ॥ सर्वेष्वपिचखंडेषुह्यवताराःप्रकीर्तिताः ॥ विष्णुनालोकरक्षार्थंखंडेखंडेमुनीश्वराः ॥ १४ ॥ तत्रापिभारतेखंडेबदर्याश्रमसंज्ञके ॥ नृनारायणरूपेणतिष्ठतिपरमेश्वरः ॥ १५ ॥ तपस्तप्यतिनित्यंवैलोकानांहितकाम्यया ॥ तत्रकेदारसंज्ञंवैशृंगंहिमसमुद्भवम् ॥ १६ ॥ नरोनारायणश्चैवयत्रास्तेचनिरंतरम् ॥ ताभ्यांसंप्रार्थितोदेवःपार्थिवेपूजनायवै ॥ १७ ॥ आयातिचऋषिश्रेष्ठाभक्त्यधीनतयाशिवः ॥ कस्मिंश्चित्समयेतत्रप्रसन्नःपरमेश्वरः ॥ १८ ॥ सम्यक्कृतंभवद्भ्यांतुपूज्याभ्यांपूजितोह्यम् ॥ किंकार्यंविद्यतेलोकेभवतोस्तपसःफलम् ॥ ॥ १९ ॥ अवाप्तकामौश्रेष्ठौचकिंकार्यंभवतोःपुनः ॥ तथापिपूजितश्चाऽहंप्रसन्नोव्रियतामिति ॥ २० ॥ इत्युक्तेचतदातेननरोनारायणःस्वयम् ॥ उवाचवचनंतत्रलोकानांहितकाम्यया ॥ २१ ॥ यदिप्रसन्नोदेवेशयदिदेयोवरस्त्वया ॥ स्थीयतांस्वेनरूपेणपूजार्थंशंकरस्वयम् ॥ २२ ॥ ॥ ॥ ॥

समुद्भवंहिमालयेजातं ॥ १६ ॥ ताभ्यांनरनारायणाभ्यांसंप्रार्थितआहूतोदेवःशिवः ॥ १७ ॥ शिवस्यभक्तानुकंपित्वमाह ॥ आयातीति ॥ परमेश्वरःशिवःउवाचेतिशेषः ॥ १८ ॥ किमितितदाह ॥ सम्यगिति ॥ भवद्भ्यांनरनारायणाभ्यां ॥ भवतोरिति ॥ लोकरक्षादिकमहंकरिष्यामियुवयोस्तपसःफलरूपंकार्यंनकिमपीत्यर्थः ॥ निस्पृहत्वादितिभावः ॥ १९ ॥ तदेवस्पष्टयति ॥ अवाप्तेति ॥ ज्ञानप्राप्त्याकार्यांतरेच्छायाअभावादितिभावः ॥ किंकार्यमिति ॥ पुनरुक्तिःसर्वथाफलेच्छाभावसूचनार्था ॥ २० ॥ तेनशिवेन॥नरइति ॥ नरोनारायणश्चेत्यर्थः ॥ २१ ॥ स्वेनरूपेणज्योतीरूपेण ॥ शंकरहेशिव ॥ २२ ॥

ताभ्यांनरनारायणाभ्याम् ॥ २३ ॥ ताभ्यांनरनारायणाभ्यांयतःपूजितोतःसर्वदुःखभयापहआसीत् ॥ अथवा यतःसर्वदुःखभयापहोऽतःपूजितइत्यर्थः ॥ तत्र स्थितेःकार्यांतराण्यप्याह ॥ लोकानामिति ॥ २४ ॥ इहवदर्याश्रमे ॥ २५ ॥ भवस्यशिवस्य ॥ २६ ॥ तद्दिनंशिवस्थितिदिनम् ॥ दुःखमिति ॥ तस्ये तिशेषः ॥ २७ ॥ तत्रत्यंतत्रभवंवलयंकंकणम् ॥ हरिरूपेति ॥ नारायणरूपेत्यर्थः ॥ हररूपेति ॥ शिवरूपेत्यर्थः ॥ २८ ॥ तस्यैवतादृशस्यैवकंकणस्य केदारेश्वरस्यवा ॥ प्रमुच्यतइति ॥ जनइतिशेषः ॥ २९ ॥ एतेषांदर्शनस्यफलमाह ॥ दृष्ट्वेति ॥ मुक्तिभाजीति ॥ जनोभविष्यतीतिशेषः ॥ ३० ॥ क थामुपसंहरति ॥ एतदिति ॥ कथाश्रवणफलमाह ॥ श्रुत्वेति ॥ ज्योतिर्लिंगांतरवर्णनमुपक्रमते ॥ अतइति ॥ भीमेति ॥ भीमशंकरनिष्ठमित्यर्थः ॥ ३१

इत्युक्तस्तुतदाताभ्यांकेदारेहिमसंज्ञके ॥ स्वयंचशंकरस्तस्थौज्योतीरूपीमहेश्वरः ॥ २३ ॥ ताभ्यांचपूजितश्चैवस र्वदुःखभयापहः ॥ लोकानामुपकारार्थंभक्तानांदर्शनायवै ॥२४॥ स्वयंस्थितस्तदाशंभुःकेदारेश्वरसंज्ञकः ॥ देवाश्चपू जयंतीहऋषयश्चसनातनाः ॥ २५ ॥ भवस्यपूजनान्नित्यंबदर्याश्रमवासिनः ॥ पवित्रिताःसदायेवैनाम्नाशिवउदा हृतः ॥ २६ ॥ तद्दिनंहिसमारभ्यकेदारेश्वरएवच ॥ पूजितोयेनभक्त्यावैदुःखंस्वप्नेपिदुर्लभम् ॥२७॥ तत्रत्यंवलयं योवैदधातिहरिवल्लभः ॥ हरिरूपांकितंतच्चहररूपसमन्वितः ॥२८॥ तस्यैवरूपंदृष्ट्वाचसर्वपापैःप्रमुच्यते ॥ जीवन्मु क्तोभवेत्सोवैयोगतोबदरीवने ॥ २९ ॥ दृष्ट्वारूपंनरस्यैवतथानारायणस्यच ॥ केदारेश्वरनाम्नश्चमुक्तिभाजीनसंशयः ॥ ३० ॥ एतद्वश्चसमाख्यातंयत्पृष्टमृषिसत्तमाः ॥ श्रुत्वापापंहरेत्सर्वंनात्रकार्याविचारणा ॥ अतःपरंप्रवक्ष्यामि माहात्म्यंभीमशंकरे ॥ ३१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांज्योतिर्लिंगमहिमवर्णनंनामसप्तचत्वारिंशो ऽध्यायः ॥ ४७ ॥ सूतउवाच ॥ कामरूपेश्वरेदेशेशंकरोलोककाम्यया ॥ अवतीर्णःस्वयंसाक्षात्कल्याणगुणभाज नः ॥ १ ॥ यदर्थमवतीर्णोऽसौकथयामिमुनीश्वराः ॥ भीमोनाममहावीर्योराक्षसोलोकनाशनः ॥ २ ॥

॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांज्योतिर्लिंगमहिमवर्णनंनामसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॐनमःशिवाय ॥ सह्येन्द्रौकुंभकर्णस्यसुतोभीमाख्यराक्षसः ॥ स्वपितृमंहरिंज्ञात्वातन्नाशायतपोऽकरोत् ॥ १ ॥ ततोधातुर्वराल्लब्ध्वाबलंसर्वानपीडयत् ॥ कामरूपाधिपंभूपंबध्वातल्लिंगमर्दयत् ॥ २ ॥ भीमशंकरइत्याख्यःप्रादुर्भूतःशिवस्तदा ॥ इत्यष्टचत्वारिंशेत्रशंभोर्माहात्म्यमीर्यते ॥ ३ ॥ कामरूपेति ॥ कामानिष्टपदार्थान्रूपयतिपूरयतीतिकामरूपोऽतएवेश्वरऐश्वर्यवांस्तत्रदेशे ॥ कल्याणेति ॥ भक्तकल्याणजनकगुणानांपात्रमित्यर्थः ॥ १ ॥ असौशि वः ॥ भीमेति ॥ बिभ्यतिजनायस्मादितिभीमःयतोमहावीर्यः ॥ २ ॥ ॥ ॥

कर्कट्यांतदाख्यायांराक्षसपुत्र्याम् ॥ ३ ॥ सह्येसह्याभिधाने ॥ मात्राकर्कट्या ॥ ४ ॥ राक्षसीकर्कटी ॥ कर्कटीति ॥ कर्कट्याख्यांमातरमित्यर्थः ॥ ५ ॥ तेनभीमाख्येनपुत्रेणपृष्टाराक्षसीतन्मातादुष्टावचउवाचेतिसंबंधः ॥ ६ ॥ किमुवाचेतितदाह ॥ श्रूयतामिति ॥ ७ ॥ भ्रात्रारावणेन ॥ अत्रकामरूपाख्येदेशेकदाचित्पितृभर्तृमरणोत्तरकालेभोगंरतिं ॥ ८ ॥ भोगंकृत्वामामगृहीत्वैवलंकांगतइत्यभिप्रेत्याह ॥ मयेति ॥ अत्रैवकामरूपदेशएव ॥ सास्वपित्रादीनांनामान्याह

दुःखदःसर्वभूतानांधर्मनाशनतत्परः ॥ कुंभकर्णात्समुत्पन्नःकर्कट्यांसुमहाबलः ॥ ३ ॥ सह्येचपर्वतेसोपिमात्रासहसमन्वितः ॥ कुंभकर्णेचरामेणहतेलोकभयंकरे ॥ ४ ॥ राक्षसीपुत्रयुक्ताचसह्येतिष्ठत्स्वयंतदा ॥ सबालोराक्षसोभीमःकर्कटीमातरंतदा ॥ ५ ॥ पप्रच्छमेपिताकोवाकथंचैकाकिनीपुनः ॥ एवंपृष्टातदातेनपुत्रेणराक्षसीवचः ॥ ६ ॥ उवाचपुत्रंदुष्टावैश्रूयतांकथयाम्यहम् ॥ पितातेकुंभकर्णश्चरावणानुजएवच ॥ ७ ॥ रामेणमारितःसोऽयंभ्रात्रासहमहाबलः ॥ अत्राऽऽगतःकदाचिद्वैमद्भोगंकृतवान्पुरा ॥ ८ ॥ मयानदृष्टालंकावैह्यत्रैववनिवसाम्यहम् ॥ पितामेकर्कटोनाममातामेपुष्कसीमता ॥ ९ ॥ भर्तामेचविराधोऽभूद्रामेणचहतःपुरा ॥ पित्रोःपार्श्वेस्थिताऽहंचस्वामिनिनिहतेसति ॥ १० ॥ पितरौमेमृतौचाऽत्रऋषिणाभस्मसात्कृतौ ॥ भक्षणार्थंगतौतत्रक्रुद्धेनसुमहात्मना ॥ ११ ॥ सुतीक्ष्णोनामविख्यातोतपसादग्धकल्मषः ॥ तेनैवमारितौपुत्रपितरौममवल्लभौ ॥ १२ ॥ एकाकिनीतदाजातादुःखितापर्वतेपुरा ॥ एतस्मिन्त्समयेह्यत्रराक्षसोरावणानुजः ॥ १३ ॥ आगत्यकृतवान्संगंविहायसगतस्तदा ॥ ततस्त्वंचसमुत्पन्नोमहाबलपराक्रमः ॥ १४ ॥ अवलंब्यपुनस्त्वांचकालक्षेपंकरोम्यहम् ॥ इतिश्रुत्वावचस्तस्याभीमोभीमपराक्रमः ॥ १५ ॥ क्रुद्धःसंचिंतयामासकिंकरोमिहरिंप्रति ॥ पितामेचहतश्चैवमातामहस्तथापुनः ॥ १६ ॥

॥ पितेति ॥ ९ ॥ स्वामिनिपत्यौविराधे ॥ १० ॥ अत्रअस्मिन्देशे ॥ भस्मीकरणप्रयोजनमाह ॥ भक्षणार्थमिति ॥ तत्रऋषिनिकटे ॥ ११ ॥ केनर्षिणाहतावितितत्राह ॥ सुतीक्ष्णइति ॥ १२ ॥ रावणानुजःकुंभकर्णः ॥ १३ ॥ संगमिति ॥ संगंभोगंकृतवांस्तदैवमांविहायगतइत्यर्थः ॥ १४ ॥ कालक्षेपंकालहरणम् ॥ १५ ॥ हरिमिति ॥ रामस्यहर्यवताररूपत्वात्तत्रानिष्टचिंतनमकरोदितिभावः ॥ पिताकुंभकर्णःमातामहःकर्कटः ॥ १६ ॥ ॥

विराधः पूर्वपिता ॥ तत्पुत्रःविराधपुत्रःउपचारात् ॥ कुंकर्णपुत्रोवा ॥ पीडयामीति ॥ पितृवैरनिर्यातनार्थमितिभावः ॥ १७ ॥ तत्रतस्मिन्नेवदेशे ॥ कथंतप्तामितितदाह ॥ ब्रह्माणमिति ॥ब्रह्मप्रसादनार्थमित्यर्थः ॥ वर्षेति ॥ वर्षसहस्रपर्यंतमित्यर्थः ॥ १८ ॥ तपःप्रकारमाह ॥ ऊर्ध्ववाहुरिति ॥ एकपादइति ॥ एकेनपादेनस्थितइत्यर्थः ॥ पुरःपुरोभागेसूर्यसंमुखइत्यर्थः ॥ १९ ॥ शिरसइति ॥ तस्यभीमरक्षसःशिरसःसकाशात्संजातमुत्पन्नम् ॥ २० ॥ तेनदुष्टेनरक्षसाप्रार्थ्यंयाचनीयंवररूपमित्यर्थः ॥ देहि ॥ राक्षसायेत्यनुषंगः ॥ २१ ॥ तस्मादिति ॥ वरदानेनतस्यतपसोनिवृत्यास्माकंकुशलंभवेन्नोचेतत्तपसावयंदग्धा

विराधश्चहतोह्यत्रदुःखंबहुतरंकृतम् ॥ तत्पुत्रोऽहंभवेयंचेद्धरिंचपीडयाम्यहम् ॥ १७ ॥ इतिकृत्वामतिंतत्रतपस्तप्तंसुदारुणम् ॥ ब्रह्माणंचसमुद्दिश्यवर्षसाहस्रकंतदा ॥ १८ ॥ ऊर्ध्वबाहुश्चैकपादःसूर्येदृष्टिंदधत्पुरः ॥ मनसाध्यानमाश्रित्यतपश्चक्रेमहत्तदा ॥ १९ ॥ शिरसस्तस्यसंजातंतेजःपरमदारुणम् ॥ तेनदग्धास्तदादेवाब्रह्माणंशरणंगताः ॥ २० ॥ हेब्रह्मन्रक्षसस्तेजोलोकान्पीडितुमुद्यतम् ॥ यत्प्रार्थ्यंतेनदुष्टेनतत्त्वंदेहिपितामह ॥ २१ ॥ नोचेदग्धवयंदग्धास्तेनैवसुमहात्मना ॥ यास्यामःसंक्षयंसर्वेतस्माद्देहिपितामह ॥ २२ ॥ इतितेषांवचःश्रुत्वाब्रह्मालोकपितामहः ॥ जगामवरदानार्थंराक्षसायदुरात्मने ॥ २३ ॥ तदग्रेचतदायातोहंसवाहनसंयुतः ॥ प्रसन्नोऽस्मिवरंब्रूहियत्तेमनसिवर्त्तते ॥ २४ ॥ इतिश्रुत्वावचस्तस्यवचनंपुनरब्रवीत् ॥ राक्षसउवाच ॥ यदिप्रसन्नोदेवेशयदिदेयोवरस्तदा ॥ ॥ २५ ॥ अतुलंचबलंमेऽद्यदेहित्वंकमलासन ॥ इत्युक्त्वातुनमश्चक्रेब्रह्मणेपरमात्मने ॥ २६ ॥ ब्रह्माचापितदातस्मैवरंदत्वागृहंययौ ॥ राक्षसोबलवांस्तत्रमातरंप्रणिपत्यच ॥ २७ ॥ पश्यमातःकरोम्यद्यदेवानांप्रलयंह्यहम् ॥ इत्युक्त्वाथमंतत्रकामरूपेश्वरंशुभम् ॥ २८ ॥ बबंधताडयामासभीमोभीमपराक्रमः ॥ गृहीतंचधनंसर्वंहस्त्यश्वरथसंकुलम् ॥ २९ ॥ छत्रंचचामरंचैवसर्वोपस्करणानिच ॥ तेनैवगृहीतंराज्यंतदीयंचमुनीश्वराः ॥ ३० ॥

भविष्यामइतिभावः ॥ २२ ॥ २३ ॥ ब्रह्माऽऽगत्यराक्षसंप्रत्याह ॥ प्रसन्नइति ॥ २४ ॥ तस्यब्रह्मणः ॥ अब्रवीत्राक्षसइतिशेषः ॥ २५ ॥ राक्षसोवरंयाचते ॥ अतुलमिति ॥ २६ ॥ मातरंकर्कटिकाम् ॥ २७ ॥ मातरंप्रत्याहराक्षसः ॥ पश्येति ॥ कामरूपेश्वरंकामरूपदेशाधिपतिंराजानं ॥ बबंधेत्यग्रिमेणान्वयः ॥ २८ ॥ २९ ॥ सर्वोपस्करणानिशिबिकादीनि ॥ तदीयंकामरूपेश्वरसंबंधि ॥ ३० ॥ ॥

एवंस्थितेपिराजास्वधर्मान्नचचालेत्याह ॥ राजेति ॥ हरिप्रियइति ॥ हरेःप्रियइत्यर्थः ॥ शिवभक्तत्वादितिभावः ॥ गृहीतोवद्धः ॥ निगडैर्बेडीइतिभाषयाप्रसिद्धे तेनरक्षसा ॥ ३१ ॥ तथापिराजाशिवमेवशरणंजगामेत्याह ॥ एकांतइति ॥ दुष्टराजभयादेकांतइत्युक्तम् ॥ ३२ ॥ गंगायाभागीरथ्याः ॥ मानसमिति ॥ शिवपूजनविशेषणम् ॥ रक्षोभयादितिभावः ॥ ३३ ॥ पार्थिवेनेति ॥ पार्थिवलिंगसंबंधिनापूजाविधानेनेत्यर्थः ॥ तद्ध्यानंशिवध्यानं ॥ तथेति ॥ विधिपूर्वकंयथा भवेत्तथाकृत्वेत्यर्थः ॥ ३४ ॥ स्तवैर्गद्यात्मकैस्तोत्रैःपद्यात्मकैः ॥ मुद्रेति ॥ मुद्राधेनुमुद्रादयः ॥ आसनानिपद्मासनादीनितत्करणपूर्वमित्यर्थः ॥ सकलंपूजा

राजाचापिशुचिःश्रेष्ठःप्रियधर्मोहरिप्रियः ॥ गृहीतोनिगडैस्तेनदुष्टेनसुरशत्रुणा ॥३१॥ एकांतेतुतदाकृत्वापार्थिवींमूर्तिमुत्तमाम् ॥ भजनंचशिवस्यैवप्रारब्धंप्रियकाम्यया ॥ ३२ ॥ गंगायास्तवनंतेनबहुधाचतदाकृतम् ॥ मानसंस्नानकर्मादिकृत्वाचशिवपूजनं ॥३३॥ पार्थिवेनविधानेनचकारनृपसत्तमः ॥ तद्ध्यानंचतथास्यादैकृत्वाचविधिपूर्वकम् ॥३४ ॥ प्रणिपातैःस्तवैःस्तोत्रैर्मुद्रासनपुरःसरम् ॥ कृत्वाचसकलंतत्रभेजेसशंकरंमुदा ॥ ३५ ॥ पंचाक्षरमयींविद्यांजजापप्रणवान्विताम् ॥ नाऽन्यत्कार्यंचवैकर्तुंलब्धवानंतरंतदा ॥ ३६ ॥ इदमेवतदातत्रचकारहितकाम्यया ॥ तत्पत्नीचतदा साध्वीदक्षिणानामविश्रुता ॥ ३७ ॥ पार्थिवंचविधानंहिचकारनृपवल्लभा ॥ दंपतीह्येकभावेनशंकरंप्रियकारकम् ॥ ३८ ॥ भजयामासतुस्तत्रनाऽन्यथामनसोगतिः ॥ राक्षसोवसुधांकृत्स्नांवशेचक्रऋषिसत्तमाः ॥ ३९ ॥ वेदधर्मंशास्त्रधर्मंस्मृतिधर्मंपुरातनम् ॥ लोपयित्वाचतत्सर्वंबुभुजेस्वयमात्मना ॥ ४० ॥ देवाश्चपीडितास्तेनऋषयःपीडिताभृशम् ॥ अत्यंतंदुःखमापन्नाःशिवंचशरणंययुः ॥ ४१ ॥ स्तुत्वास्तोत्रैरनेकैश्चहरंलोकसुखावहम् ॥ प्रसन्नंकृतवंतस्ते महाकोश्यास्तटेशुभे ॥ ४२ ॥ ॥ ॥

दिकंभेजेसिषेवे ॥ ३५ ॥ पंचेति ॥ नमःशिवायेतिपूर्वोक्तपंचाक्षरमयीमित्यर्थः ॥ अंतरमवसरम् ॥ ३६ ॥ कुतोनलब्धवानित्यत्रहेतुमाह ॥ इदमेवेति ॥ ३७ ॥ सापितदनुज्ञयातथैवाकरोदित्याह ॥ पार्थिवमिति ॥ ३८ ॥ एकभावेनऐकमत्येनपरमभक्त्यावा ॥ नान्यथेति ॥ तयोर्मनसःशंकरंविनान्यविषयागतिःशरणंनाभवदित्यर्थः ॥ वशइति ॥ कृत्वेतिशेषः ॥ ३९ ॥ वेदधर्ममग्निहोत्रादिकंशास्त्रधर्ममध्यात्मविचारादिकंस्मृतिधर्मंसंध्यादिकं ॥ तत्सर्वंराज्यम् ॥ ४० ॥ तर्हींद्रादयोदेवाःक्वगताइतितत्राह ॥ देवाइति ॥ तेनरक्षसा ॥ ४१ ॥ महाकोश्यास्तदाख्यायानद्याः ॥ ४२ ॥ ॥

॥ ४३ ॥ किमब्रवीदितितदाह ॥ प्रसन्नइति ॥ ४४ ॥ तेनशिवेन ॥ ४५ ॥ ४६ ॥ शिवःकिमाहेतितदाह ॥ करिष्यामीति ॥ भवदुक्तमितिशेषः ॥
॥ ४७ ॥ प्रब्रूतेति ॥ कार्यंवदततच्छीघ्रंभविष्यतीत्यर्थः ॥ ४८ ॥ ४९ ॥ ५० ॥ कैश्चिदिति ॥ राजविरोधिभिर्भीमराक्षसानुसारिभिरित्यर्थः ॥ ५१ ॥ किं
निवेदितंतदाह ॥ राजेति ॥ त्वदर्थेत्वन्नाशार्थे ॥ अभिचारंवधोपायभूतंकर्म ॥ यथेच्छसीति ॥ तत्प्रतिविधेहीतितात्पर्यम् ॥ ५२ ॥ करवालंखड्गम् ॥ ५३ ॥

कृत्वाचपार्थिवींमूर्तिंपूजयित्वाविधानतः ॥ स्तुत्वाचविविधैस्तोत्रैर्नमस्कारादिभिःक्रमात् ॥ ४३ ॥ एवंस्तुतस्तदाशंभु
र्देवान्वचनमब्रवीत् ॥ प्रसन्नोऽस्मिवरंब्रूतकिंकार्यंकरवाणिवः ॥ ४४ ॥ इत्युक्तेचतदातेनदेवाह्यूचुःशिवंपुरः ॥ सर्वं
जानासिदेवेशनाऽज्ञातंविद्यतेतव ॥४५॥ तथापिश्रूयतांदेवराक्षसोभीमरूपकः ॥ पीडयत्यतितरांदेवान्कृपांकुरुस
दाशिव ॥४६॥ दुष्टंचराक्षसंत्वंचजहिशीघ्रंप्रियंकर ॥ इत्युक्तस्तुतदाशंभुःकरिष्यामिवचोऽब्रवीत् ॥ ४७॥ राजाचा
पिमदीयोवैभक्तोभवतिनित्यशः ॥ तस्मात्प्रब्रूतवैदेवाःकार्यंशीघ्रंभविष्यति ॥ ४८ ॥ इत्युक्तास्तेतदादेवाआनंदंपर
मंगताः ॥ स्वंस्वमाश्रमकंसर्वेययुस्तेचमहर्षयः ॥ ४९ ॥ शिवोपिस्वगणैःसार्धंजगामहितकाम्यया ॥ एतस्मिन्नंतरे
तत्रकामरूपेश्वरेणच ॥ ५० ॥ अत्यंतंध्यानमारब्धंपार्थिवस्यपुरस्तदा ॥ कैश्चिच्चतत्रगत्वाचराक्षसायनिवेदितं ॥
॥ ५१ ॥ राजाकिंचित्करोत्येवंत्वदर्थेराक्षसोत्तम ॥ अभिचारंकरोतिवैयथेच्छसितथाकुरु ॥ ५२ ॥ राक्षसोपिचतच्छ्रु
त्वाकुपितोहननेच्छया ॥ गृहीत्वाकरवालंचह्याजगामनृपंप्रति ॥ ५३ ॥ तंदृष्ट्वाराक्षसोह्यत्रपार्थिवादिस्थितंचयत् ॥
तदत्यंतविरूपंचदृष्ट्वाकिंचित्करोत्यसौ ॥ ५४ ॥ कुपितोराक्षसस्तत्रहन्यांसोपस्करंविभुम् ॥ विचार्योवाचतंतत्रकिं
यतेकिंत्वयाऽधुना ॥ ५५ ॥ सत्यंवदनहन्यांत्वामन्यथाहन्मिनिश्चितम् ॥ इतिश्रुत्वावचोह्यस्यसत्यपाशेनयंत्रितः ॥
॥ ५६ ॥ उवाचवचनंसत्यंभविष्यंतुभवेदिह ॥ कृपालुःशंकरश्चात्रवर्ततेपार्थिवेध्रुवम् ॥ ५७ ॥ ॥

पार्थिवादिपार्थिवलिंगादिकं ॥ अत्यंतविरूपंस्वमतविरुद्धं ॥ असौराजा ॥५४॥ राक्षसस्तद्दृष्ट्वाकिंकृतवानितितदाह ॥ कुपितइति ॥ सोपस्करंपूजोपकरण
सहितंविभुंशिवमहंहन्यामितिविचार्यराक्षसस्तंराजानमुवाचेत्यग्रिमेणान्वयः ॥ ५५ ॥ अस्यराक्षसस्य ॥ यंत्रितोबद्धोराजेतिशेषः ॥ ५६ ॥ उवाचेति ॥
यद्भविष्यंभवितव्यंतद्भवेदेवसत्यंतुवक्तव्यमितिविचार्यराजावचनमुवाचेत्यर्थः ॥ राजाकिमुवाचेतितदाह ॥ कृपालुरिति ॥ पार्थिवेपार्थिवलिंगे ॥ ५७ ॥

दयालुरपिशंकरोमच्छुभंनकरोतीत्याह ॥ मदर्थइति ॥ अकरणेहेतुमाह ॥ हीति ॥ वराककः अल्पयोग्यताकःसेवितुमसमर्थइत्यर्थः ॥ स्वरूपेति ॥ दयालुत्वादि स्वरूपानुसारिणींप्रतिज्ञामित्यर्थः ॥ करिष्यति ॥ शंकरइत्यनुषज्यते ॥ ५८ ॥ कासाप्रतिज्ञेतितामाह ॥ मद्भक्तामिति ॥ ५९ ॥ राजाराक्षसंप्रतिविनयेनाह ॥ त्वदीयइति ॥ ६० ॥ एवंसशिवध्यानबलादेवराक्षसमवज्ञातवानित्याह ॥ एवमिति ॥ तथानिर्भयत्वेनसत्यमेवाब्रवीदित्याह ॥ सत्यमिति ॥ ६१ ॥ ६२ ॥ पितृव्यकेन रावणेन ॥ ६३ ॥ तद्बलंशंकरबलं ॥ मर्मोक्त्याह ॥ तर्हीति ॥ ६४ ॥ स्वामिनमिति ॥ शंकरंस्वामिनंमत्वेतिसंबंधः ॥ ६५ ॥ मयातुशंकरेणदृष्टेनसताप्र

मदर्थेनकरोतीहह्यहंकियान्वराककः ॥ स्वरूपानुप्रतिज्ञांचसत्यंचैवकरिष्यति ॥ ५८ ॥ मद्भक्तंचयदाकश्चित्पीडयत्यतिदारुणम् ॥ तदाहंतस्यरक्षार्थंदुष्टंहन्मिनसंशयः ॥ ५९ ॥ एवंधैर्यंसमालंब्यध्यात्वादेवंचशंकरम् ॥ त्वदीयोऽस्मिमहाराजयथेच्छसितथाकुरु ॥ ६० ॥ एवंमनसितंध्यात्वाराक्षसंचाऽवमानयन् ॥ सत्यंचवचनंह्यत्रह्यब्रवीत्प्रियकाम्यया ॥ ६१ ॥ भजामिशंकरंदेवंयथेच्छसितथाकुरु ॥ इतितस्यवचःश्रुत्वाभीमोवचनमब्रवीत् ॥ ६२ ॥ शंकरश्चमयाज्ञातःकिंकरिष्यतिमामिति ॥ योमेपितृव्यकेनैवस्थापितःकिंकरोयथा ॥ ६३ ॥ तद्बलंहिसमाश्रित्यविजेतुंत्वंसमीहसे ॥ तर्हित्वयाजितंसर्वंनाऽत्रकार्याविचारणा ॥ ६४ ॥ यावन्मयानदृष्टोऽस्तिशंकरस्त्वत्प्रपालकः ॥ तावत्त्वंस्वामिनंमत्वासेवसेनाऽन्यथाक्वचित् ॥ ६५ ॥ मयादृष्टेनसर्वैर्वैस्फुटंस्यात्सर्वथानृप ॥ तस्मात्त्वयाशिवस्येदंरूपंदूरतरंपुनः ॥ ६६ ॥ कर्तव्यंनान्यथाचेद्वैपश्यसिस्वामिनोमम ॥ इतितद्वचनंश्रुत्वानृपोवाक्यमुपाददे ॥ ६७ ॥ अहंचपामरश्चैवमोक्ष्यामिशंकरंपुनः ॥ सर्वोत्कृष्टश्चसस्वामीनमांमुंचतिकर्हिचित् ॥ ६८ ॥ एवंवचस्तदाश्रुत्वाविहस्यराक्षसोत्तमः ॥ मत्तोभोगीसदाभिक्षेत्सकिंजानातिस्वीकृतम् ॥ ६९ ॥ योगिनांकाचनिष्ठाचभक्तानांप्रतिपालने ॥ इतिकृत्वामतिंत्वंचदूरतोभवसर्वथा ॥ ७० ॥ ॥ ॥ ॥ ॥ ॥

योज्यत्वंतृतीयार्थः ॥ दर्शनप्रयोज्यंस्फुटीभवनमित्यर्थः ॥ तस्मादिति ॥ रूपंस्वरूपंप्रतिमात्मकंलिंगमित्यर्थः ॥ दूरतरम् कर्तव्यमित्यग्रिमेणान्वयः ॥ ॥ ६६ ॥ अन्यथेति ॥ दूरतोऽकरणेचेदित्यर्थः ॥ स्वामित्वविशिष्टस्यममरूपमित्यनुषज्यते ॥ रूपंबलंपश्यसि ॥ ६७ ॥ मोक्ष्यामीति ॥ पामरत्वेनाज्ञानादिति भावः ॥ सस्वामीशंकरः ॥ नेति ॥ दयालुत्वादितिभावः ॥ ६८ ॥ मत्तःउन्मत्तःहालाहलभक्षणादिना ॥ भोगीविषयासक्तः ॥ भिक्षेत्भिक्षेत ॥ अथवामत्तोमत्सकाशाद्भिक्षेदित्यर्थः ॥ दारिद्र्यादितिभावः ॥ ६९ ॥ नन्वेवंनवक्तव्यंसमहायोगगम्योवर्ततइत्याशंक्याह ॥ योगिनामिति ॥ दूरतइति ॥ शंकरादितिशेषः ॥ ७० ॥

नकेवलंममवाङ्मात्रमपितुवीर्यमपिद्रक्ष्यसीत्यभिप्रेत्यराक्षसआह ॥ अहमिति ॥ इत्युक्तइति ॥ रक्षसेतिशेषः ॥ नृपेति ॥ रक्षः प्रत्युवाचेतिशेषः ॥ किमुवाचेति तदाह ॥ मयेति ॥ वक्तुमिति ॥ युद्धोद्योगइतिशेषः ॥७१॥ क्रियतइति ॥ युद्धमितिशेषः ॥ तत्रहेतुमाह ॥ शक्तिमानिति ॥ त्वमितिशेषः ॥७२॥ प्रक्षेपणसमयेराक्षसोयद्वदत्तदाह ॥ पश्येति ॥ मर्मोक्तिरियं ॥ स्वामिनःशिवस्य ॥७३॥७४॥ शंकरस्यदयालुत्वंप्रकटयति ॥ तावदिति ॥ आविरासप्रादुर्बभूव ॥ आविर्भूयभगवान्किमवदत्तदाह ॥ पश्येति ॥ रक्षार्थमिति ॥ भक्तानामितिशेषः ॥ ७५ ॥ शंकरःस्वकर्तव्यंकथयति ॥ मयेति ॥ एतस्मादिति ॥ एत

अहंचतवस्वामीचयुद्धंचकरवावहै ॥ इत्युक्तःसन्नृपश्रेष्ठोमयावक्तुंनशक्यते ॥ ७१ ॥ त्वयाचक्रियतेतर्हिकर्तव्यंशक्तिमानसि ॥ इत्युक्तःसैन्यमादायराजानंपरिभर्त्स्यतम् ॥ ७२ ॥ करालंकरवालंचपार्थिवेप्राक्षिपत्तदा ॥ पश्यत्वंस्वामिनोऽद्यैवबलंभक्तसुखावहम् ॥ ७३ ॥ इत्युक्त्वातुविहस्यैवराक्षसःसमहाबलः ॥ करवालंपार्थिवेयावत्स्पृशतिनमुनीश्वराः ॥ ७४ ॥ तावच्चपार्थिवात्तस्मादाविरासस्वयंहरः ॥ पश्यभीमेश्वरोहंसरक्षार्थंप्रकटाम्यहम् ॥ ७५ ॥ ममपूर्वंव्रतंह्येतद्रक्षणीयोनृपोमया ॥ एतस्मात्पश्यमेशीघ्रंबलंभक्तसुखावहम् ॥ ७६ ॥ तदीयंचपिनाकेनकरालंशतधाकृतम् ॥ पुनश्चैवत्रिशूलंचक्षिप्तंतेनदुरात्मना ॥ ७७ ॥ तच्छूलंशतधानीतंदुष्टस्यपरमात्मना ॥ पुनश्चशक्तिकाक्षिप्तासाचैवलक्षधाकृता ॥ ७८ ॥ यदस्त्रंचततस्तेनाक्षिप्तंतस्मैमहात्मने ॥ तेनापिचत्रिशूलेनतिलशश्चकृतंक्षणात् ॥ ॥ ७९ ॥ ततश्चैवगणानांचराक्षसानांपरस्परम् ॥ युद्धमासीत्तदाघोरंपश्यतांदुःखमावहम् ॥ ८० ॥ ततश्चपृथिवीसर्वाव्याकुलाह्यभवत्तदा ॥ समुद्राश्चतदासर्वेचुक्षुभुःसमहीधराः ॥ ८१ ॥ ग्रहनक्षत्रताराश्चद्यौश्चैवचतथाविधा ॥ देवाश्चऋषयःसर्वेदुःखिताह्यभवंस्तदा ॥ ८२ ॥ नारदश्चसमागत्यशंकरंदुःखहारकम् ॥ प्रार्थयामासतत्रैवक्षम्यतांशंकरत्वया ॥ ८३ ॥ ॥ ॥ ॥

स्मात्कारणान्मेबलंशीघ्रंपश्येत्यर्थः ॥ इत्युक्तेतिशेषः ॥ ७६ ॥ तदीयंरक्षःसंबंधिकरालंखड्गायुधंपिनाकेनएतन्नाम्न्येनधनुषाशंकरेणेतिशेषः ॥ तेनरक्षसा ॥ ॥ ७७ ॥ क्षिप्तेति ॥ रक्षसेतिशेषः ॥ कृतेति ॥ शंकरेणेतिशेषः ॥ ७८ ॥ तेनरक्षसा ॥ तेनापिशंकरेणापि ॥ ७९ ॥ ततःरक्षःशस्त्रक्षयानंतरम् ॥ दुःखमिति ॥ षष्ठ्यर्थेद्वितीयार्षी ॥ ८० ॥ ८१ ॥ तथाविधाक्षुभिता ॥ ८२ ॥ ८३ ॥ ॥ ॥

ससैन्यरक्षोहननेविलंबोनकर्तव्यइतिनारदःशिवंप्रार्थयते ॥ तृणइति ॥ ८४ ॥ हुंकारेणेति ॥ हुंकाररूपेणास्त्रेणेत्यर्थः ॥ भस्मराशयइति ॥ संजाताइति शेषः ॥ ८५ ॥ तत्रदृष्टांतमाह ॥ दावेति ॥ क्षणादिति ॥ आदग्धमितिशेषः ॥ ८६ ॥ नकेवलमेकोभीमएवदग्धोऽपितुसपरिवारःसोदग्धइत्याह ॥ भीमस्येति ॥ नश्रूयतइति ॥ भीमाख्यरक्षसइतिशेषः ॥ ८७ ॥ ततःशिवस्यक्रोधोनशशामेत्याह ॥ ततइति ॥ फूत्कारात्सकाशात् ॥ ८८ ॥ ततइति ॥ भस्मनःसकाशादित्यर्थः ॥ ८९ ॥ कानितानिकार्याणीतितत्राह ॥ रूपांतरमिति ॥ ततःओषधिभ्यः ॥ रूपांतरमाकारांतरंवेषांतरंवस्त्रालंकारांतरंभवेदितिशेषः ॥

तृणेकश्चकुठारोवैहन्यतांशीघ्रमेवच ॥ इतिसंप्रार्थितःशंभुःसर्वान्रक्षोगणानिति ॥ ८४ ॥ हुंकारेणैवचाऽस्त्रेणभस्मसात्कृतवांस्तदा ॥ सर्वेतेराक्षसादग्धाभस्मराशयएवते ॥ ८५ ॥ दावानलगतोवन्हिर्यथाचवनमादहेत् ॥ तथाशिवेनक्रुद्धेनराक्षसानांवनंक्षणात् ॥ ८६ ॥ भीमस्यैवचकिंभस्मनज्ञातंकेनचित्तदा ॥ सपरिवारस्ततोदग्धोनामनश्रूयतेतदा ॥ ८७ ॥ ततःशिवस्यक्रोधोनशांतिंप्रापमुनीश्वराः ॥ क्रोधज्वालाचफूत्काराग्निःससारवनाद्वनम् ॥ ८८ ॥ राक्षसानांचयद्भस्मसर्वंव्याप्तंवनेतदा ॥ ततश्चौषधयोजातानानाकार्यकरास्तथा ॥ ८९ ॥ रूपांतरंततोयावद्वेषांतरमथापिवा ॥ भूतप्रेतपिशाचादिदूरतश्चततोव्रजेत् ॥ ९० ॥ तत्तत्कार्यंचयच्चैवततोनभवतिद्विजाः ॥ तैर्देवैःप्रार्थितःशंभुःशांतिंसमधिगच्छवै ॥ ९१ ॥ स्थातव्यंस्वामिनाह्यत्रलोकानांसुखहेतवे ॥ अयंवैकुत्सितोदेशओषध्योलोकदुःखदाः ॥ ९२ ॥ भवंतंचतदादृष्ट्वाकल्याणंसंभविष्यति ॥ भीमशंकरनामात्वंभवितासर्वसाधकः ॥ इत्येवंप्रार्थितःशंभुस्तत्रैवस्थितवांस्तदा ॥ ९३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांभीमशंकरमाहात्म्यवर्णनंनामाष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥ ॥ ॥ ॥ ॥

ततःओषधिभ्यःसकाशात् ॥ ९० ॥ रक्षोदेहपरिणामरूपत्वात्ततोमायिककार्यंभवतिपरमसुखकरंकार्यंतुदुर्लभमेवेत्यभिप्रेत्यदेवैःशिवःप्रार्थितइत्याह ॥ तत्तदिति ॥ यद्यस्मादिष्टंकार्यंतत्तत्ततोनभवतीत्यर्थः ॥ किमिष्टंतत्राहुः ॥ स्थातव्यमिति ॥ ९१ ॥ स्वामिनाभवता ॥ लोकदुःखदाइति ॥ रक्षोदेहपरिणामरूपत्वादितिभावः ॥ ९२ ॥ भीमराक्षसस्यनाशनात्तथैवनामाकुर्वन्नित्याह ॥ भीमेति ॥ ९३ ॥ इतिश्रीशिवमहापुराणीयज्ञानसंहिताटीकायांसारबोधिन्यांभीमशंकरमाहात्म्यवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ॥ ॥

ओन्नमःशिवाय ॥ अथविश्वेशमाहात्म्यंपंचक्रोश्यादिसंभवः ॥ ब्रह्मस्वरूपंतादात्म्यंसगुणागुणरूपयोः ॥ १ ॥ सगुणज्ञानतःप्राप्तिर्निर्गुणस्याविमुक्तकम् ॥ लिंगमागमनंकाश्यांशिवस्यचविधेःशिरः ॥ २ ॥ शापात्सारस्वताच्छिन्नंतद्गृहीत्वाकपालकम् ॥ शिवेनमुक्तमत्रैवतीर्थसंगप्रभावतः ॥ ३ ॥ तदादिस्थितवान्देवःकाश्यांविश्वेश्वरःस्वयम् ॥ एवंविधाकथैकोनपंचाशेत्रानिरूप्यते ॥ ४ ॥ अतःपरमिति ॥ अतःपरंभीमशंकरमाहात्म्यवर्णनानंतरम् ॥ विश्वेश्वरस्येति ॥ हेऋषिसत्तमाविश्वेश्वरस्यमाहात्म्यंप्रवक्ष्यामितच्छ्रूयतामितिसंबंधः ॥ कीदृशंमाहात्म्यंतदाह ॥ महापातकेति ॥ ब्रह्महत्यागुर्वंगनागमनसुरापानस्वर्णस्तेयतत्कर्तृसंसर्गरूपाणांपंचानांमहापातकानांनाशकमित्यर्थः ॥ कैमुत्येनोपपातकादीनामपीदमुपलक्षणम् ॥ एतच्छ्रवणेपातकनिवृत्त्याचित्तशुद्धौब्रह्मज्ञानंसुलभमितिभावः ॥ १ ॥ तद्वर्णनायपूर्वोक्तमपिसृष्टिक्रमेकमपिविशेषंवक्तुंपुनस्तंनिरूपयति ॥ यदिदमिति ॥ वस्तुमात्रमिति ॥ सृष्टवस्तुजातमित्यर्थः ॥ तदाशिवतेजःसारमयंपंचक्रोशीतिप्रसिद्धंक्षेत्रमासीदित्यर्थः ॥ अनेनपंचक्रोश्याःसर्वसृष्टवस्तुप्राग्भावित्वंकथितम् ॥ २ ॥ परिमाणविशेषकथने

सूतउवाच ॥ अतःपरंप्रवक्ष्यामिश्रूयतामृषिसत्तमाः ॥ विश्वेश्वरस्यमहात्म्यंमहापातकनाशनम् ॥ १ ॥ यदिदंदृश्यतेकिंचिज्जगत्यांवस्तुमात्रकम् ॥ तत्सर्वंचयदानासीत्पंचक्रोशीतदाशुभा ॥ २ ॥ तदेवकथयाम्यद्यतन्निर्माणंमुनीश्वराः ॥ यदाचनिर्गुणंतेजःसत्यंज्ञानमनंतकम् ॥ ३ ॥ चिदानंदस्वरूपंचनिर्विकारंसनातनम् ॥ ततश्चप्रकृतिर्देवीसापूरुषसमन्विता ॥ ४ ॥ आवाभ्यांकिंचकर्तव्यमावांकेनैवनिर्मितौ ॥ इतिसंशयमापन्नौप्रकृतिपुरुषौयदा ॥ ५ ॥ ताभ्यांवाणीसमुत्पन्नानिर्गुणात्परमात्मनः ॥ तपश्चैवप्रकर्तव्यंततःसृष्टिरनुत्तमा ॥ ६ ॥ प्रकृतिःपुरुषश्चैवतदैतदूचतुस्तथा ॥ तपसश्चस्थलंनास्तिकुत्रवास्थीयतेऽधुना ॥ ७ ॥ ॥ ॥

नतत्क्षेत्रनिर्माणंजिज्ञासितमितितद्वक्तुंप्रथममुत्सहते ॥ तदेवेति ॥ काशीखंडादौप्रसिद्धमेवयत्तत्क्षेत्रनिर्माणंतदेवकथयामीत्यर्थः ॥ अथवा तदेवविश्वेश्वरमाहात्म्यमेववक्तुमितिशेषः ॥ अन्यत्पूर्ववत् ॥ तदाब्रह्ममयंतेजइत्यादिपूर्वोक्तंस्मारयति ॥ यदाचेति ॥ ३ ॥ सत्यंज्ञानमित्यादिश्रुतिवाक्यस्थज्ञानादिपदेमत्त्वर्थीयलक्षणाद्याशंकांनिरस्यति ॥ चिदानंदेति ॥ निर्विकारमिति ॥ परिणामवादेविरूपपरिणामरहितमित्यर्थः ॥ विवर्तवादेतुपरिणामसामान्यशून्यमित्यर्थः ॥ तादृशस्यैव ॥ त्रिकालाबाध्यत्वरूपसत्यत्वंसंभवतीतिबोधयितुमाह ॥ सनातनमिति ॥ पूर्वोक्तमेवस्मारयति ॥ ततश्चेति ॥ ४ ॥ ५ ॥ ताभ्यामिति ॥ तदर्थमित्यर्थः ॥ ननुकीदृशीसावाणीत्यतआह ॥ तपश्चेति ॥ ततःतपश्चरणानंतरं ॥ अनुत्तमेति ॥ सर्वोत्तमेत्यर्थः ॥ भवेदितिशेषः ॥ ६ ॥ तदाश्रवणकालोत्तरं ॥ किमूचतुस्तदाह ॥ तपसइति ॥ स्थीयतइति ॥ आवाभ्यामितिशेषः ॥ ७ ॥ ॥ ॥

तदाप्रभुणैवतत्तपोर्थंस्थलंनिर्मायदत्तमित्याह ॥ ततश्चेति ॥ सर्वोपकरणैरिति ॥ प्रासादारामादिभिरित्यर्थः ॥ ८ ॥ ताभ्यांतदर्थम् ॥ निर्गुणेनपरमात्म नाशिवेन ॥ कुत्रतत्स्थितंतदाह ॥ अंतरिक्षइति ॥ तत्रेति ॥ तत्क्षेत्रमित्यर्थः ॥ अधिष्ठायआश्रयीकृत्य ॥ हरिरिति ॥ पूर्वोक्तपुरुषोनारायणइत्यर्थः ॥ ॥ ९ ॥ तदाज्ञयाशिवप्रेरणया ॥ तत्तपोल्पंनकृतमपितुभूयिष्ठमित्याह ॥ तेनेति ॥ नारायणेनेत्यर्थः ॥ १० ॥ तस्यहरेःश्रमोभूदितिशेषः ॥ ११ ॥ ताभि र्जलधाराभिःसर्वंयावदुत्पन्नं ॥ ततःजलधाराव्यापनानंतरंदृष्ट्वाःजलधाराइत्यर्थः ॥ दृष्ट्वाचविष्णुर्महदाश्चर्यमेनइत्याह ॥ अहोइति ॥ १२ ॥ इत्याश्चर्यमिति ॥ हरेरितिशेषः ॥ दृष्ट्वेति ॥ शिवेनेतिशेषः ॥ ततःकंपनानंतरंप्रभोःशिवस्यकर्णान्मणिःपुरतःहरेरितिशेषः ॥ पतितइतिसंबंधः ॥ अत्रकाशीखंडेविशेषांतरमपिद र्शितं ॥ यन्मयांदोलितोमौलिरहिश्रवणभूषणः ॥ तदांदोलनतःकर्णात्पपातमणिकर्णिका ॥ मणिभिःखचितारम्याततोस्तुमणिकर्णिका ॥ चक्रपुष्करिणीती

ततश्चतेजसःसारंपंचक्रोशात्मकंशुभम् ॥ सर्वोपकारणैर्युक्तंसुंदरंनगरंयथा ॥ ८ ॥ निर्मायप्रेषितंताभ्यांनिर्गुणेन विराजितम् ॥ अंतरिक्षेस्थितंतत्रअधिष्ठायहरिस्स्वयम् ॥ ९ ॥ तपश्चकारविविधंसृष्टिकामस्तदाज्ञया ॥ तेनैवब हुकालंचतपस्तप्तंसुदारुणम् ॥ १० ॥ तपसःकरणाच्चैवश्रमस्तस्यमहात्मनः ॥ श्रमेणजलधाराश्चविविधाश्चाऽभवं स्तदा ॥ ११ ॥ ताभिर्व्याप्तंचसर्वंवैनान्यत्किंचित्प्रदृश्यते ॥ ततश्चविष्णुनादृष्ट्वाअहोकिमेतदद्भुतम् ॥ १२ ॥ इत्या श्चर्यंतदादृष्ट्वाशिरसःकंपनंकृतम् ॥ ततश्चपतितःकर्णान्मणिश्चपुरतःप्रभोः ॥ १३ ॥ यत्राऽसौपतितश्चैवतत्रासीन्म णिकर्णिका ॥ जलौघैःप्लाव्यमानासापंचक्रोशीपुरातना ॥ १४ ॥ निर्गुणेनशिवेनैवत्रिशूलेनधृतातदा ॥ विष्णुरपि चतत्रैवसुष्वापप्रकृत्यासह ॥ १५ ॥ ॥ ॥ ॥

र्थंपुराख्यातमिदंशुभम् ॥ त्वयाचक्रेणखननाच्छंखचक्रगदाधर ॥ ममकर्णात्पपातेयंयदाचमणिकर्णिका ॥ तदाप्रभृतिलोकेत्रख्यातास्तुमणिकर्णिका ॥ श्रीविष्णुरुवाच ॥ युक्ताकुंडलपातेनतवाद्रितनयाप्रिय ॥ तीर्थानांपरमंतीर्थंमुक्तिक्षेत्रमिहास्तुवाइति ॥ १३ ॥ तदाप्रभृतिप्रवृत्तांमणिपतनस्थानसमाख्या माह ॥ यत्रेति ॥ तत्स्थानावाच्छिन्नजलधारायामाणिकार्णिकेतिनामाभवादित्यर्थः ॥ पुरातनेति ॥ क्लीवभावआर्षः ॥ १४ ॥ ननुनिरालंबनातत्क्षेत्रस्थितिः कथमभवदित्याशंक्याह ॥ निर्गुणेनशिवेनेति ॥ निर्गुणत्वेपिलोककल्याणायधृतसगुणरूपेणेत्यर्थः ॥ त्रिशूलेनेति ॥ अतएवत्रिकंटकाविराजितेक्षेत्रइतित त्रप्रसिद्धिः ॥ द्वितीयाध्यायेनारायणस्वापाद्युक्तंतदेवात्रकिंचिदनुवदति ॥ विष्णुरिति ॥ १५ ॥ ॥ ॥

॥ १६ ॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुत्यर्थानुरोधेनाह ॥ यत्किंचिदिति ॥ १७ ॥ शिवेनशंकरस्वरूपात्मकेनअथवाकल्याणरूपेणचेतनाचेतनंस्थावर जंगमात्मकंजगत् ॥ पुनरुक्तिर्दार्ढ्यार्थं ॥ व्याप्तमिति ॥ येनसूर्यस्तपतितेजसेद्धइतिश्रुतेः ॥ १८ ॥ शिवतेजोव्याप्तिरेवसृष्टिप्रयोजिकासंपन्नेत्याह ॥ ततइति ॥ ततःशिवतेजोव्याप्त्यनंतरंसृष्टिकार्यंजगत्तदाकारमाह ॥ चतुर्दशेति ॥ भूरादयःसत्यलोकपर्यंतास्तलादयोरसातलपर्यंतावक्ष्यमाणालोकाश्चतु र्दशभुवनानीत्यर्थः ॥ गोलकेब्रह्मांडगोलके ॥ १९ ॥ एवंसामान्येनब्रह्मांडस्वरूपमुक्त्वापरिमाणमाह ॥ योजनानामिति ॥ विस्तारोव्यासः ॥ २० ॥ एवंचब्रह्मांडस्थितिःप्रागुत्पन्नजलएवदृष्टेत्यत्रदृष्टांतद्वयमाह ॥ यथेति ॥ मसृणोनवनीतमयःगोलःपिंडः ॥ तक्रेपादांबुमिश्रितमथितदध्नि ॥ तक्रंह्युदश्वि

कियत्कालंजलेतत्रसुप्तोऽसौचजनार्दनः ॥ तन्नाभिकमलाज्जातोब्रह्मालोकपितामहः ॥ १६ ॥ शिवाज्ञांचसमासाद्य सृष्टिंचकृतवांस्तदा ॥ यत्किंचिद्दृश्यतेह्यत्रब्रह्मांडेसचराचरम् ॥ १७ ॥ तद्व्याप्तंचविशेषेणशिवेनतेजसातदा ॥ चेतना चेतनंयच्चव्याप्तमासीन्मुनीश्वराः ॥ १८ ॥ ततश्चसृष्टिकार्यंचप्रावर्ततसमंततः ॥ चतुर्दशभुवनानीहजातानिगोल केतदा ॥ १९ ॥ योजनानांचपंचाशत्कोटिसंख्याप्रमाणतः ॥ ब्रह्मांडस्यैवविस्तारोमुनिभिःपरिकीर्तितः ॥ २० ॥ यथाचैवजलेनौश्चतथाब्रह्मांडकंजले ॥ यथाचमसृणोगोलस्तक्रेचपरिदृश्यते ॥ २१ ॥ दिग्गजैश्चधृतंतच्चस्थिरंचप रिवर्तते ॥ मध्येप्रमाणंलर्धंचह्युक्तस्यचऋषीश्वराः ॥ २२ ॥ शेषस्याऽर्धंतथाचोर्ध्वंतथाऽधःपरिभाषितम् ॥ मध्येचभू र्लोकःस्यात्तदधःसप्तकंतथा ॥ २३ ॥ तलंचैवाऽतलंचैवसुतलंवितलंतथा ॥ महातलंचपातालंरसातलमथापिच ॥ ॥ २४ ॥ भूर्लोकादुपरियोवैभुवर्लोकःप्रकीर्तितः ॥ स्वर्लोकादुपरियोवैमहर्लोकःप्रकल्पितः ॥ २५ ॥ ततोजनपद श्चैवतपश्चैवततःपरम् ॥ सत्यंचैवततःप्राहुर्मर्यादापरिकीर्तिता ॥ २६ ॥ ॥ ॥

न्मथितंपादांब्वर्धांबुनिर्जलमित्यमरोक्तेः ॥ ननुनौवत्तस्यवायुनांदोलनमपिस्यादित्याशंक्याह ॥ दिग्गजैरिति ॥ ऐरावतःपुंडरीकइत्यादिभिरष्टासुदिक्षुस्थि तैरित्यर्थः ॥ ब्रह्मांडंत्रेधाविभज्यतदवांतरभागानाह ॥ मध्यइति ॥ उक्तस्यचतुर्दशभुवनयुक्तब्रह्मांडस्यमध्येमध्यप्रदेशेअर्धभागःपरिमाणंकल्पितमित्यर्थः ॥ २२ ॥ शेषस्येति ॥ अवशिष्टस्यार्धद्विधाकल्पितमेकमूर्ध्वप्रदेशेपरमधःप्रदेशइत्यर्थः ॥ अत्रार्धशब्दःखंडवाची ॥ तत्रमध्यप्रदेशवर्तिभुवनानांसंज्ञामाह ॥ मध्येचेति ॥ अधःप्रदेशवर्तिनामधोधःक्रमेणनामान्याह ॥ तदधइति ॥ २३ ॥ २४ ॥ उपरिस्थितानांलोकानामूर्ध्वक्रमेणनामान्याह ॥ भूर्लोकादिति ॥ २५ ॥ २६ ॥

प्रत्येकंभुवनानांविस्तारोवहुपुराणेषुप्रोक्तत्वेनप्रसिद्धत्वान्नोच्यतइत्याह ॥ वहुतरस्येति ॥ भयेनेति ॥ ग्रंथविस्तरभयेनेत्यर्थः ॥ २७ ॥ तत्रजनानांस्व स्वकर्मानुसारिणीस्थितिरभवदित्याह ॥ येषामिति ॥ पुण्यवतांस्वर्गःपापिनांनिरयइतिविवेकः ॥ २८ ॥ अन्यांकांचिद्विशिष्टांरचनांपूर्वोक्तामेवानुवदति ॥ समुद्राइति ॥ क्षीरोदादयःश्रीमद्भागवताद्युक्ताःसागराइत्यर्थः ॥ २९ ॥ ३० ॥ एवंसंक्षेपेणजगत्स्वरूपमुक्त्वातत्रैवब्रह्मणोनुप्रवेशस्यश्रुतत्वात्तत्स्वरूपमपिजिज्ञासितमितितद्वक्तुमुपक्रमते ॥ ब्रह्मणइति ॥ द्विविधमिति ॥ द्वेवावब्रह्मणोरूपेमूर्तंचामूर्तंचेतिश्रुतेः ॥ निर्गुणस्येति ॥ वस्तुतोमायासंवंधरहितस्येत्यर्थः ॥ ३१ ॥ अक्षरक्षरभेदेनरूपद्वैविध्यमाह ॥ एकमिति ॥ तत्रक्षरस्वरूपमाह ॥ दृश्यमिति ॥ दृश्यंजगदात्मकमक्षरेब्रह्मणिलययोग्यमित्यर्थः ॥ अक्षरस्वरूपमाह ॥ अक्षरमिति ॥ निर्गुणमिति ॥ मायासंवंधरहितंसच्चिदानंदरूपमितियावत् ॥ एतदधिगमेनपुनःसंसारः ॥ अव्यक्तो

एकैकस्यचविस्तारोदृश्यतेचमुनीश्वराः ॥ बहुतरस्यभयेनैवनोक्तोग्रंथस्यएवच ॥ २७ ॥ कथितश्चपुराग्रंथेपुनःकिंकथयाम्यहं ॥ येषांयत्राधिकारोस्तितत्रतेचनिवासिनः ॥ २८ ॥ समुद्राःसप्तएवैतेद्वीपानिचतथापुनः ॥ मेर्वाद्यागिरयःश्चाऽन्येनद्यश्चविविधास्तथा ॥ २९ ॥ वनानिचविचित्राणिविविधानितथैवच ॥ ब्रह्मांडेपरिवर्त्ततेउक्तानिचपुरामया ॥ ३० ॥ ब्रह्मणोद्विविधंरूपंनिर्गुणस्यपरात्मनः ॥ एकंचैवाक्षरंब्रह्मक्षरंचाद्वितीयंमतम् ॥ ३१ ॥ दृश्यंचैवक्षरंप्रोक्तंह्यक्षरंनिर्गुणंमतम् ॥ इदंभूतमयंयच्चरूपंचब्रह्मणोविदुः ॥ ३२ ॥ तदेवसगुणंप्रोक्तंमुनिभिस्तत्वदर्शिभिः ॥ निर्गुणेसगुणंचैवसगुणेनिर्गुणंतथा ॥ ३३ ॥ ॥ ॥ ॥

क्षरइत्युक्तःस्तमाहुःपरमांगतिं ॥ यंप्राप्यननिवर्तंतेतद्धामपरमंममेतिभगवद्गीतोक्तेः ॥ प्राधान्येनपूर्वमक्षरस्वरूपंनिर्गुणात्मकंप्रतिपाद्यदृश्यात्मकक्षरस्वरूपं यत्तदेवसगुणमितिदर्शयति ॥ इदमिति ॥ भूतमयमिति ॥ तथाचभगवद्गीतायां ॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षर उच्यतइति ॥ इदंभूतमयंयच्चब्रह्मणोनिर्गुणंविदुरितिपाठे ॥ गुणानांकल्पितत्वेनवस्तुतोगुणशून्यमित्यर्थः ॥ ३२ ॥ नित्यज्ञानाधिकरणत्वादिकंनसिद्धांते सगुणस्यलक्षणंकिंत्वेतदेवेत्यभिप्रेत्याह ॥ तदेवेति ॥ द्वितीयपाठेसगुणनिर्गुणयोरैक्यमेवेत्याह ॥ तदेवेति ॥ तदेवमुनिसंमतिभिःस्पष्टयति ॥ मुनिभिरिति ॥ अनेनसगुणनिर्गुणयोर्भेदोनास्तीतिवोध्यं ॥ द्वितीयाद्वैभयंभवतीतिश्रुतेः ॥ तत्त्वतोऽभिन्नयोरपिनिर्गुणसगुणयोःकल्पितंभेदमादायाधाराधेयभावं दर्शयति ॥ निर्गुणइति ॥ ३३ ॥ ॥ ॥ ॥

कल्पिततादात्म्यादिसंवंधेनसगुणंनिर्गुणेवर्ततेनिर्गुणंचसगुणइत्यर्थः ॥ नन्वनयोर्घटनीलयोरिवानियतःसंवंधःस्यादित्याशंक्याह ॥ परस्परमिति ॥ निर्गुणस
गुणभेदेनरूपद्द्यमपिमिथोनित्यसंवद्धमित्यर्थः ॥ संवंधश्चोपादनोपादेयभावोवाविंवप्रतिविंबभावोवाऽन्योवा ॥ तत्रदृष्टांतान्दर्शयति ॥ यथेति ॥ ३४ ॥
ज्योतिरादित्यादिमंडलं ॥ तेजस्तत्प्रभा ॥ एतत्सर्वंविवेकिज्ञेयमित्याह ॥ विवेकिनइति ॥ केविवेकिनस्तदाह ॥ तत्त्वेति ॥ तत्त्वानांपूर्वोक्तानांप्रकृत्याजाता
नांमूलतत्त्वानांभागेविभागेविचक्षणाःसाधुकथनशीलाः ॥ अथवाब्रह्मतत्त्वप्रतिपादकवेदांतार्थाभिज्ञाः ॥ ३५ ॥ विवेकस्यफलमाह ॥ यैरिति ॥ ततःपरमि
ति ॥ तैर्ज्ञायतएवेतिशेषः ॥ ततःकैवल्यलक्षणामुक्तिर्जायतइत्याह ॥ निर्गुणइति ॥ अनेनमुमुक्षुभिर्गुरुमुपसद्यश्रवणविधानेनतत्त्वविवेकंसंपाद्यमननेनपरो
क्षतयासगुणनिर्गुणब्रह्मतत्त्वंविज्ञायनिदिध्यासेनापरोक्षब्रह्मतत्त्वविज्ञानप्राप्त्याविदेहकैवल्यंलभ्यतइतिदर्शितम् ॥ ३६ ॥ इदानींसगुणोपासनावधिंदर्शयति
तावदिति ॥ सगुणोपासनयामनःसस्थिरीकरणेननिर्गुणज्ञानस्यसुलभत्त्वादितिभावः ॥ निवर्ततइति ॥ अहमाकारांतःकरणवृत्तिविशेषोऽहंभावः ॥ तत्प्रवृत्ताव

परस्परंचसंलग्नंरूपद्वयमथापिच ॥ यथाचमणिसूत्रंचसंलग्नंचपरस्परम् ॥ ३४ ॥ पुष्पंचैवसुगंधश्चज्योतिस्तेजस्त
थैवच ॥ विवेकिनोहिजानंतितत्त्वभागविचक्षणाः ॥३५॥ यैर्ज्ञातंसगुणंब्रह्मनिर्गुणंचततःपरम् ॥ निर्गुणेब्रह्मणिज्ञाते
सगुणाद्धिनिवर्तते ॥३६॥ तावच्चसगुणंधार्यंयावच्चनिर्गुणंनहि ॥ निर्गुणेचतथालब्धेह्यहंभावोनिवर्तते ॥३७॥ निवृत्तेचा
प्यहंकारेजीवभावोनिवर्तते ॥ सर्वंब्रह्ममयंपश्यनूमुच्यतेसर्वकिल्बिषैः ॥३८॥ सोहंसोहंसुविज्ञानंजायतेयोगिनस्तदा ॥

विद्यैवकारणम् ॥ ॥ निर्गुणज्ञानेनाविद्यानिवृत्तौकारणनिवृत्त्याकार्यानुद्भवइतिभावः ॥ ३७ ॥ जीवभावइति ॥ अंतःकरणावच्छिन्नंचैतन्यंजीवः ॥
अंतःकरणमूलाविद्यायामेवानिवृत्तायांजीवभावनिवृत्तिरर्थात्सिध्यतीतिभावः ॥ जीवभावनिवृत्तौकिंभवतीतितदाह ॥ सर्वमिति ॥ सर्वंजगत्ब्रह्मरूपमितिज्ञा
नेनपापनिदानभूतसर्वकर्मनाशोभवतीत्यर्थः ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिभगवदुक्तेः ॥ ३८ ॥ सोहमिति ॥ सईश्वरःअहमेवास्मीत्याका
रकंसुविज्ञानंब्रह्मापरोक्षज्ञानमित्यर्थः ॥ द्विरुक्त्यानिदिध्यासदशायामहंब्रह्मास्मीत्यादिश्रुतिबोधितंयद्ब्रह्मजीवतादात्म्यंतस्यैवमाकारकंपुनःपुनःश्चिंतनंकर्त
व्यमितिदर्शितम् ॥ यद्वासइत्यनेनप्राणवायुप्रवेशशब्दोऽनुकृतोहमित्यनेनचतन्निर्गमशब्दः ॥ तदुक्तंकाशीखंडे ॥ हकारेणवहिर्यातिसकारेणविशेत्पुनरि
ति ॥ जप्यमंत्रोऽयंहंसइत्याकारकइत्यपिदर्शितंतत्रैव ॥ हंसहंसेत्यतोमंत्रंजीवोजपतिसर्वदा ॥ षट्शतानिदिवारात्रौसहस्राण्येकविंशतिः ॥ एतत्संख्यान्वितं
मंत्रंजीवोजपतिसर्वदा ॥ अजपानामगायत्रीयोगिनांमोक्षदायिनीति ॥ एवंसुविज्ञानंयोगाभ्यासेनैवजायतइतिदर्शयति ॥ योगिनइति ॥ ईदृशाधिकार
प्राप्तावेवविधिनिषेधत्यागोनततःपूर्वमित्याह ॥ विधीति ॥ अहरहःसंध्यामुपासीतेत्यादिर्विधिः ॥ नकलंजंभक्षयेदित्यादिर्निषेधः ॥ तयोरनपेक्षत्वंभवतीत्यर्थः

॥ नकर्मणानप्रजयेत्यादिश्रुतेः ॥ ३९ ॥ काशीक्षेत्रवर्णनप्रसंगादुपक्रांतंब्रह्मांडनिर्माणमुपसंहरति ॥ एवमिति ॥ गुणिनेति ॥ गुणोपहितचैतन्यात्मनापरमेश्वरेणशिवेनेत्यर्थः ॥ स्वयमिति ॥ अनेनब्रह्मांडनिर्माणेजीवकर्मभगवदिच्छातिरिक्तकारणव्युदासःसूचितः ॥ नन्वेवंपुनःपुनर्जीवानांसंसारेपातनेनभगवतिवैषम्यनैर्घृण्यापत्तिरित्याशंक्याह ॥ तदेति ॥ ४० ॥ कर्मणाप्रारब्धकर्मणाबद्धाःपरमेश्वरंविस्मृत्यपुत्रकलत्रादिष्वासक्ताःप्राणिनोमांकथंपश्यंतीत्यन्वयः ॥ पश्यंतीति ॥ पश्येयुरित्यर्थः ॥ विचार्यैवेति ॥ अनेनप्राणिहितंविनापंचक्रोशीनिर्माणेभगवतःप्रयोजनांतरंनास्तीतिसूचितम् ॥ एतेनवैषम्यनैर्घृण्येनिरस्ते ॥ ४१ ॥ इयंपंचक्रोशीशुभदामोक्षात्मकशुभफलप्रदा ॥ कुतइतिचेत्तत्राह ॥ कर्मेति ॥ संसारमूलभूतकर्मणांनाशात्संसाराभा

विधिनिषेधराहित्यंभवतीतिसुनिश्चितम् ॥ ३९ ॥ एवंवैचापिब्रह्मांडंनिर्मितंगुणिनास्वयम् ॥ तदाशिवेनलोकानां हितायपरिचिंतितम् ॥४०॥ ब्रह्मांडेकर्मणाबद्धाःप्राणिनोमांकथंपुनः ॥ पश्यंतीतिविचार्यैवपंचक्रोशीविमोचिता ॥ ४१ ॥ इयंचशुभदालोकेकर्मनाशकरीमता ॥ अविमुक्तंस्वयंलिंगंस्थापितंपरमात्मना ॥ ४२ ॥ नकदाचित्त्वयात्याज्यमिदंक्षेत्रंममांशकं ॥ इत्युक्त्वातुत्रिशूलाच्चअवतार्यहरःस्वयं ॥ ४३ ॥ मोचयामासभुवनेमृत्युलोकेमुनीश्वराः ॥ ब्रह्मणोपिदिनेविश्वंविनश्यतिसुनिश्चितम् ॥ ४४ ॥ तदाशिवस्त्रिशूलेनदधातिचमुनीश्वराः ॥ पुनश्चब्रह्मणासृष्टौकृतायांस्थाप्यतेपुनः॥४५॥कर्मणांकर्षणात्सावैकाशीतिपरिकथ्यते ॥ अविमुक्तेश्वरंलिंगंकाश्यांतिष्ठतिनित्यशः॥४६॥

वेनमोक्षस्यसौलभ्यादितिभावः ॥ अत्रभगवतापिस्वविभूत्यात्मकंलिंगंस्थापितमित्याह ॥ अविमुक्तमिति ॥ अविमुक्तनामकमित्यर्थः ॥ काशीखंडेतु यियासुनाचदेवेनमंदरंचित्रकंदरम् ॥ निजमूर्तिमयंलिंगमविज्ञातंविधेरपि ॥ स्थापितंसर्वसिद्धीनांस्थापकेभ्यःसमर्पकम् ॥ विपन्नानांचजंतूनांदातुंनैःश्रेयसींश्रियम् ॥ सर्वेषामिहसंस्थानांक्षेत्रंचैवाभिरक्षितुम् ॥ मंदराद्रिंगतेनापिक्षेत्रंनैतत्पिनाकिना॥विमुक्तंलिंगरूपेणअविमुक्तंततःस्मृतमित्युक्तम् ॥ ४२ ॥ एतत्क्षेत्रसर्जनात्पूर्वमेवाविमुक्तंनिर्मायतंप्रतिभगवानाह॥ नकदाचिदिति॥ममेति ॥यतोममांशभूतमित्यर्थः॥ अवतार्यनिष्कास्य ॥ ४३ ॥ मोचयामाससससर्ज॥ क्षेत्रमितिशेषः॥ मृत्युलोकेस्थितस्यापितस्यनाशोनभवतीत्याह ॥ ब्रह्मणइति ॥ दिनेचतुर्युगसहस्रात्मकेअवसितइतिशेषः ॥ ४४ ॥ एतत्क्षेत्रंतदाकुतोनविनश्यतीतितत्राह ॥ तदेति ॥ पुनश्चेति॥ स्थाप्यते ॥ क्षेत्रमितिशेषः ॥ ४५ ॥ एतत्क्षेत्रस्यकाशीतिनामकथंप्रवृत्तंतदाह ॥ कर्मणामिति ॥ संसारबीजभूतकर्मणामित्यर्थः ॥ कर्षणात्नाशनात् ॥ ४६ ॥ ॥ ॥ ॥

मुक्तिदातेति ॥ अविमुक्तेश्वरलिंगात्माशिवएवमुक्तिप्रदइत्यर्थः ॥ अन्यत्रतीर्थांतरेक्षेत्रांतरेवा ॥ सारूप्याभगवत्तुल्यस्वरूपप्राप्तिरूपा ॥ ४७ ॥ अत्रै
वकाश्यामेव ॥ सायुज्याभगवत्तादात्म्यप्राप्तिरूपा ॥ गतिःसंसारतरणोपायः ॥ पुरीति ॥ गतिरस्तीतिशेषः ॥ ४८ ॥ कथमियमेवगतिस्तत्राह ॥ पंच
क्रोशीति ॥ एवंचसर्वपापनाशनादत्रमोक्षःसुलभइतिभावः ॥ वांछंतीति ॥ मुक्त्यर्थमितिभावः ॥ ४९ ॥ श्लाघ्यतइति ॥ योब्रह्माविष्णुश्चभुक्तिमुक्तिप्रद
त्वेनश्लाघ्यतेवर्ण्यतेसोपीत्यर्थः ॥ एतदादेवांछंतीत्युत्तरेणान्वयः ॥ अथवाश्लाघ्यतेस्तौतिपंचक्रोशीक्षेत्रमितिशेषः ॥ आर्षोयंप्रयोगः ॥ ५० ॥ परिसेव्यत

मुक्तिदाताचलोकानांमहापातकिनामपि ॥ अन्यत्रप्राप्यतेमुक्तिःसारूप्याचमुनीश्वराः ॥ ४७ ॥ अत्रैवप्राप्यतेजी
वैःसायुज्यामुक्तिरुत्तमा ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीपुरी ॥ ४८ ॥ पंचक्रोशीमतापुण्याहत्याकोटिविना
शिनी ॥ अमरामरणंतत्रवांछंतिचमुनीश्वराः ॥ ४९ ॥ ब्रह्माचश्लाघ्यतेचापिविष्णुश्चापितथैवच ॥ मुनयश्चतथाचा
ऽन्येसिद्धाश्चैवतथापुनः ॥ ५० ॥ वांछंतिमानुषाश्चैवसर्वैश्चपरिसेव्यते ॥ काश्याश्चैवतुमाहात्म्यंवक्तुंवर्षशतैरपि ॥
॥ ५१ ॥ नशक्नोमिसदासर्वंतथापिचब्रुवेपुनः ॥ कैलासस्यपतिर्योवैनिर्गुणोगुणवान्भवः ॥ ५२ ॥ आजगामकदा
चिद्वैकाश्यांदेवोमहेश्वरः ॥ वाराणसीमनुप्राप्यदर्शयामासशंकरः ॥ ५३ ॥ अविमुक्तेश्वरंलिंगंदर्शनात्पापहारकम् ॥
अविमुक्तस्यमाहात्म्यंयथाहभगवान्भवः ॥ ५४ ॥ विस्तरेणमयावक्तुंब्रह्मणाचमहात्मना ॥ शक्यतेनैवविप्रेंद्रा
वर्षकोटिशतैरपि ॥ ५५ ॥ अविमुक्तोपितंदृष्ट्वाआनंदंपरमंगतः ॥ पूजयामासतंदेवंपार्वत्यासहशंकरम् ॥ ५६ ॥ नम
स्कारैस्तवैर्मंत्रैर्देवदेवंजगत्पतिम् ॥ प्रणिपातैरनेकैश्चत्वदीयोऽस्मिनसंशयः ॥ ५७ ॥ ॥

इति ॥ अतइतिशेषः ॥ ५१ ॥ एवंकाशींवर्णयित्वापूर्वोक्ताविमुक्तलिंगमाहात्म्यमाह ॥ कैलासस्येति ॥ निर्गुणइति ॥ वस्तुतोगुणैरसंबद्धोपिभक्तानुग्रहा
र्थंस्वीकृतगुणइत्यर्थः ॥ ५२ ॥ दर्शयामासेति ॥ स्वरूपमितिशेषः ॥ ५३ ॥ किंतत्स्वरूपंतदाह ॥ अविमुक्तेश्वरमिति ॥ किमर्थंदर्शयामासेतितदाह ॥ दर्श
नादिति ॥ अविमुक्तमाहात्म्यंसूतःप्रशंसति ॥ अविमुक्तस्येति ॥ भवःशंकरः ॥ ५४ ॥ ब्रह्मणाचेति ॥ ब्रह्मणापीत्यर्थः ॥ तथेतिशेषः ॥ वक्तुंनैवशक्यतइत्य
न्वयः ॥ ५५ ॥ तंशिवंपूजयामास ॥ ५६ ॥ नमस्कारादिभिरविमुक्तःशिवंपूजयित्वाप्रार्थयते ॥ त्वदीयइति ॥ त्वमेवममस्वामीनान्यइतिफलितम् ॥ ५७ ॥

कासाकृपेतितामाह ॥ स्थातव्यमिति ॥ अत्रेतिशेषः ॥ ५८ ॥ अविमुक्तोपीति ॥ अविमुक्तःस्वयंशंकरानुगृहीतोपिलोकार्थमेवंकृतवानितिभावः ॥ एत
च्चरणंशंकरचरणंमोचितुंमोक्तुंनैवशशाकेत्यध्याहृतेनान्वयः ॥ ५९ ॥ ततःकिमपिप्रार्थितवांस्तदाह ॥ काश्येवेति ॥ ध्यानितयाध्याननिष्ठत्त्वेनस्वस्यअ
चिंत्यसुखहेतवेअचिंत्यसुखंमुक्तिस्तदर्थमित्यर्थः ॥ एतेनाविमुक्तमितियथार्थनामेतिसूचितम् ॥ ६० ॥ मय्येवकिमर्थंस्थेयंतत्राह ॥ मुक्तिदातेति ॥ नान्यथे
ति ॥ अन्यप्रकारेणमुक्तिःक्वापिनभवतीत्यर्थः ॥ तदेतदुपसंहृत्यप्रार्थयते ॥ तस्मादिति ॥ ६१ ॥ तेनअविमुक्तेन ॥ ६२ ॥ कपालेति ॥ वक्ष्यमाणब्रह्म

कृपांकुरुत्वंदेवेशलोकानांहितकाम्यया ॥ स्थातव्यंचत्वयादेवप्रार्थयामिजगत्पते ॥ ५८ ॥ अविमुक्तोपिहितदासंप्रा
र्थ्यचपुनःपुनः ॥ नेत्राश्रूणिप्रमुच्यैतच्चरणंनैवमोचितुम् ॥ ५९ ॥ काश्येवचत्वयादेवराजधानीप्रगृह्यताम् ॥ म
याध्यानितयास्थेयमचिंत्यसुखहेतवे ॥ ६० ॥ मुक्तिदाताभवान्लोकेवर्ततेनाऽन्यथाक्वचित् ॥ तस्मात्त्वमुपकाराय
तिष्ठोमासहितःसदा ॥ ६१ ॥ अखिलान्जीवसंघातांस्तारयत्वंसदाशिव ॥ इत्येवंप्रार्थितस्तेनतस्थौदेवोजगत्पतिः
॥ ६२ ॥ लोकानामुपकारार्थंकपालमुक्तिहेतवे ॥ इत्येवंवचनंश्रुत्वाऋषयोनिर्मलाशयाः ॥ ६३ ॥ पप्रच्छुःपरयाभ
क्त्याकपालंकिंब्रवीषिनः ॥ सूतउवाच ॥ साधुपृष्टमृषिश्रेष्ठाःकथयामियथाश्रुतम् ॥ ६४ ॥ पुराकदाचिद्देवेशःशंकरः
प्रियकाम्यया ॥ बभ्रामगिरिजासार्द्धंब्रह्मलोकमुपागतः ॥ ६५ ॥ ब्रह्माचापितदातंवैबहुमानपुरःसरम् ॥ पूजयामा
सदेवेशमातिथ्यैर्धर्महेतवे ॥ ६६ ॥ पश्चात्तुष्टावतंदेवंचतुर्भिश्चमुखैस्तदा ॥ एकेनैवमुखेनैवदुःशब्दंश्रुतवांस्तदा ॥
॥ ६७ ॥ दृष्ट्वाचतुर्मुखानीहसंतुष्टोभगवान्भवः ॥ पंचमंदुर्मुखंदृष्ट्वादुःखितःशंकरस्तदा ॥ ६८ ॥ अहोदुष्टंमुखंह्येत
च्छिनद्मिसुविचारयन् ॥ इतिविचार्यतत्रैवाशिवोऽपिशिवकृन्नृणाम् ॥ ६९ ॥ ॥ ॥

कपालमुक्त्यर्थमित्यर्थः ॥ ऋषयःशौनकादयः ॥ ६३ ॥ ६४ ॥ गिरिजासार्धमिति ॥ गिरिजयासहेत्यर्थः ॥ ६५ ॥ तंशिवम् ॥ आतिथ्यैःअतिथिसत्का
रार्थोपचारैः ॥ क्रमादातिथ्यातिथेयेअतिथ्यर्थेत्रसाधुनीत्यमरः ॥ ६६ ॥ दुःशब्दमपशब्दम् ॥ ६७ ॥ चतुर्मुखानीति ॥ यैस्तुष्टावतानीत्यर्थः ॥ पंच
ममिति ॥ येनदुःशब्दंश्रुतवांस्तादित्यर्थः ॥ शंकरइति ॥ चिंतयामासेतिशेषः ॥ ६८ ॥ किंचिंतयामासेतितदाह ॥ अहोइति ॥ सुविचारयन्निति ॥ छेद
नंविनान्यउपायोनास्तीतिसम्यग्विचारयन्नित्यर्थः ॥ विचार्यनिश्चित्य ॥ शिवकृदिति ॥ अनेनव्यालदंशक्षणेतदंगच्छेदाद्दुःखनिवृत्तिरिवदुष्टशिरश्छेदनेनब्रह्म
णोदुःखनिवृत्तिरेवकृतेत्यपिसूचितम् ॥ ६९ ॥ ॥ ॥ ॥ ॥

अघोरयाभक्तानामभीषणयादंष्ट्यातृतीयनेत्रेणेत्यर्थः ॥ प्रपीडयन्भयंप्रापयन्चिच्छेदेतिपूर्वेणसंबंधः ॥ कृतकर्मफलमीश्वरोपिमोक्तुंनशक्नोतीतिदर्शयति ॥ जगामेति ॥ पृष्ठतःपृष्ठभागेलग्नंसंयुक्तम् ॥ कपालंशिरः ॥ ७० ॥ ननुसर्वशक्तियुक्तस्येश्वरस्येदृशक्षुद्रदोषनिराकरणेसामर्थ्यंकिंनास्तीत्याशंक्याह ॥ समर्थोपीति ॥ तस्यकपालस्य ॥ ७१ ॥ तेनैवकपालेनैव ॥ ७२ ॥ गतमिति ॥ पृष्ठसंलग्नत्वादितिभावः ॥ महिमानंस्वसामर्थ्यं ॥ ७३ ॥ तत्रकाश्याम् ॥ दूरतःस्थितमिति ॥ तत्क्षेत्रमाहात्म्यादितिभावः ॥ तदेवशिवविचारितमनुवदति ॥ अहोइति ॥ कीदृशमिति ॥ स्वयंमनसिकीदृशामितिविचारयन्नित्युत्तरेणान्वयः ॥ ७४ ॥ वृत्तंक्षेत्रस्यचरित्रंख्यापयन्प्रसिद्धिंप्रापयन्लोकेशस्तस्थावित्यन्वयः ॥ तत्रैव ॥ काश्यामेव ॥ अविमुक्तेति ॥ अनेनस्ववर्धितस्यमा

चिच्छेदतच्छिरस्तत्रब्रह्मणोदुर्विभाषिणः ॥ अघोरयातदादंष्ट्याब्रह्माणंचप्रपीडयन् ॥ ७० ॥ जगामपृष्ठतोलग्नंक
पालंब्रह्मणस्तदा ॥ समर्थोऽपिशिवस्तस्यदहनेचमुनीश्वराः ॥ ७१ ॥ लोकानामुपकारार्थंभ्रांतांतांपृथिवीमिमां ॥
बभ्रामसर्वंलोकेषुतेनैवसहितःशिवः ॥ ७२ ॥ यत्रयत्रसवैयातितत्रतत्रगतंशिरः ॥ विचार्यभगवांस्तत्रमहिमानंप्र
काशयन् ॥ ७३ ॥ आजगामयदातत्रशिरश्चदूरतःस्थितम् ॥ अहोक्षेत्रस्यमाहात्म्यंकीदृशंमनसिस्वयम् ॥ ७४ ॥
विचारयंस्तदालोकेख्यापयन्वृत्तमद्भुतम् ॥ तस्थौतत्रैवलोकेशअविमुक्तेश्वराज्ञया ॥ ७५ ॥ इतितस्यवचःश्रुत्वापु
नस्तंचमुनीश्वराः ॥ पप्रच्छुःसंशयात्मानःकथंब्रह्ममुखंत्विदम् ॥ ७६ ॥ सूतउवाच ॥ पुराब्रह्माविमोहेनसरस्वत्यारू
पमद्भुतम् ॥ दृष्ट्वाजगामतांपश्चात्तिष्ठेतिविव्हलःस्वयम् ॥ ७७ ॥ तद्वचनंतदापुत्रीश्रुत्वाकोपसमन्विता ॥ उवाचकिंब्रवी
षित्वंमुखेनाऽशुभभाषिणा ॥ ७८ ॥ ब्रवीषिचेद्विरुद्धंवैविभाषीभवसर्वदा ॥ तद्दिनंहिसमारभ्यपंचमेनमुखेनच ॥ ७९ ॥

हात्म्यंप्रथमंस्वयमेवरक्षणीयमितिसूचितम् ॥ ७५ ॥ तस्यसूतस्य ॥ संशयात्मानःसंशययुक्तात्मानः ॥ संशयमेवव्यनक्ति ॥ कथमिति ॥ ब्रह्मणोमहानुभावत्वेनतस्येदंमुखंकथंविरुद्धभाष्यभवदित्यर्थः ॥ ७६ ॥ ब्रह्मणोमुखेविरुद्धवाचःप्राप्तौकारणीभूतमितिहासमाह ॥ पुरेति ॥ सरस्वत्याःस्वपुत्र्याः ॥ दृष्ट्वेति ॥ अद्भुतंरूपंदृष्ट्वातांजगाम ॥ तस्याःपश्चात्स्थित्वास्वयंविव्हलोभूत्वातिष्ठेत्युवाचेत्यध्याहृतेनान्वयः ॥ बलवानिंद्रियग्रामोविद्वांसमपिकर्षतीतिन्यायादितिभावः ॥ ७७ ॥ कोपहेतुकंशापंदातुमुपक्रमते ॥ किमिति ॥ ७८ ॥ विरुद्धमिति ॥ पुत्रीरूपमद्विलासेच्छयाधर्मशास्त्रविरुद्धम् ॥ ब्रवीषिचेद्विरक्त इतिपाठेविशेषेणानुरक्तइत्यर्थः ॥ विभाषीति ॥ विरुद्धभाषीत्यर्थः ॥ ७९ ॥ ॥ ॥

खरतरंअतिकठोरं ॥ अतोभगवतातच्छिरश्छिन्नमित्याह ॥ पश्चादिति ॥ ८० ॥ परस्यपरब्रह्मणः ॥ स्वयमिति ॥ परमात्मनःस्मरणादिविनापापंदूरीकृतं नभवेदित्यर्थः ॥ ८१ ॥ ननुनिरंजनःशिवःकथंतेनलिप्तइत्यत्रकारणमाह ॥ तत्कारणमिति ॥ श्रेष्ठइति ॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनइतिगीतायाम पि ॥ ८२ ॥ करोतिउपदेशद्वारापरवुद्धावारोपयति ॥ चरतिस्वयमप्याचरति ॥ किमर्थंतदितिचेत्तत्राह ॥ प्रमाणेति ॥ सदाचारस्यप्रामाण्यरक्षणायेत्यर्थः ॥ मानुषस्यैवयस्तुतःपातकसंबंधइतिबोधनायकैमुत्येनार्थवादमाह ॥ ईश्वरस्येति ॥ नरेणेति ॥ नरेणमनुष्येणकिंकर्तव्यमित्यर्थः ॥ एवंचभक्तजनशिक्षार्थंभग

ब्रह्माचभाषतेदुष्टंशब्दंखरतरंतदा ॥ पश्चाच्छिवेनतच्छिन्नंदुष्टभाषियतोऽभवत् ॥ ८० ॥ शिवोऽपिस्मरणेनैवभजने नपरस्यच ॥ पापंदूरीकरोतीहस्वयंदूरीकृतंनहि ॥ ८१ ॥ तत्कारणंचश्रूयतामृषयःकथयाम्यहम् ॥ श्रेष्ठश्चाचरति यत्तत्तदेवचनरःपुनः ॥ ८२ ॥ करोतिचरतियच्चप्रमाणरक्षणायवै ॥ ईश्वरस्यतदालग्नंपातकंकिंनरेणहि ॥ ८३ ॥ शिवस्यतीर्थसंयोगाच्छिरश्चदूरतःस्थितम् ॥ तस्मात्तीर्थवरंह्येतन्महापातकनाशनम् ॥ ८४ ॥ इत्येवज्ञापितंलोकेमा हात्म्यंतीर्थसंभवम् ॥ अथवाईश्वरस्येच्छांकश्चजानातिचेष्टितम् ॥ ८५ ॥ क्वाऽनंगदहनंचैवक्वांऽगेयुवतिधारणम् ॥ कंठेविषंधृतंयेनमृत्युंजयउदाहृतः ॥ ८६ ॥ दिगंबरःस्वयंचैवभक्तेभ्योह्यचलांश्रियम् ॥ स्वसैन्यंचपिशाचाश्चभक्ता नांचचतुर्विधम् ॥ ८७ ॥ स्वांगेचरुंडमालावैभक्तानांमौक्तिकानिच ॥ चिताभस्मनिजस्यैवभक्तेभ्यश्चंदनंददेत् ॥ ८८ ॥ स्ववाहनंवृषश्चैवभक्तानांहस्तिकानथ ॥ स्ववाद्यंचैवगल्लादिभक्तानांचानकानथ ॥ ८९ ॥ स्वशिरसिजटादिव्याभ भक्तानांमुकुटादिकम् ॥ स्वभूषणंचसर्पादिभक्तानांकुंडलादिकम् ॥ ९० ॥ ॥ ॥

वतस्तथाचरणमितिभावः ॥ ८३ ॥ तीर्थमाहात्म्यंप्रशंसति ॥ शिवस्येति ॥ ८४ ॥ ननुशिवमाहात्म्यादपितीर्थमाहात्म्यमधिकंनयुक्तंतीर्थस्यशिवेनैवकृत त्वादित्यरुचेराह ॥ अथवेति ॥ ८५ ॥ भगवदिच्छाचेष्टितयोर्लोकदुर्ज्ञानत्वेबीजभूतंभगवन्निष्ठक्रियादिवैषम्यमाह ॥ क्वेति ॥ क्वांगइति ॥ क्वार्धेयुवतिधार णमितिपाठांतरम् ॥ कंठइति ॥ धृतमृत्युंजयपदाभ्यांविषस्यमरणनिमित्तत्वेप्यत्रतद्वैपरीत्यमितिबोध्यते ॥ ८६ ॥ श्रियमिति ॥ ददातीतिशेषः ॥ एवमग्रेपि ॥ चतुर्विधमिति ॥ हस्त्यश्वरथपादातरूपमित्यर्थः ॥ ८७ ॥ रुंडमालानरमस्तकमाला ॥ निजस्यस्वस्य ॥ ददेत्ददेत ॥ ८८ ॥ आनकाःपटहाः ॥ ८९ ॥ ९० ॥

चर्मादिगजचर्मादि ॥ सुंदरांबरंपट्टवस्त्रादि ॥ ९१॥ भगवच्चेष्टितादेर्दुर्ज्ञानत्वमुक्तमुपसंहरति ॥ तस्मादिति ॥ तच्चेष्टितंशिवचरित्रम् ॥ ९२॥प्रकृतमाह ॥ पंचेति॥ नन्वेवंतत्क्षेत्रवासमात्रेणैवमुक्तिर्भवेत्किंशिवोपासनयेत्याशंक्याह ॥ अथवेति॥ ९३ ॥समास्थायसंप्राप्य॥यथातथेति॥सर्वविधयेत्यर्थः॥ ९४॥पंचक्रोश्याधन्यत्वेहेतुमाह ॥ यत्रेति ॥ ९५ ॥ श्रेतष्ठरेति ॥ एवंचकाशीस्वयंश्रेष्ठापिशिवास्थित्याश्रेष्ठतराभवदित्यर्थः ॥ एतदाख्यानश्रवणफलमाह ॥ यइदमिति ॥ ९६ ॥

स्वस्यवस्त्रंचचर्मादिभक्तेभ्यःसुंदरांबरम् ॥ स्वयंदधातिचाऽन्यच्चभक्तानांचान्यदेवच ॥ ९१ ॥ यथाभिलाषंभक्तेभ्यः शंकरःसंप्रयच्छति ॥ तस्मात्तच्चेष्टितंनैवज्ञातुंशक्यंमुनीश्वराः ॥ ९२ ॥ पंचक्रोश्याःपरंनाऽन्यत्क्षेत्रंचभुवनत्रये ॥ अथवापापिनांपापस्फोटनायस्वयंहरः ॥ ९३ ॥ मृत्युलोकेशुभंक्षेत्रंसमास्थायास्थितःसदा ॥ यथातथापिधन्येयंपंचक्रोशीमुनीश्वराः ॥ ९४ ॥ यत्रविश्वेश्वरोदेवोह्यागत्यसंस्थितःस्वयम् ॥ यद्दिनंहिसमारभ्यहरःकाश्यामुपागतः ॥ ॥९५॥ तद्दिनंहिसमारभ्यकाशीश्रेष्ठतराह्यभूत् ॥ एतद्वश्चसमाख्यातंयत्पृष्टोहंमुनीश्वराः ॥ यइदंशृणुयान्नित्यंसर्वान्कामान्समाप्नुयात् ॥९६॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांकाशीवर्णनंनामैकोनपंचाशत्तमोऽध्यायः ॥४९॥ ॥ ऋषयऊचुः॥ एवंवाराणसीपुण्यायदिसूतमहामुने ॥ वक्तुमर्हसिचाऽस्माकंप्रभावंतस्यसांप्रतम् ॥१॥ सूतउवाच ॥ वक्ष्येसंक्षेपतःसम्यग्वाराणस्याःसुशोभनं ॥ विश्वेश्वरस्यमाहात्म्यंश्रूयतामृषिसत्तमाः ॥ २ ॥ कदाचित्पार्वतीदेवंशंकरंपरयामुदा ॥ पंचक्रोश्याश्चमाहात्म्यंपप्रच्छलोककाम्यया ॥ ३॥ पार्वत्युवाच ॥ अस्यक्षेत्रस्यमाहात्म्यंवक्तुमर्हस्यशेषतः ॥ ममोपरिकृपांकृत्वादेवदेववृषध्वज ॥ ४ ॥ देव्यास्तद्वचनंश्रुत्वादेवदेवोजगत्प्रभुः ॥ उवाचवचनंतत्रजीवानांप्रियहेतवे ॥ ५ ॥ श्रीभगवानुवाच ॥ साधुपृष्टंत्वयाभद्रेलोकानांसुखदंशुभम् ॥ कथयामियथैतस्यमाहात्म्यं श्रूयतांपुनः ॥ ६ ॥ इदंगुह्यतमंक्षेत्रंसदावाराणसीमम ॥ सर्वेषामेवजंतूनांहेतुर्मोक्षस्यसर्वदा ॥ ७ ॥

इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांकाशीवर्णनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ॐनमःशिवाय ॥ गौरींप्रतिशिवेनोक्तंक्षेत्रमाहात्म्यकंतथा ॥ गोप्रेक्षेशादिमाहात्म्यंपंचाशेत्रनिरूप्यते ॥ १ ॥ तस्यक्षेत्रस्य ॥ १ ॥ २ ॥ लोककाम्ययालोककल्याणेच्छया ॥ ३ ॥ ४ ॥ प्रियहेतवेइष्टसिध्यर्थम् ॥ ५ ॥ एतस्यक्षेत्रस्य ॥ ६ ॥ गुह्यतममतिगोप्यमितिमाहात्म्यंविशेषणम् ॥ सर्वेषामिति ॥ कीटपतंगादीनामपीत्यर्थः ॥ ७ ॥

अस्मिन्क्षेत्रेसिद्धाःयोगसिद्धियुक्ताः ॥ व्रतचिन्हमाह ॥ ममलिंगधराइति ॥ भस्मरुद्राक्षादिधारिणइत्यर्थः ॥ नानालिंगधराइत्यपिपाठः ॥ किमर्थमिदंव्र तमास्थिताइतितत्राह ॥ ममेति ॥ ८ ॥ एवंबाह्यंसाधनमुक्त्वाभ्यंतरमाह ॥ अभ्यस्यंतीति ॥ योगंचित्तवृत्तिनिरोधम् ॥ ननुचलचित्तानांकथंयोगसिद्धिरत आह ॥ यतात्मानइति ॥ शमदमादियुक्ताइत्यर्थः ॥ क्षेत्रंविशिनष्टिसार्धेन ॥ नानेति ॥ ९ ॥ कमलानिसहस्रपत्रादीनिउत्पलानिकुवलयानि ॥ १० ॥ नहि मह्यमिदंस्वरूपसौंदर्यादिनारोचतेअपितुमद्भक्तानांमोक्षप्राप्तिरूपकार्येणैवेत्याशयेनाह ॥ रोचतइति ॥ कथमत्रभक्तानांमोक्षप्राप्तिरूपंकार्यंभवतितदाह ॥ मन्मनाइति ॥ मयीति ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति भगवद्गीताद्युक्तरीत्येतिभावः ॥ ११ ॥ वीतरागभय क्रोधस्त्यक्तलोकप्रीतिभीतिद्वेषोऽतएवनिर्द्वंद्वः ॥ सुखदुःखादिद्वंद्वरहितोऽतएवविमत्सरःपरोत्कर्षसहनशीलः ॥ अध्यात्मनिरतोब्रह्मनिष्ठः ॥ तत्त्वानांपूर्वोक्तचतु

अस्मिन्सिद्धाःसदादेविमदीयंव्रतमास्थिताः ॥ ममलिंगधरानित्यंममलोकाभिकांक्षिणः ॥ ८ ॥ अभ्यस्यंतिपरंयो गंयतात्मानोजितेंद्रियाः ॥ नानावृक्षसमाकीर्णंनानाविहगसेवितम् ॥ ९ ॥ कमलोत्पलपुष्पाद्यैःसरोभिःसमलंकृत म् ॥ अप्सरोरगगंधर्वैःसदासंसेव्यतेशुभम् ॥ १० ॥ रोचतेमेसदावासोयेनकार्येणतच्छृणु ॥ मन्मनाममभक्तश्चम यिसर्वार्पितक्रियः ॥ ११ ॥ वीतरागभयक्रोधोनिर्द्वंद्वश्चविमत्सरः ॥ अध्यात्मनिरतोनित्यंतत्त्वानांचविवेचकः ॥१२॥ सर्वंचमन्मयंपश्यन्योऽयंसोऽहंस्वयंहरः ॥ दुःखेदुःखीभवेन्नैवसुखेसुखीभवेन्नहि ॥ १३ ॥ शुभंप्राप्यनतद्दृष्येतह्यशु भेद्विषतेनहि ॥ तस्यममैवभेदोनसयत्रतीर्थमुत्तमम् ॥ १४ ॥ ॥ ॥ ॥

र्विंशतिसंख्यानांविवेचकोविवेककारी ॥ १२ ॥ अत्रमन्मनाइत्यादिनानित्यमित्यंतेनश्रवणविधिसाधनकथनात्श्रवणविधिर्दर्शितः ॥ तत्त्वानामित्यनेनचमनन विधिः ॥ निदिध्यासप्रकारमाह ॥ सर्वमिति ॥ सर्वंजगत् ॥ मन्मयमिति ॥ अध्यस्तगुणरूपेणेदंजगत्तुच्छमपिसदादिस्वरूपेणब्रह्मणाऽनुप्रविष्टत्वाद्ब्रह्मप्रचु रंपश्यन्नित्यर्थः ॥ अयंपरोक्षब्रह्मज्ञानसाधनोपायोदर्शितोऽस्यामेवनिदिध्यासदशायामपरोक्षब्रह्माभेदाववबोधोभाव्योऽतस्तमेवभावनाविषयत्वेनोपदिशति ॥ योयमिति ॥ योयमस्मिंसोऽहंस्वयंहरएवास्मीतिभावयित्वासर्वंजगत्मदात्मकंपश्यंस्तिष्ठेदित्यध्याहृतेनसंबंधः ॥ अहंब्रह्मास्मीत्यादिमहावाक्यार्थानुसंधानेना ऽपरोक्षब्रह्मज्ञानंसंपादनीयमितितात्पर्यार्थः ॥ वीतरागेत्याद्युक्तंस्वयमेवप्रपंचयति ॥ दुःखइति ॥ १३ ॥ द्विषतइति ॥ आर्षरूपम् ॥ द्वेष्टीत्यर्थः ॥ उक्तलक्षण युक्तमेतत्क्षेत्रवासिनंप्रशंसति ॥ तस्येति ॥ तस्यममचभेदोनैवेत्यर्थः ॥ सयत्रेति ॥ यत्रसतिष्ठतिसदेशउत्तमंतीर्थमित्यर्थः ॥ १४ ॥ ॥

किंवहुनाअस्मदादीनामपिपावनंसकरोतीत्याह ॥ तद्दर्शनमिति ॥ कामयंतीतिपरस्मैपदमार्षम् ॥ १५ ॥ अंतकालेमरणकाले ॥ यस्यैवपुरुषस्यपार्श्वे समीपेपरिविवर्ततेव्याकुलीभूयतिष्ठतितस्यपुरुषस्य ॥ कैमुत्येनाह ॥ स्वस्येति ॥ नभवेत्किमपितुभवेदेवेतिकाकुः ॥ १६ ॥ आत्मज्ञानेनप्रलीनसक लवंधनमूलाविद्यस्यतीर्थाद्यपेक्षानास्तीत्याह ॥ तस्येति ॥ विहितेति ॥ विधिनिषेधातीतइत्यर्थः ॥ १७ ॥ निश्चितमिति ॥ वंधहेत्वविद्यानाशादिति भावः ॥ विशेषइति ॥ तीर्थांतरापेक्षयाऽऽधिक्यमित्यर्थः ॥ १८ ॥ कोविशेषस्तमाह ॥ ब्राह्मणइत्यादिना ॥ अत्रमृतइतिमोक्षभाजीतिचप्रत्येकंसंवध्यते ॥ १९ ॥ एवंसर्ववर्णाश्रमिणामेतत्क्षेत्रवासाधिकारमुक्त्वावालादीनामप्यर्थवादमुखेनतमाह ॥ वालइत्यादिना ॥ वालःषोडशवर्षात्न्यूनवयस्कः ॥ कुमारीअनूढा ॥ २० ॥ रजोदोषयुतारजस्वला ॥ संस्कारैर्जातकर्मादिभिः ॥ २१ ॥ अन्यत्रकर्माणिबध्नंतिअत्रतुनेत्याह ॥ कर्मेति ॥ कर्ममूला

तद्दर्शनंह्यहंविष्णुर्ब्रह्माचापितथापुनः ॥ कामयंतिचतीर्थानिपावनायात्मनस्तदा ॥ १५ ॥ सोंऽतकालेचयस्यैवपार्श्वे परिविवर्तते ॥ तस्यमुक्तिर्भवेन्नूनंस्वस्यकिंनभवेत्पुनः ॥ १६ ॥ तस्यापेक्षानतीर्थस्यनममैवहरेरपि ॥ जीवन्मुक्तःस विज्ञेयोविहिताविहितेसमः ॥ १७ ॥ यत्रयत्रमृतःसोपिमोक्षमाप्नोतिनिश्चितम् ॥ अत्रतीर्थेविशेषोऽस्तिश्रूयतांसु दरिलया ॥ १८ ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवतथापुनः ॥ ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तदा ॥ १९ ॥ बा लश्चैवकुमारश्चयौवनान्वितएवच ॥ अशुचिश्चैवबालापिकुमारीपतितातथा ॥ २० ॥ विधवावाथवंध्यावारजोदोष युतापिवा ॥ सूतिकालेमृतावापिसंस्कारैरहितातथा ॥ २१ ॥ अपापश्चसपापोवाकर्मबंधगतोऽथवा ॥ अत्रचेच्चमृ तःस्याद्वैमोक्षभाजीनसंशयः ॥ २२ ॥ स्वेदजश्चांडजोवापिह्युद्भिदोऽथजरायुजः ॥ मृतोमोक्षमवाप्नोतिअत्राऽन्यत्र तथाक्वचित् ॥ २३ ॥ कर्मबंधगतोयोवैदेहीमोक्षायकल्पते ॥ ज्ञानापेक्षानचात्रैवध्यानापेक्षानकर्हिचित् ॥ २४ ॥

विद्यापाशवद्धोपीत्यर्थः ॥ मोक्षभाजीति ॥ णिनिप्रत्ययबोधितताच्छील्येनात्रनिष्प्रत्यूहनिःश्रेयससिद्धिर्बोधिता ॥ तामेवद्रढयति ॥ नेति ॥ २२ ॥ सिद्धिर्मनुष्याणामेवेतिनअपितुतिरश्चामपिभवतीत्याह ॥ स्वेदजइति ॥ स्वेदजाःकृमिदंशाद्याःपक्षिसर्पादयोंडजाः ॥ उद्भिदस्तरुगुल्माद्याइत्यमरः ॥ जरायुजःमनुष्यः ॥ अन्यत्रेति ॥ अन्यस्मिन्क्वचिदेवक्षेत्रादौतेनप्रकारेणमोक्षंप्राप्नोतीत्यर्थः ॥ २३ ॥ मोक्षप्राप्तौज्ञानभक्तिकर्मप्राग्भवीयसंस्कारदानध्या नादिसाधनान्यनेकाचार्यैरन्यत्रश्रुत्याद्युपदेशेनवोधितानि ॥ अत्रतुमरणमेवपरंसाधनम् ॥ यतःसाक्षाद्विश्वेश्वरएवतारकमंत्रस्योपदेष्टाऽतःसएवकर्मबंधनिव र्त्यमोक्षंप्रयच्छतीत्याशयेनाह ॥ कर्मबंधेत्यादिना ॥ ज्ञानापेक्षेति ॥ स्वजनानामित्यग्रिमानुषंगः ॥ स्वभक्तजनानामित्यर्थः ॥ एवमग्रेऽपि ॥ २४ ॥

॥ २५॥ गुह्यतममिति ॥ दुर्ज्ञानमहिमेत्यर्थः ॥ अतस्तादृशाज्ज्ञानिनएवजानंतीत्याह ॥ ब्रह्मादयइति ॥ सिद्धायोगिनः ॥ २६ ॥ गतिर्मोक्षप्राप्तिरूपा ॥ अविमुक्तशब्दार्थमाह ॥ विमुक्तमिति ॥ मोक्ष्यइति ॥ अनेनकालत्रयेप्यत्रस्थितिर्दर्शिता ॥ २७ ॥ नैमिषादिषुस्नानेनसंसेवनेनवामुक्तिर्भवेन्नतुमरणमात्रेण इहतु मरणमात्रेणापिसाभवेदित्याह ॥ नैमिषइति ॥ तदुक्तंकाशीखंडे ॥ नैमिषंचकुरुक्षेत्रंगंगाद्वारमवंतिका ॥ अयोध्यामथुराचैवद्वारकाप्यमरावती ॥ एतानिमुक्तिदान्येवनात्रकार्याविचारणेति ॥ अथवा नैमिषादिक्षेत्रेषुमरणेमुक्तिःकथितापरंतुनसाक्षादपितुकाशीक्षेत्रप्रापणद्वारैवेत्याह ॥ नैमिषइति ॥ एतदपितत्रैवोक्तम् ॥ प्रयागादपितीर्थाग्र्यादविमुक्तंविशिष्यते ॥ यथाविमुक्तेनिर्वाणंनतथाक्वाप्यसंशयम् ॥ अन्यानिमुक्तिक्षेत्राणिकाशीप्राप्तिकराणिहि ॥ काशींप्राप्यविमुच्येतनान्यथातीर्थकोटिभिरिति ॥ २८ ॥ एतत्काशीक्षेत्रम् ॥ २९ ॥ एतत्क्षेत्रतुल्यःप्रयागोस्तिमत्परिग्रहात्तथाप्यपितस्मादपीदमेवविशिष्यतइ

नामापेक्षानचाऽत्रैवस्वजनानांतथापुनः ॥ यथातथामृतःस्याच्चेन्मोक्षमाप्नोतिनिश्चितम् ॥ २५ ॥ एतन्ममपुरंदिव्यं गुह्याद्गुह्यतमंमहत् ॥ ब्रह्मादयोहिजानंतियेचसिद्धामुमुक्षवः ॥ २६ ॥ अतःप्रियमिदंक्षेत्रंयस्माच्चेहगतिःशुभा ॥ विमुक्तंनमयायस्मान्मोक्ष्येऽहंनकदाचन ॥ २७ ॥ महत्क्षेत्रमिदंतस्मादविमुक्तमितिस्मृतम् ॥ नैमिषेचकुरुक्षेत्रेगंगाद्वारेऽथपुष्करे ॥ २८ ॥ स्नानात्संसेवनाद्वापिमृतेमोक्षोभवेन्नहि ॥ इहसंप्राप्यतेयस्मात्तस्मादेतद्विशिष्यते ॥ २९ ॥ प्रयागेवाभवेन्मोक्षइहवामत्परिग्रहात् ॥ प्रयागादपितीर्थाग्र्यादिदमेवविशिष्यते ॥ ३० ॥ धर्मस्योपनिषत्सत्यंमोक्षस्योपनिषच्छमः ॥ क्षेत्रतीर्थोपनिषदमविमुक्तंविदुर्बुधाः ॥ ३१ ॥ कामंभुंजन्स्वपन्क्रीडन्कुर्वन्हिविविधाःक्रियाः ॥ अविमुक्तेत्यजन्प्राणान्जंतुर्मोक्षायकल्पते ॥ ३२ ॥ कृत्वापापसहस्राणिपिशाचत्वंवरंनृणाम् ॥ नतुक्रतुसहस्रंतुस्वर्गे काशीपुरींविना ॥ ३३ ॥ तस्मात्संसेवनीयंवैअविमुक्तंविमुक्तये ॥ अव्यक्तलिंगैर्मुनिभिर्ध्यायतेचसदाशिवः ॥ ३४ ॥

त्याह ॥ प्रयागइति ॥ ३०॥ धर्मस्येति ॥ उपनिषत्रहस्यम् ॥ सत्यमिति ॥ यथार्थकथनमित्यर्थः ॥ सत्यंपरंपरꣳसत्यꣳसत्येननसुवर्गाल्लोकाच्च्यवंतइतिश्रुतेः ॥ शमःशांतिः ॥ क्षेत्रेति ॥ सर्वक्षेत्रतीर्थेषुश्रेष्ठमित्यर्थः ॥३१॥ कुतोऽस्यश्रेष्ठत्वंतदाह ॥ काममिति ॥ यथेच्छमित्यर्थः ॥३२॥ ननुकृतानांपापानांफलभोगं विनानाशासंभवादन्यत्रापिकृतैःक्रत्वादिपुण्यैःस्वर्गादिप्राप्तिश्रवणाच्चकथमत्रमरणमात्रान्मोक्षप्राप्तिमाहात्म्यमधिकंवर्ण्यतइत्याशंक्याह ॥ कृत्वेति ॥ पापफलंपिशाचत्वप्राप्त्यैवभोक्तुंवरंनतुअन्यत्रक्रतुपुण्यफलस्वर्गादि ॥ तस्यकालेनविनाशित्वादत्रतुमरणेपुनर्योनिसंभवाभावादितिभावः ॥ अथवापिशाचत्वंधृतवतोप्यत्रनिवासोवरंअन्यत्रतुस्वर्गतुल्यसुखोपभोगेनापिवासोमाभूदितिप्रार्थयते ॥ कृत्वेति ॥ ३३ ॥ अतएवाह ॥ तस्मादिति ॥ अव्यक्तलिंगैरिति ॥ लोकदुरवगाहचिन्हैरित्यर्थः ॥ ३४ ॥ ॥ ॥ ॥ ॥

अतोत्रैवमोक्षःसुलभइत्याह ॥ इहेति ॥ नकेवलंमोक्षएवात्रलभ्यतेऽपितुसर्वकामनासिद्धिरपिभवतीत्याह ॥ यद्यदिति ॥ तपंतेतपश्चरंति ॥ ३५ ॥ ईप्सितं स्थानमिति ॥ ब्रह्मादीनामपिपदमित्यर्थः ॥ ३६ ॥ कैरीदृशानिफलानिलब्धानीतितत्राह ॥ कुवेरइति ॥ ३७ ॥ वेदस्थानेति ॥ एतत्क्षेत्रसंसेवना देववेदादिव्यवस्थापनसमर्थाभविष्यंतीत्यर्थः ॥ ३८ ॥ किंबहुनासाक्षान्नारायणादयोपिमामेवेहोपासतइत्याह ॥ वैकुंठेशोपीति ॥ पद्मालक्ष्मीः ॥ व सवःअष्टौवसवः ॥ ३९ ॥ देवराजइतिशक्रविशेषणम् ॥ ४० ॥ अन्येपिसनकादयोपि ॥ ४१ ॥ अत्रमृतेपुनर्योनिसंभवोनास्तीतियत्सूचितं तदेव

इहसंप्राप्यतेमोक्षोदुर्लभोऽन्यत्रकर्हिचित् ॥ यद्यत्फलंसमुद्दिश्यतपंतेचनराःप्रिये ॥ ३५ ॥ तेभ्यश्चाऽहंप्रयच्छामिवि विधांफलकामनाम् ॥ आत्मनश्चैवसायुज्यमीप्सितंस्थानमेवच ॥ ३६ ॥ कुवेरश्चमहायक्षःसदासर्वार्पितक्रियः ॥ क्षेत्र संसेवनादेवगणैश्वर्यमवाप्तवान् ॥ ३७ ॥ पराशरस्तुयोयोगीऋषिर्व्यासोमहातपाः ॥ ममभक्ताभविष्यंतिवेदस्थान प्रवर्त्तकाः ॥ ३८ ॥ वैकुंठेशोपिपद्मापिक्षेत्रेऽस्मिन्मुनिपुंगवाः ॥ ब्रह्मादेवर्षिभिःसार्द्धंवसवोपिदिवाकरः ॥ ३९ ॥ देव राजस्तथाशक्रोयेचान्येपिदिवौकसः ॥ उपासतेमहात्मानःसर्वेमामिहसुव्रताः ॥ ४० ॥ अन्येऽपियोगिनोयेवैछन्नरू पामहाव्रताः ॥ अनन्यमनसोभूत्वामामिहोपासतेसदा ॥ ४१ ॥ विषयासक्तचित्तोपित्यक्तधर्मरुचिर्नरः ॥ इहक्षेत्रेमृतो योवैसंसारंनपुनर्विशेत् ॥ ४२ ॥ येपुनर्निर्ममाधीराःसत्वस्थाविजितेंद्रियाः ॥ व्रतिनश्चनिरारंभाःसर्वेऽपिमयिभाविताः ॥ ४३ ॥ देहिभेदंसमासाद्यधीमंतःसंगवर्जिताः ॥ यांतितेपरमंमोक्षंप्रसादान्ममसुव्रते ॥ ४४ ॥ जन्मांतरसहस्रेषुयं नयोगीसमाप्नुयात् ॥ तमिहैवपरंमोक्षंमरणादधिगच्छति ॥ ४५ ॥ गोप्रेक्षकमिदंक्षेत्रंब्रह्मणास्थापितंपुरा ॥ कैला सभवनंचात्रपश्यदेविवरानने ॥ ४६ ॥ गोप्रेक्षेश्वरमागम्यदृष्टमात्रेचमानवः ॥ नदुर्गतिमवाप्नोतिकल्मषैश्चविमु च्यते ॥ ४७ ॥ कपिलान्हदमितिख्यातंब्रह्मणाचतथाकृतम् ॥ तस्यदर्शनमात्रेणपातकात्प्रविमुच्यते ॥ ४८ ॥

व्यनक्ति ॥ विषयेति ॥ ४२ ॥ येपुनरिति ॥ येस्वित्यर्थः ॥ निर्ममाःममत्वाभिमानरहिताः ॥ सत्वस्थाःसात्विकाः ॥ व्रतिनःयमनियमयुक्ताःनिरारंभाःसर्वका म्यकर्मारंभत्यागिनः मयिभाविताः मोक्षंयांतीत्युत्तरेणान्वयः ॥ ४३ ॥ देहिभेदमिति ॥ प्रारब्धकर्मनाशाययुगपन्नानाशरीराणिप्राप्याऽक्लेशेनैवमत्प्रसादा न्मुक्ताभवंतीत्यर्थः ॥ देहभेदमितिक्वचित्पाठः ॥ ४४ ॥ अन्यत्रयोगाभ्यासवलादपिनेदृशफलप्राप्तिरित्याह ॥ जन्मांतरेति ॥ ४५ ॥ एतत्क्षेत्रस्यनामांतरमाह ॥ गोप्रेक्षकमिति ॥ ४६ ॥ ४७ ॥ नामांतरमप्याह ॥ कपिलान्हदमिति ॥ ४८ ॥ ॥ ॥ ॥

इमंकपिलान्हदम् ॥ ४९ ॥ कथंप्रसादितइत्यत्राख्यानमाह ॥ आजगामेति ॥ अस्यास्मिन्देशइतिपूर्वेणान्वयः ॥ ५० ॥ ब्रह्मणइति ॥ ब्रह्मणःसकाशा दित्यर्थः ॥ अहमहमिकयेतिभावः ॥ संविग्नचेतसादुःखितांतःकरणेन ॥ ५१ ॥ ब्रह्मणाविष्णुःकिमुक्तइतितदाह ॥ मयेति ॥ ५२ ॥ विष्णुःस्वकर्तृक लिंगस्थापनेकारणमाह ॥ रुद्रइति ॥ मयास्थापितेऽपितवनाम्नैवास्यप्रसिद्धिर्भविष्यतीत्याह ॥ मयैवेति ॥ ५३ ॥ केननाम्नेतितत्राह ॥ हिरण्यगर्भइतीति ॥ एवंप्रकारेणात्राहमागतइतिगौरींप्रतिशिवआह ॥ एनमिति ॥ एनंहिरण्यगर्भेश्वरम् ॥ ५४ ॥ ब्रह्माविष्णुकृतस्थापनयाऽपरितुष्यस्वयंतल्लिंगंस्थापितवानि

रुद्ररूपंचपश्येमंब्रह्मणाचकृतंपुरा ॥ सर्वदेवैरहंदेविअस्मिन्देशेप्रसादितः ॥ ४९ ॥ आजगामपुरादेविलिंगरूपी नसंशयः ॥ तत्राऽहंब्रह्मणानीतःस्थापितःपरमेष्ठिना ॥ ५० ॥ ब्रह्मणश्चापिसंगृह्यविष्णुनास्थापितःपुनः ॥ ब्रह्मणा सततोविष्णुरुक्तःसंविग्नचेतसा ॥ ५१ ॥ मयाऽनीतमिदंलिंगंत्वंकिंस्थापितवानसि ॥ तमुवाचपुनर्विष्णुर्ब्रह्माणंतुपि तामहम् ॥ ५२ ॥ रुद्रेदेवेपुरात्यंतंममभक्तिर्महत्तरा ॥ मयैवस्थापितंलिंगंतवनाम्नाभविष्यति ॥ ५३ ॥ हिरण्यग र्भइत्येवमत्राऽहंसमुपागतः ॥ दृष्ट्वैनमपिदेवेशिममलोकंव्रजेन्नरः ॥ ५४ ॥ ततःपुनरपिब्रह्मामममलिंगमिदंशुभम् ॥ स्थापयामासविधिवद्भक्त्याचपरयापुनः ॥ ५५ ॥ स्वर्लीनेश्वरइत्येवमत्राहंस्वयमास्थितः ॥ प्राणानिहनरस्त्यक्त्वान पुनर्जायतेक्वचित् ॥ ५६ ॥ अस्मिन्नेवमयादेशेदैत्योदैवतकंटकः ॥ व्याघ्ररूपंसमास्थायनिहतोदर्पितोबली ॥५७॥ व्याघ्रेश्वरस्तथाख्यातोमहापातकनाशनः ॥ पित्रातेशैलराजेनपुराहिमवतास्वयम् ॥ ५८ ॥ ममप्रियतमंस्थानंज्ञा त्वालिंगंप्रतिष्ठितम् ॥ शैलेश्वरइतिख्यातंदृश्यतामिदमादरात् ॥ ५९ ॥ यदावाराणसीचेयंपुण्यापापविनाशिनी ॥ क्षेत्रमेतदलंकृत्यजान्हव्यासहसंगता ॥ ६० ॥ तदाचब्रह्मणातत्रस्थापितंलिंगमद्भुतम् ॥ संगमेश्वरविख्यातंदृश्य तांसुंदरित्वया ॥ ६१ ॥ ॥ ॥ ॥

त्याह ॥ ततइति ॥ ५५ ॥ ब्रह्मस्थापितलिंगस्यनामाह ॥ स्वर्लीनेश्वरइतीति ॥ इहएतत्क्षेत्रे ॥ ५६ ॥ व्याघ्रेश्वराख्यानमाह ॥ अस्मिन्नेवेति ॥ दैवत कंटकोदेवशत्रुः ॥ ५७ ॥ शैलेश्वराख्यानमाह ॥ पित्रेति ॥ ५८ ॥ प्रतिष्ठितंस्थापितम् ॥ आदरादिति ॥ अनेनगौर्यागौरवंदर्शितम् ॥ ५९ ॥ संगमे श्वराख्यानमाह ॥ यदेति ॥ अलंकृत्यमहालिंगैरितिभावः ॥ जांन्हव्याभागीरथ्या ॥ ६० ॥ संगमेश्वरेति ॥ संगमेश्वरइतिप्रसिद्धमित्यर्थः ॥ ६१ ॥

अन्यान्यपिलिंगानिसंक्षिप्याह ॥ मध्यमेशइति ॥ शुक्रेणउशनसा॥६२॥ इमानिलिंगानिअन्यान्यपिकैःस्थापितानीत्यत्राह ॥ इंद्रादीति ॥६३॥ येनयेन यद्यत्स्थापितंतत्तन्नाम्नैवतत्तत्प्रसिद्धमभवदित्याह ॥ तन्नाम्नेति ॥६४॥ अमूनिविप्रकृष्टानि॥एतानिसन्निहितानि॥स्थानानिलिंगस्थानानि ॥ एवंलिंगमाहात्म्य मुक्त्वापुनःक्षेत्रमाहात्म्यमाह ॥ गुह्यमिति ॥६५॥ पंचक्रोशामिति ॥ पंचक्रोशात्मकंक्षेत्रमित्यर्थः ॥ चतुर्दिक्षुसर्वासुदिक्षुप्रकीर्तितंप्रसिद्धं ॥ समंतादिति ॥ आस मंताद्भागेपीत्यर्थः ॥ अमृतप्रदंमोक्षप्रदम् ॥ ६६ ॥ अत्रमोक्षप्राप्तौनपांडित्यादिकंप्रयोजकमपितुमरणमेवेतिपूर्वोक्तमेवानुवदति ॥ पंडितइति ॥ ६७ ॥ एवंश्रु त्वाविस्मययुक्तागौरीपृच्छति ॥ अत्रेति ॥ परिवर्ततेपुनःपुनर्जायते ॥६८॥ कर्महीनइति ॥ न्यस्तसर्वकर्मेत्यर्थः ॥ अन्यःगृहस्थादिः ॥ कर्मसमन्वितःनित्यनै

मध्यमेशंततःपश्यजंबुकेशंततःपुनः ॥ शुक्रेश्वरंचलिंगंचशुक्रेणस्थापितंपुरा ॥ ६२ ॥ कृत्तिवासेश्वरंपश्यवृद्धकाले श्वरंतथा ॥ इंद्रादिदैवतैस्तत्रलिंगानिस्थापितान्यतः ॥ ६३ ॥ तन्नाम्नाचैवविख्यातंलिंगंपापहरंतदा ॥ पश्यलिंगा निपुण्यानिसर्वकामप्रदानिच ॥ ६४ ॥ अमून्येतानिपूज्यानिसंतिस्थानानिपार्वति ॥ कथितानिममक्षेत्रेगुह्यंचाऽन्य दिदंशृणु ॥ ६५ ॥ पंचक्रोशंचतुर्दिक्षुक्षेत्रमेतत्प्रकीर्तितम् ॥ समंताच्चतथाजंतोर्मृतिकालेऽमृतप्रदम् ॥ ६६ ॥ पंडि तःश्रोत्रियोवापिचंडालःपतितोथवा ॥ संन्यासीवामृतःस्याद्वैसर्वेमोक्षमवाप्नुयुः ॥ ६७ ॥ इत्येतद्वचनंश्रुत्वापार्वतीवा क्यमब्रवीत् ॥ अत्रमेविस्मयोब्रह्मन्महांश्चपरिवर्त्तते ॥ ६८ ॥ सन्यासीकर्महीनश्चह्यन्यःकर्मसमन्वितः ॥ एकश्चपु ण्यवान्लोकेएकःपापीभवेन्नरः ॥ ६९ ॥ उभयोःसमताप्रोक्तातेषांभोगःकुतोगतः ॥ अन्यश्चसंशयादेवश्रूयतांशंक रत्वया ॥ ७० ॥ अत्रैवम्रियमाणस्यमनश्चेच्चगृहेगतम् ॥ पुत्रेस्त्रियांधनेवापिअन्याभीष्टतमेपुनः ॥ ७१ ॥

मित्तिकादिकर्मकारी ॥ एकश्चेति ॥ एकःकर्मकारीलोकेपुण्यवान्भवेत्एकःसत्कर्मरहितःपापीभवेदित्युच्यतइतिशेषः ॥ ६९ ॥ उभयोःपुण्यवत्पापवतोः समतामोक्षरूपसमफलभागिताप्रोक्तेति ॥ भगवतेतिशेषः ॥ तेषांपुण्यवतांपापिनांचभोगःपुण्यपापफलसुखदुःखसाक्षात्काररूपः ॥ कुतोगतइति ॥ भोगंविनापुण्यपापनाशासंभवादितिभावः ॥ एतत्समाधानंचपिशाचत्वंवरंनृणामित्यनेनपूर्वंसूचितमपिस्पष्टंनोक्तमतःपुनःपृष्टमितिभावः ॥ गौरीसंशयांतर माह ॥ अन्यश्चेति ॥ ७० ॥ अत्रैवअस्मिन्नेवक्षेत्रेम्रियमाणस्यजंतोरितिशेषः ॥ ७१ ॥ ॥ ॥

गच्छतीति ॥ यत्रमनोगच्छातितत्रपुनर्जन्मस्यादितिसंबंधः ॥ इयमेकाकोटिःसंशयस्य ॥ ७२ ॥ कोट्यंतरमाह ॥ तीर्थेचेति ॥ तीर्थयज्ञफलमिति ॥ स्वर्गे मोक्षप्राप्तिरूपंफलमित्यर्थः ॥ उभयोःजन्ममोक्षप्राप्तिरूपयोर्मध्येकिंतथ्यंसत्यंतन्निवेद्यमित्यर्थः ॥ तस्याःगौर्याः ॥ ७३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहिताटीकायांसारबोधिन्यांकाशीवर्णनंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ॥ ॥ ॐनमःशिवाय ॥ काश्यांमरणमात्रेणमोक्षप्राप्तिःकथंभवेत् ॥ एतत्सविस्तरंचैकपंचाशेत्रनिरूप्यते ॥ १ ॥ एवंलोककल्याणायपार्वत्याकृतंप्रश्नंभगवानभिनंदति ॥ साध्विति ॥ तदेवव्यनक्ति ॥यच्छ्रुत्वेति ॥ १ ॥ उत्तरयति ॥ अपापइति ॥ स्वतःसिद्धपापविरहविशिष्टःप्रायश्चित्तानुष्ठानादिनाशुद्धोवेत्यर्थः ॥ सपइति ॥ संसारदुःखजननसामग्र्यभावादिति

श्रुतंचैवमयापूर्वंह्यंतकालेमनःस्वकम् ॥ गच्छतितत्रजन्मस्यान्नाऽत्रकार्याविचारणा ॥ ७२ ॥ तीर्थेचैवमृतस्यैवतीर्थयज्ञफलंभवेत् ॥ उभयोःकिंचतथ्यंस्यान्निवेद्यंशंकरत्वया ॥ एतच्छ्रुत्वावचस्तस्याउवाचशंकरस्तदा ॥ ७३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांज्योतिर्लिंगनिरूपणेकाशीवर्णनंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ शंकरउवाच ॥ साधुपृष्टंत्वयसाध्विश्रूयतांकथयामिते ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात् ॥ १ ॥ अपापश्चमृतोयोवैसद्योऽमृतंसमश्नुते ॥ सपापश्चमृतोयःस्यात्कायव्यूहात्समश्नुते ॥ २ ॥ यातनाद्यनुभूयैवपश्चान्मोक्षमवाप्नुयात् ॥ येनक्षेत्रेकृतंकर्मपिशाचोभवतिध्रुवम् ॥ ३ ॥ भैरवींयातनांप्राप्यवर्षाणामयुतंपुनः ॥ ततोमोक्षमवाप्नोतिभुक्त्वापापंचसुंदरि ॥ ४ ॥ इतितेचसमाख्यातंपापानांयागतिर्भवेत् ॥ एवंज्ञात्वानरःसम्यक्संसेवेदविमुक्तिकम् ॥ ५ ॥ यःसेवन्मृतकश्चैवअंतेमोक्षमवाप्नुयात् ॥ अन्यच्चाऽपीहवक्ष्यामिश्रूयतामृषिसत्तमाः ॥ ६ ॥ ॥ ॥

भावः ॥ अमृतंमोक्षं ॥ पापिनांगतिमाह ॥ सपापइति ॥ कायव्यूहादिति ॥ शरीरादिसंघातंपरिगृह्यसमश्नुतइत्यर्थः ॥ २ ॥ किमर्थंतत्परिग्रहइतितत्राह ॥ यातनादीति ॥ ननुकायव्यूहपरिग्रहेपुनःसंसारापत्त्याप्रतिज्ञाहानिप्रसंगइत्याशंक्याह ॥ येनेति ॥ येनकर्मपापजनकंकृतंसपिशाचोभवतीतिसंबंधः ॥ ३ ॥ पिशाचत्वंप्राप्ययल्लभतेतदाह ॥ भैरवीमिति ॥ भैरवःशिवस्यप्रधानगणस्तत्कृतामित्यर्थः ॥ एतेनात्रमरणेयमभयंनास्तीतिसूचितम् ॥ मोक्षमिति ॥ एवंचपुनःसंसारप्राप्त्यसंभवइतिभावः ॥ ४ ॥ संसेवेत्सेवेत ॥ ५ ॥ यइति ॥ यःसेवन्सेवमानःसन्मृतकोमृतोभवेत्सोंतेमोक्षमवाप्नुयादिति संबंधः ॥ मरणेनमोक्षोभवतीत्युक्तंयुक्तम् ॥ परंतुसचकर्मफलभोगानंतरमेवेत्याह ॥ अन्यदिति ॥ ६ ॥ ॥ ॥

कृतकर्मेति ॥ नास्तीति ॥ भोगंविनेतिशेषः ॥ तदेवद्रढयति ॥ अवश्यमिति ॥ प्रारब्धकर्मणोभोगादेवपरिक्षयइतिभावः ॥ ७ ॥ केवलंपुण्यलेशरहितम् ॥ अशुभं पापजनकम् ॥ शुभंपुण्यजनकंकेवलमित्यनुषज्यते ॥ उभाभ्यांशुभाशुभकर्मभ्यां ॥ क्षितिजन्मक्षितौपृथिव्यांजन्म ॥ भवेदितिशेषः ॥ ८ ॥ तस्यैवसम्यक्त्वा सम्यक्त्वेकारणंकथयति ॥ न्यूनाधिक्यइति ॥ पापस्यन्यूनत्वेपुण्यस्यचाधिक्येसम्यक्उत्तमजन्मब्राह्मणादिकुलेभवति ॥ पुण्यस्यन्यूनत्वेपापस्यचाधिक्ये ऽसम्यक्निकृष्टजन्मनीचकुलेभवतीतिविवेकः ॥ जन्मकारणीभूतयोर्द्वयोरपिसर्वथाक्षयेमोक्षइत्याह ॥ उभयोरिति ॥ मुक्तिरिति ॥ दुःखजन्मप्रवृत्तिदो षमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतरापायादपवर्गइतिगौतमोक्तेः ॥ ९ ॥ एकंपंचक्रोशीप्रदक्षिणादिकंशुभकर्म ॥ एकंकर्मविपाकायुक्तम् ॥ १० ॥

कृतकर्मक्षयोनास्तिकल्पकोटिशतैरपि ॥ अवश्यमेवभोक्तव्यंकृतंकर्मशुभाशुभम् ॥ ७ ॥ केवलंचाऽशुभंकर्मनर कायभवेदिह ॥ शुभंस्वर्गायजायेतउभाभ्यांक्षितिजन्मच ॥ ८ ॥ जन्मसम्यगसम्यक्तुन्यूनाधिक्येभवेदिह ॥ उभ योश्चक्षयेमुक्तिर्भवेच्चसुंदरिध्रुवं ॥ ९ ॥ एकंक्षेत्रेकृतस्यैवकर्मणःसंक्षयायवै ॥ एकंचैवपुराजन्मकृतस्यसंक्षयायच ॥ ॥ १० ॥ एकंसर्वक्षयायैवभवतीतिसुनिश्चितम् ॥ कर्मचत्रिविधंप्रोक्तंकिंतच्चश्रूयतांपुनः ॥ ११ ॥ संचितंक्रियमाणं चप्रारब्धंचत्रिधामतम् ॥ पूर्वजन्मसमुद्भूतंसंचितंसमुदाहृतम् ॥ १२ ॥ तेनजन्मांतरंयच्चक्रियतेकर्मसांप्रतम् ॥ शु भाशुभंचयच्चैवक्रियमाणंविदुर्बुधाः ॥ १३ ॥ भुज्यतेचशरीरेणप्रारब्धंपरिकीर्तितम् ॥ प्रारब्धकर्मणोभोगात्क्षयश्चैव नचाऽन्यथा ॥ १४ ॥ पापंविनाशरीरस्यदुःखंनास्तिपदेपदे ॥ यत्किंचिद्दृश्यतेदुःखंसर्वंपापसमुद्भवं ॥ १५ ॥

एकंयावद्देहपातंविश्वेश्वरोपासनपूर्वकक्षेत्रवासादि ॥ सर्वक्षयायसर्वपापकर्मनाशाय ॥ कतिविधंतत्कर्मेतितत्राह ॥ त्रिविधमिति ॥ ११ ॥ संचितादीनांस्व रूपमाह ॥ पूर्वजन्मेति ॥ १२ ॥ तेनेति ॥ तेनसंचितकर्मणाजन्मांतरंप्राप्यतइत्यर्थः ॥ क्रियमाणकर्माह ॥ यच्चेति ॥ सांप्रतंअस्मिन्जन्मनि ॥ शुभा शुभमिति ॥ पुण्यजनकंपापजनकंचेत्यर्थः ॥ १३ ॥ प्रारब्धमाह ॥ भुज्यतइति ॥ यस्यकर्मणःफलंशरीरेणभुज्यतेतत्प्रारब्धमित्यर्थः ॥ तदेवव्यक्तीकरोति ॥ प्रारब्धकर्मणइति ॥ १४ ॥ एवंचपापमेवसर्वथादुःखस्यजनकमित्याह ॥ पापमिति ॥ पदेपदइति ॥ प्रतिस्थानंप्रतिक्षणंवेत्यर्थः ॥ वर्तमानदुःखेनजन्मां तरीयादिपापमनुमातव्यमितिकार्यलिंगकमनुमानमाह ॥ यत्किंचिदिति ॥ एतेनजन्मांतरंनास्तीतिनास्तिकप्रवादोनिरस्तः ॥ १५ ॥

स्थूलंप्रत्यक्षंसूक्ष्मंविचारगम्यम् ॥ सुखभाजनमिति ॥ दुःखकारणनाशादितिभावः ॥ अत्रशरीरपदेनतदभिमानीजीवोगृह्यते ॥ १६ ॥ कुत्रचित् पुण्यक्षेत्रांतरे शुभंशुभकर्मवर्धेत् वर्धेत ॥ कुत्रचित् तीर्थांतरे ॥ मोक्षस्तुकाश्यांभवतिसचसर्वकर्मनाशाधीनः सर्वकर्मनाशस्तुकाश्यांभवतीत्याह ॥ सर्वेषामिति ॥ एवंचतत्रमोक्षःसुलभइतिभावः ॥ १७ ॥ ननुशुभप्रदमन्यत्क्षेत्रंअन्यतीर्थमिवकाशीपुर्यपिसुलभैवेतितचकोविशेषइतितत्राह॥ दुर्लभेति ॥ ननुयानादिनाअशक्तस्यसापि तीर्थांतरमिवगंतुंशक्यास्यादितिचेत्तत्राह ॥ अहमिति ॥ शतजन्मेति ॥ अहंकाशींगमिष्यामीतिबुद्धिरनंतजन्मकृतपुण्यैःसंपादिताभवति ॥ ततश्चयानादिनागंतुंशक्यत्वेऽपियदागंतुंबुद्धिर्भवेत्तदैवसालभ्येतेतिभावः ॥ १८ ॥ पूर्वोक्तमेवव्यनक्ति ॥ ततइति ॥ किंचसामान्यतोमुक्तिपुरीप्राप्तौपुण्यविशेषानाह ॥

स्थूलंचैवाऽथसूक्ष्मंचदुःखंपापसमुद्भवम् ॥ अपापंचयदास्याद्वैशरीरंसुखभाजनम् ॥१६॥ कुत्रचिच्चशुभंवर्धेत्कुत्रचित्पापसंक्षयः ॥ सर्वेषांकर्मणांनाशोनास्तिकाशीपुरींविना ॥१७॥ सर्वंचसुलभंतीर्थंदुर्लभाकाशिकापुरी ॥ अहंकाशींगमिष्यामिशतजन्मकृतामतिः ॥ १८ ॥ ततःकाशीदर्शनंचजायतेनान्यथाक्वचित् ॥ पृथिव्यांयानितीर्थानिकृतानिपूर्वजन्मनि ॥ १९ ॥ तदामुक्तिपुरीलभ्येत्षण्मध्येचैवकाचन ॥ पूर्वजन्मकृताश्चेद्वैमुक्तिपुर्यःशुभानने ॥ २० ॥ तदाकाशीचलभ्येतनान्यथासुलभाप्रिये ॥ परजन्मनिकृताचेद्वैकाशीमुक्तिप्रदायिनी ॥ २१ ॥ प्राप्यकाशींतदातत्रमृतिस्यान्नाऽन्यथाक्वचित् ॥ काशींप्राप्यनरोयस्तुगंगायांस्नानमाचरेत् ॥ २२ ॥ तदाचक्रियमाणस्यसंचितस्यापिकर्मणः ॥ क्षयश्चैवभवेत्तत्रप्रारब्धंनविनश्यति ॥ २३ ॥ भोगंविनानप्रारब्धंगच्छतीतिसुनिश्चितम् ॥ तत्रमृतिश्चसंजातातदातस्यक्षयोभवेत् ॥ २४ ॥ ॥ ॥ ॥ ॥

पृथिव्यामिति ॥ तीर्थानिपुष्करादीनि ॥ कृतानिनिवासितानि ॥ १९ ॥ लभ्येत्लभ्येत ॥ षण्मध्येअयोध्यामथुरादिमुक्तिपुरीमध्येकाचनकापीत्यर्थः ॥ अत्रस्मर्यते ॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारवतीचैवसप्तैतामोक्षदायिकाइति ॥ काशीप्राप्तौकारणंपुण्यविशेषमाह ॥ पूर्वजन्मेति ॥ मुक्तिपुर्यःकाश्यतिरिक्ताअयोध्यादयःषट् ॥ २० ॥ नान्यथेति ॥ एवंचकाश्यत्यंतदुर्लभेतिदृढीकृतम् ॥ ननुयःकाशीयात्रांकृत्वाऽन्यत्रमृतःतस्यकागतिस्तामाह ॥ परजन्मनीति ॥ अन्यजन्मनीत्यर्थः ॥ २१ ॥ तत्रेति ॥ जन्मांतरेतस्यतत्रैवमृत्युःस्यादित्यर्थः ॥ एवंचयःकाशीयात्रांकृत्वान्यत्रम्रियतेतस्यैकंजन्मावशिष्यतइतिभावः ॥ काशीमरणफलमुक्त्वातत्रत्यगंगास्नानफलमाह ॥ काशीमिति ॥ २२ ॥ २३ ॥ ननुप्रारब्धंकुतोनविनश्यतीत्यत्राह ॥ भोगमिति ॥ सुनिश्चितमिति ॥ पूर्वमेवेतिशेषः ॥ तस्यप्रारब्धस्य ॥ भवेदिति ॥ पिशाचाद्यवस्थायांपूर्वोक्तरीत्याभोगेकृतेसतीतिशेषः ॥ २४ ॥ ॥

यत्पूर्वमुक्तंअंतकालइत्यादिनागौर्यातस्योत्तरमाह ॥ अंतकालइति ॥ यदाकर्मशेषोभवेत्तदामनसश्चालनेसतितदितस्ततोगच्छतीत्यन्वयः ॥ २५ ॥ ननुक र्मणांमनसाकःसंबंधोयेनकर्मकृतंमनश्चांचल्यंभवेदिदितितत्राह ॥ कर्माणीति ॥ पादाइति ॥ प्रेरकत्वान्मनसःकर्मसुपादत्वारोपः ॥ शीर्णाःभग्नाः ॥ तत्मनः ॥ विकाररहितंचांचल्यरहितंतीर्थेकाश्यांमणिकर्णिकादौविलीयतेसंलग्नंभवतीत्यर्थः ॥ २६ ॥ तदेति ॥ यदाविलीयतेतदेत्यर्थः ॥ तीर्थसमुद्भूतंतीर्थस्नानादि जन्यं ॥ तस्यपुरुषस्य ॥ २७ ॥ उभयमिति ॥ तेनपुरुषेणदेहधारणावस्थायांध्यानजन्यं ॥ देहपातावस्थायांचतीर्थस्नानादिजन्यामितिद्विविधंफलंप्राप्तंभवती त्यर्थः ॥ एतच्चमयानिर्मूलंनोच्यतइत्याह ॥ श्रुतिरिति ॥ तीर्थेस्नातितीर्थमेवसमानानांभवति ॥ तमेवंविद्वानमृतइहभवतीत्यादिश्रुतिरितिभावः ॥ सनातनी ति ॥ अनेनवेदानामनादित्वंबोधितम् ॥ अथवाश्रुतिर्लोकप्रसिद्धिः ॥ यःकाशीयात्रांकृत्वापश्चादन्यत्रपापमाचरतितस्यगतिमाह ॥ पूर्वमिति ॥ २८ ॥

अंतकालेमनश्चैवतदागच्छतिसुंदरि ॥ यदाकर्मभवेन्नूनंचालनेमनसोध्रुवम् ॥ २५ ॥ कर्माणिमनसःपादाःशीर्णाश्चे त्तत्कुतोव्रजेत् ॥ तस्माद्विकाररहितंमनस्तीर्थेविलीयते ॥ २६ ॥ तदातीर्थसमुद्भूतंफलंतस्यभवेदिह ॥ तीर्थजन्यंफ लंचैवध्यानजन्यंफलंपुनः ॥ २७ ॥ उभयंतेनसंप्राप्तंश्रुतिरेषासनातनी ॥ पूर्वंचैवकृताकाशीपश्चात्पापंसमाचरेत् ॥ ॥ २८ ॥ बलवतातेनवीर्येणनीयतेकाशिकांपुनः ॥ तदासर्वाणिकर्माणिभस्मसाच्चभवंतिहि ॥ २९ ॥ तस्मात्काशीं नरःसेवेत्कर्मनिर्मूलनींध्रुवं ॥ इतितस्यवचःश्रुत्वागिरिजावाक्यमब्रवीत् ॥ ३० ॥ कश्चित्कामीनरःस्वामिन्स्त्रिया राज्यधनस्यच ॥ कामुकश्चतदाभूत्वाप्रयागेदेहमुत्सृजेत् ॥ ३१ ॥ वेणीप्रवेशंवाकुर्याच्छिरसःपूजनंशिवे ॥ यन्निमि त्तंकृतंतच्चतेनकाश्यांमृतंयदा ॥ ३२ ॥ ॥ ॥ ॥ ॥

तेनवीर्येणकाशीयात्राजनितपुण्यसामर्थ्येननीयतइति ॥ सपुरुषइतिशेषः ॥ पुनःकाशीगमनमात्रेणतस्यकिंभवतीतितदाह ॥ तदेति ॥ कर्माणीति ॥ तस्य पुरुषस्येतिशेषः ॥ २९ ॥ एवंचकर्मनिर्मूलनार्थंकाशीसेव्येत्युपसंहरति ॥ तस्मादिति ॥ ३० ॥ एतस्मिन्विषयेगौरीसंदिहानापृच्छति ॥ कश्चिदिति ॥ कामीति ॥ अनेननरस्यकामसत्तामात्रंदार्शितम् ॥ स्त्रियाइति ॥ स्त्रियाराज्यस्यधनस्यचकामुकःकामयिता ॥ अनेनतस्यकाम्येकर्मणिप्रवृत्तिर्दर्शिता ॥ किंतत्कर्मेतितदाह ॥ प्रयागइति ॥ गंगायमुनयोःसंगमइत्यर्थः ॥ ३१ ॥ वाअथवाशिवेशिरसःशिरोभागस्यपूजनंकुर्यात् ॥ अनेनात्रशिवार्चनेनगंगार्च नमपिसंपन्नमितिविशेषोध्वनितः ॥ यन्निमित्तंयत्काम्यफलहेतुकं ॥ तत्पूर्वोक्तंकृतंयेनेतिशेषः ॥ तेनपुरुषेण ॥ मृतमितिभावेक्तः ॥ ३२ ॥

एतत्कर्मणिसर्वस्याधिकारोऽस्तीत्यभिप्रेत्याह ॥ स्त्रियेति ॥ राज्यमिति ॥ तस्यपुरुषस्येतिशेषः ॥ उद्दरतांउद्वेगमित्यर्थः ॥ उद्वेगतांगतमित्यपिपाठः ॥ अनेनराज्ञोऽपिसंसारानित्यत्वबुद्ध्यापूर्वोक्तकर्मणिप्रवृत्तिर्दर्शिता ॥ तयोःवेणीप्रवेशनंकर्तुःकाश्यांशिवपूजकस्यच ॥ संयोगतासंमेलनमित्यर्थः ॥ कर्मकर्तृदंताद्भावप्रत्ययः ॥ एवमुद्वेगतांमोक्षतांचेत्यत्रापिबोध्यम् ॥ ३३ ॥ एकइति ॥ काश्यांशिवपूजकइत्यर्थः ॥ अन्यइति ॥ वेणीप्रवेशस्यकर्तेत्यर्थः ॥ हरिःविष्णुः ॥ ॥ ३४ ॥ प्रयागेतवाप्यनुग्रहादिष्टफलप्राप्तिरित्यभिप्रेत्याह ॥ त्वंवेति ॥ संशयमिति ॥ कस्याभीष्टार्थसिद्धिरितिसंशयमित्यर्थः ॥ ३५ ॥ ३६ ॥ उभयोरपिकामितार्थस्यसिद्धिमाह ॥ काश्यामिति ॥ कामइति ॥ भवेदितिशेषः ॥ ३७ ॥ कामितार्थद्वयसिद्धावुभयतःपाशारज्जुमाह ॥ यदीति ॥ काशीजन्यमि

स्त्रियावापुरुषेणाऽपिराज्यंचोद्दरतांगतम् ॥ तयोःसंयोगताकुत्रस्यादेवंसंशयोभवेत् ॥ ३३ ॥ एकश्चमोक्षतांप्राप्तस्त्वन्यश्चकामुकःस्मृतः ॥ मुक्तिदाताभवस्त्वंचकामदाताहरिःस्वयं ॥ ३४ ॥ त्वंवासदाशिवःसाक्षात्कथंतस्यफलंभवेत् ॥ एवंमेसंशयंछिंधिदेवदेवमहेश्वर ॥ ३५ ॥ इत्येतद्वचनंश्रुत्वाहरोवाक्यमथाऽब्रवीत् ॥ त्वयाचश्रूयतांभद्रे यदेतत्कथयाम्यहम् ॥ ३६ ॥ काश्यांयोवैमृतश्चैवतस्यजन्मपुनर्नहि ॥ प्रयागेचमृतोयोवैतस्यकामःसदाध्रुवम् ॥ ॥ ३७ ॥ यदिसंयोगतांप्राप्तःकाशीजन्यंफलंवृथा ॥ यदिनप्राप्यतेतच्चतीर्थराजफलंगतम् ॥ ३८ ॥ तस्माच्चैवहरिःसाक्षान्नवीनांसृष्टिमुत्तमां ॥ विधायमनसोदिष्टांसिद्धिंयच्छतिनित्यशः ॥ ३९ ॥ स्त्रियंपुत्रंधनंवापिवाहनंराज्यमेवच ॥ यत्किंचित्कामयेद्वापितत्तद्यच्छतिवैहरिः ॥ ४० ॥ उभयोःसिद्धिरक्षार्थंक्रियतेहरिणास्वयम् ॥ इत्युक्तासातदादेवी आनंदंपरमंगता ॥ ४१ ॥ ॥ ॥ ॥ ॥

त्ति ॥ काशीमरणजन्यमित्यर्थः ॥ तत्संयोजनं ॥ तीर्थराजेति ॥ प्रयागमरणजन्यमित्यर्थः ॥ गतंनष्टंभवेदितिशेषः ॥ ३८ ॥ इदानींविरोधपरिहारोपायमाह ॥ तस्मादिति ॥ नवीनांअभिनवांसृष्टिंस्त्रीपुरुषरूपाम् ॥ ३९ ॥ तत्रहरिःसर्वफलंप्रयच्छतीत्याह ॥ स्त्रियमिति ॥ ४० ॥ हरिणाकिमर्थमियान्यत्नःक्रियतइत्यत्राह ॥ उभयोरिति ॥ प्रयागेकाश्यांचमृतयोरित्यर्थः ॥ सिद्धिरक्षार्थंफलसिद्धिरक्षणार्थम् ॥ ननुतमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाविद्यतेऽयनाय ॥ ज्ञानादेवतुकैवल्यमित्यादिश्रुतिस्मृतिशतेभ्यस्तत्त्वज्ञानस्यैवमोक्षसाधनत्वोक्त्याज्ञानाभावेमोक्षाभावनिश्चयात्कथमत्रमरणमात्रान्मोक्षप्राप्तिरितिचेदत्रोच्यते ॥ अत्रापिश्रीविश्वेश्वराख्यगुरूपदिष्टतारकादेवात्मतत्त्वज्ञानमुत्पद्यते ॥ ततोमोक्षः ॥ तदुक्तंकाशीखंडे ॥ ब्रह्मज्ञानेनमुच्यंतेनान्यथाजंतवःक्वचित् ॥

क्वचिज्ज्ञानंतदेवाहंकाशीसंस्थितिभागिनाम् ॥ दिशामितारकंप्रांतेमुच्यंतेतेतुतत्क्षणात् ॥ पाद्मेपि ॥ तीर्थांतराणिक्षेत्राणिविष्णुभक्तिश्चनारद ॥ अंतःकर
णसंशुद्धिजनयंतिनसंशयः ॥ वाराणस्यपिदेवर्षेतादृश्येवपरंतुसा ॥ प्रकाशयतिब्रह्मैक्यंतारकस्योपदेशतइति ॥ पाराशरेपि ॥ अत्रैवोत्क्रममाणस्यजंतुमात्र
स्यकेवलमित्युपक्रम्याये आनंदासंगचिद्रूपंतारकंतमसःपरं ॥ स्वयंज्ञानंनिराधारंदास्यामिप्रत्यगात्मनेत्युक्तम् ॥ ब्रह्मपुराणे ॥ अविमुक्तेम्रियेद्यस्तुप्रत्याख्या
तभिषक्क्रियः ॥ काष्ठपाषाणभूतस्तुजान्हवीजलमध्यगः ॥ अविमुक्तेमृतस्यास्यकर्णमूलंगतोहरः ॥ प्रणवंतारकंब्रूतेनान्यथाकस्यचित्क्वचिदिति ॥ कौ
र्मे ॥ तत्रसाक्षान्महादेवोदेहांतेस्वयमीश्वरः ॥ व्याचष्टेतारकंब्रह्मतत्राप्येकंविमुक्तिदम् ॥ यत्तत्परतरंसत्यमविमुक्तमितिस्मृतम् ॥ एकेनजन्मनादेविवाराण
स्यांतदामुयादिति ॥ सूतसंहितायाम् ॥ श्रीमद्वाराणसीपुण्यापुरीनित्यंममप्रिया ॥ यस्यामुत्क्रममाणस्यप्राणैर्जंतोः कृपाबलात् ॥ तारकंब्रह्मनिर्वाणंदा
स्यामिश्रेयसेहरे ॥ तस्मादेवंमहाविष्णोप्राणत्यागोविमुक्तिदइति ॥ आदित्यपुराणे ॥ तीर्थानामुत्तमंतीर्थंक्षेत्राणांक्षेत्रमुत्तमम् ॥ वाराणसीतिनगरीप्रियादे
वस्यशूलिनः ॥ यत्रविश्वेश्वरोदेवःसर्वेषामेवदेहिनाम् ॥ ददातितारकंज्ञानंसंसारान्मोचकंपरमिति ॥ अतोनोक्तश्रुत्यादिविरोधः ॥ ननुमरणकालेछिद्यमा
नमर्मणोव्याकुलचित्तस्यश्रवणाद्यसंभावनाविपरीतभावनयोरुच्छेदाभावेनशिवोपदिष्टग्रहणासंभवः ॥ अतोत्रमरणान्मुक्तेःप्रतिपादकानिवचनानिकाशी
वासविध्येकवाक्यतयातद्विधेस्तावकाअर्थवादाएवेतिचेन्न ॥ तत्रमृतस्यापरिमेयमहिमश्रीविश्वनाथानुग्रहात्सकलवेदनानिवृत्त्याचित्तप्रसादसंभवेनतद्ग्र
हणादिसंभवात् भगवच्छ्रीकृष्णानुग्रहेणशरतल्पपुत्रनाशजन्यदुःखयोरिवभीष्मधृतराष्ट्रयोः ॥ अतएवमात्स्ये ॥ अंतकालेमनुष्याणांछिद्यमानेषुमर्मसु ॥
वायुनाप्रेर्यमाणानांस्मृतिर्नैवोपपद्यतइतिक्षेत्रांतरमरणकालिकफलमुक्त्वा अविमुक्तेत्वंतकालेभक्तानामीश्वरःस्वयम् ॥ कर्मभिःप्रेर्यमाणानांकर्णजापंप्रय
च्छति ॥ ईश्वरप्रेरितोयातिदुष्प्रापमकृतात्मभिरित्युक्तम् ॥ अत्रतुतीर्थान्तराणीत्यादिपाद्मेनक्षेत्रांतरापेक्षयाविशेषउक्तः ॥ अत्रमरणकालेबाह्येन्द्रियापे
क्षांविनैवमनोमात्रेणश्रवणाद्युपपत्तौकाशीमरणादत्यंतशुद्धस्यश्रीविश्वेश्वरसाक्षात्काराच्चविनष्टदुष्कृतराशेरसंभावनादिप्रतिबंधोच्छेदसंभवात् ॥ अना
द्यज्ञानस्येवानाद्यसंभावनाविपरीतभावनयोरपिगुरुप्रभावेनक्षणमात्रेणोच्छेदसंभवाच्च ॥ नचचिरकालनिरोधसमाधिविनाशोधितत्वंपदार्थसाक्षात्कारा
भावाद्वाक्यार्थसाक्षात्कारानुदयइतिवाच्यम् ॥ निरोधसमाधिमात्रेणशोधितत्वंपदार्थसाक्षात्कारेसंभवति चिरत्वविशेषणवैयर्थ्यात् ॥ चिरत्वस्याननुग
माच्छास्त्रार्थाव्यवस्थाप्रसंगाच्च ॥ एतदेवाभिप्रेत्योक्तंपाराशरीये ॥ अत्रैवमरणंसम्यग्यस्यसिद्ध्यतिदेहिनः ॥ विज्ञानसाधनंतेनसर्वंपूर्वमनुष्ठितमिति ॥ तस्मा
त्काशीमरणमहिम्नाऽसंभावनाविपरीतभावनादिनिरासेनतारकोपदेशश्रवणसिद्धेःकाशीमरणान्मुक्तिरितिवाक्यानांनार्थवादतेतिसिद्धं ॥ नन्वेवंमरणात्प्रा
क्साधनचतुष्टयसंपन्नमधिकारिणंप्रतिवेदांतशास्त्रारंभोनस्यात् ॥ साधनचतुष्टयवतामपिश्रवणादिपरिहारेणात्रैवप्रयासप्रसंगश्चेतिचेन्न ॥ मरणकाल
एवसाधनसंपत्त्यभ्युपगमात् ॥ जीवदवस्थायामेवसद्योमुक्तिप्रदंविज्ञानोपायंहस्तगतंविहायश्रवणादिविघ्नहेतुकामादिबहूपसर्गवत्यांकाश्यांमरणकालीन
विज्ञानायप्रवृत्त्यसंभवाच्च ॥ कूर्मपुराणेतूपायांतरमभिधाय वसेद्वाऽऽमरणाद्विप्रोवाराणस्यांसमाहितइतिवदतेश्वरेणैववाशब्दबलात्काशीतोबहिर्विज्ञानसं

पादनाक्षमस्यैवकाशीवासाभ्युपगमाच्च ॥ नन्वत्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टइत्यादिश्रुतौजंतुमात्रप्रतीतेः ॥ ब्राह्मणाःक्षत्रियावैश्याःशू द्रायेवर्णसंस्थिताः ॥ स्त्रियोम्लेच्छाश्चयेचान्येसंकीर्णावर्णजातयः ॥ कीटाःपिपीलिकाश्चैवयेचान्येपक्षिणस्तथा ॥ कालेननिधनंप्राप्ताअविमुक्तेवरानने ॥ चंद्रार्धमौलयस्त्र्यक्षामहावृषभवाहनाः ॥ शैवेममपुरेदेविजायंतेतत्रमानवाः ॥ येभक्तावरदंदेवमविमुक्तपरंपदं ॥ निविशंतिमहादेवमाज्याहुतिरिवानलं ॥ अकामोवासकामोवातिर्यग्योनिगतोपिवा ॥ अविमुक्तेत्यजन्प्राणान्ब्रह्मलोकेमहीयतइत्यादिपुराणांतरवचनैरत्रापिपूर्वोक्तैर्ब्राह्मणः क्षत्रियइत्यादिभिर्वचनै श्चप्राणिमात्रस्याधिकारप्रतीतेः कथंकूर्मपुराणवचनेविप्रस्यैवाधिकारउक्तइतिचेत् ॥ अत्रोच्यते ॥ रुद्रस्तारकंब्रह्मव्याचष्टइत्यनेनैकवाक्यतयाप्रणवाख्य तारकब्रह्मोपदेशयोग्यत्रैवर्णिकपरत्वाज्जन्तुपदस्यकौर्मवाक्येपिविप्रग्रहणंद्विजमात्रोपलक्षणं ॥ तत्त्वंतु काशीतुतिर्यग्भूतानामपिसाधारणीमतेति अविमुक्तर हस्यज्ञामुच्यंतेज्ञानिनोमराः ॥ अज्ञानिनोपितिर्यंचोमुच्यंतेत्यक्तकिल्बिषाइतिप्रभृतिपाद्मकाशीखंडादिवचोभिः पश्वादीनामपिमुक्तिश्रवणात्कौर्मवाक्यस्थं विप्रपदंप्राणिमात्रबोधकं ॥ यद्वा ॥ अत्रसर्वेषामधिकारसत्वेप्यधिकारतारम्येनक्रममुक्त्यंगीकारात्प्रथमकक्षाधिकारिद्विजपरंतत् ॥ यथोक्तंमुक्तिप्रकाशि कायां ॥ काश्यादिकक्षाभेदेनचतुर्विधेचक्षेत्रेमणिकर्ण्यांजान्हव्यामर्धोदकेभूमौविश्वेश्वराभिमुख्येनकालतोमृतस्यद्विजमात्रस्ययातनाजननदुरितरहित स्यविश्वनाथभक्तस्योच्छिन्नसंशयस्यसद्यःपरमानंदरूपंसायुज्यंभवति ॥ द्विजातिव्यतिरिक्तस्यतुदुरितरहितस्यमनुष्यमात्रस्यद्विजस्यापिकस्यचिद्दुरिता हित्येप्यविश्वेश्वरभक्तस्यविश्वेश्वरभक्तत्वेपिदुरिताहित्येप्युक्तप्रकारादन्येनप्रकारेणजातमरणस्यचतुर्विधेक्षेत्रेयत्रक्वापिमरणेक्षेत्रावांतरभेदतारतम्येनजीव

तद्दिनंहिसमारभ्यहरस्तस्यौतयासह ॥ इतिवश्वसमाख्यातंकाश्यागमनकारणम् ॥ ४२ ॥

तारतम्येनमरणस्यबुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वतारतम्येनकर्मादितारतम्येनचसारूप्यसालोक्यादिद्वाराकैवल्यंभवति ॥ दुरितवतस्तुमनुष्यमात्रस्यचतुर्विधेक्षे त्रेयत्रक्वापियेनकेनचित्प्रकारेणमृतस्यदुरितानुसारेणपापयातनांत्रिंशद्वर्षसहस्रमनुभूतवतोरुद्रपिशाचत्वादिप्राप्तस्यतदंतेमुक्तिःसद्यःशनैश्चभवति ॥ तत्राप्यु त्कृष्टपापकृतस्तद्भोगांतेशनैरितरस्यतुसद्यइतिविवेकः ॥ यद्यपिक्षेत्रमात्रेतारकोपदेशादविशेषेणमुक्तिःश्रूयते ॥ तथापिक्षेत्रविभागवशात्तारतम्यं ॥ तदुक्तं पाद्मे ॥ चतुर्धाविततेक्षेत्रेसर्वत्रभगवाञ्छिवः ॥ व्याचष्टेतारकंब्रह्मब्रह्मात्मैक्यप्रबोधनं ॥ तथापितत्रसामर्थ्यात्तत्रतत्रमृतस्यहि ॥ भोगपूर्वापवर्गादिजीवन्मु क्तिर्भवेद्ध्रुवं ॥ अंतर्गेहेविपन्नस्तुसाक्षात्कैवल्यमाप्नुयात् ॥ तथाचतुर्विधेक्षेत्रेप्रमीतोगर्भयातनां ॥ नैवाप्नोतिमुनिश्रेष्ठाविशेषोयंब्रवीम्शिवः ॥ काश्यांमृत स्तुसालोक्यंसाक्षात्प्राप्नोतिसत्तम ॥ ततःसरूपतांयातिततःसान्निध्यमश्नुते ॥ ततोब्रह्मैकतांयातिनपरावर्ततेपुनः ॥ वाराणस्यांमृतोजंतुःसाक्षात्सारूप्यमश्नु ते ॥ ततःसान्निध्यमायातिततोब्रह्मैकतामियात् ॥ अविमुक्तविपन्नस्तुसाक्षात्सान्निध्यमाप्नुयात् ॥ ततश्चिदानंदमयोब्रह्मण्येवविलीयते ॥ सलोकतांचसा रूप्यंसान्निध्यंचापिसत्तम ॥ कल्पंकल्पमवाप्नोतिततोब्रह्मात्मकोभवेदिति ॥ अत्राधिकारभेदेनव्यवस्थाविज्ञेयेतिसंक्षेपः ॥ विस्तरस्तुत्रिस्थलीसेतुप्रभृ तिग्रंथेभ्योवगंतव्यः ॥ ४१ ॥ इमांकथामुपसंहरतिसूतः ॥ इतिवइति ॥ काश्यागमनकारणम् ॥ काशींप्रतिशिवागमनकारणमित्यर्थः ॥ ४२ ॥

॥ ४३ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांकाशीविश्वेश्वरवर्णनंनामैऽकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥
॥ ओंनमःशिवाय ॥ त्र्यंबकेश्वरमाहात्म्यंगंगायाश्चसमुद्भवः ॥ गौतमस्यतपश्चर्याद्विपंचाशेत्रवर्ण्यते ॥ १ ॥ व्यासादिति ॥ अनेनस्वोक्तावप्रामाण्यशंकालेशोदूरीकृतः ॥ १ ॥ २ ॥ तयाअहल्यया ॥ ऋषिश्रेष्ठःगौतमः ॥ ब्रह्मेतिसंज्ञितःब्रह्मगिरिरित्यर्थः ॥ ३ ॥ तत्रब्रह्मगिरौ ॥ तेनगौतमेन ॥ अनावृष्टिर्वर्षणाभावः ॥ ४ ॥ रौद्रंभयंकरम् ॥ अनावृष्टेःफलमाह ॥ आर्द्रमिति ॥ ५ ॥ तददर्शनेकारणमाह ॥ जलमिति ॥ प्राणधारकमिति ॥ आपोमयःप्राणइतिश्रुतेः

अतःपरंप्रवक्ष्यामित्र्यंबकस्यसमुद्भवम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात् ॥ ४३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांविश्वेश्वरवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ छ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथांपापप्रणाशिनीम् ॥ कथयामियथाव्यासाच्छ्रुताचऋषिभिःसह ॥ १ ॥ पुराऋषिवरश्रेष्ठोगौतमोनामविश्रुतः ॥ यस्यपत्नीपरासाध्वीह्यहल्यानामविश्रुता ॥ २ ॥ तयासहऋषिश्रेष्ठस्तपश्चक्रेसुशोभनम् ॥ दक्षिणस्यांदिशियोवैगिरिर्ब्रह्मेतिसंज्ञितः ॥ ३ ॥ तत्रतेनतपस्तप्तंवर्षाणामयुतंध्रुवम् ॥ कदाचिद्वैह्यनावृष्टिरभवत्सर्वदुःखदा ॥ ४ ॥ वर्षाणांचशतंरौद्रंलोकादुःखमुपागताः ॥ आर्द्रंचपल्लवंनैवदृश्यतेपृथिवीतले ॥ ५ ॥ जलंनैवविदृश्येतजीवानांप्राणधारकम् ॥ तदातेऋषयश्चैवमनुष्याःपशवस्तथा ॥ ६ ॥ पक्षिणश्चमृताःसर्वेगताश्चैवदिशोदश ॥ तदृष्ट्वाऋषयोविप्राःप्राणायामपरायणाः ॥ ७ ॥ ध्यानेनैवतदाकेचित्कालंनिन्युःसुदारुणं ॥ गौतमोऽपिस्वयंतत्रवरुणार्थेतपःशुभम् ॥ ॥ ८ ॥ चकारचैवषण्मासंप्राणायामपरायणः ॥ तस्मैतदावरंदातुंवरुणःसमागतः ॥ ९ ॥ प्रसन्नोऽस्मिवरंब्रूहिददामिऋषिसत्तम ॥ ततश्चगौतमस्तंवैवृष्टिंचैवार्थयत्तदा ॥ १० ॥ ततःसोपिवचस्तस्माउवाचऋषिसत्तमाः ॥ वरुणउवाच ॥ दैवाज्ञाचसमुल्लंघ्याब्रह्मणानकथंमया ॥ ११ ॥ ॥ ॥ ॥

॥ ६ ॥ तदिति ॥ तत्अनावृष्टिफलमित्यर्थः ॥ प्राणायामेति ॥ सुभिक्षार्थमितिभावः ॥७॥ ध्यानेनैवेति ॥ वृष्टिमपेक्ष्यईश्वरध्यानमात्रेणेत्यर्थः ॥ वरुणार्थेवरुणप्रसादनार्थे ॥ वरुणस्यजलाभिमानिदेवतात्वादितिभावः ॥८॥ ९॥ वरुणःकिमाहेतितदाह ॥ प्रसन्नइति ॥ आर्थयत्प्रार्थयत ॥ १० ॥ सोपिवरुणोपि ॥ हेऋषिसत्तमाः ॥ अनावृष्टिर्दैवकृताब्रह्मणापिवारयितुमशक्येत्याह ॥ दैवाज्ञेति ॥ ब्रह्मणेति ॥ ब्रह्मणापिनसमुल्लंघ्यानातिक्रमणीयाकुतोमयेत्यर्थः ॥ ११ ॥

॥ १२ ॥ प्रार्थयामिप्रार्थये ॥ १३ ॥ तथापिजललाभार्थंयुक्त्यैववरुणंप्रशंसति ॥ महतामिति ॥ भवादृशामित्यर्थः ॥ तत्रहेतुमाह ॥ महांतइति ॥ पश्यंतिपरीक्षंते ॥ इतरेनीचजनाः ॥ १४ ॥ शुभस्यमहत्समागमरूपस्यआश्रयतः आश्रयणेनतुच्छःक्षुद्रोपि यल्लभतेतदाह ॥ दारिद्र्यमिति ॥ इदमुपलक्षणंसर्वशुभफलानाम् ॥ १५ ॥ साधुजनसंसेवनात्साधुफलप्राप्तिर्दुष्टसेवनाच्चदुष्टफलप्राप्तिर्भवतीत्याह ॥ दुःखमिति ॥ यथानरंयादृशं नरम् ॥ १६ ॥ अत्रदृष्टांतमाह ॥ मृगेति ॥ मृगेशमंदिरेसिंहमंदिरे मुक्ताफलकरीमौक्तिकफलानांसंपादिका शृगालमंदिरेक्रोष्टुमंदिरेसेवाअस्थि लाभकरीभवतीतिविद्वज्जनाविदुरित्यर्थः ॥ १७ ॥ उत्तमानांमहतांपरदुःखसहिष्णुतापरकृतदुःखसहनशीलता ॥ कुतइतिचेत्तत्राह ॥ स्वयमिति ॥ सह्य

अन्यत्प्रार्थयसुव्रतोसितदहंकरवाणिते ॥ इतितद्वचनंश्रुत्वागौतमोवाक्यमब्रवीत् ॥ १२ ॥ यदिप्रसन्नोदेवेशयदिदे योवरोमम ॥ तदहंप्रार्थयाम्यद्यकर्तव्यंहित्वयातथा ॥ १३ ॥ महतामाश्रयःपुंसांमहत्वायोपजायते ॥ महांतश्वस्व रूपंचपश्यंतिनेतरेऽशुभाः ॥ १४ ॥ शुभस्याश्रयतस्तुच्छोलभतेविविधंफलं ॥ दारिद्र्यंदूरतोयातिसूर्यंदृष्ट्वायथातमः ॥ १५ ॥ दुःखंशोकंभयंपापमुत्कर्षंलभतेनरः ॥ यथानरंचसेवेततादृशंफलमश्नुते ॥ १६ ॥ मृगेशमंदिरेसेवामुक्ता फलकरीमता ॥ शृगालमंदिरेसेवाह्यस्थिलाभकरीविदुः ॥ १७ ॥ उत्तमानांस्वभावोऽयंपरदुःखसहिष्णुता ॥ स्वयं दुःखंचसंप्राप्तंसह्यतेऽन्यस्यवार्यते ॥ १८ ॥ कल्पवृक्षस्वभावोहिसज्जनश्चजलाधिप ॥ वृक्षंचहाटकंचैवचंदनंचेक्षु कंतथा ॥ १९ ॥ पश्येद्भुविपरार्थैतुकुशलाःसंतिकेनच ॥ दुःखदग्धस्ययद्दुःखनाशनंस्वसुखायवै ॥ २० ॥

तइति ॥ उत्तमजनैरितिशेषः ॥ १८ ॥ कुतइतिचेत्तत्राह ॥ कल्पवृक्षइति ॥ कल्पवृक्षस्वभावत्वमेवाह ॥ सज्जनइति ॥ सज्जनः वृक्षंपुष्पफला दियुतं ॥ अनेनसर्वास्थावरसंपत्तिःसूचिता ॥ हाटकंसुवर्णं ॥ हिरण्यंहेमहाटकमित्यमरः ॥ अनेनसर्वाजंगमसंपत्तिर्दर्शिता ॥ चंदनंसुगंधलाभतापह रणाद्यर्थं ॥ इक्षुकंइक्षुविकारशर्करादिकंक्षुन्निवृत्त्यर्थंभुविपरार्थेपश्येदित्यग्रिमेणान्वयः ॥ १९ ॥ स्वयंसज्जनाःकथंसुखिनोभवंतीत्यत्राह ॥ केनचेति ॥ केनापिअसारेणवस्तुनासज्जनाःकुशलाःसंतुष्टाभवंतीत्यर्थः ॥ तस्यासारत्वेनसुखसाधनत्वाभावेपिपरदुःखनाशनमेवसज्जनसुखोत्पादकमित्यभिप्रेत्याह ॥ दुः खेति ॥ दुःखदग्धस्यतापत्रययुक्तस्ययद्दुःखनाशनंतदेवतेषांस्वसुखसाधनमित्यर्थः ॥ २० ॥ ॥ ॥

परोपकारिणमिति ॥ हेऋषिश्रेष्ठाःशौनकादयःपरोपकारिणंपापंपापिनमपिदृष्ट्वायेविदूरतोभवंतितेपापाएवेतिसंबंधः ॥ एतन्मयैवोक्तमितिनकिंत्वत्रलोकप्रसि
द्धिरप्यस्तीतिसूतआह ॥ श्रुतिरिति ॥ सनातनीपरंपराप्राप्ता ॥ २१ ॥ ननुकिमित्येतावत्परोपकारस्यमाहात्म्यमितितत्राह ॥ इयंचेति ॥ यैश्चतु
र्भिर्धार्यतेतानाह ॥ यइति ॥ २२ ॥ दर्पःविद्याशौर्याद्यभिमानः ॥ ननुपरस्त्रीप्रेरणयापारदार्यादिकमपिउपकाररूपत्वात्कर्त्तव्यमित्याशंक्याह ॥ जितेंद्रिये
ति ॥ २३ ॥ महायौवनमेवकामपीडाजनकत्वात्व्याधिस्तत्रयेस्वस्थानिश्चलास्तिष्ठंतितइत्यर्थः ॥ २४ ॥ शेषस्तुपृथिवीधारणेनिमित्तमात्रमित्याह ॥ नकेवल
मिति ॥ तस्मादिति उपकारगुणस्यश्रेष्ठत्वकथनादित्यर्थः ॥ सर्वमदिष्टम् ॥ २५ ॥ यदिष्टंतदाह ॥ इदंचेति ॥ मेघजलंवर्षोदकम् ॥ नित्येति ॥ सस्या

परोपकारिणंदृष्ट्वापापंपापाविदूरतः ॥ भवंतिचऋषिश्रेष्ठाःश्रुतिरेषासनातनी ॥ २१ ॥ इयंचपृथिवीदेवीचतुर्भिर्धा
र्यतेशुभा ॥ येदीनेषुदयांनित्यंकुर्वंतिकृपयायुताः ॥ २२ ॥ येषांचैवनदर्पोवैजायतेचकदाचन ॥ उपकारपरायेचजि
तेंद्रियतयातथा ॥ २३ ॥ महायौवनव्याधौचस्वस्थास्तिष्ठंतिनित्यशः ॥ एतैश्चपुण्यस्तंभैश्चधार्यतेपृथिवीपुनः ॥
॥ २४ ॥ नकेवलंचशेषेणधृताचैवधरास्वयम् ॥ तस्माच्चजलराजोऽसिदेयंसर्वंत्वयामम ॥ २५ ॥ इदंचप्रार्थ्यतेमेघ
जलंनित्यफलप्रदम् ॥ देहिमेत्वंमहाराजकृपांयदिकरिष्यसि ॥ २६ ॥ इतिसंप्रार्थितेतेनगौतमेनमहात्मना ॥ उवा
चवचनंतस्मैगर्तंचक्रियतांत्वया ॥ २७ ॥ इत्युक्तंचकृतंतेनजलेनपूरितंतदा ॥ अक्षयंचजलंतेऽस्तुतीर्थभूतंभवेदिह ॥
॥ २८ ॥ तवनाम्नाचविख्यातंक्षेत्रंचैवभविष्यति ॥ अत्रदत्तंहुतंजप्तंश्राद्धंचैवाऽक्षयंभवेत् ॥ २९ ॥ इत्युक्त्वांतर्दधेदे
वस्तुतस्तेनमहात्मना ॥ ततश्चगौतमस्तत्रजलंप्राप्यसुदुर्लभम् ॥ ३० ॥ नित्यंनैमित्तिकंकर्मचकारविधिवत्तदा ॥
व्रीहींश्चैवयवांश्चैवनीवारानप्यनेकधा ॥ ३१ ॥ ॥ ॥ ॥

द्युत्पत्तिकरम् ॥ २६ ॥ उवाचेति ॥ वरुणइतिशेषः ॥ तस्मैगौतमाय ॥ किमुवाचेतितदाह ॥ गतमिति ॥ २७ ॥ इत्युक्तामिति ॥ वरुणेनेतिशेषः ॥ ते
नगौतमेन तदागर्तकरणसमयएव ॥ इदानींवरुणोवरंददाति ॥ अक्षयमिति ॥ तीर्थभूतमिति ॥ तरंत्यनेनेतितीर्थमितिव्युत्पत्त्यास्नानादिकर्तॄणांतारकमित्यर्थः
॥ २८ ॥ विख्यातमिति ॥ गौतमक्षेत्रमितिनाम्नाप्रसिद्धंभवेदित्यर्थः ॥ एतन्माहात्म्यमाह ॥ अत्रेति ॥ २९ ॥ देवःवरुणः ॥ तेनगौतमेन ॥ ३० ॥
नित्यंसंध्याग्निहोत्रादिकम् ॥ नैमित्तिकंपर्वस्नानादिकम् ॥ नीवारान्देवधान्यविशेषान् ॥ एतद्वैदेवानांपरममन्नंयन्नीवाराइतिश्रुतेः ॥ ३१ ॥

तत्रैवतत्रत्यक्षेत्रएव ॥ हवनार्थमिति ॥ अनेनगौतमस्यहोमादिकमेवमुख्यंधान्यकार्यंभक्षणादिकंत्वानुषंगिकमासीदितिसूचितम् ॥ स्वतइति ॥ स्वयमेवउत्पद्य तिष्ठन्नतुपर्जन्यादिसापेक्षमितिभावः ॥ ३२ ॥ ३३ ॥ तादृशंक्षेत्रंदृष्ट्वाऽन्येपिमुनयस्तत्रवासार्थमागताइत्याह ॥ ऋषयइति ॥ ३४ ॥ ३५ ॥ पुत्रशिष्येति ॥ अनेनमुनीनांतत्रनित्यनैमित्तिकादिसर्वकर्मसंपत्तिर्दर्शिता ॥ कालक्रमणेति ॥ सत्कर्मणाकालहरणायेत्यर्थः ॥ ३६ ॥ ततइति ॥ वनेधान्याद्यतिशयादेवे त्यर्थः ॥ तेऋषिप्रभृतयस्तत्कालसंबंधिदुःखंकिमपिनाविदन्निितिसंबंधः ॥ तदेवमिति ॥ आनंदमिति ॥ आनंदमानंदः ॥ अथवाआनंदयुक्तंमुनिवृंद मासीदित्यर्थः ॥ सर्वमेतद्गौतमपुण्यमूलकमित्याह ॥ प्रभावादिति ॥ ३७ ॥ प्रेषिताइति ॥ शिष्याइतिशेषः ॥ ३८ ॥ ऋषिपत्न्यइति ॥ जलसमीपेशि

वापयामासतत्रैवहवनार्थंमुनीश्वराः ॥ जलंचैवाऽक्षयंतत्रस्वतश्चैवऋषीश्वराः ॥ ३२ ॥ वृक्षाश्चविविधास्तत्रपुष्पा णिचफलानिच ॥ धान्यानिविविधानीह्यासंस्तत्राप्यनेकशः ॥ ३३ ॥ ऋषयोह्यागतास्तत्रगौतमानुमतास्तदा ॥ पशवःपक्षिणश्चैवसमाजग्मुःसुखायवै ॥ ३४ ॥ तद्वनंसुंदरंह्यासीत्पृथिव्यामंडलेपरम् ॥ ऋषयोऽपिवनेतत्रशुभकर्म परायणाः ॥ ३५ ॥ वासंचक्रुरनेकेचपुत्रशिष्यसमन्विताः ॥ वापयामासुर्धान्यानिकालक्रमणहेतवे ॥ ३६ ॥ तत श्चैवात्रतेतस्यदुःखंकालस्यनाऽविदन् ॥ आनंदंतद्वनेह्यासीत्प्रभावाद्गौतमस्यच ॥ ३७ ॥ एवंजातेतदातत्रयज्जातंश्रू यतांपुनः ॥ कदाचिद्गौतमेनैवजलार्थेप्रेषितागताः ॥ ३८ ॥ शिष्यान्जलसमीपेतुगतान्दृष्ट्वान्यषेधयन् ॥ ऋषिप त्न्योवयंतत्रग्रहीष्यामोविदूरतः ॥ ३९ ॥ पश्चाच्चैवजलंग्राह्यमित्येवंपर्यभर्त्सयन् ॥ परावृत्यतदातैश्चऋषिपत्न्यै निवेदितं ॥ ४० ॥ साचापितान्समादायसमाश्वास्यचताःस्वयम् ॥ जलंनीत्वाददौतस्मैगौतमायतपस्विने ॥ ४१ ॥ नित्यंसंपादयामासजलेनऋषिसत्तमाः ॥ ताश्चैवऋषिपत्न्यश्चक्रुद्धास्तांपर्यभर्त्सयन् ॥ ४२ ॥ ॥

ष्यान्गतान्दृष्ट्वावयंग्रहीष्यामोयूयंविदूरतोभवतेतिन्यषेधयन्निितिसंबंधः ॥ ३९ ॥ अस्माभिःकदाजलंग्राह्यमितितदाशंकायामाह ॥ पश्चादिति ॥ तैःगौ तमशिष्यैः ॥ ऋषिपत्न्यैगौतमपत्न्यैअहल्यायै ॥ ४० ॥ साचापिअहल्यापितान्भर्तृशिष्यान्समादायसम्यगनुगृह्यताःऋषिपत्नीःस्नेहोक्त्यासमाश्वास्यस्व यंजलंनीत्वागौतमायस्वभर्त्रेददावितिसंबंधः ॥ ४१ ॥ नित्यमिति ॥ सानित्यमग्निहोत्रादिनित्यकर्मजलेनानीतेनभर्त्रासंपादयामासकारयामासेत्यर्थः ॥ स्त्रीस्वभावादृषिपत्न्यस्तदपिनासहंतेत्याह ॥ ताश्चैवेति ॥ तांअहल्याम् ॥ ४२ ॥ ॥ ॥ ॥

असहिष्णुतयाताभिर्यत्कृतंतदाह ॥ स्वाम्यग्रइति ॥ स्वपतीनांपुरतइत्यर्थः ॥ ताभिःऋषिपत्नीभिः ॥ किंताद्विपरीतंतदाह ॥ अहल्येति ॥ हेनाथमानवी प्राकृतमर्त्या ॥ भर्त्सतेनिंदतिअस्मानितिशेषः ॥ अहल्यामानिनीनाथेतिपाठांतरम् ॥ ४३ ॥ वयमिति ॥ जीविताःप्राणसमाः ॥ युष्माकमितिशेषः ॥ यतोयूयमस्मद्दृशादेवाश्रययुक्ताःसंपन्नाइत्यभिप्रेत्याहुः ॥ यूयमिति ॥ यूयंपूर्वंनिराश्रयाःसंतोऽस्मत्परिग्रहादेवस्थलतांगृहाश्रमित्वेनेतरेषामाश्रमिणांआश्रयतांप्राप्ताइत्यर्थः ॥ अथवा ॥ वयमिति ॥ तद्भर्त्सनंश्रुत्वापिवयंजीविताइतिविस्मयोक्तिः ॥ यूयंचनिःस्थलानिराश्रयानिर्बलावस्थलतामस्मदाश्रयत्वंगताःप्राप्ताइतिरोपोक्तिः ॥ ननुगृहिणीनांपत्यादिपारतंत्र्यस्मरणात्कथंभवतीभिरस्मदतिक्रमःक्रियतइत्यतआहुः ॥ अनृतमिति ॥ साहसंसहसाक्रियमाणंकर्ममायाकपटंअन्यत्स्पष्टम् ॥ ४४ ॥ स्वभावजाइति ॥ एवंचभवदतिक्रमदोषज्ञानवत्योपिवयमेवंब्रूमस्तत्रस्वभावपरिवर्तनउपायाभावएवकारणमितिभावः ॥ अथवानिर्दयत्वांतादोषाअस्मादृशीष्वज्ञासुस्त्रीष्वेवसंभवेयुस्तत्कथंतेभवादृशेषुतपस्विष्वितिरोषेणाहुः ॥ अनृतमिति ॥ अतएवाहुः ॥ धिगिति ॥ तपश्चेति ॥

स्वाम्यग्रेविपरीतंचताभिःसर्वंनिवेदितम् ॥ अहल्यामानवीनाथभर्त्सतेचैवनित्यशः ॥ ४३ ॥ वयंचजीवितायूयंनिःस्थलाःस्थलतांगताः ॥ अनृतंसाहसंमायामूर्खत्वमतिलोभता ॥ ४४ ॥ अशौचत्वंनिर्दयत्वंस्त्रीणांदोषाःस्वभावजाः ॥ धिक्जीवितंचभवतांतपश्चकिंफलप्रदम् ॥ ४५ ॥ अस्माकंजीवितंधिक्चाहल्यानित्यंप्रकुप्यति ॥ इतितासांवचःश्रुत्वागांभीर्यमवलंबिताः ॥ ४६ ॥ तस्यावाक्यमिदंनैवभविष्यतिभवेदिति ॥ सत्यंवदतिसानोचेज्जीवितंचकुतोभवेत् ॥ ४७ ॥ कृतघ्नाश्चवयंसर्वेयद्येनांकुत्सितंवचः ॥ ब्रवीमश्चकथंपुष्टाययाचजीवितावयम् ॥ ४८ ॥ ताश्चपरस्परंनित्यंतस्यैक्लेशपरायणाः ॥ साचापिविनयेनैवतासांचकोमलंवचः ॥ ४९ ॥ ॥ ॥

गृहिण्यनुरोधेनैवगृहस्थस्यतपःफलसिद्धिरितिभावः ॥ ४५ ॥ प्रकुप्यतीति ॥ पूर्वोक्तस्त्रीस्वभावजदोषादितिभावः ॥ गांभीर्यमिति ॥ अहल्यादोषज्ञानाभावेनस्त्रीवचःसुविश्वासाभावादितिभावः ॥ ४६ ॥ एतदेवस्पष्टयति ॥ तस्याइति ॥ अहल्यायाइत्यर्थः ॥ इदंभर्त्सनरूपं ॥ नभविष्यतीति ॥ अनेनतस्यांसाध्वीत्वनिश्चयोबोधितः ॥ भवेदितीति ॥ नभवेदित्यन्वयः ॥ अनेनतस्यावाक्यभवनसंभावनापिनिरस्ता ॥ कुतइतिचेत्तत्राह ॥ सत्यमिति ॥ साअहल्या ॥ जीवितमिति ॥ तत्प्रभावाधीनमस्मज्जीवनमितिभावः ॥ अथवा ॥ तस्याइदंभर्त्सनंभवेदेव ॥ सायद्भर्सनंवाक्यंवदतितत्सत्यंवदति ॥ भवतीष्वेवस्त्रीस्वभावजदोषाइतिऋषिनिश्चयः ॥ अतएवतयाऽस्मज्जीवनमित्याहुः ॥ नोचेदिति ॥ ४७ ॥ अतएवाहुः॥कृतघ्नाइति ॥ ब्रवीमइति ॥ प्रब्रूमइत्यर्थः ॥ क्वचित्तथैवपाठः ॥ ययाचेति ॥ उपजीव्यविरोधस्यायुक्तत्वादिभावः ॥ ४८ ॥ ताश्चेतिसूतवाक्यम् ॥ ताःऋषिपत्न्यः ॥ तस्यैअहल्यायै ॥ क्लेशपरायणाः ॥ क्लेशंदतुंप्रवृत्ताइत्यर्थः ॥ अभूवन्नितिशेषः ॥ तथाप्यहल्यासुस्वभावत्वंनतत्याजेत्याह ॥ साचापीति ॥ तासामिति ॥ ताःप्रतीत्यर्थः ॥ वचइति ॥ अब्रवीदितिशेषः ॥ ४९ ॥

पूर्वोक्तस्वभावजदोषफलमाह ॥ दुष्टाइति ॥ स्वामिभ्यःस्वपतिभ्यः ॥ ५० ॥ तासामिति ॥ तासांस्वपत्नीनांदुःखंतयाअहल्ययाकृतंगौतमाग्रेनिवेदितंऋषिभि रितिशेषः ॥ वचःश्रुत्वेति ॥ ऋषिनिवेदितंवाक्यमन्येपिऋषयःश्रुत्वादुःखयुक्ताःसंतःसर्वंसत्यंमेनिरइत्युत्तरेणसंबंधः ॥ ५१ ॥ ननुचतुष्पान्व्यवहारप्रवृत्तिवि नातद्वचसिसत्यत्वनिश्चयःकथमभवदित्यतआह ॥ विचारतत्पराइति ॥ भाविकर्मेति ॥ भाविकर्मफलानुरोधेनेत्यर्थः ॥ ५२ ॥ इतिश्रीशिवमहापुराणज्ञा नसंहिताटीकायांसारबोधिन्यांत्र्यंबकेश्वरमाहिमवर्णनंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ओंनमःशिवाय ॥ ऋषिभिर्गौतमार्त्य र्थंगणेशोपिप्रपूजितः ॥ स्वेष्टत्वंलब्धमित्येवंत्रिपंचाशेत्रवर्ण्यते ॥ १ ॥ तमेवविचारमाह ॥ तैरिति ॥ ब्राह्मणस्यगौतमस्य ॥ १ ॥ ऋषयोऽन्यानृषीन्प्रत्याहुः ॥ यूय

दुष्टास्ताऋषिपत्न्यश्चस्वामिभ्यःपर्यभर्त्सयन् ॥ कदाचिद्वनचर्यायाऋषयस्तेगताःस्वयम् ॥ ५० ॥ दैवयोगात्तयात त्रतासांदुःखंनिवेदितम् ॥ गौतमाग्रेवचःश्रुत्वादुःखेनचसमन्विताः ॥ ५१ ॥ सत्यंवदंतिपत्न्यश्चमेनिरेतेवचस्तदा ॥ सर्वेतेचमिलित्वातुपत्न्यःसर्वास्तथापुनः ॥ विचारतत्पराह्यासन्भाविकर्मप्रसंगतः ॥ ५२ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहितायांत्र्यंबकेश्वरमहिमवर्णनंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ छ ॥ सूतउवाच ॥ तैश्चविचारितंयच्च श्रूयतामृषिसत्तमाः ॥ मयाचकथ्यमानंतद्ब्राह्मणस्यविचेष्टितं ॥ १ ॥ यूयंचजीवितामेद्यमानश्चामानिनःकथं ॥ तदा दुःखंभवेदेवनात्रकार्याविचारणा ॥ २ ॥ तस्मात्तथाचकर्तव्यंयथामानोभवेन्नहि ॥ अंतरायैश्चतपसांनहन्येतकदाच न ॥ ३ ॥ तस्माच्छलंचकर्तव्यंयथास्वमाश्रमाद्बहिः ॥ अस्माभिर्बहुधाभर्त्स्यनिष्कास्येतयथातथा ॥ ४ ॥ एवंविचा र्यतैस्तत्रपूजितोऽथविनायकः ॥ उपासनंचतस्यैवचक्रुस्तेऋषिसत्तमाः ॥ ५ ॥ ॥ ॥

मिति ॥ मेअस्माकमित्यर्थः ॥ अथवावक्तॄणांस्वविनयबोधनायैकवचनं ॥ जीविताःजीवितप्रायाःसंतःस्थअद्यअमानिनोमान्यस्यगौतमस्यमानोऽभिमानःकथ मितिसंबंधः ॥ यद्येवंभवेत्तदार्किंस्यात्तत्राहुः ॥ तदेति ॥ २ ॥ मानइति ॥ मानोऽभिमानःगौतमस्येतिशेषः ॥ ननुतपोविघ्नइतिचेत्तत्राहुः ॥ अंतरायैरिति ॥ तदीयानांतपसामंतरायैरस्मत्कृतैर्विघ्नैःसनहन्येतनपीड्येतेत्यर्थः ॥ ३ ॥ यत्कर्तव्यंतदाहुः ॥ छलमिति ॥ यथास्वंस्वस्यबलानुसारेणेत्यर्थः ॥ आश्रमादि ति ॥ गौतमःअस्माभिर्बहुधाभर्त्स्ययथाऽऽश्रमाद्बहिर्निष्कास्येततथाछलंकर्तव्यमितिसंबंधः ॥ ४ ॥ एतत्करणेविघ्नबाहुल्यसंभावनयाविघ्ननाशायविघ्नाधि पस्तैःपूजितइत्याह ॥ एवमिति ॥ तस्यैवेति ॥ विनायकस्येत्यर्थः ॥ एवकारेणविघ्ननिवारणमन्यतोनभवेदितिऋषिमनीषासूचिता ॥ ५ ॥

विनायकपूजासाधनद्रव्याण्याह ॥ दूर्वादलैरिति ॥ शतपत्रैःकुशेशयैः ॥ आरात्रिकंनीराजनम् ॥ ६ ॥ हरजःविनायकः ॥ ७ ॥ वरमिति ॥ यूयंवरंब्रूते त्यन्वयः ॥ तदीयंविनायकोक्तम् ॥ ८ ॥ ऋषयोवरमयाचंतेत्याह ॥ यदीति ॥ गौतमइति ॥ यथागौतमआश्रमाद्बहिःऋषिभिःपुनःपुनःपरिभर्त्स्यनिष्का स्यतेतथाकार्यमित्यन्वयः ॥ ९ ॥ गजाननस्तुसर्वज्ञस्तानुपहस्याब्रवीदित्याह ॥ संप्रार्थितइति ॥ गजाननइतिशेषः ॥ तैःऋषिभिः ॥ १० ॥ श्रूयतामिति ॥ भोऋषयःअपराधंविनातस्मैगौतमाययत्क्रुध्यतेइदमयुक्तंक्रियते ॥ अनेनभवतांहानिरेवभवेदित्यर्थः ॥ ११ ॥ कुतइतिचेत्तत्रलौकिकमाह ॥ उपकृतामिति ॥ यैःपुरुषैःपूर्वमुपकारःकृतःतेभ्योदुःखंनदीयंतेदीयेत ॥ यदिदीयेततदादुःखदायिनांनाशोभवेदित्यर्थः ॥ १२ ॥ भवतांतपसोऽननुरूपमिदमित्याह ॥ ईदृश

दूर्वादलैरनेकैश्चशतपत्रैश्चतंडुलैः ॥ सिंदूरैश्चंदनैश्चैवधूपारात्रिकपूजनैः ॥ ६ ॥ मोदकैर्विविधैश्चैवपूजयामासुर्वैतदा ॥ ततःप्रसन्नोहरजस्तेभ्यश्चेदंवचोब्रवीत् ॥ ७ ॥ गणपतिरुवाच ॥ प्रसन्नोऽस्मिवरंब्रूतयूयंकिंकरवाणिवः ॥ तदीयंत द्वचःश्रुत्वाऋषयोवाक्यमब्रुवन् ॥ ८ ॥ यदिप्रसन्नोदेवेशदेयोऽस्माकंवरस्त्वया ॥ तथाकार्यंत्वयादेवगौतमोह्याश्रमा द्बहिः ॥ ९ ॥ निष्कास्यतेचऋषिभिःपरिभर्त्स्यपुनःपुनः ॥ एवंसंप्रार्थितस्तैस्तुविहस्यवचनंपुनः ॥ १० ॥ श्रूयतामृष यःश्रेष्ठाअयुक्तंक्रियतेऽधुना ॥ अपराधंविनातस्मैक्रुध्यतेहानिरेवच ॥ ११ ॥ उपकृतंपुरायैस्तुतेभ्योदुःखंनदीयते ॥ यदाचदीयतेदुःखंतदानाशोभवेदिह ॥ १२ ॥ ईदृशंचतपःकृत्वासाध्यतेफलमुत्तमं ॥ शुभंफलंस्वयंहित्वासाध्यतेन हितंपुनः ॥ १३ ॥ दत्वातुकांचनंचैवगृह्यतेकाचमेवच ॥ पश्चाद्युक्तंचयत्स्याद्धैकर्तव्यंतत्तथापुनः ॥ १४ ॥ इत्येवंवचनं श्रुत्वातस्यतेऋषिसत्तमाः ॥ बुद्धिमोहंतदाप्राप्ताइदमेववचोऽब्रुवन् ॥ १५ ॥ कर्तव्यंहित्वयास्वामिन्निदमेवनचाऽ न्यथा ॥ इत्युक्तस्तुतदादेवोगणेशोवाक्यमब्रवीत् ॥ १६ ॥ ॥ ॥ ॥

मिति ॥ उत्तमामिति ॥ स्वर्गमोक्षादिकमित्यर्थः ॥ अथवानरकादिफलमितिमर्मोक्तिः ॥ साध्यतेप्राप्यते ॥ तदिदमयुक्तमितिभावः ॥ एतत्करणेनशुभफलप्राप्ति र्नभवेदित्याह ॥ शुभमिति ॥ हित्वात्यक्त्वा ॥ १३ ॥ तत्रदृष्टांतमाह ॥ दत्वेति ॥ मयायद्वक्तव्यंतदुक्तमेवभवद्भिस्तुयद्रोचेतेततत्कर्तव्यामित्याह ॥ पश्चादिति ॥ ॥ १४ ॥ तस्यगजाननस्य ॥ १५ ॥ ऋषयस्तुस्त्रीवशतयागजाननोक्तमनंगीकृत्यपूर्वोक्तंगौतमनिष्कासनमेवायाचंतेतिसूतआह ॥ कर्तव्यमिति ॥ गजाननः पुनरपिनीतिमार्गेणतानुपदिदेशेत्याह ॥ गणेशइति ॥ १६ ॥ ॥ ॥ ॥

उपदेशस्वरूपमाह ॥ असाधुरिति ॥ सुनिश्चितमिति ॥ काचःकाचोमणिर्मणिरितिन्यायादितिभावः ॥ १७ ॥ साधुस्वरूपमाह ॥ असाधुरिति ॥ असाधुःपुरुषः दुष्टसंगात्साधवेदुःखंददाति ॥ साधुश्चभाविसुखविवृद्धयेतदपिसुखमेवमन्यतइत्यर्थः ॥ १८ ॥ किंच ॥ पाटीरःस्वपेषणकर्त्रेइवदुःखदात्रेपिसाधुःसुखमेवददातीत्याह ॥ दुःखदातुरिति ॥ एवंसामान्यतःसाधुस्वरूपमुक्त्वाप्रकृतेगौतमेतद्घटति ॥ यदाचेति ॥ नाशनमिति ॥ अनावृष्ट्यादिनाभवत्क्षयजननमित्यर्थः ॥ १९ ॥ प्रदत्तंप्रत्तम् ॥ ऋषिष्वसाधुत्वंघटयति ॥ इदानीमिति ॥ २० ॥ ऋषीणामसाधुत्वप्राप्तौकारणमाह ॥ स्त्रीबलादिति ॥ स्त्रीसंसर्गबलादित्यर्थः ॥ एवंगौतमनिष्कासनरूपंकार्यंयूयंनिश्चयेनकरिष्यथ ॥ २१ ॥ एतत्गौतमनिष्कासनंतस्यगौतमस्यहिततमंभविष्यति ॥ साधुत्वादेवेतिभावः ॥ अतएवपुनःसवःसुखंदास्यतीत्याह

असाधुःसाधुतांनैवयातिचैवकदाचन ॥ साधुश्चासाधुतांनैवप्राप्नोतीतिसुनिश्चितम् ॥ १७ ॥ असाधुःसाधवेदुःखंददातिदुष्टयोगतः ॥ सुखंचमन्यतेसाधुरग्रेसुखविवृद्धये ॥ १८ ॥ दुःखदातुस्तदासाधुःसुखंचैवप्रयच्छति ॥ यदाचभवतांदुःखंजातंनाशनमात्मनः ॥ १९ ॥ तदासुखंप्रदत्तंचगौतमेनमहर्षिणा ॥ इदानींतुभवद्भिश्चतस्मैदुःखंप्रदीयते ॥ २० ॥ नैतद्युक्ततमंलोकेसर्वथाऋषिसत्तमाः ॥ स्त्रीबलान्मोहितायूयंनूनमेवंकरिष्यथ ॥ २१ ॥ एतद्धिततमंतस्यभविष्यतिनसंशयः ॥ पुनश्चाऽयमृषिश्रेष्ठोदास्यतिवःसुखंध्रुवम् ॥ २२ ॥ इत्येवंवचनंतेनयद्यप्युक्तंनमेनिरे ॥ भक्ताधीनतयातेनकृतंचश्रूयतांपुनः ॥ २३ ॥ भवद्भिःप्रार्थ्यतेयच्चकरिष्येतत्तथाऽप्यहम् ॥ पश्चाद्भाविभवेदेवइत्युक्त्वांतरधीयत ॥ २४ ॥ गौतमश्चनजानातिऋषिकृत्यंदुराशयं ॥ आनंदमनसातेनक्रियतेनित्यकर्मतच ॥ २५ ॥ तदनंतरंयज्जातंश्रूयतामृषिसत्तमाः ॥ गौतमस्यचकेदारस्तत्राऽऽसन्व्रीहियोयवाः ॥ २६ ॥ गणपतिस्तत्रगौर्भूत्वाजगामदुर्बलःकिल ॥ कंपमानातदागत्वाकेदारेगौतमस्यच ॥ २७ ॥ ॥ ॥ ॥

॥ पुनश्चेति ॥ तेनगणेशेन ॥ २२ ॥ मेनिरइति ॥ ऋषयइतिशेषः ॥ तेनेति ॥ तेनगणेशेनभक्ताधीनतयायत्कृतंतच्छ्रूयतामितिसंबंधः ॥ २३ ॥ ऋषिप्रार्थितमनुसृत्यैवगजाननआह ॥ भवद्भिरिति ॥ मयाकरिष्यतेफलसिद्धिस्तुदैवाधीनेत्यभिप्रेत्याह ॥ पश्चादिति ॥ यदवश्यंभावितत्पश्चाद्भवेदेवेत्यर्थः ॥ अंतरधीयत अंतर्धानंगतःगजाननइतिशेषः ॥ २४ ॥ ऋषिमायांगौतमोपिनाजानादितिसूतआह ॥ गौतमइति ॥ दुराशयंकुत्सिताभिप्रायविषयम् ॥ आनंदमनसाआनंदयुक्तांतःकरणेनतेनगौतमेननित्यकर्मसंध्याग्निहोत्रादिकंक्रियतेक्रियतेस्म ॥ २५ ॥ गौतमस्यभाविशुभफलंनिश्चित्यतदानींगजाननोऋषिबुध्यनुसारेणमायांचक्रइत्याह ॥ गौतमस्येति ॥ केदारःक्षेत्रंआसीदितिशेषः ॥ २६ ॥ तत्रक्षेत्रेगौर्भूत्वागोरूपंधृत्वा ॥ २७ ॥ ॥ ॥

कंपमानागौरित्यनुषज्यते ॥ दुर्बलत्वादेवेतिभावः ॥ देवाद्दुर्दैवात् ॥ २८ ॥ दृष्टायांगवीतिशेषः ॥ अर्थाद्गौतमेन ॥ गौतमइति ॥ गौतमःस्वयंतृणस्तंब मादायतांगांवारयामासेत्यन्वयः ॥ तृणस्तंबादानेनगौतमस्यदयालुत्वंप्रकटीकृतम् ॥ २९ ॥ गौतमदुःखप्राप्तौसागौर्निमित्तमात्रमपश्यदित्याह ॥ तृणस्तंबेनेति ॥ ऋषेरिति ॥ अनादरेषष्ठी ॥ ऋषिश्चविस्मितस्तदेतिपाठांतरम् ॥ ३० ॥ एतत्सर्वंगुप्तरूपेणऋष्यादयोदृष्ट्वाब्रुवन्नित्याह ॥ ऋषयइति ॥ ३१ ॥ गौतमोऽहल्याचतत्सर्वंदुर्दैवकृतमेवामन्येतामित्याह ॥ गौतमइति ॥ ३२ ॥ कगंतव्यमिति ॥ हत्यादोषपरिहारंविनागंतुमशक्यत्वादितिभा वः ॥ इदानींविप्रास्तत्यत्न्यश्चसाक्षाद्गौतमंतत्पत्नींचानिंदन्नित्याह ॥ एतस्मिन्निति ॥ ३३ ॥ निंदाकारमाह ॥ धिगिति ॥ बहुज्ञतामिति ॥ धिगि

व्रीहींश्चभक्षयामासयवांश्चऋषिसत्तमाः ॥ एतस्मिन्नंतरेदैवाद्गौतमश्चसमागतः ॥ २८ ॥ केदारेचैवदृष्ट्वायांदयालु गौतमःस्वयम् ॥ तृणस्तंबंसमादायवारयामासतांतदा ॥ २९ ॥ तृणस्तंबेनसंस्पृष्टासापपातपृथिवीतले ॥ मृताचत त्क्षणादेवऋषेश्चपश्यतस्तदा ॥ ३० ॥ ऋषयश्छन्नरूपास्तेऋषिपत्न्यस्तथाशुभाः ॥ ऊचुस्तेचतदासर्वेकिंकृतंगौत मेनच ॥ ३१ ॥ गौतमोऽपिस्वयंतत्रह्यहल्यासापिविस्मिता ॥ किंजातंचकथंदेवःकुपितोमधुसूदनः ॥ ३२ ॥ किंक र्तव्यंकगंतव्यंहत्याचसमुपस्थिता ॥ एतस्मिन्नंतरेविप्रागौतमंपर्यभर्त्सयन् ॥ ३३ ॥ विप्रपत्न्यस्तथाहल्यांदुर्वचो भिर्व्यथांददुः ॥ ऋषिपत्न्यऊचुः ॥ धिक्ज्ञानंतेऋषिश्रेष्ठधिक्तपस्तेबहुज्ञतां ॥ ३४ ॥ धिग्घोमंतेत्रिकालेचधिक्कर्म विविधंचयत् ॥ धिग्ध्येतत्तवचातुर्यंधिक्त्वांतेतुबहुश्रुतम् ॥ ३५ ॥ सर्वोधिक्कारतांयातुत्वदीयोगुणसंचयः ॥ इत्येवंप रिभर्त्स्यैवंऋषयस्तेऽमलाशयाः ॥ ३६ ॥ मुखंनदृश्यतांह्यस्यगोघ्नस्योचुःपरस्परम् ॥ अन्यच्चैवकृतंतैस्तुऋषिभिःसुदु रात्मभिः ॥ ३७ ॥ श्रूयतामृषयःश्रेष्ठाःकथयामियथाश्रुतं ॥ ऋषयोऋषिपत्न्यश्चशिष्याःपुत्रास्तथापुनः ॥ ३८ ॥

त्यनुवर्तते ॥ ३४ ॥ त्रिकालइति ॥ सायंप्रातरग्निहोत्रहोमौमध्यान्हेचवैश्वदेवइतिकालत्रयेहोमत्रयम् ॥ विविधमिति ॥ नित्यनैमित्तिकादिकमित्यर्थः ॥ व्यवहारज्ञानमपितवनास्तीत्याहुः ॥ धिगिति ॥ ३५ ॥ अमलाशयाइति ॥ अनेनसर्वमृषिपत्नीकृतमेवकैतवम्ऋषयस्तुशुद्धांतःकरणाएवासन्निति सूचितम् ॥ अथवामलाशयादुष्टभावाइत्यर्थः ॥ स्त्रीसंसर्गादितिभावः ॥ ३६ ॥ अस्येति ॥ अस्यगौतमस्यगोघ्नस्यमुखंनदृश्यतामितिपरस्परमूचुरित्यन्वयः ॥ सुदुरात्मभिरिति ॥ कुपत्नीवशतयातेषांदुरात्मत्त्वम् ॥ ३७ ॥ हेऋषयःशौनकादयः ॥ ऋषिभिर्यत्कृतंतदाह ॥ ऋषयइति ॥ ३८ ॥ ॥

गम्यतामिति ॥ गौतमस्यतत्स्थानात्‌निष्कासनेतत्पराबभूवुरितिभावः ॥ अतएवाहुः ॥ मुखमिति ॥ न्यूनमिति ॥ त्वन्मुखदर्शनेनास्माभिःकर्मफलंन्यूनंप्राप्तं भवेदित्यर्थः ॥ दृष्ट्वास्नानंभवेदितिपाठांतरम् ॥ ३९ ॥ कुतःकर्मफलन्यूनतेतिचेत्तत्राहुः ॥ यावदिति ॥ त्वामिति ॥ तिष्ठसीतिशेषः ॥ हविर्भुजःदेवाः ॥ अस्मद्दत्तमिति ॥ हव्यकव्यादिकमित्यर्थः ॥ ४० ॥ सर्वोऽयंगौतमपत्नीकृतएवदोषइत्यभिप्रेत्याहुः ॥ परिवारेति ॥ समताडयन्निति ॥ गौतममि तिशेषः ॥ ४१ ॥ गौतमस्तांपीडामुपलभ्ययदकरोत्तदाह ॥ गौतमइति ॥ ऋषीन्प्रतिगौतमआह ॥ सत्यमिति ॥ हेऋषयःभवद्भिर्यदुच्यतेतत्सत्यमेवाहंतुग च्छामीतिवचोब्रवीदित्यर्थः ॥ ४२ ॥ नकेवलमेतत्‌गौतमेनोक्तमपितुकृतमित्याह ॥ निर्गतइति ॥ तदनुज्ञया ॥ ऋष्यनुज्ञया ॥ ४३ ॥ गौतमोमनसि

गौतमंपर्यभर्त्संतगम्यतांगम्यतामिति ॥ मुखंनदर्शनीयंचदृष्ट्वान्यूनंभवेदिह ॥ ३९ ॥ यावदाश्रमसमीपेत्वंतावदेव हविर्भुजः ॥ पितरश्चैवगृण्हंतिह्यस्मद्दत्तंनकिंचन ॥ ४० ॥ तस्माद्गच्छपुनस्त्वंचपरिवारसमन्वितः ॥ इत्युक्त्वातेतदा सर्वेपाषाणैःसमताडयन् ॥ ४१ ॥ गौतमोऽपितदातत्रहाहाकिंकिंभविष्यति ॥ सत्यंचऋषयःश्रेष्ठागच्छामीतिव चोऽब्रवीत् ॥ ४२ ॥ इत्युक्त्वागौतमस्तस्मात्स्थानाच्चनिर्गतस्तदा ॥ गत्वाक्रोशंतदाचक्रेआश्रमंतदनुज्ञया ॥ ४३ ॥ यावच्चैवाऽभिशापोवैतावत्कार्यंनकिंचन ॥ कर्मणिनाधिकारोस्तिदैवेपित्र्येचवैदिके ॥ ४४ ॥ तत्रैवसंस्थितश्चैवगौत मोऋषिसत्तमः ॥ ऋषयोनैवभाषंतेऋषिपत्न्यस्तथैवच ॥ ४५ ॥ यथातेननगच्छंतियत्रासौऋषिसत्तमः ॥ कदाचि त्पथिदृष्टेवैदृष्ट्वापत्न्योयथापुनः ॥ ४६ ॥ वस्त्रंकृत्वांतरीयंचगच्छंतिमायिनस्तदा ॥ तदादुःखंमहत्प्राप्तंगौतमेनमह र्षिणा ॥ ४७ ॥ मासार्द्धंचततोनीत्वाऋषीन्संप्रार्थयत्तदा ॥ अनुकंप्योभवद्भिस्तुकथ्यतेक्रियतेमया ॥ ४८ ॥ यथामदी यंपापंचगच्छतीतिनिवेद्यताम् ॥ नोपदेशंविनासिद्धिर्जायतेकर्मणोनृणाम् ॥ ४९ ॥ ॥

किमपिव्यचारयदित्याह ॥ यावदिति ॥ अभिशापोदोषःसयावदस्तितावत्‌किमपिदेवादिकर्मनकर्तव्यमित्यर्थः ॥ कुतइतिचेत्तत्राह ॥ कर्मणीति ॥ ४४ ॥ एवंच तथैवदुर्दशापन्नोगौतमःस्थितइत्याह ॥ तत्रैवेति ॥ तदीयादशावर्ण्यते ॥ ऋषयइति ॥ ४५ ॥ ईदृशदोषयुक्तस्यमुखमपिनालोकितवंतइत्याह ॥ कदाचिदिति ॥ ऋषिसत्तमइतिसंबध्यते ॥ दृष्ट्वेत्यग्रिमेणान्वेति ॥ ४६ ॥ ऋषिपत्न्योमायाविजनवत्‌पथिगौतमोदृष्टश्चेत्तंदृष्ट्वांतरीयंवस्त्रंकृत्वावस्त्रेणांतर्धायगच्छंतीत्यन्व यः ॥ ४७ ॥ संप्रार्थयत्‌संप्रार्थयत ॥ प्रार्थनाप्रकारमह ॥ अनुकंप्यइति ॥ कथ्यतइति ॥ भवद्भिरितिसंबध्यते ॥ क्रियतइति ॥ प्रायश्चित्तमितिशेषः ॥ ॥ ४८ ॥ तदेवव्यनक्ति ॥ यथेति ॥ ननुभवान्‌जानात्येवसर्वंकिंनःपृच्छसीतिचेदत्राह ॥ नोपदेशामिति ॥ कर्मणःप्रायश्चित्तादिकर्मणः ॥ ४९ ॥

नोचुरिति ॥ प्रायचित्तंनोक्तवंतइत्यर्थः ॥ गौतमेद्वेषादितिभावः ॥ अत्यंतसेवयेति ॥ आर्जवेनेत्यर्थः ॥ अनेनतस्यचित्तशुद्धिनिश्चयोदर्शितः ॥ पृष्टाःविप्रा एकतःस्थिताःप्रायश्चित्तविचारार्थंसंभूयैकत्रस्थिताः ॥ ५० ॥ गौतमःप्रायश्चित्तिनोविधिंपृष्टवानित्याह ॥ गौतमइति ॥ ५१ ॥ ऋषिणागौतमेन ॥ निष्कृतिंप्रायश्चित्तं ॥ ५२ ॥ प्रायश्चित्तप्रकारमाहुः ॥ क्रांत्वेति ॥ क्रांत्वाप्रदक्षिणीकृत्य ॥ प्रकाशयकथयजनेभ्यइतिशेषः ॥ ५३ ॥ अत्रैवअस्मिन्देशएव ॥ चरकुरु ॥ ब्रह्मणश्चगिरेःब्रह्माख्यगिरेरित्यर्थः ॥ ५४ ॥ प्रकारांतरमाह ॥ अथवेति ॥ गंगांसमानीयतत्रस्नानंसमाचरेत्यर्थः ॥ ५५ ॥ पार्थिवानांपार्थिवलिं

इत्युक्तास्तेस्तदाविप्रानोचुश्चैवपरस्परम् ॥ अत्यंतसेवयापृष्टामिलित्वाह्येकतःस्थिताः ॥ ५० ॥ गौतमोदूरतःस्थित्वा नत्वाचऋषिसत्तमान् ॥ प्रपच्छविनयाविष्टःकिंकार्यंहिमयाऽधुना ॥ ५१ ॥ इत्युक्तेऋषिणातेनऋषयोवाक्यमब्रुवन् ॥ ऋषयऊचुः ॥ निष्कृतिंहिविनाशुद्धिर्जायतेनकदाचन ॥ ५२ ॥ तस्मात्त्वंदेहशुध्यर्थंप्रायश्चित्तंसमाचर ॥ क्रांत्वाचपृथिवींसर्वांपापंस्वंचप्रकाशय ॥ ५३ ॥ पुनरागत्यचाऽत्रैवचरमासव्रतंतथा ॥ शतमेकोत्तरंचैवब्रह्मणश्चगिरेस्तथा ॥ ५४ ॥ प्रक्रमणंविधायैवशुद्धिस्तेनभविष्यति ॥ अथवातुसमानीयगंगास्नानंसमाचर ॥ ५५ ॥ पार्थिवानांतथाकोटिंकृत्वादेवंविशेषतः ॥ गंगायांचततःस्नात्वापूतश्चैवभविष्यसि ॥ ५६ ॥ प्रथमंदशतथाचैकंगिरेःप्रक्रमणंकुरु ॥ शतकुंभैस्तथास्नात्वापार्थिवीनिष्कृतिर्भवेत् ॥ ५७ ॥ इत्येवमृषिभिःप्रोक्तंतथैवोमितितद्वचः ॥ पार्थिवानांतथापूजांगिरेःप्रक्रमणंतथा ॥ ५८ ॥ करिष्यामिऋषिश्रेष्ठाआज्ञयाश्रीमतामिह ॥ इत्युक्त्वाऋषिवर्यश्चकृत्वाप्रक्रमणंगिरेः ॥ ५९ ॥ तदाज्ञप्तऋषिस्तत्रपार्थिवानकरोत्तदा ॥ विधानपूर्वकंतच्चचकारगौतमःस्वयम् ॥ ६० ॥ ध्यानंचैवशिवस्यैवकृत्वाविधिविधानतः ॥ अहल्याचतथासाध्वीयुक्तंसर्वंचकारसा ॥ ६१ ॥ शिष्याश्चप्रतिशिष्याश्चचक्रुःसेवांतदातयोः ॥ शिवःप्रसन्नतांयातःकदाचिद्दृषिसत्तमाः ॥ ६२ ॥ ॥ ॥

गानां ॥ देवंशिवंपूजयित्वेतिशेषः ॥ ५६ ॥ अवांतरविधिमाहुः ॥ प्रथममिति ॥ शतकुंभैःशतसंख्याकैःकुंभैःपार्थिवीपार्थिवदेहशोधनरूपा ॥ अथवापार्थिवीप्रतिमापूजनीयेतिशेषः ॥ ५७ ॥ तद्वचइति ॥ ऋषिवचोगौतमओमित्यंगीचकारेत्यर्थः ॥ तदेवाह ॥ पार्थिवानामिति ॥ ५८ ॥ एवमंगीकृत्यगौतमस्तथैवाऽचरदित्याह ॥ इत्युक्त्वेति ॥ ऋषिवर्योगौतमः ॥ ५९ ॥ तदाज्ञप्तःऋषिभिराज्ञप्तः ॥ तच्चेति ॥ पार्थिवलिंगपूजनादिकमित्यर्थः ॥ ६० ॥ तत्पत्न्यपितथैवाकरोदित्याह ॥ अहल्येति ॥ ६१ ॥ तयोःअहल्यागौतमयोः ॥ प्रसन्नतामिति ॥ तत्कृतपूजनादिनेतिभावः ॥ ६२ ॥ ॥

गिरिजेति ॥ गिरिजयागणकैश्चसहशिवआगत्यतस्मैगौतमायवरंब्रूहीत्यादिवचनमब्रवीदित्यध्याहृतेनसंबंधः ॥ ६३ ॥ तदानींगौतमःशिवरूपंदृष्ट्वाहर्षयुक्तोबभूवेत्याह ॥ त्वदीयमिति ॥ तदीयमितिपाठेगिरिजासंबंधीत्यर्थः ॥ सुंदरंदिव्यम् ॥ त्वदीयमित्यनेनैवशिवसंबंधीत्यर्थलाभेशिवस्येत्याद्युक्तिर्निर्गुणस्यापिपरमात्मनोभक्तानुग्रहार्थंसगुणरूपस्वीकारइतिसूचनार्था ॥ अथवाशिवस्यमंगलस्यकारणमितिशेषः ॥ गौतमःस्वाभीष्टसिद्धयेविश्वस्तोबभूवेत्याह ॥ असाध्यमिति ॥ ६४ ॥ शिवायैवेति ॥ एवकारेणदेवतांतरतस्तदभीष्टंदुर्लभमेवेतिसूचितम् ॥ निर्गुणायगुणसंबंधशून्याय ॥ शंकरायभक्तकल्याणकराय ॥ ६५ ॥ ननुनिर्गुणत्वेभक्तकल्याणंततःकथंसंपद्येतेत्यतआह ॥ पश्चादिति ॥ प्रलयानंतरंसृष्ट्यारंभदशायामित्यर्थः ॥ प्रकृतिरूपायभक्तानुग्रहार्थंस्वीकृतमायास्वरू

कैलासशिखरात्तत्रगिरिजागणकैःसह ॥ आगत्यवचनंतस्मैवरंब्रूहिमनेप्सितम् ॥ ६३ ॥ त्वदीयंसुंदरंरूपंशिवस्य परमात्मनः ॥ दृष्ट्वाहृदिमुदायुक्तोह्यसाध्यंकिंभवेन्मम ॥ ६४ ॥ नमस्कृत्यशिवायैवस्तुतिंचक्रेस्वयंतदा ॥ निर्गुणाय नमस्तुभ्यंशंकरायनमःपुनः ॥ ६५ ॥ पश्चात्प्रकृतिरूपायपुरुषायनमःपुनः ॥ पश्चाद्विष्णुस्वरूपायततश्चब्रह्मणेन मः ॥ ६६ ॥ ब्रह्मणाविष्णुनाचैवपूज्यायसंशयच्छिदे ॥ पश्चाद्रुद्रस्वरूपायततश्चव्यापकायच ॥६७॥ व्याप्यायच नमस्तुभ्यंब्रह्मणेपरमात्मने ॥ अकारादिक्षकारांतबीजरूपायतेनमः ॥ ६८ ॥ निर्गुणायगुणायैवस्वरूपायनमोऽस्तुते ॥ नमस्कारंततःकृत्वाबद्धांजलिपुटःस्थितः ॥ ६९ ॥ निष्पापंकुरुमेदेवशिवोवाक्यमुपाददे ॥ धन्योऽसिकृतकृत्योऽसिनिष्पापोऽसिसदामुने ॥ ७० ॥ एभिर्दुष्टैःकिलत्वंचच्छलितोऽसिमहामुने ॥ तवैवदर्शनाल्लोकानिष्पापाश्च भवंतिच ॥ ७१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पिणेपुरुषायभक्तहृदयेषुप्रेरकत्वेनस्थिताय ॥ पश्चात्तदनंतरंभक्तपालनायस्वीकृतविष्णुस्वरूपायब्रह्मणेहिरण्यगर्भाय ॥ ६६ ॥ संशयच्छिदेभक्तानामनेकविधसंशयानांनाशयित्रे ॥ पश्चात्संहारकालेस्वीकृतरुद्रस्वरूपाय ॥ ततश्चव्यापकायव्याप्यायच ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितइतिश्रुतेः ॥६७॥ अकारादीति ॥ अंआंइत्यादिहंक्षंइत्येतत्पर्यंतबीजाक्षरात्मने ॥ ६८ ॥ निर्गुणायेति ॥ वस्तुतोगुणसंबंधशून्यत्वेपिभक्तार्थंस्वीकृतगुणायेत्यर्थः ॥ ६९ ॥ एवंस्तुत्वागौतमःशिवंप्रार्थयते ॥ निष्पापमिति ॥ वाक्यंउपाददेउक्तवानित्यर्थः ॥ यदुक्तवांस्तदाह ॥ धन्योऽसीति ॥ निष्पापइति ॥ त्वंवस्तुतःनिष्पापएव सर्वदाऽसि ॥ ७० ॥ इदंतुत्वपिरवशैःऋषिभिःतवछलंकृतमित्याह ॥ दुष्टैरिति ॥ शिवोगौतमंप्रशंसति ॥ तवैवेति ॥ ७१ ॥ ॥

कृतघ्नाइति ॥ येत्वत्पीडाकारिणस्तेकृतघ्नाजातानिष्कृत्याप्रायश्चित्तेनापिशुद्धिताःशुद्धिंप्रापितानैवभविष्यंतीत्यर्थः ॥ शुद्धिताइत्यत्रतारकादित्वादितच्प्रत्ययः ॥ तथापितवपापशेषस्यशंकाचेत्समद्दर्शनादेवनश्येदित्याह ॥ दर्शनादेवेति ॥ मद्दर्शनादशेषंयत्पापमितिपाठांतरम् ॥ ७२ ॥ तस्मैगौतमाय ॥ तेषामृषीणांदुश्चरितंस्त्रीप्रेरणयाचरितम् ॥ ७३ ॥ सोपीति ॥ सगौतमोपितच्छ्रुत्वाविस्मितमानसःशिवंप्रत्याहेत्यन्वयः ॥ किमाहेतितदाह ॥ उपकारइति ॥ लोकापवादपरिहाररूपइत्यर्थः ॥ अथवात्वद्दर्शनलाभप्रयोजनकः ॥ तदेवाह ॥ यद्येवमिति ॥ हेशिवतैऋषिभिःयद्येवंनकृतंस्यात्तदातवदर्शनंकुतोभवेदित्यन्वयः ॥ ॥ ७४ ॥ ननुत्वत्पीडाकारिषुऋषिषुकथमेवंविनयःक्रियतइत्यतआह ॥ धन्याइति ॥ कुतोधन्यत्वंतेषांतदाह ॥ मह्यमिति ॥ शुभतरंपापविख्यापनेनातिकल्याणंत्वद्दर्शनलाभरूपंकृतमतस्तेषांधन्यत्वमितिभावः ॥ ७५ ॥ ततःशिवोगौतमायवरंदातुंप्रवृत्तइत्याह ॥ व्रियतामिति ॥ लोकेविश्रुतंप्रसिद्धंपापंइत्युतइतिहेतोः तदन्यथाकार्यप्रयोजकंनभवेदित्यर्थः ॥ अथवाविश्रुतंप्रतिश्रुतंऋषिभिःप्रतिज्ञातमित्यर्थः ॥ यत्तदन्यथानभवेदिति ॥ ७६ ॥ उक्तंयथोक्तंसमाचरेत् ॥ मादृशःपापीतिशेषः ॥ मुनिश्रेष्ठोगौतमः ॥ ७७ ॥ यत्पूर्वंविचारितवांस्तदेवाह ॥ सत्यमिति ॥ हेनाथशिवपंचभिःऋषिजनैः ॥ अत्रअस्मिन्विषयेकुतःकस्मादपिहेतोःयज्जातंतज्जायतांभवतु ॥ ७८ ॥ ७९ ॥ देवेशंशिवम् ॥ गौतमयाचितंशिवोददावित्याह ॥ ततइति ॥ पृथिव्याइति ॥ द्यावापृथिव्योःसारंसमुत्धृत्ययत्पूर्वमेवरक्षितंतत्तस्मैदत्तवानित्युत्तरेणसंबंधः ॥ ८० ॥ ब्रह्मणापिमहत्त्वमेतस्मादेवलब्धमित्याह ॥ विवाहइति ॥ विवाहकालइत्यर्थः ॥ अवशिष्टंदत्तशेषम् ॥ ८१ ॥ ॥ ॥ ॥

कृतघ्नाश्चतथाजातानिष्कृत्यानैवशुद्धिताः ॥ दर्शनादेवशेषंयत्पापंचदूरतोगतम् ॥ ७२ ॥ इत्युक्ताशंकरस्तस्मैतेषां दुश्चरितंतदा ॥ सर्वंनिवेदयामासश्रुत्वाविस्मितमानसः ॥ ७३ ॥ आहपुनःशिवंसोऽपिउपकारःकृतोमहान् ॥ यद्येवंनकृतंतैस्तुदर्शनंतेकुतोभवेत् ॥ ७४ ॥ धन्याश्चऋषयश्चैवमह्यंशुभतरंकृतम् ॥ इत्येवंवचनंश्रुत्वाप्रसन्नःशंकरःपुनः ॥ ७५ ॥ धन्योऽसित्वमृषिश्रेष्ठव्रियतांवरमुत्तमम् ॥ गौतमोऽपिविचार्यैवंलोकेविश्रुतमित्युत ॥ ७६ ॥ अन्यथा नभवेदेवतस्मादुक्तंसमाचरेत् ॥ निश्चित्यैवंमुनिश्रेष्ठःशंकरंवाक्यमब्रवीत् ॥ ७७ ॥ सत्यंनाथब्रवीषित्वंतथाऽपिपंचभिःकृतम् ॥ नान्यथाभवतीत्यत्रयज्जातंजायतांकुतः ॥ ७८ ॥ यदिप्रसन्नोदेवेशगंगाचदीयतांमम ॥ इत्युक्त्वावचनं तत्रधृत्वाचरणपंकजम् ॥ ७९ ॥ नमश्चकारदेवेशंगौतमोलोककाम्यया ॥ ततस्तुशंकरोदेवःपृथिव्याश्चदिवश्चसः ॥ ॥ ८० ॥ सारंचैवसमुत्धृत्यरक्षितंपूर्वमेवयत् ॥ विवाहेब्रह्मणेदत्तंह्यवशिष्टंचकिंचन ॥ ८१ ॥ ॥

किमर्थमिदंदत्तवांस्तदाह ॥ भक्तवत्सलतामिति ॥ गौतमस्यविषयेभक्तवत्सलतांख्यापयन्निति संबंधः ॥ ८२ ॥ तत्सारंगंगाजलरूपमपिस्त्रीरूपमभवदि त्याह ॥ गंगाजलमिति ॥ तस्याःगंगायाः ॥ ऋषिश्रेष्ठोगौतमः॥ नतिंप्रणामंव्यधात्अकरोत् ॥ ८३ ॥ तामेवस्तुतिमाह॥धन्येति॥कृतकृत्यत्वेहेतुमाह ॥ पावितमिति ॥ मामिति॥हेगंगेनिरयेनरकेपतितंमांपावयेतिसंबंधः ॥ ८४॥ तत्कार्यकर्तुंतस्यैशिवोप्यादिशादित्याह ॥ शंभुरपीति ॥ ८५ ॥ शिवगौतमयोर्व चःश्रुत्वागंगाऽवददित्याह ॥ उवाचेति ॥ ८६ ॥ सपरिवारमिति ॥ सपरिवारमृषिंगौतमंपावयित्वाशंकरंगमिष्यामीत्यन्वयः ॥ ८७ ॥ दयालुरीश्वरोलो कानुग्रहार्थंतामब्रवीदित्याह ॥ ईश्वरइति ॥ किमब्रवीत्तदाह ॥ त्वयेति ॥ ८८ ॥ वैवस्वतइति ॥ वैवस्वतमन्वंतरइत्यर्थः ॥ अष्टाविंशतिमइति ॥ एकस

तत्तस्मैदत्तवान्शंभुर्भक्तवत्सलतांस्वयम् ॥ ख्यापयन्भुवनेतस्यगौतमस्यमहात्मनः ॥ ८२ ॥ गंगाजलंतदातत्रस्त्री रूपमभवत्परम् ॥ तस्याश्चैवऋषिश्रेष्ठःस्तुतिंकृत्वानतिंव्यधात् ॥ ८३ ॥ धन्यासिकृतकृत्यासिपावितंभुवनंत्वया ॥ मांचपावयगंगेत्वंपतितंनिरयेध्रुवम् ॥ ८४ ॥ शंभुरपितदातस्यैपावयत्वंमदाज्ञया ॥ ऊचिवान्वचनंतत्रसर्वेषांहित कृन्नृणाम् ॥ ८५ ॥ इतिश्रुत्वावचस्तस्यशंभोश्चगौतमस्यच ॥ उवाचैवपुनर्गंगाश्रूयतामृषिसत्तमाः ॥ ८६ ॥ ऋषिंच पावयित्वाऽहंसपरिवारंतुशंकरम् ॥ गमिष्यामिवचःसत्यंब्रवीमिऋषिसत्तमाः ॥ ८७ ॥ इत्युक्तेगंगयातत्रईश्वरोवा क्यमब्रवीत् ॥ त्वयातत्रैवस्थातव्यंयावत्कलिःसमाव्रजेत् ॥ ८८॥ वैवस्वतेमनौदेविह्यष्टाविंशतिमेयुगे ॥ तावत्त्वया चस्थातव्यंलोकानांहितकाम्यया ॥ ८९ ॥ एवंश्रुत्वावचस्तस्यउवाचसासरिद्वरा ॥ मयाचैवस्थितंचाऽत्रकाश्यांचपा वनायवै ॥ ९० ॥ पुनरत्रैवकिंस्थास्येपावयित्वाऋषिंव्रजे ॥ तदानेतिऋषिश्चाऽपिशंकरश्चाऽऽहतांपुनः ॥ ९१ ॥ स्थित्वाकिंचित्पुनर्गंगावाक्यमूचेसुशोभनम् ॥ माहात्म्यमधिकंचेत्स्यात्सर्वेभ्यश्चमुनीश्वर ॥ ९२ ॥ ॥

प्तत्यंतर्गतेऽष्टाविंशतितमेयुगइत्यर्थः ॥ मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिरित्यभिधानात् ॥ किमर्थंस्थातव्यमितितत्राह ॥ लोकानामिति ॥ ८९ ॥ तस्यशं भोः॥ सरिद्वरागंगा ॥ दुर्जनसमागमेस्थातुंनशक्यतइत्यभिप्रेत्यगंगाह ॥ मयेति ॥ अत्रभूर्लोकेकाश्यांकाशीक्षेत्रे ॥ ९० ॥ पुनरिति ॥ स्थास्येस्थास्यामि ॥ ऋषिंगौतमम् ॥ व्रजइति ॥ गमिष्यामीत्यर्थः ॥ तच्चशंकरगौतमाभ्यांनांगीकृतमित्याह ॥ तदेति ॥ तांगंगां ॥ ९१ ॥ स्थित्वाविरम्य ॥ किंचिदिति ॥ वि चार्येतिशेषः॥ सुशोभनमिति ॥वक्ष्यमाणयुक्तियुक्तमित्यर्थः ॥ मुनीश्वरेति ॥ हेमुनीश्वरगौतमसर्वेभ्यःसर्वतीर्थाद्यपेक्षयायद्यपिममाहात्म्यमधिकंत्वदभिमतम स्तितथापिअन्यदपिकिंचिदत्रास्ति ॥ ९२ ॥ ॥ ॥ ॥

किंतदाह ॥ ऋपीनिति ॥ छलकारणतत्परान्साधुजनपीडाकारिणःपावितुंनसमर्थास्मीत्यन्वयः ॥ अतएवाह ॥ अंतर्धानमिति ॥ एवंचनिष्कारणपरपी डाकारिजनमुखंमहांतोनालोकयंतीतिभावः ॥ १३ ॥ अत्रैवस्थातुंभवदाग्रहश्चेत्तत्रेदमुपायांतरमस्तीतिगंगाह ॥ अन्यादिति ॥ तदेवाह ॥ शंकरइति ॥ शंकरःशिवःसुंदरेणलोकपावनपरेणवपुषायुक्तःसगणःगिरिजयासहमत्समीपेतिष्ठेत्तर्ह्यहंस्थास्यामीतिसंबंधः ॥ १४ ॥ शंकरस्तत्सर्वमंगीकृत्यगंगामनुनीत वानित्याह ॥ एवमिति ॥ तस्याःगंगायाः ॥ यद्वाक्यमाददेतदाह ॥ धन्यासीति ॥ अहमिति ॥ यद्यप्यहंत्वत्तोनकदापिभिन्नोऽतोमद्वियोगंनसंभावयेस्त्वम मचतादात्म्यादित्यर्थः ॥ १५ ॥ तथापिलोकदृष्ट्यापृथक्रूपेणममस्थितिरत्रतवाभिमताचेत्सापिक्रियतइत्याह ॥ तथापीति ॥ स्थीयतामिति ॥ त्वयै तत्स्थलंनत्याज्यमितिभावः ॥ एतत्सर्वंगौतमंप्रतिवात्सल्यंभगवतादर्शितम् ॥ गंगापितत्सर्वमंगीचकारेत्याह ॥ इत्येवमिति ॥ १६ ॥ इतिश्रीशिवमहापुरा

अन्यच्चैवऋषीनेतान्छलकारणतत्परान् ॥ पावितुंनसमर्थोऽस्मिअंतर्धानंव्रजेह्यहम् ॥ ९३ ॥ इतिचाऽन्यच्छंकरश्च वपुषासुंदरेणह ॥ तिष्ठेच्चमत्समीपेहिसगणोगिरिजासह ॥ ९४ ॥ एवंतस्यावचःश्रुत्वाशंकरोवाक्यमाददे ॥ धन्या सिश्रूयतांदेविअहंभिन्नोनकर्हिचित् ॥ ९५ ॥ तथापिस्थीयतेह्यत्रस्थीयतांचत्वयापुनः ॥ इत्येवंवचनंश्रुत्वागंगाचप्र त्यपूजयत् ॥ ९६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्र्यंबकमहिमानामात्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ छ ॥

॥ सूतउवाच ॥ एतस्मिन्नंतरेदेवाऋषयश्चपुरातनाः ॥ सुतीर्थान्यप्यनेकानिक्षेत्राणिविविधानिच ॥ १ ॥ आगत्यगौ तमंचैवगंगांचगिरिशंतथा ॥ जयजयेतिभाषंतोपूजयामासुःसादरं ॥ २ ॥ स्तुतिंचविविधांतेषांचक्रुस्तेचमुदान्विताः ॥ गंगाप्रसन्नातेभ्यश्चगिरिशश्चतथैवच ॥ ३ ॥ वरंब्रूतऋषिश्रेष्ठाददामःप्रियकाम्यया ॥ ऋषयऊचुः ॥ यदिप्रसन्नो देवेशप्रसन्नात्वंसरिद्वरे ॥ ४ ॥ ॥ ॥ ॥

णज्ञानसंहिताटीकायांसारबोधिन्यांत्र्यंबकमहिमवर्णनंनामत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ओंनमःशिवाय ॥ स्वपावनायदेवाद्याःक्षेत्रेस्मिन्सुस्थितास्त दा ॥ सर्वप्रार्थनयागंगाप्रादुर्भूयास्थितामुदा ॥ १ ॥ गौतमस्यचसाधुत्वंकुशावर्तस्यसंभवः ॥ एवंत्र्यंबकमाहात्म्यंचतुःपंचाशईर्यते ॥ २ ॥ एवंशिवादि भिरनुगृहीतेगौतमेयज्जातंतदाह ॥ एतस्मिन्निति ॥ देवाःविष्ण्वाद्याः ॥ ऋषयःसप्तर्षिप्रभृतयः ॥ सुतीर्थानिपुष्कराद्यानि ॥ क्षेत्राणिकाशीप्रभृतीनि ॥ १ ॥ देवादयस्तत्रागत्ययदकुर्वंस्तदाह ॥ जयेति ॥ गौतमादीनांसर्वोत्कर्षप्रशशंसुरित्यर्थः ॥ २ ॥ तेषांगौतमादीनाम् ॥ तेदेवादयः ॥ गंगागिरिशौदेवादिभ्यो वरप्रदानंचक्रतुरित्याह ॥ गंगेति ॥ ३ ॥ हेदेवेशशिव ॥ हेसरिद्वरेगंगे ॥ ४ ॥ ॥ ॥ ॥

सत्कृतांसत्कर्मकारिणाम् ॥ अनेनासत्कर्मकारिणःशिक्षयैवेश्वरोऽनुगृण्हातीतिसूचितम् ॥ गंगातत्प्रार्थितंसर्वंतदानांगीचक्रइत्याह ॥ यूयमिति ॥ ५ ॥ गंगास्वकार्यानंतरस्वगमनव्याजेनदेवादीन्प्रशंसतिस्मेत्याह ॥ गौतममिति ॥ ६ ॥ तेदेवादयः ॥ ७ ॥ भवत्सुलोकपावनकारिषुसत्सुममाकिंसामर्थ्यमितितान्प्रतिगंगाऽब्रवीदित्याह ॥ भवत्स्विति ॥ कथमिति ॥ भवदपेक्षयाममविशेषोज्ञातुमशक्यइतिभावः ॥ ८ ॥ गुरुःबृहस्पतिः ॥ ९ ॥ आगमिष्यामः स्वस्वस्थानान्निर्गत्येतिशेषः ॥ एकादशेति ॥ गुरोरेकवर्षमेकराशिस्थायित्वादितिभावः ॥ लोकानामस्मत्संगिनाम् ॥ १० ॥ क्षालितमिति ॥ नाशितमि

स्थातव्यमत्रयुष्माभिःप्रियार्थंसत्कृतांनृणाम् ॥ गंगोवाच ॥ यूयंसर्वेप्रियार्थंचतिष्ठंतुकिंमयापुनः ॥ ५ ॥ गौतमंपावयित्वाऽहंगमिष्यामियथागतम् ॥ भद्रंवश्चसदाप्यस्तुपवित्रीक्रियतांजगत् ॥ ६ ॥ इत्युक्तास्तेतदासर्वेऊचुःशुभतरंवचः ॥ अस्माकंपावनायैवस्थातव्यंभुवनेत्विह ॥ ७ ॥ गंगोवाच ॥ भवत्सुमेविशेषोऽत्रज्ञेयश्चैवकथंभवेत् ॥ सूतउवाच ॥ इत्युक्तास्तेतदादेवाऋषयःसरितस्तथा ॥ ८ ॥ क्षेत्राणितीर्थमुख्यानिप्रणिपत्याऽब्रुवंस्तदा ॥ सर्वेदेवाऊचुः ॥ सिंहराशौयदास्याद्वैगुरुःसर्वसुरोत्तमः ॥ ९ ॥ तदावयंचसर्वेवैआगमिष्यामस्त्वांपुनः ॥ एकादशचवर्षाणिलोकानांपातकंत्विह ॥ १० ॥ क्षालितंयद्भवेद्देवमलिनाःस्मसरिद्वरे ॥ तस्यैवक्षालनार्थंबयास्यामःसर्वथाप्रिये ॥ ११ ॥ अनुग्रहायलोकानामस्माकंप्रियकाम्यया ॥ स्थातव्यंशंकरेणैवत्वयाचैवसरिद्वरे ॥ १२ ॥ यावत्सिंहेगुरुश्चैवस्थास्यामस्तावदेवहि ॥ त्वयिस्नानंत्रिकालंचशंकरस्यचदर्शनम् ॥ १३ ॥ कृत्वापापंविमोक्ष्यामोनाऽत्रकार्याविचारणा ॥ इत्येवंप्रार्थितातैस्तुगौतमेनमहर्षिणा ॥ १४ ॥ ॥ ॥ ॥ ॥

त्यर्थः ॥ अस्माभिरितिशेषः ॥ ॥ एवंचतत्तल्लोककृतपातकक्षालनार्थमेवास्माकंस्वस्वस्थानेस्थितिरावश्यकीतिभावः ॥ मलिनाःपातकिसंसर्गेणेतिभावः ॥ तस्यैवमलिनत्वस्यैव ॥ प्रियेऽस्मत्संतोषकारिणि ॥ ११ ॥ स्थातव्यमिति ॥ एवंचपरोपकारार्थमेवहेसरिद्वरेगंगेशंकरेणत्वयाचात्रस्थातव्यमित्यर्थः ॥ २१ ॥ वयमपियावत्सिंहराशौगुरुर्वर्तेततावत्पातकक्षालनार्थमत्रैवस्थास्यामइत्याहुः ॥ यावदिति ॥ नन्वत्रस्थित्वाकिंकरिष्यथेतितत्राहुः ॥ त्वयीति ॥ दर्शनमिति ॥ त्रिकालमित्यनुषज्यते ॥ १३ ॥ पापमिति ॥ पातकिसंसर्गप्राप्तपापमित्यर्थः ॥ तैःदेवादिभिःप्रार्थितागंगेतिशेषः ॥ गौतमेनेति ॥ अस्यापिप्रार्थितेत्यत्रैवान्वयः ॥ १४ ॥ ॥ ॥ ॥ ॥

स्थितइति ॥ गौतमाद्यनुग्रहार्थमितिभावः ॥ सरिद्वरागंगा ॥ १५ ॥ पूर्वोक्तानिकानितीर्थादीनीतितत्राह ॥ पुष्कराद्यानीति ॥ १६ ॥ तत्रगौतमीतटे तेषांपूर्वोक्ततीर्थादीनाम् ॥ नहीति ॥ स्वपातकक्षालनार्थमागतानांपरपातकनाशनेसामर्थ्याभावादितिभावः ॥ १७ ॥ स्वप्रदेशेस्वस्वस्थाने ॥ समायात इति ॥ तैरितिशेषः ॥ फलमिति ॥ सिंहस्थेगुरौगौतमीतटेनिवासेननिवृत्तपातकानामेतेषांफलदानसामर्थ्यसंभवादितिभावः ॥ एवंचसिंहस्थेगुरौतीर्थांत रादौनगंतव्यमितिसूचितम् ॥ तत्रक्वचित्प्रतिप्रसवमाह ॥ गंगामिति ॥ गंगांभागीरथीं रेवांनर्मदाम् गयांप्रसिद्धाम् गोमतीमेतदाख्यांनदींचप्रतिगं तव्यमित्यग्रिमेणान्वयः ॥ १८ ॥ अन्यत्रनैवगंतव्यमित्याह ॥ नान्यथेति ॥ तत्रगोमतींप्रतिगमनेविधिविशेषमाह ॥ गोमतीमिति ॥ १९ ॥ अत्रगौत

स्थितोऽसौशंकरश्चैवस्थितासाचसरिद्वरा॥ तद्दिनंहिसमारभ्यसिंहस्थेचबृहस्पतौ ॥१५॥ आयांतिसर्वतीर्थानिक्षेत्राणिदैवतानिच ॥ पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा ॥ १६ ॥ वासुदेवादयोदेवावसंतिगौतमीतटे ॥ यावत्त्रस्थितानीहतावत्तेषांफलंनहि ॥ १७ ॥ स्वप्रदेशेसमायातेह्येतेषांचफलंलभेत् ॥ गंगांरेवांगयांचैवगोमतींचऋषीश्वराः ॥ १८ ॥ गंतव्यंनाऽन्यथाक्वापियावत्सिंहेगुरुर्भवेत् ॥ गोमतींप्रथमंगत्वागोदावरींततोव्रजेत् ॥ १९ ॥ पुनश्चगोमतींगत्वाहत्याभिःपरिमुच्यते ॥ त्र्यंबकंनामविख्यातंज्योतिषांलिंगमुत्तमम् ॥ २० ॥ गौतम्याश्चतटेप्रोक्तंमहापातकनाशनम् ॥ एवंवश्चसमाख्यातंयत्पृष्टोऽहंमुनीश्वराः ॥ २१ ॥ इत्येवंवचनंश्रुत्वापुनरूचुस्तदाहिते ॥ ऋषयऊचुः ॥ गंगाचजलरूपेणकुतोजातावदप्रभो ॥ २२ ॥ तन्माहात्म्यंविशेषेणवक्तुमर्हस्यशेषतः ॥ यैर्विप्रैर्गौतमायैवकृतंदुष्टंदुरात्मभिः ॥ २३ ॥ तेषांकिंचततोजातमुच्यतांव्यासशिष्यवै ॥ एवंश्रुत्वावचस्तेषामुवाचरोमहर्षणः ॥ ॥ २४ ॥ सूतउवाच ॥ श्रूयतामृषयःसम्यक्कथयामियथाश्रुतम् ॥ एवंसंप्रार्थितादेवैर्गौतमेनतदास्वयम् ॥ २५ ॥

मायनुग्रहार्थंशिवःस्थितइत्युक्तं ॥ तदेवज्योतिर्लिंगंजातंतस्यनाममाहात्म्यंचाह ॥ त्र्यंबकमिति ॥ २० ॥ एवंत्र्यंबकमाहात्म्यमुपसंजिहीर्षन्सूतआह ॥ एव मिति ॥ २१ ॥ शौनकादयस्तुछिन्नसर्वसंशयानजाताइत्याह ॥ पुनरूचुरिति ॥ तेशौनकादयः ॥ तत्रप्रथमसंशयपरिहारायपृच्छंति ॥ गंगेति ॥ जल रूपेणेति ॥ उपलक्षितेतिशेषः ॥ कुतःकस्मात्स्थानात् ॥ हेप्रभोहेसूत ॥ २२ ॥ तन्माहात्म्यंगंगामाहात्म्यम् ॥ विशेषेणेति ॥ सामान्येनतूक्तमेवेति भावः ॥ संशयांतरपरिहारायपृच्छंति ॥ यैरिति ॥ दुष्टमदुःखदानरूपंपापम् ॥ २३ ॥ तेषांशौनकादीनाम् ॥ रोमहर्षणःसूतः ॥ २४ ॥ देवैःविष्ण्वादिभिः ॥ गौतमेनचसंप्रार्थितासरिद्वराब्रह्मणोगिरेःब्रह्माख्यगिरेःअवतारेत्यग्रिमेणान्वयः ॥ २५ ॥ ॥ ॥

अवतारेति ॥ अवताराऽवततार॥ द्वित्वाभावआर्षः॥ अवतीर्णासरिद्द्वरेतिपाठांतरम् ॥ कथमवतीर्णेतितदाह ॥ उदुंबरस्येति ॥ उदुंबरवृक्षस्येत्यर्थः ॥ प्रवाहइति ॥ गंगायाइतिशेषः ॥ २६ ॥ तत्रपूर्वोक्तप्रवाहे ॥ तेसर्वेइति ॥ गौतमपीडाकारिणइत्यर्थः ॥ २७ ॥ तत्प्रवाहस्यनामाह ॥ गंगाद्वारमिति ॥ अत्रैवगंगायाःप्रथम दर्शनादेतन्नामप्रसिद्धमभवादित्यर्थः ॥ हेऋषयःशौनकादयः ॥ २८ ॥ अंतर्धानमिति ॥ तेषामृषीणामंतर्धानमदृश्यत्वंगतागंगेतिशेषः ॥ तदागौतमस्तांप्रत्यपेध दित्याह ॥ मामेति ॥ २९ ॥ तदादुर्जनमुखानवलोकनार्थमयांतर्धीयतइतिगंगाभिप्रायंज्ञात्वास्वसाधुत्वंगौतमोदर्शयदित्याह ॥ इमइति ॥ इमेएतत्क्षेत्रवा सिनःसाधवोऽसाधवश्चमदीयाएवसंति ॥ एतत्पुण्यप्रभावेनैवमह्यंत्वयादर्शनंदीयतइत्यर्थः ॥ ३० ॥ एतादृशेषुदयानकार्येतिगंगाह ॥ एतइति ॥ कुतोनदृ

ब्रह्मणश्चगिरेस्तस्मादवतारसरिद्वरा ॥ उदुंबरस्यशाखायाःप्रवाहोनिःसृतस्तदा ॥ २६ ॥ तत्रस्नातऋषिश्रेष्ठोगौत मोनामविश्रुतः ॥ समागताश्चतेसर्वेस्नानंचक्रुर्मुदान्विताः ॥ २७ ॥ गंगाद्वारंचतन्नामप्रसिद्धमभवत्तदा ॥ पश्चात्क्षेत्रे चऋषयोगौतमस्पर्द्धिनस्तदा ॥ २८ ॥ स्नानार्थमागतान्दृष्ट्वाह्यंतर्द्धानंगतास्वयम् ॥ मामेतिगौतमस्त्वत्रव्याजहारमु नीश्वराः ॥२९॥ गौतमउवाच ॥ इमेचैवमदीयाश्चसाधवोवाप्यसाधवः॥एतत्पुण्यप्रभावेनदर्शनंदीयतेत्वया॥३०॥ गंगोवाच ॥ एतेदुष्टतमाश्चैवनैवदृश्यामयापुनः ॥ कृतघ्नाद्रोहिणश्चैववराकामानिनोध्रुवम् ॥ ३१ ॥ जाल्माःपाखंडि नश्चैववर्ज्यास्तेऋषिसत्तम ॥ इतिवाणीसमुत्पन्नाह्याकाशेऋषिसत्तमाः ॥ ३२ ॥ तच्छ्रुत्वावचनंतस्याऋषिर्वाक्यमु पाददे ॥ मातश्चश्रूयतामेतन्महतांरीतिरेवच ॥ ३३ ॥ अपकारिषुयेलोकउपकारंचरंतिवै ॥ तेनपूतोभवाम्यत्रभगव द्वाक्यतःश्रुतम् ॥ ३४ ॥ तस्मात्त्वयाचतत्कार्यंसत्यंचभगवद्वचः ॥ पुनर्वाणीसमुत्पन्नासत्यंचकथ्यतेत्वया ॥ ३५ ॥

श्येत्यत्रकारणमाह ॥ कृतघ्नाइति ॥ कृतघ्नाःपरोपकारानभिज्ञाःद्रोहिणोऽपकारिणःवराकाः क्षुद्राः मानिनःवृथाभिमानयुक्ताः ॥ ३१ ॥ जाल्माःअसमीक्ष्यकारि णःपाखंडिनःमिथ्यातापसलिंगधारिणः ॥ नन्वंतर्हितागंगाकथमब्रवीदितिचेत्तत्राह ॥ इतीति ॥ ३२ ॥ ऋषिःगौतमः ॥ गंगांप्रतिनीतिमाह ॥ मातरिति ॥ ॥ ३३ ॥ कासारीतिस्तामाह ॥ अपकारिष्विति ॥ तेनतादृशेनकर्मणा ॥ भवामीति ॥ एवंचइदमप्येकंमत्पातकक्षालनसाधनमेवेतिभावः ॥ भगवद्वाक्य तः अत्रस्थित्वासर्वान्पवित्रीकुर्वितीश्वरवाक्यतः ॥ ३४ ॥ अतोभगवतोप्येतदनुमतमित्याह ॥ तस्मादिति ॥ तत्पूर्वोक्तंभगवद्वचःसत्यंकार्यंपालनीय मित्यर्थः ॥ तद्गंगास्वीचकारेत्याह ॥ पुनरिति ॥ ३५ ॥ ॥ ॥ ॥

प्रायश्चित्तंविनाताञ्चानुग्रहीष्यामीत्यभिप्रेत्याह ॥ तथापीति ॥ संग्रहार्थंत्वयासहव्यवहारार्थंऋषयइतिशेषः ॥ प्रायश्चित्तमाह ॥ शतमिति ॥ कार्यमिति ॥ तैरितिशेषः ॥ गिरेःब्रह्मगिरेः ॥३६॥ जायतेजायेत ॥ तस्याःगंगायाः ॥ चक्रुरिति ॥ तत्रत्याऋषयइतिशेषः ॥ तथागंगोक्तप्रकारेण ॥ ३७ ॥ ततः ऋषिकृतप्रायश्चित्तानंतरंगौतमस्तच्छ्रुत्वाऋषीन्प्रत्याह ॥ क्षंतव्यइति ॥ अपराधकोगंगोक्तप्रायश्चित्तानुनिवेदनरूपोयंक्षंतव्यः ॥ भवद्भिरितिशेषः ॥ अथवा गंगामृषिःप्रार्थयते ॥ क्षंतव्यइति ॥ तेनगौतमेनैवंपूर्वोक्तप्रकारेणऋषिक्षमापनेकृतेतदाज्ञयागंगाज्ञयाऋष्याज्ञयावा ॥३८॥ कुशावर्तमिति ॥ कुशावर्तनामकं तीर्थमित्यर्थः ॥ चक्रइति ॥ गौतमेनेत्यनुषज्यते ॥ तस्यस्थानमाह ॥ गंगाद्वारादिति ॥ पूर्वोक्तगंगाद्वारस्याधोभागेस्थितमित्यर्थः ॥ गंगाद्वादशयोजनमि

तथापिसंग्रहार्थंचप्रायश्चित्तंचरंतिचेत् ॥ शतमेकोत्तरंचात्रकार्यंप्रक्रमणंगिरेः ॥ ३६ ॥ ततश्चैवाधिकारश्चजायते दुष्टकर्मणाम् ॥ इतिश्रुत्वावचस्तस्याश्चक्रुश्चैवंतथापुनः ॥ ३७ ॥ गौतमश्चततःश्रुत्वाक्षंतव्यश्चाऽपराधकः ॥ एवंकृतेतदातेनगौतमेनतदाज्ञया ॥ ३८ ॥ कुशावर्त्तंतदाचक्रेगंगाद्वारादधोगतम् ॥ ततःप्रादुरभूत्तत्रतथैवप्रीतयेपुनः ॥ ॥ ३९ ॥ कुशावर्तंचविख्याततंतीर्थमासीदनुत्तमम् ॥ तत्रस्नातोनरोयस्तुमोक्षायपरिकल्पते ॥ ४० ॥ तत्रैवऋषयो दिव्यांस्तुतिंकृत्वापुनःपुनः ॥ अहल्यायाःपुरःकृत्वाऋषिपत्न्यस्तथापुनः ॥ ४१ ॥ चक्रुस्तेतुतदास्नानंकृतार्थाह्यभवंस्तदा ॥ शिवस्यदर्शनंकृत्वाआनंदंपरमंगताः ॥ ४२ ॥ गंगाद्वारेकुशावर्तेशिवस्यत्र्यंबकस्यच ॥ निकटेकोटितीर्थेच स्नात्वागर्भेनगच्छति ॥ ४३ ॥ गंगांचसेवतेविष्णुर्गंगांचसेवतेहरः ॥ गंगांचसेवतेब्रह्माकोवागंगांनसेवते ॥ ४४ ॥ सामान्योयोभवेच्चैवसेवयित्वासुखीभवेत् ॥ मुक्तिमायातिनिकटेयश्चैवचव्यवस्थितः ॥ ४५ ॥ ॥

तिकाचित्पाठः ॥ प्रादुरभूदिति ॥ गंगेतिशेषः ॥ तत्रकुशावर्ते ॥ ३९ ॥ तन्माहात्म्यमाह ॥ कुशावर्तमिति ॥ ४० ॥ एतादृशंगौतमप्रभावंदृष्ट्वासर्वेऋषयोयच्चक्रुस्तदाह ॥ तत्रैवेति ॥ स्तुतिमिति ॥ गौतमस्येतिशेषः ॥ अथवागंगायाः ॥ तथैवऋषिपत्न्यश्चक्रुरित्याह ॥ अहल्यायाइति ॥ अहल्यामित्यर्थः ॥ कृत्वेति ॥ संमानार्थमितिभावः ॥ ४१ ॥ तत्करणेनतथैवतैःशुभंफलंप्राप्तमित्याह ॥ आनंदमिति ॥ ४२ ॥ इदानींगंगाद्वारादिषुसमुच्चित्यस्नानादेःफलमाह ॥ गंगाद्वारइति ॥ ४३ ॥ पुनर्गंगामेवप्रशंसति ॥ गंगामिति ॥ ४४ ॥ समान्यइति ॥ साधारणोपिजनःकेवलंभक्त्यासेवनेनसुखीभवेत्किमु तज्ज्ञानविज्ञानसंपन्नइतिभावः ॥ तच्चसुखंमोक्षरूपमेवेत्याह ॥ मुक्तिमिति ॥ ४५ ॥ ॥ ॥

एवंचहरिरपिलोकपावनार्थंगंगामेवावालंबतेत्याह ॥ गंगामिति ॥ ४६ ॥ एतदेवाभिप्रेत्यगंगास्थित्यभिधाननिर्देशपूर्विकांमुक्तिदात्वद्वयसंपत्तिमत्राह ॥ पूर्वमिति ॥ वाराणसीवासादप्यत्रवासस्याधिकंफलमाह ॥ आजन्मेति ॥ ४७ ॥ तत्फलमिति ॥ लभंतइतिशेषः ॥ दर्शनेक्रममाह ॥ पूर्वमिति ॥ ४८ ॥ ४९ ॥ एवमाख्यानमुपसंहरति ॥ इतीति ॥ मिलिताइति ॥ सौहार्देनेतिशेषः ॥ ५० ॥ त्र्यंबकेश्वरज्योतिर्लिंगमाहात्म्यकथनमुपसंहरति ॥ त्र्यंबकस्येति ॥ ५१ ॥ इतःपरंवैद्यनाथेश्वरमाहात्म्यंवक्तुमुपक्रमते ॥ अतःपरमिति ॥ ५२ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांत्र्यंबकमहिमवर्णनंनामचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ओंनमःशिवाय ॥ रावणेनतपस्ततंस्वशिरोदानपूर्वकम् ॥ शिवप्रसादनार्थंतत्पंचपंचाशईर्यते ॥ १ ॥ मानी

गंगांचैवतदादृष्ट्वापंचवट्यांहरिःस्वयम् ॥ पावनार्थंचजगतांस्थितोऽसौरघुनंदनः ॥ ४६ ॥ पूर्वंगंगाततोविष्णुःस्थितः किंदुर्लभंभवेत् ॥ आजन्ममरणाद्वासाद्वाराणस्यांचयत्फलम् ॥ ४७ ॥ तत्फलंयाममात्रेणपंचवट्यांनिवासिनः ॥ पूर्वरामंततोदेवंत्र्यंबकंलोकशंकरम् ॥४८॥ गंगाद्वारंचतद्दृष्ट्वाकःपापोनप्रमुच्यते ॥ येस्नातास्तत्रतत्रैवजीवन्मुक्ताभ्भवंतिते ॥ ४९ ॥ इतिवश्वसमाख्यातंगौतम्यामाहात्म्यमुत्तमम् ॥ गौतमोऋषयश्चान्येमिलिताश्चपरस्परम् ॥ ५०॥ त्र्यंबकस्यचमाहात्म्यंकथितंचमुनीश्वराः॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ ५१ ॥ अतःपरंप्रवक्ष्यामिमाहात्म्यंश्रूयतांपुनः ॥ वैद्यनाथेश्वरस्यैवशृण्वतांपापहारकम् ॥ ५२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांत्र्यंबकमहिमवर्णनंनामचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ सूतउवाच ॥ रावणोरक्षसश्रेष्ठोमानीमानपरायणः ॥ आराध्यचहरंतत्रकैलासेपर्वतोत्तमे ॥ १ ॥ कियत्कालंसमाराध्यप्रसन्नोनहरोयदा ॥ ततश्चाऽयंहिमवतोदक्षिणेवृक्षखंडके ॥ ॥ २ ॥ भूमौगर्तंतदाकृत्वातत्राऽग्निंचसमादधौ ॥ तन्निकटेशिवंस्थाप्यहवनंविविधंतथा ॥ ३ ॥ चकारराक्षसश्रेष्ठोनप्रसन्नस्तथापिह ॥ तदाशिरांसिच्छित्वासपूजनंशंकरस्यच ॥ ४ ॥ ॥ ॥

ति ॥ ऐश्वर्याद्भिमानवानित्यर्थः ॥ सचाभिमानोनकादाचित्कस्तस्यापितुसार्वदिकइत्याह ॥ मानपरायणइति ॥ येनसाधनेनैश्वर्यंप्राप्तवांस्तदाह ॥ आराध्येति ॥ १ ॥ अयंरावणःहिमवतःहिमाचलस्यदक्षिणेदक्षिणभागेवृक्षखंडकेएतत्संज्ञकप्रदेशे ॥ २ ॥ तत्रगर्तेऽग्निंसमादधौस्थापितवान् ॥ तन्निकटेअग्निनिकटेशिवंशंकरंस्थाप्यप्रतिष्ठाप्यहवनंचकारेत्युत्तरेणसंबंधः ॥ ३ ॥ क्रूरकर्मणांसौम्यकर्मणापरमेश्वरोनप्रसीदतीत्यभिप्रेत्याह ॥ नप्रसन्नइति ॥ ४ ॥

तेनरावणेन॥एकस्मिन्शिरसि ॥ ५ ॥ शिवोरावणंप्रत्याह ॥ मनसइति ॥ रावणोबलादिकंयाचतेस्मेत्याह ॥ यदीति ॥ ६ ॥ सःशिवः ॥ ७ ॥ यथेप्सितमिति ॥ मनोप्सितामितिक्वचित्पाठः ॥ तस्मैरावणायअतुलमनुपमम् ॥ नीरुजानिअरुग्णानिपूर्ववत्सुस्थानीत्यर्थः ॥ ८ ॥ तस्यशिवस्य ॥ जगामेति ॥ रावणइतिशेषः ॥ तदादेवादीनांमहतीचिंताभवदित्याह ॥ देवाइति ॥ ९ ॥ तेषांचिंताकारंदर्शयति ॥ किंकुर्मइति ॥ चिंतातिशयप्राप्तौहेतुमाह ॥ सार्थइति ॥ सार्थोराक्षसात्यंतरसमुदायः ॥ पक्षतांसहायताम् ॥ किंनेति ॥ अपितुससर्वंकार्यंसाधयिष्यतीतिकाकुः ॥ १० ॥ तदानींदेवादयःस्वदुःखनिवारणायनारदंप्रत्युपायंपृष्टवंतइत्याह ॥ इतिदुःखमिति ॥ सर्वकार्येति ॥ हेनारदहेप्रभोत्वंसर्वसुरकार्यकरणेशक्तोसीत्यर्थः ॥ ननुकिंदुःखंभवतामुत्पन्नमितितत्कथयितुमाहुः

आरब्धंचतदातेनछिन्नानिनववैयदा ॥ एकस्मिन्नवशिष्टेतुप्रसन्नःशंकरस्तदा ॥ ५ ॥ शिवउवाच ॥ मनसश्चेप्सितं ब्रूहिददामितवराक्षस ॥ राक्षसउवाच ॥ यदिप्रसन्नोदेवेशदेहिमेबलमुत्तमम् ॥ ६ ॥ शिरांसिपूर्ववत्स्वामिन्कुरुमे शंकरप्रभो ॥ इतितस्यवचःश्रुत्वाभक्तिमत्वाच्चकारसः ॥ ७ ॥ यथेप्सितंददौतस्मैह्यतुलंबलमुत्तमम् ॥ शिरांसिपूर्ववत्कृत्वानीरुजानितथापुनः ॥ ८ ॥ प्रसादंतस्यसंप्राप्यजगामभवनंप्रति ॥ देवाश्चदुःखितास्तत्रऋषयोयेचसत्तमाः ॥ ॥ ९ ॥ किंकुर्मःक्वचगच्छामःकिंभविष्यतिवापुनः ॥ सार्थश्चपक्षतांप्राप्तःकिंकिंनसाधयिष्यति ॥ १० ॥ इतिदुःखंसमापन्नाःपप्रच्छुर्नारदंतदा ॥ सर्वकार्यसमर्थोऽसिदुःखंदुष्टःकरिष्यति ॥ ११ ॥ क्वयास्यामोवयंचाऽत्रदुष्टेनपीडिताःप्रभो ॥ इतितद्वचनंश्रुत्वानारदोवाक्यमब्रवीत् ॥ १२ ॥ नारदउवाच ॥ दुःखंत्यजतभोदेवायुक्तिंचकथयाम्यहम् ॥ इत्युक्त्वा चपथितत्रयत्रैवगम्यतेऽमुना ॥ १३ ॥ वीणांचप्रेरयन्यातस्तावत्सराक्षसोगतः ॥ तंराक्षसंतदादृष्ट्वानारदोवचनंपुनः ॥ १४ ॥ उवाचदेवकार्यार्थंधन्यस्त्वंराक्षसोत्तम ॥ त्वांदृष्ट्वातुमनोमेऽद्यप्रसन्नंचयथामया ॥ १५ ॥ ॥

॥ दुःखमिति ॥ दुष्टःरावणः ॥ ११ ॥ दुष्टेनरावणेन ॥ १२ ॥ नारदोदेवादीन्सांत्वयतिस्मेत्याह ॥ दुःखमिति ॥ इत्युक्तेति ॥ नारदइत्युक्त्वाअमुनारावणेन यत्रैवपथिगम्यतेतत्रैववीणांप्रेरयन्वादयन्यातइत्युत्तरेणसंबंधः ॥ वीणांचरणयन्निति क्वचित्पाठः ॥ १३ ॥ रावणस्तुवरलाभकृतहर्षेणशीघ्रंगतइत्याह ॥ तावदिति ॥ तमिति ॥ धावंतंरावणमित्यर्थः ॥ १४ ॥ नारदोरावणंप्रतियदुवाचतदाह ॥ धन्यइति ॥ ततोनारदोरावणंप्रशंसतिस्मेत्याह ॥ त्वामिति ॥ प्रसन्नमिति ॥ हेरावणत्वांदृष्ट्वायथामेममनःप्रसन्नमभूत्तथावक्तुमपिमयानैवविशक्यतेत्युत्तरेणसंबंधः ॥ १५ ॥ ॥

ततोनारदोरावणंप्रतिहर्षकारणंपृच्छति ॥ पृच्छ्यतइतिस्मेत्याह ॥ मयेत्यनुषज्यते ॥ १६ ॥ ननुमदीयहर्षकारणप्रश्नेतवकिंप्रयोजनामित्यत्तआह ॥ श्रोतुमिति ॥ कुतूहलंकौतुकं ॥ तेननारदेन ॥ १७ ॥ हेऋषिश्रेष्ठनारद ॥ तत्त्वत्पृष्टम् ॥ तंशिवम् ॥ १८ ॥ हेप्रभोहेनारद ॥ शिवाराधनप्रकारंपृष्टवानित्याह ॥ पुनरिति ॥ ॥ १९ ॥ नन्वेतस्मिन्नपिप्रश्नेतवकिंप्रयोजनमित्यतआह ॥ आप्तत्वादिति ॥ इष्टजनत्वादित्यर्थः ॥ रावणोनारदंप्रतिकथयतिस्म ॥ श्रूयतामिति ॥ हेऋषिश्रेष्ठयथायेनप्रकारेणबलादिकंलब्धंतथातेनप्रकारेणकथयामीत्यर्थः ॥ २० ॥ तमेवप्रकारमाह ॥ पूर्वमिति ॥ २१ ॥ परिवर्तितमिति ॥ ततःकैलासात्परा

वक्तुंनैवविशक्येतपृच्छ्यतेत्वंकुतोगतः ॥ शीघ्रंत्वंहृष्टतरोयासिकिंहृष्टोऽसिब्रवीषिमे ॥ १६ ॥ श्रोतुंकुतूहलंमेऽद्यकथ्यतांराक्षसोत्तम ॥ इतिपृष्टस्तदातेनराक्षसोवाक्यमब्रवीत् ॥ १७ ॥ रावणउवाच ॥ श्रूयतांचऋषिश्रेष्ठकथयामिशृणुष्वतत् ॥ अहंशिवंसमाराध्यप्रसन्नंतंविधायच ॥ १८ ॥ अतुलंचबलंलब्ध्वागच्छामिचगृहंप्रभो ॥ पुनःपप्रच्छतत्रैवकथमाराधितःशिवः ॥ १९ ॥ तदेवकथयत्वंचआप्तत्वात्पृच्छ्यतेमया ॥ रावणउवाच ॥ श्रूयतांचऋषिश्रेष्ठकथयामियथातथा ॥ २० ॥ पूर्वंमयातुकैलासेतपोऽर्थंचगतंमुने ॥ तत्रैवबहुकालंवैतपस्तप्तंसुदारुणम् ॥ २१ ॥ यदानशंकरस्तुष्टस्ततश्चपरिवर्तितम् ॥ आगत्यवृक्षखंडेवैपुनस्तप्तंमयामुने ॥ २२ ॥ ग्रीष्मेपंचाग्निमध्येतुवर्षासुस्थंडिलेशयः ॥ शीतेजलांतरस्थायीकृतंचैवत्रिधातपः ॥ २३ ॥ एवंमयाकृतंयर्हितपश्चैवऋषीश्वर ॥ तथापिशंकरोमह्यंनप्रसन्नोमुनीश्वर ॥ २४ ॥ तदामयाचक्रुद्धेनभूमौगर्तंविधायच ॥ तत्राऽग्निंचसमाधायपार्थिवंपरिकल्प्यच ॥ २५ ॥ गंधैश्चचंदनैश्चैवधूपैश्चविविधैस्तथा ॥ नैवेद्यैःपूजितःशंभुरारात्रिकविधानतः ॥ २६ ॥ प्रणिपत्यस्तवैःपुण्यैस्तोषितःशंकरस्तथा ॥ नृत्यैर्गीतैश्चवादित्रैर्मुखांगुलिसमर्पणैः ॥ २७ ॥ यज्ञैश्चविविधैश्चाऽन्यैःपूजितोभगवान्हरः ॥ नतुष्टिसंमुखोजातस्तदाचदुःखितोह्यहम् ॥ २८ ॥ ॥ ॥ ॥ ॥

वृत्तमित्यर्थः ॥ २२ ॥ पुनस्तपःप्रकारमाह ॥ ग्रीष्मइति ॥ स्थंडिलेचत्वरेशेतेइतिस्थंडिलेशयः ॥ शीतेहेमंते ॥ ३२ ॥ ईदृशक्रूरतपसापिशिवोनप्रसन्नोबभूवेत्याह ॥ एवमिति ॥ यर्हियद्यपि ॥ २४ ॥ तदानींरावणेनतपोंऽतरंप्रारब्धंतदाह ॥ तदेति ॥ पार्थिवंपार्थिवलिंगंपरिकल्प्यप्रतिष्ठाप्य ॥ २५ ॥ ॥ २६ ॥ मुखांगुलिविसर्पणैः गल्लवाद्यैः ॥ २७ ॥ तथापिनप्रसन्नइत्याह ॥ नतुष्टीति ॥ तुष्टिसंमुखःसंतोषोन्मुखः ॥ २८ ॥ ॥

रावणःप्रयत्नवैयर्थ्यंदृष्ट्वाशोचतेत्याह ॥ धिगिति ॥ मयारावणेन ॥ अग्नगर्ते ॥ २९ ॥ इदानींरावणेनक्रूरतरंकर्मारब्धंतदाह ॥ पुनरिति ॥ ३० ॥ यावदिति ॥ दशमंशिरइत्यनुषज्यते ॥ छेत्तुंप्रारब्धं ॥ मयेतिशेषः ॥ ३१ ॥ तदानींशिवःप्रसन्नोबभूवेत्याह ॥ तावदिति ॥ मामेति ॥ शिरश्छेदंमाकार्षीरित्यर्थः ॥ आदरात्द्विरुक्तिः ॥ ३२ ॥ शिवोरावणंप्रतियदब्रवीत्तदाह ॥ प्रसन्नइति ॥ इत्युक्तइति शिवेनेतिशेषः ॥ मयारावणेन ॥ ३३ ॥ रावणःशिवंदृष्ट्वायत्प्रार्थयततदाह ॥ दृष्ट्वेति ॥ मयैतद्वृत्तंशिवप्रसादरूपकंचरित्रंदृष्ट्वाशिवोयाचितइत्याह ॥ अतुलमिति ॥ ३४ ॥ अनंतरंशिवेनयत्कृतंतदाह ॥ शिवेनेति ॥ अघोरयाप्रसन्नया ॥ ३५ ॥ संधयित्वास्वस्वस्थानेसंयोज्य ॥ परमात्मनाशिवेन ॥ पूर्ववत्छेदनप्राक्कालइवममशरीरंजातमित्यग्रिमेणान्वयः ॥ ३६ ॥ तस्यशिवस्य ॥

धिक्शरीरंबलंचैवधिक्तपःकरणंमम ॥ इत्युक्त्वाचमयाह्यत्रस्थापितेग्नौहुतंबहु ॥ २९ ॥ पुनश्चैवशरीरंहित्यक्ष्याम्यग्नौविचार्यच ॥ शिरांसिचविशुद्धानिकृत्वातुचंदनादिभिः ॥ ३० ॥ छिन्नैकैकंशिरःसर्वाण्यर्पितानिभयानव ॥ यावच्चदशमंछेत्तुंप्रारब्धमृषिसत्तम ॥ ३१ ॥ तावच्चैवस्वयंदेवोज्योतीरूपोहरःस्वयम् ॥ आविरासीत्तदातत्रमामेतिव्याहरन्शिवः ॥ ३२ ॥ प्रसन्नश्चवरंब्रूहिददामितेसमीप्सितं ॥ इत्युक्तेचऋषिश्रेष्ठमयादृष्टोमहेश्वरः ॥ ३३ ॥ दृष्ट्वावृत्तंमयैतच्चह्यतुलंमेबलंप्रभो ॥ देहिलंचप्रसन्नोसिदुर्लभंकिंभवेन्मम ॥ ३४ ॥ शिवेनपरितुष्टेनसर्वंदत्तंयथेप्सितम् ॥ अघोरयाचदृष्ट्यावैपूर्ववद्योजितानिमे ॥ ३५ ॥ शिरांसिसंधयित्वतुदृष्टानिपरमात्मना ॥ एवंकृतेतदातत्रशरीरंपूर्ववन्मम ॥ ३६ ॥ जातंतस्यप्रसादाच्चसर्वंप्राप्तंमयाफलम् ॥ दत्वाचप्रार्थितंसोवैस्थितोऽसौवृषभध्वजः ॥ ३७ ॥ वैद्यनाथेश्वरोलोकेप्रसिद्धोहितकारकः ॥ प्रणिपत्यागतश्चाहंविजेतुंभुवनत्रयम् ॥ ३८ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांवैद्यनाथोत्पत्तिवर्णनंनामपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ७॥ सूतउवाच ॥ तदीयंतद्वचःश्रुत्वाविहस्यनारदोऽब्रवीत् ॥ श्रीनारदउवाच ॥ श्रूयतांराक्षसश्रेष्ठकथयामिहितंतव ॥ १ ॥ ॥

अनंतरंशिवोयत्कृतवांस्तद्रावणआह ॥ दत्वेति ॥ मत्प्रार्थितंदत्वायःशिवःस्थितःसएववैद्यनाथेश्वरोलोकेप्रसिद्धोबभूवेत्यग्रिमेणसंबंधः ॥ ३७ ॥ प्रणिपत्यतमितिशेषः ॥ ३८ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांवैद्यनाथेश्वरोत्पत्तिवर्णनंनामपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ओंनमःशिवाय ॥ ॥ रावणस्थापितंलिंगंवैद्यनाथेश्वराभिधम् ॥ उक्त्वानागेशमाहात्म्यंषट्पंचाशेत्रवर्ण्यते ॥ १ ॥ तदीयंरावणसंबंधि ॥ तत् अभिमानयुक्तंवचःवाक्यम् ॥ १ ॥

त्वयारावणेन ॥ यदुक्तं शिवेनहितंममदत्तमिति ॥ तत्सर्वंशिवकृतंसर्वमित्यर्थः ॥ २ ॥ तत्रहेतुमाह ॥ अयमिति ॥ अयंशिवःमत्ततांमादंप्राप्तःविषप्राशनादिने तिव्याजोक्तिः ॥ नैवेति ॥ शिवोक्तंसत्यंनैवभाविष्यतीत्यर्थः ॥ त्वदुक्तमेवसत्यंकथंज्ञेयमितिरावणाशंकामाह ॥ कथमिति ॥ त्वदुक्तंकथंसत्यंज्ञेयमितिवद सिचेद्वदामीतिनारदआह ॥ प्रियइति ॥ हियतःत्वंमेममप्रियोसि ॥ अतस्त्वांवदामीतिभावः ॥ अथवानारदोमनसाचिंतयतिस्मेत्याह ॥ अयमिति ॥ अयं रावणः ॥ कथंज्ञेयमितिरावणशंका ॥ प्रियइत्यादिकंनारदोत्तरम् ॥ ॥ ३ ॥ शिववचसःसत्यत्वपरीक्षणायरावणंप्रत्युपायमाह ॥ इतइति ॥ अथवाशिवेनत्व दुग्रकर्मदृष्ट्वाहितंदत्तमित्येतत्त्वंसत्यमनुषेतदाकैलासोद्धरणंमहाकर्मत्वयाकर्तव्यं ॥ यदिकृतंस्यात्तदापूर्वोक्तंत्वत्कथितंसत्यमित्यहंमन्यइतिनारदःकपटेनरा णंप्रत्याह ॥ इतइत्यादिना ॥ ४ ॥ उच्चैःउन्नतः ॥ सर्वमिति ॥ त्वत्तपश्चरणादिकमित्यर्थः ॥ ५ ॥ अनंतरंमयाकिंकर्तव्यमितिरावणपृच्छायामाह ॥ पूर्व

त्वयोक्तंयच्छिवेनैवहितंदत्तंममाऽधुना ॥ तत्सर्वंचत्वयासत्यंनमंतव्यंकदाचन ॥ २ ॥ अयंवैमत्ततांप्राप्तःकिंकिंनैव ब्रवीतिच ॥ सत्यंभविष्यतिनैवकथंज्ञेयंप्रियोहिमे ॥ ३ ॥ इतोगत्वापुनश्चैवकुरुत्वंचहितायवै ॥ कैलासोद्धरणेयत्नः कर्तव्यश्चत्वयापुरः ॥ ४ ॥ यदिचैवधृतश्चायमुच्चैश्चैवभविष्यति ॥ तदावैसफलंसर्वंभविष्यतिनसंशयः ॥ ५ ॥ पूर्व वत्स्थापयित्वातंपुनरागच्छवैसुखम् ॥ निश्चयंपरमंगत्वायथेच्छसितथाकुरु ॥ ६ ॥ इत्युक्तःसहितंमेनेरावणोबलद र्पितः ॥ सत्यंमत्वामुनेर्वाक्यंकैलासमगमत्तदा ॥ ७ ॥ गत्वातत्रसुमुत्थानंचक्रेतस्यगिरेरपि ॥ तत्रस्थंचैवतत्सर्वंविप र्यस्तंपरस्परम् ॥ ८ ॥ गिरिशोऽपितदादृष्ट्वाकिंजातंचतदाऽब्रवीत् ॥ गिरिजाचतदाशंभुंप्रत्युवाचविहस्यतम् ॥ ९ ॥ तच्छिष्यस्यफलंप्राप्तंसम्यक्जातंसुशिष्यतः ॥ पश्चाच्छिवेनशप्तश्चरावणोबलदर्पितः ॥ १० ॥ शीघ्रंचतवहस्तानांद र्पघ्नश्चभविष्यति ॥ इतितस्यतदाजातंनारदःश्रुतवांस्तदा ॥ ११ ॥ कैलासंपूर्ववत्स्थाप्ययथागतंतथाययौ ॥ निश्च यंपरमंगत्वाबलेबलविमोहितः ॥ १२ ॥ ॥ ॥ ॥ ॥

वदिति ॥ तंकैलासम् ॥ तवेच्छाचेदिदंकुरुनोचेन्नेत्याह ॥ यथेति ॥ ६ ॥ हितमुपकारकंमेने ॥ यतोबलदर्पितःरावणस्तथैवाकरोदित्याह ॥ सत्यमिति ॥ ॥ ७ ॥ समुत्थानंउद्यमनं ॥ तस्यगिरेरपि ॥ कैलासस्यापीत्यर्थः ॥ तत्रस्थंकैलासस्थम् ॥ तत्सर्वंपरिच्छदादिकंविपर्यस्तंइतस्ततोभ्रष्टमित्यादिकम् ॥ ८ ॥ तद्दृष्ट्वाशिवस्यापिविस्मयोजातइत्याह ॥ गिरिशइति ॥ ९ ॥ स्वकृतस्यकर्मणफलंस्वयमेवभोक्तव्यमितिशिवंप्रतिगौर्याह ॥ तदिति ॥ शिष्यस्यरावणस्य ॥ तत्क्रूरकर्मजनितंफलंप्राप्तम् ॥ एतदेववैपरीत्येनाह ॥ सम्यगिति ॥ तज्ज्ञात्वाशिवोरावणमशपदित्याह ॥ पश्चादिति ॥ १० ॥ शापमाह ॥ शीघ्रमिति ॥ हस्तानामिति ॥ हस्तैरेवापराधकरणादितिभावः ॥ तस्यरावणस्य ॥ ११ ॥ बलेस्वसंपादितेपरमंनिश्चयंगत्वेतिसंबंधः ॥ १२ ॥ ॥

लोकरावणइति ॥ लोकभयजनकइत्यर्थः ॥ १३ ॥ एवंवैद्यनाथेश्वरमाहात्म्यमुपसंहृत्यनागेशमाहात्म्यवक्तुमुपक्रमते ॥ अतःपरमिति ॥ १४ ॥ ज्योतीरू पंज्योतिर्मयंलिंगमित्यर्थः ॥ तत्रेतिहासमाह ॥ दारुकेति ॥ १५ ॥ तस्यादारुकायाःस्वामीभर्ता ॥ कदनंपीडनम् ॥ १६ ॥ किंतत्पीडनंतदाह ॥ यज्ञ ध्वंसमिति ॥ धर्मध्वंसंप्रजापालनादिधर्मनाशनम् ॥ तस्यनिवासस्थानमाह ॥ पश्चिमइति ॥ तस्यराक्षसस्य ॥ १७ ॥ वनस्यपरिमाणमाह ॥ योजनानामि ति ॥ तद्वनेकिंबलंलब्धंकाचतत्रसर्वसमृद्धिस्तदाह ॥ दारुकायाइति ॥ देवीपार्वती ॥ बलंशक्तिमदादितिशेषः ॥ १८ ॥ तदेवस्पष्टतयाबोधयति ॥ दारुकेति

जगद्वशेतदाचक्रेरावणोलोकरावणः ॥ इत्येतच्चसमाख्यातंवैद्यनाथेश्वरस्यच ॥ १३ ॥ माहात्म्यंशृण्वतांपापंगच्छति भस्मसान्नृणाम् ॥ अतःपरंप्रवक्ष्यामिनागेशंपरमात्मनः ॥ १४ ॥ ज्योतीरूपंयथाजातंतथाचविनिवेद्यते ॥ दारुका राक्षसीकाचित्पार्वत्यावलदर्पिता ॥ १५ ॥ दारुकश्चतदातस्याःस्वामीचबलवत्तरः ॥ बहुभीराक्षसैस्तत्रचकारकदनं महत् ॥ १६ ॥ यज्ञध्वंसंचलोकानांधर्मध्वंसंतदाऽकरोत् ॥ पश्चिमेसागरेतस्यवनंसर्वसमृद्धिमत् ॥ १७ ॥ योजना नांषोडशैवविस्तृतंसर्वतोदिशम् ॥ दारुकायैतदादेवीवनस्यचलनेबलम् ॥ १८ ॥ दारुकायत्रसायातितत्रगच्छतित द्वनम् ॥ भूम्याचतरुभिस्तत्रसर्वोपकरणैःसह ॥ १९ ॥ प्रयातितद्वनंदेविलयासहयथेच्छसि ॥ तत्रस्थित्वातदासोऽ पिसर्वेषांचभयंददौ ॥ २० ॥ तेसर्वेपीडितालोकाऔर्वस्यशरणंययुः ॥ महर्षेशरणंदेहिनोचेद्दुष्टेनमारिताः ॥ २१ ॥ सर्वकर्तुसमर्थोऽसितेजसादीप्तिमानसि ॥ पृथिव्यांवर्ततेकश्चित्त्वांविनाशरणंनहि ॥ २२ ॥ यामोयस्यसमीपेतुस्थि ताःसुखमवाप्नुमः ॥ दृष्ट्वात्वांराक्षसाःसर्वेविलीयंतेविदूरतः ॥ २३ ॥ त्वयिशैवंतदातेजोभासतेज्वलनोयथा ॥ इष्टा नांचंद्रवत्त्वंचसुखंतेभ्यःप्रयच्छसि ॥ २४ ॥ ॥ ॥ ॥

॥ सर्वोपकरणैःप्रासादादिभिः ॥ १९ ॥ पार्वत्यैवतांप्रत्येतत्कथितमित्याह ॥ प्रयातीति ॥ देविदारुके तत्रवने ॥ सोपिदारुकोपि ॥ २० ॥ और्वस्यऔर्वनामक स्यऋषेः ॥ शरणंरक्षणम् ॥ दुष्टेनदारुकेण ॥ २१ ॥ ननुकथंममसामर्थ्यंभवद्भिरवगतंतत्राह ॥ तेजसेति ॥ २२ ॥ अतएवाहुः ॥ यामइति ॥ यस्यभ वतः ॥ ननुमामपिराक्षसःपीडयिष्यतीत्यतआहुः ॥ दृष्ट्वेति ॥ विलीयंतेअपगच्छंति ॥ २३ ॥ कुतोऽपगच्छंतीत्यतआहुः ॥ त्वयीति ॥ शैवंशिवसंबंधि ॥ ज्वलनोयथाअग्निरिव ॥ इष्टानांआल्हादकवस्तूनांमध्येचंद्रवत्चंद्रतुल्यंतेभ्यःत्वच्छरणागतेभ्यः ॥ अथवा त्वमिष्टानांभक्तानांचंद्रवच्चंद्रतुल्याल्हादकत्वे न ॥ आसीदितिशेषः ॥ अतस्तेभ्योभक्तेभ्यःसुखंप्रयच्छसि ॥ २४ ॥ ॥ ॥ ॥

सोपिऔर्वोपि ॥ मानीशरणागतरक्षणेऽभिमानवान् ॥ अतएवाह ॥ शरण्येति॥शरणेसाधुरित्यर्थः ॥ अब्रवीदिति ॥ शरणागतान्प्रतीतिशेषः ॥ २५॥ हेऋषिश्रेष्ठाःशौनकादयः ॥ ऋषिरौर्वः ॥ तेषांराक्षसानाम् ॥ कथंशापंददौतदाह ॥ पृथिव्यामिति ॥२६॥ वियुज्येरन्रक्षांसि ॥ राक्षसाइत्यस्योत्तरत्रसंबंधः ॥ वियुज्यतेवियुक्तीभूयतेराक्षसानामितिशेषः ॥ २७ ॥ तेभ्यःशरणागतेभ्यः ॥ प्रजाःराक्षसपीडितलोकान् ॥ २८ ॥ तत्तपएवावलंब्यदेवास्तद्राक्षसवधेअयततेत्याह ॥ तदेति ॥ देवाःतत्शापस्यराक्षसेभ्योदत्तस्यकारणंलोकपीडनरूपंहितंउपकारकंआज्ञायज्ञात्वादेवारिभिःरक्षोभिःसहयुद्धायसमुद्योगंचक्रुरितिसंबंधः ॥ २९॥समुपागताइति ॥ देवाइत्यनुषज्यते ॥ ३० ॥ राक्षसाअर्चिंतयन्नित्याह ॥ किंकर्तव्यमिति ॥ युत्ध्यतइति ॥ यद्यस्माभिर्युत्ध्यतेतदाम्रियतएवेत्यर्थः ॥ एवकारव्या

इत्येवंप्रार्थितःसोऽपिमुहुर्मुहुर्मुनीश्वराः ॥ सोऽपिमानीशरण्यश्चकरिष्यामिवचोऽब्रवीत् ॥ २५ ॥ इत्युक्त्वाचऋषिश्रेष्ठाःशापंतेषांददावृषिः ॥ पृथिव्यांयदिरक्षांसिहिंसंतिप्राणिनोयदा ॥ २६ ॥ तदाप्राणैर्वियुज्येरन्त्राराक्षसाबलवत्तराः॥ यदायज्ञान्विहंसंतितदाप्राणैर्वियुज्यते ॥ २७ ॥ इत्युक्त्वावचनंतेभ्यःसमाश्वास्यप्रजाःपुनः ॥ तपश्चकारविधिवन्नौर्वोलोकसुखावहम् ॥ २८ ॥ तदादेवास्तदाज्ञायशापस्यकारणंहितम् ॥ युद्धायचसमुद्योगंचक्रुर्देवारिभिःसह ॥ २९ ॥ सर्वैश्चैवप्रयत्नैश्चयुद्धार्थंसमुपागताः ॥ तान्दृष्ट्वाराक्षसास्तत्रविचारेतत्पराःपुनः ॥ ३० ॥ किंकर्तव्यंक्वगंतव्यंसंकटंसमुपागतम् ॥ युत्ध्यतेम्रियतेचैवयुत्ध्यतेनविहंस्यते ॥ ३१ ॥ दारुकाराक्षसीसापिज्ञात्वादुःखंसमागतम् ॥ भवान्याश्चवरंतत्रकथयामाससातदा ॥ ३२ ॥ मयाप्याराधितापूर्वंभवपत्नीवरंददौ ॥ वनंचगच्छतिसार्द्धंयत्रगंतुंत्वमिच्छसि ॥ ३३ ॥ तद्वरश्चमयाप्राप्तःकथंदुःखंविषह्यते ॥ जलेवनंचनीत्वावैसुखंस्थेयंतुराक्षसैः ॥ ३४ ॥ तस्यास्तद्वचनंश्रुत्वाराक्षसाहर्षमागताः ॥ धन्येयंकृतकृत्येयंराज्ञ्यावैजीवितावयम् ॥ ३५ ॥ औौर्वेणमारितानांचकागतिःस्यान्नसंशयः ॥ इतिविचार्यतेसर्वेतांज्ञात्वाहितकारिणीम् ॥ ३६ ॥ ॥ ॥

र्त्यमाह ॥ नविहंस्यतइति ॥ देवसैन्यमितिशेषः ॥ यद्वा यदिनयुध्यतेतदाविहंस्यते अस्मत्सैन्यमितिशेषः ॥ युद्धमवश्यंकर्तव्यमित्याशयः ॥ ३१ ॥ दुःखंदेवकृतंभवान्याःपार्वत्याःदत्तंवरंकथयामास ॥ राक्षसान्प्रतीतिशेषः ॥ ३२ ॥ किंकथयामासेतितदाह ॥ मयेति ॥ भवपत्नीगौरीददौ ॥ मह्यमितिशेषः ॥ वरस्वरूपमाह ॥ वनमिति ॥ ३३ ॥ विषह्यतइति ॥ भवद्भिरितिशेषः ॥ किंकर्तव्यमस्माभिरितिराक्षसाशंकायामाह ॥ जलइति ॥ ३४ ॥ तस्याःदारुकायाः राक्षसादारुकांप्रशंसंति ॥ धन्येति ॥ राज्ञ्यादारुकया ॥ ३५ ॥ पुनरपिराक्षसाअर्चिंतयन्नित्याह ॥ औौर्वेणेति ॥ मारितानांशापहतानाम् ॥ अस्मादृशानामितिशेषः ॥ तांदारुकाम् ॥ ३६ ॥ ॥ ॥ ॥ ॥

तस्यैदारुकायै ॥ तत्सर्वंऔर्वकृतम् ॥ ३७ ॥ एवंविचार्यमाणेसदेवालोकायुद्धार्थमागमन्नित्याह ॥ एतस्मिन्निति ॥ ३८ ॥ पीडिताइति ॥ देवैरितिशेषः ॥ राक्षसीदारुका ॥ ३९ सातदानींराक्षसदुःखपरिहारायगौरीदत्तवरसामर्थ्यमदर्शयदित्याह ॥ समग्रमिति ॥ जयेति ॥ तदाराक्षसीजयजयेतिदेवीस्तुतिंगौरी स्तुतिमुच्चार्यकृत्वाउद्वयनंकृत्वासमुद्रस्यमध्येसंस्थितेत्युत्तरेणसंबंधः ॥ ४० ॥ ४१ ॥ कुतोनिर्भयासंस्थितेतितत्राह ॥ वनमिति ॥ उपवनमारामः ॥ विविधानीति ॥ आसन्नितिशेषः ॥ ४२ ॥ अतएवाह ॥ स्वर्गादिति ॥ तत्वनम् ॥ सिद्धाविति ॥ सुखसिद्धावित्यर्थः ॥ यद्वासिद्धौसिद्धिमापन्नौदारुकात

तस्यैनत्वाचतत्सर्वंकथयामासुरादरात् ॥ यदिगंतुंभवेच्छक्तिर्गम्यतांकिंविचार्यते ॥ ३७ ॥ तत्रगत्वाजलेदेविसुखं स्थास्यामनित्यशः ॥ एतस्मिन्नंतरेलोकादेवैःसार्द्धसमागताः ॥ ३८ ॥ युद्धायविविधैर्दुःखैःपीडिताराक्षसाःपुरा ॥ राक्षसीचतदातस्याभवान्यावलमाश्रिता ॥ ३९ ॥ समग्रंतद्वनंनीत्वाजलेस्थलसमन्वितम् ॥ जयजयेतितदादेवीस्तुतिमुच्चार्यराक्षसी ॥ ४० ॥ उद्वयनंतुकृत्वासासपक्षोगिरिराड्यथा ॥ समुद्रस्यैवमध्येसासंस्थितानिर्भयातथा ॥ ४१ ॥ वनंचोपवनंचैवजलंदुर्गंतथापुनः ॥ विहाररम्यस्थानानिहर्म्याणिविविधानिच ॥ ४२ ॥ स्वर्गादप्यधिकंतत्रराजते चमुनीश्वराः ॥ तत्रसिद्धौचतेस्थित्वानगरेचविलासिनः ॥ ४३ ॥ राक्षसाश्चसुखंप्रापुर्निर्भयाश्चविजह्रिरे ॥ राक्षसाश्चपृथिव्यांचनाजग्मुर्मुनिपुंगवाः ॥ ४४ ॥ मुनेःशापभयादेवजलेचबभ्रमुस्तदा ॥ नौषुस्थितान्जनान्नीत्वानगरेतत्र तांस्तदा ॥ ४५ ॥ चिक्षिपुर्बंधनागारेकांश्चिज्जघ्नुस्तदाहिते ॥ यथातथापुनःपीडांचक्रुस्तेराक्षसास्तदा ॥ ४६ ॥ यथापूर्वंस्थलेलोकेभयंचाऽऽसीन्निरंतरम् ॥ तथाजलेभयंतेषांह्यासीन्नित्यंमुनीश्वराः ॥ ४७ ॥ एवंजातेतदाकालेकदाचिद्राक्षसाजले ॥ निःसृतालोकपीडार्थंरुध्वामार्गेजलेतदा ॥ ४८ ॥ स्थितास्तेगुप्तरूपेणधरणार्थंमुनीश्वराः ॥ एतस्मिन्नंतरेतत्रनावोबहुतराःशुभाः ॥ ४९ ॥ ॥ ॥ ॥

त्पतीइत्यर्थः॥तेराक्षसाः॥४३ ॥ विजह्रिरेविहारमकुर्वन् ॥ ४४ ॥ पृथिव्यांकुतोनाजग्मुस्तत्राह ॥ मुनेरिति ॥ तत्रस्थित्वापिसुजनान्पीडयामासुरित्याह ॥ नौष्विति ॥ ४५ ॥ यथातथायेनकेनापिप्रकारेण ॥ ४६ ॥ जनपीडाकरणेनैवतत्रापितैर्भयंप्राप्तमित्याह ॥ यथापूर्वमिति ॥ तेषांलोकानाम् ॥ ४७ ॥ राक्षसास्तत्कर्मनतत्यजुरित्याह ॥ एवमिति ॥ मार्गेलोकगमनागमनमार्गे॥ ४८ ॥ गुप्तरूपेणेति ॥ स्वमाययेतिभावः ॥ धरणार्थंलोकधर्षणार्थम् ॥ ४९ ॥

हर्षमिति ॥ राक्षसाःनौकास्थितान्लोकान्दृष्ट्वाहर्षंप्राप्यतान्प्रतिजग्मुः ॥ तदातेलोकाःराक्षसोद्भवंभयंगतास्तदातेराक्षसास्तेषांलोकानांधरणंधर्षणंकृत्वाऽऽज ग्मुस्तांश्चनगरेचिक्षिपुरित्युत्तरेणसंबंधः ॥ ५० ॥ ५१ ॥ तेलोकाः ॥ ५२ ॥ तेषांलोकानांमध्येयोऽधीशःपूर्वोक्तोवैश्यःशैवःशिवभक्तः ॥ ५३ ॥ सकी दृशःशिवभक्तआसीत्तदाह ॥ यदीति ॥ सपरानपिशिवमंत्रादिकमुपदिदेशेत्याह ॥ सोपीति ॥ ५४॥ पार्थिवीम्पार्थिवलिंगसंबंधिनीमथवापार्थिवद्रव्ययुक्ताम् ॥ तेपितथैवाकुर्वन्नित्याह ॥ तइति ॥ शिवसमुद्भवांकल्याणकारिणिम् ॥ ईश्वरसंबंधिनींवा ५५ ॥ तेषामुपासनाप्रकारमाह ॥ केचिदिति ॥ आसनंपद्मा

आगताबहुधातत्रलोकैश्चसर्वतोवृताः ॥ तानावश्चतदादृष्ट्वाहर्षंप्राप्यतथाचतान् ॥ ५० ॥ जग्मुस्तेचतदासर्वेभयंच राक्षसोद्भवम् ॥ गतास्तेचतदातेषांकृत्वाचधरणंपुनः ॥ ५१ ॥ आजग्मुर्नगरंतेचचिक्षिपुर्नगरेपुनः ॥ तेदुःखितास्त दादुःखमाजग्मुश्चमुनीश्वराः ॥ ५२॥ तेषांमध्येचयोऽधीशःशैवश्चाऽऽसीत्तदातुसः ॥ विनाचशिवपूजांचनतिष्ठतिक दाचन ॥५३॥ यदिपूजानजायेततदावैभुज्यतेनच ॥ कारागृहगतःसोऽपिबहूनशिक्षयत्तदा ॥५४॥ शिवमंत्रंचपूजां चपार्थिवीमृषिसत्तमाः ॥ तेसर्वेचतदातत्रपूजांशिवसमुद्भवाम् ॥ ५५ ॥ चक्रुश्चविधिवत्तत्रयथादृष्टंयथाश्रुतम् ॥ के चित्तत्रस्थिताध्यानेबध्वाऽऽसनमनुत्तमं ॥५६॥ मानसींचतदापूजांकृत्वादुःखंव्यपोहयन् ॥ तदधीशेनतत्रैवप्रत्यक्षं शिवपूजनम् ॥ ५७॥ कृतंचपार्थिवस्यैवविधानेनमुनीश्वराः ॥ अन्येचयेनजानंतिविधानस्मरणंपरम् ॥ ५८॥ नमः शिवायमंत्रेणध्यायंतःशंकरंस्थिताः ॥ सुप्रियोनामपश्चाद्वैवैश्यवर्यःशिवप्रियः ॥ ५९ ॥ ध्यानेनेनमनसातत्रमानसं ह्युपचारकम् ॥ चकारप्रीतियुक्तोऽसौप्रत्यक्षंशिवआददे ॥ ६० ॥ यथोक्तरूपीशंभुश्चआगत्यसर्वमाददे ॥ सोपिस्व यंनजानातिगृह्यतेचशिवेनवै ॥ ६१ ॥ एवंचक्रियमाणस्यषण्मासाःसंययुस्तदा ॥ कदाचित्सेवकैस्तस्यराक्षसस्य दुरात्मनः ॥ ६२ ॥ ॥ ॥ ॥ ॥

सनादिकम् ॥ ५६ ॥ मानसीमिति ॥ नतुकायिकीं राक्षसभयादितिभावः ॥ तदधीशेनवैश्येन ॥ ५७ ॥ विधानानभिज्ञाःकिमकुर्वंस्तदाह॥ अन्यइति ॥ ॥ ५८ ॥ ५९ ॥ तदानींवैश्यंप्रतिशिवोऽनुकंपयामासेत्याह ॥ प्रत्यक्षमिति ॥ आददेउपचारकमितिसंबध्यते ॥ ६०॥ ननुनिर्गुणःशिवःकथमाददइत्यतआह ॥ यथोक्तेति ॥ भक्तानुग्रहार्थंस्वीकृतसगुणरूपइत्यर्थः ॥ सुप्रियोपिशिवानुकंपांनज्ञातवानित्याह ॥ सोपिति ॥ ६१ ॥ ६२ ॥ ॥

तदग्रेसुप्रियस्यपुरतःनिवेदितंसेवकैरितिपूर्वेणसंबंधः ॥ ६३ ॥ राजापिराक्षसाधीशोपि ॥ ६४ ॥ तेनसुप्रियेणकुपितःराक्षसइतिशेषः ॥ राक्षसान्प्रतियदब्र वीत्तदाह ॥ हन्यंतामिति ॥ भोराक्षसाःइमेलोकाहन्यंतामितिसंबंधः ॥ ६५ ॥ तेराक्षसाः ॥ भयवित्रस्तेति ॥ सुप्रियइतिशेषः॥ ६६॥तदानींसुप्रियःशिवं तुष्टावेत्याह ॥ पाहीति ॥ सर्वस्वंमदीयगोप्यद्रव्यमाराध्यमित्यर्थः ॥ ६७ ॥ तदानींशिवोपिशीघ्रंदयांचकारेत्याह ॥ शंभुरिति ॥ विवरात्भूमिच्छिद्रात् ॥ भवनेनेति ॥ भवनेनमंदिरेण॥ सहेतिशेषः॥ ६८ ॥ मध्यइति ॥ भवनस्येतिशेषः ॥ परिवारेति ॥ पार्वत्यादिपरिवारयुक्तमित्यर्थः ॥ अपूजयदिति ॥ सु

तदग्रेसुंदरंरूपंदृष्ट्वातुशंकरस्यच ॥ निवेदितंतदातस्मैराज्ञेसर्वंयथार्थकम् ॥ ६३ ॥ राजापिपुनरागत्यवैश्यायपर्यपृ च्छत ॥ किंध्यायसिचवैश्याऽद्यसत्यंवदनचाऽन्यथा ॥ ६४॥ तेनोक्तंत्वंचजानासितच्छ्रुत्वाकुपितःपुनः ॥ राक्षसान्प्रे रयामासहन्यंतांराक्षसाइमे ॥ ६५ ॥ इत्युक्तास्तेतदाहंतुंनानायुधधरागताः ॥ तानागतांस्तदादृष्ट्वाभयवित्रस्तलो चनः ॥ ६६ ॥ पाहिशंकरदेवेशपाहिशिवशिवेतिच ॥ सर्वस्वंचभवानद्यवर्ततेदेवसत्तम ॥ ६७ ॥ इतिसंप्रार्थितःशं भुर्विवरान्निर्गतस्तदा ॥ भवनेनसुंदरेणचतुर्द्वारयुतेनच ॥ ६८ ॥ मध्येचज्योतीरूपंचशिवरूपमहाद्भुतम् ॥ परिवार समायुक्तंदृष्ट्वाचाऽपूजयत्तदा ॥ ६९ ॥ पूजितश्चतदाशंभुःप्रसन्नोह्यभवत्स्वयम् ॥ पाशुपतंतदास्त्रंचदत्वाचराक्षसोत्त मान् ॥ ७० ॥ जघानसोपकरणान्सर्वांश्चराक्षसांस्तथा ॥ सर्वांस्तांश्चतदाहत्वावरंप्रादाद्वरस्यच ॥ ७१ ॥ अस्मि न्वनेसदावर्णाधर्माश्चसंभवंतुवै ॥ ब्राह्मणक्षत्रियविशांशूद्राणांधर्मएवच ॥ ७२ ॥ भवन्त्वत्रमुनिश्रेष्ठास्तामसानक दाचन ॥ एतस्मिन्समयेदेव्याराक्षसीतुस्तुतिंव्यधात् ॥ ७३ ॥ प्रसन्नाचतदासाचह्युवाचकिंकरोम्यहम् ॥ साप्यु वाचपुनस्तत्रवंशश्चरक्ष्यतांमम ॥ ७४ ॥ ॥ ॥ ॥

प्रियइतिशेषः ॥ ६९ ॥ शिवःप्रसन्नोभूत्वायदकरोत्तदाह ॥ पाशुपतमिति ॥ दत्वेति ॥ सुप्रियायेतिशेषः ॥ तथापिस्वयमेवराक्षसान्जघानेत्याह ॥ राक्ष सोत्तमानिति ॥ ७० ॥ सर्वानिति ॥ निःशेषानित्यर्थः ॥ वरस्येति ॥ वरस्यश्रेष्ठभक्तस्ययोग्यंवरमित्यध्याहृतेनसंबंधः ॥ ७१ ॥ वरस्वरूपमाह ॥ अ स्मिन्निति ॥ वर्णाःब्राह्मणादयः ॥ धर्माःतत्तदाश्रमधर्माः ॥ एतदेवविवृणोति ॥ ब्राह्मणेति ॥ धर्मइति ॥ सात्विकोधर्मइत्यर्थः ॥ ७२ ॥ अतएवाह ॥ तामसाइति ॥ देव्यागौर्याःराक्षसीदारुका॥व्यधात्अकरोत्॥७३॥तांप्रतिगौरीप्रसादमकरोदित्याह॥प्रसन्नेति ॥ राक्षसीवरमयाचतेत्याह ॥ सापीति ॥ ७४॥

तदुक्तमंगीकृत्य गौर्यदादित्याह ॥ रक्षयिष्यामीति॥विग्रहंविरोधं ॥ सागौरी ॥ ७५ ॥ हेदेविगौरि ॥ तस्यशिवस्य ॥ ७६ ॥ गौरीयदब्रवीत्तदाह ॥ भवदीयमिति ॥ युगांएतद्युगसमाप्तौ ॥ तामसीतमोगुणप्रधाना ॥ ७७ ॥ तादृशसृष्टिभवनेहेतुमाह ॥ नान्यथेति ॥ अन्यथातादृशसृष्ट्यभावे ॥ तमोगुणस्यैवनाशकत्वादिति भावः ॥ हेत्वंतरमाह ॥ इयमिति ॥ ७८ ॥ प्रशास्यति ॥ शासनंप्रापयिष्यति ॥ ७९ ॥ मताइति ॥ ममेतिशेषः ॥ ८० ॥ तदानींशिवोयुक्तिमाह ॥ स्थास्यामीति ॥

रक्षयिष्यामिवंशंतेसत्यंचकथ्यतेमया ॥ इत्युक्त्वाचशिवेनैवविग्रहंसाचकारह ॥ ७५ ॥ शिवोपिकुपितोदेवियथेच्छसितथाकुरु ॥ इतिश्रुत्वावचस्तस्यपार्वतीवाक्यमब्रवीत् ॥ ७६ ॥ भवदीयंवचस्तथ्यंयुगांतेचभविष्यति ॥ तावच्च तामसीसृष्टिर्भवत्वितिमतंमम ॥ ७७ ॥ नान्यथाप्रलयःस्याद्वैसत्यंमेव्याहृतंशिव ॥ इयंचदारुकादेवीराक्षसीशक्तिकामम ॥ ७८ ॥ बलिष्ठाराक्षसानांचराज्ञीराज्यंप्रशास्यति ॥ इमाराक्षसपत्न्यश्चप्रसविष्यंतिपुत्रकान् ॥ ७९ ॥ तेसर्वेमिलिताश्चैववनेवासायवैमताः ॥ इत्येवंवचनंश्रुत्वाभक्तानांपालनायच ॥ ८० ॥ स्थास्यामिचवनेह्यत्रशंकरोवाक्यमब्रवीत् ॥ यदाचवर्णधर्मस्थोदर्शनंमेत्रसंस्थितं ॥ ८१ ॥ करिष्यतितदासोवैचक्रवर्तीभवेन्नरः ॥ अन्यथाकलिपर्यासेसत्यस्यादौमुनीश्वराः ॥ ८२ ॥ महासेनसुतोयोवैवीरसेनेतिविश्रुतः ॥ दर्शनंममकृत्वाचचक्रवर्तीभविष्यति ॥ ८३ ॥ इत्येवंदंपतीतौचकृत्वाहास्यंपरस्परम् ॥ स्थितौतत्रस्वयंसाक्षान्नागेशोनामशंकरः ॥ ८४ ॥ ऋषयऊचुः ॥ वीरसेनःकथंतत्रयास्यतिदारुकावने ॥ सूतउवाच ॥ नैषधेसुंदरेदेशेक्षत्रियाणांकुलेचसः ॥ ८५ ॥ महासेनसुतोवीरसेनोवैक्षात्रसंभवः ॥ पार्थिवंभजनंकृत्वातपःपरमदुष्करम् ॥ ८६ ॥ चकारवीरसेनोवैवर्षाणांद्वादशावधि ॥ ततः प्रसन्नोदेवेशःप्रत्यक्षंप्राहशंकरः ॥ ८७ ॥ ॥ ॥ ॥

अत्रवनेस्थास्यामीतिवाक्यमब्रवीदितिसंबंधः ॥ वर्णधर्मस्थः अपरित्यक्तस्वस्ववर्णाश्रमधर्मः ॥ संस्थितंसुस्थिरम् ॥ ८१ ॥ दर्शनस्यफलमाह ॥ सइति ॥ सुलोपाभावआर्षः ॥ अन्यथाअन्यप्रकारेणकलिपर्यासेकलियुगावसानेसत्यस्यकृतयुगस्यआदावारंभे ॥ ८२ ॥ ८३ ॥ तौगौरीशिवौ ॥ तत्रदारुकावने ॥ सएवनागेशःप्रसिद्धइत्याह ॥ नागेशइति ॥ ८४ ॥ ८५ ॥ भजनंसेवाम् ॥ ८६ ॥ चकारेति ॥ अत्रतप्स्ततापसुमहद्वर्षाणांद्वादशावधीतिपाठांतरम् ॥ ८७ ॥

तपांतेकर्तव्यंशिवउपदिदेशेत्याह ॥ काष्ठस्येति ॥ मस्तितांमस्तीं ॥ त्रपुघात्विति ॥ वंगधातुविलेपनामित्यर्थः ॥ योगमायामिति ॥ तांमस्तींयोगमायारूपांविधायेत्यर्थः ॥ ८८ ॥ एकांकेवलाम् ॥ तत्रदारुकावने॥ विवरेगर्ते ॥ ८९ ॥ ९० ॥ पाशुपतंमहास्त्रम् ॥ राक्षसीमुखान्दारुकाप्रभृतीन्राक्षसानितिशेषः ॥ हत्वाविनाश्यतिष्ठेतिशेषः ॥ एवंकृतेगौर्याविरोधोनभवेदित्याह ॥ पार्वत्याइति ॥ ९१ ॥ अतएवाह ॥ मयीति ॥ तुभ्यमपिगौरीनक्रोत्स्यतीत्याह ॥ इतीति ॥ सोपिवीरसेनोपि ॥ ९२ ॥ एवंवीरसेनोयुगांतेकरिष्यतीत्याह ॥ ९३ ॥ शक्तइति ॥ नागेशमाहात्म्यमुपसंहरति ॥ एवमिति ॥ इतःपरंरामेश्व

काष्ठस्यमस्तिकांकृत्वात्रपुधातुविलेपनाम् ॥ विधाययोगमायांचदास्यामिवीरसेनक ॥ ८८ ॥ तांगृहीत्वापुनश्चैकांनैभिःसहव्रजाऽधुना ॥ अन्येचम्लेछरूपावैभविष्यंतिवनौकसः ॥ ८९ ॥ एकस्त्वंतत्रगत्वाचविवरेचकृतेमया ॥ प्रविश्यचतदापूजांकृत्वानागेश्वरस्यच ॥ ९० ॥ ततःपाशुपतंप्राप्यहत्वाचराक्षसीमुखान् ॥ पार्वत्याश्वबलंचैवसंपूर्णंचभविष्यति ॥ ९१ ॥ मयिदृष्टेतदाकिंचिन्न्यूनंतेनभविष्यति ॥ इतिदत्तवरःसोऽपिशिवेनपरमात्मना ॥ ९२ ॥ शक्तःसर्वंतदाकर्तुंभविष्यतिनसंशयः ॥ एवंनागेश्वरोदेवोह्युत्पन्नोज्योतिषांपतिः ॥ ९३ ॥ एवंयःशृणुयान्नित्यंमहापातकनाशनम् ॥ अतःपरंप्रवक्ष्यामिलिंगंरामेश्वरस्यच ॥ ९४ ॥ उत्पन्नंचयथापूर्वंतथाऽहंकथयाम्यहम् ॥ ९५ ॥ इति श्रीशिवमहापुराणेज्ञानसंहितायांनागेशमहिमनिरूपणंनामषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठामाहात्म्यंशंकरस्यच ॥ कदाचिद्राघवोदेवोलक्ष्मणेनयुतोयदा ॥ १ ॥ सुग्रीवप्रमुखैःपिंगैर्वानरैर्बलवत्तरैः ॥ पद्माष्टादशसंख्यैश्चययौतीरंपयोनिधेः ॥ २ ॥ दक्षिणेसागरेयोवैदृश्यतेलवणाकरः ॥ तत्रगत्वास्वयंरामोवेलायांसंस्थितोयदा ॥ ३ ॥ वानरैःसेव्यमानस्तुलक्ष्मणेनतथैवच ॥ जानकीचकुतोयाताकदाचेयंमिलिष्यति ॥ ४ ॥

रमाहात्म्यंवक्तुमुपक्रमते ॥ अतःपरमिति ॥ ९४ ॥ ९५ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांनागेशमहिमनिरूपणंनामषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ॥ ॥ ओंनमःशिवाय ॥ श्रीरामप्रसन्नोभूल्लवणाब्ध्यंतिकेशिवः ॥ तद्रामेश्वरमाहात्म्यंसप्तपंचाशईर्यते ॥ १ ॥ राघवःश्रीरामचंद्रः ॥ १ ॥ पिंगैःपिंगलवर्णैःपद्माष्टादशसंख्यैःअष्टादशपद्मसंख्यैरित्यर्थः ॥ पयोनिधेःसागरस्य ॥ २ ॥ कोसौसागरप्रदेशस्तमाह ॥ दक्षिणइति ॥ ॥ ३ ॥ सीतावियोगपीडितोरामचंद्रश्चिंतयतिस्मेत्याह ॥ जानकीति ॥ ४ ॥ ॥ ॥

वानरंवानरसंबंधि ॥ राक्षसःरावणःगिरिधर्तागिरेःकैलासस्यधारयिता ॥ अनेनरावणस्यदुर्जयत्वंसूचितम् ॥ ५ ॥ ६ ॥ राघवोलक्ष्मणादीन्प्रतिजलमयाचतेत्या
ह ॥ लक्ष्मणेति ॥ हेलक्ष्मणअहंजलार्थीअभवमितिसंबंधः ॥ तच्छ्रुत्वावानराएवजलानयनेस्फूर्तिमकुर्वन्नित्याह ॥ इत्युक्त्वाइति ॥ अधावन्निति ॥ समुद्र
स्यक्षारोदकत्वाद्दूरंकूपादावगमन्निितिभावः ॥ ७ ॥ वानराःश्रीरामंप्रत्याहुः ॥ जलमिति ॥ ८ ॥ स्वयंनीत्वातदानीतंजलस्वयमेवगृहीत्वाजलपानारंभकाले श्री
रामचंद्रःस्वप्रमादमदर्शयदित्याह ॥ नकृतमिति ॥ मयाशिवस्यदर्शनंनकृतमितिसंबंधः ॥ सीतावियोगशोकयुक्तत्वादयंप्रमादइतिभावः ॥ ९ ॥ १० ॥ पार्थि

अगाधःसागरश्चैवतीर्णंसैन्यंचवानरं ॥ राक्षसोगिरिधर्तास्तिकिंवाकिंचभविष्यति ॥ ५ ॥ इत्येवचविचार्यैवर्तारेस्थि
त्वासलक्ष्मणः ॥ आश्रितोवानरैःसर्वैरंगदादिपुरःसरैः ॥ ६ ॥ उवाचराघवस्तत्रजलार्थीलक्ष्मणाऽभवम् ॥ इत्यु
क्त्वावानरास्तत्रह्यधावंतदिशोदश ॥ ७ ॥ नीत्वाजलंसमाजग्मुःप्रणिपत्यपुरःस्थिताः ॥ जलंचगृह्यतांस्वामिन्समा
नीतंत्वदाज्ञया ॥ ८ ॥ तज्जलंचस्वयंनीत्वापातुमारब्धवान्यदा ॥ तदाचस्मरणंजातंनकृतंदर्शनंमया ॥ ९ ॥ शिव
स्यवानरश्रेष्ठाःकथंचगृह्यतेजलम् ॥ इत्युक्त्वाचजलंमुक्तंरामेणपरमात्मना ॥ १० ॥ पश्चाच्चपार्थिवींपूजांचकाररघु
नंदनः ॥ आवाहनादिकांर्श्चह्युपचारान्प्रकल्प्यच ॥ ११ ॥ प्रणिपातैस्तवैर्दिव्यैःसंतोष्यशंकरंपुनः ॥ प्रार्थयामा
सदेवेशंशंकरंपरयामुदा ॥ १२ ॥ स्वामिन्जलमगाधंचराक्षसोबलवत्तरः ॥ वानराणांबलंह्येतच्चंचलंयुत्धसाधनम्
॥ १३ ॥ तस्माच्छंभोत्वयाकार्यंसाहाय्यंममसुव्रत ॥ त्वदीयोरावणश्चैवदुर्जयःसर्वथानृभिः ॥ १४ ॥ पुण्येच्चपक्षपा
तोवैत्वयाकार्यःसदाशिव ॥ इत्येवंचनमस्कृत्यप्रक्रम्यचपुनःपुनः ॥ १५ ॥ जयजयतदाप्युच्चैरुद्घोषैःशंकरेतिच ॥ इ
तिस्तुत्वाशिवंतत्रमंत्रध्यानपरायणः ॥ १६ ॥ पुनःपूजांतदाकृत्वागल्लनादंयदाऽकरोत् ॥ तदाचशंकरोदेवोज्योती
रूपोमहेश्वरः ॥ १७ ॥ सांगःसपरिवारश्चयथोक्तंरूपमुत्तमम् ॥ धृत्वाचप्रकटीभूयशिवमस्तुतदाऽब्रवीत् ॥ १८ ॥

वींपार्थिवलिंगसंबंधिनीम् ॥ ११ ॥ १२ ॥ किंप्रार्थयामासेतितदाह ॥ स्वामिन्निति ॥ बलंसैन्यम् ॥ चंचलमिति ॥ तच्चांचल्यस्यस्वाभावकत्वादितिभा
वः ॥ १३ ॥ त्वदीयःत्वद्भक्तः ॥ अतएवाह ॥ दुर्जयइति ॥ १४ ॥ ननुमद्भक्तेकथंतवद्वेषइत्यतआह ॥ पुण्यइति ॥ लोकोपकारकेपुण्यकर्मणीत्यर्थः ॥ प्रक्र
म्यप्रदक्षिणीकृत्य ॥ १५ ॥ १६ ॥ १७ ॥ सांगःपार्वत्यादियुक्तः ॥ सपरिवारःप्रमथादिपरिवृतः ॥ अब्रवीत्रामंप्रतीतिशेषः ॥ १८ ॥ ॥

सर्वंपूजांसकलोपचारयुताम् ॥ १९ ॥ जयमिति ॥ रावणादिशत्रोःसकाशादितिभावः ॥ २० ॥ अनुज्ञांप्रकृतस्वकार्यविषयिणीम् ॥ २१ ॥ ननुकिमर्थं स्थेयमित्यतआह ॥ लोकानामिति ॥ २२ ॥ इत्युक्तइति ॥ रामेणेतिशेषः ॥ रामेश्वराख्यानमुपसंहरति ॥ इतीति ॥ २३ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांरामेश्वरमाहात्म्यंनामसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ श्रीसांबशिवार्पणमस्तु ॥ ॥ ओंनमःशिवाय ॥ सुधर्मपत्न्याघुश्मायाभक्त्याविर्भवतःप्रभोः ॥ घुश्मेश्वरस्यमाहात्म्यमष्टपंचाशईर्यते ॥ १ ॥ अथघुश्मेशाख्यानंवक्तुमुपक्रमते ॥ अतःपरमिति ॥ १ ॥ द

तद्रूपंचतदादृष्ट्वासर्वपूजांपुनःस्वयम् ॥ कृतवान्राघवोदेवःशिवधर्मपरायणः ॥ १९ ॥ स्तुतिंचविविधांकृत्वाप्रणिपत्यशिवंमुदा ॥ जयंचप्रार्थयामासजयोऽस्तुपुनरब्रवीत् ॥ २० ॥ शिवदत्तंजलंप्राश्यह्यनुज्ञांसमवाप्यच ॥ पुनश्चप्रार्थयामासइहस्थेयंत्वयाप्रभो ॥ २१ ॥ लोकानामुपकारार्थंपावनायशिवत्वया ॥ स्थातव्यमत्रदेवेशकरुणासागरप्रभो ॥ २२ ॥ इत्युक्तस्तुशिवस्तत्रलिंगरूपोऽभवत्तदा ॥ रामेश्वरश्चनाम्नावैप्रसिद्धोजगतीतले ॥ इतितेचसमाख्यातंशृण्वतांपापहारकम् ॥ २३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांरामेश्वरमाहात्म्यंनामसप्तपंचाशत्तमोऽध्यायः ॥ ॥ ५७ ॥ छ ॥ सूतउवाच ॥ अतःपरंचघुश्मेशंज्योतिर्लिंगमुदाहृतम् ॥ ॥ तस्यैवचसुमाहात्म्यंश्रूयतामृषिसत्तमाः ॥ १ ॥ दक्षिणस्यामृषिश्रेष्ठागिरिर्देवेतिसंज्ञकः ॥ तस्यैवनिकटेकश्चिद्भारद्वाजकुलोद्भवः ॥ २ ॥ सुधर्मानामविप्रश्चसर्वदाब्रह्मवित्तमः ॥ तस्यप्रियासुदेहाचसाध्वीधर्मपरायणा ॥३॥ सुधर्माचद्विजश्रेष्ठोदेवतातिथिपूजकः ॥ वेदमार्गपरोनित्यमग्निसेवापरायणः ॥ ४ ॥ त्रिकालंश्रद्धयायुक्तःसूर्यरूपसमद्युतिः ॥ शिष्याणांपाठकश्चैववेदशास्त्रविचक्षणः ॥ ५ ॥ धनवांश्चपरोदातासौजन्यगुणभाजनं ॥ आयुर्बहुव्यतीतंचतस्यधर्मंप्रकुर्वतः ॥ ६ ॥ पुत्रश्चनाऽभवत्तस्यऋतुःस्यादफलःस्त्रियाः ॥ तेनदुःखंकृतंनैववस्तुज्ञानपरायणः ॥ ७ ॥ ॥

क्षिणस्यांदिशीत्यर्थः ॥ देवेतिसंज्ञकोनाम्नादेवगिरिरितिप्रसिद्धः ॥ २ ॥ सर्वदेति ॥ अनेनतस्यनिरंतरंब्रह्मचिंतनंसूचितं ॥ तस्यसुधर्मणः ॥ सुदेहाएतन्नाम्नीप्रियाभार्येत्यर्थः ॥ ३ ॥ सुधर्मणःसदाचारमाह ॥ देवतेति ॥ अग्निसेवापरायणइति ॥ संध्यादिनित्यकर्मोपलक्षणमेतत् ॥ ४ ॥ ५ ॥ ६ ॥ अफलःअपत्यरूपफलशून्यःस्यात्अभवदित्यर्थः ॥ तेनसुधर्मणा ॥ दुःखाकरणेहेतुमाह ॥ वस्त्विति ॥ ७ ॥ ॥ ॥

वस्तुज्ञानमाह ॥ आत्मनइति ॥ स्वस्येत्यर्थः ॥ तारकःसंसारादुद्धर्ताआत्मापरमात्मैवेत्यर्थः ॥ अनेनपुत्राद्यभावेपिमोक्षप्राप्तिर्भवतीतिसूचितम् ॥ ८ ॥ पुत्रसं भवंपुत्राजननसंभवमित्यर्थः ॥ प्रार्थयत्प्रार्थयत ॥ यत्नतांप्रयत्नम् ॥ अत्रपुत्रकारणादितिक्वचित्पाठः ॥ ९॥ सुधर्माभार्यामितरनिषेधपुरःसरंसांत्वयामास ॥ सोपीति ॥ पुत्रादिसर्वंमिथ्यैवमंतव्यंयतोनकिमपिस्वोपकारकमित्याह ॥ किमिति ॥ १० ॥ ११ ॥ पुत्राभावचिंतयामन्नित्यकर्मादिनत्वयाप्रतिबंधनीयमित्यभिप्रेत्याह ॥ नित्यमिति ॥ १२ ॥ संतोषेहेतुमाह ॥ द्वंद्वदुःखमिति ॥ शीतोष्णादिद्वंद्वदुःखंसमत्यगात्अत्यजत् ॥ स्त्रीत्वेनसुदेहायाःशोकनिवृत्तिसाधना

आत्मनस्तारकश्चात्माह्यात्मनःपावकश्चसः ॥ इत्येवंमनसिधृत्वादुःखंनकृतवांस्तदा ॥८॥ सुदेहाहितदादुःखंचकारपुत्रसंभवं ॥ नित्यंचस्वामिनंसावैप्रार्थयद्यत्नतांकुरु ॥ ९ ॥ सोपिस्त्रियंतदाभर्त्स्यकिंपुत्रश्चकरिष्यति ॥ कामाताकःपितापुत्रःकोवाबंधुःप्रियश्चकः ॥ १० ॥ सर्वस्वार्थपरंदेविजानीहित्वंनसंशयः ॥ तस्माद्देवित्वयादुःखंत्यजनीयंसुनिश्चितम् ॥ ११ ॥ नित्यंमह्यंत्वयानैवकथनीयंशुभव्रते ॥ एवंतांसंनिवार्यैवभगवद्धर्मतत्परः ॥ १२ ॥ आसीत्परमसंतुष्टोद्वंद्वदुःखंसमत्यगात् ॥ कदाचिच्चसुदेहावैगेहेचसहवासिनां ॥ १३ ॥ जगामप्रियगोष्ठ्यर्थंविवादःसंगतस्ततः ॥ तत्पत्न्यास्त्रीस्वभावाच्चभर्त्सितासातदागमत् ॥ १४ ॥ अपुत्रिणिकथंगर्वंकरोषिपुत्रिणीह्यहम् ॥ मद्धनंभोक्ष्यतेपुत्रस्तेधनंकश्चभोक्ष्यति ॥१५॥ राजाहरिष्यतिनूनंधिङ्मानंतववंध्यके ॥ तदाचभर्त्सितासावैगृहमागत्यदुःखिता ॥ ॥ १६ ॥ स्वामिनंकथयामासतदुक्तंसर्वमादरात् ॥ ब्राह्मणोऽपितदादुःखंनचकारचबुद्धिमान् ॥ १७ ॥ कथितंकथ्यतामेवंयद्भावितद्भवेत्प्रिये ॥ इत्येवंचतदातेनह्याश्वस्ताऽपिपुनःपुनः ॥१८॥ अत्यजन्नतदादुःखंह्याग्रहंकृतवत्यसौ ॥ यथातथात्वयापुत्रःसमुत्पाद्यःप्रियोऽसिमे ॥ १९ ॥ ॥ ॥ ॥

भावाच्छोकपीडाऽभवादित्याह ॥ कदाचिदिति ॥ १३ ॥ विवादःकलहः ॥ संगतःप्राप्तः ॥ तत्पत्न्यागेहस्वामिपत्न्या ॥ सासुदेहा ॥ १४ ॥ भर्त्सनप्रकारमाह ॥ अपुत्रिणीति ॥ १५ ॥ हरिष्यतीति ॥ धनमित्यनुषज्यते ॥ अज्ञानादिदमुक्तंसर्वत्रादायिकंराजाहरेब्रह्मस्ववर्जितमितिश्रुतेः ॥ १६ ॥ तदुक्तंतयोक्तम् ॥ तथापिसदुःखमकृत्वैवपुनर्भार्यासांत्वयामास ॥ ब्राह्मणइति ॥ १७ ॥ १८ ॥ तथापिसातदुक्तंनान्वमन्यतेत्याह ॥ अत्यजदिति ॥ आग्रहंपुत्रप्राप्तिविषयाभिनिवेशम् ॥ तदेवाह ॥ यथेति ॥ १९ ॥ ॥ ॥ ॥ ॥

अन्यथा पुत्रोत्पादनेयत्नंनकरोषिचेदित्यर्थः ॥ चिंतयेति ॥ आविष्टोवभूवेतिशेषः ॥ २० ॥ स्वस्त्रीसांत्वनायैवपुत्रप्राप्तिपरीक्षणार्थंदिव्यंकृतवानित्याह ॥ अग्नेरि
ति ॥ अतंद्रितंविकसितम् ॥ क्रियाविशेषणंवा ॥ एतद्दिव्यप्रकारमाह ॥ दक्षिणमिति ॥ २१ ॥ फलाप्तयेपुत्ररूपफलप्राप्तये ॥ २२ ॥ यन्मनसिधृतंतदाह ॥ पुत्रइ
ति ॥ स्वामिनायत्पुष्पंधृतंतदेवपुष्पंमन्मनस्यागच्छेत्तदाममपुत्रोभवेदित्यर्थः ॥ २३ ॥ २४ ॥ एवंकृतेपितयेष्टंपुष्पंनलब्धमित्याह ॥ पुरुषेणेति ॥ यत्पुष्पम्
॥ तदानींसुधर्मापिविमनावभूवेत्याह ॥ तद्दृष्ट्वेति ॥ २५ ॥ तथापिसस्वदुःखंपरिहायतामसांत्वयादित्याह ॥ निर्मितामिति ॥ २६ ॥ २७ ॥ तदासुदेहासपत्नी

अन्यथाचत्यजिष्यामिदेहंदेहभृतांवर ॥ एवमुक्तंतयाश्रुत्वाब्राह्मणश्चिंतयापुनः ॥ २० ॥ अग्नेरग्रेतदाक्षिप्तंपुष्पद्वय
मतंद्रितम् ॥ मनसिदक्षिणंपुष्पंधृतंपुत्रफलप्रदम् ॥ २१ ॥ एवंकृत्वास्वपत्नींचउवाचब्राह्मणस्तदा ॥ अनयोरेकतरं
ग्राह्यंत्वयापुष्पंफलाप्तये ॥ २२ ॥ तयाचमनसिधृत्वापुत्रश्चैवभवेन्मम ॥ तदाचस्वामिनायच्चधृतंपुष्पंसमेष्यतु ॥
॥ २३ ॥ इत्युक्त्वाचतयातत्रनमस्कृत्यशिवंतदा ॥ नत्वाचाऽग्निंपुनःप्रार्थ्यगृहीतंपुष्पमेकतः ॥ २४ ॥ पुरुषेणचिंतितं
यच्चतद्गृहीतंतयानहि ॥ तद्दृष्ट्वापुरुषश्चैवनिश्वासंपर्यमोचयत् ॥ २५ ॥ निर्मितंचेश्वरेणैवकथंचैवाऽन्यथाभवेत् ॥ आ
शांत्यजप्रियेत्वंचपरिचर्यांहरेःकुरु ॥ २६ ॥ इत्युक्त्वातुस्वयंविप्रआशांपरिविहायच ॥ धर्मकार्यरतःसोऽभूद्भगवद्ध्या
नतत्परः ॥ २७ ॥ इयंचैवाऽऽग्रहंनैवमुमोचपुत्रकाम्यया ॥ मयिपुत्रोनचाऽस्त्येवअन्यांकुरुमदाज्ञया ॥ २८ ॥ त
स्यांभविष्यतिनूनंपुत्रश्चैवनसंशयः ॥ तयैवप्रार्थितःसोवैह्युवाचसुप्रियांतदा ॥ २९ ॥ त्वदीयंचमदीयंचतदादुःखंग
तंध्रुवम् ॥ तस्मात्त्वंधर्मविघ्नंचसांप्रतंमाकुरुप्रिये ॥ ३० ॥ इत्येवंवारितासाचस्वभ्रातुःपुत्रिकांतदा ॥ कन्यांचाऽऽनी
यभर्तारंवृणुह्येनांनसंशयः ॥ ३१ ॥ इदानींवदसित्वंमेप्रियेयंचततःपुनः ॥ पुत्रसूश्चयदास्याद्वैतदास्पर्द्धांकरिष्यसि ३२

पुत्रेणपारलौकिकंकार्यंभवेदितिबुद्ध्यापतिंप्रत्याह ॥ मयीति ॥ अन्यांपत्नीं ॥ मदाज्ञयेति ॥ अनेनपुनःसपत्नीकरणेप्रतिबंधोनास्तीतिसूचितम् ॥ २८ ॥ ॥ २९ ॥
तथापिसतदीयंवचोनैवांगीचकारेत्याह ॥ त्वदीयमिति ॥ तदापत्न्यंतरास्वीकारेगतंनष्टंभवेदितिशेषः ॥ आवयोर्धर्माचरणमात्रेणेतिभावः ॥ अतोधर्मरक्षणा
र्थमेवतांप्रत्याह ॥ तस्मादिति ॥ ३० ॥ कन्यांविवाहयोग्याम् ॥ भर्तारंसुधर्माणंअब्रवीदितिशेषः ॥ किमब्रवीत्तदाह ॥ वृणिवति ॥ ३१ ॥ ततःसआह ॥
इदानीमिति ॥ इयंमेप्रियातवभ्रातृपुत्रीसंप्रत्येवंवदसिचेदपिसपत्न्याःपुत्रप्रसवानंतरंतवेदृशीबुद्धिर्नस्थास्यतीतिभावः ॥ ३२ ॥ ॥

सास्वबुद्धिस्थैर्यंदर्शयति ॥ इत्युक्तेति ॥ वचइति ॥ आहेतिशेषः ॥ तदेवाह ॥ प्रियेति ॥ साघुश्मानाम्नीभ्रातृपुत्र्यपिज्येष्ठतमाभगिनीवमत्प्रियाभवेदित्यर्थः ॥ ३३ ॥ कार्यमिति ॥ विवाहरूपंकार्यंकर्तव्यमित्यर्थः ॥ सुधर्मापिमनस्थैर्यंपरित्यज्यविवाहमकरोदित्याह ॥ सोपीति ॥ गृहीतापरिणीता ॥ सुधर्मणेतिशेषः ॥ सोपि ॥ उवाचगृहीताप्रियेतिपाठांतरम् ॥ ३४ ॥ परिणाय्यपरिणीय ॥ तांघुश्मां ॥ सुदेहांप्रतिसुधर्माह ॥ त्वदीयामिति ॥ हेअनघेइमांघुश्मांत्वदीयामहंजानामित्वमपीयंमदीयेतिबुध्यापोष्यारक्षणीयेतितांसुदेहांप्रार्थयामासेत्यर्थः ॥ ३५ ॥ सःसुधर्मा ॥ सुदेहायथोक्तमकरोदित्याह ॥ साचेति ॥ पर्यतिष्ठत्पर्य

इत्युक्तासावचस्तत्रप्रियाज्येष्ठतमाभम ॥ घुश्मानामास्वसाविप्रह्यस्यादास्यमहंपुनः ॥ ३३ ॥ करिष्यामिनसंदेहस्त्वयाकार्यंसुनिश्चितम् ॥ इत्येवंप्रार्थितःसोऽपिचबालगृहीताप्रिया ॥ ३४ ॥ परिणाय्यततस्तांतुत्वदीयामितितांपुनः ॥ प्रार्थयामासधर्मात्माइयंपोष्यालयाऽनघे ॥ ३५ ॥ उक्त्वैवंसचकाराशुधर्मसंग्रहमात्मनः ॥ साचाऽपिभ्रातुःपुत्रींचदास्यवत्पर्यतिष्ठत ॥ ३६ ॥ कनिष्ठाचैवयापत्नीस्वाम्यनुज्ञामवाप्यच ॥ पार्थिवान्साचकाराशुनित्यमेकोत्तरंशतम् ॥ ३७ ॥ विधानपूर्वकंतच्चह्युपचारसमन्वितम् ॥ कृत्वासाप्राक्षिपत्तत्रतडागेनिकटेस्थिते ॥ ३८ ॥ विसर्ज्यपुनरेवाऽऽशुपूजांकृत्वाविधानतः ॥ एवंजातेतदाकालेलिंगंलक्षमभूत्तदा ॥ ३९ ॥ कृपयाचशिवस्यैवपुत्रस्तस्यामजायत ॥ सुंदरःसुभगश्चैवकल्याणगुणभाजनः ॥ ४० ॥ तंदृष्ट्वापरमप्रीतोब्राह्मणोधर्मवित्तमः ॥ अनासक्तःसुखंभेजेज्ञानधर्मपरायणः ॥ ४१ ॥ सुदेहातावदस्यांतुस्पर्द्धांचैवचकारसा ॥ प्रथमंशीतलंतस्याहृदयंह्यासिवत्पुनः ॥ ४२ ॥ तदनंतरंचयज्जातंश्रूयतामृषिसत्तमाः ॥ पुत्रंदृष्ट्वाकनिष्ठायाज्येष्ठादुःखमुपागता ॥ ४३ ॥ सूतउवाच ॥ सर्वेपुत्रप्रसूंचैवप्रशंसंतिनिरंतरम् ॥ नसह्यतेतयातच्चरूपंचैवशिशोरथ ॥ ४४ ॥ सुदेहातनयंदृष्ट्वाहृदयंचाऽग्निसंयुतम् ॥ एतस्मिन्नंतरे विप्राःकन्यांदातुंसमागताः ॥ ४५ ॥ ॥ ॥ ॥

चरत् ॥ ३६ ॥ ३७ ॥ तत्पार्थिवलिंगपूजनम् ॥ प्राक्षिपल्लिंगमितिशेषः ॥ ३८ ॥ ३९ ॥ तस्यांघुश्मानाम्न्याम् ॥ ४० ॥ तंपुत्रं ॥ अनासक्तइति ॥ पुत्रादिष्वपिपरमासक्तिशून्यइत्यर्थः ॥ पुत्रमित्रकलत्रेषुसक्ताःसीदंतिजंतवः ॥ सरःपंकांतरेमग्नाजीर्णावनगजाइवेत्युक्तेरितिभावः ॥ अतएवाह ॥ ज्ञानधर्मपरायणइति ॥ ४१ ॥ सुधर्मणाबोधितापिसास्त्रीस्वभावात् विपरीतमेवाकरोदित्याह ॥ सुदेहेति ॥ ४२ ॥ ४३ ॥ रूपंसौंदर्यम् ॥ ४४ ॥ अग्निसंयुतंदुःखाग्नितप्तंअकरोदितिशेषः ॥ दातुमिति ॥ सुधर्मपुत्रायेतिशेषः ॥ ४५ ॥ ॥ ॥ ॥

तस्यपुत्रस्य ॥ ४६॥ बांधवाअपिघुश्मामेवश्रेष्ठाममन्यंतेत्याह ॥ सर्वइति ॥ तत्घुश्मायांसंबंधिकृतसत्करणं ॥ ४७॥ वधूंस्नुषां ॥ उत्संगइति ॥ स्थितावितिशेषः ॥प्रियाभ्यांभार्याभ्यां॥सुदेहाद्वद्रतकपटाज्ञानेनप्रियाभ्यामित्युक्तं ॥ ४८॥ चलंतींगुरुजनशुश्रूषांकुर्वतींवधूंस्नुषां ॥ ४९॥ तदानींघुश्माज्येष्ठामसांत्वयदित्याह ॥ घुश्मेति ॥ ५० ॥ ज्येष्ठामिति ॥ वधूःज्येष्ठांसुदेहांश्वश्रूतुल्याममन्यतेत्यर्थः ॥ सुधर्मापिसुदेहामेवश्रेष्ठाममन्यतेत्याह ॥ भर्तेति ॥ ५१ ॥ तथापिसुदेहाविमनस्कैवाभवदित्याह ॥ तथापीति ॥ अंतर्मलवतीकपटयुक्तांतःकरणा ॥ ५२ ॥ तदासाकिमप्यचिंतयदित्याह ॥ दुःखेति ॥ हृदयाग्निःहृदयसंतापः ॥ आप्नुया

विवाहंतस्यचात्रैवचकारविधिवत्पुनः ॥ सुधर्माघुश्मयासार्धमानंदंपरमंगतः ॥ ४६ ॥ सर्वेसंबंधिनस्तस्याघुश्मायामानमादधुः ॥ तद्दृष्ट्वाचसुदेहावैमनसिज्वलितातदा ॥ ४७ ॥ गृहमागत्यसुधर्मावैवधूंपुत्रंमुनीश्वराः ॥ उत्संगेदर्शयामासप्रियाभ्यांहर्षयन्निव ॥ ४८ ॥ मनसिहर्षिताघुश्मासुदेहादुःखमागता ॥ गृहेचलंतींसाऽऽलोक्यवधूंपुत्रंसुदेहिका ॥ ४९ ॥ अत्यंतंदुःखमापन्नाहाहताऽस्मितदाऽपतत् ॥ घुश्माऽवदद्वधूश्चेयंत्वदीयानमदीयिका ॥ ५० ॥ पुत्रश्चैववधूश्चैवश्वश्रूंज्येष्ठाममन्यत ॥ भर्ताचैवतथाज्येष्ठांमेनेनैवकनिष्ठिकाम् ॥ ५१ ॥ तथाऽपिचतदाज्येष्ठाह्यंतर्मलवतीह्यभूत् ॥ तदाविचारयामासदुःखशांतिःकथंभवेत् ॥ ५२ ॥ मदीयोहृदयाग्निश्चघुश्मानेत्रजलेनच ॥ शांतोभविष्यतिनूनंनाऽन्यथाशांतिमाप्नुयात् ॥ ५३ ॥ एवंचमारयाम्यद्यसुप्रियंप्रियवादिनम् ॥ अग्रेभाविभवेदेवनिश्चयंपरमंगता ॥ ५४ ॥ कदर्याणांविचारश्चकृत्याकृत्येभवेन्नहि ॥ एकस्मिन्दिवसेज्येष्ठासुप्तंपुत्रंवधूयुतम् ॥ ५५ ॥ छेदयामासचांऽगेषुगृहीत्वाछुरिकांचसा ॥ सर्वांगखंडमादायरात्रौसरसिप्राक्षिपत् ॥ ५६ ॥ यत्रक्षिप्तानिलिंगानिघुश्मयानित्यमेवच ॥ तत्रक्षिप्त्वासमायातासुष्वापसुखतांगता ॥ ५७ ॥ प्रातश्चैवसमुत्थायघुश्मानित्यंतदाऽकरोत् ॥ सुधर्माचस्वयंश्रेष्ठोनित्यकर्मसमाचरत् ॥ ५८ ॥ स्नानादिकंतदातौचकृत्वानित्यंप्रचक्रतुः ॥ एतस्मिन्नंतरेसाचज्येष्ठाकार्यंगृहस्यच ॥ ५९ ॥

दिति ॥ हृदयाग्निरितिसंबध्यते ॥ ५३ ॥ सुदेहाघुश्मानेत्रजलोपायमचिंतयदित्याह ॥ एवंचेति ॥ सुप्रियंघुश्मापुत्रं ॥ ५४ ॥ अनृतंसाहसंमायेत्यादिपूर्वोक्तंस्मरन्नाह ॥ कदर्याणामिति ॥ कुत्सितांतःकरणानामित्यर्थः ॥ सुदेहायथाचिंतितमेवाकरोदित्याह ॥ एकस्मिन्निति ॥ ५५ ॥ ५६ ॥ कस्मिन्सरसीतितदाह ॥ यत्रेति ॥ लिंगानिपार्थिवलिंगानिक्षिप्तानिविसृष्टानि ॥ ५७ ॥ नित्यंलिंगपूजनरूपंनित्यकर्म ॥ ५८ ॥ तौघुश्मासुधर्माणौ ॥ ५९ ॥ ॥

॥ ६० ॥ ६१ ॥ देहखंडकैरिति ॥ युक्तेतिशेषः ॥ सुदेहादुःखोपधिंकरोति ॥ हाहतेति ॥ हेशुचिव्रतेस्नुषे ॥ शुचिव्रतेइत्यनेनस्नुषायांपुत्रमारणशंकाना स्तीतिसूचितं ॥ ६२ ॥ कारयामासेति ॥ अत्रणिचास्वस्यादुःखाभावेपिवलात्कारेणमनसाकारयामासेतिसूचितं ॥ ॥ ६३ ॥ शिवध्यानरतातद्दुःखंश्रुत्वा पिघुश्मास्थिरचित्तैवाभवदित्याह ॥ घुश्मेति ॥ ६४ ॥ मनइति ॥ तस्याःघुश्मायाःपुत्रविषयेमनःउत्कंठितमपिनैववभूवेत्यर्थः ॥ ६५ ॥ तयाघुश्मया ॥ ॥ ६६ ॥ घुश्मयायेनयज्ज्ञात्वादुःखंनकृतंतदाह ॥ येनैवेति ॥ अयमीश्वरःयेनैवहेतुनाप्रार्थितःसहेतुर्भवत्येवेत्यर्थः ॥ तस्यरक्षणेननतात्पर्यंचेन्नरक्षेदित्याह ॥

चकाराऽऽनंदयुक्ताचह्यग्निःशांतोऽभवत्तदा ॥ प्रातःकालेसमुत्थायवधूःशय्यांविलोक्यच ॥ ६० ॥ रुधिरार्द्रांदेहखंडै र्युक्तांदुःखमुपागता ॥ श्वश्रूंनिवेदयामासपुत्रस्तेचकुतोगतः ॥ ६१ ॥ शय्याचरुधिरार्द्रावैदृश्यतेदेहखंडकैः ॥ हाह ताऽस्मिकृतंकेनदुष्टंकर्मशुचिव्रते ॥ ६२ ॥ ज्येष्ठादुःखंतदाऽऽपन्नाहाहताऽस्मिकिलेतिच ॥ दुःखंचकारयामासमन सिहर्षसंयुता ॥ ६३ ॥ घुश्माऽपितत्तदातस्यावध्वादुःखंनिशम्यच ॥ नचचालतदातस्मान्नित्यंपार्थिवपूजनात् ॥ ॥ ६४ ॥ मनश्चैवोत्सुकंनैवजातंतस्यामुनीश्वराः ॥ भर्त्ताऽपिचतथैवाऽऽसीद्यावद्व्रतविधिर्भवेत् ॥ ६५ ॥ मध्यान्हेचै वसंजातेदृष्ट्वाशय्यांभयावहां ॥ नतथापितयातत्रकृतंदुःखंमुनीश्वराः ॥ ६६ ॥ येनैवप्रार्थितश्चाऽयंसोवैसंजायतेत दा ॥ यदिनरक्षिताचैवईश्वरःप्रभुरेवच ॥ ६७ ॥ मालाकारइवाऽसौवैजातान्युंक्तेवियुनक्तिच ॥ अत्रैवचिंतयामेऽद्य किंस्यात्कृत्वाविचार्यच ॥ ६८ ॥ नचकारतदादुःखंशिवेधैर्यमुपागता ॥ पार्थिवांश्चगृहीत्वावैजगामसरसस्तटे॥६९॥ क्षिप्त्वाचपार्थिवांस्तत्रपरावर्तेतसातदा ॥ तदापुत्रस्तडागस्थोदृश्यतेस्मतटेतया ॥ ७० ॥ मातरेहिमिलिष्यामिमृत श्चजीवितोह्यहम् ॥ तंदृष्ट्वाहर्षितानैवदुःखितानपुरायथा ॥ ७१ ॥ ॥ ॥

यदीति ॥ प्रभुःस्वतंत्रः ॥६७॥ अतःसृष्ट्यादिकंक्रीडारूपमेवभगवतइत्यत्रदृष्टांतमाह ॥ मालाकारइति ॥ असौईश्वरःजातानांपुरुषाणांसंयोगवियोगौतत्त त्पुरुषादृष्टानुसारेणैवस्वेच्छयाकरोतियथामालाकारःपुष्पाणामित्यर्थः ॥ कृत्वेति ॥ चिंतांकृत्वापिकिंस्यादित्यर्थः ॥ ६८ ॥ एवंविचार्यसादुःखंनाकरोदि त्याह ॥ नेति ॥ यतःशिवेशिवविषयेशिवकृपानिश्चयेनधैर्यमुपागताप्राप्ता ॥ ६९ ॥ तदानींशिवस्तस्यांप्रसादमकरोदित्याह ॥ तदेति ॥ तयाघुश्मया ॥७०॥ मृत्वाजीवितःपुत्रस्तामाह ॥ मातरिति ॥ घुश्मायास्तदानींहर्षोपिनाभवदित्याह ॥ तमिति ॥ तंपुत्रम् ॥ दुःखितानेति ॥ हर्षशोकयोःसमत्वादितिभावः ॥७१॥

इदानींशिवप्रसादमाह ॥ तदेति ॥ शिवस्तांप्रत्याह ॥ प्रसन्नइति ॥ दुष्टयासुदेहया ॥ अयंत्वत्पुत्रः॥७२॥एतांसुदेहाम् ॥ घुश्माशिवोक्तंनांगीचकारेत्याह॥रक्षणी
येति॥यतोभगिनीतुल्या७३शिवआह॥अपकारइति ७४ घुश्माह॥तवेति॥तत्पापंसुदेहापापम्॥यद्वासूतआह॥इदानीमिति॥तत्पापंपूर्वकृतंपापं७५अपकार
इत्यादियदुक्तंतत्रघुश्माह ॥ अपकारिष्विति ॥७६॥ घुश्माशिवंप्रार्थयते ॥ लोकानामिति ॥७७॥ तच्छ्रुत्वाशिवोऽतीवप्रसन्नोबभूवेत्याह ॥ इत्युक्तइति ॥ घुश्म
येतिशेषः ॥ तस्यैशिवोवरांतरंददावित्याह ॥ अन्यदिति ॥ ७८ ॥ वचनमिति ॥ शिवस्येतिशेषः ॥ सायदुवाचतदाह ॥ यदीति ॥७९॥ शिवस्तांयदुवाचतदाह ॥

तदाशिवश्चसंतुष्टोज्योतीरूपोमहेश्वरः ॥ प्रसन्नोऽस्मिवरंब्रूहिदुष्टयामारितोह्ययम् ॥ ७२ ॥ एतांचमारयिष्यामि
त्रिशूलेनवरानने ॥ घुश्माचैनंवरंवव्रेरक्षणीयास्वसामम ॥ ७३ ॥ अपकारःकृतस्तुभ्यमुपकारःकथंत्वया ॥ क्रियते
हननीयाचपापिष्ठादुष्टकारिणी ॥ ७४ ॥ तवदर्शनमात्रेणपातकंनैवतिष्ठति ॥ इदानींचैवतांदृष्ट्वातत्पापंभस्मसाद्व्र
जेत् ॥ ७५ ॥ अपकारिषुयश्चैवह्युपकारंकरोतिवै ॥ तस्यदर्शनमात्रेणपातकंनैवतिष्ठति ॥ ७६ ॥ इतिश्रुतंमयाचै
ववेदविद्भिःपुरातनैः ॥ लोकानांचैवरक्षार्थंत्वयास्थेयंसदाशिव ॥ ७७॥ इत्युक्तेतुतदातत्रप्रसन्नःपुनरेवच ॥ अन्यच्च
व्रियतांघुश्मेददामिचहितंतव ॥ ७८ ॥ सोवाचवचनंश्रुत्वायदिदेयोवरस्त्वया ॥ लोकानांचैवरक्षार्थंत्वयास्थेयंसदा
शिव ॥ ७९ ॥ तदोवाचशिवस्तत्रतवनाम्नासुमध्यमे ॥ घुश्मेशंसुप्रसिद्धंवैनाममेजायतांशुभम् ॥ ८० ॥ इदंसर
स्तुलिंगानामालयंसमजायत ॥ तस्माच्छिवालयंनामप्रसिद्धंभुवनत्रये ॥ ८१ ॥ तववंशेसुतंचैकंपुरुषावधिसुव्रते ॥
ईदृशाःपुत्रकावंशेभविष्यंतिनसंशयः ॥ ८२ ॥ साग्निकाःसधनाश्चैवह्यायुष्मंतोविचक्षणाः ॥ विद्यावंतःसुदाराश्चस्व
र्गमुक्तिफलाश्चते ॥८३॥ ईदृशोवंशविस्तारोभविष्यतिसुशोभनः ॥ इत्युक्त्वाचशिवस्तत्रलिंगरूपोऽभवत्तदा ॥८४॥

तवेति ॥ जायतामिति ॥तस्यानाम्नास्वप्रसिद्धीकरणेनस्वस्यतत्तादात्म्यंशिवेनदर्शितम् ॥८०॥ लिंगप्रक्षेपस्थानसरःसोयन्नामप्रसिद्धंतदाह ॥ इदमिति ॥ शिवा
लयमिति ॥ शिवालयाख्यंसरइतिप्रसिद्धमित्यर्थः ॥८१॥ शिवोवरांतरंददावित्याह ॥ तवेति ॥ पुरुषावधिजगतिपुरुषस्थितिपर्यंततववंशेएकंसुतंदास्यामी
तिशेषः ॥ एकमितिसंततिविच्छेदाभावोपलक्षणं॥तेनअनेकेपिभविष्यंतीत्याह ॥ ईदृशाइति ॥ एतत्पुत्रसदृशाइत्यर्थः ॥८२॥ साग्निकाःअग्निहोत्रिणःवि
चक्षणाःविचारशीलाः ॥ ईदृशाएवफलभाजोभवंतीत्याह ॥ स्वर्गेति ॥ ८३ ॥ ८४ ॥ ॥ ॥

शिवालयामिति ॥ विख्यातमितिविपरिणामेनसंबंधः ॥ तदाघुश्मासुधर्माणौसुदेहायाः पापंप्रायश्चित्तेनापानुदतामित्याह ॥ सुधर्मेति ॥ पराक्रम्येति ॥ बला त्कृत्येत्यर्थः ॥ ८४ ॥ प्रदक्षिणामिति ॥ शिवस्याशिवायाश्चप्रदक्षिणांसुदेहांकारयामासतुरितिपूर्वेणसंबंधः ॥ सुदेहामित्यत्रद्वकोरन्यतरस्यामितिकर्मत्वम् ॥ ८६ ॥ तदानींसुदेहासहिताःसर्वेसुखिनोबभूवुरित्याह ॥ पूजामिति ॥ शिवपूजांकृत्वापरस्परंसमाश्वास्यमिलित्वाएकमतीभूयआभ्यंतरंदोषंपरित्यज्यसुखं लेभिरइतिसंबंधः ॥ ८७ ॥ एवंघुश्मेशाख्यज्योतिर्लिंगंप्रसिद्धंतद्दर्शनादेःफलमाह ॥ ईदृशमिति ॥ ८८ ॥ एवंज्योतिर्लिंगाख्यानमुपसंहरति ॥ इतीति ॥ कारणंप्रादुर्भावकारणम् ॥ ज्योतिषांलिंगानिज्योतिर्मयानिलिंगानि ॥ यथाश्रुतमिति ॥ अनेनस्वकपोलकल्पनाशंकानिरस्ता ॥ ८९॥ ९०॥ ऋषीणांश्रवणे

घुश्मेशोनामविख्यातोसरश्चैवशिवालयं ॥ सुधर्माचैवघुश्माचसुदेहांचशिवस्यच ॥ ८५ ॥ शतमेकोत्तरंचैवपराक्रम्य तुवैतदा ॥ प्रदक्षिणांशिवायाश्चकारयामासतुस्तदा ॥ ८६ ॥ पूजांकृत्वासमाश्वास्यमिलित्वाचपरस्परम् ॥ हित्वाचां ऽतर्मलंतत्रसुखंचलेभिरेहिते ॥ ८७ ॥ ईदृशंचैवलिंगंचदृष्ट्वापापैःप्रमुच्यते ॥ सुखंसंवर्द्धतेनित्यंशुक्लपक्षेयथाशशी ॥ ॥ ८८ ॥ इतितेचसमाख्यातंलिंगानांकारणंमया ॥ ज्योतिषांयानिलिंगानिकथितानियथाश्रुतं ॥ ८९ ॥ यच्छ्रुत्वा सर्वपापेभ्योमुच्यतेमानवःक्षणात् ॥ इतिश्रुत्वावचस्तस्यसूतस्यचमुनीश्वराः ॥ ९० ॥ ऊचुस्तस्मैपुनस्तत्रलोकानांहि तकाम्यया ॥ ऋषयऊचुः ॥ अन्यान्यपिचरित्राणिशिवस्यपरमात्मनः ॥ ९१ ॥ कथयत्वंप्रसादेननतृप्तावयमेवहि ॥ तस्मात्त्वंचविशेषेणध्यात्वादेवंपरंमुदा ॥ ९२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांज्योतिर्लिंगवर्णनंनामाष्टपंचा शत्तमोऽध्यायः ॥ ५८ ॥ छ ॥ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाश्चरितंपरमात्मनः ॥ आकाशस्यचताराणांभू मेश्चरेणूनांतथा ॥ १ ॥ ॥ ॥ ॥ ॥

नद्यातिर्नबभूवेत्याह ॥ अन्यानीति ॥ ९१ ॥ ध्यात्वेति ॥ परंपरमेश्वरंदेवंध्यात्वान्यान्यपिशिवचरित्राणिकथयेतिसंबंधः ॥ ९२ ॥ इतिश्रीशिवमहापुरा णज्ञानसंहिताटीकायांसारबोधिन्यांघुश्मेशमहिमवर्णनंनामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ओंनमःशिवाय ॥ हरिर्वराहरूपेणहिरण्याक्षंजघानह ॥ नारसिंहेणरूपेणहिरण्यकशिपुंतथा ॥ १ ॥ हंतुंस्वद्वेषिणंचक्रेप्रह्लादसुखवर्धनः ॥ एतत्कथानकंदिव्यंनवपंचाशईर्यते ॥ २ ॥ एवंद्वादशज्योतिर्लिंगमाहात्म्य मुक्त्वानृसिंहाख्यानंवक्तुमुपक्रमते ॥ श्रूयतामिति ॥ तत्रादौभगवतोगुणानामपरिछिन्नत्वमाह ॥ आकाशस्येति ॥ रेणूनांपरमाणूनाम् ॥ १ ॥

आसारकाणांधारासंपातबिंदूनांसुकल्पैःशोभनकल्पनाभिः ॥२॥ क्रुद्धइति ॥ हिरण्यकशिपुंप्रतीतिशेषः ॥ विरतःनिवृत्तः ॥३॥ शारभंशरभसंबंधि ॥ तंशरभरूपिणंशिवम् ॥ लीनतांलयंगतोनृसिंहइतिसंबध्यते ॥ ४ ॥ सर्वेदेवादयोपित्रस्यंतिस्म ॥ ५ ॥ नारायणस्यनृसिंहाद्यवतारधारणेकारणमाह ॥ लक्ष्म्याइति ॥ युद्धमिच्छा युद्धंप्रतीच्छा ॥ अतोलक्ष्मीर्नारायणंप्रत्याह ॥ कोमलेनेति ॥ ६ ॥ इत्युक्तइति ॥ लक्ष्म्येतिशेषः ॥ प्रभुणाविष्णुना ॥ ७ ॥ तदानींकाकतालीयन्यायेनयुद्धप्रसंगआगतइत्याह ॥ जयइति ॥ जयविजयौद्वारपालौ ॥ कुमारैःसनकादिभिः ॥ ८ ॥ तेषामिति ॥ तेषांकुमारादीनांकोलाहलेजातेभगवानागत्यद्वा

वृष्टेरासारकाणांचसुकल्पैश्चकदाचन ॥ संख्याविशक्यतेकर्तुंनगुणानांशिवस्यच ॥ २ ॥ तथाऽपिचयथाबुद्धिकथयामियथाश्रुतम् ॥ नृसिंहश्चयदाक्रुद्धःक्रोधाच्चविरतोनहि ॥ ३ ॥ तदाशिवेनदेवानांहितार्थंरूपमद्भुतम् ॥ शारभंचधृतंतत्रतंदृष्ट्वालीनतांगतः ॥ ४ ॥ शिवाद्भयंचसंप्राप्यसर्वेत्रस्यंतिवैतदा ॥ ऋषयऊचुः ॥ चरितंचनृसिंहस्यवक्तुमर्हसिसुव्रत ॥ ५ ॥ सूतउवाच ॥ लक्ष्म्याद्रष्टुंसमुत्पन्नायुद्धमिच्छामुनीश्वराः ॥ कोमलेनशरीरेणकथंयुद्धंचिकीर्षसि ॥ ६ ॥ इत्युक्तेप्रभुणाऽप्युक्तंदर्शयिष्यामिसुव्रते ॥ एकस्मिन्दिवसेविष्णुर्विचारेतत्परोऽभवत् ॥७॥ केनयुद्धंप्रकर्तव्यंमयाचैवंविचार्यच ॥ जयश्चविजयश्चैवकुमारैःशापितौतदा ॥ ८ ॥ तेषांकोलाहलेजातेभगवान्वाक्यमब्रवीत् ॥ आगत्यद्वारपालौचकुमारान्श्रूयतांपुनः ॥ ९ ॥ अयुक्तंचकृतंसर्वैर्जातंनैवाऽन्यथाभवेत् ॥ कुमारान्पुनरेवाहअनुग्राह्याविमौशुभौ ॥ १० ॥ कुमाराऊचुः ॥ भक्तिभावंसमासाद्यसप्तभिर्जन्मभिरिह ॥ वैरभावेतथात्रिभिरिदंस्थानमवाप्स्यथ ॥ ॥ ११ ॥ इत्युक्तेचतदातैस्तुविचार्यशीघ्रतावरा ॥ यथेच्छाचहरेरासीद्वृत्तंताभ्यांतथापुनः ॥ १२ ॥ ॥

रपालौकुमारांश्ववाक्यमब्रवीदित्यन्वयः ॥ ९ ॥ यदब्रवीत्तदाह ॥ अयुक्तमिति ॥ सर्वैःभवद्भिः ॥ तदानींभगवान्सनकादीन्प्रार्थयतेत्याह ॥ कुमारानिति ॥ इमौजयविजयौ ॥ १० ॥ कुमाराःशापोद्धारमकुर्वन्नित्याह ॥ भक्तिभावमिति ॥ भक्तिरूपंभावमित्यर्थः ॥ वैरभावइति ॥ विरोधइत्यर्थः ॥ त्रिभिरिति ॥ जन्मभिरित्यनुषज्यते ॥ इदंस्थानंवैकुंठाख्यम् ॥ ११ ॥ इत्युक्तइति ॥ विष्णुनेतिशेषः ॥ तैःविष्ण्वादिभिः ॥ विचार्येति ॥ अवतारादिकंकर्तुंशीघ्रतैववरेतिविचार्यस्थितमितिशेषः ॥ हरीच्छामनुसृत्यैवजयविजयाभ्यांकृतमित्याह ॥ यथेति ॥ वृत्तंकृतम् ॥ १२ ॥ ॥

त्रिभिरिति ॥ त्रिभिरवतारैरीश्वरेणसहविरोधेसंपादितेपितत्स्वस्थानप्रापणंवरंनतुदीर्घकालेनसौम्यभक्तिमार्गेणेतितात्पर्यम् ॥ पतितौप्राप्तौजयविजयौ ॥ १३ ॥ केनरूपेणप्राप्तौतदाह ॥ अवतीर्णाविति ॥ तयोर्नामनीआह ॥ हिरण्येति ॥ १४ ॥ स्वयंविष्णुः ॥ अवतारांतरमाह ॥ पुनरिति ॥ अन्यभवेअन्यजन्मनि ॥ १५ ॥ तावेवहिरण्यकशिपुहिरण्याक्षावेव ॥ कुमारइति ॥ कुमारोविभीषणोऽभवादित्यग्रिमेणसंबंधः ॥ १६ ॥ परेअन्येदेवाश्चवानरादयोबभूवुरित्यर्थः ॥ १७ ॥ तृतीयावतारमाह ॥ शिशुपालेति ॥ शिशुपालदंतवक्त्रौदमघोषस्यक्षत्रियस्यगृहेअवतीर्णावित्युत्तरेणसंबंधः ॥ १८ ॥ कृष्णेइति ॥ नृसिंहएवकृष्णोजातइत्यर्थः ॥

त्रिभिरेवावतारैश्चवैरभावेऽपितद्वरं ॥ इत्युक्त्वापतितौतत्रकश्यपस्यगृहेतदा ॥ १३ ॥ अवतीर्णौचदैत्यौवैप्रसिद्धौतौमहाबलौ ॥ हिरण्यकशिपुश्चैवहिरण्याक्षोमहाबलः ॥ १४ ॥ स्वयंचैवनृसिंहोऽपिकुमाराभक्तिसंयुताः ॥ प्रल्हादाद्यास्तदाजातांपुनरन्यभवेयदा ॥ १५ ॥ रावणःकुंभकर्णश्चतावेवचबभूवतुः ॥ रामश्चैवनृसिंहोपिकुमारश्चतदाऽभवत् ॥ १६ ॥ विभीषणःपरेयेचतएवपुरतोऽभवन् ॥ अन्येचबहवोदेवाःसंबभूवुर्मुनीश्वराः ॥ १७ ॥ शिशुपालदंतवक्त्रौभगवद्वेषतत्परौ ॥ दमघोषगृहेतत्रअवतीर्णौमहाबलौ ॥ १८ ॥ नृसिंहोऽपितदाकृष्णोह्यक्रूराद्याःकुमारकाः ॥ चरित्रंतुनृसिंहस्यश्रूयतांपापहारकम् ॥ १९ ॥ हिरण्याक्षश्चबालोवैक्रीडार्थंसूर्यमानयत् ॥ सिंहंचदंतिनंचैवआरुह्याऽऽखेलयत्तदा ॥ २० ॥ देवानांदुःखदानार्थंपृथिवीमाहरत्तदा ॥ मुखेधृत्वाचतांसोवैश्वामुखेपिष्टपिंडिकाम् ॥ २१ ॥ यथागतोजलेतस्मिन्ब्रह्मादुःखमुपागतः ॥ ध्यानंचक्रेतदाविष्णोःस्तुतिंकुर्वन्मुहुर्मुहुः ॥ २२ ॥ समुत्पन्नस्तदाविष्णुर्नासारंध्राच्चब्रह्मणः ॥ वाराहंरूपमास्थायक्रमेणवृद्धितांगतः ॥ २३ ॥ ततस्तुतश्चतेनैवगतश्चैवजलेतदा ॥ नारदंचतदाऽपश्यत्संध्ययासंयुतंहरिः ॥ २४ ॥ ॥ ॥ ॥

अक्रूराद्याइति ॥ कुमारकाःअक्रूरादयोभक्ताजाताइत्यर्थः ॥ इदानींविशिष्यनृसिंहवराहाख्यानमाह ॥ चरित्रमिति ॥ १९ ॥ हिरण्याक्षप्रतापमाह ॥ बालइति ॥ २० ॥ क्रमेणहरिणासहविरोधमकरोदित्याह ॥ देवानामि ॥ आहरदिति ॥ आहृत्यनीतवानित्यर्थः ॥ कथंनीतवांस्तत्राह ॥ मुखइति ॥ तांपृथिवीम् ॥ तत्रदृष्टांतमाह ॥ श्वेति ॥ २१ ॥ तांगृहीत्वाक्कगतस्तदाह ॥ यथेति ॥ २२ ॥ तदाविष्णुर्देवदुःखपरिहारायप्रादुर्बभूवेत्याह ॥ समुत्पन्नेति ॥ २३ ॥ तेनैवब्रह्मणेव ॥ २४ ॥ ॥ ॥ ॥ ॥

२५ विष्णुर्नारदंप्रतियदुवाचतदाह ॥ यावदिति ॥ तेनहिरण्याक्षेण ॥ शीघ्रजयोपायमाह ॥ तावदिति ॥ २५ ॥ नारदोयथोक्तमकरोदित्याह ॥ ततइति ॥ २६ ॥ ऋषिणानारदेन ॥ जलेपीतावशिष्टेजलेविष्णुनायुद्धंकृतमित्युत्तरेणसंबंधः ॥ २७ ॥ पंचशतंपंचवर्षशतम् ॥ तंहिरण्याक्षं ॥ गांपृथिवीम् ॥ २८ ॥ निःससारेति ॥ तस्माज्जलादितिशेषः ॥ लयंयातःअंतर्हितःहरिःवराहरूपीविष्णुः ॥ २९ ॥ एवंस्वभ्रातृपराभवजनितदुःखपरिहारायहिरण्यकशिपुःहरिणापस्पर्धइत्याह ॥ इतीति ॥ ब्रह्मणःपरमेष्ठिनःसकाशात् ॥ ३० ॥ तत्तपःस्वरूपमाह ॥ वृक्षाइति ॥ तस्यहिरण्यकशिपोःशरीरेवृक्षाःसमुत्पन्नाःपक्षिभिश्चनीडकाःकृताइत्य

नारदोऽपितदास्तुत्वाह्याज्ञादेयाममाऽधुना ॥ वराहउवाच ॥ यावच्चयुध्यतेतेनतावज्जलविशोषणं ॥ २५ ॥ कर्तव्यंचलयाचाऽत्रइत्येवंकथ्यतेमया ॥ ततश्चांजलिनातेनजलंनीलामुखेतदा ॥ २६ ॥ पीतंचऋषिणातावद्यावद्युद्धंसमाप्यते ॥ ततश्चविष्णुनातत्रपंचवर्षशतंजले ॥ २७॥ स्थलेपंचशतंचैवकृतंयुद्धंमहात्मना ॥ तंहत्वाचततश्चैवमुखेधृत्वागांतदा ॥ २८ ॥ निःससारवराहश्चब्रह्मणेप्रददौचगाम् ॥ लयंयातोहरिस्तत्रकृत्वाकार्यंसुदुष्करम् ॥ २९ ॥ इतिदुःखविनाशायहिरण्यकशिपुस्तदा ॥ वर्षाणामयुतंतेपेब्रह्मणोवरकाम्यया ॥ ३० ॥ वृक्षाश्चैवसमुत्पन्नाःपक्षिभिर्नीडकाःकृताः ॥ शरीरेचतदातस्यविरराममपरंनहि ॥ ३१ ॥ ततोब्रह्माचदेवानांह्यनुज्ञांसमवाप्यच ॥ वरंदातुंसमायातोयत्राऽऽस्तेदितिजोऽसुरः ॥ ३२ ॥ प्रसन्नोऽस्मिवरंब्रूहिविचार्यासुरराट्तदा ॥ त्वयाचनिर्मितायांवैसृष्टौकश्चिन्नमारयेत् ॥ ३३ ॥ एतदस्तुवरंदत्वाजगामभवनंस्वकम् ॥ शोणिताख्येपुरेगत्वादैत्यानाहूयसर्वतः ॥ ३४॥ आज्ञांप्रवर्तयामासपृथिव्यांसर्वतोदिशं ॥ नकृतामारितास्तेचकृतासुरक्षिताहिते ॥ ३५ ॥ स्वर्गोपिचजितश्चैवपातालंवितलंतथा ॥ त्रैलोक्यंस्ववशेकृत्वाराज्यंचैवाऽप्यकंटकम् ॥ ३६ ॥ ॥ ॥

न्वयः ॥ तथापितेनतपोनत्यक्तमित्याह ॥ नहीति ॥ सइतिशेषः ॥ ३१ ॥ असुरःहिरण्यकशिपुः ॥ ३२ ॥ ब्रह्माऽऽगत्यतस्मैवरंदातुमाह ॥ प्रसन्नइति ॥ हिरण्यकशिपुर्विचिंत्यवरमयाचतेत्याह ॥ विचार्येति ॥ मारयेदिति ॥ मामितिशेषः ॥ ३३ ॥ एतदिति ॥ एतत्त्वयायाचितमस्तुभवतुइतिवरंदत्वाजगाम ब्रह्मेतिशेषः ॥ ततोहिरण्यकशिपुर्यदकरोत्तदाह ॥ शोणिताख्यइति ॥ ३४ ॥ नकृतेति ॥ यैराज्ञानकृतानपालितातेमारिताइत्यर्थः ॥ कृतेति ॥ यैःकृतापालितातेसुरक्षिताइत्यर्थः ॥ ३५ ॥ वितलमिति ॥ सुतलादीनामप्युपलक्षणमेतत् ॥ तदेवाह ॥ त्रैलोक्यमिति ॥ अकंटकंनिःशत्रुकम् ॥ ३६ ॥ ॥

पूर्वसंकेतानुसारेणहरिणाविरोधंकृतवानित्याह ॥ हरीति ॥ नन्वप्रमेयेणभगवताहरिणाकथंविरोधंकृतवानित्यतआह ॥ धर्मलोपेति ॥ एवंचस्वस्वधर्मपरित्यागएवहरिद्वेषइतिभावः ॥ तत्कुलइति ॥ अत्रतस्यपुत्रइतिस्पष्टमकथनेनपितृविरुद्धधर्मवत्त्वमाजन्मतस्तस्यसूचितम् ॥ ३७ ॥ तदेवव्यनक्ति ॥ रोदनइति ॥ रोदनावस्थायामपीत्यर्थः ॥ अनेनबाल्यात्प्रभृतितस्यस्थिराभक्तिःसूचिता ॥ तेनप्रल्हादेन ॥ नियोजितइति ॥ प्रल्हादइतिशेषः ॥३८॥वाद्यमानेष्विति ॥ अनेनाध्ययनार्थगमनसमयेतस्यमंगलसमारंभोदर्शितः ॥ पाठकस्यअध्यापकस्य ॥ गतइति ॥ प्रल्हादइत्यनुषज्यते ॥ आसुरीति ॥ जीविकाभंगभयादितिभावः ॥ ३९ ॥ प्रल्हादस्यभक्त्यतिशयंदर्शयति ॥ प्रल्हादेनेति ॥ ४० ॥ पाठकोयथाकथंचित्प्रल्हादंतव्द्यापारान्निवर्तयितुंप्रववृतइत्याह ॥ इदानीमिति ॥ प्रल्हादपित्रादिकंप्रतीयमुक्तिः ॥ तथापिप्रल्हादोहरिस्मरणंनजहावित्याह ॥ यदेति ॥ हरिरिति ॥ हरिरेवस्मर्तव्यइत्यत्रवीदितिशेषः ॥ ४१ ॥ पुनःपिता

चकारहरिविद्वेषीधर्मलोपपरायणः ॥ प्रल्हादोऽपिसमुत्पन्नस्तत्कुलेहरिसेवकः ॥ ३७ ॥ रोदनेपितदातेननत्यक्तंहरिसेवनम् ॥ पंचवर्षेतदाजातेपाठनार्थंनियोजितः ॥ ३८ ॥ वाद्यमानेषुतूर्येषुपाठकस्यगृहंगतः ॥ पाठकेनतदाविद्याह्यासुरीपरिपाठिता ॥ ३९ ॥ प्रल्हादेनतथाचैवनमोनारायणेतिच ॥ वारितःपाठकेनापिपपाठचपुनःपुनः ॥ ४० ॥ इदानींगम्यतांतावत्पुनर्नैवकरिष्यति ॥ यदातदातुप्रल्हादोहरिरेवनचाऽन्यथा ॥ ४१ ॥ पित्रोत्संगेचसंस्थाप्यकिमधीतंशिशोत्वया ॥ इतिपृष्टःपुनःसोऽपिनमोनारायणेतिच ॥ ४२ ॥ हाहतोऽस्मितदाश्रुत्वाकिमधीतंदुरात्मना ॥ गुरुमाहूयतत्रैवरेदुष्टशिक्षितःकथम् ॥ ४३ ॥ गुरुराहपुनस्तंचसर्वेनष्टादुरात्मना ॥ ततःपुत्रंप्रगृह्यैवकयाधुंदैत्यसत्तमः ॥ ४४ ॥ कथयामासतांदुष्टःपुत्राधीतंशृणुष्वतत् ॥ तदधीतंपुनस्तेनश्रुत्वामाताऽब्रवीदिदम् ॥ ४५ ॥ सर्वांचपृथिवींत्यक्त्वाकथंदुःखमवाप्यते ॥ त्यजदुष्टहरेर्नामह्यासुरींसमुपाश्रय ॥ ४६ ॥ ॥

यत्नमकरोदित्याह ॥ पित्रेति ॥ सोपिप्रल्हादोपिहरिस्मरणमेवाकरोदित्याह ॥ नमइति ॥ ४२ ॥ तदापितातिदुःखितोबभूवेत्याह ॥ हाहतइति ॥ गुरुंप्रत्यपिपिताक्रुद्धोबभूवेत्याह ॥ गुरुमिति ॥ ४३ ॥ गुरुःस्वापराधंपर्यहरदित्याह ॥ गुरुरिति ॥ सर्वइति ॥ सर्वेबालाइत्यर्थः ॥ नष्टाःनाशिताःदुरात्मनातवपुत्रेणेत्यर्थः ॥ तदापुत्रशिक्षांकर्तुंदैत्योभार्यामकथयदित्याह ॥ ततइति ॥ ४४ ॥ तेनेति ॥ तेनप्रल्हादेनाऽधीतंतत्हरिनामश्रुत्वामातेतिसंबंधः ॥ ४५ ॥ कयाधुःसर्वजनवदेवत्वयावर्तनीयमन्यथादुःखप्राप्तिर्भवेदित्याह ॥ सर्वामिति ॥ कथंसर्वजनोवर्ततइत्यतआह ॥ त्यजेति ॥ ४६ ॥ ॥

पुत्रस्तुदृढहरिभक्तिरेवाभवदित्याह ॥ पुत्रइति ॥ नहीति ॥ हरिभजनमितिशेषः ॥ नन्वेवंकरोषिचेत्पितुर्महाभयंभवेदित्याशंक्याह ॥ मशकस्येति ॥ द्वारमिति ॥ महागजोराज्ञाद्वारमित्यन्वयः ॥ जहातीतिशेषः ॥ ४७ ॥ वराकस्यहिरण्यकशिपुसदृशस्यक्षुद्रस्यत्यजिष्यामिकिमितिकाकुः ॥ वागादींद्रियाणांहरिभजनेनैवसाफल्यमित्याह ॥ जिव्हेति ॥ तत्रजिव्हाहरिकथापठनार्थाकर्णौश्रवणार्थौमस्तकादिकंप्रणामाद्यर्थं ॥ ४८ ॥ एवंचक्षुरादीनामपिस्वस्वविषयेहरिप्रीत्यर्थमेवविनियोगउचितइत्यभिप्रेत्याह ॥ सार्थकानीति ॥ एतद्विषयेप्रल्हादःस्वदृढनिश्चयमदर्शयदित्याह ॥ यद्भव्यमिति ॥ यद्भावीतिक्वचित्पाठः ॥ ४९ ॥ माताभर्त्रभीप्सितकार्यंकर्तुंनशशाकेत्याह ॥ इत्येतदिति ॥ ५० ॥ तदाराजापुत्रंहंतुमेवप्रववृतइत्याह ॥ राजेति ॥ कुलांगारःअस्मत्कुलनाशकः ॥ ५१ ॥ कुलदूषणमिति ॥ यतइतिशेषः ॥ हननप्रकारानाह ॥ अग्नाविति ॥ ५२ ॥ ५३ ॥ हरिमिति ॥ अयंबालःएतैरुपायैर्हरिंहरिभजनंत्यजेदथवाप्राणानित्यर्थः ॥ मंत्रिणस्तथैवाकुर्वन्नित्याह ॥ इत्याज्ञामिति ॥ ५४ ॥ दमयामासुर्जघ्नुः ॥ तेमंत्रिणः ॥ अग्न्यादयोपिपरमेश्वरकृपयातंनपीडयामासुरित्याह ॥ अग्निरिति ॥ ५५ ॥ पुष्पभावमिति ॥ गतानीतिशेषः ॥ तत्रहेतुमाह ॥ हरेरिति ॥ ५६ ॥ हेत्वंतरमप्याह ॥ पृथिव्यादीनिति ॥ तदाप्रल्हादःपंचभूतानिप्रतिहरेरुपकारैरेवभवतांस्थितिरितिज्ञापयन्दुःखमननुभूयैवपरमानंदयुक्तोजातइत्यर्थः ॥ ५७ ॥ ॥

पुत्रस्तुमातरंह्यूचेश्रूयतांत्यज्यतेनहि ॥ मशकस्यभयात्किंवैद्वारंराज्ञोमहागजः ॥ ४७ ॥ वराकस्यभयेनैवत्यजिष्यामिहरिंपुनः ॥ जिव्हाचैवाद्यकर्णौचमस्तकंकरपादकम् ॥ ४८ ॥ सार्थकानींद्रियाणीहभजनाच्चहरेरपि ॥ यद्भव्यंतद्भवेदेवनत्याज्यंहरिकीर्तनम् ॥ ४९ ॥ इत्येतद्वचनंश्रुत्वामातादुःखमुपागता ॥ स्वामिनेकथयामासह्यसाध्योबालकोमया ॥ ५० ॥ राजाचमंत्रिणःसर्वान्समाहूयाऽब्रवीदिदम् ॥ कुलांगारःसमुत्पन्नःपुत्ररूपेणमंत्रिणः ॥ ५१ ॥ तस्मादयंचहंतव्यःसर्वथाकुलदूषणम् ॥ अग्नौदाह्यश्चशस्त्रैश्चछेदनीयोह्ययंपुनः ॥५२॥ विषैश्चकलनीयोवैमज्जनीयोजलेपुनः ॥ अनेकैश्चप्रकारैश्चमारणीयःप्रयत्नतः ॥ ५३ ॥ हरिंत्यजतिप्राणान्वाइतिमेनिश्चयोमतः ॥ इत्याज्ञांचसमासाद्यप्रधानाबालकंतदा ॥ ५४ ॥ शीघ्रंचदमयामासुर्यथाऽऽज्ञप्तंतथाहिते ॥ अग्निश्चशीततांयातोजलंचस्थलतांगतम् ॥ ५५ ॥ स्थलंचजलतांयातंविषंचाऽमृततांगतम् ॥ शस्त्राणिपुष्पभावंचहरेर्नाम्नश्चकीर्तनात् ॥ ५६ ॥ पृथिव्यादीन्हरेश्चैवह्युपकारैःप्रबोधयन् ॥ नप्राप्तवांस्तदादुःखमानंदंपरमंगतः ॥ ५७ ॥ ॥ ॥

पीड्यतइति ॥ केनाप्युपायेनेतिशेषः ॥ ५८ ॥ अतस्तएवविह्वलाअभवन्नित्याह ॥ राज्ञइति ॥ तान्मंत्रिणः ॥ ५९ ॥ प्रह्लादोमंत्रिणःप्रत्याह ॥ कथमिति ॥ अग्न्यादिभिःस्वस्याऽपीडनेकारणमाह ॥ ममेति ॥ ६० ॥ तदेववस्त्वाह ॥ जलमिति ॥ शयनमिति ॥ तायदस्यायनंपूर्वमित्युक्तेरितिभावः ॥ मुखमिति ॥ अग्निर्मुखंवैश्वानरोव्यात्तमित्यादिश्रुतेः ॥ मातुलइति ॥ हरिरेवपितेत्यग्रेवक्ष्यतेतदनुरोधेनविषस्यसमुद्रोत्पन्नत्वेनलक्ष्म्याःसहोदरत्वान्मातुलत्वमितिभावः ॥ ६१ ॥ पृथिवीति ॥ तस्यहरेर्गुणान्पातालादुद्धरणादीन्पृथिवीमयाविस्मारयतिकिमित्यर्थः ॥ मत्पितुर्हरेः ॥ किंचित्स्पष्टमात्रंवस्तु ॥ ६२ ॥ तदेवाह ॥ सर्वमिति ॥ पराधीनंपरमेश्वराधीनम् ॥ ६३ ॥ निवेदितामिति ॥ प्रधानैरितिशेषः ॥ तैराजानंप्रतिबिस्मयोदर्शितइत्याह ॥ एतादृशमिति ॥

तदातेचप्रधानावैविस्मयंपरमंगताः ॥ पीड्यतेनैवकिंकार्यंगम्यतांचपुनःपुनः ॥ ५८ ॥ राज्ञोऽग्रेचकथंचैवगमिष्यामःपरस्परम् ॥ तथाविधांश्चतान्दृष्ट्वाप्रह्लादोवाक्यमब्रवीत् ॥ ५९ ॥ कथंवैविस्मयाविष्टायूयंचैवभविष्यथ ॥ ममपार्श्वेचतद्वस्तुयतोवैपीडनंनहि ॥ ६० ॥ जलंचशयनंतस्यहरेश्चपरमात्मनः ॥ अग्निश्चैवमुखंतस्यविषंचमातुलोमम ॥ ॥ ६१ ॥ पृथिवीतुगुणांस्तस्यविस्मारयतिकिंपुनः ॥ विनामत्पितुराज्ञांवैनकिंचित्कर्तुमीहते ॥ ६२ ॥ सर्वंचैवपराधीनंस्वतंत्रोनैवकश्चन ॥ इत्येवंवचनंश्रुत्वाप्रधानाविफलक्रियाः ॥ ६३ ॥ तत्राऽऽगत्यबतत्सर्वंराज्ञेग्रेविनिवेदितम् ॥ एतादृशंकदापीहश्रुतंदृष्टंनमेप्रभो ॥ ६४ ॥ असाध्यंयातनायाश्चयत्नंचसामभिःकुरु ॥ तदीयंतद्वचःश्रुत्वाराजादुःखमुपागतः ॥ ६५ ॥ संमोहायतदापुत्रंलोभयन्वाहनादिभिः ॥ तथाचैवंहरेर्नामनमुक्तंतेनवैतदा ॥ ६६ ॥ सूतउवाच ॥ येषांचचेतसिह्येतत्सुखंस्वप्नसमंमतम् ॥ भजनंसेवनंध्यानंपूजनंस्मरणंप्रभोः ॥ ६७ ॥ अनंतसुखदंतेवैमन्यंतेकृतनिश्चयाः ॥ नचलंतिचतेधर्मात्प्राणांतोयदिजायते ॥ ६८ ॥ ॥ ॥

॥ ६४ ॥ असाध्यमिति ॥ प्रह्लादपीडनंदंडाद्युपायैरसाध्यमेवातःसामभिःसांत्वनैरेवयातनायास्तत्पीडायायत्नंकुर्वित्यर्थः ॥ ६५ ॥ तथैवराजाकरोदित्याह ॥ संमोहायेति ॥ वाहनादिभिरिति ॥ सांत्वयामासेतिशेषः ॥ एवंकृतेपिसराजवाक्यंनैवजग्राहेत्याह ॥ तथाचेति ॥ ६६ ॥ एवंपीडितस्यप्रह्लादस्यबालस्यकथंचित्तस्थैर्यमभवदित्याशंक्यसमाधत्ते ॥ येषामिति ॥ एतत्सुखंसांसारिकंसुखंस्वप्नसमंविनाशित्वादितिभावः ॥ किंतर्ह्यविनाशिसुखसाधनमित्यतआह ॥ भजनमिति ॥ ६७ ॥ ६८ ॥ ॥ ॥ ॥

कैमुत्येनाह ॥ किंपुनरिति ॥ ६९ ॥ तस्यराज्ञः ॥ भोविप्राःशौनकादयः ॥ ७० ॥ गुरुःप्रन्हादंसांत्वनेनाशिक्षयदित्याह ॥ एतइति ॥ ७१ ॥ ७२ ॥ तथा पिप्रन्हादःहरिनामस्मरणमेवाकरोदित्याह ॥ इत्येतदिति ॥ पालयामासेति ॥ हरिनामस्मरणोपदेशेनसंसारदुःखान्निवर्तयामासेत्यर्थः ॥ ७३ ॥ तेषां वालानां ॥ किंतज्ज्ञानंतदाह ॥ नमातेति ॥ सौहृदःसुहृत् ॥ ७४ ॥ एवंचनेहनानास्तिकिंचनेत्यादिवाक्यैर्जगन्मिथ्यात्वनिश्चयेनसर्वपुत्रकलत्रादि कंहेयमेवेतिज्ञानमदर्शयदित्यर्थः ॥ ननुमिथ्यात्वेपितस्यसुखप्रदत्वेसतिकुतोहेयत्वमुक्तमतस्तत्रहेतुमाह ॥ हीति ॥ हियस्मात्तत्कारणात् ॥ अतत्सुखफलप्र

किंपुनश्चैवप्रन्हादश्चलतीतिसुनिश्चितम् ॥ राजापुत्रंतदाश्रेष्ठःपुनश्चगुरवेह्यदात् ॥ ६९ ॥ गुरुस्तस्यवचःश्रुत्वागृ हीत्वाबालकंपुनः ॥ पाठयामासभोविप्रास्तद्विद्यांबालकैःसह ॥ ७० ॥ एतेबालाःकथंबालपठंतिदृश्यतांत्वया ॥ त्व मेवपठविद्यांचराजादास्यतितेसुखम् ॥ ७१ ॥ पुत्रस्यचपरोधर्मःपित्राज्ञापरिपालनम् ॥ पितुर्धुरंपुनस्त्वंचवहिष्यसि नसंशयः ॥ ७२ ॥ इत्येतद्वचनंश्रुत्वानमोनारायणेतिच ॥ पाठयामासतान्सर्वान्पालयामासवैतदा ॥ ७३ ॥ परो क्षेचगुरोस्तेषांज्ञानंचैवाऽप्यदर्शयत् ॥ नमातानपिताबंधुर्नभ्रातानचसौहृदः ॥ ७४ ॥ नमित्रंनकलत्रंचह्यतत्सुखफ लप्रदम् ॥ स्वप्नतुल्यंसुखंह्येतद्भजनीयोहरिःस्वयम् ॥ ७५ ॥ प्रन्हादस्यवचःश्रुत्वातेऽपिनारायणेतिच ॥ ऊचुःपरस्प रंसर्वेह्यानंदंपरमंगताः ॥ ७६ ॥ तच्छुत्वाचगुरुर्दुःखंप्राप्तवांस्तमभर्त्सयत् ॥ ताडयामासक्रुद्धोवैजीवनंदूरतःकथम् ॥ ७७ ॥ तेऽपितत्ताडनादेवचलिताःसर्वबालकाः ॥ प्रल्हादोनैवचलितोधैर्यंपरममास्थितः ॥ ७८ ॥ गुरुश्चैवपुनः प्राहगण्यतेनपितात्वया ॥ ताडयिष्यामएवंचेत्त्यज्यतांचहरिस्त्वया ॥ ७९ ॥ ॥

दंतथात्सुखंब्रह्मानंदात्मकंतदात्मकफलप्रदंनभवतीत्यर्थः ॥ नश्वरत्वादितिभावः ॥ तदेवाह ॥ स्वप्नेति ॥ अतःकिंकर्तव्यंदाह ॥ भजनीयइति ॥ ॥ ७५ ॥ वालाअपिगुरुवाक्यमनादृत्यतथैवाऽकुर्वन्नित्याह ॥ प्रन्हादस्येति ॥ तेपिबालाअपि ॥ ७६ ॥ तंप्रन्हादम् ॥ कियत्ताडयामासतदाह ॥ जी वनमिति ॥ जीवनमपिकथंदूरतोवहुकालपर्यंतंभवेत् अपितुशीघ्रमेवसमाप्तंभवेदित्यर्थः ॥ ७७ ॥ चलिताभयेनप्रकंपिताः ॥ नारायणानुग्रहात्प्रन्हादोनै वचलितइत्याह ॥ प्रन्हादइति ॥ तत्रहेतुमाह ॥ धैर्यमिति ॥ ७८ ॥ प्राहेति ॥ प्रन्हादमितिशेषः ॥ गुरुःततःकर्तव्यमुपदिशति ॥ त्यज्यतामिति ॥ ७९ ॥

प्रन्हादस्तदंगीकृत्यापिस्वप्रतिज्ञांनबभंजेत्याह ॥ इत्येवमिति ॥ ८० ॥ एतस्मित्रादिकंलौकिकंनपारमार्थिकंतन्ममनेष्टमित्यभिप्रेत्याह ॥ तावदिति ॥ यावत्जगतांपितानारायणोभाग्यसंयोगान्नप्राप्यतेतावदेवायंहिरण्यकशिपुःपितेत्यन्वयः ॥ ८१ ॥ अत्रदृष्टांतमाह ॥ दीपस्येति ॥ यावत्सूर्योनदृश्येततावदेवदीपस्यशिखयामोदतइत्यर्थः ॥ पितेति ॥ अस्योत्तरेणसंबंधः ॥ ८२ ॥ इदमिति ॥ मामकंपितुर्वृत्तंपुत्रःकरोतिचेत्सोगस्त्यतुल्याविज्ञेयः ॥ भवजलनिधेःशोषकत्वादिभावः ॥ ८३ ॥ येनेति ॥ येनैवहरिभजनरूपेणचरित्रेणशाश्वतंपदंसत्यज्ञानानंतलक्षणंप्राप्यतेतदेवकर्तव्यमित्यर्थः ॥ ८४ ॥ एवंबहु

इत्येवंवचनंश्रुत्वाप्रन्हादोवाक्यमब्रवीत् ॥ त्वयोक्तंचैवतत्तथ्यंपितानलंघ्यतेमया ॥ ८० ॥ तावदेवपिताचाऽयंयावन्नप्राप्यतेपिता ॥ जगतांभाग्यसंयोगात्सर्वदुःखहरःपरः ॥ ८१ ॥ दीपस्यशिखयातावन्मोदतेऋषिसत्तम ॥ यावत्सूर्योनदृश्येतपुनर्दीपःकथंपिता ॥ ८२ ॥ सुखकरश्चलोकानांजायतेनकदाचन ॥ इदंचमामकंचैवपितुर्वृत्तंचपुत्रकः ॥ ॥ ८३ ॥ करोतिसर्वथाचेद्वैह्यगस्त्योजलहारकः ॥ येनैवतुचरित्रेणप्राप्यतेशाश्वतंपदम् ॥ ८४ ॥ तदेवचप्रकर्तव्यंनाऽन्यथाकर्हिचित्पुमान् ॥ एवंचताड्यतेचेद्वैताड्यतांननिषिध्यते ॥ ८५ ॥ मत्पितायोभवेन्नित्यंसवैरक्षांकरिष्यति ॥ प्राणाश्चयदिमेविप्रगमिष्यंतितथापुनः ॥ ८६ ॥ गच्छंतुचसुखेनैवनत्याज्यंहरिकीर्तनम् ॥ इत्येवंवचनंश्रुत्वागुरुःपीडांतथाऽकरोत् ॥ ८७ ॥ रोमाऽपिवक्रंनैवाऽऽसीत्प्रतापाच्चहरेःपुनः ॥ सामान्यस्यमनुष्यस्यमानश्चैवभवेदिह ॥ ॥ ८८ ॥ किंपुनर्नृहरेरेवजायतेऋषिसत्तमाः ॥ प्रयत्नंनिष्फलंज्ञात्वागृहीत्वाबालकंगुरुः ॥ ८९ ॥ आजगामगुरुर्दैत्यगृह्यतांपुत्रकस्त्वया ॥ अस्माकंबालकायेचतेसर्वेसदृशीकृताः ॥ ९० ॥ प्रयोजनंनपुत्रेणयथेच्छसितथाकुरु ॥ इत्युक्त्वाचगतःसोऽथराजादुःखमुपागतः ॥ तदनंतरंचयज्जातंश्रूयतामृषिसत्तमाः ॥ ९१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांनृसिंहोपाख्यानेवाक्यनिरूपणंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ॥ ॥

धाताडितोपिसनश्रुतवानित्याह ॥ एवंचेति ॥ ८५ ॥ मत्पितानारायणः ॥ यदिनकरिष्यतितत्राह ॥ प्राणाइति ॥ विप्रहेगुरो ॥ ८६ ॥ ८७ ॥ रोमेति ॥ प्रन्हादस्येतिशेषः ॥ इहस्वसेवकरक्षणे ॥ ततोगुरुर्निराशोबभूवेत्याह ॥ प्रयत्नमिति ॥ ८९ ॥ तदागत्यहिरण्यकशिपुमवददित्याह ॥ गुरुरिति ॥ सदृशीकृताःस्वसदृशीकृताः ॥ ९० ॥ ततोगुरूराज्ञेपुत्रमर्पयामासेत्याह ॥ प्रयोजनमिति ॥ ९१ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांनृसिंहोपाख्यानेवाक्यनिरूपणंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ॥ ॥

॥ ओंनमःशिवाय ॥ प्रल्हादःशिक्षितोऽत्यंतमपिपित्रानिषित्ध्यतं ॥ तातंबोधितवानेवंषष्ठ्यध्यायेनिरूप्यते ॥ १ ॥ सःहिरण्यकशिपुः ॥१॥ मत्पुत्रंप्रल्हादम् ॥ २ ॥ तइति ॥ तेमंत्रिपुत्राःतथातथास्त्वितिराज्ञोवचनमंगीकृत्यतंप्रल्हादंरहसिनीत्वास्वयमूचुरितिपूर्वेणसंबंधः ॥ यदूचुस्तदाह ॥ श्रूयतामिति ॥ ईदृशमिंद्रादीनामपिकंपयितारम् ॥ ३ ॥ तदीयंस्वपित्र्यम् ॥ ४ ॥ प्रल्हादस्तुस्वाग्रहंनतत्याजेत्याह ॥ बहुधेति ॥ तान्मंत्रिपुत्रान् ॥ ५ ॥ प्रल्हादःसंसारस्यानित्यत्वकथनेनेदृशस्यपितुःशासनोल्लंघनेपिदोषाभावंदर्शयति ॥ कइति ॥ ६ ॥ तत्रदृष्टांतमाह ॥ यथेति ॥ पक्षिणःसायंवृक्षेषुस्थिताःसंतःप्रातः

सूतउवाच ॥ समाहूयतदासोवैमंत्रिपुत्रानथाऽब्रवीत् ॥ धन्याःस्थकृतकृत्याःस्थनत्यक्तंपितृशासनम् ॥१॥ मत्पुत्रंच तथायूयंशिक्षयंतुममाज्ञया ॥ तथेतिवचनंगृह्यनीत्वातंरहसिस्वयम् ॥ २ ॥ ऊचुस्तेश्रूयतांमित्रक्रियतांवचनंचनः ॥ ईदृशंपितरंत्वंचरोषयित्वाकुतःसुखं ॥ ३ ॥ तस्मात्त्वंचतदीयंचवचनंकुरुसर्वथा ॥ अस्माकंचमतंह्येतद्यथेच्छसितथाकुरु ॥ ४ ॥ बहुधाशिक्षितःसोऽपिनमेनेवचनंपितुः ॥ प्रत्युवाचतदातांस्तुश्रूयतांमित्रसत्तमाः ॥ ५ ॥ कःपिताकश्चबंधुर्वै कामाताभगिनीपुनः ॥ मित्रंकिंचकलत्रंवासर्वेस्वार्थपरंत्विह ॥ ६ ॥ यथासायंचवृक्षेषुपक्षिणोविविधाःस्थिताः ॥ प्रातःकालेचतेयत्रस्वीयंकार्यंभवेदिह ॥ ७ ॥ तत्रैवचगमिष्यंतिउड्डीयंतिततस्ततः ॥ तद्वद्गृहेषुपित्रादिबध्यतेसंगयोगतः ॥ ८ ॥ कर्मयोगंस्वकंभुक्त्वागच्छंतिदैवयंत्रिताः ॥ इदंसुखंचसंसारेदृश्यतेगृहसंभवम् ॥ ९ ॥ सर्वंस्वप्नमयंतत्त्वनाऽत्रकार्याविचारणा ॥ दिवामनोरथैर्यादृक्क्रियतेसुकृतेनच ॥ १० ॥ तथारात्रौप्रदृश्येततथेदंसुखमुत्तमम् ॥ एवंमत्वातथायूयंभजंतुवैहरिंसदा ॥ ११ ॥ अन्यथायमपाशेचपतिष्यथनसंशयः ॥ कतिधाचपितापुत्रंपितृत्वंपरिकल्पते ॥ १२ ॥ पुनश्चकतिधातंवैपुत्रत्वेपरिकल्पते ॥ जीवस्तुकर्मबद्धोवैभ्रमतेयोनिसंकटे ॥ १३ ॥ ॥

यत्रस्वीयंकार्यंभवेत्तत्रगमिष्यंतीत्युत्तरेणसंबंधः ॥ ७ ॥ उड्डीयंतीति ॥ परस्मैपदमार्षम् ॥ ८ ॥ एतत्सर्वंकृतकर्ममूलकमित्याह ॥ कर्मेति ॥ ९ ॥ स्वप्नमयत्वमेवप्रपंचयति ॥ दिवेति ॥ १० ॥ इदंसांसारिकम् ॥ तर्हिकिमस्माभिःकर्तव्यमित्यतआह ॥ एवमिति ॥ ११ ॥ हरिभजनाभावेदोषमाह ॥ अन्यथेति ॥ एतत्लौकिकंपितापुत्रादिचक्रंनपरमार्थोपयोगीत्याह ॥ कतिधेति ॥ १२ ॥ योनिसंकटेजन्ममरणरूपेदुःखे ॥ १३ ॥ ॥

॥ १४ ॥ मोक्षप्राप्तौमनुष्यत्वंप्रायेणकारणंतच्चपुण्यपापयोःसाम्येलभ्यतइत्याह ॥ उभयोरिति ॥ उभयोःपुण्यपापयोः ॥ सुनिश्चितमिति ॥ बंधकारणनाशा दितिभावः ॥ १५ ॥ तस्मात्कर्मसंबंधएवमुक्तेःप्रतिबंधकइत्याह ॥ यावदिति ॥ कर्मनाशनोपायमाह ॥ तस्मादिति ॥ १६ ॥ दूरीभवतिनश्यति ॥ भो बालाःतथाभोगेननश्यतितथापापकर्मप्रायश्चित्तैर्नश्यति ॥ १७ ॥ तदादेहीशुद्धोभवतीत्याह ॥ देहीति ॥ भ्रमणंसंसारेपतनम् ॥ पापंशोधनंविनाज्ञानंनो त्पद्यतइत्यत्रदृष्टांतमाह ॥ यावदिति ॥ रागःरंजनंनशस्यतेसंलग्नोनभवति ॥ १८ ॥ सज्जति संलग्नोभवति ॥ १९ ॥ भजनेनैवेति ॥ अनेनपातकशो

केवलंपातकंचेत्स्यात्तदासनरकंव्रजेत् ॥ केवलंचैवपुण्यंचस्वर्गेचलभतेतदा ॥ १४ ॥ उभयोःसमतायांवैमनुष्यत्वंभ वेदिह ॥ उभयोश्चक्षयेमुक्तिर्भवतीतिसुनिश्चितम् ॥ १५ ॥ यावच्चकर्मसंबंधस्तावन्मुक्तिःसुदुर्लभा ॥ तस्माच्चकर्मना शार्थंभजनीयोहरिःसदा ॥ १६ ॥ हरेश्चभजनेनैवकर्मदूरीभवत्युत ॥ भोगेनैवतथाबालाःप्रायश्चित्तैःपुनस्तथा ॥ ॥ १७ ॥ देहीपवित्रतांयातिह्यन्यथाभ्रमणंभवेत् ॥ यावच्चमलिनंवस्त्रंतावद्रागोनशस्यते ॥ १८ ॥ क्षालितेचपुनर्व स्त्रेरागःसज्जतिवैदृढम् ॥ तथेदंचशरीरंवैपापैर्मलिनतांगतम् ॥ १९ ॥ निर्मलंभजनेनैवजायतेनाऽत्रसंशयः ॥ यूयं चबालिशाःसर्वेतदाज्ञापालकादृढम् ॥ २० ॥ भवंतश्चप्रकुर्वंतुतदाज्ञांसर्वथापुनः ॥ मयैवतुनकर्तव्यंवचनंराजसंभ वम् ॥ २१ ॥ यदहंचकरोम्यत्रकरोमिगम्यतामितः ॥ इत्युक्तास्तेबलाच्चैवबोधितास्तंसमागमन् ॥ २२ ॥ समाग त्यतदातेचराजानंचतथाऽब्रुवन् ॥ राजाऽपिवचनंतेषांश्रुत्वातंचसमाह्वयत् ॥ २३ ॥ तमागतेस्वयंसोवैबोधयामास सत्तमाः ॥ शृणुपुत्रप्रवक्ष्यामिमूढभावंत्यजाऽधुना ॥ २४ ॥ यदर्थंचहरिंलोकाभजंत्येवनिरंतरम् ॥ तत्सर्वंचलयाप्राप्तं मत्तोऽहंहरिरेवच ॥ २५ ॥ ॥ ॥ ॥ ॥

धनेहरिभजनमेवमुख्यंसाधनमितिदर्शितम् ॥ बालिशाःमूर्खाःतदाज्ञापालकाःपित्राज्ञानुवर्तिनःस्थेतिशेषः ॥ २० ॥ तदाज्ञांपित्राज्ञाम् ॥ अहंतुपितुर्वचनं नश्रोष्यामीत्याह ॥ मयेति ॥ २१ ॥ तर्हिकिंत्वंकरिष्यसितत्राह ॥ यदहमिति ॥ अहंहरिभजनमेवयत्करोमितत्करोम्येवभवद्भिरितोगम्यतामित्यर्थः ॥ तेमंत्रिपुत्रा बोधिताःप्रह्लादेनेतिशेषः ॥ तंहिरण्यकशिपुम् ॥ २२ ॥ तथाप्रह्लादोक्त्यनुसारेण ॥ तंप्रह्लादम् ॥ २३ ॥ तमिति ॥ सत्तमाःहेशौनकादयः प्रह्लादेआगतेसतिसराजातंस्वयंबोधयामासेतिसंबंधः ॥ किंतदाह ॥ शृण्विति ॥ २४ ॥ हरिभजनप्रयासस्तवव्यर्थइत्यभिप्रेत्यराजाह ॥ यदर्थमिति ॥ हरिरिति ॥ यतोमत्तःप्राप्तमतोहमेवहरिरित्यर्थः ॥ २५ ॥ ॥ ॥ ॥

सर्वैश्वर्यंस्वस्यदर्शयति ॥ देवाइति ॥ २६ ॥ स्वस्मादन्योहरिर्नास्तीतिस्पष्टमेवाह ॥ मत्तइति ॥ यंहरिंभजसिसक्कास्तितद्वदेत्यन्वयः ॥ ममेति ॥ यतोममै वंसामर्थ्यमतोमदन्योहरिर्नास्तीतिभावः ॥ २७ ॥ २८ ॥ प्रन्हादःपितरंभर्त्सयति ॥ शृण्विति ॥ हेदैत्याहमेवविष्णुर्नचापरइतिकथंब्रूषइत्यन्वयः ॥ २९ ॥ तवसामर्थ्यसत्त्वेपिहरिमन्यस्त्वंमाभूर्यतोहरेस्तवचमहदंतरमस्तीत्यभिप्रेत्याह ॥ अंतरमिति ॥ अंतरंभेदः ॥ भेदेदृष्टांतानाह ॥ मणाविति ॥ मणौमरकतादौ ॥ अत्रमूल्यकृतोभेदोदर्शितः ॥ कोकिलइति ॥ अत्रशब्दसौष्ठवदौष्ठवकृतोभेदोदर्शितः ॥ ३० ॥ चंदनइति ॥ अत्रसुगंधदुर्गंधकृतोभेदोदर्शितः ॥ सात्विकइति ॥ सात्विकेपुरुषेतथातामसे ॥ अत्रसौम्यत्वक्रूरत्वकृतोभेदोदर्शितः ॥ सूर्यइति ॥ अत्रज्योतिर्महत्वाल्पत्वकृतः ॥ वेदइति ॥ अत्रप्रामाण्या

देवाश्चदानवाःसर्वेगंधर्वानागसत्तमाः ॥ ऋषयश्चाऽपरेयेचवश्याःसंतिममाऽधुना ॥ २६ ॥ मत्तश्चैवहरिंक्काऽत्रभज सित्वंवदाऽधुना ॥ निग्रहानुग्रहंकर्तुंसामर्थ्यंविद्यतेमम ॥ २७ ॥ तस्मान्मांचविहायैवहरिःकोऽत्रभविष्यति ॥ कथं नभजसेमांचबालभावाद्वदाऽधुना ॥ २८ ॥ इत्येवंवचनंश्रुत्वाप्रन्हादोवाक्यमब्रवीत् ॥ शृणुदैत्यकथंब्रूषेअहंविष्णुर्न चापरः ॥ २९ ॥ अंतरंबहुधाप्रोक्तंतवैवचहरेरथ ॥ मणौचैवयथाकाचेकोकिलेमंडुकेयथा ॥ ३० ॥ कर्दमेचंदनेचैव सात्विकेतामसेतथा ॥ सूर्येचैवाऽत्रखद्योतेवेदेचप्राकृतेतथा ॥ ३१ ॥ लोहेचैवसुवर्णेचगविचशूकरेतथा ॥ युवयोरंतरं तावन्नाऽत्रकार्याविचारणा ॥ ३२ ॥ अहंकृतिपरस्त्वंचमलमूत्रविदूषितः ॥ कामीमानीचक्षुद्रश्चनाशवान्परदूषकः ॥ ३३ ॥ त्वयितुष्टेऽमृतंनास्तितस्मिंस्तुष्टेऽमृतंपरम् ॥ कस्मान्नलज्जसेत्वंचहारिंवक्तुंतुसांप्रतम् ॥ ३४ ॥ इत्येवंनिश्चयं त्वंचजानीहिदैत्यसत्तम ॥ गजस्यारोहणंहित्वाशृगालंकःसमारुहेत् ॥ ३५ ॥ सर्वदाभजनीयोवैहरिर्हरिर्हरिःसदा ॥ कर्तुमिच्छसियत्त्वंचकुरुत्वंचनिरंतरम् ॥ ३६ ॥ ॥ ॥ ॥ ॥

प्रामाण्यकृतः ॥ प्राकृतेप्रकृतिसंभवमनुष्यवाक्ये ॥ ३१ ॥ सुवर्णइति ॥ अत्रसौंदर्यमूल्यकृतः ॥ गवीति ॥ अत्रशुध्यशुद्धिकृतः ॥ युवयोरिति ॥ हरेर्भ वतश्चेत्यर्थः ॥ ३२ ॥ कुतोममैवंनिकृष्टत्वमितिपितुराशंकायामाह ॥ अहंकृतीति ॥ मानीअभिमानवान्क्षुद्रःशीलहीनःअतएवनाशवान् ॥ ३३ ॥ अत स्तवभजनेनमदिष्टंनसाध्यमित्याह ॥ त्वयीति ॥ अमृतंमोक्षः ॥ तस्मिन्हरौ ॥ हारीमिति ॥ वक्तुंआत्मानमितिशेषः ॥ अथवावक्तुंनिंदितुम् ॥ ३४ ॥ शृगा लंक्रोष्टारम् ॥ ३५ ॥ अतोहरिरेवभंजनीयइत्याह ॥ सर्वदेति ॥ हरिर्हरिरितिपुनःपुनरुक्त्याहरिभजनेउत्कंठातिशयोदर्शितः ॥ ३६ ॥ ॥

हिरण्यकशिपुस्तुपूर्वोक्तमेवाब्रवीदित्याह ॥ सइति ॥ ३७ ॥ इदानींप्रल्हादोहरिस्वरूपंवक्तुमुपक्रमते ॥ इत्येवमिति ॥ श्रेष्ठाःभोशौनकादयः ॥ ३८ ॥ इतिश्री शैवमहापुराणेज्ञानसंहिताटीकायांसारबोधिन्यांप्रल्हादोपाख्यानंनामषष्टितमोऽध्यायः ॥ ६० ॥ ओंनमःशिवाय ॥ नृसिंहरूपमास्थायहिरण्यकशिपुर्हतः ॥ हरिणाशरभोभूत्वासमयामासतंशिवः ॥ १ ॥ हर्षपूर्णास्तदादेवाःप्रल्हादोपिप्रहर्षितः ॥ एतत्कथानकंपुण्यमेकषष्टितमेस्थितं ॥ २ ॥तेनप्रल्हादेन ॥ १ ॥ सर्वत्र

इत्येवंभर्त्सितःसोवैपुनश्चैवाऽब्रवीदिदम् ॥ यंपुत्रभजसिसोवैविद्यतेकुत्रतद्वद ॥ ३७ ॥ इत्येवंवचनंश्रुत्वाप्रल्हादोवचनंतदा ॥ आददेश्रूयतांश्रेष्ठाःश्रुत्वापापंभवेन्नहि ॥ ३८ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांप्रल्हादोपाख्यानंनामषष्टितमोऽध्यायः ॥ ६० ॥ छ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठास्तेनोक्तंयद्वचोब्रुवे ॥ प्रल्हादउवाच ॥ यत्पृष्टंचत्वयादैत्यश्रूयतांकथयामिते ॥ १ ॥ पृथिव्यांचैवयत्किंचित्स्थूलंसूक्ष्मंचदृश्यते ॥ समुद्रेपर्वतेवाऽपिवृक्षेदेवेसरित्सुच ॥ २ ॥ चेतनाचेतनेचैवग्रामेचनगरेतथा ॥ सूर्येचैवाऽप्यरण्येचचैत्रेचपितृकानने ॥ ३ ॥ त्वयिचाऽस्तिसदायोवैमय्येवचनसंशयः ॥ पश्चात्पूर्वंचमध्येचह्यंतेचैवभविष्यति ॥ ४ ॥ तद्रूपंवर्णितुंनैवशक्यतेदैत्यसत्तम ॥ इत्येवंवचनंश्रुत्वादैत्यश्चैवाऽब्रवीदिदम् ॥ ५ ॥ शृणुपुत्रप्रवक्ष्यामियदुक्तंहित्वयापुनः ॥ प्रल्हादउवाच ॥ नस्थलंचैवविद्येतयत्रनैवहरिःस्वयम् ॥ ६ ॥ इतिश्रुत्वावचस्तस्यउवाचदैत्यसत्तमः ॥ यदिहरिश्चसर्वत्रस्तंभेऽस्मिन्वर्ततेवद ॥ ॥ ७ ॥ इत्युक्तःसोऽवदत्तंचवर्त्ततेहिसुनिश्चितम् ॥ इत्युक्तस्तुपुनस्तंवैह्यब्रवीत्पश्यपूजनम् ॥ ८ ॥ इत्युक्त्वातुचकाराऽसौश्रूयतामृषिसत्तमाः ॥ नेत्रेचाऽऽरक्तकेकृत्वादंतान्दंतैश्चघर्षयन् ॥ ९ ॥ उच्चचालाऽऽसनात्तस्मात्खड्गमादायवैतदा ॥ विभेदतंतथास्तंभंपश्यपूजांकरोम्यहम् ॥ १० ॥ ॥ ॥

स्विदंप्रश्नेत्यादिश्रुत्यर्थानुरोधेनाह ॥ पृथिव्यामिति ॥ देवेपर्जन्ये ॥ २ ॥ चैत्रेचैत्ररथसंज्ञकेवने ॥ ३ ॥ एवंसर्वव्यापित्वंदर्शयित्वाहरेःकालापरिच्छेद्यत्वमाह ॥ पश्चादिति ॥ ४॥ यतोवाचइत्यादिश्रुत्यर्थानुरोधेनाह ॥ तद्रूपमिति ॥ ५ ॥ ६ ॥ हिरण्यकशिपुःप्रल्हादोक्तौप्रत्ययंकर्तुंप्रवर्तते ॥ यदीति ॥ ७ ॥ सःप्रल्हादः ॥ ८ ॥ हिरण्यकशिपुस्तच्छ्रुत्वापरंचुक्रोधेत्याह ॥ नेत्रइति ॥ ९॥ पुनर्यत्कृतवांस्तदाह ॥ उच्चचालेति ॥ बिभेदताडयामास ॥ विपरीतलक्षणयाऽऽह ॥ पश्येति ॥ १०

तदानींयज्जाततंतदाह ॥ तस्मिन्निति ॥ अशनिर्वज्रम् ॥ ११ ॥ तदानींहरिःप्रादुर्बभूवेत्याह ॥ तस्मादिति ॥ संध्यायांसायंकाले ॥ क्रुध्यमानइति ॥ श
त्रुत्यर्थेचानश् ॥ १२ ॥ नरस्यमनुष्यस्यहरेःसिंहस्य ॥ चकारेति ॥ विष्णुरित्यनुषज्यते ॥ १३ ॥ ध्वनेःस्वरूपमाह ॥ महाकालइति ॥ प्रलयकालइत्य
र्थः ॥ हडहडाशब्दमिति ॥ चकारेत्यनुषज्यते ॥ १४ ॥ नृसिंहस्वरूपस्यमहत्वमाह ॥ केसराइति ॥ केसराःग्रीवासटाःताभिर्मेघान्अखंडयत् वि

तस्मिंस्तंभेयदाखड्गोलग्नःशब्दोमहानभूत् ॥ पर्वताशनिसंयोगेयथाजातःपुरातथा ॥ ११ ॥ तस्मात्स्तंभात्स्वयंदे
वोविष्णुराविरभूत्तदा ॥ संध्यायांक्रुध्यमानस्तुत्रासयन्दैत्यसत्तमान् ॥ १२ ॥ अर्द्धंचैवशरीरंचनरस्यार्धंहरेरपि ॥
नृसिंहंचतदारूपंधृत्वाध्वनिंचकारह ॥ १३ ॥ महाकालेयथामेघोगर्जतिऋषिसत्तमाः ॥ तथाहडहडाशब्दंगड्गडे
तिपुनःपुनः ॥ १४ ॥ केसराःशोभमानाश्चताभिर्मेघानखंडयत् ॥ नादेनचदिशःसर्वाःप्रतिशब्दंचचक्रिरे ॥१५॥ मु
खस्यज्वालयासर्वान्ज्वालयन्दैत्यपुंगवान् ॥ हुंकारेणतथागर्भान्पातयन्सर्वथातथा ॥ १६ ॥ महद्भिश्चनखैश्चैवक
रालंनृहरेर्वपुः ॥ तद्दृष्ट्वाभयमापन्नादैत्याःसर्वेपुरःस्थिताः ॥ १७ ॥ युद्धायचक्रतोद्योगायुद्धंचक्रुःसुदारुणं ॥ विष्णुनाच
तदातेचहताःश्वासेनतत्क्षणम् ॥ १८ ॥ हिरण्यकशिपुश्चैवयुद्धंचक्रेसुदारुणम् ॥ पृथिवीसंशयंप्राप्तासमुद्राश्चंचला
स्तदा ॥ १९ ॥ द्यौश्चचालसनक्षत्रापर्वताश्चलतांगताः ॥ एवंयुद्धंतयोरासीन्मुहूर्तंमृषिसत्तमाः ॥ २० ॥ पश्चात्सो
ऽपिस्वयंज्ञात्वालोकानांदुःखमद्भुतम् ॥ सायंचकर्षयामासदेहल्यांदैत्यपुंगवम् ॥ २१ ॥ उत्संगेचतदाधृत्वानखैश्चह्
दयंतदा ॥ विदार्यरुधिरंतस्यपपौचगर्जयंस्तदा ॥ २२ ॥ अंत्राणिचाऽपितस्यैवकंठेचैवव्यधारयत् ॥ मारितश्चतदा
तेनपश्यतांहिदिवौकसाम् ॥२३॥ जयजयेतिभाषंतोपुष्पवृष्टिंपुरस्तदा ॥ चक्रुस्तेपरमप्रीतान्नृत्यंगीतंचचक्रिरे ॥ २४

दारितवान् ॥ नादेनपूर्वोक्तध्वनिनाप्रतिशब्दंप्रतिध्वानिम् ॥ गर्भान्दैत्यस्त्रीणामितिशेषः ॥ पातयन्शृण्वतांतथेतिपाठः ॥ १६ ॥ ततवपुः ॥ १७ ॥ १८ ॥
संशयंस्वस्थितिविषयकंसंदेहम् ॥ चंचलाइति ॥ बभूवुरितिशेषः ॥ १९ ॥ २० ॥ सोपिविष्णुरपि ॥ कर्षयामासचकर्ष ॥ दैत्यपुंगवंहिरण्यकशिपुम् ॥ २१ ॥ उत्सं
गेस्वांके ॥ २२ ॥ तस्यैवहिरण्यकशिपोरेव मारितःहिरण्यकशिपुः ॥ तेननृसिंहेण ॥ पश्यतामिति ॥ अनादरेषष्ठी ॥ २३ ॥ तेदिवौकसः ॥ २४ ॥

तदाऽन्येषांदैत्यानांयागतिरभवत्तामाह ॥ कियंतइति ॥ २५ ॥ गताइति ॥ देवादयइतिशेषः ॥ तंनृसिंहम् ॥ २६ ॥ विस्मयाकारंदर्शयति ॥ अहोइति ॥ प्रभुणाविष्णुना ॥ २७ ॥ कयाधूःहिरण्यकशिपुजाया ॥ पुत्रंप्रन्हादम् ॥ २८ ॥ सोपिहिरण्यकशिपुरपि ॥ ज्वालेति ॥ नृसिंहतेजःसंबंधिनीज्वालेत्यर्थः ॥ विनिवार्तिताशांता ॥ २९ ॥ तेदेवाः ॥ ३० ॥ गंतव्यमिति ॥ त्वयापुरापूर्वंगंतव्यमितिमिथोवदंतःइंद्रंप्रतितद्ब्रुवंतआसन्नित्यर्थः ॥ ३१ ॥ नृसिंहस्यपुरोगंतुं ब्रह्मादयोपिनाशक्नुवन्नित्याह ॥ मयेति ॥ मयापुनःशुभंदर्शनंकथंप्राप्यमित्यब्रुवन्नित्यर्थः ॥ दहंतीति ॥ दग्धानिभवंति ॥ अतोमयापुरोगंतुंनशक्यतइत्यर्थः ॥ ३२ ॥ लक्ष्मीरिति ॥ लक्ष्मीःइदंरूपंमयानदृष्टमतःकथंपुरोगंतव्यमितिवदतिस्मेत्यर्थः ॥ ३३ ॥ तस्येति ॥ तस्यनृसिंहस्यक्रोधशांतिःकथंभवेदितिविचार्येत्यर्थः

कियंतोमारितादैत्याःकियंतश्चपलायिताः ॥ निर्दैत्यापृथिवीजातादुःखंचदूरतोगतं ॥ २५ ॥ जगत्स्वास्थ्यंतदाले भेह्यानंदंपरमंगताः ॥ लक्ष्मीश्चापितदातंचदृष्ट्वाविस्मयमागता ॥ २६ ॥ अहोहिकीदृशंरूपंप्रभुणासंप्रदर्शितम् ॥ देवदुंदुभयोनेदुःसर्वेनिश्चलतांगतं ॥ २७ ॥ कयाधूश्चापिपुत्रंचशांतयंतीवदुःखिता ॥ प्रन्हादोविस्मयंप्राप्तोह्यहोध न्यःस्वयंहरिः ॥ २८ ॥ यद्यपिचहतःसोऽपिज्वालानविनिवर्तिता ॥ तथाचव्याकुलंजातंसर्वंचैवजगत्तदा ॥ २९ ॥ देवाश्चदुःखमापन्नाःकिंभविष्यतिहापुनः ॥ इत्येवंचवदंतस्तेभयाद्दूरमुपस्थिताः ॥ ३० ॥ परस्परंवदंतस्तेगंतव्यं हित्वयापुरा ॥ इंद्रंचैवब्रुवंतस्तेगंतव्यंचत्वयापुरः ॥ ३१ ॥ मयाचैवकथंप्राप्यंदर्शनंचपुनःशुभम् ॥ ब्रह्मावदतिश्म श्रूणिदहंतिनमयापुरः ॥ ३२ ॥ लक्ष्मीर्वदतिरूपंनमयादृष्टंकथंतुवै ॥ ऋषयश्चगतानैवदेवाश्चनगतास्तदा ॥ ३३ ॥ क्रोधशांतिःकथंतस्यजायतेऋषिसत्तमाः ॥ सर्वैर्मिलित्वाप्रन्हादःप्रार्थितोगतवान्पुरः ॥ ३४ ॥ तंदृष्ट्वानृहरिस्तस्यगा त्रंचजिव्हयालिहन् ॥ दुःखितंदुःखितंवत्संजनेषुचख्यापयंस्तदा ॥ ३५ ॥ उरसालिंगयामासशीतलंहृदयंतदा ॥ श्रीनृसिंहउवाच ॥ दुष्टेनज्वलितंमेऽद्यहृदयंशीतलंमम ॥ ३६ ॥ ॥ ॥

सर्वैरिति ॥ सर्वैर्देवादिभिः ॥ प्रार्थितइति ॥ त्वंपुरोगच्छेतिप्रार्थितइत्यर्थः ॥ ३४ ॥ तंप्रन्हादम् ॥ लिहन्निति ॥ सिंहस्वभावादितिभावः ॥ दुःखितमि ति ॥ द्विरुक्त्याप्रन्हादस्यदुःखातिशयोदर्शितः ॥ ख्यापयन्प्रकाशयन् ॥ हेवत्सदुःखितोसित्वंदुष्टेनेतिवदन्मुहुरितिपाठांतरम् ॥ ३५ ॥ शीतलमिति ॥ यदाऽऽलिंगितवांस्तदानृसिंहस्यहृदयंशीतलंजातमित्यर्थः ॥ दुष्टेनेति ॥ दुष्टेन दैत्येनमेहृदयंज्वालितंसंतापितम् ॥ हेपुत्रतवसंयोगादद्यशीतलंजातमित्य न्वयः ॥ ३६ ॥ ॥ ॥ ॥

तत्रहेतुमाह ॥ पुत्रस्येति ॥ हेत्वंतरमाह ॥ पितुरिति ॥ तदिति ॥ तत्तस्माद्धेतोः हेपुत्रमत्संयोगात्तेतवसद्गतिर्भविष्यतीत्यब्रवीदित्यर्थः ॥ ३७ ॥ तंप्रह्लादम् ॥ प्रह्लादायनृसिंहोवरमदादित्याह ॥ राज्यमिति ॥ ३८ ॥ अवध्यइति ॥ अतएवबलिप्रभृतयोभगवतारक्षिताइतिभावः ॥ मोचयदिति ॥ णिजभावावार्षौ ॥ ३९ ॥ देवंनृसिंहम् ॥ ४० ॥ सुमुखोगजाननः ॥ प्रचक्रमइति ॥ गंतुमितिशेषः ॥ गजाननगमनसामग्रीहासास्पदमभवदित्याह ॥ गजाननइति ॥ श्रेष्ठःस्थूलः ॥ आखुरिति ॥ आखोश्चपलत्वबोधनार्थेयमुक्तिः ॥ ४१ ॥ देवाइति ॥ देवाःपूर्वोक्तरूपंदृष्ट्वावर्णयंतःसंतोऽतिविस्मिताब

जातंतेपुत्रसंयोगात्पुत्रस्यांगंसुशीतलम् ॥ पितुश्चैवाऽथपुत्रस्यसंयोगःसुखकारणम् ॥ तच्चतेपुत्रसंयोगाद्भविष्यतिच सद्गतिः ॥३७॥ इत्युक्त्वाचपुनस्तंचपुत्रपुत्रेतिलालयन् ॥ राज्यंपुत्रकुरुत्वंचपुत्रपौत्रविवर्धनम् ॥ ३८ ॥ भविष्यतिच तेवंशोह्यवध्योमेसदाकिल ॥ इतिवरंतदादत्वाफूत्कारान्मोचयत्तदा ॥ ३९ ॥ एतस्मिन्नंतरेदेवागणेशंप्रार्थयन्पुनः ॥ त्वंचबुद्धिमतांश्रेष्ठोगच्छदेवंशमंनय ॥ ४० ॥ इत्युक्तःसुमुखश्चाऽऽखुंसमारुह्यप्रचक्रमे ॥ गजाननःस्वयंश्रेष्ठआखुश्च वाहनंपुनः ॥ ४१ ॥ लंबंचैवोदरंतस्यरूपंहास्यकरंतदा ॥ दृष्ट्वादेवास्तदातेचवर्णयंतोऽतिविस्मिताः ॥ ४२ ॥ वाहनोत्फालनेसोऽपिपतितोवाहनात्तदा ॥ हास्यंप्राप्तास्तदादेवान्हरिश्चविशेषतः ॥ ४३ ॥ हसितंचतदादृष्ट्वादेवाःसुख मुपागताः ॥ गतश्चैवहरेःक्रोधोहसि तेचहरौसुराः ॥ ४४ ॥ तथापिननिवर्तेतज्वालाचनृहरेःपुनः ॥ दुःखंप्राप्तास्त दादेवाःशंभोश्चशरणंययुः ॥ ४५ ॥ गत्वाचस्तवयामासुर्लोकानांसुखहेतवे ॥ नमस्तेस्तुनमस्तेस्तुनमस्तेस्तुसदा शिव ॥ ४६ ॥ पूर्वंदुःखंयदाजातंतदाचरक्षितावयम् ॥ समुद्रोमथितश्चैवरत्नानांतुविभागशः ॥ ४७ ॥ स्तुतोदेवै स्तदाशंभोगृहीत्वागरलंत्वया ॥ रक्षितास्मतदानाथनीलकंठइतिस्मृतः ॥ ४८ ॥ ॥ ॥

भूवुरित्यर्थः ॥४२ ॥ वाहनोत्फालनेमूषकोत्पतनसमयेसोपिगजाननोपि ॥ ४३ ॥ हसितमिति ॥ नृसिंहस्येतिशेषः ॥ गतइति ॥ सुराःहरौनृसिंहेहसितेसति हरेर्नृसिंहस्यक्रोधोयद्यपिगतःतथापिनृहरेस्तेजसोज्वालाननिवर्तेतेतिकथंभवेदित्यचिंतयन्नित्यर्थः ॥ ४४ ॥ अतएवाह ॥ दुःखमिति ॥ ४५ ॥ स्तवयामासुस्तुष्टुवुः ॥ स्वार्थेणिच्वृत्त्यभावआर्षः ॥ अथवास्तवंचक्रुः॥स्तवशब्दात्तत्करोतीत्यर्थेणिजंताल्लिट्॥४६॥ कथंरक्षितास्तदाहुः ॥ समुद्रइति ॥ हेशंभोयदासमुद्रोमथितस्तदात्वंविभागशःपृथक्पृथक्देवैस्तुतःसन्रत्नानांमध्येगरलंहालाहलंगृहीत्वावयंत्वयारक्षितास्तदात्वंनीलकंठःस्मृतइत्यतिसंबंधः ॥ ४७ ॥ ४८ ॥

एकमन्यदाप्यस्मद्दुःखंत्वयैवपरिहृतमित्याहुः ॥ प्रसिद्धमिति ॥ जायतेजायतेस्म ॥ दुःखमिति ॥ तदातेनत्वास्माभिर्दूरीकृतंदुःखंव्यलीयतननाशेत्यर्थः ॥ ४९ ॥ पीडतेपीडयसि ॥ ५० ॥ शंभुःसर्वान्सांत्वयामासेत्याह ॥ इतीति ॥ ५१ ॥ किंतद्वृत्तंतदाह ॥ मच्छरणमिति ॥ ५२ ॥ तदेवगमनात्प्राक्शिवोयत्कृतवांस्तदाह ॥ श्रूयतामिति ॥ शारभंशरभसंबंधि ॥ ५३ ॥ स्थितइति ॥ यत्रासौनृहरिःस्थितःतत्रजगामेत्यन्वयः ॥ तदीयमिति ॥ तदीयंनृसिंहसंबंधिभयंकररूपंदृष्ट्वाशिवोवचनमुवाचेत्यग्रिमेणान्वयः ॥ ५४॥ यदुवाचतदाह ॥ तइति ॥ हेनृसिंहतेत्वयाअद्यदेवसत्तमारक्षिताः ॥ अतस्त्वंजयसर्वोत्कर्षंलभस्वेत्युक्त्वाशं

प्रसिद्धंचयदायस्यदुःखंचजायतेप्रभो ॥ तदातुभ्यंचनत्वाहिसर्वंदुःखंव्यलीयत ॥ ४९ ॥ इदानींनृहरेर्ज्वालापीडतेनःसदाशिव ॥ शमयितुंचत्वंदेवशक्तोसीतिसुनिश्चितम् ॥ ५० ॥ इतिस्तुतस्तदाशंभुर्गच्छंतुदेवसत्तमाः ॥ शमयिष्यामिवोदुःखंसर्वथाहित्र्यसंमम ॥ ५१ ॥ मच्छरणंयोगतश्चैवतस्यदुःखंक्षयंगतं ॥ इत्युक्तास्तेतदादेवाआनंदंपरमंगताः ॥ ५२ ॥ यथागतंतदाजग्मुःश्रूयतामृषिसत्तमाः ॥ शिवोपिचविचार्यैवशारभंरूपमद्भुतम् ॥ ५३ ॥ धृत्वाजगामतत्रैवस्थितोऽसौनृहरिःस्वयम् ॥ दूरतश्चतदीयंवैदृष्ट्वारूपंभयंकरम् ॥ ५४ ॥ उवाचवचनंतेऽद्यरक्षितादेवसत्तमाः ॥ जयजयेतिशंभुर्वैनमस्कृत्यव्यलीयत ॥ ५५ ॥ वाद्यानिचविचित्राणिनृत्यानिविविधानिच ॥ पुष्पवर्षमनेकंचजातंतत्रमहात्मनि ॥ ५६ ॥ इत्युक्ताश्चतदादेवाआनंदंपरमंगताः ॥ शिवंविष्णुंचप्रह्लादंनृहरेरूपमद्भुतम् ॥ ५७ ॥ वर्णयित्वाह्युपास्यंचगताधामस्वकंस्वकम् ॥ शिवोऽपिचतदादेवान्नृहरिंचयदापुनः ॥ ५८ ॥ दास्यतिसकलान्कामानुक्त्वांऽतरधीयत ॥ तौदैत्यौचपुनःश्रेष्ठौजातौचराक्षसोत्तमौ ॥ ५९ ॥ रावणःकुंभकर्णश्चरामेणनिहतौपुनः ॥ तावेवदमघोषस्यकृष्णेनमारितौपुनः ॥ ६० ॥ ॥ ॥ ॥

भुर्नमस्कृत्यव्यलीयत ॥ गुप्तरूपेणातिष्ठत् ॥ ५५ ॥ वाद्यानीति ॥ विविधानिचरित्राणीत्यपिपाठः ॥ तत्रमहात्मनिनृसिंहे ॥ ५६ ॥ इतीति ॥ दुःखंक्षयंगतमितिपूर्वमुक्ताइत्यर्थः ॥ देवाःशिवादीन्स्तुत्वाजग्मुरित्याह ॥ ५७ ॥ उपास्यंपूज्यम् ॥ अस्यरूपमिति पूर्वेणान्वयः ॥ शिवइति ॥ यदाशंभुरपिनृहरिंप्रार्थयतदाहरिर्वःसर्वान्कामान्दास्यतीतिदेवान्प्रत्युक्त्वांतरधीयतेत्यग्रिमेणान्वयः ॥ उपास्योनृहरिःपुनरितिपाठांतरम् ॥ ५८ ॥ तौहिरण्याक्षहिरण्यकशिपू ॥ पुनःजन्मांतरे ॥ ५९ ॥ तयोर्नामनीआह ॥ रावणइति ॥ दमघोषस्यएतान्नामकराजस्य ॥ पुत्रावितिशेषः ॥ ६० ॥ ॥ ॥

॥ ६१ ॥ वैकुंठमिति ॥ पूर्वोक्तासनकादिशापानुरोधेनमृत्युलोकंप्राप्तावपिपरमात्मनःशासनात्पुनःस्वस्थानंप्राप्तावित्यर्थः ॥ एतदाख्यानमुपसंहरति ॥ इतीति ॥ ६२ ॥ एतदाख्यानश्रवणफलमाह ॥ येचेति ॥ ६३ ॥ ६४ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांनृसिंहचरित्रवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ॥ ॥ ओंनमःशिवाय ॥ शिवोब्रह्मादिभिसर्वैःपूजितश्चनलेनच ॥ नलजन्मांतरकथाद्विषष्टितमईर्यते ॥ १ ॥

वैकुंठंचपुनःप्राप्तौशासनात्परमात्मनः ॥ इतिवश्चसमाख्यातंचरितंनृहरेःपुनः ॥ ६१ ॥ शिवस्यचमहच्चित्रंकथितमृषिसत्तमाः ॥ येचएतन्महच्चित्रंविष्णोश्चैवशिवस्यच ॥ ६२ ॥ प्रह्लादस्यसुभक्तस्यश्रोष्यंतिऋषिसत्तमाः ॥ नतेदुःखस्यपात्रंवैभविष्यंतिनसंशयः ॥ ६३ ॥ अनेकंचफलंतेषांपुत्रपौत्रादिसंपदः ॥ भविष्यंतिनसंदेहस्तस्माच्चकथितंमया ॥ अतःपरंप्रवक्ष्यामिश्रूयतामृषिसत्तमाः ॥ ६४ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांनृसिंहचरित्रवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ छ ॥ ऋषयऊचुः ॥ सूतसूतमहाबाहोज्ञानवानसिसुव्रत ॥ पुनरेवशिवस्यैवचरितंब्रूहिविस्तरात् ॥ १ ॥ पुरातनाश्चराजानऋषयोदेवतास्तथा ॥ अराधनंचकस्यैवचक्रुस्तेपरमर्षयः ॥ २ ॥ सूतउवाच ॥ साधुपृष्टमृषिश्रेष्ठाःश्रूयतांकथयामिवः ॥ ब्रह्मापितामहश्चैवतत्पुत्राःपरमर्षयः ॥ ३ ॥ अन्येचऋषयोयेचकश्यपादयएवते ॥ सर्वेचैवशिवस्यैवपूजांचक्रुःपुरातनाः ॥ ४ ॥ पार्थिवींधातुकींवापिमानसींवापिसत्तमाः ॥ कृत्वासिद्धिंचसंप्राप्ताइदानीमपिपूज्यते ॥ ५ ॥ नारदोऽपिविशेषेणवसिष्ठऋषिसत्तमः ॥ अरुंधतीतथासाध्वीकश्यपोमुनिपुंगवः ॥ ६ ॥ अदितिश्चाऽपिनित्यंवैचकारपार्थिवंपुरा ॥ मनवश्चसदाचक्रुःस्वायंभुवपुरःसराः ॥ ७ ॥ प्रियव्रतश्चतत्पुत्रश्चकारपूजनंशुभम् ॥ इक्ष्वाकुश्चापिमांधातासगरोनहुषस्तथा ॥ ८ ॥ दिलीपश्चैवतत्पुत्रोराजादशरथस्तथा ॥ यदाऽऽयुःसकलंतस्यकिंचिन्न्यूनंनपुत्रता ॥ ९ ॥ ॥ ॥

॥ १ ॥ पुरातनाःप्राचीनाः ॥ २ ॥ ऋषिश्रेष्ठाःहेशौनकादयः ॥ तत्पुत्राःब्रह्मपुत्राः ॥ ३ ॥ ४ ॥ तेषांपूजनीयांमूर्तिमाह ॥ पार्थिवीमिति ॥ पार्थिवींमृन्मयींधातुकींसुवर्णादिनिर्मितांमानसींहृदिस्थिताम् ॥ पूज्यतइति ॥ अस्माभिरितिशेषः ॥ ५ ॥ ६ ॥ ७ ॥ तत्पुत्रःस्वायंभुवमनुपुत्रः ॥ पूजनमिति ॥ शिवस्येतिशेषः ॥ ८ ॥ तत्पुत्रोरघुः ॥ तस्येति ॥ तस्यदशरथस्याऽऽयुःसकलंसंपुर्णंकिंचिदेवन्यूनंतदापितेनपुत्रतापुत्रवत्तानप्राप्तेत्यर्थः ॥ ९ ॥

तदातन्मध्ये ॥ १० ॥ चतुर्भिःलक्ष्मणादिभिःसंभूयमिलित्वाजातइत्यध्याहृतेनान्वयः ॥ कौसल्यादशरथपत्नी ॥ ऋष्यादिष्टावसिष्ठादिभिरुपदिष्टा ॥ ११ ॥ तद्वंशेरामवंशेतेतेराजानः ॥ १२ ॥ पार्वतीति ॥ पार्वतीशापसंयोगात्प्राप्तंतस्यपुरूरवसःस्त्रीत्वंशिवपूजनान्न्यवर्ततेत्यर्थः ॥ १३ ॥ कथंन्यवर्ततेतदाह ॥ मासमिति ॥ एकमासपर्यंतंस्त्रीततएकमासपर्यंतंपुरुषोजातःएवंतस्यमहात्मनःपार्थिवानांपूजनेकृतेसतिजातंसंपन्नमित्यन्वयः ॥ १४ ॥ भरतःदौष्यंतिः ॥ पांडवाःयुधिष्ठिरादयः ॥ १५ ॥ वटुकेबटुकनामके ॥ १६ ॥ पूजनमिति ॥ कृतमितिशेषः ॥ भगवान्शिवः ॥ तस्यकृष्णस्य ॥ १७ ॥ संप्राप्येति ॥ शिवात्वरान्संप्राप्यस

तदादुःखंसमापन्नःपुत्रार्थीपार्थिवांस्तदा ॥ पुत्रेष्टिंचचकाराऽसौतन्मध्येचस्वयंहरिः ॥ १० ॥ चतुर्भिश्चैवरूपैश्चसंभूयचस्वयंतदा ॥ कौसल्यापार्थिवांश्चक्रेऋष्याऽऽदिष्टास्वयंसती ॥ ११ ॥ रामश्चैवतथानित्यंपार्थिवान्समपूजयत् ॥ तद्वंशेचसमुत्पन्नास्तेतेशर्वमपूजयन् ॥ १२ ॥ पुरूरवाश्चराजावैह्यैलःशर्वंस्वयंशुभः ॥ पार्वतीशापसंयोगात्स्त्रीत्वंतस्यन्यवर्तत ॥ १३ ॥ मासंस्त्रीमासमात्रंचपुरुषएवनसंशयः ॥ पूजनेपार्थिवानांचजातंतस्यमहात्मनः ॥ १४ ॥ भरतश्चमहापूजांशिवस्यैवतथाऽकरोत् ॥ अन्येऽपियेमहाभागाःपांडवाःप्रत्यपूजयन् ॥ १५ ॥ अर्जुनश्चविशेषेणव्यासस्यवचनात्तदा ॥ कृष्णेनचतदानित्यंबटुकेपर्वतोत्तमे ॥ १६ ॥ पूजनंतुशिवस्यैवसप्तमासावधिस्वयम् ॥ प्रसन्नोभगवांस्तस्यवरानन्याननेकशः ॥ १७ ॥ संप्राप्यचजगत्सर्वंवशेऽनयतवैतदा ॥ बिल्वेश्वरस्यसंपन्नोबिल्वराशिर्मुनीश्वराः ॥ १८ ॥ जलेनचतथापूजाकृताचशंकरस्यच ॥ पूर्वजन्मनिवैविप्रास्तेनराज्यंसुशोभनम् ॥ १९ ॥ प्राप्तंचरक्षितस्तेनयतिर्हरसमीपतः ॥ तस्यपुण्यप्रभावेणराज्यंदत्तंहरेणच ॥ २० ॥ इतितस्यवचःश्रुत्वापुनरूचुर्ऋषीश्वराः ॥ जलेनचकथंपूर्वंपूजितःशंकरोमुदा ॥ २१ ॥ रक्षितश्चयतिःकोवैतत्त्वंब्रूहिसुविस्तरम् ॥ अन्यच्चैवाऽर्जुनस्यैवसेवनंशंकरस्यच ॥ २२ ॥ ब्रूहित्वंचविशेषेणव्यासस्यैवोऽपदेशतः ॥ कथंजातंचतस्यैवकथंचपूजितस्तदा ॥ २३ ॥

वैजगत्वशेस्वाधीनतायांहरिरनयतेत्यर्थः ॥ तत्रहेतुमाह ॥ बिल्वेति ॥ बिल्वेश्वरस्यशिवस्यबिल्वपत्रराशिःसंपन्नःकृष्णकृतार्पणेनेतिभावः ॥ १८ ॥ तेननलेन ॥ १९ ॥ यतिःकोपिपरिव्राट् ॥ तस्यनलस्यपुण्यप्रभावेणयातिरक्षणजनितपुण्यप्रतापेन ॥ २० ॥ तस्यसूतस्य ॥ २१ ॥ अन्यकृतमपिशंकरपूजनंपप्रच्छुरित्याह ॥ अन्यदिति ॥ अर्जुनस्येतिकर्तरिषष्ठी ॥ २२ ॥ तस्यअर्जुनस्य ॥ पूजितइति ॥ अर्जुनेनेतिशेषः ॥ २३ ॥ ॥

तेषामृषीणां ॥ २४ ॥ आहुकःआहुकनामा ॥ २५ ॥ कोटीशेकोटीश्वरेलिंगे ॥ जलसेचनमिति ॥ जलसेवनमितिक्कचित्पाठः ॥ २६ ॥ तयोःआहुकतत्प त्न्योः ॥ निरंतरमिति ॥ आसीदितिशेषः ॥ भुंजानौभोगंकुर्वाणौ ॥ आस्तामितिशेषः ॥ २७ ॥ स्वामीआहुकः ॥ २८ ॥ स्थलेच्छयास्वनिवासयोग्य स्थानेच्छया ॥ यतिरागत्ययर्च्चितितवांस्तदाह ॥ इमामिति ॥ २९ ॥ एकाकिनीमिति ॥ आहुकीमितिशेषः ॥ भयेति ॥ तयापिआहुक्यापि ॥ इंद्रियग्रा मस्यदुर्जयत्वादितिभावः ॥ ३० ॥ सःआहुकः ॥ ३१ ॥ तस्ययतेः ॥ यतिंप्रत्याहुकआह ॥ ब्रूहीति ॥ यतिःस्थलमयाचतेत्याह ॥ अद्येति ॥ ३२ ॥

इतितेषांवचःश्रुत्वासूतोवाक्यमथाददे ॥ शृणुविप्राःप्रवक्ष्यामिनलस्यामिततेजसः ॥ २४ ॥ अर्बुदाचलसंज्ञेतुपर्वते भिल्लवंशजः ॥ आहुकश्चतदाऽभ्याशेवसतिस्ममुनीश्वराः ॥ २५ ॥ तत्पत्नीह्याहुकीनाम्नीचकारशिवपूजनम् ॥ निरंत रंचकोटीशेकृत्वाचजलसेचनं ॥ २६ ॥ यौवनंचतयोःश्रेष्ठंतत्सुखंचनिरंतरम् ॥ आनंदेनसमायुक्तौभुंजानौप्रीत मानसौ ॥ २७ ॥ कस्मिंश्चसमयेस्वामीआराधनार्थंगतोयदा ॥ एतस्मिन्नंतरेकश्चिद्यतिर्जटिलआगतः ॥ २८ ॥ संध्यायांदर्शनंकृत्वाशंकरस्यस्थलेच्छया ॥ इमांरात्रिंसमाक्रम्यप्रातश्चैवयथागतम् ॥ २९ ॥ गमिष्यामिचतत्रैववि चार्यैवमुपागतः ॥ एकाकिनींतदादृष्ट्वाभयत्रस्तविलोचनः ॥ ३० ॥ तयापिचपितालंचह्युक्तश्चस्थिरतांगतः ॥ एत स्मिन्समयेसोवैह्याजगामगृहाधिपः ॥ ३१ ॥ पूजनंतस्यकृत्वाचब्रूहिकार्यंप्रभोइति ॥ यतिरुवाच ॥ अद्यस्थलंचम ह्यंवैदीयतांप्रातरेवहि ॥ ३२ ॥ गमिष्येसर्वथाभिल्लइत्युक्तेऽन्यद्वृणुप्रभो ॥ स्वल्पंचैवस्थलंमेद्यवर्ततेनान्यथाकथं ॥ ॥ ३३ ॥ इत्युक्तश्चतदासोवैगमनायमतिंदधे ॥ तावद्भिल्यावचःप्रोक्तंधर्मंश्चैवगमिष्यति ॥ ३४ ॥ स्वामिनंचतदाब्रू तयुवाभ्यांस्थीयतांगृहे ॥ अहंबहिःस्थितिंकुर्यामायुधानिदधत्यपि ॥ ३५ ॥ ॥ ॥

गामिष्येगमिष्यामि ॥ हेभिल्ल ॥ इत्युक्तइति ॥ यतिनेतिशेषः ॥ यतियोग्यस्थलाभावंविज्ञायभिल्लोयतिंप्रत्याह ॥ अन्यदिति ॥ वृणुयाचस्व ॥ तत्रहेतुमाह ॥ स्वल्पमिति ॥ अद्यमेमदीयंस्थलमत्यल्पमस्ति ॥ अन्यथाबहुस्थलसत्वेकथंनदास्यामीत्यर्थः ॥ ३३ ॥ सःयतिः ॥ भिल्ल्याआहुक्या ॥ ३४ ॥ स्वामि नमाहुकमब्रूतउक्तवतीआहुकीतिशेषः ॥ यदब्रूततदाह ॥ युवाभ्यामिति ॥ कुर्यामिति ॥ अनेनतस्याःपतियातिप्रभृतिमान्यवर्गेषुभक्त्यतिशयोदर्शितः ॥ आयुधानीति ॥ अनेनतत्रश्वापदभयमासीदितिदर्शितम् ॥ ३५ ॥ ॥ ॥

स्वामिनाआहुकेन ॥ ३६ ॥ आग्रहमभिनिवेशं ॥ तौआहुकायतिश्च ॥ ३७ ॥ वनेचरःआहुकः ॥ योगींद्रःयतिः ॥ ३८ ॥ सापिआहुक्यापि ॥ पशवःव्याघ्रादयः ॥ तमाहुकम् ॥ ३९ ॥ तेनैवआहुकेनैव ॥ निश्चलइति ॥ स्थिरःनिष्फलइतियावत् ॥ जातमिति ॥ तच्छ्रूयतामितिशेषः ॥ ४० ॥ सा आहुकायतिंप्रतिस्वसाध्वीत्वमदर्शयदित्याह ॥ किमर्थमिति ॥ ४१ ॥ अयंमत्पतिः ॥ कृतकृत्यइति ॥ भवद्दर्शनादिनेतिभावः ॥ दग्धयिष्यामीति ॥ स्वशरीरंदग्धंकरिष्यामीत्यर्थः ॥ अहंचैवगमिष्यामीतिपाठांतरम् ॥ ईदृशसाहसकरणेहेतुमाह ॥ स्त्रीणामिति ॥ तदुक्तंमिताक्षरादौ ॥ अथान्वारोहणंस्त्रीणामात्मनोभर्तुरेवच ॥ सर्वपापक्षयकरंनिरयोत्तारणायच ॥ अनेकस्वर्गफलदंमुक्तिदंचतथैवच ॥ जन्मांतरेचसौभाग्यंधनपुत्रादिवृद्धिदं ॥ तिस्रःकोट्योर्धकोटीचे

तद्वचश्चश्रुतंतेनस्वामिनाचविचारितं ॥ स्त्रियंबहिश्चनिष्कास्यकथंस्थेयंमयागृहे ॥ ३६ ॥ यद्भावितद्भवेदेवमयास्थेयंबहिःस्वयम् ॥ इत्याग्रहंतदाकृत्वागृहेतौचसुरक्षितौ ॥ ३७ ॥ स्वयंचैवायुधान्यत्रधृत्वातिष्ठद्वनेचरः ॥ योगींद्रोध्यानयोगेनस्थितःकोणांतरेतदा ॥ ३८ ॥ सापिनिद्रांकरोतिस्मस्थितोबहिर्वनेचरः ॥ रात्रौचपशवस्तंवैपीडयामासुरुद्धताः ॥ ३९ ॥ तेनैवचयथाशक्तिकृतोयत्नश्चनिश्चलः ॥ तदनंतरंचयजातंभिल्लोव्याघ्रैश्चभक्षितः ॥ ४० ॥ प्रातःकालेऽथयोगींद्रोदृष्ट्वाभिल्लंचभक्षितम् ॥ दुःखंप्रापतदासाचकिमर्थंखिद्यतेप्रभो ॥ ४१ ॥ धन्योऽयंकृतकृत्योऽयंयज्जातमीदृशंत्विह ॥ अहंवैदग्धयिष्यामिस्त्रीणांधर्मःसनातनः ॥ ४२ ॥ इत्येवंचहितंमत्वातथाकृत्वास्वयंचितिम् ॥ विचार्येत्थंस्वयंचाऽग्निंप्रविवेशहितायवै ॥ ४३ ॥ एतस्मिन्नंतरेसाक्षाच्छिवःप्रादुरभूत्पुरः ॥ धन्येधन्येइतिसाध्विप्रसन्नोऽस्मितवाऽनघे ॥ ४४ ॥ शिवउवाच ॥ एतस्मिन्नवतारेवैसुखंप्राप्तंनकिंचन ॥ तस्माच्चजन्मतांयाहिह्येकवारंपुनर्नहि ॥ ४५ ॥ अयंचैवमहायोगीहंसरूपोभविष्यति ॥ परजन्मनिचयुवयोःसंयोगंचकरिष्यति ॥ ४६ ॥

त्यादिना ॥ ४२ ॥ स्वयंचितिमिति ॥ पतिसान्निध्याभावादितिभावः ॥ तदप्युक्तंधर्माब्धिसारे ॥ देशांतरमृतेपत्यौसाध्वीतत्पादुकाद्वयम् ॥ निधायोरसिसंशुद्धाप्रविशेज्जातवेदसमिति ॥ प्रविवेशेति ॥ आहुकीतिशेषः ॥ हितायपुनःपतिप्राप्तिरूपाय ॥ ४३ ॥ साध्वीति ॥ हेसाध्विहेधन्येआदरार्थोद्विरुक्तिः ॥ अहंतवप्रसन्नोस्मीतिब्रुवन्शिवःपुरःप्रादुरभूदित्यन्वयः ॥ ४४ ॥ एतस्मिन्निति ॥ अस्मिन्जन्मनीत्यर्थः ॥ भिल्लजातिषूत्पन्नत्वादितिभावः ॥ जन्मतांजन्मांतरम् ॥ आर्षःस्वार्थेतल् ॥ ननुमुमुक्षुणामुक्तिरेवप्राप्यर्थतेनजन्मांतरमितिचेत्तत्राह ॥ एकवारमिति ॥ अत्रनिश्चयंदर्शयति ॥ पुनरिति ॥४५॥ अयंयतिः ॥ युवयोःत्वद्भर्तुस्तवचेत्यर्थः ॥ संयोगंदांपत्यसंबंधम् ॥ ४६ ॥ ॥ ॥ ॥

भिल्लः आहुकः ॥ वीरसेनस्यएतन्नाम्नःनैषधेनैषधाख्येतत्पुत्रःवीरसेनपुत्रः ॥ ४७ ॥ भीमराज्ञइति ॥ भीमनामकराजस्येत्यर्थः ॥ समासांतविधेरनित्यत्वान्न टच् ॥ वैदर्भेवैदर्भनामके ॥ ४८ ॥ भुक्तेति ॥ यदास्थितौभवेतांतदेतिशेषः ॥ दुर्लभेति ॥ विदेहकैवल्यरूपेत्यर्थः ॥ वइति ॥ अनेनयोगिप्रभृतीनां याणामपिमुक्तिप्राप्तिर्दर्शिता ॥ तत्रपूर्वंयुवामित्यनेनचतयोःराज्यभोगप्राप्तिरपिदार्शिता ॥ ४९ ॥ अचलेशःअचलेशनामा ॥ तत्रनिमित्तमाह ॥ य स्मादिति ॥ यस्मात्कारणाद्धर्माद्भक्तरक्षणरूपान्नचलितइत्यर्थः ॥ ५० ॥ अनंतरंतेषांयज्जातंतत्संक्षिप्याह ॥ तदुक्तमिति ॥ शंभूक्तमित्यर्थः ॥ तेषामाहु कप्रभृतीनाम् ॥ एतदाख्यानमुपसंहरति ॥ इतीति ॥ अर्जुनस्यपांडुपुत्रस्यचरित्रमितिशेषः ॥ ५१ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधि

भिल्लश्चवीरसेनस्यनैषधेनगरेवरे ॥ तत्पुत्रश्चनलोनामभविष्यतिनसंशयः ॥ ४७ ॥ त्वंचैवभीमराज्ञोवैवैदर्भेनगरेशुभे ॥ दमयंतीचविख्याताभविष्यसिगुणान्विता ॥ ४८ ॥ युवांचोभौमिलित्वाचराज्यभोगंसुविस्तरम् ॥ भुक्त्वामुक्तिश्चयोगींद्रैर्दुर्लभावोभविष्यति ॥ ४९ ॥ इत्युक्त्वाचस्वयंशंभुरचलेशोऽभवत्तदा ॥ यस्मान्नचलितोधर्मादचलेशइतिस्मृतः ॥ ५० ॥ तदुक्तंचतदाह्यासीत्तेषांचैवमहात्मनाम् ॥ इतिवश्चसमाख्यातंश्रूयतांचाऽर्जुनस्यच ॥ ५१ ॥ इति श्रीशिवमहापुराणेज्ञानसंहितायांद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ७॥ सूतउवाच ॥ दुर्योधनजितास्तेचपांडवाःपंच एवच ॥ द्रौपद्याचतथासाध्व्याद्वैताख्यंवनमाययुः ॥ १ ॥ तत्रैवसूर्यदत्तांवैस्थालींचाऽऽश्रित्यतेतदा ॥ कालंचवाहयामासुःसुखेनऋषिसत्तमाः ॥ २ ॥ दुर्वासाःप्रेरितस्तेनछलार्थंचसमागतः ॥ शिष्यैश्चैवाऽयुतैःसार्द्धंयाचयामासतांतदा ॥ ३ ॥ मनोऽभीष्टंचभोज्यंवैश्रूयतामृषिसत्तमाः ॥ प्रेषितश्चैवस्नानार्थंतस्मिंश्चसमयेहिते ॥ ४ ॥ ॥

न्यांद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ ओंनमःशिवाय ॥ वनेकृष्णप्रतापेनपांडवाःसमतर्पयन् ॥ दुर्वासःप्रभृतीन्भिल्लंचारकर्मण्ययोजयन् ॥ १ ॥ तदेवव्या सआगत्यपांडवान्समुपादिशत् ॥ एतत्कथानकंपुण्यंत्रिषष्टितमईर्यते ॥ २ ॥ पंचयुधिष्ठिरभीमार्जुननकुलसहदेवाख्याः ॥ द्वैताख्यमिति ॥ द्वेक्षुत्पिपासेइ तेगतेयस्मात्तद्वीतंतदेवद्वैतंतन्नामकमित्यर्थः ॥ १ ॥ तेपांडवाः ॥ ननुद्वैतवनेक्षुत्पिपासाबाधाभावात्किमर्थंस्थाल्याश्रितेतितत्राह ॥ कालमिति ॥ वाहयामासुः अतिक्रमयांचक्रुः ॥ अनेनक्षुत्पिपासाबाधाभावेपिपंचमहायज्ञादिनिष्पत्त्यर्थंस्थाल्याश्रयणमितिसूचितम् ॥ २ ॥ तेनदुर्योधनेन ॥ अयुतैःदशसहस्रसंख्याकैः ॥ तांस्थालीम् ॥ ३ ॥ प्रेषितइति ॥ पांडवैरितिशेषः ॥ तेपांडवाः ॥ ४ ॥ ॥ ॥

दुःखिताइति ॥ तावदृषिदानपर्याप्तान्नाद्यभावादितिभावः ॥ पंचपांडवाः ॥ उपाददुःप्रवृत्ताः ॥ स्वपत्न्याभगवद्भक्त्यतिशयेनतेनिर्दुःखाजाताइत्याह ॥ द्रौपद्येति ॥ स्मृतःस्मृतमात्रः ॥ क्षणादपीति ॥ द्वारकातइतिशेषः ॥५॥ तेषांपांडवानाम् ॥ तृप्तानिति ॥ ईश्वरेणस्वमायाविरचितभोजनादिनातृप्तानित्यर्थः ॥ ॥ ६ ॥ तस्माद्भगवत्कृपयैवसर्वंलभ्यतइति ॥ ममप्रयासोव्यर्थएवेत्यभिप्रेत्यदुर्वासाआह ॥ यस्यैवेति ॥ ७ ॥ इत्युक्त्वेति ॥ सोपिदुर्वासाअपि ॥ ८ ॥ शत्रुःदुर्योधनः ॥ ९ ॥ कर्तव्यमेवेति ॥ अनेनैतत्करणेफलावश्यंभावःसूचितः ॥ १० ॥ उपमन्योःएतन्नामकमहर्षेः ॥ ११ ॥ आराधनस्थानमाह ॥ बटुक

दुःखिताश्चतदापंचप्राणांस्त्यक्तुमुपाददुः ॥ द्रौपद्याचस्मृतःकृष्णोह्याजगामक्षणादपि ॥ ५ ॥ शाकंचभक्षयित्वातु तेषांसिद्धिंसमादधत् ॥ दुर्वासाश्चतदाशिष्यांस्तृप्तान्ज्ञात्वापलायत ॥ ६ ॥ यस्यैवभगवांस्तुष्टस्तस्यन्यूनंकथंभवेत् ॥ धन्याश्चैवकृतार्थाश्चयेषांचभगवत्कृपा ॥ ७ ॥ इत्युक्त्वावचनंसोपिआनंदंपरमंगतः ॥ पश्चात्तेपांडवाःकृष्णंपप्रच्छुःकिंभविष्यति ॥ ८ ॥ बलवान्शत्रुरुत्पन्नःकिंकरिष्यामहेप्रभो ॥ इत्युक्तस्तुतदाकृष्णःपांडवानिदमब्रवीत् ॥ ॥ ९ ॥ श्रीकृष्णउवाच ॥ श्रूयतांपांडवाःश्रेष्ठाःश्रुत्वाकर्तव्यमेवहि ॥ द्वारकांचमयागत्वाशत्रूणांचजिगीषया ॥१०॥ विचार्यचोपदेशाच्चह्युपमन्योर्महात्मनः ॥ मयाह्याराधितःशंभुःप्रसन्नःपरमेश्वरः ॥ ११ ॥ बटुकेपर्वतेश्रेष्ठेसप्तमासंतुसेवितः ॥ इष्टान्कामांस्तदादत्वाबिलेबिल्वेश्वरःस्थितः ॥१२॥ तत्प्रतापान्मयासर्वंसामर्थ्यंलब्धमुत्तमं ॥ इदानींसेव्यतेदेवोभुक्तिमुक्तिफलप्रदः ॥ १३ ॥ यूयंचैवसुसेवध्वंशिवंसर्वसुखावहम् ॥ इत्युक्त्वांऽतर्दधेकृष्णआश्वास्यपांडवान्थ ॥ १४ ॥ पांडवाअपिभिल्लंचप्रेषयामासुरोजसा ॥ गुणानांचपरीक्षार्थंतस्यदुर्योधनस्यच ॥ १५ ॥ सोऽपिसर्वंचतत्रत्यंदुर्योधनगुणोदयम् ॥ समीचीनंचतज्ज्ञात्वापुनःप्रापप्रभून्प्रति ॥ १६ ॥ तदुक्तंतेनिशम्यैवदुःखंप्रापुर्मुनीश्वराः ॥ किंकर्तव्यंक्वगंतव्यंसत्यपाशेनयंत्रिताः ॥ १७ ॥ ॥ ॥ ॥

इति ॥ पूर्वोक्तेबटुकनामकेबिलेगर्ते ॥ १२ ॥ तत्प्रतापात्शंभुप्रतापात् ॥ सामर्थ्यंदुष्टनिग्रहशिष्टानुग्रहकर्तृत्वरूपाशक्तिः ॥ देवःशिवः ॥ १३ ॥ पांडवान्प्रतिकृष्णःशिवसेवनमेवोपादिशदित्याह ॥ यूयमिति ॥ १४ ॥ भिल्लमिति ॥ चारकार्यार्थमितिभावः ॥१५॥ सोपिभिल्लोपि ॥ तत्रत्यंदुर्योधनराजधानीस्थम् ॥ तत्तदा ॥ १६ ॥ तदुक्तंभिल्लेनोक्तम् ॥ तेपांडवाः ॥ ननुतादृशानांमहानुभावानांकथंदुःखप्राप्तिरतआह ॥ सत्यपाशेनेति ॥ १७ ॥

एवंचैतादृशाएवभगवंतंतत्सदृशंवासाक्षात्कर्तुमर्हंतीत्यभिप्रेत्याह ॥ एतस्मिन्निति ॥ १८ ॥ तंव्यासं ॥ तेपांडवाः ॥ तस्मैव्यासाय ॥ १९ ॥ २० ॥ मुनिंव्या
सम् ॥ यदब्रुवंस्तदाह ॥ अद्येति ॥ क्रियाःनित्यादिकर्माणि ॥ २१ ॥ तपश्चेति ॥ मद्गतिसंबध्यते ॥ एवमग्रेपि ॥ २२ ॥ २३ ॥ पितामहहेव्यास ॥ दु
ष्टैःदुर्योधनादिभिः ॥ २४ ॥ श्रीमतांभवत्प्रभृतीनाम् ॥ तदिति ॥ यद्दुःखंकदापिनगतंतदित्यर्थः ॥ निश्चयंनिश्चयेन ॥ २५ ॥ २६ ॥ गच्छेदिति ॥ को
पिपुरुषइतिशेषः ॥२७॥ तद्गुणाःमहदाश्रयगुणाः ॥ नैवगण्यंतेगणयितुंनशक्यंते ॥ यतस्तन्महिमावस्तुमात्रतःसत्यतयास्थितइत्यर्थः ॥ अतएवाह ॥ आश्र

एतस्मिन्नंतरेव्यासोजटाजूटविभूषितः ॥ तेजसांचस्वयंराशिःसाक्षात्धर्मइवापरः ॥ १८ ॥ तंदृष्ट्वातेतदाप्रीताउत्था
यपुरतःस्थिताः ॥ दत्वाऽऽसनंतदातस्मैकुशाजिनसुशोभितम् ॥ १९ ॥ तत्रोपविष्टंतंव्यासंपूजयंतिस्महर्षिताः ॥
पूजांकृत्वाविधानेनस्तुतिंचविविधांतदा ॥ २० ॥ कृत्वामुनिंचसंतोष्यधन्यास्मइतिचाऽब्रुवन् ॥ अद्यनःसफलंजन्मअ
द्यनःसफलाःक्रियाः ॥ २१ ॥ अद्यमेसफलादेवाब्राह्मणाःसत्यवादिनः ॥ तपश्चैवतथादानंयोगाश्चसफलाःकृताः ॥
॥ २२ ॥ दानंचविविधंमेद्यपूजाश्चविविधास्तथा ॥ एतत्सर्वंचसफलंजातंतेदर्शनात्प्रभो ॥ २३ ॥ दुःखंचदूरतोया
तंदर्शनाच्चेपितामह ॥ दुष्टैश्चैवमहद्दुःखंदत्तंचक्रूरकर्मभिः ॥ २४ ॥ श्रीमतांदर्शनेजातेदुःखंचैवगमिष्यति ॥ कदा
पिनगतंतच्चनिश्चयंमेविचारितम् ॥ २५ ॥ महदाश्रयेचसंप्राप्तेसमर्थेसर्वकारिणि ॥ यदिदुःखंनगच्छेत्तुदैवमत्रैवका
रणम् ॥ २६ ॥ निश्चयंचैवगच्छेच्चदारिद्र्यंदुःखकारणम् ॥ महतांचस्वभावोऽयंयद्दीनप्रतिपालनं ॥ २७ ॥ तद्गुणानै
वगण्यंतेमहिमावस्तुमात्रतः ॥ आश्रयस्यवशादेवपुंसोवैजायतेप्रभो ॥ २८ ॥ लघुत्वंचमहत्वंचनाऽत्रकार्याविचार
णा ॥ उत्तमानांस्वभावोऽयंयद्दीनपरिपालनम् ॥ २९ ॥ रंकस्यरक्षणंलोकेह्यतिश्रेयस्करंमतम् ॥ पुरुषस्यप्रयत्नो
वैसुजातानांचसेवनम् ॥ ३० ॥ अतःपरंचभाग्यंवैदोषश्चैवनदीयते ॥ एतस्मात्कारणात्स्वामिंस्त्वयिदृष्टेशुभंसदा ३१ ॥

यस्येति ॥ २८ ॥ लघुत्वमिति ॥ कुत्सिताश्रयवशाल्लघुत्वंमहदाश्रयवशाच्चमहत्वमितिविवेकः ॥ २९ ॥ रंकस्यदरिद्रस्य ॥ सेवनमिति ॥ सुजनानां
सेवनमेवपुरुषस्यप्रकृष्टफलसाधकोयत्नइत्यर्थः ॥ ३० ॥ अतःपरमिति ॥ एवंकृतेपियदिदुःखंजायेततततोभाग्यंदुर्दैवमेवकारणमित्यर्थः ॥ अतःप्रयत्नवान्
पुरुषोनदूषणीयइत्याह ॥दोषइति ॥ स्वामिन्हेव्यास ॥ ३१ ॥ ॥ ॥ ॥

॥ ३२ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांत्रिषष्ठितमोऽध्यायः ॥ ६३ ॥ ॥ ॥ ॥ ॥ ओंनमःशिवाय ॥ व्यासाज्ञयें द्रकीलेद्रावर्जुनेनतथाकृतम् ॥ इंद्रेणभाषणंचैतच्चतुःषष्ठितमेस्थितम् ॥ १ ॥ वेदव्यासोयदब्रवीत्तदाह ॥ धन्याइति ॥ भोयुधिष्ठिरादयइतिशेषः ॥ कृतकृत्यत्वेहेतुमाह ॥ सत्यमिति ॥ भवद्भिरितिशेषः ॥ १ ॥ यूयमिति ॥ यूयंतेदुर्योधनादयश्चतुल्यतांसमतांगताइत्यर्थः ॥ संबंधसाम्यादितिभावः ॥ २ ॥ ॥ ननुतर्ह्यस्माकमेवेष्टंभवतःसकाशान्नसित्ध्येदतआह ॥ तथापीति ॥ पक्षपातःसाहाय्यकरणेबुद्धिः ॥ धर्मिष्ठानांभवाद्दशानाम् ॥ तेशत्रवःकुतोनधर्मिष्ठास्तत्राह ॥ चक्षुषेति ॥ चक्षुषासहधर्मस्त्यक्तइत्यन्वयः ॥ सहोक्तिरलंकारः ॥ ३ ॥ लोभात्राज्यलोभाद्धेतोः ॥ तस्यधृतराष्ट्रस्य ॥ तेदुर्योधनादयः

त्वदागमनमात्रेणसंतुष्टमानसंहिनः ॥ इत्येतद्वचनंश्रुत्वाव्यासश्चैवाऽब्रवीदिदम् ॥ ३२ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहितायांत्रिषष्ठितमोऽध्यायः ॥ ६३ ॥ छ ॥ व्यासउवाच ॥ धन्याःस्थकृतकृत्याःस्थसत्यंनैवविलोपितम् ॥ सुजनानांस्वभावोऽयंप्राणांतेऽपिसुशोभनः ॥ १ ॥ धर्मश्चत्यज्यतेनैवसत्यंसत्फलसाधनम् ॥ अस्माकंचैवयूयंचते चाऽपितुल्यतांगताः ॥ २ ॥ तथापिपक्षपातोवैधर्मिष्ठानांमतोबुधैः ॥ प्रथमंचैवदुष्टेनधृतराष्ट्रेणचक्षुषा ॥ ३ ॥ धर्मस्त्यक्तःस्वयंलोभाद्युष्माकंराज्यमाहृतम् ॥ तस्ययूयंचतेचाऽपिपुत्राएवनसंशयः ॥ ४ ॥ पितरिचमृतेबालाह्यनुकंप्या महात्मनः ॥ पश्चात्पुत्रश्चतेनैववारितोनकदाचन ॥ ५ ॥ अनर्थश्चैवजायेतयद्येवंचकृतंतदा ॥ अतःपरंचयज्जातंतज्ज्ञातंनाऽन्यथाभवेत् ॥ ६ ॥ अयंदुष्टोभवंतश्चधर्मिष्ठाःसत्यवादिनः ॥ तस्माद्तेशुभस्यैवशुभंचैवपुनःपुनः ॥ ७ ॥ यच्चैववापितंबीजंतत्प्ररोहोभवेदिह ॥ तस्माद्दुःखंनकर्त्तव्यंभवद्भिःसर्वथाशुभाः ॥ ८ ॥ इत्युक्ताःपांडवास्तंचपुनरेवाऽब्रुवन्वचः ॥ सत्यमुक्तंत्वयानाथदुष्टैर्दुःखंनिरंतरम् ॥ ९ ॥ ॥ ॥

॥ ४ ॥ननुस्वपुत्रइवभ्रातृपुत्रेप्रेमनभवेदतआह ॥ पितरीति ॥ पितरिपांडौ ॥ पुत्रोदुर्योधनः ॥ तेनैवधृतराष्ट्रेणैव ॥ वारितइति ॥ पांडवपीडाकरणादितिशेषः ॥ ५ ॥ कृतस्यफलमवश्यंभवेदित्याह ॥ अनर्थइति ॥ कृतामिति ॥ धृतराष्ट्रेणेतिशेषः ॥ ६ ॥ अयंधृतराष्ट्रः ॥ शुभस्येति ॥ शुभकर्मणोंऽतेशुभफलमेवमुहुर्मुहुर्भवेदित्यर्थः ॥ ७ ॥ वापितंक्षेत्रेविकीर्णम् ॥ तत्प्ररोहःतस्यैववीजस्यप्ररोहःअंकुरः ॥ ८ ॥ इत्युक्ताइति ॥ व्यासेनेतिशेषः ॥ तंव्यासम् ॥ दुष्टैःदुर्योधनादिभिः ॥ ९ ॥ ॥ ॥ ॥

तत् दुःखदानम् ॥ दुःखनाशनार्थमुपायंयुधिष्ठिरोयाचितवानित्याह ॥ शुभमिति ॥ १० ॥ प्रमादइति ॥ शिवाराधनाभावरूपोत्रप्रमादः ॥ उपदिश्यतामि
ति ॥ शिवाराधनमितिशेषः ॥ ११ ॥ १२ ॥ पांडवेषुशिवाराधनेअर्जुनएवयोग्यइतिव्यासोव्यचारयदित्याह ॥ पंचस्विति ॥ पंचस्वपिपांडवेषुविचारपूर्व
कशंकरार्चनेनरावताररूपत्वादयंपुरातनमुनिरितिविचार्यनिश्चित्यतपोयोग्यस्थानंचविचार्यैवव्यासोर्जुनमुद्दिश्येदमब्रवीदितिसंबंधः ॥ १३ ॥ १४ ॥ यदब्र
वीत्तदाह ॥ श्रूयतामिति ॥ १५ ॥ १६ ॥ ननुविष्णुरपिसर्वसेव्यइतिचेदत्राह ॥ विष्णुरिति ॥ तस्यैवशिवस्यैवरूपंविभूतिः ॥ १७ ॥ १८ ॥ ननुविश्वा

दीयतेचवनेऽत्रैवमुहुर्मुहुर्दुरात्मभिः ॥ तन्नाशयशुभंकिंचिद्ध्येयंदेयंत्वयाप्रभो ॥ १० ॥ कृष्णेनकथितंपूर्वमाराध्यःशंकरःसदा ॥ प्रमादश्चकृतोऽस्माभिरिदानीमुपदिश्यताम् ॥ ११ ॥ इत्येतद्वचनंश्रुत्वाव्यासोहर्षसमन्वितः ॥ उवाचश्रूयतांश्रेष्ठामयैवसेव्यतेशिवः ॥ १२ ॥ भवद्भिःसेव्यतांनित्यंसुखंस्यादचलंसदा ॥ पंचसुपांडवेष्वेवविचार्यशंकरार्चने ॥ ॥ १३ ॥ विचार्यैवाऽर्जुनंव्यासःपुरातनमुनिस्त्विति ॥ तपःस्थानंविचार्यैवपुनरेवाऽब्रवीदिदम् ॥ १४ ॥ श्रूयतांपांडवश्रेष्ठाःकथयामिहितंसदा ॥ ब्रह्मादितृणपर्यंतंयत्किंचिद्दृश्यतेजगत् ॥ १५ ॥ तत्सर्वंशिवरूपंचदृश्यंध्येयंचयत्पुनः ॥ सर्वेषांचैवसेव्योवैशंकरःसर्वदुःखहा ॥ १६ ॥ विष्णुश्चवर्ततेयोवैतस्यैवरूपमद्भुतम् ॥ परंतुदीर्घकालेनप्रसन्नोभवतिस्फुटम् ॥ १७ ॥ शिवश्चैवतुस्वल्पेनकालेनैवप्रसीदति ॥ भुक्तिंदत्वाचमुक्तिंहियच्छतिचसुनिश्चितम् ॥ १८ ॥ तस्मात्सेव्यःसदाशंभुर्भुक्तिमुक्तिफलेप्सुभिः ॥ क्षत्रियस्यपरीक्षश्चइंद्रएवसदाहितः ॥ १९ ॥ सुप्रसन्नश्चविघ्नंवैनकरिष्यतिसर्वदा ॥ पुनश्चैवशिवस्यैवमंत्रंचैवप्रदास्यति ॥ २० ॥ इत्युक्त्वाऽर्जुनमाहूयविंद्रविद्यामुपादिशत् ॥ स्नात्वाचप्राङ्मुखोभूत्वाजग्राहमुनिसत्तमात् ॥ २१ ॥ पार्थिवंचविधानंवैददौचऋषिपुंगवः ॥ प्रथमंचेंद्रमाराध्यतदाज्ञप्तःपुनःशिवम् ॥ २२ ॥ ॥ ॥ ॥ ॥

मित्रादेरिवास्माकमिंद्रोविघ्नंकरिष्यतीतिचेदतआह ॥ क्षत्रियस्येति ॥ भूलोकराज्यार्थिनःक्षत्रियस्येत्यर्थः ॥ परोक्षःअप्रत्यक्षोपि ॥ हितइति ॥ दशरथादिभिस्त
स्योपकृतत्वादितिभावः ॥ १९ ॥ अतएवाह ॥ सुप्रसन्नइति ॥ प्रत्यूतानुग्रहीष्यतीत्याह ॥ पुनरिति ॥ २० ॥ इंद्रविद्यांइंद्रदेवताकमंत्ररूपांविद्याम् ॥
अर्जुनस्तांविद्यांविधिपूर्वकमग्रहीदित्याह ॥ स्नात्वेति ॥ मुनिसत्तमात्व्यासात् ॥ २१ ॥ पार्थिवंपार्थिवलिंगपूजनसंबंधि ॥ ददाविति ॥ अर्जुनायेतिशेषः ॥ ऋषिपुंगवोव्यासः ॥ यद्विधानमब्रवीत्तदाह ॥ प्रथममिति ॥ तदाज्ञप्तःइंद्रेणाज्ञप्तः ॥ २२ ॥ ॥ ॥

इंद्रकीलेएतन्नामकपर्वते ॥ २३ ॥ दापयन्निति ॥ तपोविघ्नकारिजनानामितिशेषः ॥ तस्येति ॥ तस्याशिवस्यस्तोत्रंनित्यंपठनीयमित्यर्थः ॥ २४ ॥ एवमुपदिश्यव्यासोष्वदकरोत्तदाह ॥ अदृश्यामिति ॥ अदृश्यत्वस्यसाधिकांगोप्यांवा ॥ तस्मैअर्जुनाय ॥ २५ ॥ एवमर्जुनमुपदिश्यसर्वेभ्यआशिषंदत्वाव्यासोंतर्धानंगतइत्याह ॥ धर्ममिति ॥ २६ ॥ तेभ्यःपांडवेभ्यः ॥ दीप्यमानइति ॥ मंत्रप्रभावेणेतिभावः ॥ २७ ॥ तदेवाह ॥ मंत्रेणेति ॥ अतुलंअनुपमम् ॥ सर्वेयुधिष्ठिरादयः ॥ निश्चयमिति ॥ सद्यःफलदर्शनोपक्रमाव्यासोक्तंनिश्चितवंतइत्यर्थः ॥ २८ ॥ अतएवाहुः ॥ इदमिति ॥ २९ ॥ तेपांडवाः ॥ विरहेति ॥ स्वकार्यसित्ध्यर्थमर्जुनप्रेषणेउत्सुकाअपिविरहदुःखेनकाताराभीताइत्यर्थः ॥ तदेवव्यक्तीकरोति ॥ अनिच्छंतइति ॥ तत्रैवइंद्रकीलपर्वतएव ॥ ३० ॥

इतोगच्छाऽधुनापार्थइंद्रकीलेसुशोभने ॥ जान्हव्याश्चसमीपेवैस्थित्वाचैवतपःकुरु ॥२३॥ आयुधानिचसर्वाणिधृत्वामार्गेनदापयन् ॥ तस्यापिचस्तवंनित्यंपठनीयंशिवस्यच ॥२४॥ अदृश्यांचैवविद्यांचदत्वाचहितकारिणीं ॥ आशिषंचतदासोवैददौतस्मैमहामुनिः ॥ २५ ॥ धर्ममास्थायसर्वेवैतिष्ठंतुराजसत्तमाः ॥ सिद्धिःस्यात्सर्वतःश्रेष्ठानाऽत्रकार्याविचारणा ॥ २६ ॥ इतिदत्वाऽऽशिषंतेभ्योव्यासश्चांतरधीयत ॥ अर्जुनोऽपितदातत्रदीप्यमानोव्यदृश्यत ॥२७॥ मंत्रेणशिवरूपेणतेजश्चाऽतुलमावहत् ॥ तेसर्वेतस्यतेजश्चदृष्ट्वातुनिश्चयंगताः ॥ २८ ॥ इदंकार्यंत्वयासाध्यंनाऽन्यैश्चैवकदाचन ॥ व्यासस्यवचनाद्भ्रातःसफलंकुरुजीवितम् ॥ २९ ॥ इतिचैवाऽर्जुनंतेवैविरहोत्सुककातराः ॥ अनिच्छंतोऽपितत्रैवप्रेषयामासुरर्जुनम् ॥ ३० ॥ द्रौपदीदुःखसंयुक्तानेत्राश्रूणिनिरुध्यच ॥ प्रेषयंतीशुभंराजंस्त्वयाकार्यंप्रयत्नतः ॥ ३१ ॥ तेसर्वेपिचतंतत्रविसृज्याऽर्जुनमादरात् ॥ अत्यंतदुःखमापन्नामिलित्वापंचएवते ॥ ३२ ॥ स्थितास्तत्रवदंतिस्मश्रूयतामृषिसत्तमाः ॥ दुःखेपिप्रियसंगोवैनद्दुःखायप्रजायते ॥ ३३ ॥ वियोगेद्विगुणंतच्चकथंधैर्यंभवेदिह ॥ कुर्वंत्स्वेवंतदादुःखमृषिवर्यःसमागतः ॥ ३४ ॥ ॥ ॥

पतिविरहःसाध्वींस्त्रियमतिपीडयतीत्याह ॥ द्रौपदीति ॥ प्रेषयंतीति ॥ अब्रवीदितिशेषः ॥ यदब्रवीत्तदाह ॥ शुभमिति ॥ हेराजन्त्वयाशुभंकार्यमित्यन्वयः ॥ ३१ ॥ तेपांडवाः ॥ ३२ ॥ यद्वदंतिस्मतदाह ॥ दुःखेपीति ॥ दुःखसमयेपिप्रियवस्तुसंगोदुःखायनभवति ॥ प्राप्तंदुःखंपरिहरतीतिभावः ॥३३॥ वियोगेप्रियवस्तुविरहे ॥ द्विगुणमिति ॥ तद्दुःखंद्विगुणंभवतीत्यर्थः ॥ अप्राप्तिदुःखापेक्षयाप्राप्तवस्तुनाशदुःखस्याधिक्यादितिभावः ॥ अतएवाहुः ॥ कथमिति ॥ धैर्यंबुद्धिस्थैर्यम् ॥ कुर्वंत्स्विति ॥ पांडवेष्वितिशेषः ॥ ऋषिवर्यःव्यासः ॥ ३४ ॥ ॥ ॥

अब्रुवान्निति ॥ पांडवाइतिशेषः ॥ यदब्रुवंस्तदाह ॥ दुःखेति ॥ ३५ ॥ ३६ ॥ तत्सुखायपांडवसुखाय ॥ नोदयन्परिहरन्सन्नवसदित्यन्वयः ॥ ३७ ॥ वार्तायामिति ॥ कथाप्रसंगेनेतिभावः ॥ मताइष्टा ॥ ३८ ॥ ईदृशमस्मद्दुःखसदृशंकश्चनकोपि ॥ ३९ ॥ ४० ॥ ऋषिवर्योधर्मराजदुःखपरिहारायान्ये पांदुःखातिशयमदर्शयदित्याह ॥ श्रूयतामिति ॥ नलराज्ञइति ॥ समासांतविधेरनित्यत्वादार्षत्वाद्वानटच् ॥ जातमिति ॥ दुःखमितिसंबध्यते ॥ ४१ ॥ यज्जातमिति ॥ नलराजादीनांस्त्रीराज्यवियोगादिजनितंयद्दुःखंजातंतद्वर्णयितुंनैवशक्यतइत्यर्थः ॥ ४२ ॥ सर्वदुःखमूलमाह ॥ शरीरमिति ॥ हेधर्मराज

तंनत्वाचैवसंपूज्यदत्वाऽऽसनंवचोऽब्रुवन् ॥ श्रूयतांचऋषिश्रेष्ठदुःखदग्धावयंप्रभो ॥ ३५ ॥ दर्शनंतेचसंप्राप्यह्यानंदंप्राप्नुमोमुने ॥ कियत्कालंवसात्रैवदुःखनाशायवैप्रभो ॥ ३६ ॥ इत्युक्तःसऋषिश्रेष्ठोह्यवसत्तत्सुखायच ॥ कथाभिर्विविधाभिश्चदुःखंचनोदयंस्तदा ॥ ३७ ॥ वार्तायांक्रियमाणायांधर्मराजोऽब्रवीदिदम् ॥ धर्मराजउवाच ॥ शृणुत्वंचऋषिश्रेष्ठदुःखशांतिर्मतामम ॥ ३८ ॥ पृच्छामित्वांमहाबाहोकथनीयंत्वयाप्रभो ॥ ईदृशंचैवदुःखंहिपुराप्राप्तस्तुकश्चन ॥ ३९ ॥ वयमेवपरंदुःखभाजनंनापिकश्चन ॥ इतिपृष्टऋषिश्रेष्ठःप्रत्युवाचपुनस्तदा ॥ ४० ॥ श्रूयतांधर्मराजत्वंतवदुःखंनकिंचन ॥ पूर्वंचनलराज्ञोवैजातंतस्यमहात्मनः ॥ ४१ ॥ हरिश्चंद्रेतथाराजन्रामस्यैवाथपांडव ॥ यज्जातंवर्णितुंचैवशक्यतेनमयापुनः ॥ ४२ ॥ शरीरंदुःखराशिंचमत्वात्याज्यंत्वयाऽधुना ॥ येनेदंचधृतंतेनप्राप्तमेवनसंशयः ॥ ४३ ॥ प्रथमंमातृगर्भेवैजातस्यदुःखसंभवः ॥ ततोपियौवनेकामान्भुंजानोदुःखरूपिणः ॥ ४४ ॥ गतागतैर्दिनस्यैवकार्यभारैरनेकशः ॥ आयुश्चक्षीयतेनित्यंनजानातिहितत्पुनः ॥ ४५ ॥ अंतेचमरणंचैवह्यतोदुःखमतःपरम् ॥ तस्मादिदमसत्यंचत्वंतुसत्यंसमाचर ॥ ४६ ॥ ॥ ॥ ॥

दुःखराश्यधिष्ठानत्वाच्छरीरमेवदुःखरूपमितिमत्वात्वयादुःखंत्याज्यमित्यर्थः ॥ इदंशरीरम् ॥ प्राप्तमेवेति ॥ दुःखमितिसंबध्यते ॥ ४३ ॥ तदेवविवृणोति ॥ प्रथममिति ॥ ४४ ॥ गतागतैःनिरंतरंदिनस्यगमनागमनैरित्यर्थः ॥ कार्यभारैःजीवनाद्यनुकूलव्यापारनिवहैः ॥ तदिति ॥ वृथायुःक्षपणंपुरुषोनजानातीत्यर्थः ॥ ४५ ॥ अतःपरमिति ॥ सीमादुःखस्यदर्शिताऽतःपरंकिंदुःखमित्यर्थः ॥ इदंशरीरादिकम् ॥ सत्यमिति ॥ सत्यधर्मत्वादितिभावः ॥ ४६ ॥

तादृशदुःखमपिभगवद्भक्त्यापरिह्रियतइत्याह ॥ येनेति ॥ येनप्रकारेणशंभुस्तुष्टोभवतितथातेनप्रकारेणनरेणकार्यमित्यर्थः ॥ तमेवप्रकारमाह ॥ तस्यैवेति ॥ शंकरस्येत्यर्थः ॥ ४७ ॥ तेयुधिष्ठिरादयः ॥ मनोरथपथैःस्वस्वाभीष्टाराधनमार्गैः ॥ ४८ ॥ गछन्निति ॥ तपोर्थमितिभावः ॥ दुर्गादीति ॥ दुर्गादीन्शकुनान्शीघ्रस्वेष्टप्राप्तिसूचकान्ज्ञात्वेतिशेषः ॥ क्षयमिति ॥ शत्रूणामितिशेषः ॥ बुध्वेति ॥ शुभसूचकशकुनदर्शनेनावश्यंशत्रुविजयोभवितेतिनिश्चित्येत्यर्थः ॥ तेनैवेति ॥ तेनैवहेतुनेत्यर्थः ॥ रम्याणीति ॥ तपोयोग्यस्थानानीत्यर्थः ॥ ४९ ॥ अचलमिंद्रकीलपर्वतम् ॥ तत्रपर्वते ॥ ५० ॥ यत्रस्थले ॥

येनैवतुष्यतेशंभुस्तथाकार्यंनरेणच ॥ तस्यैवभजनेनैवसर्वंदुःखंविलीयते ॥ ४७ ॥ एवंचविविधैर्ज्ञानैर्दिनातिवाहनं तदा ॥ चक्रुस्तेभ्रातरःसर्वेमनोरथपथैःपुनः ॥ ४८ ॥ अर्जुनोपिस्वयंगच्छन्दुर्गादिशकुनानथ ॥ क्षयंबुध्वाचतेनैवपश्यन्रम्याण्यनेकशः ॥ ४९ ॥ मनसाहर्षयुक्तोवैजगामाऽचलमुत्तमं ॥ तत्रगत्वाचगंगायाःसमीपंसुंदरंस्थलम् ॥ ॥ ५० ॥ अशोककाननंयत्रतिष्ठतिस्वर्गसन्निभम् ॥ तत्रतस्थौस्वयंज्ञात्वानत्वाचगुरुसत्तमम् ॥ ५१ ॥ यथोपदिष्टंवेषादितथाचैवाऽकरोत्स्वयम् ॥ पुरश्चपार्थिवंकृत्वासुंदरंसमसूत्रकं ॥ ५२ ॥ तदग्रेचजपंकुर्वंस्तेजसोराशिमुत्तमम् ॥ त्रिकालंचैवसंस्नातःपूजनंविविधंतथा ॥ ५३ ॥ चकारोपासनंतत्रतपस्तप्त्वासुदारुणम् ॥ तस्यैवशिरसस्तेजोनिःसृतंचतदासुराः ॥ ५४ ॥ दृष्ट्वाभयंसमापन्नाःप्रविष्टश्चकदाह्ययम् ॥ पुनस्तेचविचार्यैवकथनीयंबिडौजसे ॥ ५५ ॥ तत्क्षणंचगतास्तत्रकथयामासुर्वैतदा॥ देवोवाथऋषिश्चैवसूर्योवाथविभावसुः॥ ५६॥ तपस्तपस्यतिदेवनजानीमोवनेतव ॥ तस्यैवतेजसादग्धाह्यागतास्तवसंनिधिम् ॥ ५७ ॥ ॥ ॥

तस्थाविति ॥ अर्जुनइतिसंवध्यते ॥ ततोर्जुनोगुरूपदिष्टंसंस्मृत्ययथोक्तमकरोदित्याह ॥ स्वयमिति ॥ गुरुसत्तमंवेदव्यासम् ॥ ५१ ॥ वेषादिभस्मरुद्राक्षधारणादि ॥ समसूत्रकंयथोक्तपंचसूत्रीयुक्तम् ॥ पंचसूत्रीविनिर्णयस्तुगौतमीतंत्रेउक्तः ॥ लिंगमस्तकाविस्तारोलिंगोच्छ्रायसमोमतः ॥ परिधिस्तत्रगुणितस्तद्वत्पीठंव्यवस्थितम् ॥ प्रणालिकातथैवस्यात्पंचसूत्रविनिर्णयइति ॥ ५२ ॥ तदग्रेलिंगसमीपे ॥ तेजसोराशिंशिवंध्यायन्नितिशेषः ॥ ५३ ॥ तस्यैवपार्थिवस्यैव ॥ ५४ ॥ प्रविष्टइति ॥ अस्मिन्स्थलइतिशेषः ॥ अयंतपस्वी ॥ तेसुराः ॥ बिडौजसेइंद्राय ॥ ५५ ॥ यत्कथयामासुस्तदाह ॥ देवेति ॥ विभावसुःअग्निः ॥ ५६ ॥ ५७ ॥ ॥ ॥ ॥

एवमुक्तइंद्रोयदकरोत्तदाह ॥ ज्ञात्वेति ॥ पुत्रचिकीर्षितंपुत्रस्यअर्जुनस्यचिकीर्षितंज्ञात्वातत्संगोप्यहृदिनिधायेत्यर्थः ॥ तान्सुरान् ॥ ५८ ॥ तत्रैवइंद्रकीलप
र्वतएव ॥ जगामेति ॥ इंद्रइतिशेषः ॥ तेनयद्रूपंधृतंतदाह ॥ वृद्धइति ॥ ५९ ॥ मृगचर्मोत्तरीयंधृत्वेतिसंबध्यते ॥ तंवृद्धरूपिणमिंद्रम् ॥ पूजांकृतवान्अर्जु
नइतिशेषः ॥ ६० ॥ आगतःप्राप्तः ॥ इत्युक्तइति ॥ अर्जुनेनेतिशेषः ॥ धैर्यार्थंअर्जुनधैर्यवृध्यर्थम् ॥ ६१ ॥ ६२ ॥ पृष्टःअर्जुनःतेनइंद्रेण ॥ संवेदितमिति ॥
सर्वंस्वकीयंवृत्तमर्जुनेननिवेदितमित्यर्थः ॥ ६३ ॥ अद्यैवइदानीमेवसुखार्थंतपःक्रियतेतन्नयुक्तमित्यर्थः ॥ यतःसर्वंलौकिकसुखंस्वप्नतुल्यंमिथ्येतियावत् ॥
एवंचसांप्रतमपितदर्थंतपोनैवकार्यमित्याह ॥ तदर्थइति ॥ मुक्त्यर्थमेवकरोषिचेत्क्रियतामित्याह ॥ मुक्त्यर्थमिति ॥ ६४ ॥ इंद्रमंत्रजपेनकिंचित्सुखंभवेन्नमु

इत्युक्तस्तैःसुरैःसर्वैर्ज्ञात्वापुत्रचिकीर्षितम् ॥ संगोप्यतान्विसृज्यैवस्वयंचरूपमद्भुतम् ॥५८॥ धृत्वाजगामतत्रैववृद्धश्च
जटिलोयथा ॥ तथैवयष्टिकांधृत्वावृद्धोजर्जरतांगतः ॥ ५९ ॥ मृगचर्मोत्तरीयंचपतन्पतन्पदेपदे ॥ तमागतंतदादृष्ट्वा
पूजांचकृतवान्स्वयम् ॥ ६० ॥ स्थितोऽग्रेचस्तुतिंकृत्वाक्वागतोऽसिवदाऽधुना ॥ इत्युक्तस्तुहरिःसोवैधैर्यार्थंचवचोऽब्र
वीत् ॥ ६१ ॥ नवेचवयसिस्वामिन्किंतपस्यसिसांप्रतम् ॥ मुक्त्यर्थंनजयार्थंहिसर्वथातपएवते ॥ ६२ ॥ इतिपृष्ट
स्तदातेनसर्वंसंवेदितंपुनः ॥ इंद्रःस्तुत्वापुनर्वाक्यमुवाचश्रूयतांत्वया ॥ ६३ ॥ युक्तंनक्रियतेऽद्यैवसुखंस्वप्नसमंमतम्
॥ तदर्थेनतपोयुक्तंमुक्त्यर्थंकुरुसांप्रतम् ॥ ६४ ॥ इंद्रश्चसुखदातावैमुक्तिदाताभवेन्नहि ॥ तस्मात्त्वंसर्वथाश्रेष्ठकर्तुम
र्हसिसुव्रत ॥ ६५ ॥ इत्येतद्वचनंश्रुत्वाक्रोधंचक्रेऽर्जुनस्तदा ॥ राज्यार्थीनचमुक्त्यर्थीकिमर्थंभाषसेत्विदम् ॥ ६६ ॥
व्यासस्यवचनेनैवक्रियतेतपईदृशं ॥ इतोगच्छकिमर्थंमांपातयितुंत्वमिच्छसि ॥ ६७ ॥ इत्युक्तश्चप्रसन्नोवैरूपमद्भुत
सुंदरम् ॥ स्वोपकरणसंयुक्तंदर्शयामासवैतदा ॥६८॥ इत्येवंचतदादृष्ट्वालज्जितश्चाऽर्जुनस्तदा ॥ इंद्रस्तंचसमाश्वा
स्यपुनरेववचोऽब्रवीत् ॥ ६९ ॥ ॥ ॥ ॥ ॥

क्तिरित्यभिप्रेत्याह ॥ इंद्रइति ॥ कर्तुमिति ॥ मुक्त्यर्थंतपइतिशेषः ॥ ६५ ॥ राज्यार्थीति ॥ अहमितिशेषः ॥ ६६ ॥ मयास्वमनसैवेदंनक्रियतइत्याह ॥
व्यासस्येति ॥ ईदृशंराज्यफलकम् ॥ पातयितुंतपसोभ्रंशयितुम् ॥ ६७ ॥ इत्युक्तइति ॥ अर्जुनेनेतिशेषः ॥ प्रसन्नइति ॥ इंद्रइतिशेषः ॥ स्वोपकरणसं
युक्तमैरावतादिपरिवारयुतम् ॥ सोपस्करणसंयुक्तमितिक्वचित्पाठः ॥ ६८ ॥ लज्जितइति ॥ स्वपितुर्दर्शनादितिभावः ॥ तमर्जुनम् ॥ ६९ ॥

इंद्रोऽर्जुनंप्रशंसतिस्मेतितदाह ॥ धन्यति ॥ ७० ॥ ७१ ॥ एतज्जयमेतेषांदुर्योधनादीनांजयम् ॥ कश्चेति ॥ कोपीत्यर्थः ॥ शिवमिति ॥ शिवंवर्जयित्वान कोपिसमर्थइत्यर्थः ॥ अतःशिवोपासनामुपदिशति ॥ तस्मादिति ॥ ७२ ॥ शिवसामर्थ्यंदर्शयति ॥ सर्वमिति ॥ ७३ ॥ सर्वैःशिवोपासनयैवजयोलभ्य तइत्याह ॥ तेसर्वइति ॥ मन्मंत्रंइंद्रमंत्रम् ॥ हित्वात्यक्त्वा ॥ ७४ ॥ सर्वभावेनसर्वप्रकारेण ॥ शिवंभजेतिपूर्वेणसंबंधः ॥७५॥ वरानिति ॥ दत्त्वेतिशेषः ॥ समाहूयसंबोध्य ॥ ७६ ॥ इंद्रोयदब्रवीत्तदाह ॥ सावधानतयेति ॥ एतस्यतपसः ॥ ७७ ॥ ७८ ॥ तस्यार्जुनस्य ॥ जगामेति ॥ इंद्रइतिशेषः ॥

धन्योऽसिकृतकृत्योऽसिसुस्थिरंहिमनस्तव ॥ बलिष्ठाःशत्रवस्तेचदुर्योधनपुरःसराः ॥ ७० ॥ द्रोणोभीष्मश्चकर्णश्च सर्वेतेदुर्जयाध्रुवम् ॥ ममाऽसाध्याभवेयुर्वैसर्वथाचहितंशृणु ॥ ७१ ॥ एतज्जयंतुकर्तुंवैसमर्थःकश्चनाऽधुना ॥ वर्तते चशिवंवर्ज्यतस्माच्छंभुंभजाऽधुना ॥ ७२ ॥ सर्वंकर्तुंसमर्थोऽस्तिभुक्तिमुक्तिफलप्रदः ॥ अहमन्येचब्रह्माद्याविष्णुः सर्ववरप्रदः ॥ ७३ ॥ अन्येजिगीषवोयेचतेसर्वेशिवपूजकाः ॥ अद्यप्रभृतिमन्मंत्रंहित्वाचैवशिवंभज ॥ ७४ ॥ पार्थिवेनविधानेनध्यानेनैवशिवस्यच ॥ उपचारैरनेकैश्चसर्वभावेनभारत ॥ ७५ ॥ सिद्धिःस्यादचलातेऽद्यनात्रकार्याविचारणा ॥ इत्युक्त्वाचवरान्सर्वान्समाहूयाऽब्रवीदिदम् ॥ ७६ ॥ सावधानतयास्थेयमेतस्यरक्षणेध्रुवम् ॥ राजंस्त्वयाप्रमादोवैनकर्तव्यःकदाचन ॥ ७७ ॥ श्रेयसांबहवोविघ्नाभवंतिराजसत्तम ॥ धैर्यंचवर्ततेऽद्यैवतथैवरक्ष्यतांत्वया ॥ ७८ ॥ शिवःसम्यक्फलंतुभ्यंदास्यतिनाऽत्रसंशयः ॥ इतिदत्त्वावरंतस्यजगामभवनंस्वकम् ॥ अर्जुनोऽपितपस्तेपेशिवमुद्दिश्यवैतदा ॥ ७९ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायामर्जुनतपःकरणंनामचतुःषष्ठितमोऽध्यायः ॥६४॥ छ ॥ सूतउवाच ॥ स्नानंचविधिवत्कृत्वान्यासादिविधिवत्तथा ॥ ध्यानंचैवयथोक्तंचन्यासोक्तंयत्तथाऽकरोत् ॥ १ ॥ एकपादतलेनैवतिष्ठन्मुनिवरोयथा ॥ सूर्येदृष्टिंनिबध्यैवमंत्रमावर्तयन्स्थितः ॥ २ ॥ ॥

॥ ७९ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांअर्जुनतपःकरणंनामचतुःषष्ठितमोऽध्यायः ॥ ६४ ॥ ॥ ओंनमःशिवाय ॥ तपस्यत्यर्जुनेदैत्योमूकःशूकररूपभृत् ॥ प्राप्तस्तमर्जुनोदृष्ट्वाविचार्याहंतुमुद्यतः ॥ १ ॥ शिवश्चसगणस्तत्रप्राप्तोभक्तिपरीक्षितुं ॥ ताभ्यांदैत्योहतश्चैवंपंचषष्ठितमेस्थितं ॥ २ ॥ अर्जुनःस्तपःकर्तुंयंविधिंकृतवांस्तमाह॥स्नानमिति॥ न्यासादिषडंगन्यासादि ॥ यथोक्तंशास्त्रोक्तम् ॥ १ ॥ २ ॥ ॥ ॥

तपसइति ॥ अर्जुनस्येतिशेषः ॥ ३ ॥ ४ ॥ ॥ ५ ॥ तेदेवाःनिश्चयंस्वकार्यविषयकम् ॥ समागतइति ॥ अर्जुनसमीपेइतिशेषः ॥ ६ ॥ सौकरंसूकरसंबंधि ॥ मायिनेति ॥ मायिनाकपटयुक्तेनदुर्योधनेनाऽर्जुनंप्रतिप्रेषितइतिसंबंधः ॥७॥ तस्यदैत्यस्यपराक्रममाह ॥ शृंगमिति ॥ वृक्षानिति ॥ छिंदन्नित्युभयत्र संबध्यते ॥ ८ ॥ पुनःकिंकुर्वन्नागतस्तदाह ॥ शब्दमिति ॥ तंदैत्यम् ॥ विचारेऽयंहंतव्योनवेतिविचारणे ॥ ९ ॥ १० ॥ आख्यातीति ॥ अयंशत्रुरेवेतिममम नःकथयतीत्यर्थः ॥११॥ तदीयःहतदैत्यसंबंधी ॥ १२ ॥ सखादुर्योधनस्येतिशेषः ॥ तदेवव्यनक्ति ॥ दुर्योधनेति ॥ १३ ॥ कोहितावहःसखाभवतितदाह ॥

तपसस्तेजसाव्याप्तादेवाश्चविस्मयंययुः ॥ पुनश्चैवशिवंयातास्त्वदर्थेतपआहितम् ॥३॥ यदिच्छतिनरःसोऽयंकिंन यच्छसिवैप्रभो ॥ इत्युक्त्वाचस्तुतिंचक्रुर्विविधांदेवतास्तदा ॥ ४ ॥ तदीयंतुवचःश्रुत्वाशिवोवचनमब्रवीत् ॥ गम्यतां वश्चकार्यंवैकरिष्यामिनसंशयः ॥ ५ ॥ परावृत्यगतास्तेवैनिश्चयंपरमंगताः ॥ एतस्मिन्नंतरेदैत्योमूकनामासमागतः ॥ ६ ॥ सौकरंरूपमास्थायप्रेषितश्चदुरात्मना ॥ दुर्योधनेनविप्रेंद्रामायिनाचाऽर्जुनंतदा ॥ ७ ॥ यत्राऽर्जुनश्च तिष्ठेततेनमार्गेणवैतदा ॥ शृंगंचपर्वतस्यैवछिंदन्वृक्षाननेकशः ॥ ८ ॥ शब्दंचविविधंकुर्वन्शीघ्रवेगेनसंयुतः ॥ अर्जुनोऽपिचतंदृष्ट्वाविचारेतत्परोह्यभूत् ॥ ९ ॥ कोऽयंचकुतआयातःक्रूरकर्माचदृश्यते ॥ ममाऽनिष्टंध्रुवंकर्तुंसमागच्छत्यसंशयम् ॥ १० ॥ ममैवंमनआख्यातिशत्रुरेवनसंशयः ॥ इत्युक्त्वामनसिपार्थोविचारपरमानसः ॥११ ॥ बहवो मेहताःपूर्वंदैत्याश्चदानवास्तदा ॥ तदीयःकश्चिदायातिवैरंशोधयितुंपुनः ॥ १२ ॥ समायातिनसंदेहोनाऽत्रकार्या विचारणा ॥ अथवाचसखाकश्चिद्दुर्योधनहितावहः ॥ १३ ॥ यस्मिन्दृष्टेप्रसीदेतमनःसहितमावहेत् ॥ यस्मिन्दृष्टे तदेवेहकलुषंशत्रुरेवच ॥ १४ ॥ आचारःकुलमाख्यातिवपुराख्यातिभोजनम् ॥ वचनंश्रुतमाख्यातिस्नेहमाख्याति लोचनं ॥ १५ ॥ आकरेणतथागत्याचेष्टयाभाषितैरिह ॥ मनसश्चतथावृत्त्याज्ञायतेऽतर्गतंमनः ॥ १६ ॥

यस्मिन्निति ॥ प्रसीदेतप्रसीदेत् ॥ प्रसादयुक्तंभवेदित्यर्थः ॥ शत्रुःकोभवतितदाह ॥ यस्मिन्निति ॥ तदेवमनएव ॥ कलुषंदुःखितं ॥ १४ ॥ आचारःसदाचारः ॥ आख्यातिकथयति ॥ निश्चाययतीतियावत् ॥ वचनंभाषणम्कर्तृश्रुतंशास्त्रम् ॥ लोचनंकर्तृ ॥ १५॥ परहृद्गताभिप्रायज्ञानेकारणान्याह॥आकारेणेति ॥ आकारेणआकृत्यागत्यागमनागमनेनचेष्टयाअन्यक्रिययाभाषितैःभाषणैःतथामनसोवृत्यातर्कितपरचित्तवृत्त्याअंतर्गतंमनःहृद्गतोभिप्रायोज्ञायतइत्यर्थः ॥ १६ ॥

एवंनेत्रेणापिपराभिप्रायोगम्यतइत्यभिप्रेत्यतदाकारभेदानाह ॥ उज्वलमिति ॥ उज्वलंदीप्तिमत् ॥ सरसंप्रीतियुक्तम् ॥ तस्यनेत्रस्यभावाःचेष्टाः ॥ १७ ॥ कदाकीदृशंभवतितदाह ॥ उज्वलमिति ॥ १८ ॥ तस्मिन्दैत्ये ॥ १९ ॥ गुरोःव्यासस्य ॥ २० ॥ एतदर्थेदुष्टहननार्थे ॥ स्वायुधानीति ॥ रक्षितानीतिशेषः ॥ ईदृशदुष्टहननेननदोषइतिभावः ॥ संधयन् धनुष्यारोपयन् ॥ स्थितइति ॥ अर्जुनइतिशेषः ॥ २१ ॥ २२ ॥ कीदृशंभिल्लरूपंभगवताधृतंतदाह ॥ वद्धकच्छइति ॥ परिहितकौपीनइत्यर्थः ॥ श्वेतरेखाःलेपद्रव्यकृताः ॥ २३ ॥ तूणकंतूणीरम् ॥ तथाभिल्लरूपधारिणः ॥ २४ ॥ २५ ॥ व्यानशे

उज्वलंसरसंचैववक्रमारक्तमेवच ॥ नेत्रंचतुर्विधंप्रोक्तंतस्यभावाःपृथग्विधाः ॥ १७ ॥ उज्वलंमित्रसंयोगेसरसंपुत्रदर्शने ॥ वक्रंचकामिनीयोगेचाऽऽरक्तंशत्रुदर्शने ॥१८॥ तस्मिन्ममतुसर्वाणिकलुषाणींद्रियाणिच ॥ अयंशत्रुर्भवेदेवमारणीयोनसंशयः ॥१९ ॥ गुरोश्चवचनंमेऽद्यवर्ततेदुःखदस्त्वया ॥ हंतव्यःसर्वथाराजन्नाऽत्रकार्याचिरणा ॥२०॥ एतदर्थेस्वायुधानिमयाचैवनसंशयः ॥ इतिविचार्यतत्रैववाणंचसंधयन्स्थितः ॥ २१ ॥ शिवोऽपिस्वगणैःसार्धंभिल्लरूपंविधायच ॥ अर्जुनस्यचरक्षार्थंपरीक्षार्थंसमागतः ॥ २२ ॥ वद्धकच्छश्चवल्लीभिर्बध्वाकेशान्हरस्तदा ॥ शरीरेश्वेतरेखाश्चधनुर्वाणयुतःस्वयम् ॥ २३ ॥ बाणानांतूणकंपृष्ठेधृत्वासोवैजगामह ॥ गणाश्चैवतथाजाताभिल्लराजोऽभवच्छिवः ॥ २४॥ शब्दांश्चविविधान्कृत्वाजगामवाहिनीपतिः ॥ शूकरस्यचसेनायाःशब्दश्चप्रदिशोदिशः ॥ २५ ॥ व्यानशेवनशब्देनव्याकुलश्चाऽर्जुनस्तदा ॥ पर्वतस्थाश्चयेसर्वेतेसर्वेव्याकुलास्तदा ॥ २६ ॥ अहोकिंचभवेदेवशिवःशुभंकरोतुच ॥ मयाचैवश्रुतंपूर्वंकृष्णेनकथितंपुनः ॥ २७ ॥ व्यासेनकथितंचैवस्मृत्यावेदैस्तथापुनः ॥ शिवःशुभकरःप्रोक्तःशिवःसुखकरःसदा ॥ २८॥ भुक्तिदश्चपरंप्रोक्तोमुक्तिदोनाऽत्रसंशयः ॥ तन्नामस्मरतांपुंसांकल्याणंजायतेध्रुवम् ॥ २९ ॥ भजतांसर्वभावेनदुःखंपापंचनश्यति ॥ यदिकदाचिज्जायेततदाकर्मसमुद्भवं ॥ ३० ॥

व्याप्तवान् ॥ शब्दइतिसंवध्यते ॥ वनशब्देनवनोद्भूतप्रतिध्वनिना ॥ २६ ॥ एतत्सर्वंदृष्ट्वार्जुनोयदचिंतयत्तदाह ॥ अहोइति ॥ २७ ॥ श्रीकृष्णादिभिर्यत्कथितंतदाह ॥ शिवइति ॥ २८ ॥ २९ ॥ सर्वभावेनसर्वप्रकारेण ॥ ननुशिवभक्तानामपिदुःखादिकंदृश्यतइतिचेत्तत्राह ॥ यदीति ॥ यदिदुःखंजायेततदातत्कर्ममूलकमेवेत्यर्थः ॥ तदपिशिवभजनान्नश्येदेवेतिभावः ॥ ३० ॥ ॥ ॥

ननुतर्हिशिवभजनंव्यर्थमेवस्यादित्यतआह ॥ बहुनीति ॥ बहुन्यपिकर्मबलाद्दुःखेभाविनिसतिसईश्वरोऽल्पमेवदुःखंददातीत्यर्थः ॥ अथवेति ॥ यदिमह
दुःखंस्यात्तदाप्रारब्धकर्मणएवभोगइत्यर्थः ॥ ३१ ॥ तदेति ॥ तदापिबहुफलेदातव्येल्पेनैवफलेनभोगंनिःतीर्यसमाप्यशंकरस्तद्दुःखंदूरीकुर्यादित्यर्थः ॥
॥ ३२ ॥ शंकरःसर्वंकर्तुंशक्नोतीत्याह ॥ विषमिति ॥ समर्थःशक्तःनिषिध्यतेवार्यतेकिंपरैरितिशेषः ॥ अपितुनेत्यर्थः ॥३३॥ यथेति ॥ यथायेनप्रकारेण
तस्यभक्तस्यशुभंभावितत्समाचरेत्कुर्यात् ॥ शंकरइत्यर्थः ॥ एतेनशंकरेण ॥ ३४ ॥ ततःतस्मात्कारणात् ॥ ननुपूर्वंव्रतंगृहीतमधुनात्यक्तंचेत्कुतःशुभंभ
वेदितआह ॥ शुभस्येति ॥ शुभफलस्यदानेनभक्तरक्षणेमानोभिमानःशंकरस्यभवतीत्यर्थः ॥ ३५ ॥ इदानींशिवभक्तेःकथंबुद्धिःकर्तव्येतितत्रार्जुनआह ॥ इती

बहुनिभाविनिनूनमल्पंचैवसयच्छति ॥ अथवाप्रारब्धस्यैवभोगश्चैवनसंशयः ॥ ३१ ॥ तदाबहुफलेऽल्पेनभोगंनि
स्तीर्यशंकरः ॥ कदाचिदिच्छयातच्चदूरीकुर्यान्नसंशयः ॥३२॥ विषंचैवाऽमृतंकुर्यादमृतंविषमेवच ॥ यदिच्छतिकरो
त्येवसमर्थःकिंनिषिध्यते ॥ ३३ ॥ यथाचैवशुभंतस्यभावितच्चसमाचरेत् ॥ एतेनचव्रतंपूर्वंगृहीतंभक्तरक्षणम् ॥ ३४ ॥
ततश्चैवशुभंभाविनाऽत्रकार्याविचारणा ॥ शुभस्यशरणेमानोभवतीतिसुनिश्चितम् ॥ ३५ ॥ इतिविचार्यमयापिह्ये
तैर्भक्तैःपुरातनैः ॥ भाविभिश्चसदाभक्तैरक्षणीयंमनःस्थिरम् ॥ ३६ ॥ लक्ष्मीर्गच्छतुवातिष्ठेन्मरणंनिकटेपुरः ॥ निंदां
वाऽथप्रकुर्वंतुस्तुतिंवादुःखसंचयः ॥ ३७॥ जायतांयदिजायेतशंकरःसुखदःसदा ॥ कदाचिच्चपरीक्षार्थंदुःखंयच्छ
तिवैशिवः ॥ ३८ ॥ अंतेचसुखदःप्रोक्तोदयालुत्वान्नसंशयः ॥ यथाचैवसुवर्णंचशोधितंशुद्धतांव्रजेत् ॥ ३९ ॥ एवंचै
वमयापूर्वंश्रुतंमुनिमुखात्तदा ॥ तद्भजनेनममाऽद्यैवशुभंस्यान्नात्रसंशयः ॥ ४० ॥ ॥

ति ॥३६॥ लक्ष्मीरिति ॥ लक्ष्मीर्गच्छतुयद्वातिष्ठतु ॥ मरणंनिकटेस्तीत्यादिकंविचार्यविरक्ततयास्थेयमित्यर्थः॥स्तुतिमिति॥जनाइतिशेषः॥एतदेवभर्तृहरिणोक्त
म् ॥ निंदंतुनीतिनिपुणायदिवास्तुवंतुलक्ष्मीःसमाविशतुगच्छतुवायथेष्टम् ॥ अद्यैववामरणमस्तुयुगांतरेवान्याय्यात्पथःप्रविचलंतिपदंनधीराइति ॥ ३७ ॥
जायतामिति ॥ यदिदुःखसंचयोजायेततर्हिजायताम् ॥ शंकरःसुखंदास्यत्येवेत्यर्थः ॥ नन्विदानींकुतोनसुखंददातीत्यत्राह ॥ कदाचिदिति ॥३८॥अंतेअ
ल्पदुःखांते ॥ अत्रदृष्टांतमाह ॥ यथेति ॥ यथासुवर्णंपाकादिनाशोधितंशुद्धंभवतितथाशिवभक्तःशुद्धतांव्रजेदित्यर्थः ॥ ३९ ॥ मुनिमुखात्व्यासमु
खात् ॥ तद्भजनेनशिवभजनेन ॥ ४० ॥ ॥ ॥ ॥

मोचनावधीति ॥ मोचनपर्यंतमित्यर्थः ॥ ४१ ॥ शिवइति ॥ शिवोपिसूकरस्यपृष्ठतोलग्नःसन्नायातिस्मेत्यर्थः ॥ तयोःशिवार्जुनयोः ॥ दृश्यतइति ॥ सोयंशूकरःशृंगतुल्यःपर्वतशिखरतुल्योदृश्यतेस्मेत्यर्थः ॥ ४२ ॥ ननुकिमर्थंशिवआयातइत्यतआह ॥ ममेति ॥ भक्तमर्जुनंहन्यात् ॥ शूकरइतिशेषः ॥ ताभ्यांशिवार्जुनाभ्याम् ॥ ४३ ॥ पुच्छइति ॥ शूकरस्येतिशेषः ॥ तयोर्बाणयोर्यागतिरभवत्तामाह ॥ शिवस्येति ॥ शीघ्रगइति ॥ अभवदितिशेषः ॥४४॥ तस्येति ॥ अर्जुनस्यबाणःतस्यशूकरस्यपुच्छपर्यंतंगत्वातस्यैवपार्श्वेपपातेत्यर्थः ॥ ४५ ॥ श्रेष्ठाःहेशौनकादयः ॥ ४६ ॥ तौशिवार्जुनौ ॥ स्थिताविति

इत्येवंचविचारंचकरोतियावदेवहि ॥ तावच्चशूकरःप्राप्तोबाणस्यमोचनावधि ॥ ४१ ॥ शिवोऽपिपृष्ठतोलग्नोह्यायातिशूकरस्यह ॥ तयोर्मध्येतदासोयंदृश्यतेशृंगमद्भुतम् ॥ ४२ ॥ ममभक्तंचमाहन्याच्छिवःशीघ्रतरंगतः ॥ एकस्मिन्समयेताभ्यांकृतंबाणविमोक्षणम् ॥ ४३ ॥ शिवबाणश्चपुच्छेवैह्यर्जुनस्यमुखेतदा ॥ शिवस्यपुच्छतोगत्वामुखेनिःसृत्यशीघ्रगः ॥ ४४ ॥ भूमौचलीनतांयातस्तस्यवैपुच्छतोगतः ॥ पपातपार्श्वेतस्यैवबाणश्चैवाऽर्जुनस्यच ॥ ४५ ॥ शूकरस्तत्क्षणंश्रेष्ठामृतोभूमौपपातह ॥ देवाहर्षपरंप्रापुःपुष्पवृष्टिंप्रचक्रिरे ॥ ४६ ॥ शिवस्तुष्टमनाह्यासीदर्जुनःसुखतांगतः ॥ दैत्यस्यचतदारूपंक्रूरंदृष्ट्वाचतौतदा ॥ ४७ ॥ अर्जुनश्चविशेषेणह्यहोकपटमद्भुतम् ॥ ईश्वरेणममाद्यैवबुद्धिर्दत्तानसंशयः ॥ ४८ ॥ इतिविचार्यतत्रैवतदाशिवशिवेतिच ॥ ४९ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांअर्जुनदुःखशांतिसंभवोनामपंचःषष्टितमोऽध्यायः ॥६५॥छ॥ सूतउवाच ॥ शिवोऽपिचस्वभृत्यंवैप्रेरयामासवैतदा ॥ बाणार्थेचततःश्रेष्ठाअर्जुनोह्यागतस्तदा ॥ १ ॥ एकस्मिन्समयेप्राप्तौबाणार्थेचगणार्जुनौ ॥ अर्जुनस्तंपराभर्त्स्यबाणंचैवाऽग्रहीत्तदा ॥ २ ॥ गणःप्रोवाचतंतत्रकिमर्थंगृह्यतेत्वया ॥ बाणश्चैवाऽस्मदीयोवैमुच्यतामृषिसत्तम ॥ ३ ॥

शेषः ॥ ४७ ॥ अर्जुनस्तुतत्सर्वंछलमेवज्ञातवानित्याह ॥ अहोइति ॥ ४८ ॥ तदेति ॥ तस्मिन्कालेअर्जुनःशिवशिवेतिजपन्नातिष्ठदित्यर्थः ॥ ४९ ॥ इतिश्रीशैवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यामर्जुनदुःखशांतिसंभवोनामपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ॐनमःशिवाय ॥ स्वभृत्यार्जुनयोर्वादंश्रुत्वावाणार्थमीश्वरः ॥ भिल्लोभूत्वागतश्चैवषट्षष्टितमईर्यते ॥ १ ॥ शिवप्रेरितगणार्जुनौस्वस्वबाणाहरणार्थमागतावित्याह ॥ शिवइति ॥ हेश्रेष्ठाःशौनकादयः ॥ १ ॥ तंगणम् ॥ पराभर्त्स्यनिभर्त्स्य ॥ २ ॥ तमर्जुनम् ॥ ३ ॥ ॥ ॥

अर्जुनोयदब्रवीत्तदाह ॥ अज्ञात्वेति ॥ ४ ॥ अर्जुनःशरेस्वत्वमदर्शयदित्याह ॥ बाणइति ॥ बाणस्थानिस्वकृताचिन्हान्याह ॥ रेखेति ॥ रेखास्वकृतारेषा ॥ रूपमाकारः ॥ पिच्छानिपृष्ठतोलग्नानिमयूरबर्हाणि ॥ अस्मिन्बाणेसंतीतिशेषः ॥ मन्नामांकितइति ॥ बाणइतिशेषः ॥ ५ ॥ जातइति ॥ बाणइतिसंबध्यते ॥ स्वभावइति ॥ यतःअसन्नपित्वदीयोबाणोस्मदीयइत्युच्यतेसोयंतवजातिस्वभावोदुष्परिहरइत्यर्थः ॥ ६ ॥ भिल्लोयदब्रवीत्तदाह ॥ श्रूयतामिति ॥ ७ ॥ भाषणमिति ॥ मदीयोबाणइत्याकारकमित्यर्थः ॥ वाहिनीपतिंसेनापतिम् ॥ ८ ॥ इदानींस्वस्वामिनमाह ॥ बहुभिरिति ॥ आसतेआस्ते ॥

इत्युक्तश्चाऽर्जुनस्तर्हिवचनंचेदमब्रवीत् ॥ अज्ञात्वावदसिकिंचमूर्खोसित्वंवनेचर ॥ ४ ॥ बाणश्चमोचितोमेऽद्यत्वदीयश्चकथंपुनः ॥ रेखारूपंचपिच्छानिमन्नामांकितएवच ॥ ५ ॥ त्वदीयश्चकथंजातःस्वभावोदुस्त्यजस्तव ॥ इत्येवंचतदाश्रुत्वाभिल्लोवाक्यमुपाददे ॥ ६ ॥ विहस्यश्रूयतांरेत्वंनतपःक्रियतेत्वया ॥ वेषतश्चतपस्वित्वंनयथार्थंप्रदृश्यते ॥ ७ ॥ तपस्वीचकथंमिथ्याभाषणंकुरुतेनरः ॥ नैकाकिनंचमांत्वंचजानीहिवाहिनीपतिम् ॥ ८ ॥ बहुभिर्वनभिल्लैश्चयुक्तःस्वामीसआसते ॥ समर्थःसर्वथाकर्तुंनिग्रहानुग्रहौपुनः ॥ ९ ॥ तस्यबाणश्चवर्ततेयोनीतश्चत्वयाऽधुना ॥ अयंबाणश्चतेपार्श्वेस्थास्यतिनकदाचन ॥ १० ॥ तपःफलंकथंत्वंचहातुमिच्छसितापस ॥ चौर्याच्छलाच्चमानाच्चविस्मयात्सत्यमोचनात् ॥ ११ ॥ तपश्चक्षीयतेसत्यमेतदेवश्रुतंमया ॥ तस्माच्चतपसस्तेऽद्यभविष्यतिकुतःफलम् ॥ १२ ॥ तस्माच्चमुच्यतांबाणःकृतघ्नस्त्वंभविष्यसि ॥ ममैवस्वामिनाबाणोतवार्थेमोचितोध्रुवम् ॥ १३ ॥ शत्रुश्चमारितस्तेनपुनर्बाणश्चरक्षितः ॥ अत्यंतंचकृतज्ञोऽसितपःशुभतरंयथा ॥ १४ ॥ सत्यंनभाषसेत्वंचकिमन्यांसिद्धिमिच्छसि ॥ प्रयोजनंतेबाणेनस्वामीचयाच्यतांमम ॥ १५ ॥ ॥ ॥

॥ ९ ॥ इदानीमर्जुनभाषणस्यमिथ्यात्वंदर्शयति ॥ तस्येति ॥ तस्यमत्स्वामिनः शिवस्येत्यर्थः ॥ अतएवाह ॥ अयमिति ॥ १० ॥ अनेनकर्मणात्वत्तपःफलंनष्टंभवेदित्याह ॥ तपइति ॥ तत्रहेतूनाह ॥ चौर्यादिति ॥ मानादभिमानात् ॥ विस्मयादिति ॥ अस्थानएवाश्चर्यकरणादित्यर्थः ॥ ११ ॥ १२ ॥ कृतघ्नइति ॥ यदिबाणंनदास्यसि तर्हित्वंकृतघ्नोभविष्यसीत्यर्थः ॥ स्वामिनाशिवेन ॥ १३ ॥ शत्रुःपूर्वोक्तोदैत्यः ॥ तेनबाणेन ॥ यदिबाणंदास्यसितर्हितवसर्वंसफलंभवेदित्याह ॥ अत्यंतमिति ॥ यथातवतपःशुभतरंभवेत्तथाकुर्वितिशेषः ॥ अत्यंतंचकृतघ्नोसितपःशुभतरंनतइतिपाठांतरम् ॥ १४ ॥ स्वामीशिवः ॥ १५ ॥

ननुतस्यैकएवबाणश्चेत्सकथंदास्यतीत्यतआह ॥ ईदृशानिति ॥ १६ ॥ मत्प्रभुःप्रार्थितश्चेन्नकेवलंबाणंदास्यत्यपितुअन्यदपीत्याह ॥ प्रार्थनीयइति ॥ १७ ॥ ॥ १८ ॥ पार्थोयदब्रवीत्तदाह ॥ भिल्लेति ॥ १९ ॥ मयासहयुद्धादिकंकर्तुंत्वमयोग्योसीत्याह ॥ अहमिति ॥ अहंराजास्मि ॥ त्वंचौरोसि ॥ अनयोर्युद्धंकथंभवेद्यदिक्रियेतेतत्रायोग्यतास्पष्टैवेत्यर्थः ॥ तर्हिकैःसहयुद्धादिकंकार्यमित्यत्राह ॥ युद्धमिति ॥ समैःतुल्ययोग्यताकैः ॥ अधमइति ॥ अधमेनसाकंनकार्यमित्यर्थः ॥ २० ॥ ननुमत्स्वामिनासहयुद्धंकर्तव्यमित्यतआह ॥ तस्मादिति ॥ इदानींस्वस्याभिल्लस्यचवैषम्यंदर्शयति ॥ दातारइति ॥ २१ ॥ अतोभिल्लराजोमयायाचितुमयोग्यइत्याह ॥ कथमिति ॥ हेवनेचरत्वमपिबाणंतमेवकुतोनयाचसेमांकिमर्थंयाचसइत्यर्थः ॥ २२ ॥ यदियाचसेतर्हिमयादीयतइत्याह ॥

ईदृशांश्चतथाबाणान्बहून्दातुंक्षमःस्वयम् ॥ राजाचवर्ततेमेऽद्यकिंनैवयाच्यतेत्वया ॥१६॥ प्रार्थनीयोविशेषेणदास्यतिविविधंफलम् ॥ उपकारंपरित्यज्यह्यपकारंसमीहसे ॥१७॥ नतद्युक्तंत्वयाद्यैवक्रियतेत्यजचापलम् ॥ इत्येवंवचनंश्रुत्वापार्थोवाक्यमथाऽब्रवीत् ॥ १८ ॥ शृणुभिल्लप्रवक्ष्यामिह्यसत्यंतवभाषणम् ॥ यथाजातिस्तथात्वंचजानाम्येवंवनेचर ॥ १९ ॥ अहंराजाभवांश्चौरःकथंयुद्धमयुक्तता ॥ युद्धंमैत्र्यंसमैःकार्यंनाऽधमेहिकदाचन ॥ २० ॥ तस्मात्तेचतथास्वामीभविष्यतिभवादृशः ॥ दातारश्चवयंप्रोक्ताश्चौराःप्रोक्तावनेचराः ॥ २१ ॥ कथंयाच्योमयाभिल्लोराजाएवचसांप्रतम् ॥ तमेवयाचसेनैवबाणंमांत्वंवनेचर ॥ २२ ॥ ददामितेतथाबाणंसंतिमेबहवोध्रुवम् ॥ राजाचआग्रहेणैवनदास्यतितृणंभवेत् ॥ २३ ॥ किंपुनश्चतथाबाणंप्रयच्छामिवनेचर ॥ यदिचिकीर्षतिबाणंकथंनागम्यतेऽधुना ॥ ॥ २४ ॥ यथागच्छतितेभर्ताकिमर्थंभाषसेधुना ॥ आगत्यचमयासार्द्धंयुद्धेजित्वाचमांपुनः ॥ २५ ॥ नीत्वाबाणंसुखंयातुविलंबःक्रियतेकथम् ॥ इत्येतद्वचनंश्रुत्वाभिल्लोवाक्यमथाऽब्रवीत् ॥ २६ ॥ ॥

ददामीति ॥ राजेति ॥ यदिराजाआग्रहेणबाणंनदास्यतितर्हितृणसदृशोभवेदित्यर्थः ॥ २३ ॥ किंपुनरिति ॥ कस्मात्कारणादित्यर्थः ॥ यदीति ॥ यदिभवान्बाणंबाणग्रहणंचिकीर्षतितर्ह्यधुनाकथंनागम्यतइत्यर्थः ॥ यदियुद्धंचिकीर्षास्यादितिपाठांतरम् ॥ २४ ॥ यथेति ॥ यथातवभर्तागच्छतितथात्वमपिगच्छ किमर्थमधुनाभाषसे ॥ नोचेत्तवभर्ताऽऽगत्यमांयुद्धेजित्वाबाणंनीत्वासुखंयात्वित्यग्रिमेणान्वयः ॥ २५ ॥ २६ ॥ ॥

भिल्लोयदब्रवीत्तदाह ॥ अज्ञइति ॥ अज्ञत्वमेवदर्शयति ॥ मरणमिति ॥ अन्यथायदिनददासितर्हिक्लेशभाजनंभविष्यसीत्यर्थः ॥ इत्युक्तइति ॥ २८ ॥ भिल्लेनेति शेषः ॥ श्रुतमिति ॥ मयोक्तंत्वयाश्रुतंइदानीमेवपश्यसिद्रक्ष्यसीत्यर्थः ॥ २९ ॥ इत्युक्तइति ॥ अर्जुनेनेतिशेषः ॥ आस्तइति ॥ वाहिनीपतिःशिवस्तिष्ठतीत्यर्थः ॥ उपागतइति ॥ शंकरइतिसंबध्यते ॥ ३० ॥ ३१ ॥ शिवेनगणंप्रतियदुक्तंतदाह ॥ पश्येति ॥ ३२ ॥ ३३ ॥ पृथिवीति ॥ सर्वापृथिवीतवहस्ततोयास्य

अज्ञोऽसित्वमृषिर्नासिमरणंत्वीहसेकथम् ॥ देहिबाणंसुखंतिष्ठह्यन्यथाक्लेशभाजनम् ॥ २७ ॥ इत्युक्तश्चपुनःप्राह शृणुत्वंचवनेचर ॥ आगमिष्यतियदास्वामीदर्शयिष्येफलंतदा ॥ २८ ॥ सिंहसृगालयोर्युद्धमुपहासकरंमहत् ॥ श्रुतं चपश्यसिलंचयथेच्छसितथाकुरु ॥ २९ ॥ इत्युक्तश्चगतस्तत्रयत्राऽऽस्तेवाहिनीपतिः ॥ सर्वंनिवेदयामासश्रुत्वाह र्षमुपागतः ॥ ३० ॥ आजगामस्वसैन्येनशंकरोभिल्लरूपधृक् ॥ अर्जुनश्चतदासेनांदृष्ट्वासंमुखमाययौ ॥ ३१ ॥ पुन र्गणंशिवश्चैवप्रेषयामासवैतदा ॥ पश्यसैन्यंतपस्विन्नस्त्वंचबाणंत्यजाऽधुना ॥ ३२ ॥ मरणंस्वल्पकार्यार्थेकथमिच्छसि सांप्रतम् ॥ भ्रातरस्तवदुःखार्ताःकलत्रंचततःपरम् ॥ ३३ ॥ पृथिवीहस्ततस्तेद्ययास्यतिचमतिर्मम ॥ इत्युक्तस्तंतथा ऽऽगत्यह्यर्जुनायनिवेदितम् ॥ ३४ ॥ तच्छ्रुत्वाचपुनःप्राहविपरीतंभविष्यति ॥ अद्याहंचैवतेबाणंददामिचमदीयकम् ॥ ३५ ॥ कुलस्यदूषणंचाऽहंभवामीतिनसंशयः ॥ भ्रातरश्चैवदुःखार्त्ताभवंतिनाऽन्यथाध्रुवम् ॥ ३६ ॥ विद्याश्चनि ष्फलामेस्युस्तस्मादागच्छवैध्रुवं ॥ सिंहश्चैवसृगालाद्वाभीतोनैवमयाश्रुतः ॥ ३७ ॥ इत्युक्तश्चपुनर्गत्वायदुक्तंचानि वेदितम् ॥ सोपिहर्षसमायुक्तमअर्जुनंचाऽगमत्तदा ॥ ३८ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवागमनंना मषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

तीतिमममतिरित्यर्थः ॥ इत्युक्तइति ॥ शिवेनेतिशेषः ॥ तमर्जुनम् ॥ निवेदितमिति ॥ गणेनेतिशेषः ॥ ३४ ॥ प्राहेति ॥ अर्जुनइतिशेषः ॥ यत्प्राहत दाह ॥ विपरीतमिति ॥ जयपराजयविषयइतिभावः ॥ ३५ ॥ कुलस्येति ॥ यदिददामितर्हिकुलस्यदूषणंभवेयंभ्रातरश्चदुःखितानभवेयुरित्यर्थः ॥ अन्यथेति ॥ यदिनददामितर्हितन्नभवेदित्यर्थः ॥ ३६ ॥ ३७ ॥ गणेनापितथैवकथितमित्याह ॥ इत्युक्तइति ॥ सोपिशिवोपि ॥ ३८ ॥ इतिश्रीशिवमहापुराणज्ञान संहिताटीकायांसारबोधिन्यांशिवागमनंनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ ॥

॥ ओंनमःशिवाय ॥ भिल्लरूपभृतःशंभोरर्जुनस्यचसंयुगे ॥ परस्परंजायमानेसर्वभूतभयावहे ॥ १ ॥ तदाशिवःप्रसन्नःसन्नर्जुनायवरंददौ ॥ इत्याख्यानं सप्तषष्टितमेऽध्यायेप्रकीर्त्यते ॥ २ ॥ सोपीति ॥ सोर्जुनोपितंदृष्ट्वाशिवस्यध्यानंचकृत्वापुनस्तत्रगत्वायुद्धंचक्रइत्यन्वयः ॥ १ ॥ तंअर्जुनं ॥ २ ॥ तेषां गणानां ॥ तैःगणैःगदायुधंगदारूपमायुधंक्षिप्तंतत्सर्वंपराम्रृशत्तदनुरूपप्रतीकारकरणेनांगीचकार ॥ ३ ॥ तेनार्जुनेन ॥ ४ ॥ ५ ॥ तत्रभिल्लरूपेशिवे ॥ ६ ॥ ते नशिवेन ॥ कवचमिति ॥ अर्जुनस्येतिशेषः ॥ एवमग्रेपि ॥ तेनशिवेन ॥ तदेति ॥ आयुधाभावदशायामित्यर्थः ॥ मल्लसमुद्भवंमल्लनिर्मितं ॥ मल्लयुद्धमित्यर्थः ॥ ७ ॥

॥ सूतउवाच ॥ तमागतंतदादृष्ट्वाध्यानंकृत्वाशिवस्यच ॥ गत्वातत्रपुनःसोऽपियुद्धंचक्रेसुदारुणम् ॥ १ ॥ गणाश्चविविधैस्तत्रह्यायुधैस्तमपीडयन् ॥ शिवोऽपिचस्वयंतत्रयुद्धंचक्रेसुदारुणम् ॥ २ ॥ अर्जुनश्चतदातेषांबाणावलिमथाऽच्छिनत् ॥ यदायुधंचतैःक्षिप्तंतत्सर्वंचपराम्रृशत् ॥ ३ ॥ पीडितास्तेगणास्तेनययुश्चैवदिशोदश ॥ गणाश्चवारितास्तेननाजग्मुरर्जुनंप्रति ॥ ४ ॥ शिवश्चैवाऽर्जुनश्चैवयुयुधातेपरस्परम् ॥ शिवोपिमनसानूनंदयांकृत्वाऽर्जुनंह्यगात् ॥ ५ ॥ अर्जुनश्चदृढंतत्रप्रहारंकृतवांस्तदा ॥ आयुधानिशिवश्चैवह्यर्जुनस्याऽऽहनत्तदा ॥ ६ ॥ कवचंचहतंतेनशरीरंकेवलंस्थितम् ॥ तदार्जुनःशिवेनैवयुद्धंमल्लसमुद्भवम् ॥ ७ ॥ चकारमेदिनीदुःखंप्राप्तासासससमुद्रका ॥ देवादुःखंसमायाताःकिंभविष्यतिहापुनः ॥ ८ ॥ एतस्मिन्नंतरेदेवःशिवोगगनमास्थितः ॥ युद्धंचकारतत्रस्थोह्यर्जुनश्चतथाऽकरोत् ॥ ९ ॥ उड्डीयोड्डीयतौयुद्धंचक्रतुर्देवपार्थिवौ ॥ अर्जुनोप्यंतरंज्ञात्वादधारपादयोःशिवम् ॥ १० ॥ धृत्वापादंतदासोवैभ्रामयामासवैतदा ॥ वश्यत्वदर्शनार्थायशिवेनैवंकृतंतदा ॥ ११ ॥ पश्चाद्विहस्यतत्रैवशंकरोरूपमद्भुतम् ॥ दर्शयामासहस्ताच्चचलित्वासुंदरंशुभम् ॥ १२ ॥ ॥ ॥ ॥

चकारेति ॥ अस्यपूर्वेणान्वयः ॥ प्राप्तेति ॥ भारासहिष्णुत्वादितिभावः ॥ ८ ॥ पृथिव्यादुःखंदृष्ट्वाभगवान्यदकरोत्तदाह ॥ देवइति ॥ तत्रस्थःगगनेस्थितः ॥ ९ ॥ देवपार्थिवौशिवार्जुनौ ॥ अंतरमवसरम् ॥ १० ॥ सइति ॥ सोर्जुनःशिवस्यपादंधृत्वाभ्रामयामासेत्यर्थः ॥ ननुनरेणभगवतःसाम्यंकथंलब्धमतआह ॥ वश्यत्वेति ॥ भक्ताधीनत्वप्रदर्शनार्थमित्यर्थः ॥ ११ ॥ अतएवाह ॥ पश्चादिति ॥ शंकरोर्जुनविलसितंदृष्ट्वाविहस्यरूपमद्भुतंविस्मापकंदर्शयामासेत्यर्थः ॥ हस्तादिति ॥ अर्जुनस्येतिशेषः ॥ चलित्वादूरतोभूत्वा ॥ १२ ॥ ॥ ॥

हेऋषिश्रेष्ठाःशौनकादयः ॥ १३॥ तदार्जुनःखिन्नोभूत्वायदब्रवीत्तदाह ॥ अहोइति ॥ वृतःसंमानितः ॥ १४॥ प्रभोःशिवस्य ॥ मायेति ॥ मायांतुप्रकृतिंविद्यान्मा यिनंतुमहेश्वरमितिश्रुत्युक्तामायेत्यर्थः ॥ प्रभुणेत्युभयान्वयि ॥ १५ ॥ ततोर्जुनोयदकरोत्तदाह ॥ इतीति ॥ १६ ॥ ततःशिवंयदुवाचतदाह ॥ शंकरइति ॥ ॥ १७ ॥ शुचंशोकम् ॥ १८ ॥ विलज्जंलज्जाराहित्येनोत्साहयुक्तं ॥ गणैःप्रयोज्यकर्तृभिःस्वगणैःस्वामिनःस्वस्यगुणैःऐश्वर्यादिभिः ॥ १९ ॥ मानित

यथोक्तंवेदशास्त्रेणपुराणपुरुषोत्तमम् ॥ तंदृष्ट्वाचऋषिश्रेष्ठाअर्जुनोलज्जितःस्वयम् ॥ १३ ॥ अहोशिवःशिवःसोऽयं योमेप्रभुतयावृतः ॥ त्रिलोकीशःस्वयंसाक्षाद्वाकृतंकिंमयाऽधुना ॥१४॥ बलवतीचप्रभोर्मायामायिनामपिमोहिनी ॥ किंकृतंरूपमाच्छाद्यप्रभुणाछलितोह्यहं ॥ १५ ॥ इतिविचार्यक्षंतव्यंक्षंतव्यंचपुनःपुनः ॥ उवाचपादयोस्तस्यपतिला शंकरस्यच ॥ १६ ॥ शंकरोसिमहादेवक्षंतव्यंचमयाकृतम् ॥ इतिश्रुत्वातदाहास्यंकृत्वाचशंकरःपुनः ॥ १७ ॥ अर्जु नंचसमाश्वास्यभक्तोऽसिपुत्रसत्तम ॥ परीक्षार्थंमयातेऽद्यकृतमेवंशुचंजहि ॥ १८ ॥ इत्युक्त्वातंचहस्ताभ्यामुत्थाप्या र्जुनमेवच ॥ विलज्जंकारयामासगणैश्चस्वामिनोगुणैः ॥ १९ ॥ पुनःशिवोऽर्जुनंप्राहप्रसन्नोऽस्मिवरंशृणु ॥ प्रहारै स्ताडनंतेऽद्यपूजनंमानितंमया ॥ २० ॥ इच्छयाचकृतंमेऽद्यनापराधस्तवाऽधुना ॥ नाऽदेयंविद्यतेतुभ्यंयदिच्छसि शृणुष्वतत् ॥ २१ ॥ शत्रुषुतेयशोराजन्ख्यापनायाद्भुतंकृतम् ॥ दुःखंचैवनकर्तव्यंवैक्लव्यंचत्यजाऽधुना ॥२२॥ इ त्युक्तश्चपुनस्तत्रसावधानतयास्थितः ॥ उवाचशंकरंसोवैप्रभुणाकिंसमीहितम ॥ २३ ॥ वर्णनीयोमहादेवःकृपालु स्त्वंसदाशिवः ॥ इत्युक्त्वाचस्तुतिंतस्यचकारवेदसंमतां ॥ २४ ॥ अर्जुनउवाच ॥ नमस्तेदेवदेवायकैलासवासिनेन मः ॥ सदाशिवनमस्तुभ्यंपंचवक्त्रायतेनमः ॥ २५ ॥ कपर्दिनेनमस्तुभ्यंत्रिनेत्रायनमोस्तुते ॥ कुंडलिनेनमस्तुभ्यंसु मुखायनमोस्तुते ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

मिति ॥ अनेनभक्त्याकृतंताडनादिकमपिभगवतःप्रीतिकरंभवतीतिकथितम् ॥ २० ॥ ततःशिवोऽर्जुनस्यापराधशंकांपरिहरतिस्मेत्याह ॥ इच्छयेति ॥ ॥ २१ ॥ शिवोर्जुनंसांत्वयामासेत्याह ॥ शत्रुष्विति ॥ यशःयशसःख्यापनायप्रकाशनाय ॥ वैक्लव्यंविव्हलताम् ॥ २२ ॥ इत्युक्तइति ॥ शिवेनेतिशे षः ॥ सःअर्जुनः ॥ यदुवाचतदाह ॥ प्रभुणेति ॥ २३ ॥ तस्यशिवस्य ॥ २४ ॥ २५ ॥ कपर्दिनेजटाजूटधारिणे ॥ कुंडलिनेसर्परुद्राक्षमयकुंडलधारिणे ॥ २६ ॥

सहास्यवदनायहास्यसहितमुखयुक्ताय ॥ २७ ॥ २८ ॥ रुंडमालिनेनरकपालमालिने ॥ २९ ॥ कर्पूरगौरवायकर्पूरवच्छुभ्रत्वेनगौरवंमहत्वंयस्यतस्माइत्यर्थः ॥ ३० ॥ सुपादायशोभनचरणयुक्ताय ॥ ३१ ॥ सगुणायवस्तुतोनिर्गुणत्वेपिप्राणिकर्मफलदानार्थस्वीकृतगुणाय ॥ यत्किंचिदिति ॥ यत्किंचिज्जगतिरूपंसौंदर्यादिकंदृश्यतेतत्त्वदीयंतेजइत्यर्थः ॥ ३२ ॥ हेदेवशिव ॥ ३३ ॥ भगवतोवागाद्यगोचरत्वंदर्शयतिरमेत्याह ॥ योसीति ॥ ३४ ॥ ३५ ॥

प्रसन्नायसदातुभ्यंसहास्यवदनायच ॥ नीलकंठनमस्तुभ्यंसद्योजातायतेनमः ॥ २७ ॥ वृषध्वजनमस्तेस्तुवामांगगिरिजायच ॥ दशभुजायतेदेवनमस्तुभ्यंपरात्मने ॥ २८ ॥ डमरुकपालहस्तायनमस्तेरुंडमालिने ॥ शुद्धस्फटिकसंकाशकर्पूरगौरवायच ॥ २९ ॥ पिनाकपाणयेतुभ्यंत्रिशूलवरधारिणे ॥ व्याघ्रचर्मोत्तरीयायगजांबरविधारिणे ३० ॥ नागांगायनमस्तुभ्यंगंगाधरनमोस्तुते ॥ सुपादायनमस्तेस्तुमुक्तिदायनमोस्तुते ॥ ३१ ॥ अगुणायनमस्तेस्तुसगुणायनमोस्तुते ॥ यत्किंचिद्दृश्यतेरूपंतत्तेजस्तावकंस्मृतम् ॥ ३२ ॥ गुणांस्तेदेवसंख्यातुंवेदाश्चप्रभवंतिन ॥ किंपुनर्मंदबुद्धिश्चवर्णयामिसदाशिव ॥ ३३ ॥ योऽसिसोऽसिनमस्तुभ्यंकृपांकर्तुंममाऽर्हसि ॥ इतिश्रुत्वापुनःशंभुःप्रोवाचाऽर्जुनमेवच ॥ ३४ ॥ किंवरंत्वंवृणोषीहशीघ्रंवददादामिते ॥ इत्युक्तश्चाऽर्जुनस्तत्रप्रणिपत्यसदाशिवम् ॥ ३५ ॥ उवाचप्रीयतांत्वंचह्यंतर्यामितयास्थितः ॥ तथापिविप्रयतेमेऽद्यश्रूयतांचप्रभोत्वया ॥ ३६ ॥ शत्रूणांसंकटंयच्चतद्गतंदर्शनात्तव ॥ ऐहिकींचपरांसिद्धिंप्राप्नुयांचतथाकुरु ॥ ३७ ॥ इत्युक्त्वातंमनस्कृत्यबद्धांजलिपुटःस्थितः ॥ शिवोऽपिचतथाभूतंज्ञात्वास्वीयंतदाह्यदात् ॥ ३८ ॥ अस्त्रंपाशुपतंनामब्रह्मांडेदुर्जयंपरैः ॥ तस्मैददौतदाशंभुर्दुर्जयस्त्वंभविष्यसि ॥ ॥ ३९ ॥ अनेनसर्वशत्रूणांजयंकृत्वाशुभंकुरु ॥ कृष्णंचकथयिष्यामिसाहाय्यंतेकरिष्यति ॥ ४० ॥ सोवैममांशभूतश्चसतेकार्यंकरिष्यति ॥ राज्यंनिष्कंटकंप्राप्यधर्मान्नानाविधान्कुरु ॥ ४१ ॥ ॥ ॥

यदुवाचतदाह ॥ प्रीयतामिति ॥ मदिष्टंत्वंजानास्येवेत्यभिप्रेत्याह ॥ अंतर्यामितयेति ॥ ३६ ॥ परामिति ॥ यशःसंपादनेनोत्कृष्टांऐहिकींइहलोकेजायमानांसिद्धिमित्यर्थः ॥ ३७ ॥ तंशिवम् ॥ तथाभूतंपूर्णभक्तियुतं ॥ ३८ ॥ परैःशत्रुभिः ॥ तस्मैअर्जुनाय ॥ ददाविति ॥ त्वंदुर्जयोभविष्यसीतिवरंददावित्यर्थः ॥ ३९ ॥ अनेनपाशुपतास्त्रेण ॥ ननुमयैकेनकिंकर्तव्यमित्यतआह ॥ कृष्णमिति ॥ ४० ॥ सःकृष्णोयतोममांशभूतःअतःसतवकार्यंकरिष्यति ॥ धर्मान्यागादीन् ॥ ४१ ॥

शिवोर्जुनंप्रतिस्वप्रीत्यतिशयंदर्शयामासेत्याह ॥ हस्तमिति ॥ ४२॥ पूजितइति ॥ अर्जुनेनेतिशेषः ॥ शिवइति ॥ यदाशिवोंतर्दधेतत्रतदेत्यर्थः ॥४३॥ हर्षेति ॥ लब्धवरत्वादितिभावः ॥ ४४ ॥ हेऋषीश्वराःशौनकादयः ॥ ददुरिति ॥ अर्जुनायेतिशेषः ॥ ४५ ॥ पूजितइति ॥ देवैरितिशेषः ॥ अगमदिति ॥ अर्जुनइतिशेषः ॥ तेयुधिष्ठिरादयः ॥ तन्वाःशरीरस्य ॥ ४६ ॥ ४७ ॥ शकुनार्थंशुभफलसूचनार्थम् ॥ तेषांअर्जुनादीनांसर्ववृत्तांततपश्चर्यादिवार्ता ॥ ४८ ॥ शिवं

हस्तंचशिरसिधृत्वापूजयित्वाऽर्जुनंतदा ॥ हृदयालिंगनंकृत्वाभक्तवत्सलतांपुनः ॥ ४२ ॥ दर्शयित्वाजयंदत्वापूजितोंऽतरधीयत ॥ शिवश्चांऽतर्दधेतत्रह्यर्जुनोऽपिस्वमाश्रमं ॥ ४३ ॥ गत्वाहर्षसमायुक्तःप्रणनामयुधिष्ठिरम् ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह ॥ ४४ ॥ अप्सरसांतथानृत्यंजातंतत्रऋषीश्वराः ॥ देवाश्चैवतदासर्वेह्यायुधानिददुःस्वयम् ॥ ४५ ॥ पूजितश्चवरंप्राप्यभ्रातृनेवाऽगमत्तदा ॥ सर्वेतेभ्रातरश्चैवतन्वाःप्राणमिवाऽऽगतम् ॥ ४६ ॥ मिलित्वाचसुखंप्रापुर्द्रौपदीसुखमालभत् ॥ आश्रमेपुष्पवृष्टिश्चचंदनेनसमन्विता ॥ ४७ ॥ पपातशकुनार्थंवैतेषांचैवमहात्मनां ॥ तेऽपृच्छन्सर्ववृत्तांतंश्रुत्वाहर्षमुपागमन् ॥ ४८॥ शिवंपरंचसंतुष्टंपांडवाःसर्वएवहि ॥ धन्यश्चशंकरश्चैवनमस्कृत्यशिवंमुदा ॥ ४९ ॥ अवधिंचागतंज्ञात्वाजयश्चैवभविष्यति ॥ एतस्मिन्नंतरेकृष्णःश्रुत्वाऽर्जुनंसमागतम् ॥ ५०॥ मिलनायसमायातःश्रुत्वासुखमुपागतः ॥ अतश्चैवमयाप्रोक्तःशंकरःसर्वदुःखहा ॥ ५१ ॥ मयाचसेव्यतेसोवैभवद्भिरपिसेव्यताम् ॥ इत्युक्त्वाचगतस्तत्रकृष्णश्चद्वारकांप्रति ॥ ५२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायामर्जुनवरप्रदानंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ छ ॥ ऋषयऊचुः ॥ सूतसूतमहाभागसाधूक्तंहित्वयाऽनघ ॥ विधानंपार्थिवस्यैवयथोक्तमृषिणातदा ॥ अर्जुनायसुखार्थंचतत्त्वंब्रूहिविशेषतः ॥ १ ॥ ॥

कल्याणप्रदं ॥ धन्यइति ॥ शंकरोधन्यइत्युक्त्वेतिशेषः ॥ ४९ ॥ अवधिंजयसमयं ॥ भविष्यतीति ॥ एवंनिश्चितवंतइतिशेषः ॥ ५० ॥ मिलनायमेलनाय ॥ श्रुत्वाश्रवणमात्रेण ॥ श्रीकृष्णोपिशिवोपासनामनुमोदितवानित्याह ॥ अतइति ॥ ५१ ॥ सःशंकरः ॥ ५२ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यामर्जुनवरप्रदानंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ओंनमःशिवाय ॥ पार्थिवाराधनविधिंसूतआदिष्टवानृषीन् ॥ इत्यत्राख्यायतेवृत्तमष्टषष्टितमेशिवम् ॥ १ ॥ असकृच्छ्रुतस्यपार्थिवलिंगपूजनस्येतिकर्तव्यताकांक्षायामाहुः ॥ सूतेति ॥ ऋषिणाव्यासेन ॥ १ ॥ ॥

सहास्यवदनायहास्यसहितमुखयुक्ताय ॥ २७ ॥ २८ ॥ रुंडमालिनेनरकपालमालिने ॥ २९ ॥ कर्पूरगौरवायकर्पूरवच्छुभ्रत्वेनगौरवंमहत्वंयस्यतस्माइत्यर्थः ॥ ३० ॥ सुपादायशोभनचरणयुक्ताय ॥ ३१ ॥ सगुणायवस्तुतोनिर्गुणत्वेपिप्राणिकर्मफलदानार्थस्वीकृतगुणाय ॥ यत्किंचिदिति ॥ यत्किंचिज्जगतिरूपंसौंदर्यादिकंदृश्यतेतत्त्वदीयंतेजइत्यर्थः ॥ ३२ ॥ हेदेवाशिव ॥ ३३ ॥ भगवतोवागाद्यगोचरत्वंदर्शयतिस्मेत्याह ॥ योसीति ॥ ३४ ॥ ३५ ॥

प्रसन्नायसदातुभ्यंसहास्यवदनायच ॥ नीलकंठनमस्तुभ्यंसद्योजातायतेनमः ॥ २७ ॥ वृषध्वजनमस्तेस्तुवामांगगिरिजायच ॥ दशभुजायतेदेवनमस्तुभ्यंपरात्मने ॥ २८ ॥ डमरुकपालहस्तायनमस्तेरुंडमालिने ॥ शुद्धस्फटिकसंकाशकर्पूरगौरवायच ॥ २९ ॥ पिनाकपाणयेतुभ्यंत्रिशूलवरधारिणे ॥ व्याघ्रचर्मोत्तरीयायगजांबरविधारिणे ३० ॥ नागांगायनमस्तुभ्यंगंगाधरनमोस्तुते ॥ सुपादायनमस्तेस्तुमुक्तिदायनमोस्तुते ॥ ३१ ॥ अगुणायनमस्तेस्तुसगुणायनमोस्तुते ॥ यत्किंचिद्दृश्यतेरूपंतत्तेजस्तावकंस्मृतम् ॥ ३२ ॥ गुणांस्तेदेवसंख्यातुंवेदाश्चप्रभवंतिन ॥ किंपुनर्मंदबुद्धिश्चवर्णयामिसदाशिव ॥ ३३ ॥ योऽसिसोऽसिनमस्तुभ्यंकृपांकर्तुंममाऽर्हसि ॥ इतिश्रुत्वापुनःशंभुःप्रोवाचाऽर्जुनमेवच ॥ ३४ ॥ किंवरंत्वंवृणोषीहशीघ्रंवददददामिते ॥ इत्युक्तश्चाऽर्जुनस्तत्रप्रणिपत्यसदाशिवम् ॥ ३५ ॥ उवाच प्रीयतांत्वंचह्यंतर्यामितयास्थितः ॥ तथापिव्रियतेमेऽद्यश्रूयतांचप्रभोत्वया ॥ ३६ ॥ शत्रूणांसंकटंयच्चतद्गतंदर्शनात्तव ॥ ऐहिकींचपरांसिद्धिंप्राप्नुयांचतथाकुरु ॥ ३७ ॥ इत्युक्त्वातंमनस्कृत्यबद्धांजलिपुटःस्थितः ॥ शिवोऽपिचतथाभूतंज्ञात्वास्वीयंतदाह्यदात् ॥ ३८ ॥ अस्त्रंपाशुपतंनामब्रह्मांडेदुर्जयंपरैः ॥ तस्मैददौतदाशंभुर्दुर्जयस्त्वंभविष्यसि ॥ ॥ ३९ ॥ अनेनसर्वशत्रूणांजयंकृत्वाशुभंकुरु ॥ कृष्णंचकथयिष्यामिसाहाय्यंतेकरिष्यति ॥ ४० ॥ सोवैममांशभूतश्चसतेकार्यंकरिष्यति ॥ राज्यंनिष्कंटकंप्राप्यधर्मान्नानाविधान्कुरु ॥ ४१ ॥ ॥ ॥

यदुवाचतदाह ॥ प्रीयतामिति ॥ मदिष्टंत्वंजानास्येवेत्यभिप्रेत्याह ॥ अंतर्यामितयेति ॥ ३६ ॥ परामिति ॥ यशःसंपादनेनोत्कृष्टांऐहिकींइहलोकेजायमानांसिद्धिमित्यर्थः ॥ ३७ ॥ तंशिवम् ॥ तथाभूतंपूर्णभक्तियुतं ॥ ३८ ॥ परैःशत्रुभिः ॥ तस्मैअर्जुनाय ॥ ददाविति ॥ त्वंदुर्जयोभविष्यसीतिवरंददावित्यर्थः ॥ ३९ ॥ अनेनपाशुपतास्त्रेण ॥ ननुमयैकेनकिंकर्तव्यमित्यतआह ॥ कृष्णमिति ॥ ४० ॥ सःकृष्णोयतोममांशभूतःअतःसतवकार्यंकरिष्यति ॥ धर्मान्यागादीन् ॥ ४१ ॥

शिवोर्जुनंप्रतिस्वप्रीत्यतिशयंदर्शयामासेत्याह ॥ हस्तमिति ॥ ४२॥ पूजितइति ॥ अर्जुनेनेतिशेषः ॥ शिवइति ॥ यदाशिवोंतर्दधेतत्रतदेत्यर्थः ॥४३॥ हर्षेति ॥ लब्धवरत्वादितिभावः॥ ४४ ॥ हेऋषीश्वराःशौनकादयः॥ ददुरिति ॥ अर्जुनायेतिशेषः ॥ ४५ ॥ पूजितइति ॥ देवैरितिशेषः ॥ अगमदिति॥ अर्जुनइ तिशेषः ॥ तेयुधिष्ठिरादयः॥ तन्वाःशरीरस्य ॥ ४६ ॥ ४७ ॥शकुनार्थंशुभफलसूचनार्थम् ॥ तेषांअर्जुनादीनांसर्ववृत्तांततपश्चर्यादिवार्ता ॥ ४८ ॥ शिवं

हस्तंचशिरसिधृत्वापूजयित्वाऽर्जुनंतदा ॥ हृदयालिंगनंकृत्वाभक्तवत्सलतांपुनः ॥ ४२ ॥ दर्शयित्वाजयंदत्वापूजितोंऽतरधीयत ॥ शिवश्चांऽतर्दधेतत्रह्यर्जुनोऽपिस्वमाश्रमं ॥ ४३ ॥ गत्वाहर्षसमायुक्तःप्रणनामयुधिष्ठिरम् ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह ॥ ४४ ॥ अप्सरसांतथानृत्यंजातंतत्रऋषीश्वराः ॥ देवाश्चैवतदासर्वेह्यायुधानिददुःस्वयम् ॥ ४५ ॥ पूजितश्चवरंप्राप्यभ्रातृनेवाऽगमत्तदा ॥ सर्वेतेभ्रातरश्चैवतन्वाःप्राणमिवाऽऽगतम् ॥ ४६ ॥ मिलित्वाचसुखंप्रापुर्द्रौपदीसुखमालभत् ॥ आश्रमेपुष्पवृष्टिश्चचंदनेनसमन्विता ॥ ४७ ॥ पपातशकुनार्थंवैतेषांचैवमहात्मनां ॥ तेऽपृच्छन्सर्ववृत्तांतंश्रुत्वाहर्षमुपागमन् ॥ ४८॥ शिवंपरंचसंतुष्टंपांडवाःसर्वएवहि ॥ धन्यश्चशंकरश्चैवनमस्कृत्यशिवंमुदा ॥ ४९ ॥ अवधिंचागतंज्ञात्वाजयश्चैवभविष्यति ॥ एतस्मिन्नंतरेकृष्णःश्रुत्वाऽर्जुनंसमागतम्॥ ५०॥ मिलनायसमायातःश्रुत्वासुखमुपागतः ॥ अतश्चैवमयाप्रोक्तःशंकरःसर्वदुःखहा ॥ ५१ ॥ मयाचसेव्यतेसोवैभवद्भिरपिसेव्यताम् ॥ इत्युक्त्वाचगतस्तत्रकृष्णश्चद्वारकांप्रति ॥ ५२ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायामर्जुनवरप्रदानंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ७॥ ऋषयऊचुः ॥ सूतसूतमहाभागसाधूक्तंहित्वयाऽनघ ॥ विधानंपार्थिवस्यैवयथोक्तमृषिणातदा ॥ अर्जुनायसुखार्थंचतत्त्वंब्रूहिविशेषतः ॥ १ ॥ ॥

कल्याणप्रदं ॥ धन्यइति ॥ शंकरोधन्यइत्युक्त्वेतिशेषः ॥ ४९ ॥ अवधिंजयसमयं ॥ भविष्यतीति ॥ एवंनिश्चितवंतइतिशेषः ॥ ५० ॥ मिलनायमेलनाय ॥ श्रुत्वाश्रवणमात्रेण ॥ श्रीकृष्णोपिशिवोपासनामनुमोदितवानित्याह ॥ अतइति ॥ ५१ ॥ सःशंकरः ॥ ५२ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यामर्जुनवरप्रदानंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॐनमःशिवाय ॥ पार्थिवाराधनविधिंसूतआदिष्टवानृषीन् ॥ इत्यत्राख्यायतेवृत्तमष्टषष्टितमेशिवम् ॥ १ ॥ असकृच्छ्रुतस्यपार्थिवलिंगपूजनस्येतिकर्तव्यताकांक्षायामाहुः ॥ सूतेति ॥ ऋषिणाव्यासेन ॥ १ ॥ ॥

॥ २ ॥ दुःखस्यआधिदैविकादित्रिविधदुःखस्य ॥ सुखार्थंस्वर्गादिसुखार्थम् ॥ ततःसद्गुरोः ॥ मंत्रंशिवमंत्रम् ॥ ३ ॥ ४ ॥ विश्वासमिति ॥ भगवत्प्रसाद विषयइतिशेषः ॥ शिवंकल्याणप्रदम् ॥ आराधनमिति ॥ अर्थाच्छिवस्य ॥ इदानीमुत्थानप्रभृतिकर्तव्यमाह ॥ ब्राह्मइति ॥ ब्राह्मेमुहूर्तेरात्रिपश्चिमयामार्धे ॥ गुरुंमंत्रस्योपदेष्टारम् ॥ ५ ॥ तीर्थानांगंगादीनाम् ॥ हेशुभाःऋषयः ॥ द्विवारमथवेतिशिवनामतीर्थनामसमुच्चयार्थंविकल्पार्थंवा ॥ ग्राह्यमितिशेषः॥ तत्रैवतदैव ॥ स्नानेति ॥ स्नानकालेस्नात्वेत्यर्थः ॥ ६ ॥ नामपदैःशिवनामयुतैःपदैःकेशवादिभिर्वातिलकंत्रिपुंड्रंद्वादशांगेषुललाटहृदयनाभिगलांसवा

॥ सूतउवाच ॥ सम्यक्पृष्टमृषिश्रेष्ठास्तदहंकथयाम्यहम् ॥ यदादुःखंलसाध्यंवैजायतेऋषिसत्तमाः ॥ २ ॥ दुःखस्यनाशनायैवसुखार्थंमुक्तयेऽथवा ॥ सद्गुरुंचप्रपद्येतमंत्रंप्राप्यपुनस्ततः ॥ ३ ॥ शुद्धिंचैवशरीरस्यकृत्वासुविधिवन्नरः ॥ मलोत्सर्गंततःकृत्वादंतधावनमाचरेत् ॥ ४ ॥ विश्वासंपरमंलब्ध्वाशिवमाराधनंचरेत् ॥ ब्राह्मेमुहूर्त्तउत्थायनत्वाच गुरुमेवच ॥ ५ ॥ शिवस्यैवाऽथवानामतीर्थानामथवाशुभाः ॥ मुखंप्रक्षाल्यतत्रैवस्नानकालावधिस्वयं ॥ ६ ॥ आचमनंततःकृत्वामंत्रैर्नामपदैरपि ॥ तिलकंचतदाकृत्वाद्वादशांगेषुवैनरः ॥ ७ ॥ शास्त्रोक्तंचतथानित्यंसंपाद्यविधिवत्पुमान् ॥ भूतशुद्धिंविधायैवप्रतिष्ठांप्राणसंभवाम् ॥ ८ ॥ कृत्वाचसेवनंतस्यसिद्धिदंसर्वदानृणाम् ॥ मंत्रेणाऽनेनतत्सर्वंसंपाद्यऋषिसत्तमाः ॥ ९ ॥ ज्योतीरूपस्तदाशंभुर्हृदयेतिष्ठतेमम ॥ हृदयस्थःशरीरंमेपुनातुजपसिद्धये ॥१०॥ एवंकृत्वाशिवस्यैवकृत्यंचैवसमाचरेत् ॥ पितृकार्यंचप्रथमंसूर्यार्घंचततःपरम् ॥ ११ ॥ गणपस्यततःपूजांपश्चाद्विष्णोस्तथैवच ॥ भवानीपूजनंचैवकारयेद्विधिवत्पुमान् ॥ १२ ॥ पश्चाच्चपार्थिवस्यैवविधानंविधिवच्चरेत् ॥ शुद्धदेशसमुद्भूतांमृदमाहारयेत्ततः ॥ १३ ॥ ॥ ॥ ॥ ॥

हृत्संधिपृष्ठशिरःसु ॥ ७ ॥ शास्त्रोक्तंधर्मशास्त्रोक्तम् ॥ नित्यंसंध्यादिनित्यकर्म ॥ भूतशुद्धिमिति ॥ विधिवदित्यनुवर्तते ॥ प्राणसंभवांप्राणप्रतिष्ठामित्यर्थः ॥ ८ ॥ तस्येति ॥ तस्यशिवस्यसेवनंकृत्वातिष्ठेदितिशेषः ॥ तत्रहेतुमाह ॥ सिद्धिदमिति ॥ ९ ॥ मंत्रमाह ॥ ज्योतीरूपःतेजोमयः ॥ तिष्ठतइति ॥ हृत्पुंडरीकांतरसन्निविष्टंस्वतेजसाव्याप्तनभोवकाशमित्युक्तेःशंभुर्ममहृदयेस्वप्रकाशात्मनाऽऽस्तेसपुनात्वित्यर्थः ॥ १० ॥ कृत्यंपूजनादिकम् ॥ पितृकार्यंतर्पणादिकम् ॥ ११ ॥ गणपस्यविनायकस्य ॥ कारयेत्कुर्यात् ॥ १२ ॥ विधिप्रकारमाह ॥ शुद्धदेशेति ॥ १३ ॥ ॥

तत्रशुद्धदेशेस्थापयेदिति ॥ मृत्तिकामितिसंबंध्यते ॥ अयंप्रत्यहंकरणपक्षोदर्शितः ॥ १४ ॥ अशक्तपक्षेप्याह ॥ अथवेति ॥ चतुर्दश्यामिति ॥ शिवरात्र्या मित्यर्थः ॥ तावदेवेति ॥ मासपर्यंतंप्रत्यहंकरणपर्याप्तमित्यर्थः ॥ १५ ॥ प्रयोगंअद्यब्रह्मणइत्यादिसंकल्पवाक्यप्रयोगम् ॥ तिथिपूर्वकमिति ॥ वारादीनाम

ओंश्रींअष्टमूर्तयेनमः ॥ इत्यनेनैमंत्रेणमृदमादाययत्नतः ॥ संशोध्यमृत्तिकांतत्रस्थापयेद्विधिवत्पुमान् ॥ १४ ॥ अथवाकृष्णपक्षस्यचतुर्दश्यांसमानयेत् ॥ पुनश्चमासमात्रेणह्याहरेत्तावदेवच ॥ १५ ॥ आचमनंविधायैवप्रयोगंतिथिपूर्वकम् ॥ कृत्वान्यासविधिंकुर्यादंगानांकरयोस्तथा ॥ १६ ॥ तत्रशिवायअंगुष्ठाभ्यांनमः ॥ भवायतर्जनीभ्यांनमः ॥ शर्वायमध्यमाभ्यांनमः ॥ पशुपतयेअनामिकाभ्यांनमः ॥ महादेवायकनिष्ठिकाभ्यांनमः ॥ ईशानायकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादिन्यासः ॥ शिवायहृदयायनमः ॥ भवायशिरसेस्वाहा ॥ शर्वायशिखायैवषट् ॥ पशुपतयेकवचायहुम् ॥ महादेवायनेत्रत्रयायवौषट् ॥ ईशानायअस्त्रायफट् ॥ ततोध्यानम् ॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नम् ॥ पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्रंत्रिनेत्रम् ॥ १७ ॥ कर्पूरगौरंकरुणावतारंसंसारसारंभुजगेंद्रहारम् ॥ सदावसंतंहृदयारविंदेभवंभवानीसहितंनमामि ॥ १८ ॥ कैलासपीठासनमध्यसंस्थंभक्तैश्चनंद्यादिभिःसेव्यमानम् ॥ भक्तार्तिदावानलमप्रमेयंध्यायेदुमालिंगितविश्वरूपं ॥ १९ ॥ एवंध्यात्वाहरंपश्चात्पूजनंचसमाचरेत् ॥ अथवा ॥ यथोक्तरूपिणंदेवंध्यायामिचशिवंमुदा ॥ २० ॥ एवंध्यात्वाचयत्कार्यंतदेवश्रूयतांद्विजाः ॥ हरोमहेश्वरोदेवःशूलपाणिःपिनाकधृक् ॥ २१ ॥ पशुपतिःशिवश्चैवयजमानइतिक्रमात् ॥ मृदाहरणंसंघट्टंप्रतिष्ठाव्हानमेवच ॥ २२ ॥ ॥ ॥ ॥ ॥ ॥

प्युपलक्षणमिदम् ॥ न्यासविधिंषडंगन्यासविधिम् ॥ अंगानांहृदयादीनाम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ पक्षांतरमाह ॥ अथवेति ॥ २० ॥ द्विजाःशौनकादयः ॥ मृदाहरणादिषुसाधनीभूतमंत्ररूपनामान्याह ॥ हरइति ॥ २१ ॥ संघट्टंलिंगनिर्माणंप्रतिष्ठास्थापनमाव्हानमावाहनम् ॥ २२ ॥ ॥

पूजनंगंधादिभिरर्चनं ॥ आवाहनेमंत्रविशेषमाह ॥ कैलासेति ॥ २३ ॥ २४ ॥ आहुतिंहोमंतद्दशांशेनमंत्रजपदशांशेन ॥ भोज्यंब्राह्मणभोजनं ॥ महोदयंमहाप्रतापं ॥ गणान्प्रमथादीन् ॥ २५ ॥ यदिति ॥ यत्कर्तव्यंतत्कुर्यादित्यर्थः ॥ मृत्युंजयेति ॥ मृत्युंजयायनमइत्यादिभिर्नामभिरित्यर्थः ॥ २६ ॥

स्नपनंपूजनंचैवक्षमस्वेतिविसर्जनम् ॥ हरायनमइतिमृदाहरणं ॥ महेश्वरायनमइतिलिंगसंघट्टनम् ॥ शूलपाणये नमइतिप्रतिष्ठापनम् ॥ पिनाकपाणयेनमइत्यावाहनम् ॥ कैलासशिखराद्रम्यात्समागच्छममप्रभो ॥ २३ ॥ पूजांचेमांगृहीत्वाचयथोक्तवरदोभव ॥ यथोक्तरूपिणंशंभुमहमावाहयामिच ॥ २४ ॥ आहुतिंतद्दशांशेनभोज्यंचतद्दशांशतः ॥ महोदयंचवृषभंगणान्प्रियतमानथ ॥ २५ ॥ पूजयित्वाचयत्कृत्यंकुर्याच्चशंकरस्यच ॥ श्रीपशुपतयेनमइति स्नपनम् ॥ नामभिर्विविधैःस्तोत्रैर्मृत्युंजयपुरःसरैः ॥ २६ ॥ स्नापयेच्चशिवंसम्यक्देहिह्यर्घोदकेनच ॥ श्रीशिवाय नमइतिविविधद्रव्योपसमर्पणम् ॥ धूपंदीपंचनैवेद्यमारात्रिकमतःपरम् ॥ २७ ॥ यजमानायनमइतिक्षमस्वेतित तःपरम् ॥ पूर्वोक्तंचपुनर्ध्यानंकृत्वातुजपमारभेत् ॥ २८ ॥ ओंअस्यश्रीसदाशिवमंत्रस्यवामदेवऋषिर्देवीपंक्तिछंदः ॥ श्रीशिवोदेवताममभुक्तिमुक्तिप्राप्तयेजपेविनियोगः ॥ यथोक्तंगुरुणामंत्रंजपेच्चशिवसन्निधौ ॥ अनंतफलसिद्ध्यर्थं जपेच्चविधिवत्पुमान् ॥ २९ ॥ अनन्यमनसातत्रध्यायेद्देवंचत्र्यंबकम् ॥ यथाशक्तिजपंकृत्वातर्पणंतद्दशांशकम् ॥ ॥ ३० ॥ मार्जनंचदशांशंचकुर्याच्छिवफलेच्छया ॥ अष्टमूर्तिश्चपूज्येतसांगपूजाफलायच ॥ ३१ ॥ शर्वायक्षितिमूर्तयेनमः ॥ भवायजलमूर्तयेनमः ॥ रुद्रायतेजोमूर्तयेनमः ॥ उग्रायवायुमूर्तयेनमः ॥ भीमायाऽऽकाशमूर्तयेनमः ॥ पशुपतयेयजमानमूर्तयेनमः ॥ महादेवायसोममूर्तयेनमः ॥ ईशानायसूर्यमूर्तयेनमः ॥ अक्षतैश्चंदनैर्वापिपूजांकुर्यात्सदाबुधः ॥ पश्चान्नृत्यंचगीतंचगल्लनादादिकंतथा ॥ ३२ ॥ पुनश्चाऽक्षतपुष्पंवागृहीत्वांऽजलिनातदा ॥ प्रार्थयेच्छंकरंतत्रमंत्रैरेतैर्ऋषीश्वराः ॥ ३३ ॥ ॥ ॥ ॥ ॥

॥ २७ ॥ पूर्वोक्तंध्यायेन्नित्यमित्यादिकं ॥ २८ ॥ २९ ॥ तद्दशांशकंजपदशांशकम् ॥ ३० ॥ दशांशमिति ॥ तर्पणदशांशमित्यर्थः ॥ ३१ ॥ अष्टमूर्तिनामान्याह ॥ शर्वायेति ॥ ३२ ॥ एतैर्वक्ष्यमाणैरित्यर्थः ॥ ३३ ॥ ॥ ॥ ॥

मंत्रानाह ॥ तावकइति ॥ ३४ ॥ ३५ ॥ ३६ ॥ त्वामिति ॥ ज्ञास्यामीतिशेषः ॥ ३७ ॥ आरोप्यनिक्षिप्य ॥ ३८ ॥ विसर्जनमंत्रमाह ॥ यथेति ॥ ॥ ३९ ॥ गृह्येति ॥ मासदिनादिकमुच्चार्येत्यथः ॥ प्रयोगमद्यमयाकृतेनशिवपूजनेनेत्यादिप्रयोगम् ॥ ४० ॥ पूजनानंतरंयत्कर्तव्यंतदाह ॥ संसारेति ॥

तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहंसदामृड ॥ कृपानिधेइतिज्ञात्वाभूतनाथप्रसीदमे ॥ ३४ ॥ अज्ञानाद्यदिवाज्ञानाज्जप पूजादिकंमया ॥ कृतंतदस्तुसफलंकृपयातवशंकर ॥ ३५ ॥ अहंपापीमहानद्यपावनश्चमहान्भवान् ॥ इतिविज्ञा यदेवेशयदिच्छसितथाकुरु ॥ ३६ ॥ वेदैःपुराणैःसिद्धांतैर्ऋषिभिर्विविधैरपि ॥ नज्ञातोऽसिमहादेवकुतोऽहंत्वांसदा शिव ॥ ३७ ॥ यथातथात्वदीयोऽस्मिसर्वभावैर्महेश्वर ॥ इत्येवंचाऽक्षतान्पुष्पाण्यारोप्यचशिवोपरि ॥ ३८ ॥ प्रार्थ नांविविधांकृत्वाविसृजेच्चशिवंतदा ॥ यथेदानींचदेवेशकृपार्थंसमुपागतः ॥ ३९ ॥ तथात्वयापुनर्देवसमागंतव्यमेवच ॥ पुनर्मासंदिनंगृह्यप्रयोगंचसमाप्यच ॥ ४० ॥ संसारसंभवंकार्यंकुर्याच्चैवविचक्षणः ॥ एवंचैवविधानेनकृतापूजा फलप्रदा ॥ ४१ ॥ अलाभेब्राह्मणानांचमंत्रैःपूजांसमाचरेत् ॥ स्वयंचपार्थिवींकुर्यात्पूजासांगंफलंलभेत् ॥ ४२ ॥ तदक्षताशिषंचैवगृण्हीयाच्छंकराज्ञया ॥ तस्यन्यूनंभवेन्नैवयेनैवपूजितोहरः ॥ ४३ ॥ षण्मासंयोनरश्चैवपूजांचैवशि वस्यच ॥ कुर्याच्चविधिवच्छ्रेष्ठोजीवन्मुक्तोभवेन्नरः ॥ ४४ ॥ शापानुग्रहतातस्यजायतेनाऽत्रसंशयः ॥ तस्यदर्शनमा त्रेणशिवदर्शनजंफलम् ॥ ४५ ॥ प्राप्नोतिनाऽत्रसंदेहऋषीणांशासनंत्विदम् ॥ इत्येवंचसमाख्यातंयथाबुद्ध्यनुसार तः ॥ ४६ ॥ एवंचक्रियतेसर्वैःकृष्णेंद्रमुनिसत्तमैः ॥ इदंयःशृणुयात्पुण्यंसिद्धिःस्यादनपायिनी ॥ ४७ ॥ इतिश्रीशि वमहापुराणेज्ञानसंहितायांपार्थिवपूजाविधानंनामाष्टषष्टितमोध्यायः ॥ ६८ ॥ ॥ ॥

॥४१॥ अलाभइति ॥ पूजाविधानार्थंब्राह्मणानामलाभेस्वयंमंत्रैःपूजांसमाचरेदित्यन्वयः ॥ ४२ ॥ तदक्षताशिषम् ॥ केवलंब्राह्मणदत्तामक्षतामाशिषामित्य र्थः ॥ ४३ ॥ ४४ ॥ शापानुग्रहताशापानुग्रहदानसमर्थता ॥ ४५ ॥ ऋषीणांवेदव्यासादीनाम् ॥ ४६ ॥ शिवपूजनविधिश्रवणफलमाह ॥ इदमिति ॥ ४७ ॥ इतिश्रीशिवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांपार्थिवपूजाविधानंनामाऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥

॥ ॐनमःशिवाय ॥ कृष्णेनपूजनंशंभोर्बिल्वपत्रैःपुराकृतम् ॥ तद्बिल्वेश्वरमाहात्म्यंनवषष्टितमेस्थितम् ॥ १ ॥ इच्छामहेइच्छामः ॥ १ ॥ सःशंकरः ॥ ॥ २ ॥ मातुलेकंसे ॥ मोचित्वामोचयित्वानिगडबंधनादितिशेषः ॥ ३ ॥ उग्रसेनायकंसपित्रे ॥ यदिति ॥ यच्छशासकृतवांस्तदुच्यतइतिशेषः ॥ उपवीतंयज्ञोपवीतम् ॥ पितुःवसुदेवात् ॥ अवंतीमुज्जयिनीं ॥ ४ ॥ सांदीपिनिमेतन्नामानंगुरुम् ॥ तत्प्रभावेनशिवमंत्रप्रभावेन ॥ विद्याइति॥कलानामप्युपलक्षणमेतत् ॥ स्पष्टंचैतद्भागवतादौ ॥ ५ ॥ पुत्रंगुरुदक्षिणारूपम् ॥ यमलोकादानीतंगुरोर्गुरवेसांदीपिनयेदत्वेतिसंबंधः ॥६॥ तेनकृष्णेन ॥ नगरीद्वारकाख्या

॥ ऋषयऊचुः ॥ प्रष्टुमिच्छामहेसूतसर्वज्ञस्त्वंयतःस्मृतः ॥ कृष्णेनोक्तंमयानित्यंसेव्यतेशंकरःप्रभो ॥ १ ॥ कदाचसेवितःसोवैतत्त्वंब्रूहिविचक्षण ॥ सूतउवाच ॥ श्रूयतांकथयाम्यद्ययथाचसेवितःशिवः ॥ २ ॥ गोकुलान्मथुरांगत्वामारितेमातुलेस्वयम् ॥ मोचित्वावसुदेवादीनाहूययादवानथ ॥ ३ ॥ राज्यंचैवोग्रसेनायदत्वाकृष्णःशशासयत् ॥ उपवीतंपितुःप्राप्यह्यवंतींगतवास्तदा ॥ ४ ॥ सांदीपिनिंसमासाद्यततश्चशिवमंत्रकम् ॥ संप्राप्यतत्प्रभावेनविद्याःसर्वाःस्वयंप्रभुः ॥ ५ ॥ स्वल्पेनैवचकालेनपुत्रंदत्वागुरोरथ ॥ मथुरांचसमायातोदैत्यैर्युद्धंचकारसः ॥ ६ ॥ दैत्यैश्चसर्वतोव्याप्तानगरीऋषिसत्तमाः ॥ एतस्मिन्नंतरेतेनकारितानगरीशुभा ॥ ७ ॥ समुद्रेयोजनानांतुसंख्ययाद्वादशावधि ॥ तत्रतान्योगमायायाःप्रभावात्परमेश्वरः ॥ ८ ॥ गृहकार्यंचतत्रत्यान्सर्वोपकरणैःसह ॥ आरोप्याऽनुग्रहंकृत्वामुचुकुंदंस्वयंगतः ॥ ९ ॥ दैत्यैश्चपीडितःसोऽपितत्रैवबलवत्तरैः ॥ कदाचित्पर्वतेतत्रनाम्नावैरैवतेततः ॥ १० ॥ उपमन्युंशिवगणंभक्तंचैवशिवस्यच ॥ पप्रच्छपरमंप्रीत्याकथंलोकेजयाम्यहम् ॥ ११ ॥ इतिश्रुत्वातुतस्यैववचनंगणसत्तमः ॥ त्वमपिविष्णुरूपोऽसिकथंनसेवसेशिवम् ॥ १२ ॥ सदासहायःशर्वश्चविद्यतेतवनिश्चितम् ॥ सर्वंत्वंप्राप्स्यसेतस्मात्पूजांकुरुनिरंतरम् ॥ १३ ॥ ॥ ॥ ॥ ॥

॥ ७ ॥ तस्याःपरिमाणमाह ॥ योजनानामिति ॥ तत्रमथुरायाम् ॥ तानिति ॥ योगमायायाःप्रभावात्परमेश्वरःगृहकार्यंतांस्तत्रत्यान्वसुदेवादीन्प्रतिआरोप्यसमर्प्येतिसंबंधः ॥ ८ ॥ मुचकुंदंएतन्नामकंसुप्तंराजानम् ॥ ९ ॥ सोपिकृष्णोपि ॥ दैत्यैःकालयवनादिभिः ॥ १० ॥ उपमन्युमेतन्नामानम् ॥ यत्पृच्छत्तदाह ॥ कथमिति ॥ ११ ॥ तस्यैवकृष्णस्यैव ॥ गणसत्तमःउपमन्युः ॥ अब्रवीदितिशेषः ॥ यदब्रवीत्तदाह ॥ त्वमिति ॥ १२ ॥ तस्माच्छर्वात् ॥ १३ ॥

कविःकृष्णः ॥ सेवयामाससेवितवान् ॥ तंशिवम् ॥ कमलैःसहस्रपत्रैः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ तेनकृष्णेन ॥ शिवोयदुवाच तदाह ॥ धनमिति ॥ २० ॥ तस्यकृष्णस्य ॥ २१ ॥ तदीयंशिवोक्तं श्रुत्वाकृष्णोयदब्रवीत्तदाह ॥ पूर्वमिति ॥ २२ ॥ तेनैवसुदर्शनेनैव ॥ २३ ॥ २४ ॥

इत्येवंचततःप्राप्यमंत्रमाराधनंकविः ॥ सेवयामासविप्रेंद्राःसप्तमासावधिस्वयं ॥ १४ ॥ कुसुमैर्विविधैस्तंवैसेवयामासशंकरम् ॥ कमलैर्बिल्वपत्रैश्चशतपत्रैःकुशैस्तथा ॥ १५ ॥ करवीरैश्चदूर्वाभिरर्कपुष्पैःकुशेशयैः ॥ शंखीपुष्पैस्तथादेवंसंतोष्यपुरुषोत्तमम् ॥ १६ ॥ आसनैर्विविधैर्ध्यानैःप्रसन्नःशंकरस्तदा ॥ उवाचकृष्णंतत्रैववव्रियतांवरमुत्तमम् ॥ १७ ॥ ततःप्रसन्नमनसावासुदेवोह्युवाचह ॥ श्रीभगवानुवाच ॥ सांप्रतंसकलंमेऽद्यप्रभावात्तवशंकर॥१८॥ दैत्यैश्चपीडितश्चाऽहंत्वामहंशरणंगतः ॥ पूर्वैश्चसेवितःशंभुर्ब्रह्मणासेव्यतेधुना ॥ १९ ॥ एवंचप्रार्थितस्तेनपुनःप्रोवाचवैशिवः ॥ धनंधान्यंतथापुत्रांस्त्रियश्चविविधास्तथा॥२०॥सामर्थ्यंह्यतुलंतेद्यभवतुसर्वथाहरे॥भवान्याविविधंतस्यफलंदत्तंमुनीश्वराः ॥ २१ ॥ तदीयंतद्वचःश्रुत्वाआनंदंपरमंगतः ॥ पूर्वंचैवत्वयैवाहंपालितोदेवसत्तम ॥ २२ ॥ चक्रंसुदर्शनंनामदत्तंचप्रभुणात्वया ॥ तेनैवसर्वदेवादीन्जयामिचनिरंतरम् ॥ २३ ॥ इदानींचत्वयादत्तंफलंचैवमनेप्सितम् ॥ इत्युक्त्वापूजितस्तेनप्रसन्नःपरमेश्वरः ॥ २४ ॥ गच्छकृष्णशुभंतेऽद्यवर्धयिष्येनिरंतरम् ॥ तदाज्ञप्तःस्वयंकृष्णोजगामद्वारकांप्रति ॥ २५ ॥ संतुष्टमनसासर्वंपालयामसवैतदा ॥ बिल्वेश्वरश्चनाम्नावैजातस्तत्रसुशोभनः ॥ २६ ॥ अद्यापिवर्ततेसोवैलोकानांसुखदायकः ॥ सप्तमासावधिस्तेननित्यंबिल्वदलानिच ॥ २७ ॥ समर्पितानिदेवेशतस्माद्बिल्वेश्वरःस्मृतः ॥ उत्तार्यचशिवात्तत्रक्षिप्तानिह्येकतःप्रभो ॥ २८ ॥ ततःखंडात्स्वयंदेवःसंजातोऽनुग्रहायच ॥ तत्प्रार्थितस्तदातत्रतस्थौलोकहितायच ॥ २९ ॥

शिवःकृष्णंप्रत्याह ॥ गच्छेति ॥ तदाज्ञप्तःशिवाज्ञप्तः ॥ २५ ॥ सर्वजगत् ॥ २६ ॥ सःविल्वेश्वरः ॥ तेनकृष्णेन ॥ २७ ॥ क्षिप्तानीति ॥ तस्माच्छिवात् ॥ विल्वपत्राण्युत्तार्य यत्रैकतःक्षिप्तानिततःखंडात्तस्मात्समुदायाद्देवःसंजातइत्यग्रिमान्वयः ॥ २८ ॥ अनुग्रहायेति ॥ भक्तानामितिशेषः ॥ तत्प्रार्थितःकृष्णप्रार्थितः ॥ २९ ॥

॥ ३० ॥ एवमृषिपृष्टमुक्तोपसंहरति ॥ एतदिति ॥ ३१ ॥ इतिश्रीशैवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांशिवसाधनविधिर्नामैकोनसप्ततितमो
ऽध्यायः ॥ ६९ ॥ ॥ ओंनमःशिवाय ॥ अध्यायेसप्ततितमेहरिणाराधितःशिवः ॥ कमलानांसहस्रेणतदालब्धंसुदर्शनं ॥ १ ॥ शंकरःकृष्णंप्रतिकथं
प्रसन्नोबभूवेत्यभिप्रेत्ययत्पप्रच्छुस्तदाह ॥ सूतेति ॥ १ ॥ चक्रंसुदर्शनम् ॥ २ ॥ ३ ॥ धर्मलोपमिति ॥ चक्रुरितिशेषः ॥ ४ ॥ दैत्यकैरिति ॥ कुत्सार्थे

तद्दिनंहिसमारभ्यकृष्णेनपरमात्मना ॥ सेव्यतेशंकरोनित्यंभुक्तिमुक्तिफलप्रदः ॥ ३० ॥ एतत्सर्वंसमाख्यातंयत्पृ
ष्टोहंमुनीश्वराः ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवोध्रुवम् ॥ ३१ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवसा
धनविधिर्नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥छ॥ ऋषयऊचुः ॥ सूतत्वंसर्वंजानासिपुनःपृच्छामहेशृणु ॥ कथंसु
दर्शनंप्राप्तंविष्णुनाप्रभविष्णुना ॥ १ ॥ कथंतुष्टस्तदाशंभुश्चक्रंचदत्तवान्यदा ॥ इत्येवंवचनंश्रुत्वासूतोवचनमब्रवी
त् ॥ २ ॥ सूतउवाच ॥ श्रूयतांचऋषिश्रेष्ठाःकथयामियथाश्रुतम् ॥ कस्मिंश्चित्समयेदैत्याःसंजाताबलवत्तराः ॥ ३ ॥
पीडयामासुस्तान्लोकान्धर्मलोपंतथापुनः ॥ तेदेवाःपीडिताविष्णुंप्रार्थयामासुर्वैतदा ॥ ४ ॥ कृपांकुरुप्रभोत्वंचमा
रितादैत्यकैर्वयम् ॥ कुत्रयामश्चकिंकुर्मःशरण्यंत्वांसमागताः ॥ ५ ॥ इत्येवंवचनंश्रुत्वाविष्णुर्वचनमाददे ॥ करिष्या
मिवचःकार्यमाराध्यशंकरंपुनः ॥ ६ ॥ बलिष्ठाःशत्रवोह्येतेविजेतव्याःप्रयत्नतः ॥ इत्युक्तास्तेतदात्वेचययुर्धामस्वकं
स्वकम् ॥ ७ ॥ विष्णुरपिसुराणांतुजयार्थंचाऽभजच्छिवम् ॥ कैलासनिकटेगत्वातपस्तेपेस्वयंहरिः ॥ ८ ॥ कृत्वाकुं
डंचसंस्थाप्यजातवेदसमग्रतः ॥ पार्थिवेनविधानेनमंत्रैर्नानाविधैरपि ॥ ९ ॥ स्तोत्रैश्चैवाऽप्यनेकैश्चभेजेचशंकरंमु
दा ॥ कमलैःसरसोजातैर्मानसाख्यान्मुनीश्वराः ॥ १० ॥ बध्वाचैवाऽऽसनंतत्रनचचालहरिःस्वयम् ॥ प्रसन्नावधिमे
वाऽत्रस्थेयंचसर्वथामया ॥ ११ ॥ ॥ ॥ ॥ ॥

कप्रत्ययः ॥ शरण्यंशरणेसाधुम् ॥ ५ ॥ आददेउक्तवान् ॥ तदेवाह ॥ करिष्यामीति ॥ ६ ॥ इत्युक्ताइति ॥ विष्णुनेतिशेषः ॥ तेदेवाः ॥ ७ ॥ सुराणा
मिति ॥ सुराणांजयार्थम्सुरजयप्राप्त्यर्थमित्यर्थः ॥ ८ ॥ तपःप्रकारमाह ॥ कृत्वेति ॥ जातवेदसमग्निम् ॥ ९ ॥ मानसाख्यादिति ॥ मानसाख्यात्सर
सइत्यन्वयः ॥ १० ॥ प्रसन्नावधिमिति ॥ यदाशिवःप्रसन्नोभवेत्तावत्कालावधिमित्यर्थः ॥ ११ ॥ ॥ ॥

तत्परइति ॥ बभूवेतिशेषः ॥ १२ ॥ तेनैवहरिणैव ॥ १३ ॥ नामभिरिति ॥ शिवस्येतिशेषः ॥ तस्मैशिवाय ॥ नाममंत्रमिति ॥ प्रत्येकंकमलमेकैकं शिवनाममंत्रमुच्चार्येत्यर्थः ॥ १४ ॥ समर्पयन्निति ॥ कमलमितिसंबध्यते ॥ प्रभोःशिवस्य ॥ १५ ॥ तद्भक्तेःहरिकृतभक्तेःपरीक्षार्थं ॥ १६ ॥ तत्कमलहरणरूपंमायाकरणमिंद्रजालम् ॥ उदाहृतामिति ॥ उत्पाटितमित्यर्थःसंख्यापूरणार्थमितिभावः ॥ तमुत्पाटयंतंविष्णुं॥ १७॥शंकरोहरियदब्रवीत्तदाह ॥ प्रसन्न

इत्येवंनिश्चयंकृत्वापूजयामासवैहरिः ॥ यदानैवहरस्तुष्टोविचारेतत्परोहरिः ॥ १२ ॥ विचार्यैवतपःकष्टंतेनैवबहुधा कृतम् ॥ सेवनंबहुविधंकृत्वापूजनंबहुधाकृतम् ॥ १३ ॥ तथापिनयदातुष्टःसहस्त्रैर्नामभिस्ततः ॥ प्रत्येकंकमलंतस्मैनाममंत्रमुदीर्यच ॥ १४ ॥ समर्पयन्प्रभोर्मूर्ध्निप्रत्यहंपरयामुदा ॥ पूजयामासवैशंभुंतदाचशंकरेणच ॥ १५ ॥ तद्भक्तेश्चपरीक्षार्थंकृतंतच्छ्रूयतामिति ॥ कमलानांसहस्त्रात्तुल्दतमेकंहरेणच ॥ नज्ञातंविष्णुनातच्चमायाकरणमद्भुतम् ॥ १६ ॥ न्यूनंतच्चापितज्ज्ञात्वानेत्रमेकमुदाहृतं ॥ तंदृष्ट्वाचप्रसन्नोऽभूच्छंकरःसर्वदुःखहा ॥१७॥ प्रसन्नोऽस्मिवरं ब्रूहिनाऽदेयंविद्यतेतव ॥ तदाहर्षंसमापन्नोह्यब्रवीद्वचनंपुनः ॥ १८ ॥ याच्यतेकिंत्वदग्रेचह्यंतर्यामितयास्थितः ॥ दैत्यैश्चपीडितंविश्वंसुखंतस्मैसदाशिव ॥ १९ ॥ दैत्यान्हंतुंकथंदेवह्यायुधंनप्रवर्तते ॥ किंकरोमिक्कगच्छामिशरणंत्वांसमागतः ॥ २० ॥ इत्युक्त्वाचनमस्कृत्यशिवायपरमात्मने ॥ स्थितश्चैवाऽग्रतोदेवःस्वयंचाऽसुरपीडितः ॥ २१ ॥ तदातस्मैस्वयंशंभुश्चक्रंचदत्तवान्प्रभुः ॥ तेनैवपीडतेविष्णुर्दैत्यांश्चबलवत्तरान् ॥ २२ ॥ इतितस्यवचःश्रुत्वापुनरूचुर्ऋषीश्वराः ॥ किंतन्नामसहस्त्रंचकथयत्वंसुशोभनम् ॥ २३ ॥ येनतुष्टःस्वयंदेवोहरःसाक्षान्महेश्वरः ॥ चक्रंचदत्तवांस्तस्मैहरयेप्रीतमानसः ॥ इतितेषांवचःश्रुत्वासूतोवचनमब्रवीत् ॥ २४ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांविष्णुसुदर्शनदानंनामसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ॥ ॥

इति ॥ अब्रवीत् ॥ हरिरितिशेषः ॥ १८ ॥ यद्याचनीयंतत्त्वंजानास्येवेतिकिमर्थंतत्कथनीयमित्यभिप्रेत्याह ॥ याच्यतइति ॥ तथापिकिंचित्प्रार्थयमान आह ॥ दैत्यैरिति ॥ तस्मैविश्वस्मैजगते ॥ सुखमिति ॥ देहीतिशेषः ॥ १९ ॥ २० ॥ २१ ॥ चक्रंसुदर्शनाख्यं ॥ तेनैवसुदर्शनेनैव ॥ पीडतेपीडयति ॥ अनेनविष्णुनासर्वेनाशितादैत्यपुंगवाइतिपाठांतरं ॥ २२ ॥ तस्यसूतस्य ॥ २३ ॥ येननामसहस्रेण ॥ २४ ॥ २५ ॥ इतिश्रीशैवमहापुराणज्ञानसंहिताटीकायांसारबोधिन्यांविष्णुसुदर्शनदानंनामसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ॥ ॥

ओंनमःशिवाय ॥ कमलानांसहस्रेणनामभिर्यैःशिवोर्चितः ॥ तान्येकसप्ततितमेकथितानिमहात्मनः ॥ १ ॥ नत्वाश्रीशंकरगुरुंतत्प्रेरितधियामया ॥ तानि नामानिदिव्यानिव्याख्यायंतेयथामति ॥ नन्वत्रसहस्रनामस्तोत्रेऽर्थतःक्वचिच्छब्दतोऽपिनाम्नांपौनरुक्त्यमापद्येतेतिचेन्न ॥ प्रवृत्तिनिमित्तैक्येपिक्वचिच्छब्द भेदात्क्वचिच्छब्दैक्येपिप्रवृत्तिनिमित्तभेदाच्चापूर्वार्थत्वेनपौनरुक्त्याभावात् ॥ नहिशिवपदोच्चारणजन्यमपूर्वंकल्याणपदोच्चारणादुत्पद्यते ॥ अन्यथाग्नयेजु ष्टंनिर्वपामीत्यत्रवन्हयेजुष्टमित्युच्चारणेपितदपूर्वोत्पत्त्यापत्तेर्विधिगतएवशब्दःप्रयोक्तव्यइतिमीमांसकसिद्धांतोभज्येत ॥ प्रवृत्तिनिमित्तभेदेतुशब्दैक्यंनपौरु क्त्यावहं ॥ इंद्रशब्दस्यपुरंदरार्थस्याप्यैंद्र्यागार्हपत्यमुपतिष्ठेतेतिविधानाद्योगेनाग्निपरत्वदर्शनात् ॥ एतच्चतत्तन्नामव्याख्यानावसरेप्रदर्शयिष्यते ॥ यत्रद्वयोः शब्दयोःकेनचिदंशेनसाम्यंतत्रप्राचीनसहस्रनामव्याख्याकारसंप्रदायानुरोधेनद्वौशब्दौमिलित्वैकमेवनामेतिव्यक्तीकरिष्यते ॥ यत्रपुंलिंगशब्दप्रयोगस्तत्र शिवोविशेष्यः यत्रस्त्रीलिंगशब्दप्रयोगस्तत्रशिवदेवताविशिष्यते यत्रचनपुंसकलिंगशब्दप्रयोगस्तत्रब्रह्मविशेषणीयं ॥ तदेतत्सर्वमभिप्रेत्यभगवान्प्रथमंमं

सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथयामियथाश्रुतम् ॥ विष्णुनाप्रार्थितोयेनसंतुष्टःपरमेश्वरः ॥ तदहंकथयाम्य द्यपुण्यंनामसहस्रकम् ॥१॥ श्रीविष्णुरुवाच ॥ शिवोहरोमृडोरुद्रःपुष्करःपुष्पलोचनः ॥ अर्थिगम्यःसदाचारःशर्वः शंभुर्महेश्वरः ॥ २ ॥ चंद्रापीडश्चंद्रमौलिर्विश्वंविश्वामरेश्वरः ॥ वेदांतसारसंदोहःकपालीनीललोहितः ॥ ३ ॥

गलार्थत्वेनमंगलप्रदंनामोपन्यस्यति ॥ (शिवइति) भक्तमंगलकरत्वाच्छिवः ॥ यद्वा निस्त्रैगुण्यतयाशुद्धत्वाच्छिवः ॥ यथोक्तंवायुसंहितायाम् ॥ विशुद्धिः शिवतास्वतइति ॥ (हरः) हरतिसर्वंसंहरतीतिहरः ॥ हरतेःपचाद्यच् ॥ (मृडः) मृडतिसुखयतीतिमृडः मृडसुखनेइगुपधत्वात्कः ॥ (रुद्रः) ॥ संहारकाले प्रजाःसंहरन्रोदयतीतिवारुद्रः रुतंदुःखंरातिददातीतिवारुद्रः दुःखकारणंद्रावयतीतिवारुद्रः ॥ रोदनाद्द्रावणाच्चापि ॥ रुद्रइत्युच्यतेतस्माच्छिवःपरमकारणमि तिलिंगपुराणवचनात् ॥ (पुष्करः) पुष्णातीतिपुष्करःपुषपुष्टौपुषःकिदितिकरन् ॥ (पुष्पलोचनः) पुष्पोपमितनेत्रः ॥ (अर्थिगम्यः) अर्थिभिःस्वर्गमोक्षा दिकामिभिर्गम्यःप्राप्यःउपास्यइतियावत् ॥ (सदाचारः)सतांकर्माण्याचरतिसःसाधुराचारोयस्येतिवा ॥ (शर्वः) शृणातिहिनस्तिसर्वाःप्रजाइति ॥ (शंभुः) शंसुखंभक्तानांभावयतीतिशंभुः ॥ अंतर्भावितण्यर्थोत्रभवतिः १० (महेश्वरः) महान्परमःईश्वरःअंतर्यामिणईश्वरस्याप्यधिष्ठानं ॥ यःपरःसमहेश्वरइति श्रुतेः ॥ २ ॥ (चंद्रापीडः) चंद्रःआपीडःशिरोभूषणंयस्यसः ॥ (चंद्रमौलिः) चंद्रःमौलौयस्यसः (विश्वं) परब्रह्मस्वरूपः ॥ अधश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंवि श्वमिदंवरिष्ठं पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं एतद्योवेदनिहितंगुहायांसोविद्याग्रंथिंविकिरतीहसोम्येतिद्वितीयमुंडके ॥ (विश्वामरेश्वरः) विश्वाम राणांसर्वदेवानामीश्वरःस्वामी ॥ (वेदांतसारसंदोहः) वेदांतसारस्यसंदोहःप्रपूरणंयस्मात्सः ॥ (कपाली) कपालानिबिभर्तीतिकपाली ॥ ब्रह्मणःशिरश्छि त्वातत्कपालंधारयतीतिवा ॥ (नीललोहितः) नीलश्चासौलोहितश्चकंठेजटासुचसः ॥ ३ ॥ ॥ ॥

(ध्यानाधारः) योगिध्यानगम्यः(अपरिच्छेद्यः)देशकालादिपरिच्छेदशून्यः२०(गौरीभर्ता) पार्वतीपतिः ॥ (गणेश्वरः) गणानांप्रमथानांनियंता ॥ (अष्टमूर्तिः) आकाशाद्यष्टसुमूर्तिष्वधिष्ठाता ॥ (विश्वमूर्तिः) विश्वामूर्तयोयस्य सर्वात्मकत्वादितिभावः ॥ (त्रिवर्गस्वर्गसाधनः) त्रिवर्गःधर्मार्थकामाःस्वर्गोऽचिंत्यसुखंत त्साध्यतेनेनसः ॥ ४ ॥ (ज्ञानगम्यः) वेदांतार्थज्ञानमात्रवेद्यः ॥ नावेदविन्मनुतइतिश्रुतेः ॥ (दृढप्रज्ञः) नित्यज्ञानयुक्तः ॥ (देवदेवः) देवानांदेवःयद्वादे वान्सामर्थ्यदानेनदेवयतिप्रकाशयतिक्रीडयतिआनंदयतिवा यद्वादीव्यतेक्रीड्यतइतिदेवोदेवैर्देवोदेवदेवइति ॥ (त्रिलोचनः) त्रीणिलोचनानियस्यसःत्रिषु लोकेषुगुणेषुवेदेषुवाज्ञानंयस्य यद्वात्रयोवर्णाःअकारोकारमकाराःलोचनानियस्य यद्वात्रीणिशास्त्राचार्यध्यानानिदर्शनसाधनानियस्यसत्रिलोचनइतिमहाभा रतटीकायांनीलकंठः ॥ (वामदेवः) वामयतिदुष्टानांमदामितिवामःटुवमुद्गिरणेणिजंतात्पचाद्यच्वामश्वासौदेवश्वेति ॥ लोकविपरीतत्वात्सुंदरत्वाद्वावामः ॥ वामानांकर्मफलानांदेवइवदेवोराजाविभाजकइतिनीलकंठः ३० (महादेवः) मह्यतेपूज्यतइतिमहान्सचासौदेवश्वेति सर्वान्भावान्परित्यज्यात्मज्ञानयोगै श्वर्येमहतिमहीयतेतस्मादुच्यतेमहादेवइतिश्रुतेः यद्वा ब्रह्मादीनामपिपूज्यइत्यर्थः ॥ यथोक्तंसांबपुराणे ॥ पूज्यतेयःसुरैःसर्वैर्महांश्चैवप्रमाणतः ॥ महेतिधा तुःपूजायांमहादेवस्ततःस्मृतइति ॥ (पटुः) पाटयतिदुःखंनाशयतीतीतिपटुः ॥ फलिपाटीतिसाधुःभक्तकल्याणकरणेदक्षः ॥ (परिवृढः) जगत्प्रभुःप्रभौप

ध्यानाधारोऽपरिच्छेद्योगौरीभर्तागणेश्वरः ॥ अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्वर्गसाधनः ॥ ४ ॥ ज्ञानगम्योदृढप्रज्ञोदे वदेवस्त्रिलोचनः ॥ वामदेवोमहादेवःपटुःपरिवृढोदृढः ॥ ५ ॥ विश्वरूपोविरूपाक्षोवागीशःशुचिसत्तमः ॥ सर्वप्रमा णसंवादीवृषांकोवृषवाहनः ॥ ६ ॥ ईशःपिनाकीखट्वांगीचित्रवेषश्चिरंतनः ॥ तमोहरोमहायोगीगोप्ताब्रह्माचधूर्जटिः ७

रिवृढइतिनिपातनात्साधुः ॥ (दृढः) बलवान् दृढःस्थूलबलयोरितिसाधुः ॥ ५ ॥ (विश्वरूपः) सर्वजगत्स्वरूपः ॥ (विरूपाक्षः) विरूपाणिविषमानिअ क्षीणियस्यसः ॥ (वागीशः) वाचांवेदादिवाणीनामीशःप्रभुः ॥ (शुचिसत्तमः) निस्त्रैगुण्यतयातिशुद्धः ॥ (सर्वप्रमाणसंवादी) सर्वैर्वेदादिप्रमाणैःसंवादो स्मिन्नितिसर्वप्रमाणसंवादी ॥ वेदैश्वसर्वैरहमेववेद्यइत्युक्तेः ॥ (वृषांकः) वृषएवअंकःचिन्हंयस्यसः ४० (वृषवाहनः) वृषःनंदीवाहनंयस्यसः ॥ ६ ॥ (ईशः) सर्वजगदीश्वरः ॥ (पिनाकी) पिनाकाख्यधनुर्युक्तः ॥ (खट्वांगी) खट्वांगायुधयुक्तः (चित्रवेषः) तत्तत्कार्योत्पादनाद्यनुरूपविविधाद्भुतवेषभृत् ॥ (चिरंतनः) सदाभवः त्रिकालाबाध्यइत्यर्थः ॥ (तमोहरः) तमसोऽविद्यायानाशकः ॥ (महायोगी) सदाविर्भूतस्वरूपःयद्वाअष्टांगयोगतत्वज्ञः ॥ (गोप्ता) रक्षिता ॥ (ब्रह्मा) आत्मनासर्वंसृजतीतिब्रह्मायद्वागुणपूर्णः ५० (धूर्जटिः) धूर्भारभूताजटिर्जटायस्य जटसंघातेसर्वधातुभ्यइतीन् जटिर्जटेतिद्विरूपकोशः धूर्गंगा जटास्वस्येतिकेचित् ॥ ७ ॥ ॥ ॥ ॥ ॥

(कालकालः) कालंमृत्युंयमंवाकालयतिसंख्यापयतिनियच्छतीतिकालकालः ॥ कालोमृत्यौमहाकालेसमयेयमकृष्णयोरितिकोशात् ॥ (कृत्तिवासाः) कृत्तिश्चर्मवासोयस्यसः॥ पिनाकहस्तःकृतिवासाइतिश्रुतेः ॥(सुभगः) शोभनंभगमस्यास्तीतिसुभगः ॥ ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ॥ वैराग्यस्याथमोक्षस्यषण्णांभगइतीरणा ॥ (प्रणवात्मकः) ओंकारस्वरूपः ॥ ओमित्येकाक्षरंब्रह्मेतिश्रुतेः ॥ (उन्नध्रः) उन्नह्यतिपापिनःपाशेनबध्नातीतिसःदाम्नीशसेत्यादिनावाहुलकात्कर्तरिष्ट्रन् ॥ (पुरुषः) पुरेशरीरेशेतेइतिपुरुषःअष्टाचक्रानवद्वारा देवानांपूरयोध्या तस्यां हिरण्मयःकोशइतितैत्तिरीयश्रुतौ ॥नवद्वारंपुरंपुण्यमेतैर्भावैःसमन्वितं व्याप्यशेतेमहात्मायस्तस्मात्पुरुषउच्यतइतिमहाभारते ॥ यद्वाऽऽसीत्पूर्वमेवेतिपुरुषःपृषोदरादिः पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमितिश्रुतेः पूर्षुपुरीषुउत्कर्षशालिपुसत्वेषुसीदतिवा पुरूणिवहूनिफलानिसनोतिददातीतिवा पुरूणिभुवनानिसंहारसमयेऽस्यतिअंतयतीतिवा पूर्णत्वात्पूरणाद्वासदनाद्वापुरुषः पूरणात्सदनाच्चैवततोसौपुरुषोत्तमइत्यपिभारते ॥ (जुष्यः)मनोवाकायैःसेव्यः॥ (दुर्वासाः) दुःस्थितंवल्कलादिकंवासोयस्यसदुर्वासाःयद्वादुर्वा

कालकालःकृत्तिवासाःसुभगःप्रणवात्मकः ॥ उन्नध्रःपुरुषोजुष्योदुर्वासाःपुरशासनः ॥ ८ ॥ दिव्यायुधःस्कंदगुरुःपरमेष्ठीपरात्परः ॥ अनादिमध्यनिधनोगिरीशोगिरिजाधवः ॥ ९ ॥ कुवेरवंधुःश्रीकंठोलोकवर्णोत्तमोमृदुः ॥ समाधिवेद्यःकोदंडीनीलकंठःपरस्वधीः ॥ १० ॥ ॥ ॥ ॥

सास्त्वाम्नाअत्रिपुत्ररूपेणावतीर्णः ॥ (पुरशासनः) त्रिपुरासुरस्यहंता ६०॥८॥ (दिव्यायुधः) पिनाकाद्यायुधधारी ॥ (स्कंदगुरुः) षडाननपिता ॥ (परमेष्ठी) परमेप्रकृष्टेस्वेमहिम्निपरमाकाशेस्थातुंशीलमस्येतिपरमेष्ठी परमेष्ठीविभ्राजतइतिमंत्रवर्णात् ॥ (परात्परः) परादव्यक्तादपिपरः॥ (अनादिमध्यनिधनः) आदिमध्यांतरहितःकालतोदेशतश्चापरिच्छिन्नइत्यर्थः ॥ (गिरीशः) ॥ गिरीणांमेर्वादीनामीशः ॥ (गिरिजाधवः) उमापतिः ॥९॥ (कुवेरवंधुः) कुवेरस्त्र्यंबकसखइत्यमरः ॥ (श्रीकंठः) श्रीःशोभावेदोवाकंठेयस्यसः ऋचःसामानियजूंषि साहिश्रीरमृतासतामितिश्रुतेः ॥ (लोकवर्णोत्तमः) भक्तैर्लोक्यतेदृश्यतेवर्णोत्तमोभास्वररूपंयस्यसः ॥ यद्वालोकेषुब्राह्मणादिवर्णेषूत्तमः ७०॥ (मृदुः) भक्तेषुसौम्यरूपः॥ (समाधिवेद्यः) अभ्यस्तयोगगम्यः ॥ (कोदंडी) कोदंडाख्यधनुर्युक्तः ॥ (नीलकंठः) हालाहलपानादिनानीलःकंठोयस्यसः ॥ (परस्वधीः) परस्यभक्तस्यस्वंधनंदधातिपोषयतीतिसः यद्वापरेषुभक्तेषुस्वकीयवद्बुद्धिर्यस्यसः

(विशालाक्षः) विशालानिअक्षीणियस्यसः ॥ (मृगव्याधः) मृगाःपशवोजीवास्तेषांसंहर्तृत्वेनव्याधरूपः ॥ यद्वाअर्जुनानुग्रहार्थंधृतव्याधस्वरूपः ॥ (सुरेशः) सुराणांदेवानामीशः ॥ (सूर्यतापनः) दुर्जनान्सूर्यवत्तापयतीतिसः यद्वासूर्यंतापयतिभीषयतीतिसः भीषोदेतीसुर्यइतिश्रुतेः ॥ (धर्मधाम) धर्माणांवर्णाश्रमादिधर्माणांधामस्थानं ८० (क्षमाक्षेत्रं) क्षमायाः क्षांतेः क्षेत्रमुत्पत्तिस्थानं ॥ (भगवान्) पूर्वोक्तषड्गुणैश्वर्ययुक्तः ॥ (भगनेत्रभित्) दक्षयज्ञेभगस्यदेवस्यनेत्रयोर्भेत्ता ॥ ११ ॥ (उग्रः) सर्वसंहारकत्वादुग्रः (पशुपतिः) पशूनांजीवानांपतिःपालकः ॥ (तार्क्ष्यः) तार्क्ष्यःकश्यपस्तद्रूपः (प्रियभक्तः) प्रियाःभक्तायस्यसः ॥ (परंतपः) परान्शत्रून्तापयतीतिपरंतपः प्रियंवदइतिपाठांतरं ॥ (दाता) भक्तेभ्यऐश्वर्यस्यप्रदाता ॥ (दयाकरः) भक्तानांतापत्रयोद्धरणेनकृपाकरः ९० ॥ (दक्षः) जगद्रूपेणप्रवर्धमानत्वात्सर्वकर्माणिक्षिप्रंकरोतीतिवा दक्षवृद्धौशीघ्रार्थेच ॥ (कर्मंदी) परिव्राट्कर्मंदेनमुनिनाप्रोक्तंभिक्षुसूत्रमधीतेवेदवासौकर्मंदकृशाश्वादिनिः तत्तदाचार्यभिक्षुरूपेणावतीर्यज्ञानप्रकाशकइत्यर्थः अत्रकपर्दीतिपाठांतरं (कामशासनः) मन्मथस्यहंता ॥ १२ ॥ (श्मशाननिलयः) श्मशानंपितृवनंनिलयोयस्यसः ॥ (सूक्ष्मः) शब्दादिस्थूलत्वकारणरहितत्वाच्छब्दादयोह्याकाशादीनामुत्तरोत्तरस्थूलत्वकारणानितदभावात्सूक्ष्मः सर्वगतंसु

विशालाक्षोमृगव्याधःसुरेशःसूर्यतापनः ॥ धर्मधामक्षमाक्षेत्रंभगवान्भगनेत्रभित् ॥ ११ ॥ उग्रःपशुपतिस्तार्क्ष्यः
प्रियभक्तःपरंतपः ॥ दातादयाकरोदक्षःकर्मंदीकामशासनः ॥ १२ ॥ श्मशाननिलयःसूक्ष्मःश्मशानस्थोमहेश्वरः ॥
लोककर्तामृगपतिर्महाकर्तामहौषधिः ॥ १३ ॥ उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः ॥ नीतिःसुनीतिःशुद्धात्मा
सोमःसोमरतःसुखी ॥ १४ ॥ ॥ ॥ ॥ ॥

सूक्ष्ममितिश्रुतेः ॥ (श्मशानस्थः) श्मशानेतिष्ठतीतिसः ॥ (महेश्वरः) महांश्चासावीश्वरश्चेति ॥ (लोककर्ता) जगत्स्रष्टा (मृगपतिः) मृगाणांजीवपशूनांपाता (महाकर्ता) पंचमहाभूतानामपिनिर्माता विश्वस्यकर्ताभुवनस्यगोप्तेत्यादयआगमाः १०० ॥ इतिनाम्नांप्रथमंशतकं ॥ (महौषधिः) व्रीहियवादिरूपः ॥ संसाररोगभेषजत्वाद्वामहौषधिः ॥ १३ ॥ (उत्तरः) जन्मसंसारसागरादुत्तारयतीतिसर्वोत्कृष्टइतिवोत्तरः ॥ विश्वस्मादिंद्रउत्तरइतिश्रुतेः ॥ (गोपतिः) गोःस्वर्गस्यमह्याःपशोर्वाचोरश्मीनांजलस्यवापतिः ॥ (गोप्ता) सर्वभूतानांपालकः ॥ (ज्ञानगम्यः) नकेवलेनकर्मणाकिंतुकर्मणाचित्तशुद्धिंसंपाद्यज्ञानेनैवगम्यः ॥ ज्ञानादेवतुकैवल्यमित्युक्तेः ॥ (पुरातनः) कालेनापरिच्छिन्नत्वात्पुरापिभवतीतिपुरातनः ॥ (नीतिः) दंड्येषुदंडप्रणयनादिरूपायानीतिस्तद्रूपः ॥ (सुनीतिः) शोभनानीतिर्नयनंमोक्षादिकंप्रतिप्रापणंयस्यसः ॥ (शुद्धात्मा) विमलचित्तः ॥ (सोमः) सोमरूपेणौषधीःपोषयन्सोमः ॥ उमयासहवर्ततइतिवासोमः ११० ॥ (सोमरतः) सोमेचंद्रेअमृतेसोमरसेवारतः ॥ (सुखी) आनंदयुक्तः भक्तसुखकरोवा ॥ एषह्येवानंदयातीतिश्रुतेः ॥ १४ ॥ ॥

(सोमपः) सोमंपिबतियज्ञेषुदेवतारूपेणेति धर्ममर्यादांदर्शयन्यजमानरूपेणेतिवासोमपः ॥ (अमृतपः) स्वात्मामृतरसंपिबन्नमृतपः ॥ (सौम्यः) भक्तेषु सौम्यरूपः ॥ (महातेजाः) यदीयेनतेजसाभास्करादयस्तेजस्विनस्तन्महत्तेजोयस्येतिमहातेजाः ॥ येनसूर्यस्तपतितेजसेद्धइतिश्रुतेः ॥ यदादित्यगतं तेजोजगद्भासयतेखिलं ॥ यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमितिस्मृतेश्च ॥ (महाद्युतिः) महतीद्युतिर्बाह्याभ्यंतरास्येतिमहाद्युतिः ॥ स्वयंज्योतिरिति श्रुतेःज्योतिषांज्योतिरित्यादेश्च॥महानीतिर्महामतिरितिपाठांतरं॥ (तेजोमयः) विश्वतःप्रकाशः ॥ (अमृतमयः) नमृतंमरणंयस्यसः स्वार्थेमयट्यद्वाऽमृतंज लंतन्मयः अमृतंवाआपइतिश्रुतेः ॥ अष्टमूर्त्यंतर्गतजलस्वरूपइत्यर्थः ॥ यद्वाअमृतंमोक्षानंदस्तन्मयः ॥ (अन्नमयः) अद्यतेत्तिचभूतानीत्यन्नंतद्रूपः अन्न मयआत्माअन्नंब्रह्मेतिव्यजानादित्यादिश्रुतिभिर्वहिर्दशामन्नमयआत्मोक्तः १२० ॥ (सुधापतिः) देवानांपानार्थमम्रुतस्यपाता ॥ १५ ॥ (अजातशत्रुः) स्वयमेवसर्वस्यशासनादनुत्पन्नशत्रुः ॥ (आलोकः) स्वप्रकाशरूपः ॥ (संभाव्यः) सर्वैर्देवासुरादिभिरुपास्यत्वेनसंमाननीयः ॥ (हव्यवाहनः) अग्निस्वरू

सोमपोऽमृतपःसौम्योमहातेजामहाद्युतिः ॥ तेजोमयोऽमृतमयोऽन्नमयश्चसुधापतिः ॥ १५ ॥ अजातशत्रुरालोकः संभाव्योहव्यवाहनः ॥ लोककरोवेदकरःसूत्रकारःसनातनः ॥ १६ ॥ महर्षिःकपिलाचार्योविश्वदीप्तिर्विलोचनः ॥ पिनाकपाणिर्भूदेवःस्वस्तिदःस्वस्तिकृत्सुधीः ॥ १७ ॥ ॥ ॥

पेणदेवेभ्योहव्यंवहतीतिहव्यवाहनः ॥ देवेभ्योहव्यंवहनःप्रजानन्नितिश्रुतेः ॥ (लोककरः) लोकानांकर्ता ॥ (वेदकरः) ऋगादिवेदानांप्रकाशकः ॥ (सूत्रकारः) सूत्राणांकर्ताव्यासादिरूपेणावतीर्णइत्यर्थः ॥ (सनातनः) सदाभवः ॥ १६ ॥ (महर्षिःकपिलाचार्यः) कृत्स्नस्यवेदस्यदर्शनान्महर्षिःअन्ये तुवेदैकदेशदर्शनादृषयः कपिलश्चासौसांख्यस्यशुद्धात्मतत्वविज्ञानस्याचार्यश्चेतिकपिलाचार्यःशुद्धात्मतत्वविज्ञानंसांख्यमित्यभिधीयतइतिवत्सस्मृतेः॥ऋषिं प्रसूतंकपिलंमहान्तमितिश्रुतेश्च॥सिद्धानांकपिलोमुनिरितिस्मृतेश्च १३०इदंद्वयमप्येकमेव॥(विश्वदीप्तिः)विश्वादीप्तिर्यस्यसः यस्यभासासर्वमिदमितिश्रुतेः (विलोचनः) विषमलोचनःत्रिनेत्रइत्यर्थः ॥ (पिनाकपाणिः) पिनाकाख्यधनुर्भृत् यद्वाशूलभृत् पिनाकोऽस्त्रीशूलशंकरधन्वनोरित्यमरः ॥ (भूदेवः) मुनि दुर्वासआदिब्राह्मणरूपेणाविर्भूयजनानामुद्धर्ता अग्रजन्मभूदेववाडवाइत्यमरः ॥ (स्वस्तिदः) भक्तेभ्यःस्वस्तिमंगलंददातीतिस्वस्तिदः ॥ (स्वस्तिकृत्) भक्तेभ्यःस्वस्तिकरोतीतिस्वस्तिकृत् ॥ (सुधीः) शोभनज्ञानयुक्तः ॥ १७ ॥ ॥ ॥

(धातृधामा) धातृविश्वस्यविधारकंधामतेजोयस्यसः ॥ (धामकरः) धाम्नांसूर्यादितेजसांकर्ता सर्वप्राणिदेहानांवाकर्ता गृहदेहत्विट्प्रभावाधामानीत्यमरः ॥ (सर्वगः) सर्वंगच्छतीतिसर्वगःकारणत्वेनसर्वव्यापित्वात् १४० ॥ (सर्वगोचरः) सर्वंजगत्प्रत्यक्षगोचरोयस्यसः ॥ (ब्रह्मसृक्) ब्रह्मणोहिरण्यगर्भस्यवेदस्यवास्रष्टा ॥ (विश्वसृक्) जगतःस्रष्टा ॥ (सर्गः) सृज्यरूपत्वात्सर्गहेतुत्वाद्वासर्गः ॥ (कर्णिकारः) एतन्नामकवृक्षरूपउत्पलरूपोवा ॥ कर्णिकारोद्रुमोत्पलइतिविश्वः ॥ (प्रियः) आत्मरूपत्वात्सर्वप्रेष्ठः ॥ (कविः) वाल्मिक्यादिरूपःक्रांतदर्शीवा सर्वदृगित्यर्थःनान्योतोस्तिद्रष्टेत्यादिश्रुतेः कविर्मनीषीतिमंत्रवर्णाच्च ॥ १८ ॥ (शाखः) एतन्नामकऋषिरूपः ॥ (विशाखः) एतदाख्यऋषिरूपः स्कंदरूपोवा ॥ (गोशाखःशिवः) गवांवेदादिवाचांशाखाऋगादिभेदायस्मादसौगोशाखः सएवशिवः शेतेस्मिन्जगदितिशिवः निस्त्रैगुण्यतयाशुद्धत्वाद्वाशिवः सब्रह्मसशिवइतिश्रुतेः १५० ॥ इदंशब्दद्वयात्मकमेकंनाम ॥ (भिषक्) धन्वंतरिरूपेणरोगाणांहर्ता संसाररोगस्यनाशकोवा भिषक्तमंत्वाभिषजांशृणोमीतिश्रुतेः ॥ (अनुत्तमः) अविद्यमानउत्तमोयस्मात्सः यस्मात्परंनापरमस्तिकिंचिदितिश्रुतेः नत्वत्समोस्त्यभ्यधिकःकुतोन्यइतिस्मृतेश्च ॥ (गंगाप्लवोदकः) गंगाभागीरथीतस्याःप्लववज्जनतारकमुदकंयस्मिन्सः ॥ (भव्यः) सर्वकल्याणयुक्तः फलकल्याणयोर्भव्यमित्यमरः ॥ (पुष्कलः) सर्वव्यापी ॥ (स्थपतिःस्थिरः) अनंतब्रह्मांडानांस्रष्टा ॥ अधिपतिर्वायद्वामायाकंचुकी ॥

धातृधामाधामकरःसर्वगःसर्वगोचरः ॥ ब्रह्मसृग्विश्वसृक्सर्गःकर्णिकारःप्रियःकविः ॥ १८ ॥ शाखोविशाखोगोशाखःशिवोभिषगनुत्तमः ॥ गंगाप्लवोदकोभव्यःपुष्कलःस्थपतिःस्थिरः ॥ १९ ॥ विजितात्माविषयात्माभूतवाहनसारथिः ॥ सगणोगणकायश्चसुकीर्तिश्छिन्नसंशयः ॥ २० ॥ कामदेवःकामपालोभस्मोद्धूलितविग्रहः ॥ भस्मप्रियोभस्मशायीकामीकांतःकृतागमः ॥ २१ ॥ ॥ ॥ ॥

स्थपतिःकंचुकिन्यपीतिविश्वः ॥ सएवसर्वदातिष्ठतीतिस्थिरः नित्यइतियावत् इदंद्वयमप्येकमेव ॥ १९ ॥ (विजितात्मा) विजितआत्मामनोयेनसः (विषयात्मा) विषयःसर्वजगत्प्रपंचएवात्मास्वरूपंयस्यसः यद्वाअविषयःप्रत्यक्षाद्यगोचरआत्मायस्यसः अप्रत्यक्षमनिर्देश्यमित्यादिस्मृतेः ॥ विधेयात्मेतिपाठांतरं ॥ (भूतवाहनसारथिः) भूतानांजीवानांवाहनःकर्मफलप्रापकोब्रह्मासारथिर्यस्यसः ॥ (सगणः) प्रमथादिगणयुक्तः १६० ॥ (गणकायः) गणाएवकायोयस्यसः यद्वाअगणकायःअगणोऽगण्योऽपरिच्छेद्यःकायोयस्यसः ॥ (सुकीर्तिः) शोभनाअवितथाकीर्तिर्यस्यसः ॥ (छिन्नसंशयः) करामलकवत्सर्वसाक्षात्कृतवतःक्वापिसंशयोनास्तीतिच्छिन्नसंशयः ॥ २० ॥ (कामदेवः) धर्मादिपुरुषार्थान्वांछद्भिःकाम्यतेसौकामःसचासौदेवश्चेतिसः ॥ (कामपालः) कामिनांकामान्पालयतीतिकामपालः ॥ (भस्मोद्धूलितविग्रहः) स्पष्टं ॥ (भस्मप्रियोभस्मशायी) भस्मप्रियंयस्यअतएवभस्मशायी ॥ चिताभस्मालेपइतिपुष्पदंतः ॥ इदंद्वयमेकमेव ॥ (कामी) पूर्णकामत्वात्कामीसृष्टौकामोस्यास्तीतिवा सोकामयतेतिश्रुतेः ॥ (कांतः) अभिरूपतमंदेहंवहन्कांतः [illegible] ब्रह्मणोंऽतोयस्मादितिवाकांतः ॥ (कृतागमः) कृतःप्रकटीकृतःश्रुतिस्मृत्यादिलक्षणआगमोयेनसः श्रुतिस्मृतीममैवाज्ञेइतिभगवद्वचनात् १७० ॥ २१ ॥

(समावर्तः) संसारचक्रस्यसम्यगावर्तकइतिसमावर्तः ॥ (अनिवृत्तात्मा) सर्वत्रवर्तमानत्वात्कुतोपिननिवृत्तआत्मायस्यसः यद्वानिवृत्तात्मेत्येवच्छेदः निवृत्तोविषयेभ्यआत्मामनोयस्यसः ॥ (धर्मपुंजः) धर्मसमुदायरूपः ॥ (सदाशिवः) सदासर्वदाशिवंकल्याणंयस्मात्सः ॥ (अकल्मषः) नित्यशुद्धः ॥ (चतुर्बाहुः) विष्णुस्वरूपः ॥ (दुरावासः) दुःखेनाऽऽवास्यतेचित्तेयोगिभिः समाधावितिदुरावासः ॥ सर्वावासइतिपाठांतरं ॥ (दुरासदः) दुःखेनासत्तुंप्राप्तुंशक्यः ॥२२॥ (दुर्लभः) दुर्लभयाभक्त्यालभ्योदुर्लभः भक्त्यालभ्यस्त्वनन्ययेतिभगवद्वचनात् ॥ (दुर्गमः) दुःखेनगम्यतेज्ञायतइतिदुर्गमः १८०॥ (दुर्गः) अंतरायप्रतिहतैर्दुःखादवाप्यतइतिदुर्गः ॥ (सर्वायुधविशारदः) सर्वायुधेषुसर्वप्रहरणेषुविशारदाजामदग्न्यादयोयस्मादसौ ॥ (अध्यात्मयोगानिलयः) अध्यात्मयोगोऽसंप्रज्ञातसमाधिःसएवनिलयःस्थानंयस्यसः॥ (सुतंतुः) शोभनस्तंतुर्विस्तीर्णःप्रपंचोयस्मात्सः॥ (तंतुवर्धनः) तमेवतंतुंवर्धयतिछेदयतीतिवातंतुवर्धनः २३॥ (शुभांगः) शोभनैरंगैरवयवैर्विराजतेध्येयत्वादितिशुभांगः ॥ (लोकसारंगः) लोकानांसारंसारंगवद्गृण्हातीतिलोकसारंगः लोकसारःप्रणवस्तेनगम्यतइतिवा पृषोदरादिः ॥ (जगदीशः) जगतांनियंता ॥ (जनार्दनः) जनानर्दयतिसंहरतीतिजनार्दनः ॥ (भस्मशुद्धिकरः) भस्मनाशुद्धेरुत्पादकः १९०॥ (मेरुः)

समावर्तोनिवृत्तात्माधर्मपुंजःसदाशिवः ॥ अकल्मषश्चतुर्बाहुर्दुरावासोदुरासदः ॥ २२ ॥ दुर्लभोदुर्गमोदुर्गःसर्वायुधविशारदः ॥ अध्यात्मयोगनिलयःसुतंतुस्तंतुवर्धनः ॥ २३ ॥ शुभांगोलोकसारंगोजगदीशोजनार्दनः ॥ भस्मशुद्धिकरोमेरुरोजस्वीशुद्धविग्रहः ॥ २४ ॥ असाध्यःसाधुसाध्यश्चभृत्यमर्कटरूपधृक् ॥ हिरण्यरेताःपौराणोरिपुजीवहरोबलः ॥ २५ ॥ महाह्रदोमहागर्त्तःसिद्धवृंदारवंदितः ॥ व्याघ्रचर्मांबरोव्यालीमहाभूतोमहानिधिः ॥ २६ ॥

सुवर्णाद्रिरूपः ॥ (ओजस्वी) ओजः स्वात्मबलंनत्वन्नादिबलंयस्यसओजस्वी ॥ (शुद्धविग्रहः) चिदात्मकः ॥ २४ ॥ (असाध्यः) दुष्कृतिभिःसाधयितुंप्राप्तुमशक्यः ॥ (साधुसाध्यः) साधुजनैःप्राप्यः ॥ (भृत्यमर्कटरूपधृक्) रामभृत्योहनूमांस्तद्रूपधारी ॥ (हिरण्यरेताः) हिरण्यंरेतोयस्यसहिरण्यरेताअग्निस्वरूपः ॥ (पौराणः) सर्वपुराणैर्ब्रह्मरूपेणप्रतिपाद्यः ॥ (रिपुजीवहरः) शत्रुप्राणहरः ॥ (बलः) सर्वशक्तियुक्तः २००॥ इतिद्वितीयंशतकम् ॥ २५॥ (महाह्रदः) अवगाह्यसदानंदंविश्रम्यसुखमासतेयोगिनोयत्रेतिमहाह्रदइवमहाह्रदः ॥ (महागर्तः) गर्तवदस्यमायामहातीदुरत्ययेतिमहागर्तः ॥ मममायादुरत्ययेतिभगवद्वचनात् ॥ अथवागर्तशब्दोरथपर्यायइतिनैरुक्तैरुक्तमतोमहारथोमहागर्तःमहारथत्वमस्यत्रिपुरवधादौप्रसिद्धं ॥ (सिद्धवृंदारवंदितः) सिद्धगणैर्वृंदारैर्देवैश्चवंदितःस्तुतः ॥ (व्याघ्रचर्मांबरः) व्याघ्रचर्मअंबरंवस्त्रंयस्यसः ॥ (व्याली) वासुक्यादिसर्पभूषणः ॥ (महाभूतः) कालत्रयानवच्छिन्नस्यमहत्त्वान्महाभूतः ॥ महान्विराट्भूतउत्पन्नोयस्मादितिवा ॥ योब्रह्माणंविदधातिपूर्वमितिश्रुतेः ॥ (महानिधिः) सर्वभूतान्यस्मिन्निधीयंतइतिनिधिःमहांश्चासौनिधिश्चेतिमहानिधिः ॥ २६ ॥ ॥ ॥ ॥ ॥

(अमृताशः) स्वात्मानंदामृतरसमश्नातीत्यमृताशः ॥ अमृताभक्तोद्धारायानश्वराऽऽशावांछास्येतिवा ॥ (अमृतवपुः) मरणरहितंवपुर्यस्यसः अजरोऽमरइति श्रुतेः ॥ (पांचजन्यः)निषादपंचमावर्णाःपंचजनास्तेषुभवःपांचजन्यःअग्निरूपःअग्निर्ऋषिःपवमानःपांचजन्यइतिश्रुतेःपंचयज्ञइतिपाठेपंचदेवयज्ञादयोयज्ञा यस्मात्सः॥ २१०॥(प्रभंजनः) भक्तमायावरणंप्रकर्षेणभंजयतिनाशयतीतिप्रभंजनः वायुरूपोवा ॥ (पंचविंशतितत्वस्थः) प्रकृत्यादिपंचविंशतिसंख्यत त्वेषुतिष्ठतीतिसः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः ॥ (पारिजातः) तत्संज्ञककल्पद्रुमस्वरूपः ॥ (परावरः) ॥ परंब्रह्मअवरंजगत्एतदुभयात्मकः ॥ २७ (सुलभः ॥ पत्रपुष्पफलादिभिर्भक्तिमात्रसमर्पितैःसुखेनलभ्यतइतिसुलभः ॥ पत्रेषुपुष्पेषुफलेषुतोयेष्वक्रीतलभ्येषुसदैवसत्सु॥भक्त्यैकलभ्येपुरुषेपुराणेमुक्तौ कथंनक्रियतेप्रयत्नइतिमहाभारते ॥ (सुव्रतःशूरः) शोभनंव्रतंनियतभोजनंभोजनान्निवृत्तिर्वायस्यसुष्ठुभक्तरक्षाव्रतंयस्येतिवाअभयंसर्वभूतेभ्योददाम्येतद्व्रतं ममेत्युक्तेःसएवशूरःसूर्यरूपःशूरश्वरेभटेसूर्यइतिविश्वः॥इदंद्वयमेकं॥(ब्रह्मवेदनिधिः)ब्रह्मरूपोयोवेदस्तत्प्रादुर्भावस्थानं अस्यमहतोभूतस्यनिश्वसितमित्यादि श्रुतेः वाङ्मयैकनिधिरितिपाठांतरं॥(निधिः) नितरांधीयतेयोगिभिश्चितेस्थाप्यतइतिनिधिः॥(वर्णाश्रमगुरुः) वर्णानांब्राह्मणादीनामाश्रमाणांब्रह्मचर्यादीनांगुरु रुपदेष्टाजनकोवा ॥ (वर्णी) ब्रह्मचारिरूपः वर्णीस्याल्लेखकेचित्रकारेचब्रह्मचारिणीतिविश्वः २२०॥ (शत्रुजिच्छत्रुतापनः) सुरशत्रूञ्जयतीतिशत्रुजित् यतः

अमृताशोऽमृतवपुःपांचजन्यःप्रभंजनः ॥ पंचविंशतितत्वस्थःपारिजातःपरावरः ॥ २७ ॥ सुलभःसुव्रतःशूरोब्रह्म वेदनिधिर्निधिः ॥ वर्णाश्रमगुरुर्वर्णीशत्रुजिच्छत्रुतापनः ॥ २८ ॥ आश्रमःक्षपणःक्षामोज्ञानवानचलेश्वरः॥ प्रमा णभूतोदुर्ज्ञेयःसुपर्णोवायुवाहनः ॥ २९ ॥ ॥ ॥ ॥

सुरशत्रूणांतापनाच्छत्रुतापनः ॥ इदंद्वयमेकं ॥ २८ ॥ (आश्रमः) आश्रमवत्सर्वेषांसंसारारण्येभ्रमतांविश्रांतिस्थानत्वादाश्रमः ॥ (क्षपणः) क्षपयतीतिक्ष पणः भक्तपापक्षयस्यकर्ता ॥ (क्षामः) प्रलयेक्षामाःक्षीणाःप्रजाःसर्वाःकरोतीतिक्षामः तत्करोतितदाचष्टइतिणिचिपचाद्यचिक्तेसंपन्नंक्षामइति ॥ (ज्ञान वान्) नित्यज्ञानयुक्तः ॥ (अचलेश्वरः) अचलानांपृथिवीपर्वतादीनामीश्वरः॥ (प्रमाणभूतः) प्रमाणानिप्रत्यक्षादीनिभूतान्युत्पन्नानियस्मादसौप्रमाणभूतः (दुर्ज्ञेयः) दुःखेनातिप्रयासेनज्ञातुंशक्योदुर्ज्ञेयः ॥ (सुपर्णः) सुष्ठुधर्माधर्मरूपेपर्णेपक्षौयस्यससुपर्णःद्वासुपर्णेतिश्रुतेः ॥ गरुडरूपोवासुपर्णःपततामस्मीत्युक्तेः यद्वासुपर्णःस्रष्टापरमेश्वरः सुपर्णविप्राःकवयोवचोभिरेकंसंतंबहुधाकल्पयंतीत्यादिश्रुतेः तत्रशोभनच्छंदोरूपपर्णयुक्तइत्यर्थः ॥ छंदांसियस्यपर्णानीति भगवद्वचनात् ॥ (वायुवाहनः) वायवोवाहनेरथेसोपानभूतायस्यसःयद्वावायुर्वहतिभूतानियद्भीत्यासः भीषास्माद्वातःपवतइतिश्रुतेः २३० ॥ २९ ॥

(धनुर्धरोधनुर्वेदः)धनुषःपिनाकोस्यधरोधारकःसएवधनुर्धनुर्वेदस्तंवेत्तीतिधनुर्वेदः धनुषोवेदोयस्मात्सइतिवा इदंद्वयमेकं ॥ (गुणराशिर्गुणाकरः) गुणानांयोगादिगुणानांराशयःसंघायस्मात्सगुणराशिः ॥ तेचोक्तालिंगपुराणे॥त्वयियोगंचसांख्यंचतपोविद्याविधिक्रियाः ऋतंसत्यंदयाब्रह्मन्नहिंसासन्मतिःक्षमा ॥ ध्यानंध्येयंदमःशांतिर्विद्याविद्यामतिर्धृतिः ॥ कांतिर्नीतिःप्रथामेधालज्जादृष्टिःसरस्वती ॥ तुष्टिःपुष्टिःक्रियाचैवप्रसादश्चप्रतिष्ठिता ॥ द्वात्रिंशत्सुगुणाह्येषा द्वात्रिंशाक्षरसंज्ञया ॥ प्रकृतिर्विहिताब्रह्मंस्त्वत्प्रसूतिर्महेश्वरीति ॥ अतएवतेषांगुणानामाकरःखनिभूतः॥इदंद्वयमेकं॥(सत्यःसत्यपरः) सत्सुसाधुःसत्यःअतएव सत्यपरः सत्येयथार्थकथनेपरःतन्निष्ठःइदंद्वयमेकमेव ॥ (दीनः) वहिर्देशांश्मशानवासादिनादरिद्रवद्भासमानः ॥ अथवाअदीनःसदातुष्टः ॥ (धर्मांगो धर्मसाधनः) धर्मायज्ञादयोंगभूतायस्येतिधर्मांगः वराहमूर्तिः तदुक्तंहरिवंशे वेदवादोयूपदंष्ट्रःक्रतुहस्ताश्चितीमुखः अग्निजिह्वोदर्भरोमाब्रह्मशीर्षोमहातपाः ॥ अहोरात्रेक्षणोदिव्योवेदांगःश्रुतिभूषणः आज्यनासःस्रुवतुंडःसामघोषस्वरोमहान् ॥ धर्मसत्यमयःश्रीमान्कर्मविक्रमसत्क्रियः ॥ प्रायश्चित्तनखोघोरःपशुजातिर्महाभुजः उद्गात्रंगोहोमलिंगःफलवीजमहौषधिः ॥ वाय्वंतरात्मामंत्रस्फिग्विकृतःसोमशोणितः वेदिस्कंधोहविर्गंधोहव्यकव्यास्थिवेगवान् ॥ प्राग्वंशकायोद्युतिमान्नानादीक्षाभिरर्चितः दक्षिणाहृदयोयोगीमहासत्रमयोमहान् उपसदिष्टिरुचकः प्रवर्ग्यावर्तभूषणः नानाछंदोगतिपथोगुह्योपनिषदासनः छायापत्नीसहायोवैमेरुशृंगमिवोच्छ्रितइति ॥ अतएव धर्मःसाध्यतेऽनेनेतिधर्मसाधनः धर्मसंस्थापनार्थायसंभवामियुगेयुगइत्युक्तेः॥इदंद्वयमेकं॥ ॥ ३० ॥ (अनंतदृष्टिः) अनंताअसंख्यादृष्टयोयस्यसःअनंतदृष्टिः ॥ (आनंदः) निरतिशयसुखस्वरूपः आनंदंब्रह्मेतिश्रुतेः ॥ (दंडोदमयिता) दमयतामपिदमनरूपोदंडः दंडोदमयतामस्मीतिभगवद्गीतोक्तेः अतएवइंद्रादिरूपेणप्रजादमयतीतिदमयिताइदंद्वयमेकं ॥ (दमः) इंद्रियनिग्रहस्वरूपः॥(अभिवाद्योमहामायः) सुरासुरादिभिरपिवंदनीयः यतोमायाविनामपिमायाकारित्वान्महामायः ममममायादुरत्ययेतिभगवद्वचनात् इदंद्वयमेकं २४० ॥ (विश्वकर्माविशारदः) विश्वंकर्मक्रियायस्यसविश्वकर्मा विश्वंजगत्कर्मक्रियमाणंयेनेतिवा ॥ त्वष्टृरूपोवा सएवविशारदः सर्वकलासुनिपुणः विशिष्टाशारदा सरस्वतीयस्मात्सइतिवाइदंद्वयमेकं॥३१॥(वीतरागः)वीतोगतोरागोविषयप्रीतिर्भक्तानांयस्मात्सवीतरागः॥(विनीतात्मा)विनीतोनम्रीकृतःआत्मास्वभावो भक्तानांयेनसः॥(तपस्वी) तपोस्यास्तीतितपस्वी॥(भूतभावनः) भूतानिभावयतिजनयतिवर्धयतिवाभूतभावनः ॥ (उन्मत्तवेषःप्रच्छन्नः) उन्मत्तवद्वेषो दिग्वासस्त्वादिर्यस्यसउन्मत्तवेषः अतएवप्रच्छन्नोगूढरूपः इदंद्वयमेकं ॥ (जितकामः) जितःकामोमदनोयेनसजितकामः ॥ (अजितप्रियः) अजितोविष्णुः प्रियोयस्यसः जितरोचिःप्रियःकविरितिपाठांतरं ॥ ३२ ॥ ॥ ॥ ॥

धनुर्धरोधनुर्वेदोगुणराशिर्गुणाकरः ॥ सत्यःसत्यपरोदीनोधर्मांगोधर्मसाधनः ॥ ३० ॥ अनंतदृष्टिरानंदोदंडोदमयितादमः ॥ अभिवाद्योमहामायोविश्वकर्माविशारदः ॥ ३१ ॥ वीतरागोविनीतात्मातपस्वीभूतभावनः ॥ उन्मत्तवेषःप्रच्छन्नोजितकामोऽजितप्रियः ॥ ३२ ॥ ॥ ॥ ॥

(कल्याणप्रकृतिः)कल्याणीप्रकृतिर्यस्यसः॥(कल्पः) सर्वस्यप्रथमःकारणमितियावत् कल्पःस्यात्प्रथमेन्यायेशास्त्रेब्राह्मदिनेविधावितिविश्वः २ ५ ०॥ (सर्वलो
कप्रजापतिः) सर्वलोकेषुभुवनेषुयाःप्रजास्तासांपतिःपालकः ॥ (तरस्वी) भक्तरक्षणायातिवेगयुक्तः॥(तारकः)भवसागरादुत्तारकः॥(धीमान्)प्रशस्तज्ञा
नयुक्तः तारकोधीरइतिपाठांतरं ॥ (प्रधानप्रभुः) प्रधानस्यप्रकृतेःप्रभुःस्वामी ॥ (अव्ययः) नव्येतीत्यव्ययोविनाशरहितः ॥३ ३॥ (लोकपालः) लोकान्पा
लयतीतिलोकपालः ॥ (अंतर्हितात्मा) अंतर्हितःमायातिरोहितआत्मास्वरूपंयस्यसः॥ (कल्पादिः) कल्पस्यशास्त्रस्यादिःकारणं तदुक्तंशारीरकेशास्त्रयोनित्वा
दिति ॥ (कमलेक्षणः) कमलपत्राणीवेक्षणानियस्यसःकमलाश्रीरीक्षणाद्यस्येतिवा २ ६ ०॥ (वेदशास्त्रार्थतत्वज्ञः) वेदानांशास्त्राणांचार्थतत्वंजानीतीतिसः वेद
शास्त्राणामर्थतत्वज्ञामुनयोयस्मादितिवा ॥ (अनियमः) सर्वस्यनियंतुर्नियंत्रंतराभावादनियमः ॥ (नियताश्रयः) नियतःनित्यःसर्वस्यजगतआश्रयः ॥ ३ ४ ॥
(चंद्रः) आल्हादकत्वेनेंदुरूपः ॥ (सूर्यः) सुवतिकर्मणिलोकंप्रेरयतीतिसूर्यः आदित्यरूपइत्यर्थः ॥ (शनिः) एतत्संज्ञकग्रहरूपः ॥ (केतुः) ग्रहविशेषरूपः
धूमकेतुरूपोवा ॥ (वरांगः) वराणिशोभनान्यंगानियस्यसवरांगःविरामइतिपाठांतरं ॥ (विद्रुमच्छविः) विद्रुमवत्प्रवालवच्छविःकांतिर्यस्यसविद्रुमच्छ

कल्याणप्रकृतिःकल्पःसर्वलोकप्रजापतिः ॥ तरस्वीतारकोधीमान्प्रधानप्रभुरव्ययः ॥ ३३ ॥ लोकपालोंऽतर्हिता त्माकल्पादिःकमलेक्षणः ॥ वेदशास्त्रार्थतत्वज्ञोऽनियमोनियताश्रयः ॥३४॥ चंद्रःसूर्यःशनिःकेतुर्वरांगोविद्रुमच्छविः ॥ भक्तिवश्यःपरब्रह्ममृगबाणार्पणोऽनघः ॥ ३५ ॥ अद्रिरद्र्यालयःकांतःपरमात्माजगद्गुरुः ॥ सर्वकर्मालयस्तुष्टोमं गल्योमंगलावृतः ॥ ३६ ॥ ॥ ॥ ॥ ॥

विर्भौमरूपः॥(भक्तिवश्यः) भक्त्यापरमप्रेम्णाश्रवणंकीर्तनमित्याद्युक्तलक्षणयावावश्यःइच्छानुसारीकर्तुंशक्यः २ ७ ०॥(परब्रह्ममृगबाणार्पणः) परब्रह्मरू
पोयोमृगःअन्वेष्यःतस्मिन्भक्तनांमनोरूपबाणस्यार्पणंयस्मात्सः तदुक्तंलिंगपुराणेप्रणवोधनुःशरोह्यात्माब्रह्मलक्षणमुच्यते॥अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभ
वेदितिअत्रात्मामनःलक्षणंलक्ष्यंब्रह्म॥(अनघः)नास्त्यघंस्तुवतांयस्मात्सोऽनघःतदुक्तंभागवते॥यद्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगादघमाशुहंतितदिति॥ ३ ५
(अद्रिः) मेर्वादिरूपः॥ (अद्र्यालयः) कैलासनिलयः ॥ (कांतः) भक्तमनोरमः यद्वाकोब्रह्मांतेसमीपेसारथिभूतोयस्यसः ॥ (परमात्मा) परमःसर्वोत्कृष्टश्चा
सावात्माचपरमात्मा सर्वव्यापकत्वात्सर्वदासर्वत्रविद्यमानइत्यर्थः तदुक्तंपुराणांतरे यच्चास्यसंततोभावस्तस्मादात्मेतिकथ्यतइति उत्तमःपुरुषस्त्वन्यःपर
मात्मेत्युदाहृतइतिच ॥ (जगद्गुरुः) जगतांगुरुर्हितस्योपदेशकः॥ (सर्वकर्मालयः) सर्वकर्मणांनित्यनैमित्तिकादीनामालयोर्पणस्थानं ॥ यत्करोषियदश्नासी
त्याद्युक्तेः ॥ (तुष्टः) परमानंदैकरूपत्वात्तुष्टः ॥ (मंगल्योमंगलावृतः) भक्तमंगलायहितोमंगल्यः यतोमंगलैरावृतोयुक्तः इदंद्वयमेकम् २ ८ ० ॥३ ६॥

(महातपाः)महत्सृज्यविषयंतपोज्ञानंयस्येतिमहातपाः यस्यज्ञानमयंतपइतिमंत्रवर्णात् ऐश्वर्यंप्रतापोवातपोमहद्यस्येतिवा ॥ (दीर्घतपाः) दीर्घमजरामरत्वात्तपोयस्येति दीर्घतपाः॥(स्थविष्ठः)अतिस्थूलः(स्थविरः) वृद्धरूपः (ध्रुवः)निश्चलः स्थविरोद्रुमइतिपाठांतरं॥(अहः)प्रकाशरूपत्वादहः(संवत्सरः)वर्षात्मककालरूपः ॥ (व्याप्तिः) सर्वत्रविद्यमानतास्वरूपः॥ (प्रमाणं) प्रमाणंप्रमितिःसंवित्स्वयंप्रभातद्रूपः प्रज्ञानंब्रह्मेतिश्रुतेः ज्ञानस्वरूपमत्यंतंनिर्मलंपरमार्थतः तदेवार्थस्वरूपेणभ्रांतिदर्शनतःस्थितमितिविष्णुपुराणाच्च ॥ (परमं) परामाशोभायस्यमुक्तिरूपालक्ष्मीर्यस्मादितिवापरमं २९० ॥ (तपः) ऋतादिरूपः ऋतंतपइत्यादिश्रुतेः॥३७॥ (संवत्सरकरः) संवत्सरस्यकरःकर्ता कालचक्रप्रवर्तकः प्रभवादिवत्सराणामुत्पादकोवा (मंत्रप्रत्ययः) ऋग्यजुःसामलक्षणैर्मंत्रैःप्रत्येतव्योमंत्रप्रत्ययः(सर्वदर्शनः)सर्वाणिदर्शनानिप्रत्यक्षाणियस्यससर्वदर्शनः सर्वात्मकत्वात् विश्वतश्चक्षुर्विश्वाक्षमित्यादिश्रुतेः॥(अजः)नजायतइत्यजः नजातोनजनिष्यतइतिश्रुतेः नहिजातोनजायेहंनजनिष्येकदाचन॥ क्षेत्रज्ञःसर्वभूतानांतस्मादहमजःस्मृतइतिमहाभारते॥ (सर्वेश्वरः) सर्वेषामीश्वराणामपीश्वरत्वात्सर्वेश्वरः एषसर्वेश्वरइतिश्रुतेः ॥ (सिद्धः)नित्यनिष्पन्नरूपत्वात्सिद्धः ॥ (महारेताः) महत्रेतोवीर्यंयस्यसः उर्ध्वरेतंविरूपाक्षमितिश्रुतेः॥(महाबलः)महत्बलंसामर्थ्यंयस्यसः॥३८॥ (योगीयोग्यः)नित्ययोगयुक्तः अतोयोगायप्रभवतीतियोग्यः इदंद्वयमेकमेव३००(महातेजाः)महांस्तेजःप्रभावोयस्येतिमहातेजाःतेजःप्रभावेदीप्तौचेत्यमरः यद्वामहद्दुष्टोत्कर्षादेरसहनंयस्यसः अधिक्षेपावमानादेःप्रत्युक्तस्यपरेणयत् ॥ प्राणात्ययेप्यसहनंतत्तेजःसमुदाहृतमितिभरतोक्तेः॥(सिद्धिः)सर्ववस्तुषुसंविद्रूपत्वात्सिद्धिः निरतिशयफलरूपत्वाद्वासिद्धिः स्वर्गादीनांविनाशित्वान्नतादृशफलत्वं(सर्वादिः)सर्वभूतानामादिकारणत्वात्सर्वादिः॥(अग्रहः)अपुण्यैर्ज्ञातुमशक्यः अवाङ्मनसगोचरइत्यर्थः॥(वसुः)वसंतिसर्वभूतान्यत्रतेष्वयमपिवसतीतिवसुः वसूनामस्मिपावकइत्युक्तोवावसुः॥(वसुमनाः) वसुप्रशस्तंमनोयस्यसवसुमनाःरागद्वेषादिक्लेशाकलुषितचित्तइत्यर्थः ॥ (सत्यः) अवितथरूपत्वात्परमात्मासत्यःसत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ (सर्वपापहरोहरः) कायिकादिसकलपातकानांहर्ता अतो हरःएतन्नाम्नाप्रसिद्धः॥ इदंद्वयमेकं॥३९॥ (सुकीर्तिः) शोभनाकीर्तिर्यस्यससुकीर्तिः॥(शोभनः) नानाविधविभवैःशोभतेसौशोभनः ३१० ॥ (श्रीमान्) ऐश्वर्यलक्षणासमग्राश्रीर्यस्यसश्रीमान् ॥ (अवाङ्मनसगोचरः) वाङ्मनसयोरप्यगोचरःकिमुतचक्षुरादीनामित्यर्थः यतोवाचोनिवर्ततेअप्राप्यमनसासहेतिश्रुतेः ॥ (अमृतःशाश्वतः) नविद्यतेमृतंमरणंयस्येत्यमृतः अजरोऽमरोऽमृतइतिश्रुतेः अतएव शाश्वतोनित्यःशाश्वतस्तुध्रुवोनित्येत्यमरः॥ इदंद्वयमेकं॥ (शांतः) निःस्पृहत्वान्निस्तरंगसागररूपः॥ (बाणहस्तःप्रतापवान्) त्रिपुराद्यंतकरोबाणोहस्तेयस्यसबाणहस्तः अतएवप्रतापवान्महाशूरः इदंद्वयमेकमेव॥४०॥ ॥ ॥

महातपादीर्घतपाःस्थविष्ठःस्थविरोध्रुवः॥अहःसंवत्सरोव्याप्तिःप्रमाणंपरमंतपः॥३७॥संवत्सरकरोमंत्रप्रत्ययःसर्वदर्शनः॥अजःसर्वेश्वरःसिद्धोमहारेतामहाबलः॥३८॥योगीयोग्योमहातेजाःसिद्धिःसर्वादिरग्रहः॥वसुर्वसुमनाःसत्यःसर्वपापहरोहरः॥३९॥सुकीर्तिःशोभनःश्रीमानवाङ्मनसगोचरः॥अमृतःशाश्वतःशांतोबाणहस्तःप्रतापवान्॥४०॥

(कमंडलुधरः) कमंडलुंधारयतीतिसः ॥ (धन्वी) धनुरस्यास्तीतिधन्वी व्रीह्यादित्वादिनिःप्रत्ययः ॥ रामःशस्त्रभृतामहमितिभगवद्वचनात् ॥ (वेदांगः) वेदावबोधकत्वेनअंगभूतायस्यसवेदांगः॥ (वेदविन्मुनिः) यथावद्वेदंवेदार्थंचवेत्तिविंदतइतिवावेदवित् ॥ वेदांतकृद्वेदविदेवचाहमितिभगवद्वचनात्सएवमुनिः॥ (भ्राजिष्णुः) ३२० प्रकाशैकरसत्वाद्भ्राजिष्णुः ॥ (भोजनं) भोज्यरूपतयाप्रकृतिर्मायाभोजनमुच्यतेतद्वान् ॥ (भोक्ता) पुरुषरूपेणतांभुंक्तइतिभोक्ता ॥ (लोकनाथः) लोकैर्नाथ्यतेतान्उपतपति तेभ्यआशास्ते तेषामीष्टइतिवासः ॥ नाथृनाधृयाच्ञोपतापैश्वर्याशीःष्विितिधातुपाठात् ॥ (दुराधरः) दैत्यादिभिराधर्तुंनशक्यतइतिसः ॥ १४१ ॥ (अतींद्रियोमहामायः) शब्दादिरहितत्वादिंद्रियाणामविषयत्वादतींद्रियः अशब्दमस्पर्शमित्यादिश्रुतेः ॥ अतएवमहामायःमायाविनामपिमायाकारित्वान्महामायः ॥ ममामायादुरत्ययेतिभगवद्वचनात् ॥ इदंद्वयमेकं (सर्ववासः) सर्वेषांस्थावरजंगमानांनिवासभूतः ॥ वसंतित्वयिभूतानिभूतावासस्ततोभवानितिहरिवंशे ॥ (चतुष्पथः) चत्वारः धर्मार्थकाममोक्षाःप्राप्तिसाधनभूताःपंथानोयस्यसः ॥ (कालयोगी) कर्मविपाककालेभोगार्थंप्राणिनःयोजयतिप्रेरयतीतिसः ॥ (महानादः) महान्नादोगंभीरोध्वनिर्यस्यसः ॥ (महोत्साहः) जगदुत्पत्तिस्थितिप्रलयार्थमुद्युक्तत्वान्महोत्साहः ॥ ३३० (महाबलः) बलिनामपिबलवत्वात्सः ॥ ४२ ॥ (महाबुद्धिः) बुद्धिमतामपिबुद्धिमत्त्वान्महाबुद्धिः ॥ (महावीर्यः) महदुत्पत्तिकारणमविद्यालक्षणंवीर्यमस्येतिसः ॥ (भूतचारी) भूतैःपिशाचादिभिःसहचरतिसः ॥ स्मरहरपिशाचाःसहचराइतिपुष्पदंतोक्तेः ॥ (पुरंदरः) शत्रुपुराणिदारयतिसः ॥ (निशाचरः) निशायांसर्वभूतप्रलयेपिचरतिजागर्तीतिसः ॥ (प्रेतचारी) प्रेतैःसहचरतीतिसः ॥ (महाशक्तिर्महाद्युतिः) महतीशक्तिःसामर्थ्यमस्येतिअतएवमहाद्युतिःमहतीद्युतिर्वाह्याभ्यंतराचास्येतिसः ॥ स्वयंज्योतिर्ज्योतिषांज्योतिरित्यादिश्रुतेःइदंद्वयमेकं ॥ ४३ ॥ (अनिर्देश्यवपुः) इदंतदितिनिर्देष्टुंयन्नशक्यतेपरस्मैस्वसंवेद्यत्वात् तादृशंवपुरस्येतिसः ॥ (श्रीमान्) ऐश्वर्यलक्षणासमग्राश्रीर्यस्यसः ३४० ॥ (सर्वाचार्यमनोगतिः) सर्वाचार्यमनःसुगतिःतत्त्वज्ञानंयस्मात्सः ॥ (बहुश्रुतः) बहूनिश्रुतानिवेदशास्त्रादीनियस्मात्सः॥ (महामायः) महतीमायायस्मात्सः॥ (नियतात्माध्रुवः) नियतोनित्यःआत्मास्वरूपंयस्यसःअतएवध्रुवःस्थिरत्वात् ॥ (अध्रुवः) नध्रुवोयस्मात्सः ॥ ४४ ॥

कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः॥ भ्राजिष्णु र्भोजनं भोक्तालोकनाथो दुराधरः ॥ ४१ ॥ अतींद्रियोमहामायः सर्ववास श्चतुष्पथः ॥ कालयोगी महानादो महोत्साहो महाबलः ॥ ४२ ॥ महाबुद्धि र्महावीर्यो भूतचारी पुरंदरः॥ निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥ ४३ ॥ अनिर्देश्यवपुः श्रीमान्सर्वाचार्यमनोगतिः ॥ बहुश्रुतोमहामायो नियतात्मा ध्रुवोऽध्रुवः॥ ४४॥

(ओजस्तेजोद्युतिधरः) ओजःप्राणबलं ॥ तेजःशौर्यादयोगुणाः ॥ द्युतिर्दीप्तिः ॥ ताधारयतीतिसः ॥ बलंबलवतांचाहं तेजस्तेजस्विनामहमितिभगवद्व चनात् ॥ (नर्तकः) नृत्यतितांडवंकरोतीतिनर्तकः ॥ (सर्वशासकः) सर्वेषांनियंता अंतःप्रविष्टःशास्ताजनानाᳬसर्वात्मेतिश्रुतेः (नृत्यप्रियोनृत्यनित्यः) नृत्यं नर्तनंप्रियमिष्टंयस्यअतएवनृत्यनित्यः नृत्यंनित्यंसदाभक्तैःक्रियमाणंयत्समीपेसः इदंद्वयमेकं ॥ (प्रकाशात्माप्रकाशकः) प्रकाशलक्षणआत्मायस्यअतएव प्रकाशकः ॥ सवित्रादिविभूतिभिर्विश्वंप्रकाशयतीतिसः ॥ इदंद्वयमेकं ३५०॥ ४५ ॥ (स्पष्टाक्षरः) स्पष्टमुदात्तंॐकारलक्षणंअक्षरमस्येतिसः ॥ (बुधः) सर्वज्ञः ॥ (मंत्रः) ऋग्यजुःसामलक्षणः ॥ मंत्रवाच्यत्वाद्वामंत्रः ॥ (समानः) ॥ वैषम्यनैर्घृण्यरहितः ॥ (सारसंप्लवः) सारंवेदांतरूपंसंप्लवःभवजलधितरण साधनंयस्मात्सः ॥ (युगादिकृद्युगावर्तः) युगादेःकालभेदस्यकर्तृत्वात् ॥ युगादीनामारंभंकरोतीतिवासएवयुगावर्तःयुगानिकृतादीन्यावर्तयतिकालात्मना सः ॥ इदंद्वयमेकं ॥ (गंभीरः) ज्ञानैश्वर्यबलादिभिर्गंभीरः ॥ (वृषवाहनः) वृषोनंदीवाहनंयस्यसः ॥ ४६ ॥ (इष्टः) परमानंदात्मकत्वेनप्रियः ॥ यज्ञे नपूजितइतिवा ॥ (विशिष्टः) सर्वेषामुत्कृष्टत्वात् ॥ ३६० (शिष्टेष्टः ॥ शिष्टानांविदुषांइष्टःप्रियः ॥ शिष्टाइष्टाअस्येतिवासः ॥ प्रियोहिज्ञानिनोत्यर्थ

ओजस्तेजोद्युतिधरो नर्तकः सर्वशासकः॥ नृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥ ४५॥ स्पष्टाक्षरो बुधो मंत्रः समानः सारसंप्लवः ॥ युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥ ४६ ॥ इष्टो विशिष्टः शिष्टेष्टः शलभः शरभो धनुः ॥ तीर्थरूप स्तीर्थनामा तीर्थादृश्यः स्तुतोर्थदः॥ ४७॥ अपांनिधि रधिष्ठानं विजयो जयकालवित् ॥ प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ४८ ॥

महंसचममप्रियइतिभगवद्वचनात् ॥ शिष्टैरिष्टःपूजितइतिवा ॥ (शलभः) सर्वत्रगमनशीलः ॥ (शरभः) शरभावतारधारी ॥ (धनुः) पिनाकधनुर्धारी लक्षणया ॥ (तीर्थरूपः) सर्वविद्यास्वरूपः ॥ (तीर्थनामा) भवाब्धितरणेगंगादितीर्थान्यपिनमयतिसः ॥ (तीर्थादृश्यः) गंगादितीर्थैरप्यदृश्यःदुष्प्रापः ॥ (स्तुतः) विष्णवादिभिरपि ॥ (अर्थदः) पुरुषार्थप्रदः ॥ ४७ ॥ (अपांनिधिः) आपोनिधीयंतेयत्रसोऽपांनिधिः ॥ सरसामस्मिसागरइतिभगवद्वचनात् ३७० ॥ (अधिष्ठानं) अधितिष्ठंतिभूतान्युपादानकारणत्वेनयत्रेतितत् ॥ मत्स्थानिसर्वभूतानीतिभगवद्वचनात् ॥ (विजयः) विजयतेज्ञानवैराग्यैश्वर्यादि भिर्गुणैर्विश्वमितिसः ॥ (जयकालवित्) असुरादीनांनाशायदेवानांजयस्यकालंवेत्तीतिसः (प्रतिष्ठितः) स्वेमहिम्निस्थितः ॥ सभगवःकस्मिन्प्रतिष्ठितइ तिस्वेमहिम्नीतिश्रुतेः ॥ (प्रमाणज्ञः) ॥ प्रमाणानिप्रत्यक्षादीनिसर्वप्राणिनांजानातीतिसः ॥ (हिरण्यकवचः) नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरू पायेतिश्रुतेर्हिरण्मयकवचइत्यर्थः ॥ (हरिः) सर्वपापहारकत्वाद्धरिः ॥ ४८ ॥

(विमोचनः) दुःखत्रयनाशकः ॥ (सुरगणः) सर्वदेवतात्मकः ॥ (विद्येशः) सकलविद्याप्रवर्तकः ३८० ॥ (विंदुसमाश्रयः) प्रणवात्मकः ॥ (बालरूपः) ब्रह्मललाटादुत्पन्नत्वात्तादृशः ॥ (बलोन्मत्तः) बलेनसर्वशक्त्यादुष्टनाशार्थंउन्मत्तोदृप्तः ॥ (विकर्ता) विचित्रंभुवनंकृतवानितिविकर्ता ॥ (गहनः) स्वरूपंसामर्थ्यंचेष्टितंवातस्यज्ञातुंनशक्यतइतिगहनः ॥ (गुहः) गूहतेसंवृणोतिस्वरूपादीनिमाययेतिगुहः ॥ नाहंप्रकाशःसर्वस्ययोगमायासमावृतइतिभगवद्वचनात् ॥ ४९ ॥ (करणं) जगदुत्पत्तौसाधकतमं ॥ (कारणं) उपादानकारणंनिमित्तकारणंचेति ॥ (कर्ता) स्वतंत्रः ॥ (सर्वबंधविमोचनः) ज्ञानप्रदानेनसर्वविधाविद्यापाशनाशनः ३९० ॥ (व्यवसायः) सच्चिन्मात्रस्वरूपत्वात्सः ॥ (व्यवस्थानः) यस्मिन्व्यवस्थितिःसर्वस्येतिसः ॥ वर्णाश्रमादिधर्मान्विभज्यकरोतीतिवा ॥ बाहुलकात्कर्तरिल्युट् ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगइत्युक्तेः ॥ (स्थानदः) ॥ ब्रह्मादिभ्यःकर्मानुरूपाणिस्थानानिददातीतिसः ॥ (जगदादिजः) ॥ हिरण्यगर्भरूपेणजगदादौस्वयंप्रादुर्भवतीतिसः ॥ ५० ॥ (गुरुदः) शत्रून्गुरुयथास्यात्तथाद्यतिखंडयतीतिसः ॥ दुंदुभइतिपाठांतरं ॥ (ललितः) सर्वसुंदररूपः ॥ (अभेदः) अद्वैतस्वरूपः ॥ (भवात्मात्मनिसंस्थितः) भवात्मनांपांचभौतिकदेहानामात्मनिजीवेअर्थाज्जीवहृदयेसंस्थितः । अंतर्यामिरूपेणविद्यमानः ॥ (वीरेश्वरः) वीराणांशूराणांईश्वरः ॥ (वीरभद्रः) तत्संज्ञकगणेश्वररूपः ४०० ॥ (वीरासनविधिः) वीराणामसनेक्षेपणेविधानंयस्यसः ॥ (विराट्) सर्वजगत्स्वरूपः ॥ ५१ ॥ अतएव (वीरचूडामणिः) वीराणांचूडामणिःशिरोरत्नभूतः ॥ (वेत्ता) सर्वज्ञः ॥ (तीव्रानंदः) ॥ उत्कटआनंदः ॥ निरतिशयानंदस्वरूपइतियावत् ॥ (नदीधरः) नदीनांगंगादीनांधारकः ॥ सागररूपइत्यर्थः ॥ (आज्ञाधारः) आज्ञाधाराअविच्छिन्नसंततिरूपाजगन्नियमनेयस्यसः ॥ (त्रिशूली) त्रिशूलायुधधारी ॥ (शिपिविष्टः) शिपयःपशवःतेषुयज्ञाख्यविष्णुरूपेणप्रतितिष्ठतीतिसः ॥ यज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतितिष्ठतीतिश्रुतेः ॥ शिपयोरश्मयःतेषुनिविष्टइतिवा ॥ शैत्याच्छयनयोगाच्चशीतिवारिंप्रचक्षते ॥ तत्पानाद्रक्षणाच्चैवशिपयोरश्मयोमताः ॥ तेषुप्रवेशाद्विश्वेशःशिपिविष्टइहोच्यतइतिपुराणात् ॥ (शिवालयः) शिवंकल्याणयुक्तमालयंस्थानंयस्यसः ४१० ॥ ५२ ॥

विमोचनःसुरगणो विद्येशो विंदुसंश्रयः ॥ बालरूपो बलोन्मत्तो विकर्ता गहनो गुहः ॥ ४९ ॥ करणंकारणंकर्तासर्वबंधविमोचनः ॥ व्यवसायोव्यवस्थानःस्थानदोजगदादिजः ॥ ५० ॥ गुरुदोललितोऽभेदोभवात्मात्मनिसंस्थितः ॥ वीरेश्वरोवीरभद्रोवीरासनविधिर्विराट् ॥ ५१ ॥ वीरचूडामणिर्वेत्तातीव्रानंदोनदीधरः ॥ आज्ञाधारस्त्रिशूलीचशिपिविष्टःशिवालयः ॥ ५२ ॥

(वालखिल्यः) तत्संज्ञकऋषिरूपः ॥ (महाचापः) महत्विदेहराजपूज्यंधनुर्यस्यसः ॥ (तिग्मांशुः) तिग्माअंशवःकिरणायस्यसः ॥ सूर्यरूपइत्यर्थः ॥ (बधिरः) श्रोत्रेंद्रियादिरहितः ॥ (खगः) ॥ खेअंतरिक्षेगच्छतीतिसः ॥ (अभिरामः) अभितःसर्वतःरमंतेयोगिनोयमित्यभिरामः ॥ (सुशरणः) शोभनं शरणंस्थानंयस्यसः ॥ यद्वाऽऽर्तानामार्तिहरत्वात्शोभनशरणरूपः ॥ (सुब्रह्मण्यः) तपोवेदाश्वजातिश्वज्ञानंचब्रह्मसंज्ञितं ॥ तेभ्योहितत्वात्तद्वेदितृत्वाद्वा ब्रह्मण्यः ॥ शोभनोब्रह्मण्यःसुब्रह्मण्यः ॥ (सुधापतिः) सुधायाअमृतस्यस्वामी ॥ ५३ ॥ (मघवान्कौशिकः) इंद्रस्वरूपः ॥ इदंद्वयमेकं ४२० ॥ (गोमान्) विश्वरूपागौरस्यास्तीतिसः ॥ इयंकथालैंगईशानकल्पवृत्तांतउक्ता ॥ (विरामः) विरामो अवसानंप्राणिनामस्मिन्निति सः ॥ (सर्वसाधनः) सर्वाणिपुरुषार्थप्रदानिसाधनानियस्मात्सः ॥ (ललाटाक्षः) ललाटेअक्षिनेत्रंयस्यसः ॥ (विश्वदेहः) ॥ विश्वंजगत्देहोयस्यसः (सारः) प्रलयेपिविद्यमानत्वात्स्थिररूपः ॥ (संसारचक्रभृत्) संसारचक्रंअखिलप्रपंचगणंबिभर्तिपुष्णातिधारयतीतिवा ॥ ५४ ॥ (अमोघदंडः) अमोघःसफलोदंडोयस्यसः ॥ (मध्यस्थः) मध्येन्यायस्थानेतिष्ठतीतिसः ॥ सर्वसमत्वान्निष्पक्षपातइत्यर्थः ॥ मध्यंन्यायेवकाशेचेतिविश्वः ॥ (हिरण्यः) स्वर्णरूपःतेजोरूपोवा ॥ हिरण्यं

वालखिल्योमहाचापस्तिग्मांशुर्बधिरःखगः ॥ अभिरामःसुशरणःसुब्रह्मण्यःसुधापतिः ॥ ५३ ॥ मघवान्कौशिको गोमान्विरामःसर्वसाधनः॥ ललाटाक्षोविश्वदेहःसारःसंसारचक्रभृत्॥५४॥ अमोघदंडोमध्यस्थोहिरण्योब्रह्मवर्चसी॥ परमार्थःपरोमायीशंबरोव्याघ्रलोचनः ॥ ५५॥ रुचिर्विरंचिःस्वर्बंधुर्वाचस्पतिरहर्पतिः॥ रविर्विरोचनःस्कंदःशास्तावैवस्वतोयमः॥ ५६ ॥

तेजसिस्वर्णइतिविश्वः ४२० ॥ (ब्रह्मवर्चसी) ब्रह्मणोवर्चस्तपोदीप्तिर्वायस्ययस्माद्वासः ॥ (परमार्थः) परमोमोक्षरूपोअर्थोयस्मात्सः॥ (परोमायी) उत्कृष्टोमायावीत्यर्थः ॥ पदद्वयमेकंनाम ॥ (शंवरः) शंकल्याणंवरमुत्कृष्टंयस्मात्सःवबयोरभेदात् ॥ जलरूपोवा ॥ नीरक्षीरांबुशंबरमित्यमरः ॥ (व्याघ्रलोचनः) व्याघ्रवत्क्रूरनेत्रः ॥ ५५ ॥ (रुचिः) दीप्तिरूपः ॥ (विरंचिः) जगद्विरचनाद्विरंचिर्ब्रह्मरूपः ॥ (स्वर्बंधुः) स्वर्गलोकेबंधुरूपेणसुखप्रदत्वात्सः ॥ रुचिर्वररुचिर्वेद्यइतिक्वचित्पाठः ॥ (वाचस्पतिः) ॥ वाचोविद्यायाःपतिः ॥ ईशानःसर्वविद्यानामितिश्रुतेः ॥ (अहर्पतिः) सूर्यरूपः ४४० ॥ (रविः) रसमादत्तइतिरविरादित्यात्मारसनांचतथादानाद्रविरित्यभिधीयतइतिविष्णुधर्मोत्तरे ॥ (विरोचनः)॥ विविधंरोचतेसः ॥ सूर्यरूपोग्निरूपोवा ॥ (स्कंदः) स्कंदत्यमृतरूपेणगच्छतिस्रवतिवायुरूपेणशोषयतीतिवासः ॥ (शास्तावैवस्वतोयमः) शास्तीतिशास्तावैवस्वतःसूर्यपुत्रोयमस्तद्रूपः ॥ यमःसंयमतामहमितिगीतोक्तेः इदंत्रयमेकं ॥ ५६ ॥

(युक्तिरुन्नतकीर्तिः) ॥ युक्तिरष्टांगयोगस्तदात्मकः ॥ यद्वायुक्तिर्न्यायस्तद्रूपः ॥ युक्तिर्न्यायेचयोजनद्दातिविश्वःअतएवोन्नतकीर्तिःउन्नतातिमहतीकीर्तिर्य स्मात्स. ॥ इदंद्वयमेकं ॥ (सानुरागः) भक्तेषुप्रीतियुक्तः ॥ (परंजयः) शत्रूणांजेता ॥ (कैलासाधिपतिः) कैलासपर्वतस्याधिपतिःस्वामी ॥(कांतः) अभिरूपतमः ॥ (सविता) सर्वस्यजगतःप्रसविता प्रजानांत्वंप्रसवनात्सवितेतिनिगद्यसइतिविष्णुधर्मोत्तरे ॥ ४५० (रविलोचनः) रविर्लोचनंचक्षुरस्ये ति ॥ अग्निर्मूर्धाचक्षुषीचंद्रसूर्याविति श्रुतेः ॥ ५७ ॥ (विद्वत्तमः) निरस्तातिशयंसर्वदासर्वातिशयगोचरंज्ञानमस्यास्तिनेतरेषामितिसः ॥ (वीतभयः) वीतं विगतंभयंसांसारिकंसंसारलक्षणंवास्येतिसः ॥ (विश्वभर्ता) विश्वस्यजगतोभर्ताधारकःपोषकश्च ॥ (अनिवारितः) ॥ कर्मफलदानप्रसक्तोकेनापिनिवा रितोनभवति ॥ (नित्यः) उत्पत्तिनाशरहितः ॥ (नियतकल्याणः) नियतमखंडितंकल्याणंयस्मात्सः ॥ (पुण्यश्रवणकीर्तनः) पुण्यकरंश्रवणंकीर्तनंचास्ये

युक्तिरुन्नतकीर्तिश्चसानुरागःपरंजयः ॥ कैलासाधिपतिःकांतःसवितारविलोचनः ॥५७॥ विद्वत्तमोवीतभयोविश्वभ र्ताऽनिवारितः ॥ नित्योनियतकल्याणःपुण्यश्रवणकीर्तनः ॥५८॥ दूरश्रवाविश्वसहोध्येयोदुःस्वप्ननाशनः ॥ उत्तारणोदु ष्कृतिहाविज्ञेयोदुःसहोऽभवः ॥५९॥ अनादिर्भूर्भुवोलक्ष्मीःकिरीटीत्रिदशाधिपः ॥ विश्वगोप्ताविश्वकर्तासुवीरोरुचिरां गदः ॥६०॥

तिसः ॥ ५८ ॥ (दूरश्रवाः) दूरदेशेपिश्रवःश्रवणंयस्मात्सः ॥ (विश्वसहः) विश्वंसहतेमृष्यतीतिसः ॥ ४६० (ध्येयः) ध्यातुंचिंतितुंयोग्यः ॥ (दुःस्व प्ननाशनः) भाविनोनर्थस्यसूचकान्दुःस्वप्नान्नाशयतीतिसः ॥ (उत्तारणः) संसारसागरादुत्तारयतीतिसः ॥ (दुष्कृतिहा) दुष्कृतीन्पापकारिणोहंतीति सः ॥ (विज्ञेयः) ॥ विशेषेणज्ञातुंयोग्यः ॥ (दुःसहः) दुःखेनाप्यसुरादिभिःसोढुंनशक्यतेसः ॥ (अभवः) जन्मरहितः ॥ ५९ ॥ (अनादिः) आदिःकारण मस्यनविद्यतेसः ॥ सर्वकारणत्वात् ॥ (भूर्भुवोलक्ष्मीः) भूतानामाधारोभूर्भुवःसर्वभूतानामाश्रयत्वेनप्रसिद्धायाभूम्याभुवोपिभूरितिभूर्भुवः ॥ अथवान केवलमसौभूःकिंतुभुवोलक्ष्मीःशोभाच ॥ अथवाभूर्भुवर्लोकयोःलक्ष्मीरात्मविद्याअस्येतिसः ॥ आत्मविद्याचदेवित्वमितिश्रीसूक्तौ ॥ भूम्यंतरिक्षयोःशोभे तिवासः ॥ (किरीटी) किरीटोस्यास्तीतिसः ॥ ४७० (त्रिदशाधिपः) त्रिदशानांदेवानामधिपःस्वामी ॥ (विश्वगोप्ता) विश्वस्यजगतोगोप्तारक्षकः ॥ (विश्वकर्ता) जगतउत्पादकः ॥ (सुवीरः) शोभनाविविधाईरागतयोस्येतिसः ॥ (रुचिरांगदः) रुचिरेसुंदरेअंगदेबाहुभूषणेयस्यसः ॥ ६० ॥

(जननः) जंतून्जनयतीतिजननः ॥ बाहुलकात्कर्तरिल्युट् ॥ (जनजन्मादिः) जनस्यजन्मोद्भवःतस्यआदिर्मूलकारणं ॥ (प्रीतिमान्) नित्यप्रीतियुक्तः॥ (नीतिमान्) नित्यनीतियुक्तः ॥ (धवः) सर्वस्यपतिः ४८०॥ (विशिष्टः) विशेषेणशिष्टः प्रलयकालेपिविद्यमानः ॥ (कश्यपः) तदृषिस्वरूपः ॥ (भानुः) भातीतिभानुः ॥ तमेवभांतमनुभातिसर्वमितिश्रुतेः ॥ (भीमः) दुष्टानांभयहेतुः ॥ भीमादयोपादानेइतिपाणिनिवचनान्निपातितः ॥ (भीमपराक्रमः) असुरादीनांभयहेतुःपराक्रमोस्येतिसः ॥ ६१ ॥ (प्रणवः) प्रणमयतीतिप्रणवःॐकाररूपः ॥ तदुक्तंशिवाथर्वशिरसि ॥ अथकस्मादुच्यतेप्रणवोयस्मादुच्चार्यमाणएवर्चोयजूंषिसामान्यथर्वांगिरसश्चयज्ञेब्रह्मब्राह्मणेभ्यःप्रणमयतितस्मादुच्यतेप्रणवइति ॥ (सत्पथाचारः) सतांकर्माणिसत्पथेनाचरतीति (महाकोशः) महांतःकोशाःअन्नमयादयःआवरकायस्यसः ॥ (महाधनः) महदपरिमितंधनमैश्वर्यंयस्यसः ॥ (जन्माधिपः) जन्मनउत्पत्तेरधिपः ४९० ॥ (महादेवः) सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्येमहतिमहीयतेतस्मादुच्यतेमहादेवइतिश्रुतेः ॥ (सकलागमपारगः) सर्वागमानांसर्ववेदानामंतगः ॥ ६२ ॥

जननोजनजन्मादिःप्रीतिमान्नीतिमान्धवः॥वसिष्ठःकश्यपोभानुर्भीमोभीमपराक्रमः ॥ ६१ ॥ प्रणवःसत्पथाचारोमहाकाशोमहाधनः ॥ जन्माधिपोमहादेवःसकलागमपारगः॥ ६२ ॥ तत्त्वंतत्त्वविदेकात्माविभुर्विश्वविभूषणः॥ ऋषिर्ब्राह्मणऐश्वर्यजन्ममृत्युजरातिगः ॥ ६३ ॥ पंचयज्ञसमुत्पत्तिर्विश्वेशोविमलोदयः॥ आत्मयोनिरनाद्यंतोवत्सलोभक्तलोकधृक्॥ ६४॥

(तत्त्वं) तथ्यमृतंसत्यंपरमार्थंसत्तत्त्वंइत्येतएकार्थवाचिनःपरमार्थसतोब्रह्मणोवाचकाःशब्दाः ॥ अतस्तत्त्वंब्रह्मरूपः ॥ (तत्त्ववित्) तत्त्वंस्वरूपंयथावद्वेत्तीतिसः ॥ (एकात्मा) ॥ एकश्चासावात्मेतिसः ॥ आत्मावाइदमेकएवाग्रआसीदितिश्रुतेः ॥ यआप्नोतियदादत्तेयआत्तविषयानिह ॥ यच्चास्यसंततोभावस्तस्मादात्मेतिगीयतइतिस्मृतेश्च ॥ (विभुः) सर्वव्यापकः ॥ (विश्वविभूषणः) विश्वंजगत्विभूषणमलंकारोयस्यसः ॥ विश्वंविभूष्यतेअनेनेतिवा ॥ (ऋषिः) अतींद्रियदर्शकः ॥ विश्वाधिपोरुद्रोमहर्षिरितिश्रुतेः ॥ (ब्राह्मणः) उत्तमवर्णरूपः ॥ (ऐश्वर्यजन्ममृत्युजरातिगः) ऐश्वर्येणजन्मादिषड्भावविकारानतीत्यगच्छतीतिसः ५००॥ ६३ ॥ (पंचयज्ञसमुत्पत्तिः) पंचयज्ञानांदेवयज्ञादिपंचमहायज्ञानांसमुत्पत्तिर्यस्मात्सः ॥ (विश्वेशः) विश्वस्यजगतईशः ॥ (विमलोदयः) विमलःशुद्धःअभ्युदयोयस्मात्सः ॥ (आत्मयोनिः) आत्माचासौयोनिःसर्वकारणरूपः ॥ (अनाद्यंतः) ॥ नस्तआद्यंतौयस्यसः॥ (वत्सलः) सर्वस्यप्रियः ॥ (भक्तलोकधृक्) भक्तलोकान्धृष्णोतीतिसः ॥ ६४ ॥

(गायत्रीवल्लभः) गायत्रीशिवगायत्रीवल्लभाप्रियायस्यसः ॥ (प्रांशुः) प्रकृष्टाअंशवःसुषुम्नादयःकिरणायस्यसः ॥ (विश्वावासः) विश्वमावसतिअभि व्याप्यतिष्ठतीतिसः ५१०॥ (प्रभाकरः) प्रभांप्रकृष्टदीप्तिंकरोतीतिसः ॥ (शिशुः) बालरूपः॥ एतत्कथालैंगेपार्वतीस्वयंवरेप्रसिद्धा ॥ (गिरिरतः) कैलास प्रियः ॥ (सम्राट्) सर्वेषांनियंता ॥ (सुषेणःसुरशत्रुहा).॥ शोभनासेनागणरूपास्येतिसः ॥ अतएवसुरशत्रुहादेवारिनाशकःइदंद्वयमेकं ॥६५॥ (अमोघो ऽरिष्टनेमिः) पूजितःस्तुतःसंस्मृतोवासर्वंफलंददातिनवृथाकरोतीतिसः ॥ अवितथसंकल्पाद्वासत्यसंकल्पइतिश्रुतेः ॥ अतएवारिष्टनेमिःअरिष्टेषुशुभाशुभ फलदानेषुचक्रमध्यइवस्थितः ॥ इदंद्वयमेकं (कुमुदः) कुंधरांभारावतरणेनमोदयतीतिकुमुदः ॥ मुकुंदोमुक्तिदइतिवापाठांतरं ॥ (विगतज्वरः) विगताज्व रास्तापायस्मात्सः ॥ (स्वयंज्योतिस्तनुज्योतिः) स्वप्रकाशात्मकःसएवतनुज्योतिःसूक्ष्मतेजःस्वरूपः नीवारशूकवत्तन्वीपीताभास्वत्यणूपमा ॥ तस्याःशिखा यामध्येपरमात्माव्यवस्थितइतिश्रुतेःइदंद्वयमेकं ॥ (आत्मज्योतिः) आत्मैवज्योतिर्यस्यसः ॥ येनसूर्यस्तपतितेजसेद्धइत्यादिश्रुतेः ५२० ॥ (अचंचलः) स्थिरःवृक्षइवस्तब्धोदिवितिष्ठतीत्यादिश्रुतेः ॥ ६६ ॥ (पिंगलः) प्रावृतव्याघ्रचर्मादिनापिंगलवर्णः ॥ (कपिलश्मश्रुः) पिंगलश्मश्रुधारी ॥ (भालनेत्रः)

गायत्रीवल्लभःप्रांशुर्विश्वावासःप्रभाकरः॥ शिशुर्गिरिरतःसम्राट्सुषेणःसुरशत्रुहा॥६५॥ अमोघोऽरिष्टनेमिश्चकुमुदो विगतज्वरः॥ स्वयंज्योतिस्तनुज्योतिरात्मज्योतिरचंचलः॥ ६६ ॥ पिंगलःकपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः॥ ज्ञानस्कंदोम हानीतिर्विश्वोत्पत्तिरुपप्लवः॥ ६७॥ भगोविवस्वानादित्योयोगपारोदिवस्पतिः ॥ कल्याणगुणनामाचपापहापुण्यदर्श नः॥ ६८ ॥ उदारकीर्तिरुद्योगीसद्योगीसदसन्मयः॥ नक्षत्रमालीनाकेशःस्वाधिष्ठानपदाश्रयः॥ ६९ ॥

ललाटस्थतृतीयलोचनः॥ (त्रयीतनुः) वेदत्रयीमयशरीरः॥ (ज्ञानस्कंदोमहानीतिः) ज्ञानप्रदानेनभक्तान्मोक्षंगमयतितेषांसंसाराब्धिंशोषयतीतिवासए वमहानीतिः महतीजगद्यंत्रनिर्वाहसाधनीभूतानीतिर्यस्यसइदंद्वयमेकं ॥ (विश्वोत्पत्तिः) विश्वस्यजगतउत्पत्तिर्यस्मात्सः ॥ (उपप्लवः) उपप्लवंतेपीडिता भवंतिदुष्टायस्मात्सः ॥ ६७ ॥ (भगोविवस्वानादित्यः) भगविवस्वदाख्यादित्यदेवतात्मकइदंत्रयमेकं ॥ (योगपारः) योगिनांयोगंपारयतिसंपूर्णतां नयतीतिसः ॥ योगाधारइतिपाठांतरं ५३० ॥ (दिवस्पतिः) इंद्रस्वरूपः ॥ (कल्याणगुणनामा) कल्याणगुणानिमंगलगुणयुक्तानिशिवःशंभुरित्यादी निनामानियस्यसः ॥ (पापहा) भक्तानांमहापातकादिनाशकारी ॥ (पुण्यदर्शनः) पुण्यजनकंदर्शनंयस्यसः ॥ ६८ ॥ (उदारकीर्तिः) उदारापूज्याकी र्तिर्यस्यसः ॥ (उद्योगी) सृष्ट्यादिकरणोद्योगशीलः ॥ (सद्योगी) नित्ययोगयुक्तः ॥ (सदसन्मयः) जगत्स्वरूपः ॥ (नक्षत्रमाली) नभोरूपत्वेननक्षत्र चक्रमेवप्रशस्तंमालारूपंयस्यसः ॥ (नाकेशः) स्वर्गपतिः ॥ लोकेशइतिपाठांतरं ५४०॥ (स्वाधिष्ठानपदाश्रयः) स्वस्वरूपमेवाधिष्ठानपदंलयस्थानंयेषां तेषामाश्रयआधारभूतः ॥ ६९ ॥

(पवित्रःपापहारी) पुनातीतिपवित्रःअतएवपापहारीभक्तपापनाशनशीलःइदंद्वयमेकं ॥ (मणिपूरः) मणिभीरत्नादिभिर्भक्तमनोरथान्पूरयतीतिसः ॥ (नभोगतिः) अंतरिक्षचरः ॥ (हृत्पुंडरीकमासीनः) हृत्पुंडरीकांतरसंनिविष्टमितिशिवकवचायुक्तेः ॥ (शक्रः) इंद्रस्वरूपः ॥ (शांतः) सदाशमयुक्तः (वृषाकपिः) धर्मस्थैर्यहेतुः ॥ ७० ॥ (उष्णः) हालाहालापानेनोष्णतायुक्तः ॥ (गृहपतिः) सर्वगृहपालकः ५५० ॥ (कृष्णः) कृष्णकंठः ॥ कृष्णस्वरूपोवा ॥ (समर्थः) सर्वकार्यशक्तः ॥ (अनर्थनाशनः) संसारदुःखहारी ॥ (अधर्मशत्रुः) पापानांशातयिता ॥ (अज्ञेयः) योगिभिरप्यगम्यः ॥ (पुरुहूतःपुरुश्रुतः) पुरुभिर्बहुभिर्हूतउपासितः ॥ पुरुष्टुतइतिपाठांतरं ॥ सएवपुरुश्रुतःबहुभिर्गुरोःसकाशाच्छ्रवणविषयीकृतःइदंद्वयमेकं ॥ ७१ ॥ (ब्रह्मगर्भः) ब्रह्माणिवेदागर्भेहृदयेयस्यसः ॥ (बृहद्गर्भः) बृहन्महान्गर्भोब्रह्मांडरूपोयस्यसः ॥ (धर्मधेनुः) धर्मोत्पत्तिस्थानभूतः ॥ (धनागमः) सर्वविधधनस्यागमोयस्मात्सः ५६० ॥ (जगद्धितैषी)॥ लोककल्याणेच्छुः ॥ (सुगतः) दुष्टव्यामोहायधृतबुद्धावतारः ॥ सुगतोबुद्धइत्यमरः ॥ (कुमारः) बालस्वरूपः कुत्सितोमारःकामोयस्मात्सइतिवा ॥ (कुशलागमः) कल्याणप्रदः ॥ ७२ ॥ (हिरण्यवर्णोज्योतिष्मान्) नमोहिरण्यवर्णायेतिश्रुतेःअतएवज्योतिष्मान् भास्वरतमःइदंद्वयमेकं ॥ (नानाभूतरतः) पिशाचादिष्वपिरममाणः ॥ (ध्वनिः) नादात्मकः ॥ (अरागः) रागशून्यः ॥ (नयनाध्यक्षः) सर्वलोकचक्षुर्वर्तित्वेनचक्षुःप्रवर्तकः (विश्वामित्रः) उक्तऋषिस्वरूपः ॥ ५७० ॥ (धनेश्वरः) कुबेररूपः ॥ ७३ ॥ (ब्रह्मज्योतिः) सर्वप्रकाशकब्रह्मस्वरूपः (वसुधामा) वसूपुधामतेजोयस्यसः ॥ (महाज्योतिरनुत्तमः) बृहत्तेजाःअतएवअनुत्तमःसर्वोत्कृष्टःइदंद्वयमेकं ॥ (मातामहः) जगन्मायापिता ॥ (मातरिश्वानभस्वान्) वायुस्वरूपः ॥ (नागहारधृक्) नागमयहारादिभूषणधारी ॥ ७४ ॥ (पुलस्त्यः) (पुलहः) (अगस्त्यः) ५८० (जातूकर्ण्यः) (पराशरः) एतदृषिस्वरूपः (निरावरणनिर्वारः) निरावरणोमायाबंधरहितःअतएवनिर्वारःअसुरादिभिर्वारयितुमशक्यः ॥ निरावरणविज्ञानइतिपाठांतरं ॥ (वैरंच्यः) ब्रह्मपुत्रः ॥ (विष्टरश्रवाः) विष्णुस्वरूपः ॥ ७५ ॥

पवित्रः पापहारीच मणिपूरो नभोगतिः॥ हृत्पुंडरीकमासीनःशक्रः शांतोवृषाकपिः ॥ ७० ॥ उष्णोगृहपतिः कृष्णः समर्थो ऽनर्थनाशनः॥ अधर्मशत्रु रज्ञेयः पुरुहूतःपुरुश्रुतः ॥ ७१ ॥ ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः॥ जगद्धितैषीसुगतःकुमारः कुशलागमः ॥ ७२ ॥ हिरण्यवर्णो ज्योतिष्मा न्नानाभूतरतो ध्वनिः ॥ अरागो नयनाध्यक्षोविश्वामित्रोधनेश्वरः॥ ७३ ॥ ब्रह्मज्योतिर्वसुधामा महाज्योति रनुत्तमः ॥ मातामहोमातरिश्वा नभस्वा न्नागहारधृक् ॥ ७४ ॥ पुलस्त्यः पुलहो ऽगस्त्यो जातूकर्ण्यः पराशरः॥ निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः॥ ७५॥

(आत्मभूः) स्वयंप्रकाशः ॥ (अनिरुद्धः) नकेनापिप्रादुर्भावेषुनिरुद्धइत्यनिरुद्धः ॥ (अत्रिः) अत्रिऋषिस्वरूपः ॥ (ज्ञानमूर्तिः) ज्ञानस्वरूपः ॥ सत्यं ज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ (महायशाः) अपारकीर्तिः ५९०॥ (लोकवीराग्रणीः) लोकवीरेषुविष्णवादिषुश्रेष्ठः ॥ (वीरः) महाशूरः ॥ (चंडः) दुष्टेष्वत्यंतकोपनः ॥ (सत्यपराक्रमः) अवितथशक्तिः ॥ ७६ ॥ (व्यालाकल्पः) सर्पभूषणः ॥ (महाकल्पः) महासमर्थः ॥ (कल्पवृक्षः) भक्तमनोरथपूरकः ॥ (कलाधरः) भक्तजनाल्हादकत्वेनचंद्रस्वरूपः ॥ चंद्रकलाधरइतिवा ॥ (अलंकरिष्णुः) सर्पाद्यलंकरणशीलः ॥ (अचलः) स्थिरः ६००॥ (रोचिष्णुः) विभाट् ॥ (विक्रमोन्नतः) विविधपराक्रमयुक्तत्वेनसर्वमहान् ॥७७॥ (आयुःशब्दपतिः) सर्वप्राणिनामायुषांवेदादिशब्दानांचपतिर्नियंता ॥ (वेगीप्लवनः) त्वरयाभक्तकामपूरकःइदंद्वयमेकं ॥ (शिखिसारथिः) वन्हिसहायः ॥ (असंसृष्टः) मायासंसर्गरहितः (अतिथिः) भक्तानामतिथिरूपेणपूजाग्राहकः ॥ (शक्रप्रमाथी) शक्नोतीतिशक्रः ॥ सचासौप्रमाथीप्रमथनशीलः ॥ असुरसैन्यविलोडनशीलइत्यर्थः ॥ (पादपासनः) पादपेवृक्षसमीपेआसनंयस्यसः॥७८॥ (वसुश्रवाः) वसुमधुरंश्रवः श्रवणंयस्यसः ॥ वसुस्वृतंस्यान्मधुरइतिविश्वः६१०॥ (हव्यवाहः) हव्यंदेवहविर्वहतिप्रापयतिसः॥अग्निस्वरूपइत्यर्थः ॥ (प्रतप्ता)

आत्मभू रनिरुद्धो ऽत्रि र्ज्ञानमूर्तिर्महायशाः॥ लोकवीराग्रणीर्वीर श्चंडःसत्यपराक्रमः ॥ ७६ ॥ व्यालाकल्पो महाकल्पः
कल्पवृक्षः कलाधरः॥ अलंकरिष्णु रचलो रोचिष्णु र्विक्रमोन्नतः ॥ ७७ ॥ आयुःशब्दपति र्वेगीप्लवनः शिखिसारथिः॥
असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः॥ ७८ ॥ वसुश्रवा हव्यवाहः प्रतप्ता विश्वभोजनः॥ जप्यो जरादिशमनो लो
हितात्मा तनूनपात् ॥ ७९ ॥ बृहदश्वो नभोयोनिः सुप्रतीक स्तमिस्रहा॥ निदाघस्तपनो मेघःस्वक्षः परपुरंजयः ॥ ८० ॥
सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ॥ वसंतोमाधवो ग्रीष्मो नभस्यो बीजवाहनः॥ ८१ ॥

प्रकृष्टतपःशीलः ॥ (विश्वभोजनः) विश्वंभुज्यतेपाल्यतेअनेनेतिसः ॥ (जप्यः) उपास्यः ॥ (जरादिशमनः) जरादिपीडानांशमनोनाशकः ॥ (लोहितात्मातनूनपात्) रक्तवर्णःसएवतनूनपात् तनूंभक्तशरीरंनपातयतीत्यग्निरूपःइदंद्वयमेकं ॥ ७९ ॥ (बृहदश्वः) बृहन्नश्वोअश्वसदृशवाहकोयस्यसः ॥ (नभोयोनिः)॥ नभसःसर्वकारणस्याकाशस्यापियोनिःकारणं॥ (सुप्रतीकः) सुष्ठुप्रतीकाअवयवायस्यसः॥ (तमिस्रहा) तमिस्रमज्ञानंहंतीतितमिस्रहा६२०॥ (निदाघस्तपनः) नितरांदह्यतेत्रेतिनिदाघःसएवतपनःग्रीष्मर्तुरूपइदंद्वयमेकं ॥ (मेघः) जलदस्वरूपः ॥ (स्वक्षः) शोभननेत्रयुक्तः॥ (परपुरंजयः) परपुराणिशत्रुपुराणिजयतीतिपरपुरंजयः ॥ ८० ॥ (सुखानिलः) सुखःसुखकरोअनिलोवायुर्यस्मात्सः ॥ (सुनिष्पन्नः) सुष्ठुनिष्पन्नंजगद्यस्मात्सः ॥ (सुरभिः शिशिरात्मकः) ॥ सुष्ठुरभंतेल्हष्यंतियस्मिन्नसौसुरभिः रभराभस्येसएवशिशिरात्मकः शिशिरसंज्ञकऋतुरूपइदंद्वयमेकं ॥ (वसंतोमाधवः) वसंतःतत्संज्ञकऋतुरूपः सएवमाधवःमधुमकरंदस्तद्युक्तः ॥ (ग्रीष्मः) ग्रसतेइतिग्रीष्मःसर्वरसशोषकतत्संज्ञकऋतुरूपः ॥ (नभस्यः) नभसिश्रावणेभवतीतिसःवर्षर्तुरूपइत्यर्थः६३०॥ (बीजवाहनः) बीजानिधान्यानिवहतिप्रापयतीतिबीजवाहनः शरद्धेमंतऋतुरूपइत्यर्थः ॥ ८१ ॥

(अंगिराः) ॥ एतन्नामकमुनिरूपः ॥ (गुरुरात्रेयः) दत्तात्रेयस्वरूपःइदंद्वयमेकं ॥ (विमलः) शुद्धः ॥ (विश्ववाहनः) विश्वंजगत्वहतिनिर्वहतीतिविश्ववाहनः ॥ (पावनः) पावयतिसर्वपापानिनाशयतीतिपावनः ॥ (सुमतिर्विद्वान्) सुष्ठुमतिर्यस्यअतएवविद्वान् ॥ सर्ववेत्तीतिविद्वान्इदंद्वयमेकं ॥ (त्रैविद्यः) तिस्रोविद्याःऋग्यजुःसामरूपावेत्तीतित्रैविद्यः(नरवाहनः)नरावाहनेयस्यसकुवेररूपइत्यर्थः॥८२॥ (मनोबुद्धिः) मनःसहितबुद्धिरूपः६४०॥(अहंकारः)अहंकाराख्यतत्वस्वरूपः (क्षेत्रज्ञः) क्षेत्रंलिंगशरीरंजानातीतिक्षेत्रज्ञः ॥ (क्षेत्रपालकः) क्षेत्राणांसिद्धस्थानानांपालकोरक्षकः क्षेत्रंशरीरेकेदारेसिद्धस्थानकलत्रयोरितिविश्वः ॥ (जमदग्निः) तन्नामकऋषिरूपः ॥ (वलनिधिः) वलानांसर्वशक्तीनांनिधिरधिष्ठानं ॥ (विगालः) विशेषेणगलतिस्रवतिमोक्षामृतंयस्मात्सः॥ (विश्वगालवः) विश्वस्मिन्जगतिगालवमुनिरूपेणस्थितः ॥ ८३ ॥ (अघोरः) नघोरोअघोरःअभयंकरइत्यर्थः ॥ (अनुत्तरः) नउत्तरोयस्मात्सःअनुत्तरःसर्वोत्कृष्टइत्यर्थः॥(यज्ञः) ज्योतिष्टोमादियज्ञस्वरूपः६५०॥ (श्रेयः) कल्याणस्वरूपः॥ (निःश्रेयसांपथः)कल्याणानांमार्गरूपः॥(शैलः)शिलायांभवःशैलःनार्मदादिर्लिंगरूपः ॥ (गगनकुंदाभः) गगनकुंदवत्आभाकांतिर्यस्यसः ॥ (दानवारिः) दानवानांदनुजानामरिर्नाशकः ॥ (अरिंदमः) अरीन्भक्तशत्रून्दमयतीत्यरिंदमः ॥ ८४ ॥ (रजनीजनकः) रजन्याःकालरात्रिशक्तेःजनकःउत्पादकः ॥ (चारुविशल्यः) चारवःसूक्ष्मधियोविशल्याःविगतदुःखाःयस्मात्सः ॥ (लोककल्पधृक्) लोकानांकल्पःउत्पत्यादिप्रकारःतंधृष्णोतिधारयतीतिवालोककल्पधृक् ॥ लोकशल्यत्दर्दितिपाठांतरं ॥ (चतुर्वेदः) चत्वारऋगादयःवेदाःयस्मात्सचतुर्वेदः तदुक्तंयस्यनिश्वसितंवेदाइति६६०॥(चतुर्भावः)चत्वारोभावाःधर्मादयोयस्मात्सचतुर्भावः॥(चतुरश्चतुरप्रियः)चतुरःकुशलःअतएवचतुराःप्रियाःयस्यसइदंद्वयमेकं ॥ ८५ ॥ (आम्नायः) वेदरूपः ॥ (समाम्नायः) समस्तुल्यःआम्नायोवेदोयेनससमाम्नायः ॥ वेदस्यापिप्रमाणभूतः ॥ यद्वासर्वप्रमाणत्वेनसम्यगाम्नायोवेदोयस्मात्ससमाम्नायः ॥ (तीर्थदेवशिवालयः) तीर्थान्यवतारऋषिजुष्टांभांसितेषुदीव्यंतिमोदंतेतेतीर्थदेवास्तेषांशिवस्यकल्याणस्यआलयःस्थानभूतः ॥ (बहुरूपः) बहून्यसंख्यानिरूपाणियस्यसबहुरूपः ॥ (महारूपः) महांतिपूज्यानिरूपाणियस्यसमहारूपः ॥ (सर्वरूपः) सर्वंविश्वंरूपंयस्यससर्वरूपः ॥ (चराचरः) चराअस्थिरालक्ष्मीरचरास्थिरायस्मिन्सचराचरः ॥ ८६ ॥

अंगिरागुरुरात्रेयो विमलो विश्ववाहनः ॥ पावनः सुमतिर्विद्वांस्त्रैविद्यो नरवाहनः ॥ ८२ ॥ मनोबुद्धि रहंकारःक्षेत्रज्ञः क्षेत्रपालकः ॥ जमदग्नि र्वलनिधिर्विगालोविश्वगालवः ॥ ८३ ॥ अघोरो ऽनुत्तरो यज्ञःश्रेयो निःश्रेयसांपथः ॥ शैलोगगनकुंदाभो दानवारि ररिंदमः ॥ ८४ ॥ रजनीजनकश्चारु विशल्यो लोककल्पधृक् ॥ चतुर्वेदश्चतुर्भावश्चतुर श्चतुरप्रियः ॥ ८५ ॥ आम्नायोऽथसमाम्नाय स्तीर्थदेवशिवालयः ॥ बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ८६ ॥

(न्यायनिर्मायकोन्यायी) न्यायस्यसत्पक्षस्यनिर्मायकोनिर्वाहकः अतएवन्यायीनीतियुक्तः इदंद्वयमेकं६७०॥ (न्यायगम्यः) न्यायेननीत्यागम्यतेसज्ञायगम्यः॥ (निरंतरः) निर्गतमन्तरंभेदोयस्मात्सः॥ (सहस्रमूर्धा) सहस्रमसंख्यामूर्धानोयस्यसः सहस्रमूर्धा॥ (देवेंद्रः) देवानांइंद्रः॥ (सर्वशस्त्रप्रभंजनः) सर्वशस्त्राणिप्रकर्षेणभंजयतिनाशयतीतिसः॥८७॥ (मुंडः) मुंडोव्रतलुंचितकेशरूपः॥ (विरूपः) विशिष्टंसर्वश्रेष्ठंरूपंयस्यसः॥ (विक्रांतः) विक्रमातिशययुक्तः॥ (दंडी) दंडःकालदंडोऽस्तियस्यसदंडी॥ (दांतः) जितेंद्रियः६८०॥ (गुणोत्तमः) गुणाउत्तमायस्यस्माद्वासःगुणोत्तमः॥ (पिंगलाक्षः) पिंगलानिपिंगवर्णान्यक्षीणियस्यसः॥ (जनाध्यक्षः) जनानामध्यक्षःजनाध्यक्षः॥ (नीलग्रीवः) नीलानीलवर्णाग्रीवायस्यसःनीलग्रीवः॥ (निरामयः) निर्गताआमयाःसर्वरोगायस्मात्सः॥८८॥ (सहस्रबाहुः) सहस्रमसंख्याबाहवोयस्यसः॥ (सर्वेशः) सर्वेषांनिखिललोकानामीशः नियंतेत्यर्थः॥ (शरण्यः) शरणेषुसाधुःशरण्यः॥ (सर्वलोकधृक्) सर्वलोकान्भूरादीन्धृष्णोतिधारयतीतिवासर्वलोकधृक्॥ (पद्मासनः) पद्मंहृत्कमलंआसनंयस्यसपद्मासनः६९०॥ (परंज्योतिः) परंसर्वोत्कृष्टंज्योतिस्तेजोयस्य॥ (परंपारः) परंसर्वोत्कृष्टंयथास्यात्तथापारयतिसंसारदुःखात्तारयतीतिपरंपारः॥ (परंफलं) परमपुरुषार्थस्वरूपः॥ ८९॥ (पद्मगर्भः) पद्मंभुवनकोशाख्यंगर्भोवीर्यंजंयस्यसःयद्वा पद्मस्यहृदयाख्यस्यमध्येकर्णिकायांउपास्यत्वेनस्थितः॥ (महागर्भः) महान्पूज्यःगर्भोविराड्रूपोयस्यसःमहागर्भः॥ (विश्वगर्भः) विश्वंजगद्गर्भोयस्यसःविश्वगर्भः॥ (विचक्षणः) विशेषेणआचष्टेवेदादीनितिविचक्षणः॥ (चराचरज्ञः) सर्वज्ञः॥ (वरदः) भक्तेभ्योवरान्ददातीतिवरदः॥ (वरेशः) वरःश्रेष्ठःईशःवरेशः ७००॥ (महाबलः) महांतिबलानिसर्वशक्तयोयस्यसः॥ ९०॥ (देवासुरगुरुर्देवः) देवासुराणांगुरुःउपदेष्टासएवदेवः दीव्यतिसृष्ट्यादिनाक्रीडतिद्योततेवेति इदंद्वयमेकं॥ (देवासुरमहाश्रयः) देवासुराणांमहाश्रयःमहाधाररूपः॥ (देवादिदेवः) देवानामादयःकारणीभूतादेवाःब्रह्मादयोयस्मात्सः॥ (देवाग्निः) देवःद्योतमानःअग्निर्यस्मात्सः॥ (देवाग्निसुखदःप्रभुः) देवानामग्निद्वारासुखंयच्छतीतिसएवप्रभुःस्वतंत्रः इदंद्वयमेकं॥ ९१॥

न्यायनिर्मायकोन्यायी न्यायगम्यो निरंतरः॥ सहस्रमूर्धादेवेंद्रःसर्वशस्त्रप्रभंजनः॥ ८७॥ मुंडो विरूपो विक्रांतो दंडीदांतोगुणोत्तमः॥ पिंगलाक्षो जनाध्यक्षो नीलग्रीवोनिरामयः॥८८॥ सहस्रबाहुःसर्वेशःशरण्यःसर्वलोकधृक्॥ पद्मासनःपरंज्योतिः परंपारःपरंफलम्॥८९॥ पद्मगर्भोमहागर्भोविश्वगर्भोविचक्षणः॥ चराचरज्ञोवरदो वरेशस्तुमहाबलः ॥९०॥देवासुरगुरुर्देवो देवासुरमहाश्रयः॥ देवादिदेवो देवाग्निर्देवाग्निसुखदःप्रभुः॥ ९१॥

(देवासुरेश्वरः) देवासुराणामीश्वरःस्वामी ॥ (दिव्यः) दिविभवोदिव्यः ॥ अलौकिकस्वरूपइत्यर्थः ॥ (देवासुरमहेश्वरः) देवासुराणांमहेश्वरःपूज्यःस्वामीत्यर्थः ॥ (देवदेवमयः) देवानांदेवाःब्रह्मादयस्तद्रूपइत्यर्थः ७१० ॥ (अचिंत्यः) चिंतयितुमप्यशक्यः ॥ यद्वाअस्यापिविष्णोरपिचिंत्यः ॥ (देवदेवात्मसंभवः) देवानांब्रह्मादीनामपिदेवःदेवदेवःसएवआत्मसंभवः ॥ आत्मनांजीवानांसंभवोयस्मात्सआत्मसंभवः ॥ ९२ ॥ (सद्योनिः) सतांवस्तुमात्राणां योनिःकारणं ॥ (असुरव्याघ्रः) असुरेषुव्याघ्रइवअसुरव्याघ्रः ॥ (देवसिंहः) देवेषुसिंहइवदेवसिंहः ॥ (दिवाकरः) दिवादिवसंकरोतीतिदिवाकरः ॥ दिवाविभेतिकृअष्टः ॥ (विबुधाग्रवरश्रेष्ठः) विबुधाग्रइंद्रस्तस्माद्वराःप्रजापतयस्तेभ्योपिश्रेष्ठोविबुधाग्रवरश्रेष्ठः ॥ (सर्वदेवोत्तमोत्तमः) सर्वदेवेषूत्तमाःब्रह्मादयस्तेष्वप्युत्तमःसर्वदेवोत्तमोत्तमः ॥ ९३ ॥ (शिवज्ञानरतः) ॥ स्वस्वरूपज्ञानतत्परः ॥ (श्रीमान्) श्रीस्त्रिवर्गसंपत्तिर्नित्यंयस्मिन्सश्रीमान् ॥ श्रीर्लक्ष्म्यांत्रिवर्गसंपत्तावितिविश्वः७२० ॥ (शिखिश्रीपर्वतप्रियः) शिखाचूडास्तियस्यसशिखी शिखीशिखायांचूडायामितिविश्वः ॥ सएवकुमारार्थश्रीपर्वतःप्रियोयस्यसश्रीपर्वतप्रियः इयंकथाअत्रैवज्योतिर्लिंगमाहात्म्यप्रकरणेगता (वज्रहस्तः) इंद्ररूपः ॥ (सिद्धखड्गी) सिद्धःसर्वसिद्धियुक्तःखड्गीख

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः॥ देवदेवमयोऽचिंत्यो देवदेवात्मसंभवः ॥ ९२॥ सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः॥ विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः॥ ९३॥ शिवज्ञानरतः श्रीमान्शिखिश्रीपर्वतप्रियः ॥ वज्रहस्तः सिद्धखड्गीनरसिंहनिपातनः॥ ९४॥ ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः॥ नंदी नंदीश्वरोऽनंतोनग्नव्रतधरःशुचिः॥ ९५॥ लिंगध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः॥ स्वधर्मास्वर्गतः स्वर्गखरःस्वरमयस्वनः॥ ९६॥

ड्गधरः सिद्धश्चासौखड्गीचसिद्धखड्गी (नरसिंहनिपातनः) ॥ शरभरूपेणनृसिंहगर्वपरिहारकः ॥ ९४ ॥ (ब्रह्मचारी) ब्रह्मणिवेदेतपसिवाचरतितच्छीलो ब्रह्मचारी ॥ (लोकचारी) लोकेषुभूरादिषुचरतितच्छीलोलोकचारी ॥ (धर्मचारी) धर्मंचरतितच्छीलोधर्मचारी ॥ (धनाधिपः) धनानामधिपःसकलधनस्वामीत्यर्थः ॥ (नंदी) एतत्संज्ञकगणरूपः॥ (नंदीश्वरः) नंदिनःईश्वरोनंदीश्वरः ७३०॥ (अनंतः) देशकालादिभिरपरिच्छिन्नः ॥ सत्यंज्ञानमनंतमिति श्रुतेः ॥ (नग्नव्रतधरः) नग्नाःदिगंबराःअवधूताःव्रतधराःयस्यसः ॥ (शुचिः) दोषैरनुपहतः ॥ शुचिःशुद्धेनुपहतइतिविश्वः ॥ ९५ ॥ (लिंगाध्यक्षः) लिंगेवाणादिलिंगरूपअध्यक्षंप्रत्यक्षंयस्यसलिंगाध्यक्षः ॥ लिंगदेहस्याधिष्ठातेतिवा ॥ (सुराध्यक्षः) सुराणांदेवानामध्यक्षःप्रभुरित्यर्थः ॥ (योगाध्यक्षः) योगस्ययोगशास्त्रस्यप्रणेतृत्वेनाध्यक्षः ॥ (युगावहः) युगानांकृतादीनामावहस्तत्तत्कालेप्रापकइत्यर्थः ॥ (स्वधर्मा) स्वःस्वीयःजगत्सर्जनादिःधर्मोयस्यसः ॥ (स्वर्गतः) स्वःदिवंगतःस्वर्गतः ॥ (स्वर्गखरः) स्वर्गेस्वर्गलोकेखरोनासासमीरणोयस्यसः ॥ खरोनासासमीरणइतिविश्वः७४० (स्वरमयस्वनः) स्वरमयः षड्जादिसप्तस्वरावयवःस्वनःशब्दोयस्मात्सस्वरमयस्वनः षड्जादयश्चोक्ताश्छंदःसूत्रे स्वराःषड्जऋषभगांधारमध्यमपंचमधैवतनिषादाइति ॥ ९६ ॥

(बाणाध्यक्षः) ॥ बाणस्यबाणासुरस्यअध्यक्षःस्वामी ॥ (बीजकर्ता) बीजंशुक्रंकरोत्युत्पादयतीतिबीजकर्ता ॥ (धर्मकृद्धर्मसंभवः) धर्मकृतांपुण्यवतां धर्मस्यसंभवोयस्मात्सः ॥ (दंभः) दंभोभक्तपरीक्षार्थकैतवरूपः दंभस्तुकैतवेकल्कइतिविश्वः ॥ (अलोभः) नलोभोयस्यसःअलोभः ॥ (अर्थविच्छंभुः) अर्थविदांवेदार्थज्ञानिनांशंभावयतीत्यर्थविच्छंभुः ॥ (सर्वभूतमहेश्वरः) सर्वभूतानांमहेश्वरःसर्वभूतमहेश्वरः ॥ ९७ ॥ (श्मशाननिलयः) श्मशानःस कलशंवाधिष्ठानभूतोमहाप्रलयस्तस्यापिनितरांलयोनाशोयस्मात्सश्मशाननिलयः ॥ श्मशानंनिलयःस्थानंयस्येतिवा (त्र्यक्षः) त्रिनेत्रः७५० ॥ (सेतुः) भवांबुधौतरणमार्गरूपः ॥ (अप्रतिमाकृतिः) अप्रतिमाउपमाशून्याआकृतिःस्वरूपंयस्यसोऽप्रतिमाकृतिः ॥ (लोकोत्तरस्फुटालोकः) लोक्यतइतिलोक स्तस्मादुत्तरोऽचक्षुर्ग्राह्यःस्फुटोव्यक्तःआलोकःआत्मप्रकाशोयस्यसलोकोत्तरस्फुटालोकः ॥ (त्र्यंबकः) त्रीण्यंबकानिनेत्राणियस्यसत्र्यंबकः ॥ (नागभूषणः) नागाःशेषादयःभूषणानियस्यसनागभूषणः ॥ ९८ ॥ (अंधकारिः) अंधकस्यतत्संज्ञकहिरण्याक्षपुत्रदैत्यस्यारिर्नाशकइत्यर्थः ॥ (मखद्वेषी)

बाणाध्यक्षोबीजकर्ता धर्मकृद्धर्मसंभवः॥ दंभोलोभोऽर्थवि च्छंभुः सर्वभूतमहेश्वरः॥९७॥ श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः॥ लोकोत्तर स्फुटालोकस्त्र्यंबकोनागभूषणः॥ ९८ ॥ अंधकारि र्मखद्वेषी विष्णुकंधरपातनः॥ हीनदोषोऽक्षयगुणो दक्षारिः पूषदंतभित् ॥ ९९॥ धूर्जटिः खंडपरशुः सकलो निष्कलोऽनघः ॥ अकालःसकलाधारः पांडुराभो मृडो नटः ॥ १०० ॥

मखद्वेषोदक्षयज्ञद्वेषोस्तियस्यसमखद्वेषी ॥ (विष्णुकंधरपातनः) दक्षयज्ञेविष्णोःकंधरांग्रीवांपातयतीतिविष्णुकंधरपातनः ॥ (हीनदोषः) हीनाःगताःवैषम्यनै र्घृण्यादयोदोषायस्मात्सःहीनदोषः ॥ (अक्षयगुणः) अक्षयाःनाशशून्याःगुणाःयोगादिषोडशाध्यायोक्तद्वात्रिंशद्गुणाः यस्मिन्सोक्षयगुणः ॥ ७६० ॥ (दक्षारिः) दक्षस्यदक्षप्रजापतेररिःशत्रुरित्यर्थः ॥ (पूषदंतभित्) पूष्णोदंतान्भिनत्तीतिपूषदंतभित् ॥ ९९ ॥ (धूर्जटिः) धूःसर्वश्रेष्ठाजटिःकेशसंघा तोयस्यसधूर्जटिः जटसंघातेतस्मात्सर्वधातुभ्यऔणादिकइच् (खंडपरशुः) खंडयतीतिखंडःसर्वच्छेदकःपरशुर्यस्यसखंडपरशुः ॥ (सकलः) कलयाचंद्रकलयासहितः सकलः ॥ (निष्कलः) निर्गुणः ॥ (अनघः) नास्तिअघंपापंयस्यसोनघः ॥ (अकालः) नास्तिकालः मृत्युर्यस्यसःअकालः ॥ (सकलाधारः) सकलाआधारायस्मात्सः सकलस्यजगतआधारइतिवा ॥ (पांडुराभः) पांडुराश्वेताआभाकांतिर्यस्यसः ॥ ७७० ॥ (मृडः) मृडयतिसर्वान् सुखयतीतिमृडः ॥ (नटः) चित्ररूपः ॥ १०० ॥

(पूर्णः) सकलैःकामैःसकलाभिश्चशक्तिभिःसंपन्नइतिपूर्णः॥ (पूरयिता) नकेवलंपूर्णः पूरयिताचसर्वेषांसंपद्भिः॥ (पुण्यः) शुभकर्मा स्मरणेनकल्मषा णिक्षपयतीतिवापुण्यः॥ (सुकुमारः) सुशोभनःकुमारःस्कंदोयस्यससुकुमारः॥ (सुलोचनः) सुष्ठुलोचनानिनेत्राणियस्यससुलोचनः॥ (सामगेय प्रियः) समगातॄणांप्रियःइष्टः (अक्रूरः) नक्रूरःअक्रूरः॥ (पुण्यकीर्तिः) पुण्यापापनाशिकाकीर्तिःकीर्तनंयस्यसपुण्यकीर्तिः ७८०॥ (अनामयः) नविद्यतेआमयोरोगोयस्यसःअनामयः॥ १०१॥ (मनोजवः) भक्तार्तिहरणेमनस्तुल्यवेगः॥ (तीर्थकरः) शास्त्राणांप्रणेता॥ (जटिलः) जटाजूट युक्तः॥ (जीवितेश्वरः) सर्वप्राणिनांप्राणप्रदः॥ (जीवितांतकरोनित्यः) सर्वप्राणिनांसंहारकोऽतएवनित्यः॥ (वसुरेताः) वसुसुवर्णंरेतोयस्यसः॥ अप एवससर्जादौतासुवीर्यमवासृजत्॥ तदंडमभवद्धैमंसहस्रांशुसमप्रभमितिमन्वादिवचनात्॥ (वसुप्रदः) वसुरत्नंभक्तेभ्यः प्रकर्षेणददात्यभक्तेभ्यःप्रकर्षेण खंडयतीतिवासः॥ वसुरत्नेधनेपिचेतिकोशात्॥ २॥ (सद्गतिः) सतीअव्यभिचारिणीगतिर्यस्मात्सः॥ यद्वा अस्तिब्रह्मेतिचेद्वेद॥ संतमेनंततोविदुरितिश्रु तेर्ब्रह्मास्तीतिविदुर्येतेसंतस्तैःप्राप्यतइतिसः॥ (सत्कृतिः) सतीप्रशस्ताजगद्रक्षालक्षणाकृतिर्यस्यसः ७९०॥ (सिद्धिः) सर्ववस्तुषुसंविद्रूपः॥ निरतिशय

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः॥ सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः॥ १०१॥ मनोजव स्तीर्थकरो जटि लो जीवितेश्वरः॥ जीवितांतकरो नित्यो वसुरेता वसुप्रदः॥ २॥ सद्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकंटकः॥ कला धरो महाकालो भूतसत्यपरायणः॥ ३॥ लोकलावण्यकर्ताचलोकोत्तरसुखालयः॥ चंद्रसंजीवनः शास्ता लोक गूढो म हा धिपः॥ ४॥ लोकबंधु र्लोकनाथः कृतज्ञः कीर्तिभूषणः॥ अनपायोऽक्षरः कांतः सर्वशस्त्रभृतांवरः॥ ५॥

फलरूपोवा॥ (सज्जातिः) सतांसाधूनांजातिर्जन्मयस्मात्सः॥ (कालकंटकः) कालस्यापिकंटकोवेधकः॥ (कलाधरः) शिल्पादिचतुःषष्टिकलानां धारकः॥ (महाकालः) कालस्यापिकालरूपत्वात्सः॥ (भूतसत्यपरायणः) भूतानांप्राणिनांसत्यस्यपरायणःपरमाश्रयः॥ ३॥ (लोकलावण्यकर्ता) लोकानांसौंदर्यस्यनिर्माता॥ (लोकोत्तरसुखालयः) लोकोत्तरंसर्वोत्कृष्टंयत्सुखंतस्याश्रयः॥ (चंद्रसंजीवनः) चंद्रस्यसंजीवनः॥ रोगपीडायानाशकः॥ (शास्ता) दुर्जनानांशिक्षकः ८००॥ (लोकगूढः) लोकानांजनानांबुद्धिरूपगुहाश्रयत्वेनाप्रत्यक्षः॥ (महाधिपः) महांश्चासावधिपश्चेतिसः॥ ४॥ (लोकबंधुः) लोकानांबंधुकृत्यंहिताहितोपदेशंश्रुतिस्मृतिलक्षणंकृतवानितिसः॥ (लोकनाथः) लोकानांचतुर्दशानांभुवनानांनाथईश्वरः॥ (कृतज्ञः) प्राणिकृतंपुण्यापुण्यात्मकंकर्मजानातीतिसः॥ (कीर्तिभूषणः) कीर्तिर्यशएवभूषणंयस्ययस्माद्वासः॥ (अनपायोऽक्षरः) अनपायोनाशशून्योऽतएवाक्ष रोनित्यःइदंद्वयमेकं॥ (कांतः) कस्यशमनस्याप्यंतोनाशोयस्मात्सः॥ कोब्रह्मात्मानिलार्केषुशमनेचेतिविश्वः॥ (सर्वशस्त्रभृतांवरः) सर्वविधशस्त्राणिबि भ्रतांश्रेष्ठः॥ १०५॥

(तेजोमयोद्युतिधरः) तेजोमयस्तेजःप्रचुरोऽतएवद्युतिधरःद्युतेःकांतेर्धारकः ८१० ॥ (लोकानामग्रणीः) सर्वलोकेषुश्रेष्ठः (अणुः) सौक्ष्म्यातिशयशालित्वादणुः ॥ एषोऽणुरात्माचेतसावेदितव्यइतिमंत्रवर्णात् ॥ (शुचिस्मितः) शुचिभास्वरंस्मितमीषद्धासोयस्यसः ॥ (प्रसन्नात्मा) प्रसादयुक्तआत्मास्वभावोयस्यसः ॥ (दुर्जेयः) महारिभिरपिजेतुमसंभाव्यः ॥ (दुरतिक्रमः) भयहेतुत्वादस्याज्ञांसूर्यादयोपिनातिक्रामंतीतिसः ॥ भयादस्माद्वातःपवतेभयात्तपतिसूर्यः ॥ भयादिंद्रश्चाग्निश्चमृत्युर्धावतिपंचमइतिमंत्रवर्णात् ॥ १०६ ॥ (ज्योतिर्मयः) तेजःप्रचुरः ॥ (जगन्नाथः) अनंतब्रह्मांडनायकः ॥ (निराकारः) निर्गुणः ॥ (जलेश्वरः) भौतिकजलस्यगंगारूपस्यवापतिः ८२० ॥ (तुंबवीणः) तुंबीफलयुक्तावीणायस्यसः ॥ अतएवसारुद्रवीणेत्युच्यते ॥ (महाकोपः) महान्संहारकालेकोपोयस्यसः ॥ (विशोकः) विगतःशोकोदुःखंयस्मात्सः ॥ परमानंदैकरूपत्वादितिभावः ॥ (शोकनाशनः) भक्तशोकस्यहर्ता ॥ १०७ ॥ (त्रिलोकपः) त्रिलोक्याःपालकः ॥ (त्रिलोकेशः) त्रयोलोकायदाज्ञयास्वेषुकर्मस्वनुवर्ततेसः (सर्वशुद्धिः) सर्वप्राणिनांशुद्धिर्यस्मात्सः ॥

तेजोमयो द्युतिधरो लोकानामग्रणी रणुः ॥ शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥ ६ ॥ ज्योतिर्मयोजगन्नाथो निराकारो जलेश्वरः ॥ तुंबवीणो महाकोपो विशोकः शोकनाशनः ॥ ७ ॥ त्रिलोकप स्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ॥ अव्यक्त लक्षणो देवोव्यक्ता व्यक्तो विशांपतिः ॥ ८ ॥ वरशीलो वरगुणः सारो मानधनोमयः ॥ ब्रह्मा विष्णुःप्रजापालो हंसो हंसगतिर्वयः ॥ १०९ ॥

(अधोक्षजः) अधोनक्षीयतेजातुयस्मात्तस्मादधोक्षजइत्युद्योगपर्वणि ॥ (अव्यक्तलक्षणोदेवः) अस्पष्टानिलक्षणानिलिंगानियस्यतथापिदेवःदीव्यतिप्रकाशतेसःइदंद्वयमेकं ॥ (व्यक्ताव्यक्तः) गुणोपाधिनाव्यक्तोपिनिर्गुणत्वेनाव्यक्तः ८३० ॥ (विशांपतिः) विशांसकलप्रजानांपालकः ॥ ८ ॥ (वरशीलः) वरंसर्वश्रेष्ठंशीलंयस्ययस्माद्वासः ॥ (वरगुणः) सर्वोत्कृष्टगुणयुक्तः ॥ (सारोमानधनः) सारोऽतिबलवानतएवमानधनःमानोदुष्टनाशनेऽभिमानोधनंयस्यसःइदंद्वयमेकं ॥ (मयः) सुखरूपः ॥ (ब्रह्मा) स्वविभूतिरूपेणचतुराननस्वरूपः ॥ (विष्णुःप्रजापालः) वेवेष्टिव्याप्नोतीतिविष्णुः ॥ व्याप्यमेरोदसीपार्थकांतिश्चाभ्यधिकास्थिता ॥ क्रमणाच्चाप्यहंपार्थविष्णुरित्यभिसंज्ञितइतिमहाभारतेसएवप्रजापालःजगत्पातृत्वस्वरूपःइदंद्वयमेकं ॥ (हंसः) हंत्यज्ञानंनाशयतीतिहंसःपरमात्मा हंसोविहंगभेदेस्यादर्केविष्णौहयांतरे ॥ योगिमंत्रादिभेदेपुपरमात्मनिमत्सरइतिविश्वः ॥ (हंसगतिः) हंसानांयोगिनांगतिर्यस्मिन्सः ॥ (वयः) पक्षिरूपः ॥ एकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे ॥ द्वासुपर्णेत्यादिश्रुतेः ८४० ॥ १०९ ॥

(वेधाविधाताधाता) विदधातिजगत्स्रजतीतिवेधाः कर्मणांतत्फलानांचकर्ताविधाता नानारूपैर्विश्वंविभर्तीतिधाता ॥ इदंत्रयमेकं ॥ (स्रष्टा) जगत उत्पादकः ॥ (हर्ता) संहारकः ॥ (चतुर्मुखः) हिरण्यगर्भस्वरूपः ॥ (कैलासशिखरावासी) कैलासशिखरेआवसतितच्छीलःकैलासशिखरावासी ॥ (सर्वावासी) सर्वत्रावसतितच्छीलःसर्वावासी ॥ (सदागतिः) सतांआगतयोयस्मिन्सःसदागतिः ॥ (हिरण्यगर्भः) हिरण्यंगर्भःवीर्यजंयस्यसहिरण्यगर्भः ॥ यद्वा हिरण्मयांडवर्तित्वाद्धिरण्यगर्भः ॥ विरंच्यात्मावाहिरण्यगर्भः ॥ हिरण्यगर्भःसमवर्ततात्रेइतिश्रुतेः ॥ (द्रुहिणः) विरंचिस्वरूपः ॥ १० ॥ (भूतपालः) भूतानिप्राणिनःपालयतीतिभूतपालः ८५० ॥ (भूपतिः) भुवःपतिर्भूपतिः ॥ (सद्योगी) सतःसत्कर्मसुयोजयतीतिसद्योगी ॥ (योगविद्योगी) योगविदामपियोगप्रवर्तकः ॥ (वरदः) वरान्ददतीतिवरदः ॥ (ब्राह्मणप्रियः) ब्राह्मणाःप्रियायस्यसब्राह्मणप्रियः ॥ ११ ॥ (देवप्रियः) देवाःप्रि

वेधा विधाता धाता चस्रष्टा हर्त्ता चतुर्मुखः ॥ कैलासशिखरावासी सर्वावासी सदागतिः ॥ १० ॥ हिरण्यगर्भो द्रुहिणो भूतपालो ऽथभूपतिः ॥ सद्योगी योगविद्योगी वरदोब्राह्मणप्रियः ॥ ११ ॥ देवप्रियो देवनाथो देवज्ञो देवचिंतकः ॥ विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥ १२ ॥ निर्ममोनिरहंकारो निर्मोहो निरुपद्रवः ॥ दर्पहा दर्पदोदृप्तः सर्वर्तु परिवर्त्तकः ॥ ११३ ॥

यायस्यसदेवप्रियः ॥ (देवनाथः) देवानांनाथःस्वामीत्यर्थः ॥ (देवज्ञः) देवाःज्ञाःज्ञानिनोयस्मात्सदेवज्ञः ॥ (देवचिंतकः) देवाअपिचिंतकायस्यसदेवचिंतकः ॥ (विषमाक्षः) विषमाणित्रीण्यक्षीणियस्यसविषमाक्षः ॥ बहुव्रीहौसक्थ्यक्ष्णोरितिषच्समासांतः ८६० ॥ (विशालाक्षः) विस्तृतनेत्रः ॥ (वृषदोवृषवर्धनः) वृषंधर्मंददातिउपदेशरूपेणेतिवृषदःअतएववृषवर्धनःवृषोधर्मःवर्धतेऽनेनेतिवृषवर्धन.इदंद्वयमेकं ॥ १२ ॥ (निर्ममः) ममत्वपाशरहितः ॥ (निरहंकारः) निर्गतःअहंकारोयस्मात्सनिरहंकारः ॥ (निर्मोहः) निर्गतःमोहोवैचित्त्यंयस्मात्सनिर्मोहः ॥ (निरुपद्रवः) निर्गतःउपद्रवोयस्मात्सनिरुपद्रवः ॥ (दर्पहादर्पदः) दर्पमुत्सेकंसर्वेषांहंतीतिदर्पहाअतएवदर्पदःशत्रुदर्पंद्यतिखंडयतीतिसःइदंद्वयमेकं ॥ (दृप्तः) ःस्वात्मामृतास्वादेननित्यदृप्तिइत्यर्थः ॥ (सर्वर्तुपरिवर्तकः) सर्वर्तून्वसंतादीन्परिवर्तयतिभ्रामयतीतिसर्वर्तुपरिवर्तकः ॥ ११३ ॥

(सहस्रजित्) सहस्रंअनंतान्जयतीतिसहस्रजित् ८७० ॥ (सहस्रार्चिः) सहस्रमसंख्याताःआर्चिषोदीप्तयोयस्यससहस्रार्चिः ॥ (स्निग्धप्रकृतिदक्षिणः) स्नि ग्धोदयार्द्रःसएव प्रकृतिदक्षिणः प्रकृत्यास्वभावेनदक्षिणःसरलः ॥ दक्षिणःसरलेपिचेतित्रिकांडशेषः ॥ (भूतभव्यभवन्नाथः) ॥ भूतंपूर्वोत्पन्नंभव्यंभवि ष्यद्भवद्वर्तमानंचतेषांनाथःस्वामीत्यर्थः ॥ (प्रभवः) प्रकर्षेणभवःसंसारोयस्मात्सप्रभवः ॥ (भूतिनाशनः) शत्रुसंपदांनाशकः ॥ १४ ॥ (अर्थः) अ र्थ्यतइत्यर्थःसर्वप्रार्थ्यइत्यर्थः ॥ (अनर्थः) नास्त्यर्थःप्रयोजनंयस्यसोनर्थः ॥ आप्तकामइत्यर्थः ॥ (महाकोशः) महानपरिमितःकोशोधनंयस्मात्समहा कोशः ॥ (परकार्यैकपंडितः) परंचतत्कार्यंचपरकार्यंमोक्षाख्यंतस्मिन्नेकोऽद्वितीयःपंडितःपरकार्यैकपंडितः ॥ (निष्कंटकः) निर्गताःकंटकाःकामादिश त्रवोयस्मात्सनिष्कंटकः कंटकःक्षुद्रशत्रौचेतिविश्वः ८८० ॥ (कृतानंदः) कृतोऽच्छिन्नःआनंदोयस्मात्सकृतानंदः कृतंतुवेष्टितेऽच्छिन्नइतिविश्वः (नि र्व्याजोव्याजमर्दनः) निर्गतंव्याजंकपटंयस्मात्सनिर्व्याजःअतएवव्याजंपरकपटंमर्दयतीतिसःइदंद्वयमेकं ॥ १५ ॥ (सत्ववान्) सत्त्वंशौर्यवीर्यादि कंनित्यंयस्मिन्ससत्ववान् ॥ (सात्विकः) सत्वगुणप्रधानः ॥ (सत्यकीर्तिः) सत्याअवितथाकीर्तिर्यस्यससत्यकीर्तिः ॥ (स्नेहकृतागमः) स्नेहेनभक्तप्री

सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ॥ भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः॥ १४ ॥ अर्थोऽनर्थो महाकोशः परकार्यैकपंडितः॥निष्कंटकः कृतानंदोनिर्व्याजो व्याजमर्दनः॥१५॥ सत्ववान् सात्विकःसत्यकीर्तिःस्नेहकृतागमः॥अकंपितो गुणग्राही नैकात्मानैककर्मकृत् ॥ १६॥ सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः॥ नंदिस्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः॥ ११७॥

त्याकृताःप्रकाशिताआगमावेदादयोयेनसकृ० ॥ (अकंपितः) नकंपितोऽकंपितःनिश्चलइत्यर्थः ॥ (गुणग्राही) गुणान्स्वभक्तगुणान्गृह्णातितच्छीलोगुण ग्राही ॥ (नैकात्मानैककर्मकृत्) नएकःआत्मास्वरूपंयस्यसनैकात्मासकलजीवरूपःअतएवनैककर्माणिसर्वकर्माणिकरोतीतिनैककर्मकृत् अत्रनशब्दे नसुप्सुपेतिसमासः ॥ १६ ॥ (सुप्रीतः) सुष्ठुशोभनंप्रीतंप्रसादोयस्यससुप्रीतः ॥ तदुक्तंसीमंतिन्यांब्रह्मोत्तरखंडे ॥ तुष्टेचपार्वतीनाथेकिमसाध्यंशरीरिणा मिति ॥ ८९० ॥ (सुमुखः) सुष्ठुमुखंसंसारनिःसरणंयस्मात्ससुमुखः ॥ मुखंनिःसरणेवक्त्रइतिविश्वः ॥ (सूक्ष्मः) सर्वगतः सर्वगतंसूक्ष्ममितिश्रुतेः ॥ (सुकरः) वरदत्वेनशोभनःकरोहस्तोयस्यससुकरः ॥ (दक्षिणानिलः) आनंदप्रदत्वाद्दक्षिणानिलोयोमलयवायुस्तद्रूपः ॥ (नंदिस्कंधधरः) नंदिना वृषेणस्कंधेध्रियतेसः ॥ (धुर्यः) धुरंसमस्तभूतजन्मादिलक्षणांवहतीतिधुर्यः ॥ (प्रकटः) सूर्यादिरूपेणसर्वप्रत्यक्षः ॥ उतैनंगोपाअदृशन्नदृशन्नुदहार्य इतिश्रुतेः ॥ (प्रीतिवर्धनः) प्रीतिर्भक्तप्रेमवर्धतेऽस्मिन्निति ॥ भक्तानांप्रीतिंवर्धयतीतिवा ॥ ११८ ॥

(अपराजितः) शत्रुभिर्नपराजितइत्यपराजितः ॥ (सर्वसत्वः) सर्वाणिसत्वानिप्राणिनोयस्मात्सः ९०० ॥ (गोविंदः) स्वर्गंवागादिकंवाभक्तान्प्रापयतीतिसः ॥ (सत्ववाहनः) सत्वानिप्राप्यंतेमोक्षंप्रत्यनेनेतिसत्ववाहनः ॥ (अधृतः) नधृतःअधृतःअनन्याधारइत्यर्थः ॥ (स्वधृतः) स्वेनआत्मनैवधृतःस्वधृतः ॥ (सिद्धः) सर्वसिद्धियुक्तः ॥ (पूतमूर्तिः) पूताशुद्धामूर्तिर्यस्य ॥ (यशोधनः) यशएवधनंयस्यसः ॥ १८ ॥ (वाराहशृंगधृक्शृंगी) वाराहशृंगंशृणोतिधारयतीवावाराहशृंगधृक् अतएवशृंगमस्यास्तीतिशृंगीइदंद्वयमेकं ॥ (बलवान्) सर्वशक्तियुक्तः ॥ (एकनायकः) एकोऽद्वितीयोनायकःनेताश्रेष्ठोवा ॥ नायकोनेतरिश्रेष्ठइतिविश्वः ९१० ॥ (श्रुतिप्रकाशः) श्रुतिभिःप्रकाशोयस्यसः श्रुतिप्रकाशः तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः ॥ (श्रुतिमान्) श्रुतिर्वेदोऽस्तिनित्यंयस्यसश्रुतिमान् ॥ (एकबंधुः) एकोऽद्वितीयोबंधुरेकबंधुः ॥ प्रत्युपकारानपेक्षयोपकारीत्यर्थः ॥ (अनेककृत्) अनेकंस्वात्मानंकरोतीत्यनेककृत् बहुस्यांप्रजायेयेतितदात्मानंस्वयमकुरुतेत्यादिश्रुतेः ॥ ११९ ॥ (श्रीवत्सलशिवारंभः) श्रीवत्सलोविष्णुस्तत्कल्याणस्यारंभोयस्मात्सः ॥ (शांतभद्रः) शांतानांभद्रंयस्मात्सशांतभद्रः ॥ (समोयशः) सर्वभूतेषुतुल्यः ॥ मासवैश्वर्यलक्ष्मीस्तयासहितोवा सएवयशःसत्कीर्तिस्वरूपःइदंद्वयमेकं ॥ समंजसइतिपाठांतरं (भूशयः) भूर्भूमिःशय्यायस्यसभूशयः ॥ शयःशय्याहिपाणिष्वितिविश्वः ॥ (भूषणः) भूष्यतेसर्वमनेनेतिभूषणः ॥ (भूतिः) सर्वसंपत्स्वरूपः ९२० ॥ (भूतकृत्)सर्वप्राणिनामुत्पादकः ॥ (भूतवाहनः) भूतानांवाहनःनिर्वाहकइतिभूतवाहनः ॥ १२० ॥ (अकंपः) स्थिरः ॥ (भक्तिकायः) भक्तिरेवकायःशरीरंयस्यसःभक्तिकायः ॥ (कालहा) कालमपिहंतिनियच्छतीतिकालहा ॥ (नीललोहितः) कंठेनीलोपिलोहितः ॥ (सत्यव्रतमहात्यागी) सत्यव्रतानामदांभिकानामहात्यागीसर्वपुरुषार्थप्रदः ॥ (नित्यशांतिपरायणः) नित्यात्रिकालाबाध्याशांतिःपरायणंपरमस्थानंयस्यसः ॥ १२१॥ (परार्थवृत्तिर्वरदः) परेषांप्राणिनांकर्मफलदानायैववृत्तिर्वर्तनंयस्यअतएववरदःभक्तवरप्रदः वरान्आवरकमायाविलासान्द्यतिखंडयतीतिवावरदःइदंद्वयमेकं ॥ (विविक्षुः) जगत्स्वयमुत्पाद्यतत्रप्रवेष्टुंइच्छुः ॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः भक्तहृदयंप्रवेष्टुमिच्छुरितिवा ९३० ॥ (विशारदः) सर्वविद्याकलादिषुनिपुणः ॥ (शुभदः) भक्तेभ्यःशुभंददातीतिशुभदः ॥ (शुभकर्ता) भक्तकल्याणानामुत्पादकः ॥ (शुभनामाशुभः) शुभानिनामानियस्यसः ॥ यतःशुभःस्वयमेवसर्वकल्याणयुक्तः इदंद्वयमेकं ॥१२२॥

अपराजितःसर्वसत्वो गोविंदःसत्ववाहनः॥ अधृतः स्वधृतःसिद्धः पूतमूर्ति र्यशोधनः ॥ १८ ॥ वाराहशृंगधृक्शृंगीबलवा नेकनायकः॥ श्रुतिप्रकाशः श्रुतिमानेकबंधु रनेककृत् ॥ १९॥ श्रीवत्सलशिवारंभः शांतभद्रः समो यशः ॥ भूशयो भूषणो भूतिर्भूतकृ द्भूतभावनः ॥ २० ॥ अकंपो भक्तिकाय स्तुकालहानीललोहितः ॥ सत्यव्रत महात्यागी नित्यशांति परायणः॥ २१ ॥ परार्थवृत्तिर्वरदो विविक्षु स्तुविशारदः॥ शुभदः शुभकर्ता चशुभनामा शुभःस्वयम्॥ १२२॥

(अनर्थितः) नविद्यतेऽर्थितायस्यसः ॥ (अगुणः) निर्गुणः ॥ (साक्षीह्यकर्ता) सर्वंजगद्द्रष्टातथापिअकर्ता मायोपाधिवशेनजगत्कर्तृत्वावभासेपिवस्तुतो नकर्ता इदंद्वयमेकं ॥ (कनकप्रभः) सुवर्णसदृशीप्रभायस्यसः ॥ (स्वभावभद्रः) ॥ स्वभावेनैवभद्रः ॥ स्वेषांनिजभक्तानांभावेनैवभद्रंयस्मात्सइतिवा ॥ (मध्यस्थः) मध्येब्रह्मविष्णुमध्यभागेतिष्ठतीतिमध्यस्थः १४० ॥ (शीघ्रगः)भक्तकार्यार्थंशीघ्रंगच्छतीतिशीघ्रगः ॥ (शीघ्रनाशनः) भक्तापदःशीघ्रंनाशयती तिशीघ्रनाशनः ॥ २३ ॥ (शिखंडीकवचीशूली) शिखंडश्चूडोस्यास्तीतिशिखंडी ॥ कवचंसुवर्णतनुत्रमस्यास्तीतिकवची ॥ शूलंत्रिशूलमस्यास्तीतिशूली इदंत्रयमेकं ॥ (जटीमुंडीकुंडली) जटीकपर्दयुक्तः ॥ मुंडीमुंडितमूर्धगणयुक्तः ॥ कुंडलीसर्पकुंडलेयस्यकुंडली तदुक्तंशिवगीतायां ॥ कंबलाश्वतरौशंभोः कर्णकुंडलतांगताविति इदंचयमेकं ॥ (अमृत्युः) नास्तिमृत्युर्यस्येतिअमृत्युः ॥ (सर्वदृक्सिंहः) सर्वंपश्यतीतिसर्वदृक्सएवसिंहःदुष्टनाशनेसिंहसदृशःइदंद्वयमे कं१५०॥(तेजोराशिर्महामणिः) तेजःसमूहरूपःसएव महामणिःमहान्पूज्यःकौस्तुभादिमणिस्तद्रूपःइदंद्वयमेकं॥२४॥ (असंख्येयोप्रमेयात्मा)संख्यातुमयो

अनर्थितोऽगुणः साक्षीत्यकर्ता कनकप्रभः॥ स्वभावभद्रो मध्यस्थः शीघ्रगः शीघ्रनाशनः॥२३॥ शिखंडी कवची शूली जटी मुंडी चकुंडली॥ अमृत्युः सर्वदृक् सिंह स्तेजोराशिर्महामणिः॥ २४ ॥ असंख्येयोऽप्रमोयात्मा वीर्यवान् वीर्यकोविदः॥ वेद्य श्चैववियोगात्मा परावरमुनीश्वरः॥ २५ ॥ अनुत्तमो दुराधर्षो मधुर प्रियदर्शनः ॥ सुरेशः शरणंसर्वः शब्दब्रह्म सतांगतिः॥२६॥ कालपक्षः कालकारी कंकणीकृतवासुकिः॥ महेष्वासो महीभर्ता निष्कलंको विश्रृंखलः॥१२७॥

ग्यःअपारइत्यर्थःअतएव अप्रमेयःअपरिच्छेद्यःआत्मास्वरूपंयस्यसः ॥ (वीर्यवान्वीर्यकोविदः) वीर्यंप्रभावोनित्यमस्यास्तिसःअतएववीर्येषुसर्वपराक्रमेषुकोविदःनिपुणः ॥ (वेद्यः) मुमुक्षुभिर्ज्ञातुंयोग्योवेद्यः १५० ॥ (वियोगात्मा) विशिष्टयोगयुक्तःआत्मायस्यसः ॥ (परावरमुनीश्वरः) परेअवरेचये मुनयस्तेषामीश्वरः ॥ २५ ॥ (अनुत्तमोदुराधर्षः) नोत्तमोयस्मात्सःअनुत्तमःअतएवदुराधर्षः ॥ दुःखेनाप्याधर्षितुमशक्यः ॥ (मधुरप्रियदर्शनः) मधुरः सौम्यरूपःअतएवप्रियदर्शनःप्रियंसर्वप्रेष्ठंदर्शनंयस्यसः ॥ (सुरेशः) सुराणांईशःसुरेशः ॥ (शरणं) सकलजगतोरक्षकः ॥ (सर्वः) विश्वरूपः ॥ (शब्दब्रह्मसतांगतिः) वेदस्वरूपःसएव सतांसाधूनांगतिःमार्गरूपःइदंद्वयमेकं ॥ २६ ॥ (कालपक्षः) कालःपक्षःस्पष्टौसहायोयस्यसः ॥(कालकारी) कालस्योत्पादकः १६० ॥ (कंकणीकृतवासुकिः) वलयीकृतोवासुकिर्येनसः ॥ (महेष्वासः) महानक्षयःइष्वासइषुधिर्यस्यसः ॥(महीभर्ता) मह्याःजगत्याअपिभर्ताधारकः ॥ (निष्कलंकः) निर्गतःकलंकोअविद्यामलंयस्मात्सः ॥ (विश्रृंखलः) विगताश्रृंखलामायाबंधोयस्मात्सः ॥ श्रृंखलापुंस्कटीवस्त्रेबंधेपिनिगडेपिचेतिविश्वः ॥ १२७ ॥

(द्युमणिस्तरणिः) दिवःमणिःरत्नभूतःसूर्यरूपःसएवतरणिःसंसारसागरतारणात् ॥ (धन्यः) कृतकृत्यः ॥ (सिद्धिदःसिद्धसाधनः) अणिमादिसिद्धीर्ददातीतिसिद्धिदःअतएव सिद्धानिपुरुषार्थसाधनानियस्मात्सःइदंद्वयमेकं ॥ (विश्वतःसंवृतः) विश्वतःसर्वतःसंवृतःमाययाआच्छादितरूपः ॥ (स्तुत्यः) देवासुरैरपिस्तोतुंयोग्यः ९७० ॥ (व्यूढोरस्कः) व्यूढंविस्तीर्णमुरोयस्यसः ॥ (महाभुजः) महांतोदीर्घाभुजायस्यसः ॥ २८ ॥ (सर्वयोनिः) सर्वस्यजगतः कारणं ॥ (निरातंकः) निर्गतःआतंकःसंसाररोगस्तापोवायस्मात्सः ॥ रुक्तापशंकास्वातंकइत्यमरः ॥ (नरनारायणप्रियः) नरनारायणौमहामुनीप्रियौयस्यसः ॥ (निर्लेपोनिष्प्रपंचात्मा) निर्गतःलेपः कर्मसंबंधलेशोयस्मात्सनिर्लेपःअतएव पंचभूतादिसमुदायरूपप्रपंचरहितःआत्मादेहोयस्यसःइदंद्वयमेकं ॥ (निर्व्यंगः) निर्गतानिविशिष्टांगानिभूतानियस्मात्सः ॥ (व्यंगनाशनः) व्यंगकर्माणिनाशयतीतिव्यंगनाशनः ॥ २९ ॥ (स्तव्यः) स्तोतुंयोग्यस्तव्यः ॥ (स्तवप्रियः)स्तवःस्तुतिःप्रियायस्यसः ९८० ॥ (स्तोता) स्तौतिप्रेम्णाभक्तानितिस्तोता ॥ (व्यासमूर्तिः) व्यासोवेदादिविभाजकमहर्षिःमूर्तिर्यस्यसः ॥ (निरं

द्युमणि स्तरणि र्धन्यः सिद्धिदः सिद्धसाधनः॥ विश्वतःसंवृत स्तुत्यो व्यूढोरस्को महाभुजः॥ २८ ॥ सर्वयोनि र्निरातंको नरनारायणप्रियः॥ निर्लेपो निष्प्रपंचात्मा निर्व्यंगोव्यंगनाशनः ॥ २९ ॥ स्तव्यःस्तवप्रियःस्तोता व्यासमूर्ति र्निरंकुशः॥ निरवद्यमयोपायो विद्याराशी रसप्रियः ॥ ३० ॥ प्रशांतबुद्धि रक्षुण्णः संग्रही नित्यसुंदरः॥ वैय्याघ्रधुर्यो धात्रीशः शाकल्यःशर्वरीपतिः॥ ३१ ॥ परमार्थगुरु र्दृष्टिःशरीराश्रितवत्सलः॥ सोमोरसज्ञो रसदः सर्वसत्वावलंबनः॥ ३२ ॥ एवंनाम्नां सहस्रेणतुष्टाववृषभध्वजम्॥ प्रार्थयामासशंभुंचपूजयामासपंकजैः॥३३॥ परीक्षार्थंहरेस्त्वीशःकमलेषुमहेश्वरः॥ गोपयामासकमलंतदेकंभुवनेश्वरः॥१३४॥

कुशः) निर्गतःअंकुशःमायारूपोयस्मात्सः ॥ (निरवद्यमयोपायः) निरवद्यमयःअनिंद्यसाधनरूपःमोक्षोपायोयस्मात्सःनिरवद्यमयोपायः ॥ (विद्याराशिः) विद्यानांसर्वविद्यानांराशिःसमुदायोयस्मात्सः ॥ (रसप्रियः) रसोभक्तिरसःप्रियोयस्यसःरसप्रियः ॥ ३० ॥ (प्रशांतबुद्धिः) प्रशांताबुद्धिर्यस्यसः ॥ (अक्षुण्णः) परैरनभिभूतः ॥ (संग्रही) भक्तजनसंग्रहयुक्तः ॥ (नित्यसुंदरः) नित्यंसर्वकालंसुंदरःप्रसन्नः ९९० ॥ (वैयाघ्रधुर्यः) व्याघ्रस्येदंवैयाघ्रंव्याघ्रचर्मतस्यधुर्यःवाहकः ॥ (धात्रीशः) धात्रीपृथ्वीतस्याईशःस्वामी ॥ (शाकल्यः) तत्संज्ञकऋषिरूपः ॥ (शर्वरीपतिः) शर्वरीणांरात्रीणांपतिः ॥ ३१ ॥ (परमार्थगुरुः) परमार्थस्यमोक्षस्यगुरुःतारकमंत्रस्योपदेष्टा (दृष्टिः) चक्षुरभिमानिदेवतास्वरूपः ॥ (शरीराश्रितवत्सलः) शरीराश्रितानांजीवानांवत्सलःअत्यंतकरुणः ॥ (सोमः) उमयासहितःसोमः ॥ (रसज्ञोरसदः) रसंहालाहलास्वादंजानातीतिरसज्ञःसएव रसंवीर्यंददातीतिरसदःइदंद्वयमेकं ॥ १००० ॥ (सर्वसत्वावलंबनः) सर्वसत्वानांसर्वप्राणिनांअवलंबनंआश्रयभूतइत्यर्थः ॥ ३२ ॥ १३४ ॥

॥१९६॥

तेनविष्णुना यातुयात्विति द्विरुक्त्यास्वावयवार्पणेपिक्षतिलेशाभावोदर्शितः ॥ ३५ ॥ सर्वसत्वावलंबनंसर्वप्राणिनांअचलाश्रयभूतंशिवमितिशेषः ॥ पूजया
मासविष्णुरितिशेषः ॥३६॥ विष्णोर्निरतिशयभक्तिंदृष्ट्वाशिवस्तमनुकंपयामासेत्याह ॥ मामेति ॥ स्तवंपूर्वोक्तं ॥ तथाभूतंभक्त्यतिशययुतं ॥ ३७ ॥ तस्मा

द्विदिविचारितंतेनकृतोवैकमलंगतम् ॥ यातुयातुसुखेनैवनेत्रंकिंकमलंनहि ॥ ३५ ॥ ज्ञात्वातुनेत्रमुद्धृत्यसर्वसत्वावलंब
नम् ॥ पूजयामासभावेनस्तवेनाऽनेनसर्वथा ॥ ३६ ॥ मामेतिव्याहरन्नेवप्रादुरासीज्जगद्गुरुः ॥ ततःस्तवमथोदृष्ट्वातथा
भूतंहरोहरिम् ॥ ३७ ॥ तस्मादवततारा शुमंडलात्पार्थिवस्यसः ॥ यथोक्तरूपिणंशंभुंतेजोराशिंसमुत्थितम् ॥ ३८ ॥ नम
स्कृत्यपुरःस्थित्वास्तुतिंकृत्वाविशेषतः ॥ पूजयामासदेवेशःपार्वत्यासहितंशिवम् ॥ ३९ ॥ प्रसन्नवदनोभूत्वाशंभोश्वसंमु
खस्थितः ॥ इत्थंभूतंहरोदृष्ट्वाकोटिभास्करभूषितः ॥ ४० ॥ प्राणिनामीश्वरःशंभुर्देवदेवोजनार्दनम् ॥ तदाप्राहमहादेवःप्र
हसन्निवशंकरः ॥ संप्रेक्षमाणंतंविष्णुंकृतांजलिपुटंस्थितम् ॥ ४१ ॥ ॥ शंकरउवाच ॥ ज्ञातंमयेदंसकलंदेवकार्यंजना
र्दन ॥ सुदर्शनाख्यंचक्रंचददामितवशोभनम् ॥ ४२ ॥ यद्रूपंभवतादृष्टंसर्वलोकसुखावहम् ॥ हितायतवदेवेशकृतंभाव
यसुव्रत ॥ ४३ ॥ रणाजिरेपिसंस्मृत्यदेवानांदुःखनाशनम् ॥ इदंचक्रमिदंरूपमिदंनामसहस्रकम् ॥ ४४ ॥ येशृण्वंतिस
दाभक्त्यासिद्धिःस्यादनपायिनी ॥ एवमुक्त्वाददौचक्रंसूर्यायुतसमप्रभम् ॥ ४५ ॥ विष्णुरपिचसस्नात्वाजग्राहोदङ्मुख
स्तदा ॥ नमस्कृत्यतदादेवंपुनर्वचनमब्रवीत् ॥ ४६ ॥ शृणुदेवमयाध्येयंपठनीयंचमेप्रभो ॥ दुःखानांनाशनार्थंहिवदत्वं
लोकशंकर ॥ ४७ ॥ इतिपृष्टस्तदातेनसंतुष्टस्तुशिवोऽब्रवीत् ॥ रूपंध्येयंमदीयंवैसर्वानर्थप्रशांतये ॥ ४८ ॥ अनेकदुःख
नाशार्थंपाठ्यंनामसहस्रकम् ॥ धार्यंचक्रंसदामेऽघसर्वानर्थप्रशांतये ॥ ४९ ॥ अन्येचयेपठिष्यंतिपाठयिष्यंतिनित्यशः ॥
तेषांदुःखंनस्वप्नेऽपिजायतेनात्रसंशयः ॥ ५० ॥

दिति ॥ तस्मात्पार्थिवस्यमंडलात्सहरःअवततारेत्यन्वयः ॥ यथोक्तरूपिणंपार्थिवमंडलान्निर्गतं ॥ ३८ ॥ देवेशोविष्णुः ॥ ३९ ॥ इत्थंभूतंपूर्वोक्तप्रकार
विशिष्टं ॥ ४० ॥ ४१ ॥ ४२ ॥ भावयपुनःपुनश्चितय ॥ ४३ ॥ ४४ ॥ ददौशिवइतिशेषः ॥ ४५ ॥ जग्राहेति ॥ चक्रमितिसंबध्यते ॥ देवंशिवं ॥ ४६ ॥
॥ ४७ ॥ तेनविष्णुना ॥ ४८ ॥ ४९ ॥ १५० ॥

राज्ञांचसंकटेप्राप्तेशतावर्तंचरेद्यदा ॥ सांगंचविधियुक्तोहिकल्याणंलभतेनरः ॥ ५१ ॥ रोगनाशकरंह्येतद्विद्यादायकमुत्तमम् ॥ समुद्दिश्यफलंश्रेष्ठंपठंतिफलमुत्तमम् ॥ ५२ ॥ लभंतेनाऽत्रसंदेहःसत्यमेतद्व्रतंमम ॥ प्रातःसमुत्थायसदापूजांकृत्वामदीयिकां॥५३॥ पठतोमत्समक्षंवैनित्यंसिद्धिर्नदूरतः ॥ ऐहिकींसिद्धिमासाद्यपरलोकसमुद्भवां ॥५४॥ प्राप्नोतिपाठकोनित्यमष्टमासात्सुरेश्वर ॥ सायुज्यमुक्तिमायातिनाऽत्रकार्याविचारणा ॥५५॥ एवमुक्त्वातदाविष्णुंशंकरःप्रीतमानसः ॥ उपस्पृश्यकराभ्यांचउवाचशंकरःपुनः ॥५६॥ वरदोऽस्मिसुरश्रेष्ठवरान्वरयथेप्सितान् ॥ भक्त्यावशीकृतोनूनंस्तवेनानेनवैपुनः ॥ ५७ ॥ इत्युक्तोदेवदेवेनदेवदेवंप्रणम्यतम् ॥ यथेदानींकृपादेवक्रियतेचाऽप्यतःपरम् ॥ ५८ ॥ कार्याचैवविशेषेणकृपालुत्वात्त्वयाप्रभो ॥ त्वयिभक्तिंमहादेवप्रयच्छवरमुत्तमम् ॥ ५९ ॥ नाऽन्यमिच्छामिभगवन्पूर्णोऽहंतेप्रसादतः ॥ तच्छ्रुत्वावचनंतस्यदयावान्सुतरांभवः ॥ ६० ॥ प्राहत्वेनंमहादेवः परमात्मानमच्युतम् ॥ मयिभक्तिश्चवंद्यस्त्वंपूज्यश्चैवसुरैरपि ॥ ६१ ॥ विश्वंभरस्त्वदीयंवैनामपापहरंपरम् ॥ भविष्यतिनसंदेहोमत्प्रसादात्सुरोत्तम ॥६२॥ इत्युक्त्वांऽतर्दधेरुद्रोभगवान्नीललोहितः ॥ जनार्दनोऽपिभगवान्वचनाच्छंकरस्यच ॥ ६३ ॥ प्राप्यचक्रंशुभंध्यानंस्तोत्रमेतन्निरंतरम् ॥ पपाठाऽध्यापयामासभक्तेभ्यस्तदुपादिशत् ॥ ६४ ॥ अन्येऽपियेपठिष्यंतितेविंदंतुतथाफलम् ॥ इतिपृष्टंसमाख्यातंशृण्वतांपापहारकम् ॥ ६५ ॥ अतःपरंचकिंश्रेष्ठाःप्रष्टुमिच्छथवैपुनः ॥ १६६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांशिवसहस्रनामकथनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥

कार्येति ॥ कृपेतिसंबध्यते ॥ ५९ ॥ तस्यविष्णोः ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ एतत्सहस्रनामात्मकं ॥ ६४ ॥ एतदाख्यानमुपसंहरति ॥ इतीति ॥ ६५ ॥ १६६ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांसारबोधिन्यामेकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥

शिवरात्रिव्रतंसांगंविष्ण्वादीन्प्रोक्तवाञ्छिवः ॥ द्विसप्ततितमेध्यायेऽतदेवात्रनिरूप्यते ॥ एवंदिव्यसहस्रनामादिश्रवणेनपरंहृष्टामुनयोनिश्चितसकलवेदित
व्यतयासूतंप्रशंसंति ॥ धन्योसीति ॥ भुक्तिमुक्तिप्रदशिवकृत्येषुकुशलत्वेनतवैवधन्यत्वादिकमस्तीत्यर्थः ॥ बहुभ्यइति ॥ यद्यपिबहुभ्यऋषिभ्यःश्रुतंतथा
पिसंदेहोनोनगतइत्यग्रिमेणान्वयः ॥१ ॥ ईप्सुभिरिति ॥ अस्माभिरितिशेषः ॥ पृच्छामहेपृच्छामः ॥ २ ॥ यदिति ॥ यदनंतंनिरतिशयंसुखंप्रचक्ष्येतअस्मा
भिरपिप्रवक्तुंबोधयितुंशक्येततत्सुखंशिवोभगवान्केनव्रतेनसंतुष्टःसन्ददातितद्व्रतंविशेषतस्त्वमेववदेत्यर्थः ॥ ३ ॥ उक्तमेवविवृण्वंति ॥ भुक्तिरिति ॥ येनव्रते

ऋषयऊचुः॥ ॥धन्योऽसिकृतकृत्योऽसिजीवितंसफलंतव ॥ बहुभ्यश्चऋषिभ्यश्चश्रुतंयद्यपिनोगतः ॥ १ ॥ संदेहश्चभ
वानद्यपृच्छ्यतेहितमीप्सुभिः॥ कुशलःशिवकृत्येषुतस्मात्पृच्छामहेवयम् ॥ २ ॥केनव्रतेनसंतुष्टःशिवोयच्छतितत्सुखम्॥
यदनंतंप्रचक्ष्येततत्त्वंब्रूहिविशेषतः॥ ३ ॥ भुक्तिर्मुक्तिश्चलभ्येतयेनवैव्यासशिष्यक॥ एतद्वचस्तदीयंहिश्रुत्वावचनमाददे
॥ ४ ॥ सूतउवाच ॥ सम्यक्पृष्टमृषिश्रेष्ठाःकथयामियथाश्रुतम् ॥ यथाभवद्भिःपृष्टंवैतथापृष्टंचवेधसा ॥ ५ ॥ हरिणाच
शिवायैवशिवयाचतथापुनः॥ कस्मिंश्चित्समयेतैस्तुपृष्टंचपरमात्मने ॥ ६ ॥केनव्रतेनसंतुष्टोभुक्तिंमुक्तिंचयच्छति ॥ इति
पृष्टस्तदातैस्तुयदुक्तंतेनवैतदा ॥ ७ ॥ तदहंकथयाम्यद्यशृण्वतांपापहारकं ॥ शिवउवाच ॥शृणुविष्णोप्रवक्ष्यामिव्रताना
मुत्तमंव्रतम् ॥ ८ ॥ वेदानांह्युपवेदानांस्मृतीनांचतथापुनः ॥ पुराणानांचसर्वेषांधर्माणांतत्त्वमेवच ॥ ९ ॥ गुह्यानांचैव
सर्वेषांसारमेकंसमुद्धृतम् ॥ व्रतानांचैवसर्वेषामेतदेवहितंमम ॥ १० ॥ मुक्तेश्चप्रापकंह्येतच्चतुष्टयमुदाहृतम् ॥ शिवा
र्चनंरुद्रजपउपोष्यंचदिनत्रयम् ॥ ११ ॥ वाराणस्यांचमरणंमुक्तिरेषाचतुर्विधा ॥ अष्टमीसोमवारश्चकृष्णपक्षेचतुर्दशी
॥ १२ ॥ शिवतुष्टिकरंह्येतन्नात्रकार्याविचारणा ॥ चतुर्ष्वपिवलिष्ठंहिशिवरात्रिव्रतंहरे ॥ १३ ॥ तस्मादेतच्चकर्तव्यंभुक्तिमु
क्तिफलेप्सुभिः ॥ एतस्माच्चव्रतादन्यन्नास्तिहिततरंहरे ॥ १४ ॥

न तदीयमृषिप्रोक्तं ॥ ४ ॥ ५ ॥ तैःविष्ण्वादिभिः ॥ ६ ॥ यच्छतीति ॥ भवानितिशेषः ॥ तेनशिवेन ॥ ७ ॥ ८ ॥ वेदानांऋगादीनांउपवेदानामायुर्वेदादी
नां ॥ स्मृतीनांमन्वादिप्रणीतसंहितानां ॥ पुराणानांब्राह्मादीनां ॥ धर्माणांवेदादिषूक्तानांतत्त्वंस्वरूपं ॥ ९ ॥ गुह्यानांगोप्यानां ॥ १० ॥ एतत् ॥ वक्ष्यमाणं॥
तदेवाह ॥ शिवेति ॥ रुद्रजपःरुद्राध्यायादिमंत्रजपः ॥ दिनत्रयमष्टम्यादिवक्ष्यमाणं ॥ उपोष्यंचशिवालयइतिपाठांतरं ॥ ११ ॥ मुक्तिरिति ॥ करणव्यु
त्पत्त्यामोक्षसाधनमित्यर्थः ॥ चतुर्विधेत्यत्रसनातनीतिपाठांतरं ॥ दिनत्रयमाह ॥ अष्टमीति ॥ १२ ॥ शिवेति ॥ ममतुष्टीतिपाठांतरं ॥ चतुर्ष्वपिशिवार्चना
दिष्वपि ॥ बलिष्ठमुत्तमंशीघ्रमेवसर्वसिद्धिकरत्वादितिभावः ॥ वरिष्ठमितिक्वचित्पाठः ॥ १३ ॥१४ ॥

तद्वचःशिववाक्यं ॥ १५ ॥ कथंकार्यमित्यस्यैवविवरणंकस्मिन्मासइत्यादि ॥ १६ ॥ कियत्कालंकियत्कालपर्यंतंकस्मिन्कालेतथाकार्यमितिपाठांतरं ॥ १७ ॥ १८ ॥ सर्वेषांवर्णानामाश्रमाणांचेत्यन्वयः ॥ शिशुनामिति ॥ दीर्घाभावआर्षः ॥ १९ ॥ सर्वेषांचेति ॥ तिरश्चामपीत्यर्थः ॥ २० ॥ सकामानामिति ॥ अकामानांतुकामाभावेनप्रतिबंधाभावादनायासेनमुक्तिसिद्धिरितिभावः ॥ एतद्व्रतस्यकालमाह ॥ माघस्येति ॥ असितेकृष्णेअनेनैवशुक्लपक्षव्यावृत्तिसिद्धौचतुर्दश्याःकृष्णेविशेषणंस्पष्टार्थं ॥ २१ ॥ निशार्धेति ॥ निशार्धोनिशीथस्तद्व्यापिनीत्यर्थः ॥ तदुक्तंनारदसंहितायामपि ॥ अर्धरात्रियुतायत्रमाघकृष्णचतुर्दशी ॥ शिवरात्रिव्रतंतत्रसोऽश्वमेधफलंलभेदिति ॥ नक्षत्रव्यापिनीयाह्येतिक्वचित्पुस्तकेपाठः ॥ तत्रनक्षत्रशब्दोरात्रिपरः ॥ अतएवनिर्णयसिंधौ ॥ स्मृत्यंतरेपि प्रदोषव्यापिनीयाह्याशिवरात्रिश्चतुर्दशी ॥ रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेत् ॥ अत्रप्रदोषोरात्रिः ॥ उत्तरार्धेतस्याहेतुत्वोक्तेरित्युक्तं ॥ विस्तरस्त्वन्यत्रद्रष्टव्यः ॥ २२ ॥ दुर्लभमिति ॥ अनेकयोनिपरिवर्तनेनप्राप्यत्वादितिभावः ॥ असारमिति ॥ देवादिष्विवज्ञानक्रियाशक्त्यभावादितिभावः ॥ ननुदीर्घकालादरादिभिरत्रापिसिद्धिर्भवेदतआह ॥ चंचलमिति ॥ वारिगततरंगवदस्थिरमित्यर्थः ॥ २३ ॥ अन्यान्स्वबंधुभृत्यादीन् ॥ २४ ॥ कथंप्रेरयेत्तदाह॥शिवरात्रीति ॥ तद्विधिमाह ॥ शुभमिति॥अनिषिद्धमित्यर्थः ॥ कार्यंदंतधावनमितिशेषः ॥ २५ ॥ देशेति॥देशकालसंकीर्तनपूर्वकमेवकार्यमित्यर्थः ॥ स्वीयंसंध्यादिनित्यंकर्मप्रकृत्यैवसम्यग्विधायैवनैमित्तिकंशिवरात्रिव्रताख्यंकालविशेषनिमित्तेनप्राप्तं ॥ कृत्यंपश्चात्समाचरेदितिपाठांतरं॥२६॥

इत्येवंतद्वचःश्रुत्वाहरिराहशिवंप्रति ॥ विष्णुरुवाच ॥ देवदेवमहादेवकथयत्वंममाऽधुना ॥ १५॥ कथंकार्यंव्रतंस्येतत्कस्मिन्मासेऽथवापुनः॥ केनैवविधिनादेवकथयत्वंममाऽधुना ॥ १६॥ लोकानामुपकारार्थंपृच्छामित्वांसदाशिव॥ कियत्कालंतदाकार्यंकथंपूजांसमाचरेत्॥ चतुर्दशीकथंतेचवल्लभाचसदाशिव॥१७॥ एतत्सर्वंत्वयादेवकथनीयंहितायवै॥ एतच्चवचनंश्रुत्वाशिवोवचनमब्रवीत्॥ १८ ॥ शिवउवाच ॥इदंव्रतंचसर्वेषांधर्मसाधनमुत्तमं॥ वर्णानामाश्रमाणांचस्त्रीणांचशिशुनांतथा ॥ १९ ॥ दासानांदासिकानांचहितंव्रतमनुत्तमम् ॥ देवानांदानवानांचसर्वेषांचशरीरिणाम् ॥ २० ॥ सकामानांचसर्वेषांभुक्तिमुक्तिप्रदायकम् ॥ माघस्यैवाऽसितेपक्षेकृष्णाचैवचतुर्दशी॥ २१ ॥ निशार्धव्यापिनीग्राह्याहत्याकोटिविनाशिनी॥ तद्दिनेचैवयत्कार्यंश्रूयतांकथयामिते॥ २२॥ प्रातश्चैवसमुत्थायत्यानंदंपरमंगतः॥ दुर्लभंमानुषंजन्मह्यसारंचंचलंपुनः॥ २३ ॥ सार्थकंचकरोम्यद्यव्रतेनानेनवैपुनः॥ इतिनिश्चित्यमनसाअन्यान्संप्रेरयेन्नरः ॥ २४ ॥ शिवरात्रिव्रतंत्वद्यकर्तव्यंहितमीप्सुभिः॥ शुभंचदंतकाष्ठंचकृत्वाकार्यंनरेणच॥ २५॥ नद्यादौस्नानमात्रंहिदेशकालाविरोधतः॥ स्वीयंकर्मप्रकृत्यैवनैमित्तिकंसमाचरेत्॥ २६॥

शिवस्याग्रइति ॥ वक्ष्यमाणस्थानेष्वितिशेषः ॥ एवंवक्ष्यमाणप्रकारं ॥ तत्रगमनस्यफलमाह ॥ समीपइति ॥ २७ ॥ तत्संनिधिंशिवसंनिधिं ॥ उपचारैर्ध्या नादिभिः ॥ २८ ॥ व्रतस्यनिर्विघ्नतयासिद्धयेप्रथमंशिवंप्रार्थयेत तत्रमंत्रानाह ॥ देवदेवेति ॥ २९ ॥ संजातेति ॥ निर्विघ्नेनव्रतंभवत्वित्याकारिकेच्छाव्रतंक र्तुंसंजातेत्यर्थः ॥ ३० ॥ परिहार्यान्विघ्नानाह ॥ कामाद्याइति ॥ कामाद्याःकामक्रोधलोभमोहमदमत्सराः ॥ दुरालापमिति ॥ चटुस्पर्शंविनोदादिनापि मिथ्याविकत्थनरूपंदुर्भाषणंव्रतावधिंनैवकरिष्यामीत्यन्वयः ॥ एवमग्रेपि ॥इष्टालापंचटुस्पर्शमितिपाठांतरं ॥ वासनांअनित्यवस्तुविषयिणींतृष्णांविविधां

शिवस्याऽग्रेतदागत्वाद्येवंकुर्यात्सुरोत्तम॥ समीपेचशिवस्यैवयत्कृतंतदनंतकं॥ २७॥ तस्मात्तत्संनिधिंगच्छेदनंतफल हेतवे ॥ पूजांचप्रथमंकुर्याद्दुपचारैर्यथाक्रमम्॥ २८॥ नमस्कृत्यशिवंपश्चात्प्रार्थ्येतिपूर्वंनरोत्तमः॥ देवदेवमहादेवनीलकंठ सदाशिव॥ २९॥ कर्तुमिच्छाचसंजाताशिवरात्रिव्रतस्यच॥ तवप्रभावाद्देवेशनिर्विघ्नेनभवत्विति॥ ३०॥ कामाद्याःशत्र वोमत्यंपीडांददतुमापुनः॥ दुरालापंचटुस्पर्शंवासनांविविधांपुनः॥ ३१॥ दिवास्वापंहिदेवेशजलंनैवव्रतावधि॥ करि ष्यामिचदेवेशप्रतापात्तवसुव्रत॥ ३२॥ एवंनियममास्थायपूजाद्रव्यंसमाहरेत्॥ शुद्धेस्थलेचयल्लिंगंप्रसिद्धंत्वागमेषुच ॥ ३३॥ रात्रौतत्रस्वयंगत्वासंपाद्यविश्वमुत्तमं॥ शिवस्यपश्चिमेभागेदक्षिणेवास्थलंशुभम्॥ ३४॥ विधायचैवतद्द्रव्यंनि धायशिवसन्निधौ॥ पुनःस्नायात्तदातत्रविधिपूर्वंनरोत्तमः॥ ३५॥ मौनीव्रतीभवेत्सद्यःकृत्वास्नानादिकंमुदा॥ परिधाय शुभंवस्त्रमंतर्वासस्तथापुनः॥ ३६॥ आचम्यचत्रिवारंहिपूजारंभंसमाचरेत्॥ लिंगपूजांप्रयत्नेनह्युपचारैःसमंत्रकैः॥ ३७ अमंत्रकंनकर्तव्यंपूजनंतुहरस्यच ॥ यस्यद्रव्यस्ययोमंत्रस्तेनपूजांसमाचरेत्॥ ३८ ॥ गीतवाद्यैस्तथानृत्यैर्भक्तिभावस मन्वितः॥ पूजनंप्रथमंयामेकृत्वामंत्रंजपेद्बुधः ॥ ३९ ॥ पार्थिवंचतदाश्रेष्ठंविधायमंत्रवान्सुधीः॥ नित्यंचक्रियतेचेद्वैपा र्थिवंचतदाचरेत्॥ ४० ॥ प्रथमंपार्थिवस्यैवपश्चाच्चास्यापितेचरेत् ॥ पार्थिवंचविधानंवैकर्तव्यंहितमिच्छता ॥ ४१ ॥

नानाविधानर्थकारिणीं ॥ ३१ ॥ जलमिति ॥ जलपानमपीत्यर्थः ॥ ३२॥ शुद्धइति ॥ अचलंचैवयल्लिंगमितिंक्वचित्पाठः ॥ आगमेषुशैवागमादिशास्त्रेषु ॥ ३३ ॥ विश्वंसर्वंपूजोपकरणद्रव्यं ॥ ३४ ॥ ३५ ॥ अंतरिति ॥ अंतर्वासःपरिधानीयंशुभंवस्त्रंपरिधायेत्यन्वयः ॥ ३६ ॥ लिंगपूजांसमाचरेदित्येवान्वयः ॥ ३७ ॥ ३८ ॥ मंत्रंपंचाक्षरं ॥ ३९ ॥ विधायेति ॥ श्रेष्ठंपार्थिवंविधायस्तोत्रैर्वृषभध्वजंहर्षयेदितिसंबंधः ॥ मध्येकर्मापिविशेषमाह ॥ नित्यमिति ॥ चरे दिति ॥ पार्थिवंचतदार्चयेदितिपाठांतरं ॥ ४० ॥ पार्थिवस्यैवेति ॥ पूजनमितिसंबध्यते ॥ ४१ ॥

माहात्म्यमिति ॥ तच्चाग्रेवक्ष्यते ॥ ४२ ॥ स्थापनादिपूजाप्रकारमाह ॥ चतुर्ष्विति ॥ मूर्तीनांशिवमूर्तीनां ॥ ४३ ॥ ४४ ॥ विमोचयेत् ॥ विसृजेत् तत्प्र

कारमाह ॥ नियमइति ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ संकल्पमीश्वरार्पणरूपं ॥ एवंसंक्षेपेणपूजाविधिमुक्त्वाविस्तरेणाप्याह ॥ यामेयामइति ॥४९॥ ॥ ५० ॥ प्रयोगादिअद्यब्रह्मणइत्यादिसंकल्पवाक्यप्रयोगादिविधायसंकीर्त्य ॥ पंचद्रव्यैःपंचामृताख्यैः ॥ ५१ ॥ तान्येवाह ॥ दुग्धमिति ॥ तस्यतस्यदु

स्तोत्रैर्नानाविधैर्दिव्यैर्हर्षयेद्वृषभध्वजम् ॥ माहात्म्यंव्रतसंभूतंश्रोतव्यंव्रतकारिणा ॥ ४२ ॥ चतुर्ष्वपिचयामेषुमूर्तीनांच चतुष्टयम् ॥ कृत्वावाहनपूर्वंवैविसर्जनावधिक्रमात् ॥ ४३ ॥ जागरणंतदाकृत्वामहोत्सवसमन्वितम् ॥ प्रातःकालेपुनस्त त्रस्थापितंपूजयेच्छिवम् ॥ ४४ ॥ पुनःस्नात्वाशिवस्यैवनियमंचविमोचयेत् ॥ नियमोऽद्यमयादेवकृतश्चैवत्वदाज्ञया ॥४५॥ विसृज्यतेमयास्वामिन्जातंव्रतमनुत्तमं॥व्रतेनानेनदेवेशयथाशक्तिकृतेनच॥४६॥ संतुष्टोभवदेवेशजातंव्रतम नुत्तमं ॥ शिवशंकरसर्वात्मन्कृपांकुरुममोपरि ॥ ४७ ॥ पुष्पांजलिंशिवेदत्वानियमंचविसृज्यच ॥ नमस्कारंशिवायैवत दादानंयथाविधि॥४८॥ संकल्पंचततःकृत्वाजलंग्राह्यंततःपरम्॥यामेयामेचयापूजातांचैवकथयाम्यहम्॥४९॥प्रथमे चैवयामेचस्थापितंपार्थिवंपुनः॥पूजयेत्परयाभक्त्याह्युपचारैरनेकशः॥५०॥प्रयोगादिविधायैवकामनांविनियुज्यच॥ पंचद्रव्यैश्चप्रथमंपूजनीयोमहेश्वरः ॥ ५१ ॥ दुग्धंदधिमधुसर्पिःशर्कराणांक्रमेणच ॥ तस्यतस्यचमंत्रेणतत्तद्द्रव्यंसमर्पये त् ॥ ५२ ॥ तद्द्रव्यंतुसमर्प्यैवजलधारांप्रदापयेत् ॥ पश्चाच्चजलधाराभिर्द्रव्याण्युत्तार्यवैपुनः ॥ ५३ ॥ शतमष्टोत्तरंमंत्रंपठि त्वाजलधारया ॥ पूजयेच्चशिवंतत्रनिर्गुणंगुणरूपिणम् ॥ ५४ ॥ गुरुदत्तेनमंत्रेणपूजयेद्वृषभध्वजं ॥ अन्यथानाममं त्रेणपूज्यश्चैवसदाशिवः॥५५॥ चंदनेनविचित्रेणतंडुलैश्चाऽप्यखंडितैः॥ ततश्चैवतिलैःपूजाकार्यातस्यमहात्मनः ॥ ५६ ॥ पुष्पैश्चशतपत्रैश्चकरवीरैस्तथापुनः ॥ अष्टाभिर्नाममंत्रैश्चपुष्पाण्यारोपयेच्छिवे ॥५७॥ भवःशर्वस्तथारुद्रःपुनःपशुपति स्तथा॥उग्रश्चैवततःप्रोक्तोमहादेवस्ततःपरम् ॥ ५८ ॥

ग्धदध्यादेः मंत्रेणआप्यायस्वेत्यादिना ॥ ५२ ॥ तत्द्रव्यंपूर्वोक्तमन्यदपिगंधादिकं जलधाराभिरित्यनेनहस्तादिनाद्रव्योत्तारणंनिरस्तं ॥ ५३ ॥ मंत्रंवक्ष्यमा णं ॥ ५४ ॥ गुरुदत्तेनपंचाक्षरादिनाअन्यथागुरुदत्तत्वाभावे ॥ ५५ ॥ अखंडितैरखंडितावयवैःतत्रैवाक्षतव्यवहारोभवतीत्यपिबोध्यं ॥ ५६ ॥ आरोपये तृअर्पयेत् ॥ ५७ ॥ नाममंत्रानाह ॥ भवइति ॥ ५८ ॥

श्रीपदमिति ॥ पूर्वंश्रीपदंप्रयुज्यप्रसिद्धप्रकारेणश्रीभवायनमइत्यादिरूपेणचतुर्थ्यंतपदघटितेनमंत्रेणपूजयेदित्यर्थः ॥ ५९ ॥ प्रथमइति ॥ यामइतिशेषः ॥ ६० ॥ श्रीफलंबिल्वफलं ॥ ६१ ॥ धेनुमुद्रांअंगुलिभिर्गोस्तनचतुष्टयाकारां ॥ ६२ ॥ एकइति ॥ एकएवचेत्तथालब्धस्तदाएकोयतिरेवावश्यकः यमनियमादियोगेनप्रशस्ततरत्वात् ॥ ६३ ॥ संकल्पमिति ॥ तदाब्राह्मणतर्पणस्यसंकल्पमात्रंकृत्वेत्यर्थः ॥ ६४ ॥ तत्तत्पूजाफलंप्रथमद्वितीयादियामपूजाफलं

भीमश्चैवतथेशानःश्रीपदंपूर्वतस्तथा॥ चतुर्थ्यंतपदेनैवपूजयेत्पंचवक्त्रकम्॥ ५९॥ पश्चाद्धूपंचदीपंचनैवेद्यंचततःपरम्॥ प्रथमेचैवनैवेद्यंपक्वान्नंकारयेत्तदा॥६०॥ अर्घंचश्रीफलंदत्वाताम्बूलंविनिवेदयेत्॥ नमस्कारंततोध्यानंजपःप्रोक्तस्ततः परम्॥६१॥ गुरूपदिष्टमंत्रेणतोषयेत्परमेश्वरम्॥ जपंकृत्वाततःपश्चाद्धेनुमुद्रांप्रदर्शयेत्॥६२॥ पश्चाच्चतर्पणंतत्रब्राह्मणानांस्वशक्तितः॥एकस्त्वावश्यकःप्रोक्तोयतिरेकस्तथापुनः॥६३॥ संकल्पंचतदाकृत्वागीतंवाद्यंतथापुनः॥ नृत्यंचैवतथा चाऽत्रगानंचविविधंतथा॥६४॥ कर्तव्यंयाममात्रेणयावद्यामोभवेदिह॥ तत्तत्पूजाफलंतस्मैनिवेद्यपरमात्मने॥६५॥ नमस्कारंततःकृत्वासंकल्पंसंविधायच॥ पुनश्चद्वितीयेयामेविसृज्यान्यांसमाचरेत्॥६६॥ अथचैकस्मिन्रूपेचपार्थिवे द्वितीयेपुनः॥ कुर्यात्पूजांतथाविष्णोर्भुक्तिमुक्तिफलाप्तये॥६७॥ एवंपूजाविधिंकृत्वाततोधारांसमर्पयेत्॥ पूर्वतोद्विगुणं सर्वमुच्चार्यपूजयेच्छिवम्॥६८॥ चंदनेनततःपूजातंडुलैःपूजनंपुनः॥ यवैश्चैवततःपूजाकर्तव्याशंकरस्यच॥६९॥ पुष्पैश्चैवप्रकर्तव्याकमलैःपूजयेच्छिवं॥ बिल्वपत्रैस्तथाचाऽत्रकर्तव्यंपूजनंशिवे॥७०॥ नैवेद्यंलड्डुकानांवैकर्तव्यंपरमात्मने॥ एवंकृतंव्रतंयेनतज्जन्मसफलंभवेत्॥७१॥ भुक्तिंदत्वाचमुक्तिंचयच्छत्यत्रनसंशयः॥ अर्घंचबीजपूरेणकुर्याद्यामेद्वितीयके॥७२॥ मयासर्वंयथापूर्वंकथितंतत्तथैवहि॥ धूपंदीपंचनैवेद्यंपायसान्नंप्रकल्पयेत्॥७३॥ दत्वाताम्बूलकंतत्रदक्षिणांचसमर्पयेत्॥ ध्यानंचैवपुनस्तत्रकृत्वाजाप्यंततःपुनः॥७४॥ मंत्रावृत्तिंतुद्विगुणांपूर्वतोऽपिजनार्दन॥ ततश्चब्राह्मणानांहिभोज्यंसंकल्पमाचरेत्॥७५॥

॥ ६५ ॥ विसृज्येति ॥ पूर्वकृतांपूजामितिशेषः ॥ अन्यांपूजां ॥ ६६ ॥ एकस्मिन्प्रथमेप्रसिद्धेस्थापितेवा ॥ ६७ ॥ एवमिति॥ धारांजलधारां ॥ द्रव्यैःपूर्वं तथापूजांकृत्वाधारांसमर्पयेदितिपाठांतरं ॥ पूर्वतःप्रथमयाममपेक्ष्यसर्वंमंत्रादिकंद्विगुणंमंत्रमित्यपिक्वचित्पाठः ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ बीजपूरेणमातुलिंगफलेन ॥ ७२ ॥ ७३ ॥ ७४ ॥ मंत्रावृत्तिंजपमंत्राभ्यासं ॥ ७५ ॥

द्वितीयावधिद्वितीययामसमाप्तिपर्यंतं ॥ ७६॥७७ ॥७८॥ पूर्वतःद्वितीययामापेक्षया ॥ ७९ ॥ अर्कसंभूतैःमंदारवृक्षोद्भवैः ॥ ८०॥ पूपकैःघृतपक्वपिष्टकैः ॥ आरात्रिकविधिआरतीइतिभाषायांप्रसिद्धं ॥ ८१ ॥ दाडिमेनडाळिंबइतिप्रसिद्धेन ॥ ८२ ॥ ततोपिद्वितीययामतोपि ॥ ब्रह्मभोजनंपूर्ववत्संकल्प्य

पूर्ववच्चनमस्कारंगीतंनृत्यंतथापुनः॥कुर्यादानंदसंयुक्तोयावच्चद्वितीयावधि॥७६॥यामेद्वितीयेयातेतुतृतीयेचसमागते॥ विसृज्यचशिवंतत्रपुनर्मूर्तिंप्रकल्पयेत् ॥ ७७ ॥ स्थापितेवाततःकुर्यात्तत्पूजाविधिंहरे ॥ द्रव्यैःपूजांपुराकृत्वापश्चाद्धारांप्रदापयेत्॥ ७८॥ पूर्वतोद्विगुणंकुर्यान्मंत्रेणविधिपूर्वकम्॥ ततश्चचंदनेनैवसंपूज्यतंडुलैस्तथा॥ ७९ ॥ गोधूमैःपूजनंकुर्याच्छिवप्रीणनतत्परः॥पुष्पैश्चैवाऽर्कसंभूतैःपूर्वोक्तैर्मंत्रसत्तमैः॥ ८०॥ धूपैश्चविविधैस्तत्रदीपैर्नानाविधैरपि॥ नैवेद्यंपूपकैस्तत्रशाकैर्नानाविधैरपि॥ ८१ ॥ कृत्वाचैवाऽथकर्पूरैरारात्रिकविधिंचरेत् ॥ अर्घंचदाडिमेनैवदद्याच्चशंकरायच॥ नमस्कारंततोध्यानंकृत्वामंत्रंजपेत्ततः॥८२॥ ततोपिद्विगुणंजाप्यंकृत्वाचब्रह्मभोजनम्॥संकल्प्यदक्षिणांदत्वापूजाविधिंसमाचरेत्॥ ८३॥नृत्यंगीतंतथाकृत्वायावद्यामावधिर्भवेत्॥ यामेचतृतीयेजातेचतुर्थेचसमागते॥ ८४ ॥ विसृज्यचपुनःपूजांकृत्वाचपार्थिवींहरे॥ प्रयोगादिपुनःकृत्वापूजाविधिंसमाचरेत्॥ ८५॥ द्रव्यैश्चपूजनंकृत्वाजलधारांप्रदापयेत्॥ पूर्वताद्विगुणेनैवमंत्रजाप्येनवापुनः॥ ८६॥ चंदनादानसंभूतांपूजांचतंडुलैस्तथा॥ माषैश्चैवाथमुद्गैश्चप्रियंगुभिश्चवापुनः॥ ८७॥ अथवासप्तधान्यैश्चपूजयेत्परमेश्वरं॥ पुष्पैश्चप्रथमंपूज्यजातिजैःप्रतियामकं॥ ८८॥ शंखीपुष्पैस्तथापश्चात्चंपकैर्वाविधायच॥ एवंकृत्वानरेणैवरुद्रस्यहितमिच्छता॥ ८९॥ पूर्वोक्तैर्मंत्रवर्गैश्चनामभिर्वाविशेषतः॥ संपूज्यशंकरंदेवंधूपंदीपंक्रमेणच॥९०॥ नैवेद्यंतत्रदद्याद्वैमाधुर्यैर्विविधैरपि॥आमान्नेनाथवातत्रतोषयेच्चसदाशिवम्॥ ९१॥ अर्घ्यंदद्यात्कदल्याश्चफलेनैवाथवाहरे॥ विविधैश्चफलैस्तत्रदद्यादर्घ्यंशिवायच॥ ९२॥

॥ ८३ ॥ ८४ ॥ ८५ ॥ पूर्वतः ॥ तृतीययामतः ॥ ८६ ॥ प्रियंगुभिःराळेइतिख्यातैर्धान्यविशेषैः ॥ सप्तधान्यैःतंडुलादिभिः प्रथममिति ॥ ८७॥ जातिजैःमालतीसमुद्भवैःपुष्पैःप्रतियामपूजासुप्रथमंसंपूज्येत्यर्थः ॥ ८८ ॥ शंखीपुष्पैःशंखाकारपुष्पविशेषैः ॥ हितमिति ॥ हितमिच्छतानरेणरुद्रस्यमंत्रवर्गैःशंकरंसंपूज्येत्यन्वयः ॥८९ ॥ नामभिःपूर्वोक्तैर्भवादिभिः ॥ ९० ॥ ९१ ॥९२ ॥

पूर्वतःचतुर्थयामादस्मात् ॥ ९३ ॥ ९४ ॥ ९५ ॥ सर्वभावेनसर्वात्मना ॥ ९६ ॥ प्रहरसंख्ययाप्रतियामसंकल्पितसंख्यानुसारेणेत्यर्थः ॥ ९७ ॥ ९८ ॥ मंत्रानाह ॥ तावकइति ॥ ९९ ॥ जपपूजादिकमिति ॥ कृतमितिशेषः १००॥१॥२ ॥३ ॥ तान्ब्राह्मणान्शंकरायेति ॥ शंकरायपूर्वंनत्वापश्चाच्छिवंशंकरं

नमस्कारंततोध्यानंकृत्वाजाप्यंसमाचरेत् ॥ पूर्वतोद्विगुणंतत्रकुर्याज्जाप्यंनरोत्तमः॥९३॥ नमस्कारंततश्चैवसंकल्पंपूर्ववत्तथा॥ गीतवाद्यंपुनश्चैवयावत्स्यादरुणोदयः॥ ९४ ॥ उदयेचतथाजातेसंप्रार्थ्यशंकरंपुनः ॥ स्नात्वापूजांपुनःकृत्वानानापुष्पाक्षतैरपि॥९५॥नानाधूपार्घ्यनैवेद्यैरभिषेकोयथाभवेत्॥ सर्वभावेनसंपूज्यतोषयेच्छंकरंमुदा॥९६॥ नानाविधानिदानानिभोज्यंचविविधंतदा॥ ब्राह्मणानांयतीनांचकर्तव्यंप्रहरसंख्यया॥ ९७॥ शंकरायमनस्कृत्यस्तुतिंनानाविधांतदा॥पुष्पांजलिंतदातत्रमंत्रैरेतैःसुरोत्तम ॥ ९८॥ दद्यादात्महितार्थायशिवायपरमात्मने॥ तावकस्त्वद्गतप्राणस्त्वच्चितोहंसदाम्टड॥९९॥कृपानिधइतिज्ञात्वायथायोग्यंतथाकुरु ॥ अज्ञानाद्यदिवाज्ञानात्जपपूजादिकंमया ॥ १०० ॥ कृपानिधइतिज्ञात्वाभूतनाथप्रसीदमे॥ अनेनैवोपचारेणयज्जातंफलमेवच॥१॥ तेनैवप्रीयतांदेवःशंकरःसुखदायकः॥ अनेनैवचपुष्पाणामंजलिनाप्रभोमम ॥ २ ॥न्यूनंसंपूर्णतांयातुव्रतंचैवमहेश्वर॥ पुष्पांजलिंसमर्प्यैवंतिलकाशिषमेवच॥ ३ ॥गृह्णीयाद्ब्राह्मणेभ्यश्चनत्वातान्शंकरायच॥ विसर्जयेच्छिवंपश्चात्पुनरागमनायच ॥ ४॥ ममकुलेदेवदेवभजनंतेस्तुसर्वदा॥मानसान्ममदेवेशदूरंनैवकदाचन॥५॥ अहर्निशंक्षणंवापिविनाचस्मरणंतव ॥ श्वसनंनभवेद्देवदूरंनैवकदाचन॥ ६॥इत्येवंचनमस्कृत्यविसृज्यशंकरंमुदा॥ ब्रह्मभोज्यंतदाकृत्वासर्वपापक्षयोभवेत्॥ ७॥ एवंव्रतंकृतंयेनतस्माद्दूरेहरोनहि॥ फलंवक्तुंनशक्येतवर्षाणामयुतैरपि॥८॥ अनादरतयाचेद्वैकृतंव्रतमनुत्तमं॥तस्यैवमुक्तिबीजंचजातंनात्रविचारणा॥ ९ ॥ व्रतमेतत्प्रतिमासंकर्तव्यमृषिसत्तमाः॥ उद्यापनविधिंपश्चात्कृत्वासांगंविधिनयत्॥ ११० ॥

विसर्जयेदितिसंबंधः ॥ ४ ॥ तत्रनमस्कारमंत्रावाह ॥ ममेति ॥ ५॥ ६ ॥ ७ ॥८ ॥ ९ ॥ प्रतिमासमिति ॥ एतद्व्रतंप्रतिमासंकृष्णचतुर्दश्यांकर्तव्यमित्यर्थः ॥ निर्णयसिंधावपिप्रतिमासंकृष्णचतुर्दश्यामपि ॥ सर्वकामप्रदंकृष्णचतुर्दश्यांशिवव्रतमित्युपक्रम्य चतुर्दशाब्दंकर्तव्यंशिवरात्रिव्रतंशुभमितिहेमाद्रौकालोत्तरे शिवरात्रिशब्दप्रयोगात्कौंडपायिनामयनाग्निहोत्रेनैत्यकाग्निहोत्रधर्मादिवतद्धर्मप्राप्तिःस्यादेवेत्युक्तं ॥ ११० ॥

शिवरात्रिव्रतस्यास्यसंपूर्णफलसिद्धये ॥ उद्यापनविधिःसांगस्त्रिसप्ततितमेस्थितः ॥ १ ॥ पूर्वाध्यायांतेप्रतिमासंकर्तव्यमित्युक्तंतद्विधिंव्रतंसोद्यापनंपृच्छंति

व्रतस्यकरणान्नूनंशंकरःसर्वदुःखहा॥ भुक्तिदत्वाचमुक्तिंचददतेनात्रसंशयः॥ ११॥ इतिव्रतफलंश्रुत्वादेवाविष्णुमुखास्तदा॥ आनंदंपरमंप्राप्यस्वंस्वंधामययुस्तदा॥ १२॥ इतिश्रीशिवमहापुराणेशिवरात्रिमहिमनिरूपणंनामद्विसप्ततितमोऽध्यायः॥ ७२॥ ॥ ७॥ ॥ ऋषयऊचुः॥ ॥ उद्यापनविधिंब्रूहिशिवरात्रिव्रतस्यह॥ यत्कृत्वाशंकरःसाक्षात्प्रसन्नोभवतिध्रुवं॥ १॥ इतितेषांवचःश्रुत्वासूतोवचनमाददे॥ सूतउवाच॥ श्रूयतामृषयःश्रेष्ठाविधिंवच्मियथाश्रुतं ॥ २॥ शिवरात्रिदिनेप्राप्तेनित्यंसंपाद्यवैतदा॥ शिवालयंततोगत्वापूजांकृत्वायथाविधि॥ ३॥ गृह्णीयान्नियमंतत्रव्रतस्यविधिवन्नरः॥ रात्रौजागरणंकृत्वापूजांयामचतुष्टये ॥ ४॥ लिंगेचपार्थिवेवापिकृत्वाचविधिपूर्वकं ॥ प्रातःकालेसमुत्थायसंकल्पंशिवसन्निधौ॥ ५॥ कुर्याच्छिवप्रसादाच्चकरिष्येव्रतमुत्तमं॥ प्रतिमासंचकर्तव्यंमयादेवत्वदाज्ञया॥ ६॥ निर्विघ्नेनव्रतंह्येतत्जायतांकृपयातव॥ इतिशिवालयेनियमंकृत्वाभोज्यादिकंचरेत्॥ ७॥ विप्राशिषंततोगृह्यनियमंपरिसमाप्यच॥ पश्चाच्चतुर्दशींप्राप्यकृष्णपक्षसमुद्भवां ॥ ८॥ प्रातःकालेसमुत्थायतीर्थादौवागृहेपुनः॥ स्नानादिसर्वनित्यंचसमाप्यनियमंचरेत्॥ ९॥ शिवस्यसन्निधिंगत्वापूजांकृत्वायथाविधि॥ अद्यव्रतंमयादेवकर्तव्यंचतवाज्ञया ॥ १०॥ निराहारतयादेवनिर्जलंविधिवत्प्रभो ॥ कर्तुमिच्छाभवेदद्यधैर्यंरक्षममप्रभो ॥ ११॥ नमस्कृत्यतदाशंभुंकामक्रोधविवर्जितः॥ दिनंनीत्वातथारात्रौपूजांयामसमुद्भवां॥ १२॥ कृत्वाजागरणंतत्रप्रातःकालावधिस्वयं॥ जपंमंत्रवरेणैवगीतंनृत्यंतथापुनः॥ १३॥

उद्यापनविधिमिति ॥ १॥ तेषामृषीणां ॥ २॥ नित्यंप्रातःस्नानसंध्यादिकंकर्मसंपाद्यकृत्वा ॥ ३॥ ४॥ प्रातःकालइति ॥ पारणादिनेप्रातःकालेइतिज्ञेयं ॥ ५॥ संकल्पप्रकारमाह ॥ शिवेति ॥ ६॥ ७॥ पश्चात्फाल्गुनादिमासेषु ॥ ८॥ ९॥ १०॥ ११॥ १२॥ मंत्रवरेणगुरूपदिष्टेन ॥ १३॥

न्यासिनंयति ॥ १४ ॥ १५ ॥ अतःपरमुद्यापनविधिमाह ॥ यावदिति ॥ शिवरात्रिर्महाशिवरात्रिः ॥ १६ ॥ शास्त्रादौ ॥ शैवशास्त्रादौपरिशोध्यपर्यालो
च्यतत्रैवशास्त्रादावेवयत्कर्तव्यमुक्तंतदाचार्येणकारयेदित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ मंडलसमाख्यामाह ॥ गौरीति ॥ तत्रमंडलेप्रकर्तव्याःस्थापनीयाः

कृत्वापुनस्तदास्नात्वापूजांचैवशिवस्यच॥ विधायब्रह्मभोज्यंचभोजयेन्यासिनंतदा ॥ १४ ॥ अशक्त्यैकंतदाभोज्यंस्वयं
भोज्यंततःपरं॥ तदाशिषंतदागृह्यनानाकार्यंसमाचरेत्॥ १५ ॥ एवंचप्रतिमासंचकृत्वाचव्रतमुत्तमम्॥ यावच्चशिवरा
त्रिर्वैपुनरायातिसत्तम ॥ १६ ॥ तस्मिन्दिनेस्वयंकार्यंउद्यापनविधिंचरेत्॥ ब्राह्मणांश्चतदापृष्ट्वाशास्त्रादौपरिशोध्यच
॥१७॥ कर्तव्यंयच्चतत्रैवसयथाकारयेत्स्वयं॥ तदहंकथयाम्यद्यविधानंविधिपूर्वकं॥१८॥ उद्यापनदिनेचैवकर्तव्यंश्रूयतां
पुनः॥ प्रातर्नित्यंतुसंपाद्यमंडलंतत्रकारयेत्॥ १९॥ गौरीतिलकनाम्नावैप्रसिद्धंभुवनत्रये॥ कुंभास्तत्रप्रकर्तव्याःप्राजा
पत्यविसंख्यया॥ २० ॥ सवस्त्राःसफलास्तत्रदक्षिणासहिताःशुभाः॥ मंडलस्यचपार्श्वेवैमोचनीयाःप्रयत्नतः ॥ २१ ॥ म
ध्येचैकंचसंस्थाप्यतत्रोमासहितंशिवं॥ दीपंचदक्षिणेभागेकृत्वारात्रौप्रपूजयेत्॥ २२॥ जागरणंतदाकृत्वापूजांयामो
द्भवांनरः॥ रात्रिमाक्रामयेत्तत्रनृत्यगीतादिनाव्रती॥ २३॥ संपूज्यविधिवद्देवंवेदोक्तविधिनादिवा॥ संतोष्यप्रातरेवंच
पुनःपूजातदाभवेत्॥ २४॥ ऋषिभिश्चसमान्वित्तान्ब्राह्मणान्वेदपारगान्॥यज्ञोपवीतवस्त्रैश्चउपानद्युगलेनच॥२५॥
स्वर्णमुद्रास्वलंकारैर्दत्वाहोमंचकारयेत्॥ घृतेनपायसेनाथमंत्रैश्चरुद्रसंभवैः॥ २६॥ प्रारंभेचव्रतीहोमंनवग्रहपुरःसरं॥
तिलांश्चयवसंमिश्रान्आज्येनचपरिप्लुतान्॥ २७॥ जुहुयाच्छिवमंत्रैणशिवायाश्चततःपरं॥ सौवर्णीरुद्रमूर्तिंचरौप्यां
गौरींतथैवच॥२८॥शय्यांचतूलिकांचैवसप्तधान्यसमन्वितां॥ गोदानंचप्रदातव्यंब्राह्मणायव्रताप्तये॥२९॥ एवंसमाप्य
होमंतुतत्राचार्यंप्रपूजयेत्॥ अर्घपुष्पप्रदानैश्चवस्त्रालंकारभूषणैः॥ ३०॥ भक्त्याचदक्षिणादेयाब्राह्मणेभ्योविशेषतः॥
धेनुंसदक्षिणांदद्यात्सुशीलांचपयस्विनीं ॥ ३१॥ सुवर्णशृंगींरौप्यखुरांकारयेद्दोहनसंयुतां॥ रत्नपुच्छांवस्त्रयुतांताम्रपृ
ष्ठीमलंकृतां॥ ३२॥ सुवर्णेनसमोपेतांआचार्यायचसाधवे॥ ब्राह्मणान्भोजयेच्चैवघृतपायसशर्करैः॥ ३३॥

प्राजापत्येति ॥ द्वादशसंख्ययेत्यर्थः ॥ २० ॥ मोचनीयाःस्थापनीयाः ॥२१ ॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥ ३० ॥३१ ॥ ३२ ॥ ३३ ॥

दानानिचविचित्राणिकुर्यात्तत्रशिवाज्ञया॥ यथाशक्तिविधानंचप्राजापत्यविधिंचरेत् ॥ ३४॥ ब्राह्मणान्भोजयित्वा तुशिवायफलमर्पयेत्॥ देवदेवमहादेवशंभोशंकरवैहर ॥ ३५ ॥ व्रतेनानेनदेवेशकृपांकुरुममोपरि ॥ ममशक्त्यनुसारेण व्रतमेतत्कृतंशिव ॥३६॥ अज्ञानाद्यदिवाज्ञानाज्जपपूजादिकंमया॥ कृतंतदस्तुसुफलंकृपयातवशंकर॥३७॥ एवंपुष्पांज लिंदत्वाशिवायपरमात्मने॥ नमस्कारंततःकृत्वाप्रार्थनांपुनरेवच ॥३८॥ चरणौचत्वदीयौमेचित्तेदूरंनकर्हिचित्॥ एवंव्र तंकृतंयेनन्यूनंतस्यनकिंचन ॥ ३९ ॥ मनेप्सितांचसिद्धिंवैलभतेनात्रसंशयः ॥ यथाशास्त्रंव्रतंह्येतत्मुक्तिबीजंप्रचक्षते ॥ ४० ॥ अज्ञानात्ज्ञानतोवापिव्रतेनतुष्यतेशिवः॥ एवंयःकुरुतेविप्राःप्राप्नोतिपरमंपदं॥४१॥ कायिकंमानसंवापिवा चिकंयश्चदुष्कृतं॥ तत्सर्वंविलयंयातिव्रतस्यास्यप्रभावतः ॥ ४२ ॥ पुनःस्नानंप्रकर्तव्यममावास्यांद्विजोत्तमाः॥ मध्या ह्नेचप्रदातव्यंपिंडदानंविधायच ॥ ४३ ॥पितॄनुद्दिश्यामावास्यांद्विजभोज्यंसमाचरेत्॥ यदापक्षेभवेत्तृप्तिःपितॄणांयुगसं ख्यया॥ ४४॥ वैष्णवायप्रदातव्यंमिष्टान्नंव्याकृतायच ॥ शास्त्रज्ञायकुलीनायस्वदाराभिरतायच॥ ४५॥क्षुधितस्ययते श्चापिदेयमन्नंजलंतथा ॥पात्रायैवप्रदातव्यंमिष्टान्नंदक्षिणातथा ॥ ४६ ॥ ततोनिरभिपाकान्नंभोक्तव्यंबंधुभिःसह ॥ एवंतेकथितंब्रह्मन्व्रतराजविधिर्मया ॥ ४७॥ तस्मात्सर्वप्रयत्नेनकर्तव्यंफलमीप्सुभिः॥ पठनात्श्रवणाद्वापिसयातिप रमांगतिं॥ ४८॥ इतिश्रीशिवमहापुराणेशिवरात्र्युद्यापनविधिनिरूपणंनामत्रिसप्ततितमोध्यायः॥ ७३॥

मनेप्सितामित्यर्थसंधिरार्षः॥ ४० ॥ ४१ ॥ ४२ ॥ अमावास्याममावास्यायां ॥ ४३ ॥ ४४ ॥ व्याकृतायशिष्टपरीक्षिताय ॥ ४५ ॥ ४६ ॥ निर भिपक्कानंसुरभिपक्कानं ॥ ४७ ॥ ४८ ॥ इतिश्रीशिवमहापुराणेशिवरात्र्युद्यापनविधिनिरूपणंनामत्रिसप्ततितमोध्यायः ॥ ७३ ॥

ॐनमःशिवाय ॥ अज्ञानेनकृतेप्यस्मिन्फलंभवतितत्रच ॥ मृगव्याधेतिहासोयंचतुःसप्ततिसंख्यके ॥ १ ॥ गताइति ॥ वयमितिशेषः ॥ श्रुतइति ॥ अस्मा त्रिरितिशेषः ॥ १ ॥ २ ॥ निषादस्यव्याधविशेषस्य ॥ ३ ॥ क्रूरःआकृत्यादिनातिभयंकरः ॥ हन्यादित्यार्षंहतवानित्यर्थः ॥ ४ ॥ ५ ॥ तेनभिल्लेन ॥ ६ ॥ तत्रवने ॥ ७ ॥ क्षुद्वधर्मैश्चौर्यादिभिरपिभक्ष्यमानीयदेहीतिप्रार्थितः ॥ प्रार्थितःक्षुधयाविष्टैरितिपाठांतरं ॥८॥ ९ ॥ दैवयोगादिति ॥ जन्मांतरीयसुकृतपरि

ऋषयऊचुः ॥ सूततेवचनंश्रुत्वाह्यानंदंपरमंगताः ॥ प्रभावश्चव्रतस्याऽस्यश्रुतोविस्तरशःपुनः ॥ १ ॥ कथयत्वंमहाबाहो केनैवफलमुत्तमम् ॥ अज्ञानतश्चकृत्वाहिप्राप्तंकिंचवदाऽधुना ॥ २ ॥ सूतउवाच ॥ श्रूयतामृषयःश्रेष्ठाःकथयामिपुरातन म् ॥ इतिहासंनिषादस्यसर्वपापप्रणाशनम् ॥ ३ ॥ पुराकश्चिद्वनेभिल्लोह्यासीन्नाम्नारुरुद्रुहः ॥ कुटुंबीबलवान्क्रूरःक्रूरकर्म परायणः ॥ ४ ॥ निरंतरंवनेगत्वामृगान्हन्यादनेकशः ॥ चौर्यंचविविधंतत्रकरोतिसवनेचरः ॥ ५ ॥ बाल्यादारभ्यतनेहशु भंकृतंनकिंचन ॥ महान्कालोव्यतीयायवनेतस्यदुरात्मनः ॥ ६ ॥ कदाचिच्छिवरात्रिश्चह्यासीत्तत्रसुशोभना ॥ नदुरात्मा सजानातिमहाव्रतमनुत्तमम् ॥ ७ ॥ एतस्मिन्दिवसेभिल्लोमात्रापित्राप्रियातथा ॥ प्रार्थितःक्षुद्वधर्मैश्चभक्ष्यंदेहिवने चर ॥ ८ ॥ इतिसंप्रार्थितःसोवैधनुरादायसत्वरम् ॥ जगाममृगहिंसार्थंबभ्रामसकलंवनं ॥ ९ ॥ दैवयोगात्तदातेननप्राप्तं किंचिदेवहि ॥ अस्तंप्राप्तस्तदासूर्यःसवैदुःखमुपागतः ॥ १० ॥ किंकर्तव्यंक्वगंतव्यंनप्राप्तंवेतनंमया ॥ बालाश्चतेगृहेयेवैपि त्रोश्चकिंभविष्यति ॥ ११ ॥ मदीयंचकलत्रंचतस्यकिंतुभविष्यति ॥ किंचिद्गृहीत्वाचमयागंतव्यंचतथाव्रजे ॥ १२ ॥ इति विचार्यतत्रैवजलाशयसमीपगः ॥ जलावतरणंयत्रतत्रगत्वास्वयंस्थितः ॥ १३ ॥ अवश्यमत्रकश्चिद्वैजीवश्चैवागमिष्य ति ॥ इतिमत्वातदावृक्षमेकंबिल्वंतिसंज्ञितम् ॥ १४ ॥ समारुह्यस्थितस्तत्रजलमादायवैतदा ॥ रात्रौतत्रतदास्थित्वा दृष्टिंबद्ध्वातुसत्वके ॥ १५ ॥

पाकवशादित्यर्थः ॥ नन्वेवंसतिकथंतस्यहिंसायांप्रवृत्तिर्जातेतिचेदुच्यते ॥ मात्रादितृप्त्यर्थंप्रवृत्तस्यदोषाभावात् ॥ यथोक्तंस्मृतिकारैः ॥ वृद्धौचमातापि तरौसाध्वीभार्यासुतःशिशुः ॥ अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीदिति ॥ १० ॥ वेतनंभक्ष्यं ॥ बालाइति ॥ क्षुधिताइतिशेषः ॥ पित्रोःमातापित्रोः ॥ ११ ॥ व्रजेगृहे ॥ १२ ॥ जलावतरणंजलस्यावतारोघट्टादिमार्गः ॥ ॥ १३ ॥ अत्रेति ॥ जलसमीपइत्यर्थः ॥ पिपासयेत्यवश्यपदेनव्यज्यते ॥ १४ ॥ तत्र बिल्ववृक्षे ॥ जलमिति ॥ भक्ष्याभावात्पानमात्रार्थंकेवलंजलंगृहीत्वेत्यर्थः ॥ सत्वकेक्षुद्रप्राणिनिमृगादौ ॥ १५ ॥

॥ १६॥१७॥ उत्फालंभीतिजनिताक्रोशं ॥१८॥ तस्यव्याधस्य ॥ तत्रबिल्ववृक्षाधोभागे ॥१९॥ज्वलितंदग्धं ॥२० ॥२१॥२२॥२३॥२४ ॥ आदियुगानुरूपसात्विकभावेनैवपरोपकरणेप्रयतमानाम्रगीप्रोवाचेत्याह ॥ मन्मांसेनेति ॥ २५ ॥ उपकारकरस्यसत्पात्रेषुविद्याजीविकाप्रदानादिनापरोपकरणशीलस्य इहस्वमांसेनपरक्षुन्निवृत्तिकरणे॥२६॥ भगिनीमिति ॥ स्वामिनेपत्येस्वभगिनींचकाराच्छिशून्विधिवत्धर्मशास्त्रानुसारेणसमर्प्यागमिष्यामीत्यन्वयः॥२७॥

कदायास्यतिकश्चिद्वैकदाहन्यामहंपुनः॥ इतिबुद्धिंसमास्थायस्थितोसौक्षुधयायुतः ॥ १६ ॥ दिवसेचोपवासश्चनप्राप्तं वेतनंतदा॥ प्रथमेचैवयामेचम्रगीत्वेकासमागता॥ १७॥तृषार्ताचकितासावैत्युत्फालंकुर्वतीतदा॥ तांदृष्ट्वाचतदातेन शरोधनुषिसंदधे॥ १८॥ तस्यैवंकुर्वतस्तत्रजलंबिल्वदलानिच॥ पतितानिह्यधस्तत्रशिवलिंगमभूद्बुधाः॥ १९॥ याम स्यप्रथमस्यैवपूजाजाताशिवस्यच ॥ तन्महिम्नाचतस्यैवपातकंज्वलितंतदा॥ २०॥ तत्रत्यंचैवतच्छब्दंश्रुत्वासाहरिणी भिया ॥ व्याकुलाव्याधकंदृष्ट्वाहाबाणेनवधिष्यति ॥ २१ ॥ किंकरोमिक्वगच्छामिउपायंरचयाम्यहम् ॥ इतिविचार्य सातत्रवचनंचदमब्रवीत्॥ २२ ॥ म्रग्युवाच॥ किंकर्तुमिच्छसिव्याधश्रुत्वाव्याधोऽब्रवीदिदम् ॥ व्याधउवाच ॥ कुटुंबं क्षुधितंमेऽद्यहत्वात्वांतर्पयाम्यहम्॥ २३ ॥ दारुणंतद्वचःश्रुत्वाद्दुर्धरंतंवनेचरम् ॥ तच्छ्रुत्वासाम्रगीदृष्टाधन्याऽहंव्याधस त्तम॥२४॥ म्रग्युवाच॥ मन्मांसेनसुखंस्याद्वैदेहस्यानर्थकारिणः॥ उपकारकरस्यैवयत्पुण्यंजायतेत्विह॥ २५॥ तत्पुण्यं शक्यतेनैववक्तुंवर्षशतैरपि॥ असारस्यशरीरस्यसाफल्यंमेभविष्यति॥२६॥ परंतुशिशवोमेऽद्यवर्ततेह्याश्रमेमम ॥ भ गिनींचसमर्प्यैवस्वामिनेविधिवत्तदा॥२७॥ आयास्येचपुनर्मांसात्तृप्तिस्तेसर्वथाशुभा॥ इत्युक्तोपितदाव्याधोनमेनेव चनंततः॥२८॥ संकटेसमनुप्राप्तेसर्वेमिथ्याभिशंसिनः॥ इत्येवंवचनंश्रुत्वाम्रग्याहवचनंपुनः॥२९॥ सत्येनसर्वथादेवाः सत्येनैवसमुद्रकाः॥ सत्येनजलधाराश्चसत्येसर्वंप्रतिष्ठितम्॥३० ॥ नममिथ्यावचस्त्वंचजानीहिपशुघातक॥ इत्युक्तेऽ पिनमेनेतद्वचनंपुनरब्रवीत्॥३१॥श्रृणुव्याधप्रवक्ष्यामिपापंमेशिरसिभवेत्॥ यद्यहंनाऽऽगमेत्यत्रएतेषांपातकंमम॥३२॥

॥२८॥प्राणरक्षणार्थमियंमिथ्यावदतीतिमत्वाव्याधआह॥संकटइति॥२९॥सत्येनेति॥देवावाय्वादयःसत्येनप्रवर्तंतेस्वस्वकार्येतथाचतैत्तिरीयमहोपनिषदि॥ सत्येनवायुरावातिसत्येनादित्योरोचतेदिविसत्यंवाचःप्रतिष्ठासत्येसर्वंप्रतिष्ठितंतस्मात्सत्यंपरमंवदंतीति ॥सत्येनपृथिवीदेवीतिपाठांतरं॥तत्रपृथिव्याःसर्वंसहत्वादिनासत्यं ॥ समुद्राणांमर्यादापालनेन ॥ पर्जन्यंजलधाराणांचप्रायःकालेपतनेनेतिबोद्धव्यं॥३०॥अब्रवीन्म्रगी॥३१॥एतेषांवक्ष्यमाणब्राह्मणादीनां॥३२॥

यत्पापं ॥ ३३ ॥ द्रोहिणांगुर्वादिद्वेषिणां ॥ क्वचिद्गुरुद्रोहिणियत्पापमितिपाठः॥ ३४ ॥अनेकानिशपथानि ॥३५॥३६॥ गतइति व्याधादीनांजागरणमभू
दित्यर्थः ॥३७॥३८॥ पूर्ववदिति ॥ बाणकर्षणचेष्टावशेनेत्यर्थः महात्मनःशिवस्य॥३९॥तंव्याधं ॥ पूर्ववदिति ॥ मातापित्रादिक्षुन्निवृत्तिफलकंहननंकथि
तमित्यर्थः॥४०॥सापितथैवाह ॥ धन्येति॥४१॥४२॥पुनर्व्याधआह॥तवेति पुनःसाह ॥ शृण्विति॥४३॥विचलिताः ॥ सत्यादपेताः॥ सुकृतंप्रागर्जितंस्वपुण्यं

ब्राह्मणोवेदविक्रेतासंध्याहिनस्त्रिकालकम् ॥ स्त्रियाश्चस्वामिनोत्याज्ञांसमुल्लंघ्यभवेच्चयत् ॥ ३३ ॥ कृतघ्नेचैवयत्पापं
यत्पापंविमुखेहरेः ॥ द्रोहिणांचैवयत्पापंयत्पापंधर्मलंघने ॥ ३४ ॥ तेनपापेनलिप्यामियद्यहंनागमेपुनः ॥ इत्यादीनि
ह्यनेकानिकृत्वामृगीस्थितातदा ॥ ३५॥ व्याधोऽपिचस्वयंतत्रगच्छशीघ्रंवचोऽब्रवीत् ॥ मृगीहृष्टाजलंपीत्वागताच्या
श्रममंडलम्॥ ३६॥ तावच्चप्रथमोयामोगतोनिद्रांविनाशुभाः॥ तदीयाभगिनीयावैमृगीचपरिभाविता॥ ३७॥ त
स्यामार्गंविचिन्वंतीत्याजगामजलार्थिनी॥ तांदृष्ट्वातुस्वयंभिल्लश्चक्रेबाणस्यकर्षणम् ॥ ३८॥ पूर्ववज्जलपत्राणिपति
तानिशिवोपरि॥ यामस्यद्वितीयस्यैवपूजाजातामहात्मनः॥ ३९॥ सामृग्यपिचतंदृष्ट्वाकिंकरोषिवनेचर ॥ पूर्ववत्कथि
तंतेनश्रुत्वाहर्षसमन्विता॥४०॥ धन्याऽहंश्रूयतांश्रेष्ठसफलंदेहधारणम्॥ अनित्येनशरीरेणह्युपकारोभविष्यति॥४१॥
परंतुममबालाश्चगृहेतिष्ठंत्यथाऽर्भकाः॥ भर्त्रेतान्वैसमर्प्यैवत्वागमिष्याम्यहंध्रुवम्॥ ४२ ॥ तवोक्तंचनमन्येऽहंहन्यामि
तिनसंशयः॥ शृणुव्याधप्रवक्ष्यामियद्यहंनागमेपुनः॥ ४३॥ एतेषांपातकंमेऽद्यभवत्वितिनसंशयः॥ वाचोविचलिताय
स्यसुकृतंतेनहारितम्॥ ४४॥ मेदिनीतस्यपापेनकंपतेचमुहुर्मुहुः॥ पतिव्रतांस्त्रियंहित्वाह्यन्यांगच्छतियःपुमान्॥ ४५॥
तत्पापंशिरसिमेऽद्ययद्यहंनागमेपुनः॥ वेदधर्मान्समुल्लंघ्यकल्पितेनपथाव्रजेत्॥४६॥ विष्णुभक्तिसमायुक्तःशिवनिंदां
करोतिह॥ पित्रोःक्षयाहमासाद्यशून्यंचैवाक्रमेदिह ॥ ४७॥ दत्वाचपरितापंचकरोतिवंचनंपुनः ॥ तेनपापेनलिप्यामि
यद्यहंनागमेत्पुनः॥ ४८॥ इत्युक्तश्चतदाव्याधोगच्छत्वंपुनरागमेः॥ सामृगीचजलंपीत्वाहृष्टासाचस्वमाश्रमम्॥ ४९॥

हारितंनाशितं॥४४॥ मेदिनीसत्यपाशेनरक्षितातिष्ठतिध्रुवमितिपाठांतरं॥४५॥कल्पितेनवेदविरुद्धतयाधुनिककृतेनर्विधिनायजेत् ॥ ४६ ॥ कथंतदाह॥विष्णु
भक्तीति॥शून्यमिति॥श्राद्धंविनेत्यर्थः॥इहकर्मभूमौ॥४७॥दत्वेति॥यःपूर्वंपरस्मैपरुषभाषणादिनासंतापंदत्वाउत्पाद्यपुनः पश्चाद्वंचयतीत्यर्थः ॥ ४८ ॥ ४९॥

संमृगस्तयोर्मृग्योःस्वामी॥ ५० ॥५१॥ हर्षकारणमाह ॥ बह्विति मृगशरीरइतिशेषः ॥ पुष्टत्वादितिभावः ॥ अनपायिनीबहुकालपर्यंतं प्रयत्नमिति वधइतिशेषः ॥५२॥ ५३ ॥तदीयंव्याधचेष्टासंबंधिनं ॥५४॥५५॥ परमार्थतःनतुदंभादिना ॥५६॥ तस्येति तस्यजन्मभवेल्लोकेमातुर्भारायकेवलमितिपाठांतरं ॥

जगामतावत्समृगःक्षमृग्यौचिंतयन्गतः॥तावच्चद्वितीयोयामोगतोनिद्रांविनाशुभाः॥५०॥ मृगोपिचमृगींपश्यन्जलमार्गेसमागतः ॥ पुष्टंमृगंचतंदृष्ट्वाहृष्टोवचनमब्रवीत् ॥ ५१ ॥ बहुमांसंचविद्येततृप्तिःस्यादनपायिनी ॥ बाणमाकृष्य भिल्लोऽपिप्रयत्नंकृतवान्पुनः॥ ५२ ॥ तदाचजलयुक्तानिपत्राणिचशिवोपरि॥ तेनैवचतृतीयस्ययामस्यऋषिसत्तमाः ॥५३॥ पूजाजाताशिवस्यैवकृपालुत्वंचपश्यता॥ तदीयंचैवतंशब्दंकिंकरोषिमृगोऽब्रवीत्॥५४॥व्याधोपिवचनंतत्रपूर्ववद्युक्तवान्पुनः ॥ तच्छ्रुत्वाहरिणःसोऽपिहृष्टोवचनमाददे ॥ ५५ ॥ धन्योऽहंपुष्टिमानद्ययेनतृप्तिर्भवादृशाम्॥ यस्यांऽगंनोपकारार्थंगतंवैपरमार्थतः ॥ ५६ ॥ तस्यसर्वंचव्यर्थंवैनाऽत्रकार्याविचारणा ॥ योवैसामार्थ्ययुक्तोऽपिनोपकारंकरोतिच॥ ५७॥ तत्सामर्थ्यंभवेद्व्यर्थंनाऽत्रकार्याविचारणा॥ सम्यग्जातशरीरेणतृप्तिस्तवभविष्यति॥ ५८॥ परंतुबालकांश्चाऽहंसमर्प्यजननींपुनः॥ आश्वास्याप्याथतान्सर्वानागमिष्याम्यहंध्रुवम्॥ ५९॥ इत्युक्तोवैपुनस्तत्रव्याधोवचनमब्रवीत्॥येयेसमागतास्त्वत्रतेतेसर्वेत्वयायथा॥ ६०॥ कथित्वातुगतास्तेवैनाऽऽयांत्यद्यापिवंचितः॥ त्वंचापिसंकटेत्युक्त्वाव्यलीकंचगमिष्यसि॥ ६१ ॥ ममैवजीवनंचाऽद्यभविष्यतिकथंमृग॥ इत्येवंवचनंश्रुत्वामृगोवाक्यमुपाददे ॥ ६२ ॥ शृणुव्याधप्रवक्ष्यामिनाऽनृतंविद्यतेमयि ॥ सत्येनसर्वंब्रह्मांडंतिष्ठतितुचराचरम्॥ ६३॥ यस्यवाणीव्यलीकाहितत्पुण्यंज्वलितंक्षणात् ॥ तथापिमन्यतेनैवप्रतिज्ञांममभिल्लक॥ ६४॥ संध्यायांमैथुनेचैवशिवरात्रिभोजनेकृते ॥ कूटसाक्ष्येन्यासहारेसंध्याहीनेद्विजेऽथवा॥ ६५॥

व्यर्थमिति सामर्थ्यस्यपरोपकारकरणमेवफलमितिभावः ॥ ५७॥५८ ॥ ५९॥ येयइति ॥ मृग्यादयः ॥ ६० ॥ वंचितइति ॥ तैरहमितिशेषः ॥ व्यलीकं विशेषेणमिथ्या ॥ ६१॥ ममेति त्वमपिमिथ्योक्त्वागमिष्यसितदाकुटुंबिनोममापिजीवनंकथंभविष्यतीत्यर्थः ॥ ६२ ॥ ६३ ॥ व्यलीकाअनृता ॥ प्रतिज्ञामवश्यमागमिष्यामीत्येवंरूपां॥ ६४ ॥कूटसाक्ष्येकपटसाक्ष्ये ॥ न्यासहारेनिक्षिप्तद्रव्यापहरणे ॥ ६५ ॥

॥६६॥६७॥६८॥ तेसर्वेंमृगोमृग्यौच ॥ आश्रमेमुन्याश्रमेमृगाणांस्थितिप्रदेशे॥६९॥श्रुतमिति ॥ व्याधसंवादरूपंवृत्तान्तंतैःश्रुतमित्यर्थः ॥ क्लीबत्वमार्षं ॥ननु तिरश्चामपिकथमियत्ज्ञानमतआह सत्यपाशेनेति ॥ सत्ययुगोत्पन्नत्वादितिभावः ॥७०॥७१॥अनाथाइति ॥ त्वांविनेतिशेषः॥७२॥७३॥७४॥मृगवाक्य

शिवहीनंमुखंयस्यनोपकुर्यात्क्षमोऽपिसन् ॥ दिवामैथुनकारीचतस्यैवपातकंचयत् ॥ ६६ ॥ पर्वणिचकलादौचव्रतस्यै वदिनेतथा॥ अभक्ष्यकारकेयच्चतत्पापंशिरसामम ॥ ६७ ॥ यद्यहंनाऽऽगमेत्यत्रवंचयित्वाचत्वांपुनः॥ इतिवचस्तदाश्रु त्वागच्छशीघ्रंसमाव्रज ॥ ६८ ॥ व्याधेनैवंसमुक्तस्तुजलंपीत्वागतोमृगः॥ तेसर्वेंमिलितास्तत्रत्याश्रमेऋषिसत्तमाः ॥६९॥ वृत्तांतंचैवतत्सर्वंश्रुतंचैवपरस्परम्॥ गंतव्यंनिश्चयेनैवसत्यपाशेनयंत्रिताः॥७०॥ आश्वास्यबालकांस्तत्रगंतुमु त्कंठितास्तदा॥ मृगीज्येष्ठाचयातत्रस्वामिनंवाक्यमब्रवीत्॥७१॥ अनाथाबालकाह्यत्रकथंस्थास्यंतिवैमृग॥ प्रथमंच मयातत्रप्रतिज्ञाचकृताप्रभो॥ ७२ ॥ तस्मान्मयाचगंतव्यंभवद्भ्यांस्थीयतांत्विह॥ इतिवचस्तदाश्रुत्वाकनिष्ठावाक्यमब्र वीत्॥ ७३ ॥ अहंचसेवकीवांचगच्छामिस्थीयतांत्वया॥ मृगोपिवचनंश्रुत्वागम्यतेचमयापुनः॥ ७४॥ इतिश्रुत्वावच स्तस्यवैधव्यंजीवितंहिधिक्॥ बालानाश्वास्यतांस्तत्रसमर्प्यसहवासिनः॥७५॥ गतास्तेसर्वएवात्रयत्राऽऽस्तेव्याधसत्त मः॥ प्रतीक्षांक्रियमाणश्चमार्गंचैवनिरीक्षते ॥ ७६ ॥ तावद्गताश्चतेसर्वेसत्यपाशेनयंत्रिताः ॥ तान्दृष्ट्वाहर्षितोव्याधो धनुषिचादधेशरम्॥७७॥बालाअपिचतेसर्वेपित्रोरनुसमागताः॥एतेषांयागतिःस्याद्वैह्यस्माकंसाभवेत्सदा॥ ७८ ॥पुन श्चजलपत्राणिपतितानिशिवोपरि॥ तेनजाताचतुर्थस्यपूजायामस्यवैशुभा॥७९॥ तस्यपापंतदासर्वंभस्मसादभवत्क्ष णात्॥मृगोमृगीभ्यांप्रोवाचशीघ्रंत्वंव्याधसत्तम॥ ८० ॥ अस्माकंसार्थकंदेहंकुरुष्वमांसभक्षणात्॥ इतितेषांवचःश्रुत्वा व्याधोविस्मयमागतः॥ ८१ ॥ शिवपूजाप्रभावेनज्ञानंतस्यसमागतम्॥ धन्याएतेमृगाश्चैयज्ञानहीनाःसुसंमताः॥८२॥

श्रवणेनतद्गमननिश्चयंज्ञात्वामृग्यौयदचिंतयतांतदाह ॥ वैधव्यमिति॥ततस्तेयदकुर्वंस्तदाह॥बालानिति॥सहवासिनःप्रातिवेश्यान् ॥७५॥क्रियमाणःकुर्वाणः मार्गंमृगागमनपथंनिरीक्षतेयावदितिशेषः॥७६॥तान्मृगान्॥७७॥एतेषामस्मत्पित्रादीनां॥७८ ॥७९॥तस्यभिल्लस्यमृगीभ्यांसह॥८०॥८१॥ननुहिंस्रव्याधस्य कथंविस्मयोऽतआह॥शिवेति॥ततोव्याधआह॥धन्याइति॥ज्ञानहीनत्वेनसर्वेषामभिमताअपिस्वदेहार्पणेनपरोपकारेनिरताअतोधन्याएतेमृगाइत्यर्थः॥८२॥

कैमुतिकन्यायेनात्मानंधिक्करोति ॥ मानुष्यमिति ॥ ८३ ॥ पोषितमिति ॥ अद्ययावदितिशेषः ॥ पीडनमिति ॥ कुटुंबस्यजातमितिशेषः ॥ ८४ ॥ कृतंमये तिशेषः ॥८५॥ चिंतयामितत्वतोजानामि ॥८६॥ तेनव्याधेन ॥ ८७ ॥पूजितइति ॥ पूर्वोक्तैर्जलपत्रैरितिभावः ॥ ८८ ॥ ८९॥ ९०॥ मनेप्सितामित्यत्रसं

स्वीयेनैवशरीरेणपरोपकरणेरताः॥ मानुष्यंजन्मसंप्राप्यसाधितंकिंमयाऽधुना॥८३॥परकायंचसंपीड्यशरीरंपोषितं मया॥कुटुंबंपोषितंमेऽद्यपूर्वंचबहुपीडितम्॥८४॥ कृत्वाचपोषितंसर्वंकागतिश्चभविष्यति॥कांकांगतिंगमिष्यामिपात कंजन्मनःकृतम्॥८५ ॥इदानींचिंतयाम्येवधिक्कारोजीवनेमम॥इतिज्ञानसमापन्नोबाणंसंवारयंस्तदा॥८६॥गम्य तांचमृगश्रेष्ठाधन्याःस्थइतिचाऽब्रवीत्॥इत्युक्तेचतदातेनप्रसन्नःशंकरस्तदा॥८७॥ पूजितश्चस्वरूपंहिदर्शयामाससंम तम्॥पंचवक्त्रादिकंयच्चमुनिभिर्ध्यायतेसदा॥ ८८ ॥ तद्रूपंकृपयादेवःकरुणामृतसागरः॥ दर्शयित्वावरंब्रूहिप्रसन्नोऽ स्मिवनेचर॥८९ ॥व्याधोपिशिवरूपश्चजीवन्मुक्तोऽभवत्क्षणात्॥पपातशिवपादाग्रेसर्वंप्राप्तंमयाऽधुना॥ ९० ॥शि वोऽपितंगुहंनामस्थापयित्वावरंव्यदात्॥शृणुव्याधइदानींत्वंभुक्तिंभुंक्ष्वमनेप्सिताम्॥९१॥राजधानींचसंभुंक्ष्ववंश वृद्धिस्तथाशुभा॥ अनपायिनीभवेन्नित्यंश्लाघनीदैवतैरपि॥ ९२ ॥गृहेरामस्तवव्याधसमायास्यत्यसंशयः॥तत्पूजांत स्यभक्तिंचकृत्वायास्यस्यसंशयम्॥९३ ॥मुक्तिंसर्वजनैःसद्भिर्दुर्लभांमुनिसत्तमैः॥ममपूजारतास्तेचवंश्याःस्युर्बलवत्त राः॥ ९४ ॥एतस्मिन्नंतरेतैस्तुशिवस्यदर्शनंकृतम् ॥ सबालास्तेतदामुक्तामृगयोनेर्ययुर्दिवम्॥ ९५॥ विमानंचसमारु ह्यदिव्यदेहंगतास्तदा ॥ शिवदर्शनमात्रेणपाशान्मुक्तादिवंगताः ॥ ९६ ॥ व्याधेश्वरःशिवोजातःपर्वतेत्वर्बुदाचले ॥ व्याधोपितद्दिनान्नूनंभुक्तिंचैवऋषीश्वराः॥९७॥भुक्त्वारामकृपांप्राप्यशिवसायुज्यमागतः॥अज्ञानाच्चव्रतंत्वेतत्कृत्वा सायुज्यतांगतः॥ ९८ ॥

धिरार्थः ॥ ९१ ॥ ९२ ॥ रामोभगवान्दशरथपुत्रः ॥ एवं चरामायणेरामवनगमनसमयेयोगुहःश्रीरामसखोऽभवदित्युक्तंसगुहोऽयमेवेतिभावः ॥ एतेनैतत्कथायाआदियुगीयत्वंस्पष्टमेव॥ रामावतारस्यत्रेतायुगेजात त्वात्॥ ९३ ॥ मुक्तिमितिर्मुक्तियास्यसीत्यन्वयः ॥ ९४ ॥ तैःमृगैः ॥ बालानामपिपित्रनुसारित्वेनधार्मिकत्वात्तत्सहिताइत्यर्थः ॥ ९५ ॥ पाशात्भवबं धनात् ॥ ९६ ॥ व्याधेश्वरइति ॥ व्याधेनपूजितत्वाद्व्याधेश्वरइत्यर्थः ॥ ९७ ॥ रामकृपामिति ॥ रामावतारसमयइतिशेषः ॥ ९८ ॥

तन्मयनांशिवतादात्म्यं ॥९९॥ अत्रइहलोके ॥ १०० ॥ एतेनशिवरात्रिव्रतेनेतिसंबंधः॥१॥२॥इतिश्रीशिवमहापुराणटीकायांसारबोधिन्यांशिवरात्रिकथा निरूपणंनामचतुःसप्ततितमोध्यायः ॥ ७४ ॥ ॥छ॥ ॐनमःशिवाय ॥ एवंवेदनिधिर्विप्रःपापीमुक्तोऽभवत्क्षणात्॥ पंचसप्ततिसंख्येतदध्यायेसंनिरूप्यते॥१॥ तत्कथांतंसंदर्शयति ॥ अवंतीति ॥ अवंतीनगरेउज्जयिन्यांदीक्षितःकृतयज्ञाद्यनुष्ठानः ॥ १ ॥ परिण्णातःपरिपक्वबुद्धिः ॥ विचक्षणःप्रवचनशीलः ॥ तस्यदी

किंपुनर्भक्तिसंपन्नायांतितन्मयतांशुभाम् ॥ विचार्यसर्वशास्त्राणिधर्मांश्चैवाऽप्यनेकशः ॥ ९९ ॥ व्रतानिविविधान्यत्र तीर्थानिविविधान्यथ ॥ दानानिचविचित्राणिविविधानिफलानिच ॥ १०० ॥ एतेनसमतांयांतिशिवरात्रिव्रतेनच ॥ तस्माच्छुभतरंत्वेतत्कर्तव्यंहितमीप्सुभिः॥ १०१ ॥ एतत्सर्वंसमाख्यातंपुनश्चकथयाम्यहम् ॥ इतिहासमृषिश्रेष्ठाव्रतंपापहरंपरम् ॥ २ ॥ ॥इतिश्रीशिवमहापुराणेज्ञानसंहितायांचतुःसप्ततितमोऽध्यायः॥ ७४ ॥ ॥छ॥ ॥सूतउवाच अवंतीनगरेरम्येदीक्षितोऋषिसत्तमाः॥ सत्कुलीनःसदाचारःशुभकर्मपरायणः॥ १ ॥ वेदेषुचैवशास्त्रेषुपरिण्णातोविचक्षणः॥ तस्यभार्याकुलीनाऽऽसीत्पतिधर्मपरायणा॥ २ ॥ आज्ञांचपालयामासभक्तिभावमसन्विता॥ तस्यपुत्रद्वयंत्वासीत्सुनिधिर्वेदनिधिस्तथा॥ ३ ॥ ज्येष्ठश्चैवसुनिधिस्तुमातापितृपरायणः॥ वेदनिधिश्चयःप्रोक्तोवेदशास्त्रविशारदः॥४॥ दुर्व्यसनंचतस्याऽऽसीन्नर्तक्याक्रीडनादिकं ॥ भक्ष्यंभोज्यंचतत्रैवकरोतिसनिरंतरम् ॥ ५ ॥ पित्राज्ञातंनिषिद्धोऽपिनिवृत्तोनतदासुतः॥ मात्राचापितथाभ्रात्राभर्त्सितोपिपुनःपुनः॥६॥ नत्यक्तंव्यसनंतेनपापिष्ठेनदुरात्मना॥ कदाचिद्दीक्षितायैवदत्तंराज्ञास्वलंकृतम्॥ ७ ॥ अंगुल्याभरणंश्रेष्ठंप्रसन्नेनतदास्वयम्॥ दीक्षितेनगृहंगत्वास्त्रियैदत्तंसुगोपितम्॥ ८ ॥

क्षितविप्रस्य ॥ २ ॥ आज्ञामिति ॥ तस्येतिसंबध्यते ॥ पत्युराज्ञामित्यर्थः ॥ एतदेवतस्याःपतिधर्मपरायणत्वमितिभावः ॥ भावःप्रीत्यतिशयः ॥ तस्यविप्रस्य ॥ ३ ॥४॥ तस्यवेदनिधेः ॥ नर्तक्यावेश्ययासह ॥ तत्रैवनर्तकीगृहएव ॥ ५ ॥ पित्रेति ॥ पित्राअज्ञातंप्रच्छन्नंयथास्यात्तथानिषिद्धोनिवारितोपिदुराचारान्ननिवृत्तइत्यर्थः ॥ ६ ॥ तेनवेदनिधिनाम्ना ॥ स्वलंकृतंशोभनहीरकादिरत्नैःखचितमंगुल्याभरणमंगुलीयकमितिसंबंधः ॥ ७ ॥८ ॥

मुक्तंस्थापितं ॥ तेनकुपुत्रेण ॥ ९ ॥ तत्भूषणमंगुलीयकं ॥ १० ॥ तस्यैनर्तक्यै सोपिराजापि ॥ तांनर्तकीं ॥ ११ ॥ अत्याग्रहेति ॥ यद्वासातिनिर्बंधेनपृ ष्टातदातयानर्तक्यायथार्थवेदनिधेःकर्मकथितमित्यर्थः ॥ ततःनर्तक्याःसकाशात्तद्भूषणंवलाद्गृहीत्वास्वकेपार्श्वकेस्थापितमित्यन्वयः ॥ १२ ॥ ततोराज्ञा

स्त्रियामुक्तंगृहेचैवतेनदृष्टंदुरात्मना ॥ हृत्वारात्रौचतच्चैवनर्तक्यैविनिवेदितम् ॥ ९ ॥ कदाचिन्नर्तकीसाचराज्ञेनृत्यंव्यदश र्यत् ॥ तत्तस्मिन्समयेराज्ञादृष्टंचभूषणंशुभम् ॥ १० ॥ राज्ञातस्यैतदापृष्टंकुतोलब्धंत्वयाशुभम् ॥ तयाप्रतारितःसोऽपि भर्त्सयामासतांपुनः ॥ ११ ॥ अत्याग्रहतयापृष्टायथार्थंकथितंतया ॥ बलात्ततोगृहीत्वातुस्थापितंपार्श्वकेस्वके ॥ १२ ॥ प्रातर्विप्रंसमाहूयवलयंदीयतांपुनः ॥ कार्यंचवर्ततेकिंचित्पुनश्चाऽऽनीयतांत्वया ॥ १३ ॥ इत्युक्तश्चद्विजश्चैवगृहमाग त्यतांपुनः ॥ उवाचरेप्रियेदत्तंमयातद्दीयतांत्वया ॥ १४ ॥ तथेतिसावचःश्रुत्वागतामुक्तवतीयतः ॥ सापिगवेषयामासन लब्धंवलयंतदा ॥ १५ ॥ स्वामिनेकथयामासलक्ष्यतेनमयाप्रभो ॥ श्रुत्वादुःखंसमापन्नोराज्ञोऽग्रेतन्निवेदितम् ॥ १६ ॥ नलब्धंतुमयाराजन्किंकरोमिकुतोगतं ॥ तच्छ्रुत्वाचतदाराज्ञासर्वंचविनिवेदितम् ॥ १७ ॥ दुःखितोब्राह्मणःश्रुत्वागृहंग त्वास्त्रियंतदा ॥ भर्त्सयामासपापिष्ठेकुभार्येकिंकृतंत्वया ॥ १८ ॥ उभाभ्यांभर्त्सितःसोऽपिपुत्रगच्छगृहादितः ॥ त्वयाप्रयोज नंनैवत्यस्माकंकुलदूषणं ॥ १९ ॥ निष्कासितश्चपुत्रोवैनाम्नावेदनिधिश्चयः ॥ गतोवहिस्तथासोपिकुत्रचिद्दिनमावहत् ॥ २० ॥ क्षुधितस्तृषितश्चैवनर्तक्यापितिरस्कृतः ॥ रात्रिर्जातायदातत्रक्षुधितस्तृषितस्तदा ॥ २१ ॥ तद्दिनेशिवरात्रिश्च लोकानांपालिनीशुभा ॥ कश्चिदाढ्योबहुविधांपूजामादायसत्वरम् ॥ २२ ॥ नैवेद्यंविविधंगृह्यगतवान्शिवमंदिरम् ॥ तंदृष्ट्वाचतदादृष्टोभक्षयिष्याम्यहंपुनः ॥ २३ ॥ इतिविचार्यतुष्टोपिजगामानुपदंतदा ॥ इतिबुध्यातदायातोदुष्टश्चक्षु धितस्तदा ॥ २४ ॥

यत्कृतंतदाह ॥ प्रातरिति ॥ वलयमंगुलीयकं ॥ १३ ॥ तांभार्यां ॥ १४ ॥ यतःयत्रमुक्तवतीस्थापितवती गवेषयामाससमार्गयामास ॥ १५ ॥ समापन्नोद्वि जः १६ ॥ सर्ववेदनिधेश्चेष्टितं ॥ १७ ॥ १८ ॥ उभाभ्यांद्विजतत्पत्नीभ्यांसोपिवेदनिधिरपिभर्त्सितः ॥ भर्त्सनवाक्यमाह ॥ गच्छेति ॥ कुलदूषणंत्वयाभव तीत्यर्थः ॥ १९ ॥ आवहत् ॥ यापयामास ॥ २० ॥ तिरस्कृतः ॥ अकिंचनत्वादितिभावः ॥ २१ ॥ २२ ॥ तमाढ्यं ॥ दृष्टोवेदनिधिः ॥ २३ ॥ २४ ॥

॥ २५ ॥ यथातथेति॥ चौर्यादिप्रकारेणापीत्यर्थः ॥ २६ ॥ परार्थतइति ॥ परमिष्टंतत्राप्नयइत्यर्थः ॥ अथवापरकृतभयनिवृत्त्यर्थमित्यर्थः ॥ २७ ॥ यामे यामसमाप्तिसमये ॥२८॥२९॥ विच्छायाःकांतिरहिताःदीपकाआसन्नित्यर्थः ॥३०॥ सम्यगिति ॥ प्रकाशाभावादितिभावः॥ प्रकाशनोपायंयमकरोत्तमाह दीपेति ॥ शिरोवेष्टनजंस्ववस्त्रखंडंगृहीत्वाशिवोपरिदीपच्छायादीपप्रकाशोयथाभवत्तथातेनैववस्त्रखंडेनपरार्थतोवस्तुतोन्नलाभायतत्रदीपःप्रकाशितइ

शिवस्यमंदिरंगत्वापूजांलोकजनैःसह॥ददर्शक्षुधयाऽऽविष्टोअन्नभक्षपरायणः ॥ २५ ॥ अद्यैवतेगमिष्यंतिकदान्नंभक्षयाम्यहम्॥ यथातथामयाचान्नंग्रहीतव्यंतथाधुना॥ २६॥ इतिबुद्ध्यातदातेनजागृतंतुपरार्थतः ॥ तेपिलोकास्तदातत्रपूजांयामसमुद्भवाम्॥ २७॥ कृत्वानृत्यंचगीतंचयामेचैवसुनिद्रिताः॥ केचिद्गतागृहेतत्रसुप्ताःकेचनमंदिरे॥२८॥ निद्रितांश्चतदादृष्ट्वाविप्रोवेदनिधिस्तदा॥ अन्नंनिवेदितंतत्रपक्वान्नंविविधंतथा॥२९॥ जगृहीपुस्तदातत्रसमीपेतुशिवस्यच॥शनैःशनैःसमागच्छद्विच्छायादीपकास्तदा॥३०॥सम्यगन्नंनदृश्येतदीपच्छायाशिवोपरि॥ तेनैववस्त्रखंडंहिशिरोवेष्टनजंतदा॥ ३१ ॥दीपश्चरोचितस्तत्रत्यन्नार्थेनपरार्थतः॥ अंधकारःशिवेयोवैदूरीभूतस्तदाशुभः॥ ३२ ॥ संदीप्यदीपकतत्रत्यन्नंदृष्टंसुसुंदरम्॥ सर्वंचैवगृहीत्वाऽथशनैःशनैरुपागमत् ॥ ३३ ॥शयानेषुपदास्पृष्टाविव्हलाव्युत्थितास्तदा॥ कोऽयंकोयंद्रुवंतश्चचौरोऽयमितिचाऽपरे॥३४॥ तेषांतद्वचनंश्रुत्वाभीतोविप्रःपलायितः॥ तेऽपिपश्चाद्गतास्तत्रराज्ञश्चसेवकास्तदा॥ ३५॥ पलायमानंतंदृष्ट्वाबाणांश्चप्राक्षिपंस्तदा॥ बाणास्तंचतदालग्नास्तस्मात्सोऽपिपपातह॥ ३६॥ पतितश्चमृतःसोवैश्रूयतामृषिसत्तमाः॥ अज्ञानतोव्रतंजातंरात्रौजागरणंतथा॥ ३७ ॥ कृपालुत्वाच्छिवस्यैवसर्वंजातंसुशोभनम्॥ तस्मिंश्चसमयेप्राप्तादूतावैवस्वतस्यह॥ ३८॥ शंकरस्यगणास्तत्रत्याजग्मुर्बलवत्तराः॥ उभयेषांतदावादःसमजायतवैभृशम्॥ ३९॥

त्यर्थः ॥ ३१ ॥ परंतुशिवरात्रिप्रभावात्तत्कृत्यंशुभसूचकमेवाभवदित्याह ॥ अंधकारइति ॥ तदायोवैशिवेंधकारोदूरीभूतःसशुभोऽभवदित्यर्थः ॥ ३२ ॥ शनैरिति ॥ कोपिजानीयादितिभयादितिभावः ॥ ३३ ॥ पदास्पृष्टाःपादेनाहताः ॥ अपरेदूरेस्थिताजनाः ॥ ३४ ॥ विप्रःवेदनिधिः ॥ ३५ ॥ ३६ ॥ अज्ञानकृतस्यापिव्रतस्यप्रभावमाह ॥ श्रूयतामिति ॥ ३७ ॥ सर्ववेदनिधिकृतंकर्म ॥ वैवस्वतस्ययमस्यहेत्यद्भुते ॥ ३८ ॥ वादःवाक्कलहः॥३९॥

॥४०॥तेचयमगणाःपापंतत्कृतंचौर्यादिकं।पुण्यंतुअज्ञानकृतत्वादल्पं॥४१॥ अणुमात्रमप्येतन्नाभ्युदयमात्रफलकमपितुसर्वदुरितनिरसनद्वारानिःश्रेयसफल कमपीत्याहुःशिवगणाः॥ पापमिति॥४२॥ तिष्ठेदितिनैवतिष्ठेदित्यर्थः॥ अतएवनिश्चयेनाहुः॥ गतमिति॥ धर्मराजंयमं॥४३॥ तानिति॥ तान्शिवगणा न्प्रतिअसौयमोनमस्कारंकृत्वाब्राह्मणंकालिंगाधिपतिकलिंगदेशाधिपतिंचकारेत्यन्वयः॥ ४४॥ प्रणम्येति॥ यमस्तंप्रणम्यभाग्यवानसीत्युक्तवानित्यर्थः॥ ब्राह्मणोयथाभ्युदयंमुक्तिंचलेभेतदाह ॥ कालिंगेति ॥ ४५ ॥ तदालयेशिवालये ॥ ४६ ॥ कैमुत्येनाह॥ पश्यंत्विति॥ अनायासेनवाअनायासेनापि

गणाःशिवस्ययेतत्रवचनंचेदमब्रुवन्॥ कथंसमागतायूयंदंडेनाघटिताइति ॥ ४० ॥ तेचोचुर्भगवद्भक्तायूयंकिंचसमा गताः॥ यमगणाऊचुः॥ जन्मप्रभृतिपापंचपुण्यंतुत्वणुमात्रकम्॥४१॥ शिवगणाऊचुः॥ पापंबहुतरंचाऽऽसीद्भस्म सादभवत्क्षणात्॥ शिवस्यचव्रतेनैवरात्रौजागरणेनच ॥४२॥ अद्यापिपातकंतिष्ठेद्गतंसर्वंदुरासदाः॥ इत्येवंविवदंत श्चधर्मराजंगतास्तदा॥४३॥ यमेनोक्तंचसत्यंवैपापंचभस्मतांगतम्॥ नमस्कारंचतान्कृत्वाकलिंगाधिपतिंतदा॥४४ ब्राह्मणंचचकारासौप्रणम्यभाग्यवानसि॥ कलिंगाधिपतिर्भूत्वाशिवपूजापरायणः॥ ४५॥ शिवपूजापरोनित्यंशिव रात्रिव्रतेपरः॥ स्वराज्येशिवपूजांचदीपांश्चैवतदालये ॥ ४६ ॥ कारयित्वातदामुक्तिंलेभेचऋषिसत्तमाः॥ पश्यंतुव्रत माहात्म्यमनायासेनवाकृतम्॥४७॥ येपुनःपरयाभक्त्याकुर्वंतिव्रतमुत्तमम्॥ तेलभंतेपरांमुक्तिंकिंतत्रविस्मयःपुनः ॥ ४८॥ चौर्यार्थेनसुबुद्ध्याचदीपंतुकृतवान्नहि॥ ज्ञात्वादीपंचयेकुर्युर्लभंतेतेशुभंपदम्॥४९॥ एतस्मात्कारणाच्छ्रेष्ठा व्रतंत्वेतादृशंनहि॥ शिवात्परोदयालुर्नपावनोनपरःस्मृतः॥५०॥ एतद्वश्चसमाख्यातंयत्पृष्टोऽहमृषीश्वराः॥ यच्छ्रुत्वासर्व पापेभ्योमुच्यतेमानवःक्षणात्॥५१॥ अतःपरंतुनास्त्येवमुक्तिस्यादनपायिनी॥ शिवएवपरोदेवःशिवएवपरंपदम्॥५२

॥४७॥४८॥ चौर्येति॥ चौर्यप्रयोजनेनैवदीपंकृतवान्प्रकाशितवान्नतुभक्त्यादियुक्तयाशोभनबुध्येत्यर्थः॥ ४९॥ भोश्रेष्ठामुनयः॥ एतादृशंशिवरात्रि व्रतसमं॥ तत्रहेतुमाह॥शिवादिति ॥ दयालुरित्यनेनभक्ताभ्युदयकारित्वं पावनइत्यनेनदुरितनाशनद्वारानिःश्रेयसप्रदत्वंचशिवस्यनिश्चयेनबोधितं॥ ५०॥ इमांकथामुपसंहरन्नि॥एतदिति॥ ५१॥ अतइति॥अस्माद्व्रतात्परमुत्कृष्टंसाधनंनास्तियेनपुनरावृत्तिरहित्यलक्षणामुक्तिःस्यादित्यर्थः॥ तदेवनिश्चाययति॥ शिवएवेति॥ देवःज्ञानस्यप्रकाशकः॥ पदंप्राप्यस्थानं॥ परामुक्तिरिति॥ शिवतादात्म्यमेवमुक्तिरित्यर्थः अतइति॥ अतःशिवोपासनारूपात्व्रतात्परतरं व्रतंनास्तीत्यर्थः॥ ५२ ॥

॥ ५३ ॥ इतिश्रीशिवमहापुराणे ज्ञानसंहीतायांपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥छ॥ ॥ ॐनमःशिवाय ॥ मुक्तिश्चतुर्विधाब्रह्मलक्षणंचयथाश्रुतं ॥ तत्षट्सप्ततिसंख्याकेऽध्यायेविनिरूप्यते ॥ १ ॥ शिवएवपरामुक्तिरित्युक्तंतत्रमुक्तिस्वरूपंपृच्छंति॥मुक्तिरिति ॥तस्यांमुक्तिप्राप्तिकालेइहअहंकाराद्युपहितात्मनि ॥ १ ॥ सारूप्येति ॥ भगवत्समानैश्वर्यवत्त्वंसारूप्या ॥ कैलासाद्युत्तमभगवल्लोकवासित्वंसालोक्या ॥ भगवत्संनिधौस्थितिःसांनिध्या ॥ २ ॥भगवत्तादात्म्यावाप्तिःसायुज्या ॥ नातःपरतरंव्रतमित्युक्तंतत्पुनर्द्रढयति ॥ अनेनेति॥ एतद्व्रताचरणेनयामुक्तिर्भवेत्सासायुज्यमुक्तिरेव नतत्रसारूप्यादिक्रमइत्यर्थः ॥ क्रमश्चभक्त्यादितारतम्यप्रयुक्तोन्यत्रदर्शितः॥ काश्यांमृतस्यसालोक्यंसाक्षात्प्राप्नोतिसत्तम ॥ ततःसरूपतांयातिततःसांनिध्यमश्नुते ॥ ततोब्रह्मैकतां

शिवएवपरामुक्तिर्नातःपरतरंव्रतम्॥ ५३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांपंचसप्ततितमोऽध्यायः ॥ ७५ ॥
ऋषयऊचुः॥ मुक्तिर्नामत्वयाप्रोक्तातस्यांकिंतुभवेदिह॥ अवस्थाकीदृशीसूतभवेदितिवदस्वनः॥ १॥ सूतउवाच॥ मुक्तिश्चतुर्विधाप्रोक्ताश्रूयतांकथयामिवः॥ सारूप्याचैवसालोक्यासान्निध्याचतथापुनः॥ २॥ सायुज्याचऋषिश्रेष्ठाव्रतेनाऽनेनयाभवेत्॥किंलक्षणाहिसाचैवश्रूयतामृषिसत्तमाः॥३॥ यतःसर्वंसमुत्पद्येयेनैवपाल्यतेहितत्॥यस्मिंश्चलीयतेसर्वंयेनसर्वमिदंततं ॥ ४ ॥ तदेवशिवरूपंहिप्रोच्यतेचमुनीश्वराः ॥ विष्णुनातन्नचज्ञातंब्रह्मणानतथैवच॥ ५॥ कुमारैर्नारदेनैवमार्कंडेयादिभिस्तथा॥ शुकेनव्यासशिष्येणव्यासेनैवाऽथवापुनः॥ ६ ॥

यातिनपरावर्ततेपुनः ॥ वाराणस्यांमृतोजंतुःसाक्षात्सारूप्यमश्नुते ॥ ततःसान्निध्यमायातिततोब्रह्मैकतामियात् ॥ अविमुक्तविपन्नस्तुसाक्षात्सान्निध्यमाप्नुयात् ॥ ततश्चिदानंदमयोब्रह्मण्येवविलीयतइत्यादिभिःपाद्मादिवचनैः ॥ शिवएवपरामुक्तिरितिपूर्वाध्यायांतवाक्येनशिवतादात्म्यमेवश्रेष्ठामुक्तिरित्यभिहितेतिशिवब्रह्मस्वरूपज्ञानंविनाऽज्ञानंनभवेत्यवाङ्मनसगोचरमपितत्स्वरूपंयथाश्रुतंप्रश्नपूर्वकंनिरूपयति ॥ किंलक्षणेति सासायुज्यमुक्तिः ॥ ३ ॥ शाखाचंद्रन्यायेनपूर्वंतटस्थलक्षणमाह ॥ यतइति ॥ यतःसकाशात्सर्वंजगत् ॥ उत्पद्येत्उत्पद्यते ॥ तस्माद्वाएतस्मादात्मनआकाशःसंभूतः ॥ यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंति ॥ यत्प्रयंत्यभिसंविशंतीत्यादिश्रुतयोत्रमूलं ॥ ४ ॥नन्वीदृशलक्षणेनब्रह्मतत्वंसम्यक्बुद्धौनोपारोहतीतिचेत्विष्णवादिभिरपिनज्ञातंकावार्ताभवतामित्याह ॥ विष्णुनेति ॥ ५ ॥ कुमारैःसनकादिभिः ॥६ ॥

तत्पुत्रैर्ब्रह्मपुत्रैः ॥ वेदैरिति ॥ सदापरमेश्वरस्तुवद्भिर्वेदैरपिअपरोक्षतयानज्ञातमित्यर्थः ॥ ननुनावेदविन्मनुतइत्यादिश्रुतिभिर्ब्रह्मणोवेदैकवेद्यत्वावगमेकथंवेदै र्नज्ञातमित्युक्तमतआह ॥ नेतीति नेतिनेतीतिबृहदारण्यकेपठितंतस्येदंनब्रह्मेदंनेतिकार्यजातंनिषिध्यपरिशिष्टंयदर्थाज्जगत्कारणंतद्ब्रह्मेत्यर्थः ॥ तेनविष्ण्वा दिभिरेवंज्ञातत्वेप्यपरोक्षतयानज्ञातमित्यर्थः ॥ यतोवाचोनिवर्तंते ॥ अप्राप्यमनसासहेत्यादिश्रुत्याऽवाङ्मनसगोचरत्वबोधनादितिभावः तथापियथोक्तसा धनसंपन्नस्यपारिशेष्याद्यत्विज्ञेयंब्रह्मतस्यस्वरूपलक्षणंतैत्तिरीयबृहदारण्यकादिश्रुतिभिरुदाहृतमनुवदति ॥ सत्यमित्यादिना ॥ सत्यमित्यादिपदानिपूर्वं व्याख्यातानि ॥ सत्यंज्ञानमनंतंब्रह्मेतितैत्तिरीये ॥ सत्यंविज्ञानमानंदंब्रह्मेतिबृहदारण्यकेपठितंतदेकदेशानुवादश्चिदानंदइति ॥ चिदात्मकोनित्यानंदस्वरूपइ त्यर्थः ॥ अतएवज्ञानमित्युक्तावपिचित्पदेननपौनरुक्त्यं ॥ ७ ॥ ननूक्तलक्षणमेवब्रह्मापरोक्षतयाकुतोनज्ञायतेइतिचेदपरोक्षज्ञानसाधनगुणानांतत्राभावा दित्यभिप्रेत्याह ॥ निर्गुणइति ॥ तथाचकठवल्यां ॥ अशब्दमस्पर्शमरूपमव्ययंतथाऽरसंनित्यमगंधवच्च यत् अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखा त्प्रमुच्यतइत्युक्तंयतः ॥ निरुपाधिःवस्तुतोमायोपाधिरहितइत्यर्थः ॥ निरंजनइति ॥ प्रपंचलेपशून्यइत्यर्थः ॥ उक्तंचश्वेताश्वतरोपनिषदि ॥ निष्कलंनि

तत्पुत्रैश्चतदावेदैर्नज्ञातंनेतिनेतिच ॥ सत्यंज्ञानमनंतश्चचिदानंदउदाहृतः ॥ ७ ॥ निर्गुणोनिरुपाधिश्चनिरंजनोऽव्ययस्त था ॥ नरक्तोनचपीतश्चनश्वेतोनीलएवच ॥ ८ ॥ यतोवाचोनिवर्तंतेअप्राप्यमनसासह ॥ तदेवंप्रथमंप्रोक्तंब्रह्मैवशिवसं ज्ञितम् ॥ ९ ॥

ष्क्रियंशांतंनिरवद्यंनिरंजनं अमृतस्यपरंसेतुंदग्धेंधनमिवानलमिति ॥ अव्ययइति ॥ नव्येतिनश्यतीत्यव्ययः ॥ नह्यनंगस्यस्वांगापचयलक्षणोव्ययःसंभव तिशरीरस्येव नापिकोशापचयलक्षणोराज्ञइवनापिगुणद्वारकःअगुणत्वादित्यर्थः ॥ निर्गुणइत्याद्युक्तमेवकिंचिद्विवृणोति नरक्तइति ॥ ८ ॥ अतोवाह्याभ्यंतरकरणै रगम्यइत्यत्रब्रह्मवल्लीवाक्यंप्रमाणयति ॥ यतइति ॥ यस्मान्निर्विकल्पाद्यथोक्तलक्षणादद्वयानंदादात्मनोवाचोभिधानानिद्रव्यादिसविकल्पवस्तुविष याणिवस्तुसामान्यान्निर्विकल्पेऽद्वयेपिब्रह्मणिप्रयोक्तृभिःप्रकाशनायप्रयुज्यमानान्यप्राप्याप्रकाश्यैवनिवर्तंतेस्वसामर्थ्याद्धीयंते ॥ मनइतिप्रत्ययोविज्ञानं तच्चयत्राभिधानंप्रवृत्तमर्तींद्रियाद्यर्थेतदन्वेवप्रवर्ततेप्रकाशनाय ॥ यत्रविज्ञानंतत्रवाचःप्रवृत्तिः ॥ तस्मात्सहैववाङ्मनसयोरभिधानप्रत्यययोःप्रवृत्तिःसर्वत्र ॥ तस्माद्ब्रह्मप्रकाशनायसर्वथाप्रयोक्तृभिःप्रयुज्यमानाअपिवाचोयस्मादप्रत्ययविषयादनभिधेयाददृश्यादिविशेषणात्सहैवमनसाविज्ञानेनसर्वप्रकाशनसमर्थेन निवर्तंतइतिभगवत्पादैरिदंव्याख्यातं ॥ अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमैकात्म्यप्रत्ययसारप्रपंचोपशमंशांतंशिवमद्वैतंचतुर्थंमन्यंतेसआ त्मासविज्ञेयइतिमांडूक्यादावप्युक्तंतदेवाह ॥ तदेवमिति ॥ प्रथमंपूर्वंयतःसर्वमित्यादिवाक्यैरुक्तं ॥ ९ ॥

किंचब्रह्मण सर्वव्यापित्वमनुमानेनापिज्ञातुंशक्यतइत्याह ॥ आकाशमिति ॥ ब्रह्मसर्वव्यापि परिच्छेदशून्यत्वादाकाशवदित्यत्रानुमानवाक्यप्रयोगोद्रष्ट व्यः॥सर्वाननशिरोग्रीवःसर्वभूतगुहाशयः॥सर्वव्यापीसभगवान्तस्मात्सर्वगतःशिवइतिश्वेताश्वाश्वतरोपनिषद्याम्नातं॥ ब्रह्मणःपरिच्छेदाभावंदर्शयन्नस्थूलमन ण्वह्रस्वमित्यादिश्रुत्यर्थमुपन्यस्यति ॥ नेति ॥ द्वंद्वातीतंसुखदुःखादिद्वंद्वरहितं ॥ विमत्सरंकामादिशून्यतयामत्सररहितं ॥ १० ॥ सर्वव्यापकतामुदाहृत्यदर्श यति ॥ इहेति ॥ इहअस्मिन्लोके ॥ परत्रपरलोके ॥ तत्प्राप्तिःउक्तलक्षणशिवतादात्म्यलाभःसायुज्यमुक्तिः ॥ तस्यामुख्यंसाधनमाह ॥ शिवस्येति ॥ ११॥ अतःशिवभक्तिरेवमुक्तिसाधनमित्युपसंहरति ॥ तस्मादिति ॥ १२ ॥ १३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥छ ॥ ॐनमःशिवाय ॥ हर्यादीनांभवलयविभवाःशिवसंभवाः ॥ सप्तसप्ततिसंख्याकेस्मिध्यायेतेनिरूपिताः ॥ १ ॥ एवमसकृदुपदिष्टाअपिमुनयःकचिद्विष्णुवादी

आकाशंव्यापकंयद्वदिदंब्रह्मतथास्मृतं॥ नस्थूलंनचतत्सूक्ष्मंद्वंद्वातीतंविमत्सरम्॥१०॥ विकाररहितंतच्चइहास्तिचपरत्र च ॥ तत्प्राप्तिश्चभवेदत्रशिवस्यभजनादिह ॥ ११ ॥ तस्माच्छिवंचसेवेतमुक्त्यर्थमृषिसत्तमाः ॥ इतिपृष्टंभवद्भिश्चतदे वकथितंमया॥ १२॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥१३॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांषट्सप्तति तमोऽध्यायः॥ ७६॥ ॥छ॥ ॥ ऋषयऊचुः ॥ शिवःकोवाहरिःकोवारुद्रःकोवासमाहितः ॥ ब्रह्माकोवाभवेद्यो वैकर्ताचजगतःस्मृतः॥ १॥ एतेषुनिर्गुणःकोवासंशयंछेत्तुमर्हसि॥ निर्गुणश्चगुणीचैवसर्वंचकथ्यतांत्वया॥ २ ॥ सूत उवाच॥ यतःसर्वंसमुत्पन्नंनिर्गुणात्परमात्मनः॥ तदेवशिवसंज्ञंहिवेदवेदांतिनोविदुः॥ ३ ॥ तस्मात्प्रकृतिरुत्पन्नापुरुषे णसमन्विता॥ ताभ्यांतपः कृतंतत्रशूलस्थेचस्थलेमुने॥ ४॥

नामपिनिरतिशयैश्वर्यंश्रुत्वासंदिहानाःपृच्छंति शिवइति ॥ योवैब्रह्माजगतःकर्तास्मृतःसकइत्यन्वयः ॥ १ ॥ एतेषुशिवादिषु ॥ निर्गुणइति ॥ निर्गुणोपिस न्गुणवानित्युच्यमानःकइत्यर्थः ॥ २ ॥ यतःयस्मात् ॥ सर्वंजगत् ॥ वेदइति ॥ तथाचामनंतिश्वेताश्वाश्वतराः ॥ योदेवानांप्रभवश्चोद्भवश्चविश्वाधिपोरुद्रो महर्षिः ॥ हिरण्यगर्भंजनयामासपूर्वंसनोबुध्याशुभयासंयुनक्तु ॥ छंदांसियज्ञाः क्रतवोव्रतानिभूतंभव्यंयच्चवेदावदंति ॥ यस्मान्मायीसृजतेविश्वमेतत्त स्मिंश्चान्योमाययासन्निरुद्धः ॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं ॥ तस्यावयवभूतैस्तुव्याप्तंसर्वमिदंजगदिति ॥ ३ ॥ काशीमाहात्म्यवर्णनप्रस्तावे प्रोक्तंसृष्टिक्रमंस्मारयति ॥ तस्मादिति ॥ तस्मान्निर्गुणाच्छिवसंज्ञात् ॥प्रकृतिर्माया ॥ पुरुषेणविष्णुना ॥ ताभ्यामिति ॥ ताभ्यांप्रकृतिपुरुषाभ्यांतत्रशिव निर्मितेपंचक्रोशीतिविख्यातस्थलेतपःकृतमित्यर्थः ॥ ४ ॥

तत्रस्थले ॥ पुरुपंहर्षादंबुनाप्रस्तेव्याप्तेनिर्गुणेनपरमात्मनाशूलस्थेचकृतेयदासर्वंस्त्टमात्रमंबुनाव्याप्तंतदातत्रहरिःसुप्तइत्यन्वयः ॥ ५ ॥ विख्यातमिति ॥ य दाजलप्रस्तेस्थलेहरिःसुप्तस्तदाप्रसिद्धंनारायणेतिनाममुनयोवदंतिस्मेत्यर्थः ॥ आपोनाराइतिप्रोक्ताइत्याद्यर्थमनुस्मृत्येतिभावः ॥ प्रकृतिरिति ॥ याप्रकृति र्मायापुरोगतापूर्वमुत्पन्नातस्यानारायणीतिप्रसिद्धंनाममुनयोवदंतिस्मेत्यर्थः ॥ सर्वमेतत्प्रागेकोनपंचाशेऽध्यायउक्तंविस्तरेण तद्यथा ॥ यदाचनिर्गुणंतेजः सत्यंज्ञानमनंतकं ॥ चिदानंदस्वरूपंचनिर्विकारंसनातनं ॥ ततश्चप्रकृतिर्देवीपुरुषेणसमन्विता ॥ आवाभ्यांकिंचकर्तव्यमावांकेनविनिर्मितौ ॥ इतिसंशय मापन्नौप्रकृतिःपुरुषोयदेत्यादिकंद्रष्टव्यं ॥ ६ ॥ तन्नाभिकमलेपुरुषनाभिकमले ॥ पितामहोब्रह्मा ॥ तेनैवसप्रसिद्धोविष्णुस्तपसादृष्टइतिभूतकथैवस्मा रिता ॥ ७ ॥ महालयेमहाप्रलये ॥ एतदनुपदंकिंचिद्विवेचयिष्यते ॥ द्वितीयाध्यायोक्तांकथांस्मारयति ॥ उभयोरिति ॥ उभयोर्विष्णुब्रह्मणोःस्वस्वोत्कर्ष

पंचक्रोशीतिविख्यातेहर्षाच्चप्रस्तेंऽबुना ॥ व्याप्तंचसकलंस्थेतत्तत्रसुप्तोहरिःस्वयम् ॥ ५ ॥ नारायणेतिविख्यातंवदंतिमुन यस्तथा ॥ नारायणीतिविख्याताप्रकृतिर्यापुरोगता ॥ ६ ॥ तन्नाभिकमलेयोवैजातःसचपितामहः ॥ तेनैवतपसादृष्टः सवैविष्णुःसनातनः ॥ ७ ॥ वैकुंठवासीयःप्रोक्तोमहालयेविलीयते ॥ उभयोर्वादनाशार्थंयद्रूपंदर्शितंबुधाः ॥ ८ ॥ महादेवेतिविख्यातंशिवाच्चनिर्गुणादिह ॥ तेनचोक्तंस्त्वहंरुद्रोभविष्यामिकपोलतः ॥ ९ ॥ रुद्रोनामसविख्यातोलोकानु ग्रहकारकः ॥ ध्यानार्थंचैवसर्वेषामरूपोरूपवानभूत् ॥ १० ॥ सएवचशिवःसाक्षाद्भक्तवात्सल्यकारकः ॥ अन्येचयेसमु त्पन्नायथानुक्रमतोलयम् ॥ ११ ॥ यांतिनैवतथारुद्रःशिवेरुद्रोविलीयते ॥ सर्वेरुद्रंमिलित्वाचनयांतिप्राकृताइमे ॥ १२ ॥

विषयेवादस्तन्निवृत्त्यर्थमित्यर्थः ॥ यदिति ॥ यद्रूपंनिर्गुणाच्छिवादभिव्यक्तंमहादेवेतिप्रसिद्धंदर्शितमित्यन्वयः ॥ ८ ॥ तेनशिवेन ॥ निर्गुणेनपरमात्मनालो कानुग्रहार्थमेवसगुणंस्वरूपंगृहीतमित्याह ॥ रुद्रइति ॥ १० ॥ सएवेति ॥ सरुद्ररूपएवशिवःसाक्षाद्भक्तानांमोक्षप्रापणेनवात्सल्यकारकइत्यर्थः ॥ ब्रह्मादी नामपिमोक्षप्राप्तीरुद्रप्रसादादेवेत्याह ॥ अन्यइति ॥ अन्येब्रह्मादयः ॥ यथानुक्रमतः ॥ स्वस्वलयकालानुसारक्रमेण ॥ क्रमश्चोक्तोवायवीयसंहितायां पूर्वभागेषष्ठाध्यायेआयुषोत्रनिमेषमित्यादिभिःकालमानमारभ्य ब्रह्माविष्णोर्दिनेचैकोविष्णूरुद्रदिनेतथा ॥ ईश्वरस्यदिनेरुद्रःसदाख्यस्यतथेश्वरःइत्यंतैःश्लो कैः ॥ ११ ॥ नेवेति ॥ यथान्येनुक्रमतोलयंयांतितथानैवरुद्रोयातिकिंतुनिर्गुणेशिवएवलीनोभवतीत्यर्थः ॥ किंचब्रह्मादीनांलयोपिरुद्राधीनइत्याह ॥ सर्वइतिसर्वेब्रह्मादयःस्वातंत्र्येणरुद्रंमिलित्वास्वसंगतंकृत्वालयंनयांतीत्यर्थः ॥ तत्रहेतुगर्भंतेषांविशेषणमाह ॥ प्राकृताइति ॥ प्रकृतिसंबद्धाःमायाधीनाइ तियावत् ॥ १२ ॥

भगवान्रुद्रस्तुनतथेत्याह ॥ रुद्रइति ॥ श्रुतीति योदेवानांप्रभवश्चोद्भवश्चविश्वाधिपोरुद्रोमहर्षिरित्यादिश्रुतिवाक्यमत्रप्रमाणमित्यर्थः ॥ नकेवलंश्रुतिशासनमपितुशिष्टाचारोपितथैवेत्याह ॥ सर्वइति ॥ १३ ॥ यद्यपिविष्ण्वादिभक्तिरपिश्रुत्यादौविहितातथापितद्भजनेनपूर्वोक्तलयक्रमानुसारान्निर्गुणशिवतत्वप्राप्तिरूपोमोक्षोभवतिरुद्रभक्त्यातुदेहपातक्षणएवेतिविशेषइत्याह ॥ अन्यमित्यादिना अन्यंविष्ण्वादिकं ॥ तस्मिन्नन्यस्मिन् ॥ तेनेति ॥ तेनविष्ण्वादिनासहमहताकालेनमहत्वंशिवतादात्म्यलक्षणंप्राप्ताभवंतीत्यर्थः ॥ १४ ॥ तेषामिति तेषांरुद्रभक्तानांमुक्तिसिद्धयेदेवतांतरोपासनापेक्षानास्तीत्यर्थः ॥ श्रुतिरिति ॥ क्षरंप्रधानममृताक्षरंहरःक्षरात्मानावीशतेदेवएकः ॥ तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चांते विश्वमायानिवृत्तिरित्यादिरनादिश्रुतिरत्रप्रमाणमित्यर्थः ॥ ॥ १५ ॥ तत्रहेतुमप्याह ॥ अज्ञानमिति ॥ हियतःअज्ञानंअविद्याजालमयमेतद्ब्रह्मादितृणपर्यंतंजगत्विविधमुत्पत्तिविनाशयोगेननानाविधमतस्तन्निवर्त्यं ॥ ब्रह्मात्मकंविज्ञानंतुनित्यशुद्धबुद्धमुक्तकूटस्थस्वभावेनविविधंनहि ॥ अपितुअखंडैकरसमतस्तदविद्याजालस्यनिवर्तकमित्यर्थः ॥ नन्वेवंद्वैतापत्तिरतआह ॥

रुद्रइमान्मिलित्वातुनयतिश्रुतिशासनम् ॥ सर्वेरुद्रंभजंत्येवरुद्रःकंचिद्भजेन्नहि ॥ १३ ॥ अन्यंभजंतियेनित्यंतस्मिंस्ते लीनतांगताः ॥ तेनैवमहत्वंप्राप्ताःकालेनमहतापुनः ॥ १४ ॥ रुद्रभक्तास्तुयेकेचित्तत्क्षणंशिवतांगताः ॥ अन्यापेक्षानतेषांवैश्रुतिरेषासनातनी ॥ १५ ॥ अज्ञानंविविधंत्वेतद्विज्ञानंविविधंनहि ॥ ब्रह्मादितृणपर्यंतंयत्किंचिद्दृश्यतेत्विह ॥ १६ ॥ तत्सर्वंशिवएवाऽस्तिनाऽत्रकार्याविचारणा ॥ सृष्टेःपूर्वंशिवःप्रोक्तःसृष्टेर्मध्येशिवस्तथा ॥ १७ ॥ सृष्टेरंतेशिवःप्रोक्तस्तेनप्रोक्तःसदाशिवः ॥ तस्माच्चनिर्गुणःप्रोक्तःशिवएवऋषीश्वराः ॥ १८ ॥

ब्रह्मादीति ॥ ब्रह्माहिरण्यगर्भः ॥ १६ ॥ शिवएवेतिशिवरूपमेवेत्यर्थः ॥ सर्वंखल्विदंब्रह्म ॥ विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् ॥ सर्वोह्येषरुद्रइत्यादिश्रुतेरितिभावः ॥ निर्गुणशिवब्रह्मणःसदाशिवनामनिर्वचनेनकूटस्थत्वंव्यक्तीकृत्यदर्शयति ॥ सृष्टेरिति ॥ तत्रसदेवसोम्येदमग्रआसीदित्यादिश्रुतेर्जगत्कारणत्वावगमाज्जगदुत्पत्तेःपूर्वंसत्वंनिश्चीयते ॥ तथामध्येसृष्टिकालेयस्मिन्निदंसंचविचैतिसर्वंयस्मिन्देवाअधिविश्वेनिषेदुरित्यादिश्रुतेर्जगतोऽध्यासरूपत्वेननिरधिष्ठानाध्यासायोगादधिष्ठानतयासत्त्वंनिश्चीयतइत्यर्थः ॥ १७ ॥ अंतइति ॥ यत्प्रयंत्यभिसंविशंतीत्यादिवाक्यैस्तत्रैवलयइतिबोधनेनसृष्टेरंतेपितत्सत्वनिश्चयइत्यर्थः ॥ तेनहेतुनासदाशेतेजगदस्मिन्निति व्युत्पत्त्यासदाशिवंकल्याणंभक्तानांयस्मादिति सत्विद्यमानमासमंताच्छिवंयस्मादित्यादिव्युत्पत्त्यावासदाशिवःप्रोक्तइत्यर्थः ॥ तस्मादिति ॥ यतोब्रह्मविदाप्नोतिपरंतस्माद्वाएतस्मादात्मनआकाशःसंभूतः ॥ यतोवाइमानिभूतानिजायंतइत्यादिवाक्यैर्निर्गुणब्रह्मणःसकाशात्सृष्टिरुक्ता योदेवानांप्रभवश्चोद्भवश्चविश्वाधिपोरुद्रइत्यादिश्वेताश्वाश्वतरादिवाक्यैरुद्ररूपःशिवःसृष्टिहेतुरुक्तस्तस्माच्छिवएवनिर्गुणःप्रोक्तइत्यर्थः ॥ १८

येनेति ॥ येनशिवेन ॥ अस्यमहतोभूतस्यनिःश्वसितमित्यादिभिर्योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै॥पदंयद्विष्णोर्व्यतरंनिधायीत्यादिश्रुतिवा क्यैरेतन्निश्चीयतइतिभावः ॥ योब्रह्माणमित्यत्रब्रह्माविष्णुरेव॥ तस्माव्यक्तिरुत्पन्नापुरुषेणसमन्वितेतिपूर्वकथानुरोधात् ॥ वेदसंज्ञितावाणीत्यन्वयः ॥१९॥ शिवस्यैवसर्वविद्याप्रदत्वेकारणत्वस्यबोधिकांश्रुतिमाह ॥ ईशानइति ॥ विद्यानांसर्वमंगलहेतुत्वात्तद्दातृत्वेनशिवएवसर्वमंगलकरइत्याह ॥ सएवेति॥२०॥ पालितापालयिता साक्षीप्राणिपुण्यपापादीनांसाक्षाद्द्रष्टा ॥ अन्येषांविष्णवादीनां ॥ कालमानंकालपरिमाणंयत्पूर्वमुक्तंतथाज्ञातव्यं ॥ कलनाक्रमेणसं ख्यानं॥२१॥ तस्येति॥तस्यशिवस्यकालकृतंमानंनास्ति हियतःकालस्यकलना ॥ नास्ति ॥ शिवेनैवसंहरणादित्यर्थः॥अतएवकालतोऽपरिच्छिन्नइत्युक्तं॥ महेति ॥ कालस्यापिकलनान्महाकालइत्यर्थः ॥ २२ ॥ यथाब्रह्मणःसकाशाद्रुद्रस्यप्रादुर्भावउक्तस्तथातेनसहमहाकाल्याअपितंवदंतीत्याह ॥ यथाचे

येनैवविष्णवेदत्ताव्यासेनवेदसंज्ञिता ॥ वाणीमंत्राद्यनेकंचध्यानंचपूजनंबुधाः ॥ १९ ॥ ईशानःसर्वविद्यानांश्रुतिरेषा सनातनी॥ सएवशंकरःसाक्षात्सर्वानुग्रहकारकः ॥ २० ॥ कर्ताचपालितासाक्षीसंहर्तासउदाहृतः॥ अन्येषांकालमानं चकालस्यकलनातथा ॥ २१ ॥ तस्यमानंनकालस्यकालस्यकलनानहि॥ महाकालःस्वयंसाक्षान्महाकालीसमाश्रिता ॥ २२ ॥ यथाचब्रह्मणोरुद्रस्तथाकालीप्रचक्षते॥ सर्वस्यकारणंसोवैकार्यभूताच्युतादयः॥ २३ ॥ सर्वताभ्यांतथाव्याप्त मिच्छयोत्पत्तिलीनता॥ नोत्पादकश्चकश्चिद्वैनहर्ताकश्चनाप्रियः ॥ २४ ॥ स्वयंचकारणंचैवस्वस्यनैवकदाचन॥ एकोप्य नेकतांयातोप्यनेकोप्येकतांव्रजेत्॥ २५॥ एकंबीजंबहुभूत्वापुनर्बीजंचजायते॥ वस्तुत्वेचस्वयंसर्वंशिवरूपोमहेश्वरः॥ ॥ २६॥

ति ॥ भूताच्युतादयइतिसंधिरार्षः ॥ अच्युतादयोविष्णवादयःकार्यभूताइत्यर्थः ॥ शिवादेवोत्पत्तिश्रवणादितिभावः ॥ २३ ॥ ताभ्यांशिवाभ्यां ॥ उत्प त्तिलीनताउत्पत्तिसहितालीनता ॥ जगतइतिशेषः ॥ नोत्पादकइति ॥ शिवस्योत्पादकोहर्ताचकोपिनश्रुतइत्यर्थः॥ अप्रियोद्वेष्यः ॥ एतेनशिवस्यवैषम्यनै र्घृण्येवारिते ॥ २४ ॥ स्वस्मात्स्वस्योत्पत्तिरसंभाव्येत्याह ॥ स्वयमिति॥ एवंचेत्स्वाभिन्नविभूतीनांकथंस्वयंकारणंभवेदतआह ॥ एकइति एकोदेवोबहुधा निविष्टः ॥ बहुस्यांप्रजायेयेत्यादिश्रुतेरितिभावः॥सृष्टिकालएतदुक्तंसंहारेपुनरेकएवेत्याह॥अनेकोपीति॥२५॥ अत्रदृष्टांतमाह॥ एकमिति ॥ बहुभूत्वापुष्पप त्राद्यवयवैर्नानारूपंभूत्वातत्रैववृक्षेवृक्षांतरोत्पादनसमर्थंबीजंप्रादुर्भवतितद्वदित्यर्थः ॥ परमार्थतस्तुकार्यकारणयोरभेदएव ॥ अतःसर्वंकार्यजातंशिवा त्मकमेवेत्याह ॥ वस्तुत्वइति ॥ वेदाःप्रमाणमितिवन्नात्राभेदान्वयानुपपत्तिः ॥ २६ ॥

नन्वेतद्भवदुक्तंसर्वंसम्यग्ज्ञातुंनशक्यतइत्यतआह ॥ जानातीति ॥ ज्ञानवान्वेदव्यासादिः ॥ २७ ॥ ब्रह्मज्ञानादूर्ध्वमेतन्निश्चीयेतेतिमनसिनिधायज्ञानलक्षणंपृच्छंति ॥ ज्ञानस्येति ॥ शिवतांशिवतादात्म्यं॥२८॥२९॥इतिश्रीशिवमहापुराणेसप्तसप्ततितमोध्यायः ॥ ७७ ॥ ॐनमःशिवाय ॥ ब्रह्माद्यैरभिनिश्चितंशिवमहस्तत्त्वंयथेदंयतोजातंयत्तदभिन्नमद्वयमतोवेदांतसिद्धांततः ॥ वेद्यंब्रह्मगुरूपसत्तिसहितैर्भक्त्याविभिःसाधनैर्निर्वाणायकिलाष्टसप्ततितमेऽध्यायेखिलंप्रोच्यते ॥ १ ॥ श्रूयतामिति ॥ स्वोक्तावप्रामाण्यशंकानिरासायाह ॥ ब्रह्मेति ॥ कुमाराःस्कंदसनत्कुमारादयः ॥१॥ समाजेविचारसभायां ॥ ज्ञातेति॥ ज्ञात्रादित्रयंत्रिपुटीत्युच्यतेतदात्मकमिदंजगत्सर्वंशिवरूपमित्यर्थः ॥ २ ॥ तदेवविशदयति ॥ ब्रह्मादीति ॥ सएवशिवएव ॥३ ॥ तस्यशिवस्य ॥ इदंजगत्

जानातिज्ञानवानेवनाऽन्यःकश्चिदृषीश्वराः॥ इत्येवंवचनंश्रुत्वापुनरूचुर्मुनीश्वराः॥२७॥ ऋषयऊचुः॥ ज्ञानस्यलक्षणं ब्रूहियज्ज्ञात्वाशिवतांव्रजेत्॥कथंशिवश्चसर्ववैसर्वंचशिवएवच॥२८॥एतत्सर्वंत्वयासूतकथनीयंहितायवै॥२९॥ इति श्रीशिवमहापुराणेज्ञानसंहितायांसप्तसप्ततितमोध्यायः॥७७॥ ॥७८॥ सूतउवाच॥ श्रूयतामृषयःश्रेष्ठाःकथयामियथाश्रुतम् ॥ ब्रह्मनारदकुमाराणांव्यासस्यकपिलस्यच॥ १ ॥ एतेषांचसमाजेवैनिश्चित्यसमुदाहृतम्॥ ज्ञाताज्ञानं तथाज्ञेयंसर्वंशिवमिदंजगत्॥२॥ ब्रह्मादितृणपर्यंतंयत्किंचिद्दृश्यतेजगत्॥ एतत्सर्वंसएवाऽस्तिनाऽत्रकार्याविचारणा ॥ ३॥ यदेच्छातस्यजायेततदाचक्रियतेत्विदम् ॥ सर्वंसएवजानातितंजानातिनकश्चन॥ ४॥ रचित्वाचस्वयंचैवप्रविश्यदूरतःस्थितः ॥ यथाचज्योतिषश्चैवजलादौप्रतिबिंबता ॥५॥ वस्तुतोनप्रवेशोवैतथैवचस्वयंशिवः॥ वस्तुतस्तुस्वयं सर्वरूपेणैवतुभासते॥६॥

शिवेनक्रियते ॥ सोकामयतबहुस्यांप्रजायेयेत्यादिश्रुतेः ॥ सर्वमिति ॥ यः सर्वज्ञःसर्वविदित्यादिश्रुतेः ॥ तंशिवंतत्कृपांविनानकोपिजानातीत्यर्थः ॥ अविज्ञातंविजानतामित्यादिश्रुतेः ॥ ४ ॥ तत्रहेतुमाह ॥ रचित्वेति ॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेःस्वयंजगद्रचित्वातत्प्रविश्यापिदूरतःस्थितःध्यानादियोगंविनाज्ञातुमशक्यइत्यर्थः ॥ सर्वव्यापिनःपरमात्मनःप्रदेशादिकृतप्रवेशदूरावस्थानासंभवात् अतएवोक्तश्रुत्याकल्पितप्रवेशबोधनेपिपरमार्थतोनप्रवेशइत्यत्रदृष्टांतमाह ॥ यथेति ॥ ज्योतिषःसूर्यादेः ॥ ५ ॥ तथैवेति ॥ प्रवेशाभावेपिसर्वात्मकत्वेनस्वयमेवप्रविष्टइवभासतइत्यर्थः ॥ उक्तार्थमेवविशदयति ॥ वस्तुतस्त्विति ॥ ६ ॥

एवंचभगवतःसर्वात्मकत्वेनाद्वैतसिद्धौद्वैतविज्ञानमविद्याकृतमित्याह॥ अज्ञानमिति ॥ मतेर्भेदःद्वैतविषयबुद्धिभेदःअज्ञानंअविद्यामूलकः मतेर्दोषइतिक्वचि त्पाठः वस्तुतोब्रह्मणोद्वितीयंकिमपिनास्तीत्याह ॥ नेति ॥ अन्यस्यजगद्विलक्षणस्यापिब्रह्मणोद्वयंद्वितीयं॥दर्शनेष्विति॥ दर्शनेषुवैशेषिकादिशास्त्रेषुद्वैतमतबु द्धिभेदोदृश्यतेसोऽविद्याकृतइतिभावः ॥ ७ ॥ सिद्धांतमाह ॥ परमिति ॥ वेदांतिनऔपनिषदाःपरंकेवलंनित्यंसदाअद्वैतंप्रतिपादयंतिद्वैतस्यमिथ्यात्वादेकमे वाद्वितीयमित्यादिश्रुतेरित्यर्थः॥तत्रोपपत्तिमाह ॥ स्वस्येति ॥ स्वस्यपरमात्मनएवांशोजीवस्ततएवप्रादुर्भावात् ॥ यथावह्नेर्व्युच्चरंतिस्फुलिंगाइतिश्रुतेरतस्त दात्मकएव ॥नततोन्यः समुद्रतरंगादिवदित्यर्थः ॥ कथंतर्हिभेदबुद्धिरतआह॥ अविद्येति ॥ अतएववशःअविद्याधीनः ॥ ८ ॥ अतएवाह ॥ अहमिति ॥ अहंपदार्थमात्मानंपरमात्मनोभिन्नंजानाति ॥ अहमित्यव्ययं ॥ तयाअविद्ययाश्रवणादिसाधनैर्मुक्तःशिवरूपोभवेदित्यर्थः ॥ एवमंशांशिभावेनब्रह्मजीव

अज्ञानंचमतेर्भेदोनास्त्यन्यस्यद्वयंपुनः॥ दर्शनेषुचसर्वेषुमतिभेदःप्रदृश्यते॥ ७ ॥ परंवेदांतिनोनित्यमद्वैतप्रतिपादिनः॥ स्वस्यैवांऽशश्चजीवोवैअविद्यामोहितोवशः॥ ८ ॥ अहमन्यंचजानातितयामुक्तोभवेच्छिवः ॥ सर्वव्याप्यशिवःसाक्षा द्व्यापकःसर्वजंतुषु ॥ ९ ॥ चेतनाचेतनेसोवैसर्वत्रशंकरःस्वयम्॥ उपायंयःकरोत्यस्यदर्शनंसलभेद्ध्रुवम्॥ १० ॥ यथाऽ ग्निर्व्यापकश्चैवकाष्ठेकाष्ठेचतिष्ठति ॥ योवैमथ्नातितत्काष्ठंसवैपश्यत्यसंशयम् ॥ ११ ॥ भक्त्यादिसाधनानीहकरोतिऋ षिसत्तमाः॥ सवैपश्यत्यवश्यंवैनात्रकार्याविचारणा॥ १२॥ शिवःशिवःशिवश्चैवनाऽन्यदस्तीहकिंचन ॥ नानाभाति स्वरूपोहिभासतेशंकरःसदा॥ १३ ॥ यथासमुद्रोमृच्चैवसुवर्णमथवापुनः॥उपाधितोहिनानात्वंलभतेचतथैवच॥ १४॥

योरैक्यमुक्त्वासर्वव्यापित्वेनब्रह्मजगतोरैक्यंसूचयति ॥ सर्वेति ॥ सर्वंजगत्व्याप्नोतितच्छीलः॥ अतएव ॥ सर्वजंतुषुसाक्षात्समत्वेनव्यापकःनतुन्यूनाधिक तयेत्यर्थः ॥ साक्षात्प्रत्यक्षतुल्ययोरित्यमरः ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितइत्यादिश्रुतेरितिभावः ॥ ९ ॥ नकेवलंचेतनेष्वेवाकिंतुसर्वत्रेत्याह ॥ चेतनेति ॥ नन्वेवंसर्वेषामनायासेनात्मदर्शनसंभवाच्छ्रवणाद्युपायकथनंव्यर्थमतआह ॥ उपायमिति ॥ श्रोतव्यइत्यादिश्रुतिबोधितभक्तिपूर्वकश्रवणा दिविधिरूपोपायंयःकरोतिसएवास्यदर्शनंलभेत ॥ श्रवणाद्यभ्यासेनाविद्याक्षयादित्यर्थः ॥ १० ॥ अत्रदृष्टांतमाह ॥ यथेति ॥ तत्काष्ठमरण्यादिरूपं ॥ ११ ॥ १२ ॥ भक्त्यादियुतःशिवंपश्यतीत्युक्तंतद्दर्शनाकारमाह शिवइति ॥ अभ्यासेनसर्वस्यशिवात्मकताबोधिता ॥ सैवनानेत्यादिनादृढीकृता ॥ १३॥ ननुसर्वंशिवात्मकमेकरूपंचेत्कथंविविधंदृश्यतेतत्राह ॥ नानेति ॥ हियतःस्वरूपःआकाशरूपःशिवःआकाशएकोपिसन्घटाद्युपाधिभेदेनंभिन्नइवभासते तथाशंकरोनानाभातीत्यर्थः ॥ १४ ॥

दृष्टांतांतरमाह ॥ यथेति ॥ यथासमुद्रएकोपिफेनतरंगाद्युपाधिभेदाद्भिन्नइवभाति ॥ मृत्त्वेनरूपेणैकापिमृत् घटशरावादिनोपाधिनाभिन्नेवभाति ॥ सुवर्णत्वेनरूपेणैकमपिसुवर्णंकुंडलकटकाद्युपाधिभिर्भिन्नमिव ॥ तथापरमात्मैवानुप्रविष्टोऽहंकाराद्युपाधिभेदेननानात्वंलभतइत्यर्थः ॥ एवंस्थितेयोजगतिभेदोदृश्यतेसमिथ्येत्याह ॥ कार्येति ॥ उपादेयोपादानयोरित्यर्थः मृद्घटःसुवर्णंकुंडलमित्यादिसामानाधिकरण्यदर्शनादितिभावः ॥ व्यक्तीकृतंचैतत्तदनन्यत्वमारंभणशब्दादिभ्यइत्याद्यधिकरणेपुभगवत्पादैः॥ एवंदेशतःपरिच्छेदाभावेनसर्वात्मकत्वादद्वितीयत्वंब्रह्मणउक्त्वाकालतोपितद्वक्तुंदृष्टांतमाह ॥ यथेति ॥ यथांकुराद्युत्पत्तेःपूर्वंबीजमात्रंतिष्ठतिततोमृदंबुसहकारेणांकुरादिप्ररोहोविविधःप्रादुर्भवति ॥ १५ ॥ अंतेपरिपाकदशायांफलाभ्यंतरेप्रादुर्भूतंबीजमेवतिष्ठतीतरद्विशीर्णंभवतितथासदेवेत्यादिश्रुतिभिःसृष्टेःप्रागंतेचसतोब्रह्मणएवश्रवणादन्यस्यसर्वस्योपादेयकार्यत्वेनकारणाभेदाददैतंसिद्धमित्यर्थः ॥ किंचैतत्गुरूपसत्त्यादिसाधनसंपादितज्ञानेनैवलब्धुंशक्यमित्याह ॥ ज्ञानइति ॥ बीजंब्रह्ममात्रंप्रदृश्येत ॥ १६॥ज्ञानीकथंबीजमात्रंपश्यतितदाह॥सर्वमिति ॥ अत्रजगति

कार्यकारणयोर्भेदोवस्तुतोनप्रवर्तते ॥ यथाबीजात्प्ररोहश्चनानाविधःप्रकाशते ॥ १५ ॥ अंतेचबीजमेवस्यान्नाऽत्रकार्यविचारणा ॥ ज्ञानेबीजंप्रदृश्येतत्यज्ञानेविविधंजगत् ॥ १६ ॥ सर्वंशिवःशिवःसर्वंनाऽत्रभेदोऽस्तिकश्चन ॥ कथंचविविधंपश्येदेकत्वंनकथंपुनः ॥ १७ ॥ यथैकंचंद्रसूर्याख्यंज्योतिर्नानाविधंपुमान् ॥ जलादौचविशेषेणदृश्यतेचतथैवसः ॥ ॥ १८ ॥ सर्वत्रव्यापकःसोवैस्पर्शत्वेननिबध्यते ॥ तथैवव्यापकोदेवोनबध्नातिपुनःक्वचित् ॥ १९ ॥ अहंकारतयाजीवस्तन्मुक्तःशंकरःस्वयम् ॥ यथैकंचसुवर्णंहिताम्रेणमिलितंयदा ॥ २० ॥

शिवाद्भेदःकोपिनास्तीत्यर्थः ॥ पश्येदज्ञानीतिशेषः ॥ १७ ॥ अज्ञानिनोभेददर्शनंभ्रांत्येत्यत्रदृष्टांतमाह ॥ यथेति ॥ एकमपिचंद्रादिकंनेत्रविकारदोषेणपुमान्नानाविधमनेकंपश्येत्तथेत्यर्थः॥ तदुक्तंभगवत्पादैरेकश्चंद्रःसद्वितीयइवभासतइतिजलादाविति ॥ यथाचजलाद्युपाधौसूर्यादेः प्रतिबिंबमविवेकिनाभेदेनदृश्यमानमपिपरमार्थतोनभिद्यतेतथैवसर्वात्मापरमेश्वरएकएवेत्यर्थः ॥ १८ ॥ नन्वेवंब्रह्मजगतोरभेदेजगदशुध्यादिदोषाब्रह्मणिप्रसज्येरन्नतआह ॥ सर्वत्रेति ॥ ससूर्यादिःप्रकाशेनसर्वत्रव्यापकस्तस्यस्पर्शवत्दृढसंबंधेभासमानेसत्यपिजगतावस्तुतोनसंबध्यतेतथैवदेवःपरमात्माव्यापकः सन्नपिसर्वस्यमिथ्यात्वात्क्वचिदपिनसंबद्धोभवतीत्यर्थः ॥ १९॥नन्वेवंजीवेश्वरयोरपिसर्वदाअभेदस्तर्हिबंधमुक्तिव्यवस्थाकथमतआह ॥ अहंकारतयेति ॥ अविद्याकृतोहंकर्तेत्याकारकोभिमानोहंकारतातयायुक्तोजीवः सएवज्ञानेनतस्मादभिमानान्मुक्तः साक्षाच्छिवएवेत्यर्थः तत्रदृष्टांतमाह ॥ यथेति ॥ ताम्रेणमिलितमित्यत्ररजतादियुतमितिपाठांतरम ॥ २० ॥

अहमिति ॥ अहंकारयुतः बद्धोभवतीत्यर्थः तदेवताम्रादिभिर्मिश्रितमेवक्षारादीत्यादिनापाकादिग्रहणं ॥ २१ ॥ अतोऽज्ञाननिवृत्तौशिवभावप्राप्तौचय त्साधनंतदाह ॥ यथेति ॥२२॥ उच्चैः बाहुल्येन ॥ तद्बुध्याशिवबुध्या ॥ पापादीति ॥ यएवंकरोतितस्यपापंतन्मूलरागद्वेषादिकंदूरतोगतंनष्टंभवतीत्यर्थः ॥ २३ ॥ पापादिमूलकमज्ञानंपापादिनाशेनश्यतीत्याह ॥ तदेति ॥ नश्येतनश्येत् ॥ अतोजिज्ञासुर्ज्ञानप्राप्तयेयत्कुर्यात्तदाह ॥ शरीरमिति ॥ स्तव स्तुमात्रस्योपलक्षणमिदं ॥ सर्वंजगदनित्यंनिश्चित्यनित्यरूपंशिवमेवभजेदित्यर्थः ॥ २४ ॥ तत्फलमाह ॥ अज्ञानादितितदेति ॥ ज्ञानेनाज्ञाननाशे तन्मूलकाहंकारस्यापिनाशाच्छिवभावंयातीत्यर्थः ॥ २५ ॥ ननुनित्यरूपशिवस्याप्रत्यक्षत्वात्तद्दर्शनंकथंसंभवेदतआह ॥ यथेति यथाआदर्शेदर्पणे

अल्पमूल्यंप्रजायेततथाजीवोऽप्यहंपुनः ॥ तदेवचसुवर्णंहिक्षारादिशोधितंयदा ॥ २१ ॥ पूर्ववन्मूल्यतांयातितथाजीव स्यसंमतम् ॥ यथाचसद्गुरुंप्राप्यभक्तिभावसमन्वितः ॥ २२ ॥ शिवबुद्ध्याकरोत्युच्चैःपूजनंस्मरणंशुभम् ॥ ध्यानंस्तवंच तद्बुद्ध्यापापादिदूरतोगतम् ॥ २३ ॥ तदाऽज्ञानंचनश्येतशरीरंचाऽस्थिरंबुधः ॥ मत्वाचनित्यरूपंहिशिवमेवसनातनम् ॥ ॥ २४ ॥ अज्ञानाद्दूरतोभूत्वाज्ञानवान्जायतेयदा ॥ तदाऽहंकारनिर्मुक्तोयातिशंकरतांतुसः ॥ २५ ॥ यथाऽऽदर्शेस्वरूपं चस्वीयंचैवप्रदृश्यते ॥ तथासर्वत्रगंशंभुंपश्यतीतिसुनिश्चितम् ॥ २६ ॥ जीवन्मुक्तःसएवादौदेहेशीर्णेशिवेलयेत् ॥ शुभंलब्ध्वानहृष्येतलब्ध्वाऽशुभंनकुप्यति ॥ २७ ॥

स्वरूपंस्वीयंदृश्यतेएवंसर्वत्रव्याप्तंस्वात्मरूपशिवंपश्यति ॥ २६ ॥ सएवजीवन्मुक्तःसन्देहेपतितेआदौप्रथममेवविष्ण्वादिषुलयमप्राप्यैवसाक्षात्शिवे निर्गुणब्रह्मणिलयंव्रजेदित्यर्थः ॥ शरीरादेरस्थिरत्वंनिश्चित्यज्ञानप्राप्तौयत्कर्तव्यंयेनचशिवार्चनंनिर्विघ्नंभवेत्तदाह ॥ शुभमित्यादिना ॥ शुभंसुखकरं राज्यादि अशुभंदुःखकरंदुष्परिहरव्याध्यादि उक्तंचभगवद्गीतायामपि ॥ नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं ॥ स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणि स्थितः ॥ शीतोष्णसुखदुःखेषुतथामानापमानयोः ॥ ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः ॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः ॥ सुहृन्मित्रा र्युदासीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते ॥ सुखदुःखेसमेकृत्वालाभालाभौजयाजयाविति ॥ २७ ॥

शिवबुध्याकरोत्युच्चैरित्यादिनायोगमारुरुक्षोर्मुनेःपूजनादिकर्मतत्त्वज्ञानसाधनत्वेनोक्तं ॥ यथोक्तंगीतायांभगवता ॥ आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यतइति ॥ इदानींयोगमारूढस्यकर्तव्यंसाधनमाह ॥ अथवेति ॥ अधिकारिभेदाद्व्यवस्थितोयंविकल्पः ॥ योगारूढलक्षणंचतत्रैवोक्तं ॥ यदाहिनेंद्रियार्थेषुनकर्मस्वनुषज्जते॥ सर्वसंकल्पसंन्यासीयोगारूढस्तदोच्यतइति॥आत्मयोगेनेतिआत्मयोगेनतत्त्वानांबुद्ध्यादीनांविवेकेनचयुक्तः सन्यथेष्टचारीस्वतंत्रःस्यादित्यर्थः ॥ आत्मयोगप्रकारोगीतायांदर्शितोयथा ॥ ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः ॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः ॥ योगीयुंजीतसततमात्मानंरहसिस्थितः ॥ एकाकीयतचित्तात्मानिराशीरपरिग्रहः ॥ शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः ॥ नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं ॥ तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः ॥ उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये ॥ समंकायशिरोग्रीवंधारयन्नचलंस्थिरः ॥ संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् ॥ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रतेस्थितः ॥ मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः ॥ युंजन्नेवंसदात्मानंयोगीनियतमानसः ॥ शांतिनिर्वाणपरमांमत्संस्थामधिगच्छतीति ॥ तत्त्वविवेकप्रकारापितत्रोक्तः ॥ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच ॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ॥ अप

सुखदुःखेसमेकृत्वाज्ञानवान्जायतेतदा॥ अथवाआत्मयोगेनतत्त्वानांचविवेकतः॥ २८॥ यथेष्टचारीसोवैस्याच्छरीरंचपतेद्यदा ॥ तदाशिवेविलीयेतमुक्तोविरहएवच ॥ २९॥ ज्ञानमूलंतथाध्यात्मंतस्यभक्तिःशिवस्यच॥ भक्तेश्चप्रेमसंप्रोक्तंप्रेम्णस्तुश्रवणंमतम् ॥ ३० ॥ श्रवणस्यसतांसंगःसंगस्यसद्गुरुःस्मृतः॥ संपन्नेचतथाज्ञानेमुक्तिर्भवतिनिश्चितम् ॥ ३१ ॥ इतिविज्ञानवान्सोवैशंभुमेवसदाभजेत् ॥ अनन्ययाचभक्त्यावैशंभुंप्राप्नोत्यसंशयम्॥ ३२॥

रेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां ॥ जीवभूतांमहाबाहोययेदंधार्यतेजगत् ॥ एतद्योनीनिभूतानिसर्वाणीत्युपधारयेति॥२८॥एवंकृतेयद्भवेत्तदाह ॥ शरीरमिति ॥ यदाशरीरंपतेत्तदैवशिवेलीयेततदैवमुक्तोभवेत् ॥ यदामुक्तस्तदातस्यसर्वबंधस्यात्यंतिकोविरहएवभवेन्नपुनरावृत्तिः ॥ नसपुनरावर्ततइतिश्रुतेरितिभावः ॥ २९ ॥ अतस्तत्त्वज्ञानस्यसाक्षात्कारणमात्मयोगएवेत्याह ॥ ज्ञानेति ॥ ज्ञानस्यशिवतत्त्वज्ञानस्यमूलंकारणमध्यात्मंपूर्वोक्तात्मयोगस्तस्यचमूलंशिवस्यभक्तिःस्मरणकीर्तनादिलक्षणा ॥ तादृश्याभक्तेःसाधनंभगवतिप्रेमपरानुरक्तिः ॥ इयमपिभक्तिरेव ॥ अथातोभक्तिजिज्ञासा ॥ सापरानुरक्तिरीश्वरइतिशांडिल्याचार्येणोक्तत्वात् ॥ तस्यप्रेम्णःकारणंवेदांतश्रवणं ॥ ३० ॥ तस्यकारणंसतांविदुषांसंगःतस्यमूलंसद्गुरुः ॥ अतएवयथाचसद्गुरुंप्राप्येतिपूर्वमवोक्तं ॥ संपन्नइति ॥ शिवतत्त्वज्ञानेसंपन्नेसतिमुक्तिर्भवत्येव ॥ तमेवंविद्वानमृतइहभवति ॥ ज्ञानादेवतुकैवल्यमित्यादिश्रुतिस्मृतिभ्यइत्यर्थः ॥ ३१ ॥ एवंविज्ञायशिवतत्त्वंजिज्ञासुःशिवमेवसदाभजेत्तेनशिवरूपःस्यादित्याह ॥ इतीतिअनन्ययाशिवमात्रविषयिण्या ॥ ३२ ॥

ननूक्तरीत्याभक्तिबीजेश्रवणेक्रियमाणेपिप्रारब्धवशात्कस्मिंश्चिद्विघ्नेजातेभक्तिर्नोत्पद्यतेचेच्छ्रवणादिव्यर्थंभवेदितिचेन्नेत्याह ॥ भवेदिति ॥ भक्त्यंतरायो विघ्नश्चेत्पुनर्बीजेनश्रवणादिसंस्कारेणसहितउत्पद्यतेजन्मलभते ॥ ततःपुनःशिवमेवभजेत् ॥ भक्त्यायुक्तः ॥ ३३ ॥ ततोंतेमुक्तिमाप्नोतीत्यर्थः ॥ तदप्युक्तं गीतायां ॥ अर्जुनउवाच ॥ अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः ॥ अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति ॥ अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथि ॥ एतंमेसंशयंकृष्णच्छेत्तुमर्हस्यशेषतः ॥ त्वदन्यःसंशयस्यास्यच्छेत्तानह्युपपद्यते ॥ श्रीभगवानुवाच ॥ पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते ॥ नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ॥ प्राप्यपुण्यकृतांलोकानुषित्वाशाश्वतीःसमाः ॥ शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते ॥ अथवायोगिनामेवकुलेभवतिधीमतां ॥ एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ॥ तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकं ॥ यततेचततोभूयः

भवेद्भक्त्यंतरायश्चेत्पुनर्बीजेनसंयुतः ॥ उत्पद्यतेचभक्त्यावैयुक्तःशंभुंभजेत्पुनः ॥ ३३ ॥ अंतेचमुक्तिमायातिनाऽत्रकार्याविचारणा ॥ अतोऽधिकोनदेवोस्तियंप्राप्यननिवर्तते ॥ ३४ ॥ सहस्रजन्मपर्यंततपोदानव्रतादिकम् ॥ कृतंपूर्वंभवेच्चेद्वैशिवेभक्तिःप्रजायते ॥ ३५ ॥ जायतेचतथाभक्तोजीवन्मुक्तोभवेत्तुसः ॥ इतिमेविविधंवाक्यमृषीणांचसमागमे ॥ ३६ ॥ निश्चित्यचपुनश्चैवकुमारैर्नारदादिभिः ॥ व्यासाग्रेकथितंतैस्तन्मत्वंव्यासेनपाठितम् ॥ ३७ ॥ प्रथमंविष्णवेदत्तंशिवेनलिंगसंभवे ॥ विष्णुनाब्रह्मणेदत्तंतेनैवसनकादिषु ॥ ३८ ॥ ततस्तैर्नारादायैवकथितंनारदेनच ॥ व्यासायचऋषिश्रेष्ठास्तेनमत्वंकृपालुना ॥ ३९ ॥

संसिद्धौकुरुनंदन ॥ पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसः ॥ जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्तते ॥ प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततोयातिपरांगतिमिति भक्त्यंतरामृतश्चेद्वैपुनर्बीजेनेतिपाठांतरम् ॥ अतःशिवादधिकउत्कृष्टः ॥ यंशिवंननिवर्तते ॥ पुनर्नसंसरति ॥ ३४ ॥ ज्ञानसाधनंभक्तिरप्यनंतजन्मसुकृतसाध्याकिमुतज्ञानंतथेत्याह ॥ सहस्रेति ॥ ३५ ॥ जायतइति ॥ यस्येदृशीभक्तिः प्रजायते सएवभक्तोजायतेसएवजीवन्मुक्तो भवेन्नतुलिंगमात्रधारीत्यर्थः ॥ उक्तस्यसर्वस्योपदेशपरंपरामाह ॥ इतीति ॥ उक्तंनानाविधंवाक्यजातंमत्कल्पितंनापितुप्रसिद्धैःकुमारैःस्कंदसनत्कुमारादिभिऋषीणांसमागमेनिश्चित्यव्यासायेकथितंनिवेदितंव्यासेनचमह्यंपाठितमितिसंबंधः ॥ कुमारैःसनकादिभिरितिपाठांतरं ॥ ३६ ॥ ३७ ॥ तैरपिकयोपदेशपरंपरया निश्चितमित्यपेक्षायामाह ॥ प्रथममिति ॥ लिंगसंभवेलिंगाविर्भावसमयेतेनैवब्रह्मणैव ॥ ३८ ॥ तैःसनकादिभिः ॥ तेनव्यासेनकृपालुनादीनोद्धरणेच्छुना ॥ ३९ ॥

॥ ४० ॥ तेशौनकादयः ॥ ४१ ॥ तंसूतंप्रणम्ययदूचुस्तदाह ॥ अस्माकमिति ॥ ४२ ॥ व्यासशिष्यःसूतःतदुक्तंव्यासोक्तं ॥ तानृषीन् ॥ ४३ ॥ अशुश्रूषवेश्रोतुमनिच्छवे ॥ ४४ ॥ पुराणानिब्राह्मादीनि ॥ इतिहासान्महाभारतादीन् ॥ ४५ ॥ एतत्शिवतत्वज्ञानात्मकं ॥ ४६ ॥ नयेदिति ॥

मयाचैवभवद्भिश्चभवद्भिर्लोकहेतवे ॥ ख्यापनीयंप्रयत्नेनशिवप्राप्तिकरंपरं ॥ ४० ॥ इतिवश्चसमाख्यातंयत्पृष्टोहंमुनीश्वराः ॥ एतच्छ्रुत्वाचतेसर्वेआनंदंपरमंगताः ॥ ४१ ॥ हर्षगद्गदयावाचाप्रणेमुस्तंपुनःपुनः ॥ अस्माकंचेतसोभ्रांतिर्गताचकृपयातव ॥ ४२ ॥ तच्छ्रुत्वाचपुनर्वाक्यमुवाचऋषिसत्तमान् ॥ व्यासशिष्यस्तदुक्तंहिकथयामासतांस्तदा ॥ ४३ ॥ नास्तिकायनवक्तव्यंश्रद्धाहीनायवातथा ॥ अभक्तायनवाच्यंहिनचाऽशुश्रूषवेबुधाः ॥ ४४ ॥ अष्टादशपुराणानिइतिहासान्यनेकशः ॥ वेदार्थाश्चाऽप्यनेकांश्चविचार्यचपुनःपुनः ॥ ४५ ॥ सारमेतत्समुद्धृत्यव्यासेनपरिभाषितम् ॥ अभक्तोभक्तिमायातिभक्तस्यभक्तिवर्धनम् ॥ ४६ ॥ एकवारंयदाश्रुत्वापापानिभस्मतांनयेत् ॥ पुनःश्रुतेचभक्तिश्चजायतेपुरुषस्यच ॥ ४७ ॥ पुनःश्रुतेविवृद्धिश्चभक्तेश्चैवनसंशयः ॥ पुनःश्रुतेशिवंसाक्षात्पश्यंतिचमुनीश्वराः ॥ ४८ ॥ पुनःश्रुतेभवंतोवैपश्यंतीतिसुनिश्चितम् ॥ तस्मात्पुनःपुनःश्राव्यंभुक्तिमुक्तिफलेप्सुभिः ॥ ४९ ॥ पंचावृत्तिःप्रकर्तव्याव्यासस्यवचनंत्विदम् ॥ समुद्दिश्यफलंश्रेष्ठंतत्तत्प्राप्नोत्यसंशयम् ॥ ५० ॥ नदुर्लभंतुतस्यैवयेनेदंश्रुतमुत्तमम् ॥ इत्युक्तास्तेऋषिश्रेष्ठाःशुश्रुवुःपरयामुदा ॥ ५१ ॥

श्रोतेतिशेषः भक्तिःशिवभक्तिस्तद्भक्तिर्जायतइत्यपिपाठः ॥ ४७ ॥ ४८ ॥ पुनरिति ॥ यतःपुनःश्रुतेभक्ताःसाक्षाच्छिवंपश्यंत्यतोभवंतोपिभक्ताःपुनःश्रुतेतंपश्येयुरितिसुतरांनिश्चितमित्यर्थः ॥ ४९ ॥ पंचावृत्तिः पंचवारमावृत्तिःसमुद्दिश्येति ॥ यत्फलंसमुद्दिश्यावृत्तिःक्रियतेतत्प्राप्नोतीत्यर्थः ॥ ५० ॥ तेशौनकादयः ॥ ५१ ॥

पुनःसूतआह ॥ पंचेति ॥ ततशिवतत्वप्रतिपादकंपुराणंश्रुत्वाराजानःपरांसिद्धिंगताइत्यन्वयः ॥ ५२ ॥ तस्यसूतस्य ॥ ५३ ॥ तंसूतंपूजयामासुःशौनकादयः ॥ ५४ ॥ ५५ ॥ ५६ ॥ एतदेवेति ॥ अत्रयन्निरूपणीयंतत्कैलाससंहितातिप्रतिपादयिष्यते अत्रइहलोके ॥ ५७ ॥ ५८ ॥ संमतंप्रमाणीकृतं

पंचकृत्वस्तुतच्छ्रुत्वालब्ध्वाचशिवदर्शनम् ॥ पुरातनाश्चराजानःश्रुत्वासिद्धिंपरांगताः ॥५२॥ इदानींश्रोष्यतेयोवैसवैसिद्धिंपरांव्रजेत् ॥ इतितस्यवचःश्रुत्वात्यानंदंपरमंगताः ॥५३ ॥ तंचैवपूजयामासुर्नानावस्त्रैःसुशोभनैः॥ चंदनैश्चविचित्रैश्चनानालंकरणैस्तथा ॥ ५४ ॥ नमस्कारैःस्तवैश्चैवस्वस्तिवाचनपूर्वकम् ॥ आशीर्भिर्विविधैश्चैववर्द्धयामासुरंजसा ॥ ५५ ॥ संतुष्टाश्चैवतेसर्वेसंतुष्टःसूतएवच ॥ परस्परंचसंहृष्टाःशिवभक्तिपरायणाः ॥५६॥ एतदेवपरंमत्वानमंतिचभजंतिच ॥ एवंचशृणुयादत्रसर्वान्कामानवाप्नुयात् ॥५७॥ अंतेभक्तिपरांप्राप्यमुक्तिंवैप्राप्नुयान्नरः॥ लिखित्वायस्तुदद्याद्वैपुराणंशिवसंज्ञितम्॥५८ ॥हेमवृषसमायुक्तंचतुर्वेदैश्चसंमतम् ॥ तस्यवासोभवेन्नित्यंशिवलोकेनसंशयः ॥५९॥ सतुशिवसमाकारंलभतेनाऽत्रसंशयः ॥ तस्मात्सर्वप्रयत्नेनदीयतांशैवकंद्विजाः॥ ६० ॥ तत्रापिदक्षिणादेयासुवर्णानांचतुष्टयम् ॥ एवंददातियोभक्त्याशिवलोकेमहीयते ॥ ६१ ॥ तत्रस्थोनच्यवेत्क्वापिशिवसायुज्यमाप्नुयात् ॥ वाचकंतोषयेद्दानैर्वस्त्रालंकारभूषणैः ॥६२ ॥ मिष्टान्नभोजनैर्भक्त्यासर्वकामार्थसिद्धये॥ शिवेभक्तिःशिवेभक्तिःशिवेभक्तिर्भवेभवे ॥ ६३ ॥ इतिश्रीशिवमहापुराणेज्ञानसंहितायांज्ञानप्रकरणनिरूपणंनामाष्टसप्ततितमोऽध्यायः ॥ ७८॥

॥ ५९ ॥ शैवकंशिवपुराणपुस्तकं ॥ ६० ॥ सुवर्णानांकर्षपरिमाणानां ॥ ६१ ॥ पुनःसंसाराभावमाह ॥ तत्रस्थइति ॥ वाचकंपौराणिकं ॥ ६२ ॥ तस्माच्छिवभक्तिःसदाकर्तव्येत्याह ॥ शिवइति॥६३ ॥ इतिश्रीज्ञानसंहिताटीकायांसारबोधिन्यामष्टसप्तसप्ततितमोऽध्यायः ॥७८॥ समाप्तेयंज्ञानसंहिता ॥

शैवमादिपुराणंयच्छ्रीमद्भागवतादिषु॥ चतुर्विंशतिसाहस्रंकथितंतद्धिसांप्रतं ॥ दुर्लभंप्रायशोलोकेशिवभ
क्तैर्विलोपतः ॥ तथापिशिवभक्तैस्तत्कैश्चिदन्वेषितंबहु ॥ तदात्रिचतुराण्येतत्पुस्तकान्याहृतानितैः ॥ लब्ध
स्ययावतस्तस्यवर्ततेसंहिताश्चषट् ॥ कैलाससंहितापूर्वभागस्तत्रनलभ्यते ॥ तल्लाभायापिबहुधाप्रयत्नःक्रि
यतेऽधुना॥ तत्रेप्सुभिस्तद्विवृतौप्रेरितःशिवपूजकैः॥ सकलेष्वपिशास्त्रेषुपारगाणांमहात्मनां॥ कालेकरोपा
भिधानांश्रीराजारामशास्त्रिणां॥ रानडोपाभिधानानांतथाश्रीबालशास्त्रिणां ॥ श्रीमद्गणेशतनयोबोडसो
पाभिधानकः॥ राजारामाभिधःकाशीवासीशिवपरायणः॥ शिष्योप्यल्पधियाशास्त्रंकिंचिदेवाप्तवांस्ततः॥
अशक्तोपिप्रवृत्तोहमत्रविह्वलतांगतः॥ पारंनीतोस्यकार्यस्यश्रीगंगाधरशास्त्रिभिः ॥ यैरत्रविवृतासम्यक्पु
राणेधर्मसंहिता ॥ तथाश्रीढुंढिराजाख्यबुधैर्धर्माधिकारिभिः ॥ सनत्पूर्वकुमाराख्यसंहिताविवृताचयैः ॥
आरब्धाविवृतिर्ज्ञानसंहिताप्रभृतिक्रमात् ॥ मयातुपूर्वंव्याख्याताःपंचाध्यायाःक्रमादिह ॥ ततोन्येनैवविं
दुपाख्यध्यायाविवृतास्तथा ॥ आपंचचत्वारिंशत्तेततस्तुविवृतंमया ॥ अविद्यामूलसंसारनिर्वाहोद्यमयो
गतः॥ कथंचिदपिकर्मैतत्प्रायशःपूर्णतांगतं॥ ईश्वरस्यगुरूणांचकृपयैवेतिनिश्चितं॥ किर्लोस्करोपाभिधानो
रामचंद्रात्मजःसुधीः॥गणेशोनीतिकुशलःशैवानांपरितुष्टये॥तथावेंद्रोपाभिधानत्र्यंबकस्यतनूजनुः॥गोपा
लआभ्यांमहतायत्नेनांकितमादरात्॥ नप्रतिष्ठाधनाद्यर्थमेतत्कार्यंकृतंमया॥ केवलंशिवभक्तानांसंतोषण
कृतेकृतं॥ तत्रन्यूनातिरिक्तंयज्जातंस्यात्क्षम्यतांबुधाः॥ संशोधनीयंतत्सर्वंप्रार्थनेयंपुनःपुनः ॥ शुद्धिपत्रेपिय
त्किंचिदिदंसंशोधयिष्यते॥ अनेनकर्मणादेवोभगवान्प्रीयतांशिवः॥

हें पुस्तक मुंबईंत गणेशरामचंद्र किर्लोस्कर हायकोर्ट वकील व गोपाळत्र्यंबक बेंद्रे यांच्या हुकुमावरून गणपत कृष्णाजी यांचे
छापखान्याचे मालक आत्माराम कान्होबा यानीं छापिलें. शके १८०६ मार्गशीर्ष कृष्ण ११ शनिवार.

सन १८६७ च्या २५ व्या आक्टा प्रमाणें नोंदलें आहे.

॥ इति श्रीशिवमहापुराणं संपूर्णम् ॥